# Shri Mahabharata Tatparyanirnayah

# શ્રી મહાભારતતાત્પર્યનિર્ણયઃ

## Document Information

Text title : Mahabharata Tatparyanirnaya

File name : mahAbhAratatAtparyanirNayaH.itx

Category : major_works, raama, madhvAchArya

Location : doc_z_misc_major_works

Author : Anandatirtha or Madhwacharya

Latest update : October 7, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2025

*sanskritdocuments.org*

# શ્રી મહાભારતતાત્પર્યનિર્ણયઃ

ૐ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતઃ
શ્રી મહાભારતતાત્પર્યનિર્ણયઃ

## અથ પ્રથમોઽધ્યાયઃ ।

(સર્વશાસ્ત્રતાત્પર્યનિર્ણયઃ )
ૐ । નારાયણાય પરિપૂર્ણગુણાર્ણવાય વિશ્વોદયસ્થિતિલયોન્નિયતિપ્રદાય ।
જ્ઞાનપ્રદાય વિબુધાસુરસૌખ્યદુઃખસત્કારણાય વિતતાય નમો નમસ્તે ॥ ૧.૧॥

આસીદુદારગુણવારિધિરપ્રમેયો નારાયણઃ પરતમઃ પરમાત્સ એકઃ ।
સં શાન્તસં વિદખિલં જઠરે નિધાય લક્ષ્મીભુજાન્તરગતઃ સ્વરતોઽપિ ચાગ્રે ॥ ૧.૨॥

તસ્યોદરસ્થજગતઃ સદમન્દસાન્દ્રસ્વાનન્દતુષ્ટવપુષોઽપિ રમારમસ્ય ।
ભૂત્યૈ નિજાશ્રિતજનસ્ય હિ સૃજ્યસૃષ્ટાવીક્ષા બભૂવ પરનામનિમેષકાન્તે ॥ ૧.૩॥

દૃષ્ટ્વા સ ચેતનગણાન્ જઠરે શયાનાનાનન્દમાત્રવપુષઃ સૃતિવિપ્રમુક્તાન્ ।
ધ્યાનં ગતાન્ સૃતિગતાંશ્ચ સુષુપ્તિસં સ્થાન્ બ્રહ્માદિકાન્ કલિપરાન્મનુજાં સ્તથૈક્ષત્ ॥ ૧.૪॥

સ્રક્ષ્યે હિ ચેતનગણાન્ સુખદુઃખમધ્યસમ્પ્રાપ્તયે તનુભૃતાં વિહૃતિં મમેચ્છન્ ।
સોઽયં વિહાર ઇહ મે તનુભૃત્સ્વભાવસમ્ભૂતયે ભવતિ ભૂતિકૃદેવ ભૂત્યાઃ ॥ ૧.૫॥

ઇત્થં વિચિન્ત્ય પરમઃ સ તુ વાસુદેવનામા બભૂવ નિજમુક્તિપદપ્રદાતા ।
તસ્યાજ્ઞયૈવ નિયતાઽથ રમાઽપિ રૂપં બભ્રે દ્વિતીયમપિ યત્પ્રવદન્તિ માયામ્ ॥ ૧.૬॥

સઙ્કર્ષણશ્ચ સ બભૂવ પુનઃ સુનિત્યઃ સં હારકારણવપુસ્તદનુજ્ઞયૈવ ।
દેવી જયેત્યનુ બભૂવ સ સૃષ્ટિહેતોઃ પ્રદ્યુમ્નતામુપગતઃ કૃતિતાં ચ દેવી ॥ ૧.૭॥

સ્થિત્યૈ પુનઃ સ ભગવાનનિરુદ્ધનામા દેવી ચશાન્તિરભવચ્છરદાં સહસ્રમ્ ।
સ્થિત્વા સ્વમૂર્તિભિરમૂભિરચિન્ત્યશક્તિઃ પ્રદ્યુમ્નરૂપક ઇમાંશ્ચરમાત્મનેઽદાત્ ॥ ૧.૮॥

નિર્દેહકાન્ સ ભગવાનનિરુદ્ધનામા જીવાન્ સ્વકર્મસહિતાનુદરે નિવેશ્ય ।

ચક્રેઽથ દેહસહિતાન્ ક્રમશઃ સ્વયમ્ભુપ્રાણાત્મશેષગરુડેશમુખાન્ સમગ્રાન્ ॥ ૧.૯॥

પઞ્ચાત્મકઃ સ ભગવાન્ દ્વિષડાત્મકોઽભૂત્પઞ્ચદ્વયી શતસહસ્રપરોઽમિતશ્ચ ।
એકઃ સમોઽપ્યખિલદોષસમુજ્ઝિતોઽપિ સર્વત્ર પૂર્ણગુણકોઽપિ બહૂપમોઽભૂત્ ॥ ૧.૧૦॥

નિર્દોષપૂર્ણગુણવિગ્રહ આત્મતન્ત્રો નિશ્ચેતનાત્મકશરીરગુણૈશ્ચ હીનઃ ।
આનન્દમાત્રકરપાદમુખોદરાદિઃ સર્વત્ર ચ સ્વગતભેદવિવર્જિતાત્મા ॥ ૧.૧૧॥

કાલાચ્ચ દેશગુણતોઽસ્ય ન ચાઽદિરન્તો વૃદ્ધિક્ષયૌ ન તુ પરસ્ય સદાતનસ્ય ।
નૈતાદૃશઃ ક્વ ચ બભૂવ ન ચૈવ ભાવ્યો નાસ્ત્યુત્તરઃ કિમુ પરાત્પરમસ્ય વિષ્ણોઃ ॥ ૧.૧૨॥

સર્વજ્ઞ ઈશ્વરતમઃ સ ચ સર્વશક્તિઃ પૂર્ણાવ્યયાત્મબલચિત્સુખવીર્યસારઃ ।
યસ્યાઽજ્ઞયા રહિતમિન્દિરયા સમેતં બ્રહ્મેશપૂર્વકમિદં ન તુ કસ્ય ચેશમ્ ॥ ૧.૧૩॥

આભાસકોઽસ્ય પવનઃ પવનસ્ય રુદ્રઃ શેષાત્મકો ગરુડ એવ ચ શક્રકામૌ ।
વીન્દ્રેશયોસ્તદપરે ત્વનયોશ્ચ તેષામૃષ્યાદયઃ ક્રમશ ઊનગુણાઃ શતાં શાઃ ॥ ૧.૧૪॥

આભાસકા ત્વથ રમાઽસ્ય મરુત્સ્વરૂપાચ્છ્રેષ્ઠાઽપ્યજાત્તદનુ ગીઃ શિવતો વરિષ્ઠા ।
તસ્યા ઉમા વિપતિની ચ ગિરસ્તયોઽસ્તુ શચ્યાદિકાઃ ક્રમશ એવ યથા પુમાં સઃ ॥ ૧.૧૫॥

તાભ્યશ્ચ તે શતગુણૈર્દશતો વરિષ્ઠાઃ પઞ્ચોત્તરૈરપિ યથાક્રમતઃ શ્રુતિસ્થાઃ ।
શબ્દો બહુત્વવચનઃ શતમિત્યતશ્ચ શ્રુત્યન્તરેષુ બહુધોક્તિવિરુદ્ધતા ન ॥ ૧.૧૬॥

તેષાં સ્વરૂપમિદમેવ યતોઽથ મુક્તા અપ્યેવમેવ સતતોચ્ચવિનીચરૂપાઃ ।
શબ્દઃ શતં દશસહસ્રમિતિ સ્મ યસ્માત્તસ્માન્ન હીનવચનોઽથ તતોઽગ્ર્યરૂપાઃ ॥ ૧.૧૭॥

એવં નરોત્તમપરાસ્તુ વિમુક્તિયોગ્યા અન્યે ચ સં સૃતિપરા અસુરાસ્તમોગાઃ ।
એવં સદૈવ નિયમઃ ક્વચિદન્યથા નયાવન્ન પૂર્તિરુત સં સૃતિગાઃ સમસ્તાઃ ॥ ૧.૧૮॥

પૂર્તિશ્ચ નૈવ નિયમાદ્ભવિતા હિ યસ્માત્તસ્માત્સમાપ્તિમપિ યાન્તિ ન જીવસઙ ન્ઘાઃ ।
આનન્ત્યમેવ ગણશોઽસ્તિ યતો હિ તેષામિત્થં તતઃ સકલકાલગતા પ્રવૃત્તિઃ ॥ ૧.૧૯॥

એતૈઃ સુરાદિભિરતિપ્રતિભાદિયુક્તૈર્યુક્તૈઃ સહૈવ સતતં પ્રવિચિન્તયદ્ભિઃ ।
પૂર્તેરચિન્ત્યમહિમઃ પરમઃ પરાત્મા નારાયણોઽસ્ય ગુણવિસ્તૃતિરન્યગા ક્વ ॥ ૧.૨૦॥

સામ્યં ન ચાસ્ય પરમસ્ય ચ કેન ચાઽપ્યં મુક્તેન ચ ક્વચિદતસ્ત્વભિદા કુતોઽસ્ય ।
પ્રાપ્યેત ચેતનગણૈઃ સતતાસ્વતન્ત્રૈર્નિત્યસ્વતન્ત્રવપુષઃ પરમાત્પરસ્ય ॥ ૧.૨૧॥

અર્થોઽયમેવ નિખિલૈરપિ વેદવાક્યૈ રામાયણૈઃ સહિતભારતપઞ્ચરાત્રૈઃ ।
અન્યૈશ્ચ શાસ્ત્રવચનૈઃ સહતત્ત્વસૂત્રૈર્નિર્ણીયતે સહૃદયં હરિણા સદૈવ ॥ ૧.૨૨॥

નારાયણસ્ય ન સમઃઽઽપુરુષોત્તમોઽહં
જીવાક્ષરે હ્યતિગતોઽસ્મિ તતો “ઽન્યદાર્તમ્”(૧) ।
“મુક્તોઽપસૃપ્ય”(૨) ઇહ નાસ્તિ કુતશ્ચ કશ્ચિત્
“નાનેવ”(૩) ધર્મપૃથગાત્મદૃગેત્યધો હિ ॥ ૧.૨૩॥

“આભાસ એવ”(૪) પૃથગીશત એષ જીવો
મુક્તસ્ય નાસ્તિ જગતો વિષયે તુ શક્તિઃ ।
માત્રાપરોઽસિ ન તુ તેઽશ્નુવતે મહિત્વં
ષાડ્ગુણ્યવિગ્રહઽઽસુપૂર્ણગુણૈકદેહઃ ॥ ૧.૨૪॥

માહાત્મ્યદેહઽઽસૃતિમુક્તિગતેઽઽશિવશ્ચ બ્રહ્મા
ચ તદ્ગુણગતૌ ન કથઞ્ચનેશૌ ।
ન શ્રીઃ કુતસ્તદપરેઽઽસ્ય સુખસ્ય માત્રામણ્
સ્નન્તિ મુક્તસુગણાશ્ચ શતાવરેણ ॥ ૧.૨૫॥

“આભાસકાભાસપરાવભાસરૂપાણ્યજસ્રાણિ ચ ચેતનાનામ્ ।
વિષ્ણોઃ સદૈવાતિ વશાત્કદાપિ ગચ્છન્તિ કેશાદિગણા ન મુક્તૌ”(૫) ॥ ૧.૨૬॥

યસ્મિન્ પરેઽન્યેઽપ્યજજીવકોશા
નાહં પરાયુર્ન મરીચિમુખ્યાઃ ।
જાનન્તિ યદ્ગુણગણાન્ન રમાદયોઽપિ
નિત્યસ્વતન્ત્ર ઉત કોઽસ્તિ તદન્ય ઈશઃ ॥ ૧.૨૭॥

નૈવૈક એવ પુરુષઃ પુરુષોત્તમોઽસાવેકહ્
કુતઃ સ પુરુષોઽઽયત એવ જાત્યા ।
અર્થાત્શ્રુતેશ્ચ ગુણતો નિજરૂપતશ્ચ
નિત્યાન્ય એવ કથમસ્મિ સ ઇત્યપિ સ્યાત્ ॥ ૧.૨૮॥

(૧) બૃ. ઉ. ૫.૫.૧

(૨) બ્ર. સૂ. ૧.૩.૨

(૩) ક. ઉ. ૪.૧૧

(૪) બ્ર. સૂ. ૨.૩.૫૦

(૫) “અભાસક” ઇત્યાદિ શ્રુતિવચનમેવ । ન સ્વવચનં ભા. પ્ર ।

સર્વોત્તમો હરિરિદં તુ તદાજ્ઞયૈવ
ચેત્તું ક્ષમં સ તુ હરિઃ પરમસ્વતન્ત્રઃ ।
પૂર્ણાવ્યયાગણિતનિત્યગુણાર્ણવોઽસૌ

ઇત્યેવ વેદવચનાનિ પરોક્તયશ્ચ ॥ ૧.૨૯॥

“ઋગાદયશ્ચ ચત્વારઃ પઞ્ચરાત્રં ચ ભારતમ્ ।
મૂલરામાયણં બ્રહ્મસૂત્રં માનં સ્વતઃ સ્મૃતમ્ ॥ ૧.૩૦॥

અવિરુદ્ધં ચ યત્ત્વસ્ય પ્રમાણં તચ્ચ નાન્યથા ।
એતદ્વિરુદ્ધં યત્તુ સ્યાન્ન તન્માનં કથઞ્ચન ॥ ૧.૩૧॥

વૈષ્ણવાનિ પુરાણાનિ પઞ્ચરાત્રાત્મકત્વતઃ ।
પ્રમાણાન્યેવ મન્વાદ્યાઃ સ્મૃતયોઽપ્યનુકૂલતઃ ॥ ૧.૩૨॥

એતેષુ વિષ્ણોરાધિક્યમુચ્યતેઽન્યસ્ય ન ક્વચિત્ ।
અતસ્તદેવ મન્તવ્યં નાન્યથા તુ કથઞ્ચન ॥ ૧.૩૩॥

મોહાર્થાન્યન્યશાસ્ત્રાણિ કૃતાન્યેવાઽજ્ઞયા હરેઃ ।
અતસ્તેષૂક્તમગ્રાહ્યમસુરાણાં તમોગતેઃ ॥ ૧.૩૪॥

યસ્માત્કૃતાનિ તાનીહ વિષ્ણુનોક્તૈઃ શિવાદિભિઃ ।
એષાં યન્ન વિરોધિ સ્યાત્તત્રોક્તં તન્ન વાર્યતે ॥ ૧.૩૫॥

વિષ્ણ્વાધિક્યવિરોધીનિ યાનિ વેદવચાં સ્યપિ ।
તાનિ યોજ્યાન્યાનુકૂલ્યાદ્વિષ્ણ્વાધિક્યસ્ય સર્વશઃ ॥ ૧.૩૬॥

અવતારેષુ યત્કિઞ્ચિદ્દર્શયેન્નરવદ્ધરિઃ ।
તચ્ચાસુરાણાં મોહાય દોષા વિષ્ણોર્નહિ ક્વચિત્ ॥ ૧.૩૭॥

અજ્ઞત્વં પારવશ્યં વા વેધભેદાદિકં તથા ।
તથા પ્રાકૃતદેહત્વં દેહત્યાગાદિકં તથા ॥ ૧.૩૮॥

અનીશત્વં ચ દુઃખિત્વં સામ્યમન્યૈશ્ચ હીનતામ્ ।
પ્રદર્શયતિ મોહાય દૈત્યાદીનાં હરિઃ સ્વયમ્ ॥ ૧.૩૯॥

ન તસ્ય કશ્ચિદ્દોષોઽસ્તિ પૂર્ણાખિલગુણો હ્યસૌ ।
સર્વદેહસ્થરૂપેષુ પ્રાદુર્ભાવેષુ ચેશ્વરઃ ॥ ૧.૪૦॥

બ્રહ્માદ્યભેદઃ સામ્યં વા કુતસ્તસ્ય મહાત્મનઃ ।
યદેવં વાચકં શાસ્ત્રં તદ્ધિ શાસ્ત્રં પરં મતમ્ ॥ ૧.૪૧॥

નિર્ણયાયૈવ યત્પ્રોક્તં બ્રહ્મસૂત્રં તુ વિષ્ણુના ।
વ્યાસરૂપેણ તદ્ગ્રાહ્યં તત્રોક્તાઃ સર્વનિર્ણયાઃ ॥ ૧.૪૨॥

યથાર્થવચનાનાં ચ મોહાર્થાનાં ચ સં શયમ્ ।
અપનેતું હિ ભગવાન્ બ્રહ્મસૂત્રમચીક્લૃપત્ ॥ ૧.૪૩॥

તસ્માત્સૂત્રાર્થમાગૃહ્ય કર્તવ્યઃ સર્વનિર્ણયઃ ।
સર્વદોષવિહીનત્વં ગુણૈઃ સર્વૈરુદીર્ણતા ॥ ૧.૪૪॥

અભેદઃ સર્વરૂપેષુ જીવભેદઃ સદૈવ ચ ।
વિષ્ણોરુક્તાનિ સૂત્રેષુ સર્વવેદેઽખ્યતા તથા ॥ ૧.૪૫॥

તારતમ્યં ચ મુક્તાનાં વિમુક્તિર્વિધયા તથા ।
તસ્માદેતદ્વિરુદ્ધં યન્મોહાય તદુદાહૃતમ્ ॥ ૧.૪૬॥

તસ્માદ્યે યે ગુણા વિષ્ણોર્ગ્રાહ્યાસ્તે સર્વ એવ તુ" ।
ઇત્યાદ્યુક્તં ભગવતા ભવિષ્યત્પર્વણિ સ્ફુટમ્ ॥ ૧.૪૭॥

"એષ મોહં સૃજામ્યાશુ યો જનાન્મોહયિષ્યતિ ।
ત્વં ચ રુદ્ર મહાબાહો મોહશાસ્ત્રાણિ કારય ॥ ૧.૪૮॥

અતત્થ્યાનિ વિતત્થ્યાનિ દર્શયસ્વ મહાભુજ ।
પ્રકાશં કુરુ ચાઽત્માનમપ્રકાશં ચ માં કુરુ" ॥ ૧.૪૯॥

ઇતિ વારાહવચનં બ્રહ્માણ્ડોક્તં તથાઽપરમ્ ।
"અમોહાય ગુણા વિષ્ણોરાકારશ્ચિચ્છરીરતા ॥ ૧.૫૦॥

નિર્દોષત્વં તારતમ્યં મુક્તાનામપિ ચોચ્યતે ।
એતદ્વિરુદ્ધં યત્સર્વં તન્મોહાય ઇતિ નિર્ણયઃ" ॥ ૧.૫૧॥

સ્કાન્દેઽપ્યુક્તં શિવેનૈવ ષણ્મુખાયૈવ સાદરમ્ ।
શિવશાસ્ત્રેઽપિ તદ્ગ્રાહ્યં ભગવચ્છાસ્ત્રયોગિ યત્ ॥ ૧.૫૨॥

"પરમો વિષ્ણુરેવૈકસ્તજ્જ્ઞાનં મોક્ષસાધનમ્ ।
શાસ્ત્રાણાં નિર્ણયસ્ત્વેષ તદન્યન્મોહનાય હિ ॥ ૧.૫૩॥

જ્ઞાનં વિના તુયા મુક્તિઃ સામ્યં ચ મમ વિષ્ણુના ।
તીર્થાઽદિમાત્રતો જ્ઞાનં મમાઽધિક્યં ચ વિષ્ણુતઃ ॥ ૧.૫૪॥

અભેદશ્ચાસ્મદાદીનાં મુક્તાનાં હરિણા તથા ।
ઇત્યાદિ સર્વં મોહાય કથ્યતે પુત્ર નાન્યથા"(૬) ॥ ૧.૫૫॥

ઉક્તં પાદ્મપુરાણે ચશૈવ એવ શિવેન તુ ।
યદુક્તં હરિણા પૂર્વમુમાયૈ પ્રાહ તદ્ધરઃ ॥ ૧.૫૬॥

“ત્વામારાધ્ય તથા શમ્ભો ગ્રહીષ્યામિ વરં સદા ।
દ્વાપરાઽદૌ યુગે ભૂત્વા કલયા માનુષાઽદિષુ ॥ ૧.૫૭॥

સ્વાઽગમૈઃ કલ્પિતૈસ્ત્વં ચ જનાન્મદ્વિમુખાન્ કુરુ ।
માં ચ ગોપાય યેન સ્યાત્સૃષ્ટિરેષોત્તરાધરા”(૭) ॥ ૧.૫૮॥

ન ચ વૈષ્ણવશાસ્ત્રેષુ વેદેષ્વપિ હરેઃ પરઃ ।
ક્વચિદુક્તોઽન્યશાસ્ત્રેષુ પરમો વિષ્ણુરીરિતઃ ॥ ૧.૫૯॥

નિર્દોષત્વાચ્ચ વેદાનાં વેદોક્તં ગ્રાહ્યમેવ હિ ।
વેદેષુ ચ પરો વિષ્ણુઃ સર્વસ્માદુચ્યતે સદા ॥ ૧.૬૦॥

“અસ્ય દેવસ્ય મીલ્। હુષો વયા વિષ્ણોરેષસ્ય પ્રભૃથે હવિર્ભિઃ ।
વિદે હિ રુદ્રો રુદ્રિયં મહિત્વં યાસિષ્ટં વર્તિરશ્વનાવિરાવત્”(૮) ॥ ૧.૬૧॥

(૬) પદ્મપુરાણ ૬.૭૧.૧૧૪૧૧૬
(૭) પદ્મપુરાણ ૬.૭૧.૧૦૬૧૦૭
(૮) ઋગ્વેદ ૭.૪૦.૫

“સ્તુહિ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્” (૯) ।
“યં કામયે તં તમુગ્રં કૃણોમિ તં બ્રહ્માણં તમૃષિં તં સુમેધામ્”(૧૦) ॥ ૧.૬૨॥

“એકો નારાયણ આસીન્ન બ્રહ્મા ન ચશઙ્કરઃ” ।
“વાસુદેવો વા ઇદમગ્ર આસીન્ન બ્રહ્મા ન ચશઙ્કરઃ” ॥ ૧.૬૩॥

“યદા પશ્યઃ પશ્યતે રુગ્મવર્ણં કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્ ।
તદા વિદ્વાન્ પુણ્યપાપે વિધૂય નિરઞ્જનઃ પરમં સામ્યમુપૈતિ”(૧૧) ॥ ૧.૬૪॥

“યો વેદ નિહિતં ગુહાયાં પરમે વ્યોમન્ ।
સોઽશ્નુતે સર્વાન્ કામાન્ સહ બ્રહ્મણા વિપશ્ચિતા”(૧૨) ॥ ૧.૬૫॥

“પ્રધાન્વસ્ય મહતો મહાનિ સત્યાસત્યસ્ય કરણાનિ વોચમ્”(૧૩) ।
“સત્યમેનમનુ વિશ્વે મદન્તિ રાતિં દેવસ્ય ગૃણતો મઘોનઃ” (૧૪) ॥ ૧.૬૬॥

“યચ્ચિકેત સત્યમિત્તન્ન મોઘં વસુ સ્પાર્હમુત જેતોઽત દાતા”(૧૫) ।
“સત્યઃ સો અસ્ય મહિમા ગૃણે શવો યજ્ઞેષુ વિપ્રરાજ્યે”(૧૬) ॥ ૧.૬૭॥

“સત્યા વિષ્ણોર્ગુણાઃ સર્વે સત્યા જીવેશયોર્ભિદા ।
સત્યો મિથો જીવભેદઃ સત્યં ચ જગદીદૃશમ્ ॥ ૧.૬૮॥

અસત્યઃ સ્વગતો ભેદો વિષ્ણોર્નાન્યદસત્યકમ્ ।
જગત્પ્રવાહઃ સત્યોઽયં પઞ્ચભેદસમન્વિતઃ ॥ ૧.૬૯॥

જીવેશયોર્ભિદા ચૈવ જીવભેદઃ પરસ્પરમ્ ।
જડેશયોર્જડાનાં ચ જડજીવભિદા તથા ॥ ૧.૭૦॥

પઞ્ચભેદા ઇમે નિત્યાઃ સર્વાવસ્થાસુ સર્વશઃ ।

(૯) ઋગ્વેદ ૨.૩૩.૧૧

(૧૦) ઋગ્વેદ ૧૦.૧૨૫.૫

(૧૧) મુ. ઉ. ૩.૧.૩

(૧૨) તૈ. ઉ. ૨.૧

(૧૩) ઋગ્વેદ ૨.૧૫.૧

(૧૪) ઋગ્વેદ ૪.૧૭.૫

(૧૫) ઋગ્વેદ ૧૦.૫૫.૬

(૧૬) ઋગ્વેદ ૮.૩.૪

મુક્તાનાં ચ ન હીયન્તે તારતમ્યં ચ સર્વદા ॥ ૧.૭૧॥

ક્ષિતિપા મનુષ્યગન્ધર્વા દૈવાશ્ચ પિતરશ્ચિરાઃ ।
આજાનજાઃ કર્મજાશ્ચ દેવા ઇન્દ્રઃ પુરન્દરઃ ॥ ૧.૭૨॥

રુદ્રઃ સરસ્વતી વાયુર્મુક્તાઃ શતગુણોત્તરાઃ ।
એકો બ્રહ્મા ચ વાયુશ્ચ વીન્દ્રો રુદ્રસમસ્તથા ।
એકો રુદ્રસ્તથા શેષો નકશ્ચિદ્વાયુના સમઃ ॥ ૧.૭૩॥

મુક્તેષુ શ્રીસ્તથા વાયોઃ સહસ્રગુણિતા ગુણૈઃ ।
તતોઽનન્તગુણો વિષ્ણુર્ન કશ્ચિત્તત્સમઃ સદા” ॥ ૧.૭૪॥

ઇત્યાદિ વેદવાક્યં વિષ્ણોરુત્કર્ષમેવ વક્ત્યુચ્ચૈઃ ।
તાત્પર્યં મહદત્રેત્યુક્તં “યો મામ્”(૧૭) ઇતિ સ્વયં તેન ॥ ૧.૭૫॥

“ભૂમ્નો જ્યાયસ્ત્વમ્”(૧૮) ઇતિ હ્યુક્તં સૂત્રેષુ નિર્ણયાત્તેન ॥ ૧૯
તત્પ્રીત્યૈવ ચ મોક્ષઃ પ્રાપ્યસ્તેનૈવ નાન્યેન ॥ ૧.૭૬॥

“નાયમાત્મા પ્રવચનેન લભ્યો ન મેધયા ન બહુના શ્રુતેન ।
યમેવૈષ વૃણુતે તેન લભ્યસ્તસ્યૈષ આત્મા વિવૃણુતે તનું સ્વામ્”(૨૦) ॥ ૧.૭૭॥

“વિષ્ણુર્હિ દાતા મોક્ષસ્ય વાયુશ્ચ તદનુજ્ઞયા ।
મોક્ષો જ્ઞાનં ચ ક્રમશો મુક્તિગો ભોગ એવ ચ ॥ ૧.૭૮॥

ઉત્તરેષાં પ્રસાદેન નીચાનાં નાન્યથા ભવેત્ ।
સર્વેષાં ચ હરિર્નિત્યં નિયન્તા તદ્વશાઃ પરે ॥ ૧.૭૯॥

તારતમ્યં તતો જ્ઞેયં સર્વોચ્ચત્વં હરેસ્તથા ।
એતદ્વિના ન કસ્યાપિ વિમુક્તિઃ સ્યાત્કથઞ્ચન ॥ ૧.૮૦॥

(૧૭) ભગવદ્ગીતા ૧૫.૧૯
(૧૮) બ્ર. સૂ. ૩.૩.૫૯
(૧૯) “ઇતિ” શબ્દઃ પ્રકારવચનઃ । અનેન પ્રકારેણ “જન્માદ્યસ્ય યતઃ “(બ્ર. સૂ. ૧.૧.૨),
“દ્યુભ્વાદ્યાયતનં સ્વશબ્દાત્” (બ્ર. સૂ. ૧.૩.૧), “અક્ષરમમ્બરાન્ધૃતેઃ “(બ્ર. સૂ. ૧.૩.૧૦),
“સર્વોપેતા ચ તદ્દર્શનાદ્” (બ્ર. સૂ. ૨.૧.૩૧)ઇત્યાદિ સૂત્રેષુ ઉક્તં , ઇતિ ભાવઃ ।
અતઃ “સૂત્રેષુ” ઇતિ બહુવચનં ભા. પ્ર ।
(૨૦) ક. ઉ. ૧.૨.૨૩, મુ. ઉ. ૩.૨.૩
પઞ્ચભેદાંશ્ચ વિજ્ઞાય વિષ્ણોઃ સ્વાભેદમેવ ચ ।
નિર્દોષત્વં ગુણાદ્રેકં જ્ઞાત્વા મુક્તિર્નચાન્યથા ॥ ૧.૮૧॥

અવતારાન્ હરેર્જ્ઞાત્વા નાવતારા હરેશ્ચ યે ।
તદાવેશાં સ્તથા સમ્યગ્જ્ઞાત્વા મુક્તિર્નચાન્યથા ॥ ૧.૮૨॥

સૃષ્ટિરક્ષાઽહૃતિજ્ઞાનનિયત્યજ્ઞાનબન્ધનાન્ ।
મોક્ષં ચ વિષ્ણુતસ્ત્વેવ જ્ઞાત્વા મુક્તિર્નચાન્યથા ॥ ૧.૮૩॥

વેદાંશ્ચ પઞ્ચરાત્રાણિ સેતિહાસપુરાણકાન્ ।
જ્ઞાત્વા વિષ્ણુપરાનેવ મુચ્યતે નાન્યથા ક્વચિત્ ॥ ૧.૮૪॥

માહાત્મ્યજ્ઞાનપૂર્વસ્તુ સુદૃઢઃ સર્વતોઽધિકઃ ।
સ્નેહો ભક્તિરિતિ પ્રોક્તઃ તયા મુક્તિર્નચાન્યથા ॥ ૧.૮૫॥

ત્રિવિધા જીવસઽ ન્ઘાસ્તુ દેવમાનુષદાનવાઃ ।
તત્ર દેવા મુક્તિયોગ્યા માનુષેષૂત્તમાસ્તથા ॥ ૧.૮૬॥

મધ્યમા માનુષા યેતુ સૃતિયોગ્યાઃ સદૈવ હિ ।
અધમા નિરયાયૈવ દાનવાસ્તુ તમોલયાઃ ॥ ૧.૮૭॥

મુક્તિર્નિત્યા તમશ્ચૈવ નાઽવૃત્તિઃ પુનરેતયોઃ ।
દેવાનાં નિરયો નાસ્તિ તમશ્ચાપિ કથઞ્ચન ॥ ૧.૮૮॥

નાસુરાણાં તથા મુક્તિઃ કદાચિત્કેનચિત્ક્વચિત્ ।
માનુષાણાં મધ્યમાનાં નૈવૈતદ્દ્વયમાપ્યતે ॥ ૧.૮૯॥

અસુરાણાં તમઃ પ્રાપ્તિસ્તદા નિયમતો ભવેત્ ।
યદા તુજ્ઞાનિસદ્ભાવે નૈવ ગૃહ્ણન્તિ તત્પરમ્ ॥ ૧.૯૦॥

તદા મુક્તિશ્ચ દેવાનાં યદા પ્રત્યક્ષગો હરિઃ ।
સ્વયોગ્યયોપાસનયા તન્વા તદ્યોગ્યયા તથા ॥ ૧.૯૧॥

સર્વૈર્ગુણૈર્બ્રહ્મણા તુ સમુપાસ્યો હરિઃ સદા ।
આનન્દો જ્ઞઃ સદાત્મેતિ હ્યુપાસ્યો માનુષૈર્હરિઃ ॥ ૧.૯૨॥

યથાક્રમં ગુણોદ્રેકાત્તદન્યૈરા વિરિઞ્ચતઃ ।
બ્રહ્મત્વયોગ્યા ઋજવો નામ દેવાઃ પૃથગ્ગણાઃ ॥ ૧.૯૩॥

તૈરેવાપ્યં પદં તત્તુ નૈવાન્યૈઃ સાધનૈરપિ ।
એવં સર્વપદાનાં તુ યોગ્યાઃ સન્તિ પૃથગ્ગણાઃ ॥ ૧.૯૪॥

તસ્માદનાદ્યનન્તં હિ તારતમ્યં ચિદાત્મનામ્ ।
તચ્ચ નૈવાન્યથા કર્તું શક્યં કેનાપિ કુત્રચિત્ ॥ ૧.૯૫॥

અયોગ્યમિચ્છન્ પુરુષઃ પતત્યેવ ન સં શયઃ ।
તસ્માદ્યોગ્યાનુસારેણ સેવ્યો વિષ્ણુઃ સદૈવ હિ ॥ ૧.૯૬॥

અચ્છિદ્રસેવનાચ્ચૈવ નિષ્કામત્વાચ્ચ યોગ્યતઃ ।
દ્રષ્ટું શક્યો હરિઃ સર્વૈર્નાન્યથા તુ કથઞ્ચન ॥ ૧.૯૭॥

નિયમોઽયં હરેર્યસ્માન્નોલ્લઙ્ઘ્યઃ સર્વચેતનૈઃ ।
સત્યસઙ્કલ્પતો વિષ્ણુર્નાન્યથા ચ કરિષ્યતિ ॥ ૧.૯૮॥

દાનતીર્થતપોયજ્ઞપૂર્વાઃ સર્વેઽપિ સર્વદા ।
અઙ્ગાનિ હરિસેવાયાં ભક્તિસ્ત્વેકા વિમુક્તયે" ।
ભવિષ્યત્પર્વવચનમિત્યેતદખિલં પરમ્ ॥ ૧.૯૯॥

"શ ૃણ્વે વીર ઉગ્રમુગ્રં દમાયન્નન્યમન્યમતિનેનીયમાનઃ ।
એધમાનદ્વિલ્. ઉભયસ્ય રાજા ચોષ્કૂયતે વિશ ઇન્દ્રો મનુષ્યાન્ ॥ ૧.૧૦૦॥

પરા પૂર્વેષાં સખ્યા વૃણક્તિ વિતર્તુરાણો અપરેભિરેતિ ।
અનાનુભૂતીરવધૂન્વાનઃ પૂર્વીરિન્દ્રઃ શરદસ્તર્તરીતિ"(૨૧) ॥ ૧.૧૦૧॥

"તમેવં વિદ્વાનમૃત ઇહ ભવતિ નાન્યઃ પન્થા અયનાય વિદ્યતે"(૨૨) ।

(૨૧) ઋગ્વેદ ૬.૪૭.૧૬૧૭

(૨૨) તૈ. આ. ૩.૧૨.૧૭
“તમેવ વિદિત્વાઽતિ મૃત્યુમેતિ નાન્યઃ પન્થા વિદ્યતેઽયનાય”(૨૩) ॥ ૧.૧૦૨॥

“યસ્ય દેવે પરા ભક્તિર્યથાદેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ” (૨૪) ॥ ૧.૧૦૩॥

“ભક્ત્યર્થાન્યખિલાન્યેવ ભક્તિર્મોક્ષાય કેવલા ।
મુક્તાનામપિ ભક્તિર્હિ નિત્યાનન્દસ્વરૂપિણી ॥ ૧.૧૦૪॥

જ્ઞાનપૂર્વઃ પરઃ સ્નેહો નિત્યો ભક્તિરિતીર્યતે” ।
ઇત્યાદિ વેદવચનં સાધનપ્રવિધાયકમ્ ॥ ૧.૧૦૫॥

“નિશ્શેષધર્મકર્તાઽપ્યભક્તસ્તે નરકે હરે ।
સદા તિષ્ઠતિ ભક્તશ્ચેદ્બ્રહ્મહાઽપિ વિમુચ્યતે” ॥ ૧.૧૦૬॥

“ધર્મો ભવત્યધર્મોઽપિ કૃતો ભક્તૈસ્તવાઽચ્યુત ।
પાપં ભવતિ ધર્મોઽપિ યો ન ભક્તૈઃ કૃતો હરે” ॥ ૧.૧૦૭॥

“ભક્ત્યા ત્વનન્યયા શક્ય અહમેવં વિધોઽર્જુન ।
જ્ઞાતું દ્રષ્ટું ચ તત્ત્વેન પ્રવેષ્ટું ચ પરન્તપ”(૨૫) ॥ ૧.૧૦૮॥

“અનાદિદ્વેષિણો દૈત્યા વિષ્ણૌ દ્વેષો વિવર્ધિતઃ ।
તમસ્યન્ધે પાતયતિ દૈત્યાનન્તે વિનિશ્ચયાત્ ॥ ૧.૧૦૯॥

પૂર્ણદુઃખાત્મકો દ્વેષઃ સોઽનન્તો હ્યવતિષ્ઠતે ।
પતિતાનાં તમસ્યન્ધે નિઃ શેષસુખવર્જિતે ॥ ૧.૧૧૦॥

જીવાભેદો નિર્ગુણત્વમપૂર્ણગુણતા તથા ।
સામ્યાધિક્યે તદન્યેષાં ભેદસ્તદ્ગત એવ ચ ॥ ૧.૧૧૧॥

પ્રાદુર્ભાવવિપર્યાસસ્તદ્ભક્તદ્વેષ એવ ચ ।
તત્પ્રમાણસ્ય નિન્દા ચ દ્વેષા એતેઽખિલા મતાઃ ॥ ૧.૧૧૨॥

(૨૩) શ્વે. ઉ. ૩.૮
(૨૪) શ્વે. ઉ. ૬.૨૩
(૨૫) ભગવદ્ગીતા ૧૧.૫૪
એતૈર્વિહીના યા ભક્તિઃ સા ભક્તિરિતિ નિશ્ચિતા ।
અનાદિભક્તિર્દેવાનાં ક્રમાદ્વૃદ્ધિં ગતૈવ સા ॥ ૧.૧૧૩॥

અપરોક્ષદૃશેર્હેતુર્મુક્તિહેતુશ્ચ સા પુનઃ ।

સૈવાઽનન્દસ્વરૂપેણ નિત્યા મુક્તેષુ તિષ્ઠતિ ॥ ૧.૧૧૪॥

યથા શૌક્લ્યાદિકં રૂપં ગોર્ભવત્યેવ સર્વદા ।
સુખજ્ઞાનાદિકં રૂપમેવં ભક્તેર્ન ચાન્યથા ॥ ૧.૧૧૫॥

ભક્ત્યૈવ તુષ્ટિમભ્યેતિ વિષ્ણુર્નાન્યેન કેનચિત્ ।
સ એવ મુક્તિદાતા ચ ભક્તિસ્તત્રૈકકારણમ્ ॥ ૧.૧૧૬॥

બ્રહ્માદીનાં ચ મુક્તાનાં તારતમ્યે તુ કારણમ્ ।
તારતમ્યસ્થિતાઽનાદિનિત્યા ભક્તિર્ન ચેતરત્ ॥ ૧.૧૧૭॥

માનુષેષ્વધમાઃ કિઞ્ચિદ્દ્વેષયુક્તાઃ સદા હરૌ ।
દુઃખનિષ્ઠાસ્તતસ્તેઽપિ નિત્યમેવ ન સં શયઃ ॥ ૧.૧૧૮॥

મધ્યમા મિશ્રભૂતત્વાન્નિત્યં મિશ્રફલાઃ સ્મૃતાઃ ।
કિઞ્ચિદ્ભક્તિયુતા નિત્યમુત્તમાસ્તેન મોક્ષિણઃ ॥ ૧.૧૧૯॥

બ્રહ્મણઃ પરમા ભક્તિઃ સર્વેભ્યઃ પરમસ્તતઃ" ।
ઇત્યાદીનિ ચ વાક્યાનિ પુરાણેષુ પૃથક્પૃથક્ ॥ ૧.૧૨૦॥

"ષણ્ણવત્યઙ્ગુલો યસ્તુ ન્યગ્રોધપરિમણ્ડલઃ ।
સપ્તપાદશ્ચતુર્હસ્તો દ્વાત્રિં શલ્લક્ષણૈર્યુતઃ ।
અસં શયઃ સં શયચ્છિદ્ગુરુરુક્તો મનીષિભિઃ ॥ ૧.૧૨૧॥

તસ્માદ્બ્રહ્મા ગુરુર્મુખ્યઃ સર્વેષામેવ સર્વદા ।
અન્યેઽપિ સ્વાત્મનો મુખ્યાઃ ક્રમાદ્ગુરવ ઈરિતાઃ ॥ ૧.૧૨૨॥

ક્રમાલ્લક્ષણહીનાશ્ચ લક્ષણાલક્ષણૈઃ સમાઃ ।
માનુષા મધ્યમાઃ સમ્યગ્દુર્લક્ષણયુતઃ કલિઃ ॥ ૧.૧૨૩॥

સમ્યગ્લક્ષણસમ્પન્નો યદ્ધ્યાત્સુપ્રસન્નધીઃ ।
શિષ્યાય સત્યં ભવતિ તત્સર્વં નાત્ર સં શયઃ ॥ ૧.૧૨૪॥

અગમ્યત્વાદ્ધરિસ્તસ્મિન્નાવિષ્ટો મુક્તિદો ભવેત્ ।
નાતિપ્રસન્નહૃદયો યદ્દ્યાદ્ગુરુરપ્યસૌ ।
ન તત્સત્યં ભવેત્તસ્માદર્ચનીયો ગુરુઃ સદા ॥ ૧.૧૨૫॥

સ્વાવરાણાં ગુરુત્વં તુ ભવેત્કારણતઃ ક્વચિત્ ।
મર્યાદાર્થં તેઽપિ પૂજ્યા ન તુ યદ્વત્પરો ગુરુઃ" ।
ઇત્યેતત્પઞ્ચરાત્રોક્તં પુરાણેષ્વનુમોદિતમ્ ॥ ૧.૧૨૬॥

“યદા મુક્તિપ્રદાનસ્ય સ્વયોગ્યં પશ્યતિ ધ્રુવમ્ ।
રૂપં હરેસ્તદા તસ્ય સર્વપાપાનિ ભસ્મસાત્ ॥ ૧.૧૨૭॥

યાન્તિ પૂર્વાણ્યુત્તરાણિ નશ્લેષં યાન્તિ કાનિચિત્ ।
મોક્ષશ્ચ નિયતસ્તસ્માત્સ્વયોગ્યહરિદર્શને” ॥ ૧.૧૨૮॥

ભવિષ્યત્પર્વવચનમિત્યેતત્સૂત્રગં તથા ॥ ૨૬
શ્રુતિશ્ચ તત્પરા તદ્વત્તદ્યથા”(૨૭) ઇત્યવદત્સ્ફુટમ્ ॥ ૧.૧૨૯॥

“મુક્તાસ્તુ માનુષા દેવાન્ દેવા ઇન્દ્રં સ શઙ્કરમ્ ।
સ બ્રહ્માણં ક્રમેણૈવ તેન યાન્ત્યખિલા હરિમ્ ॥ ૧.૧૩૦॥

ઉત્તરોત્તરવશ્યાશ્ચ મુક્તા રુદ્રપુરસ્સરાઃ ।
નિર્દોષા નિત્યસુખિનઃ પુનરાવૃત્તિવર્જિતાઃ ।
સ્વેચ્છયૈવ રમન્તેઽત્ર નાનિષ્ટં તેષુ કિઞ્ચન ॥ ૧.૧૩૧॥

અસુરાઃ કલિપર્યન્તા એવં દુઃખોત્તરોત્તરાઃ ।
કલિર્દુઃખાધિકસ્તેષુ તેઽપ્યેવં બ્રહ્મવદ્ગુણાઃ ॥ ૧.૧૩૨॥

(૨૬) .અએતત્સૂત્રગમ્ડ ઇત્યસ્ય એતત્પ્રમેયં સૂત્રગમ્ ।
“તદધિગમ ઉત્તરપૂર્વાઘયોરશ્લેષવિનાશૌ તદ્વ્યપદેશાદ્”
(બ્ર. સૂ. ૪.૧.૧૩)ઇતિ સૂત્રગતમ્, ઇત્યર્થઃ ભા. પ્ર ।
(૨૭) છા. ઉ. ૪.૧૪.૩
તથાઽન્યેઽપ્યસુરાઃ સર્વે ગણા યોગ્યતયા સદા ।
બ્રહ્મૈવં સર્વજીવેભ્યઃ સદા સર્વગુણાધિકઃ ॥ ૧.૧૩૩॥

મુક્તોઽપિ સર્વમુક્તાનામાધિપત્યે સ્થિતઃ સદા ।
આશ્રયસ્તસ્ય ભગવાન્ સદા નારાયણઃ પ્રભુઃ” ॥ ૧.૧૩૪॥

ઇતિ ઋગ્યજુઃ સામાથર્વપઞ્ચરાત્રેતિહાસતઃ ।
પુરાણેભ્યસ્તથાઽન્યેભ્યઃ શાસ્ત્રેભ્યો નિર્ણયઃ કૃતઃ ॥ ૧.૧૩૫॥

વિષ્ણ્વાજ્ઞયૈવ વિદુષા તત્પ્રસાદબલોન્નતેઃ ।
આનન્દતીર્થમુનિના પૂર્ણપ્રજ્ઞાભિધાયુજા ॥ ૧.૧૩૬॥

તાત્પર્યં શાસ્ત્રાણાં સર્વેષામુત્તમં મયા પ્રોક્તમ્ ।
પ્રાપ્યાનુજ્ઞાં વિષ્ણોરેતજ્જ્ઞાત્વૈવ વિષ્ણુરાપ્યોઽસૌ ॥ ૧.૧૩૭॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે

સર્વશાસ્ત્રતાત્પર્યનિર્ણયો નામ પ્રથમોઽધ્યાયઃ ॥

## અથ દ્વિતીયોઽધ્યાયઃ ।

(વાક્યોદ્ધારઃ )

ૐ । જયતિ હરિરચિન્ત્યઃ સર્વદેવૈકવન્દ્યઃ પરમગુરુરભીષ્ટાવાપ્તિદઃ સજ્જનાનામ્ ।
નિખિલગુણગણાર્ણો નિત્યનિર્મુક્તદોષઃ સરસિજનયનોઽસૌ શ્રીપતિર્માનદો નઃ ॥ ૨.૧॥

ઉક્તઃ પૂર્વેઽધ્યાયે શાસ્ત્રાણાં નિર્ણયઃ પરો દિવ્યઃ ।
શ્રીમદ્ભારતવાક્યાન્યેતૈરેવાધ્યવસ્યન્તે ॥ ૨.૨॥

ક્વચિદ્ગ્રન્થાન્ પ્રક્ષિપન્તિ ક્વચિદન્તરિતાનપિ ।
કુર્યુઃ ક્વચિચ્ચ વ્યત્યાસં પ્રમાદાત્ક્વચિદન્યથા ॥ ૨.૩॥

અનુત્સન્ના અપિ ગ્રન્થા વ્યાકુલા ઇતિ સર્વશઃ ।
ઉત્સન્નાઃ પ્રાયશઃ સર્વે કોટ્યંશોઽપિ ન વર્તતે ॥ ૨.૪॥

ગ્રન્થોઽપ્યેવં વિલુલ્। ઇતઃ કિમ્વર્થો દેવદુર્ગમઃ ।
કલાવેવં વ્યાકુલિતે નિર્ણયાય પ્રચોદિતઃ ॥ ૨.૫॥

હરિણા નિર્ણયાન્ વચ્મિ વિજાનં સ્તત્પ્રસાદતઃ ।
શાસ્ત્રાન્તરાણિ સઞ્જાનન્ વેદાંશ્ચાસ્ય પ્રસાદતઃ ॥ ૨.૬॥

દેશે દેશે તથા ગ્રન્થાન્ દૃષ્ટ્વા ચૈવ પૃથગ્વિધાન્ ।
યથા સ ભગવાન્ વ્યાસઃ સાક્ષાન્નારાયણઃ પ્રભુઃ ॥ ૨.૭॥

જગાદ ભારતાદ્યેષુ તથા વક્ષ્યે તદીક્ષયા ।
સઙ્ક્ષેપાત્સર્વશાસ્ત્રાર્થં ભારતાર્થાનુસારતઃ ।
નિર્ણયઃ સર્વશાસ્ત્રાણાં ભારતં પરિકીર્તિતમ્ ॥ ૨.૮॥

"ભારતં સર્વવેદાશ્ચ તુલામારોપિતાઃ પુરા ।
દેવૈર્બ્રહ્માદિભિઃ સર્વૈરૃષિભિશ્ચ સમન્વિતૈઃ ।
વ્યાસસ્યૈવાઽજ્ઞયા તત્ર ત્વત્યરિચ્યત ભારતમ્" ॥ ૨.૯॥

"મહત્વાદ્ભારવત્વાચ્ચ મહાભારતમુચ્યતે ।
ક્ષ્વ્ંઇરુક્તમસ્ય યો વેદ સર્વપાપૈઃ પ્રમુચ્યતે"(૨૮) ॥ ૨.૧૦॥

"નિર્ણયઃ સર્વશાસ્ત્રાણાં સદૃષ્ટાન્તો હિ ભારતે ।
કૃતો વિષ્ણુવશત્વં હિ બ્રહ્માદીનાં પ્રકાશિતમ્ ॥ ૨.૧૧॥

યતઃ કૃષ્ણવશે સર્વે ભીમાદ્યાઃ સમ્યગીરિતાઃ ।
સર્વેષાં જ્ઞાનદો વિષ્ણુર્યશોદાતેતિ ચોદિતઃ ॥ ૨.૧૨॥

યસ્માદ્વ્યાસાત્મના તેષાં ભારતે યશ ઊચિવાન્ ।
જ્ઞાનદશ્ચ શુકાદીનાં બ્રહ્મરુદ્રાદિરૂપિણામ્ ॥ ૨.૧૩॥

બ્રહ્માધિકશ્ચ દેવેભ્યઃ શેષાદ્રુદ્રાદપીરિતઃ ।
પ્રિયશ્ચ વિષ્ણોઃ સર્વેભ્ય ઇતિ ભીમનિદર્શનાત્ ॥ ૨.૧૪॥

ભૂભારહારિણો વિષ્ણોઃ પ્રધાનાઙ્ગં હિ મારુતિઃ ।
માગધાદિવધાદેવ દુર્યોધનવધાદપિ ॥ ૨.૧૫॥

યો ય એવ બલજ્યેષ્ઠઃ ક્ષત્રિયેષુ સ ઉત્તમઃ ।
અઙ્ગં ચેદ્વિષ્ણુકાર્યેષુ તદ્ભક્ત્યૈવ ન ચાન્યથા ॥ ૨.૧૬॥

બલં નૈસર્ગિકં તચ્ચેદ્વરાસ્ત્રાદેસ્તદન્યથા ।
અન્યાવેશનિમિત્તં ચેદ્બલમન્યાત્મકં હિ તત્ ॥ ૨.૧૭॥

દેવેષુ બલિનામેવ ભક્તિજ્ઞાને ન ચાન્યથા ।
સ એવ ચ પ્રિયો વિષ્ણોર્નાન્યથા તુ કથઞ્ચન ॥ ૨.૧૮॥

તસ્માદ્યો યો બલજ્યેષ્ઠઃ સ ગુણજ્યેષ્ઠ એવ ચ ।
બલં હિ ક્ષત્રિયે વ્યક્તં જ્ઞાયતે સ્થૂલદૃષ્ટિભિઃ ॥ ૨.૧૯॥

જ્ઞાનાદયો ગુણા યસ્માજ્જ્ઞાયન્તે સૂક્ષ્મદૃષ્ટિભિઃ ।
તસ્માદ્યત્ર બલં તત્ર વિજ્ઞાતવ્યા ગુણાઃ પરે ॥ ૨.૨૦॥

દેવેષ્વેવ ન ચાન્યેષુ વાસુદેવપ્રતીપતઃ ।
(૨૮) મહા. ૧.૧.૨૦૯ *
ક્ષ્વિ। ક્ષત્રાદન્યેષ્વપિ બલં પ્રમાણં યત્ર કેશવઃ ।
પ્રવૃત્તો દુષ્ટનિધને જ્ઞાનકાર્યે તથૈવ ચ ॥ ૨.૨૧॥

અન્યત્ર બ્રાહ્મણાનાં તુ પ્રમાણં જ્ઞાનમેવ હિ ।
ક્ષત્રિયાણાં બલં ચૈવ સર્વેષાં વિષ્ણુકાર્યતા ॥ ૨.૨૨॥

કૃષ્ણરામાદિરૂપેષુ બલકાર્યો જનાર્દનઃ ।
દત્તવ્યાસાદિરૂપેષુ જ્ઞાનકાર્યસ્તથા પ્રભુઃ ॥ ૨.૨૩॥

મત્સ્યકૂર્મવરાહાશ્ચ સિં હવામનભાર્ગવાઃ ।
રાઘવઃ કૃષ્ણબુદ્ધૌ ચ કૃષ્ણદ્વૈપાયનસ્તથા ॥ ૨.૨૪॥

કપિલો દત્ત ઋષભૌ શિં શુમારો રુચેઃ સુતઃ ।
નારાયણો હરિઃ કૃષ્ણસ્તાપસો મનુરેવ ચ ॥ ૨.૨૫॥

મહિદાસસ્તથા હં સઃ સ્ત્રીરૂપો હયશીર્ષવાન્ ।
તથૈવ વડવાવક્ત્રઃ કલ્કી ધન્વન્તરિઃ પ્રભુઃ ॥ ૨.૨૬॥

ઇત્યાદ્યાઃ કેવલો વિષ્ણુર્નૈષાં ભેદઃ કથઞ્ચન ।
ન વિશેષો ગુણૈઃ સર્વૈર્બલજ્ઞાનાદિભિઃ ક્વચિત્ ॥ ૨.૨૭॥

શ્રીબ્રહ્મરુદ્રશેષાશ્ચ વીન્દ્રેન્દ્રૌ કામ એવ ચ ।
કામપુત્રોઽનિરુદ્ધશ્ચ સૂર્યશ્ચન્દ્રો બૃહસ્પતિઃ ॥ ૨.૨૮॥

ધર્મ એષાં તથા ભાર્યા દક્ષાદ્યા મનવસ્તથા ।
મનુપુત્રાશ્ચ ઋષયો નારદઃ પર્વતસ્તથા ॥ ૨.૨૯॥

કશ્યપઃ સનકાદ્યાશ્ચ વહ્ન્યાદ્યાશ્ચૈવ દેવતાઃ ।
ભરતઃ કાર્તવીર્યશ્ચ વૈન્યાદ્યાશ્ચક્રવર્તિનઃ ॥ ૨.૩૦॥

ગયશ્ચ લક્ષ્મણાદ્યાશ્ચ ત્રયો રોહિણિનન્દનઃ ।
પ્રદ્યુમ્નો રૌક્મિણેયશ્ચ તત્પુત્રશ્ચાનિરુદ્ધકઃ ॥ ૨.૩૧॥

નરઃ ફલ્ગુન ઇત્યાદ્યા વિશેષાવેશિનો હરેઃ ।
વાલિ સામ્બાદયશ્ચૈવ કિઞ્ચિદાવેશિનો હરેઃ ॥ ૨.૩૨॥

ક્ષ્વી।તસ્માદ્બલપ્રવૃત્તસ્ય રામકૃષ્ણાત્મનો હરેઃ ।
અન્તરઙ્ગં હનૂમાંશ્ચ ભીમસ્તત્કાર્યસાધકૌ ॥ ૨.૩૩॥

બ્રહ્માત્મકો યતો વાયુઃ પદં બ્રાહ્મમગાત્પુરા ।
વાયોરન્યસ્ય ન બ્રાહ્મં પદં તસ્માત્સ એવ સઃ ॥ ૨.૩૪॥

યત્ર રૂપં તત્ર ગુણાઃ ભક્ત્યાદ્યાસ્ત્રીષુ નિત્યશઃ ।
રૂપં હિ સ્થૂલદૃષ્ટીનાં દૃશ્યં વ્યક્તં તતો હિ તત્ ॥ ૨.૩૫॥

પ્રાયો વેત્તું ન શક્યન્તે ભક્ત્યાદ્યાસ્ત્રીષુ યત્તતઃ ।
યાસાં રૂપં ગુણાસ્તાસાં ભક્ત્યાદ્યા ઇતિ નિશ્ચયઃ ॥ ૨.૩૬॥

તચ્ચ નૈસર્ગિકં રૂપં દ્વાત્રિં શલ્લક્ષણૈર્યુતમ્ ।
નાલક્ષણં વપુર્માત્રં ગુણહેતુઃ કથઞ્ચન ॥ ૨.૩૭॥

આસુરીણાં વરાદેસ્તુ વપુર્માત્રં ભવિષ્યતિ ।
ન લક્ષણાન્યતસ્તાસાં નૈવ ભક્તિઃ કથઞ્ચન ॥ ૨.૩૮॥

તસ્માદ્રૂપગુણોદારા જાનકી રુગ્મિણી તથા ।
સત્યભામેત્યાદિરૂપા શ્રીઃ સર્વપરમા મતા ॥ ૨.૩૯॥

તતઃ પશ્ચાદ્દ્રૌપદી ચ સર્વાભ્યો રૂપતો વરા ।
ભૂભારક્ષપણે સાક્ષાદઙ્ગં ભીમવદીશિતુઃ ॥ ૨.૪૦॥

હન્તા ચ વૈરહેતુશ્ચ ભીમઃ પાપજનસ્ય તુ ।
દ્રૌપદી વૈરહેતુઃ સા તસ્માદ્ભીમાદનન્તરા ॥ ૨.૪૧॥

બલદેવસ્તતઃ પશ્ચાત્તતઃ પશ્ચાચ્ચ ફલ્ગુનઃ ।
નરાવેશાદન્યથા તુ દ્રૌણિઃ પશ્ચાત્તતોઽપરે ॥ ૨.૪૨॥

રામવજ્જામ્બવત્યાદ્યાઃ ષટ્તતો રેવતી તથા ।
લક્ષ્મણો હનુમત્પશ્ચાત્તતો ભરતવાલિનૌ ।
શત્રુઘ્નસ્તુ તતઃ પશ્ચાત્સુગ્રીવાદ્યાસ્તતોઽવરાઃ ॥ ૨.૪૩॥

ક્ષ્વીઇ। રામકાર્યં તુ યૈઃ સમ્યક્સ્વયોગ્યં ન કૃતં પુરા ।
તૈઃ પૂરિતં તત્કૃષ્ણાય બીભત્સ્વાદ્યૈઃ સમન્તતઃ ॥ ૨.૪૪॥

અધિકં યૈઃ કૃતં તત્ર તૈરૂનં કૃતમત્ર તત્ ।
કર્ણાદ્યૈરધિકં યૈસ્તુ પ્રાદુર્ભાવદ્વયે કૃતમ્ ।
વિવિદાદ્યૈર્હિ તૈઃ પશ્ચાદ્વિપ્રતીપં કૃતં હરેઃ ॥ ૨.૪૫॥

પ્રાદુર્ભાવદ્વયે હ્યસ્મિન્ સર્વેષાં નિર્ણયઃ કૃતઃ ।
નૈતયોરકૃતં કિઞ્ચિચ્છુભં વા યદિ વાઽશુભમ્ ।
અન્યત્ર પૂર્યતે ક્વાપિ તસ્માદત્રૈવ નિર્ણયઃ ॥ ૨.૪૬॥

પશ્ચાત્તનત્વાત્કૃષ્ણસ્ય વૈશેષ્યાત્તત્ર નિર્ણયઃ ।
પ્રાદુર્ભાવમિમં યસ્માદ્ગૃહીત્વા ભારતં કૃતમ્ ॥ ૨.૪૭॥

ઉક્તા રામકથાઽપ્યસ્મિન્માર્કણ્ડેયસમાસ્યયા ।
તસ્માદ્યદ્ભારતે નોક્તં તદ્ધિ નૈવાસ્તિ કુત્રચિત્ ।
અત્રોક્તં સર્વશાસ્ત્રેષુ નહિ સમ્યગુદાહૃતમ્” ॥ ૨.૪૮॥

ઇત્યાદિ કથિતં સર્વં બ્રહ્માણ્ડે હરિણા સ્વયમ્ ।
માર્કણ્ડેયેઽપિ કથિતં ભારતસ્ય પ્રશં સનમ્ ॥ ૨.૪૯॥

“દેવતાનાં યથા વ્યાસો દ્વિપદાં બ્રાહ્મણો વરઃ ।

આયુધાનાં યથા વજ્રમોષધીનાં યથા યવાઃ ।
તથૈવ સર્વશાસ્ત્રાણાં મહાભારતમુત્તમમ્” ॥ ૨.૫૦॥

વાયુપ્રોક્તેઽપિ તત્પ્રોક્તં ભારતસ્ય પ્રશં સનમ્ ॥ ૨૯
“કૃષ્ણદ્વૈપાયનં વ્યાસં વિદ્ધિ નારાયણં પ્રભુમ્ ।
કો હ્યન્યઃ પુણ્ડરીકાક્ષાન્મહાભારતકૃદ્ભવેત્”(૩૦) ॥ ૨.૫૧॥

એવં હિ સર્વશાસ્ત્રેષુ પૃથક્પૃથગુદીરિતમ્ ।
ઉક્તોઽર્થઃ સર્વ એવાયં માહાત્મ્યક્રમપૂર્વકઃ ॥ ૨.૫૨॥

(૨૯) “કૃષ્ણદ્વૈપાયનં વ્યાસમ્” ઇતિ શ્લોકઃ ન કેવલં વાયુપ્રોક્તેઽસ્તિ ।
કિન્તુ ભારતેઽપ્યસ્તીતિ જ્ઞેયં ભા. પ્ર ।
(૩૦) પદ્મપુરાણ ૧.૧.૪૩૪૪' વિષ્ણુ ઉ. ૩.૪૫' મહા ૧૨.૩૩૪.૯॥

ક્ષિક્ષ્। ભારતેઽપિ યથા પ્રોક્તો નિર્ણયોઽયં ક્રમેણ તુ ।
તથા પ્રદર્શયિષ્યામસ્તદ્વાક્યૈરેવ સર્વશઃ ॥ ૨.૫૩॥

“નારાયણં સુરગુરું જગદેકનાથં
ભક્તપ્રિયં સકલલોકનમસ્કૃતં ચ ।
ત્રૈગુણ્યવર્જિતમજં વિભુમાદ્યમીશં
વન્દે ભવઘ્નમમરાસુરસિદ્ધવન્દ્યમ્” ॥ ૨.૫૪। ૩૧
જ્ઞાનપ્રદઃ સ ભગવાન્ કમલાવિરિઞ્ચશર્વાદિપૂર્વજગતો નિખિલાદ્વરિષ્ઠઃ ।
ભક્ત્યૈવ તુષ્યતિ હરિપ્રવણત્વમેવ સર્વસ્ય ધર્મ ઇતિ પૂર્વવિભાગસં સ્થઃ ॥ ૨.૫૫॥

નિર્દોષકઃ સૃતિવિહીન ઉદારપૂર્ણસં વિદ્ગુણઃ પ્રથમકૃત્સકલાત્મશક્તિઃ ।
મોક્ષૈકહેતુરસુરૂપસુરૈશ્ચ મુક્તૈર્વન્દ્યઃ સ એક ઇતિ ચોક્તમથોત્તરાર્ધે ॥ ૨.૫૬॥

નમ્યત્વમુક્તમુભયત્ર યતસ્તતોઽસ્ય મુક્તૈરમુક્તિગગણૈશ્ચ વિનમ્યતોક્તા ।
ઇત્થં હિ સર્વગુણપૂર્તિરમુષ્ય વિષ્ણોઃ પ્રસ્તાવિતા પ્રથમતઃ પ્રતિજાનતૈવ ॥ ૨.૫૭॥

“કૃષ્ણો યજ્ઞૈરિજ્યતે સોમપૂતૈઃ કૃષ્ણો વીરૈરિજ્યતે વિક્રમદ્ભિઃ ।
કૃષ્ણો વન્યૈરિજ્યતે સમ્મૃશાનૈઃ કૃષ્ણો મુક્તૈરિજ્યતે વીતમોહૈઃ” ॥ ૨.૫૮॥

સૃષ્ટા બ્રહ્માદયો દેવા નિહતા યેન દાનવાઃ ।
તસ્મૈ દેવાદિદેવાય નમસ્તે શાર્ઙ્ગધારિણે ॥ ૨.૫૯॥

સ્રષ્ટૃત્વં દેવાનાં મુક્તિસ્રષ્ટૃત્વમુચ્યતે નાન્યત્ ।
ઉત્પત્તિર્દૈત્યાનામપિ યસ્માત્સમ્મિતા વિશેષોઽયમ્ ॥ ૨.૬૦॥

અથ ચ દૈત્યહતિસ્તમસિ સ્થિરા નિયતસં સ્થિતિરેવ ન ચાન્યથા ।
તનુવિભાગકૃતિઃ સકલેષ્વિયં નહિ વિશેષકૃતા સુરદૈત્યગા ॥ ૨.૬૧॥

(૩૧) .અક્વચિદન્તરિતાનપિઽ ઇતિ વચનાત્, ઇદમાદ્યપદ્યમસહમાનાઃ કેચિદાદૌ ન લિખન્તિ ।
કેરલ્। અદેશસ્ય પુરાતનપુસ્તકેષુ અદ્યાપિ દૃશ્યતે । કથમન્યથા લોકાચાર્યો વ્યાસઃ
લક્ષપરિમિતં ગ્રન્થં કુર્વન્ ગ્રન્થાદૌ લોકશિક્ષણાય મઙ્ગલ્। અપદ્યં ન રચયેત્?
યતોઽલ્પીયસિ ગ્રન્થે ભાગવતે હરિવં શાદૌ ચ “સત્યં પરં ધીમહિ” ઇતિ,
“સોઽનાદિર્વાસુદેવઃ શમયતુ દુરિતં જન્મજન્માર્જિતમ્” ઇતિ ચ લોકશિક્ષણાર્થં
મઙ્ગલ્। અમકરોત્ । અતો અસ્મિન્મહાગ્રન્થે સકલશિષ્ટાનાં ગુરુર્વ્યાસઃ મઙ્ગલ્। અમાચરેદેવેતિ
જ્ઞેયમ્ । ભા. પ્ર ।
ક્ષ્ક્ષ્।તમિમમેવ સુરાસુરસઞ્ચયે હરિકૃતં પ્રવિશેષમુદીક્ષિતુમ્ ।
પ્રતિવિભજ્ય ચ ભીમસુયોધનૌ સ્વપરપક્ષભિદા કથિતા કથા ॥ ૨.૬૨॥

“નમો ભગવતે તસ્મૈ વ્યાસાયામિતતેજસે ।
યસ્ય પ્રસાદાદ્વક્ષ્યામિ નારાયણકથામિમામ્ ॥ ૨.૬૩॥

વાસુદેવસ્તુ ભગવાન્ કીર્તિતોઽત્ર સનાતનઃ ।
પ્રતિબિમ્બમિવાઽદર્શે યં પશ્યન્ત્યાત્મનિ સ્થિતમ્ ॥ ૨.૬૪॥

નાસ્તિ નારાયણસમં ન ભૂતં ન ભવિષ્યતિ ।
એતેન સત્યવાક્યેન સર્વાર્થાન્ સાધયામ્યહમ્” ॥ ૨.૬૫॥

આદ્યન્તયોરિત્યવદત્સ યસ્માદ્વ્યાસાત્મકો વિષ્ણુરુદારશક્તિઃ ।
તસ્માત્સમસ્તા હરિસદ્ગુણાનાં નિર્ણીતયે ભારતગા કથૈષા ॥ ૨.૬૬॥

“સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ।
વેદશાસ્ત્રાત્પરં નાસ્તિ ન દૈવં કેશવાત્પરમ્” ॥ ૨.૬૭॥

“આલોડ્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ ।
ઇદમેકં સુનિષ્પન્નં ધ્યેયો નારાયણઃ સદા” ॥ ૨.૬૮॥

“સ્મર્તવ્યઃ સતતં વિષ્ણુર્વિસ્મર્તવ્યો ન જાતુચિત્ ।
સર્વે વિધિનિષેધાઃ સ્યુરેતયોરેવ કિઙ્કરાઃ” ॥ ૨.૬૯॥

“કો હિ તં વેદિતું શક્તો યો ન સ્યાત્તદ્વિધોઽપરઃ ।
તદ્વિધશ્ચાપરો નાસ્તિ તસ્માત્તં વેદ સઃ સ્વયમ્ ॥ ૨.૭૦॥

કો હિ તં વેદિતું શક્તો નારાયણમનામયમ્ ।
ઋતે સત્યવતીસૂનોઃ કૃષ્ણાદ્વા દેવકીસુતાત્ ॥ ૨.૭૧॥

અપ્રમેયોઽનિયોજ્યશ્ચ સ્વયં કામગમો વશી ।
મોદત્યેષ સદા ભૂતૈર્બાલઃ ક્રીડનકૈરિવ ॥ ૨.૭૨॥

ન પ્રમાતું મહાબાહુઃ શક્યોઽયં મધુસૂદનઃ ।
ક્ષિક્ષ।પરમાત્પરમેતસ્માદ્વિશ્વરૂપાન્ન વિદ્યતે ॥ ૨.૭૩॥

વસુદેવસુતો નાયં નાયં ગર્ભેઽવસત્પ્રભુઃ ।
નાયં દશરથાજ્જાતો ન ચાપિ જમદગ્નિતઃ ॥ ૨.૭૪॥

જાયતે નૈવ કુત્રાપિ મ્રિયતે કુત એવ તુ ।
ન વેધ્યો મુહ્યતે નાયં બદ્ધ્યતે નૈવ કેનચિત્ ।
કુતો દુઃખં સ્વતન્ત્રસ્ય નિત્યાનન્દૈકરૂપિણઃ ॥ ૨.૭૫॥

ઈશન્નપિ હિ દેવેશઃ સર્વસ્ય જગતો હરિઃ ।
કર્માણિ કુરુતે નિત્યં કીનાશ ઇવ દુર્બલઃ ॥ ૨.૭૬॥

નાઽત્માનં વેદ મુગ્ધોઽયં દુઃખી સીતાં ચ માર્ગતે ।
બદ્ધઃ શક્રજિતેત્યાદિ લીલૈષાઽસુરમોહિની ॥ ૨.૭૭॥

મુહ્યતે શસ્ત્રપાતેન ભિન્નત્વગ્રુધિરસ્રવઃ ।
અજાનન્ પૃચ્છતિ સ્માન્યાં સ્તનું ત્યક્ત્વા દિવં ગતઃ ॥ ૨.૭૮॥

ઇત્યાદ્યસુરમોહાય દર્શયામાસ નાટ્યવત્ ।
અવિદ્યમાનમેવેશઃ કુહકં તદ્વિદુઃ સુરાઃ ॥ ૨.૭૯॥

પ્રાદુર્ભાવા હરેઃ સર્વે નૈવ પ્રકૃતિદેહિનઃ ।
નિર્દોષા ગુણસમ્પૂર્ણા દર્શયન્ત્યન્યથૈવ તુ ॥ ૨.૮૦॥

દુષ્ટાનાં મોહનાર્થાય સતામપિ તુ કુત્રચિત્ ।
યથાયોગ્યફલપ્રાપ્ત્યૈ લીલૈષા પરમાત્મનઃ" ॥ ૨.૮૧॥

"જ્ઞાનં તેઽહં સવિજ્ઞાનમિદં વક્ષ્યામ્યશેષતઃ ।
યજ્જ્ઞાત્વા નેહ ભૂયોઽન્યજ્જ્ઞાતવ્યમવશિષ્યતે"(૩૨) ॥ ૨.૮૨॥

"અહં કૃત્સ્નસ્ય જગતઃ પ્રભવઃ પ્રલ્। અયસ્તથા ।
મત્તઃ પરતરં નાન્યત્કિઞ્ચિદસ્તિ ધનઞ્જય"(૩૩) ॥ ૨.૮૩॥

(૩૨) ભગવદ્ગીતા ૭.૨
(૩૩) ભગવદ્ગીતા ૭.૬૭

ક્ષ્ક્ષી। “અવજાનન્તિ માં મૂઢા માનુષીં તનુમાશ્રિતમ્”(૩૪) ।
“મોઘાશા મોઘકર્માણો મોઘજ્ઞાના વિચેતસઃ ।
રાક્ષસીમાસુરીં ચૈવ પ્રકૃતિં મોહનીં શ્રિતાઃ” (૩૫) ॥ ૨.૮૪॥

“મહાત્માનસ્તુ માં પાર્થ દૈવીં પ્રકૃતિમાશ્રિતાઃ ।
ભજન્ત્યનન્યમનસો જ્ઞાત્વા ભૂતાદિમવ્યયમ્”(૩૬) ॥ ૨.૮૫॥

“પિતાઽસિ લોકસ્ય ચરાચરસ્ય ત્વમસ્ય પૂજ્યશ્ચ ગુરુર્ગરીયાન્ ।
ન ત્વત્સમોઽસ્ત્યભ્યધિકઃ કુતોઽન્યો લોકત્રયેઽપ્યપ્રતિમપ્રભાવ”(૩૭) ॥ ૨.૮૬॥

“પરં ભૂયઃ પ્રવક્ષ્યામિ જ્ઞાનાનાં જ્ઞાનમુત્તમમ્ ।
યજ્જ્ઞાત્વા મુનયઃ સર્વે પરાં સિદ્ધિમિતો ગતાઃ” (૩૮) ॥ ૨.૮૭॥

“મમયોનિર્મહદ્બ્રહ્મ તસ્મિન્ ગર્ભં દધામ્યહમ્ ।
સમ્ભવઃ સર્વભૂતાનાં તતો ભવતિ ભારત”(૩૯) ॥ ૨.૮૮॥

“દ્વાવિમૌ પુરુષૌ લોકે ક્ષરશ્ચાક્ષર એવ ચ ।
ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થોઽક્ષર ઉચ્યતે ॥ ૨.૮૯॥

ઉત્તમઃ પુરુષસ્ત્વન્યઃ પરમાત્મેત્યુદાહૃતઃ ।
યો લોકત્રયમાવિશ્ય બિભર્ત્યવ્યય ઈશ્વરઃ ॥ ૨.૯૦॥

યસ્માત્ક્ષરમતીતોઽહમક્ષરાદપિ ચોત્તમઃ ।
અતોઽસ્મિ લોકે વેદે ચ પ્રથિતઃ પુરુષોત્તમઃ ॥ ૨.૯૧॥

યો મામેવમસમ્મૂઢો જાનાતિ પુરુષોત્તમમ્ ।
સ સર્વવિદ્ભજતિ માં સર્વભાવેન ભારત ॥ ૨.૯૨॥

ઇતિ ગુહ્યતમં શાસ્ત્રમિદમુક્તં મયાઽનઘ ।
(૩૪) ભગવદ્ગીતા ૯.૧૧
(૩૫) ભગવદ્ગીતા ૯.૧૨
(૩૬) ભગવદ્ગીતા ૯.૧૩
(૩૭) ભગવદ્ગીતા ૧૧.૪૩
(૩૮) ભગવદ્ગીતા ૧૪.૧
(૩૯) ભગવદ્ગીતા ૧૪.૩
ક્ષ્ક્ષીઇ। એતદ્બુદ્ધ્વા બુદ્ધિમાન્ સ્યાત્કૃતકૃત્યશ્ચ ભારત”(૪૦) ॥ ૨.૯૩॥

“દ્વૌ ભૂતસર્ગૌ લોકેઽસ્મિન્ દૈવ આસુર એવ ચ ।
દૈવો વિસ્તરશઃ પ્રોક્ત આસુરં પાર્થ મે શ઼ૃણુ” (૪૧) ॥ ૨.૯૪॥

“અસત્યમપ્રતિષ્ઠં તે જગદાહુરનીશ્વરમ્”(૪૨) ।
“ઈશ્વરોઽહમહં ભોગી સિદ્ધોઽહં બલવાન્ સુખી” (૪૩) ॥ ૨.૯૫॥

“મામાત્મપરદેહેષુ પ્રદ્વિષન્તોઽભ્યસૂયકાઃ” (૪૪) ।
“તાનહં દ્વિષતઃ ક્રૂરાન્ સં સારેષુ નરાધમાન્ ।
ક્ષિપામ્યજસ્રમશુભાનાસુરીષ્વેવ યોનિષુ”(૪૫) ॥ ૨.૯૬॥

“આસુરીં યોનિમાપન્ના મૂઢા જન્મનિ જન્મનિ ।
મામપ્રાપ્યૈવ કૌન્તેય તતો યાન્ત્યધમાં ગતિમ્”(૪૬) ॥ ૨.૯૭॥

“સર્વભૂતેષુ યેનૈકં ભાવમવ્યયમીક્ષતે ।
અવિભક્તં વિભક્તેષુ તજ્જ્ઞાનં વિદ્ધિ સાત્વિકમ્”(૪૭) ॥ ૨.૯૮॥

“સર્વગુહ્યતમં ભૂયઃ શ‌ૃણુ મે પરમં વચઃ ।
ઇષ્ટોઽસિ મે દૃઢમિતિ તતો વક્ષ્યામિ તે હિતમ્”(૪૮) ॥ ૨.૯૯॥

“મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ।
મામેવૈષ્યસિ સત્યં તે પ્રતિજાને પ્રિયોઽસિ મે”(૪૯) ॥ ૨.૧૦૦॥

“પઞ્ચરાત્રસ્ય કૃત્સ્નસ્ય વક્તા નારાયણઃ સ્વયમ્ ।
સર્વેષ્વેતેષુ રાજેન્દ્ર જ્ઞાનેષ્વેતદ્વિશિષ્યતે”(૫૦) ॥ ૨.૧૦૧॥

(૪૦) ભગવદ્ગીતા ૧૫.૧૬૨૦
(૪૧) ભગવદ્ગીતા ૧૬.૬
(૪૨) ભગવદ્ગીતા ૧૬.૮
(૪૩) ભગવદ્ગીતા ૧૬.૧૪
(૪૪) ભગવદ્ગીતા ૧૬.૧૮
(૪૫) ભગવદ્ગીતા ૧૬.૧૯
(૪૬) ભગવદ્ગીતા ૧૬.૨૦
(૪૭) ભગવદ્ગીતા ૧૮.૨૦
(૪૮) ભગવદ્ગીતા ૧૮.૬૪
(૪૯) ભગવદ્ગીતા ૧૮.૬૫
(૫૦) મહા ૧૨.૩૩૭.૬૩ *
ક્ષિક્ષ્વ્। “જ્ઞાનેષ્વેતેષુ રાજેન્દ્ર સાઙ્ખ્યપાશુપતાદિષુ ।
યથાયોગં યથાન્યાયં નિષ્ઠા નારાયણઃ પરઃ” (૫૧) ॥ ૨.૧૦૨॥

“પઞ્ચરાત્રવિદો મુખ્યા યથાક્રમપરા નૃપ ।
એકાન્તભાવોપગતા વાસુદેવં વિશન્તિ તે”(૫૨) ॥ ૨.૧૦૩॥

(જનમેજય ઉવાચ)
“બહવઃ પુરુષા બ્રહ્મન્નુતાહો એક એવ તુ ।
કો હ્યત્ર પુરુષશ્રેષ્ઠસ્તં ભવાન્ વક્તુમર્હતિ”(૫૩) ॥ ૨.૧૦૪॥

વૈશમ્પાયન ઉવાચ
“નૈતદિચ્છન્તિ પુરુષમેકં કુરુકુલોદ્વહ ।
બહૂનાં પુરુષાણાં હિ યથૈકા યોનિરુચ્યતે ।
તથા તં પુરુષં વિશ્વમાખ્યાસ્યામિ ગુણાધિકમ્”(૫૪) ॥ ૨.૧૦૫॥

“આહ બ્રહ્મૈતમેવાર્થં મહાદેવાય પૃચ્છતે ।
તસ્યૈકસ્ય મમત્વં હિ સ ચૈકઃ પુરુષો વિરાટ્” ॥ ૨.૧૦૬॥

“અહં બ્રહ્મા ચાઽદ્ય ઈશઃ પ્રજાનાં
તસ્માજ્જાતસ્ત્વં ચ મત્તઃ પ્રસૂતઃ ।
મત્તો જગત્સ્થાવરં જઙ્ગમં ચ
સર્વે વેદા સરહસ્યાશ્ચ પુત્ર” ॥ ૨.૧૦૭॥

તથૈવ ભીમવચનં ધર્મજં પ્રત્યુદીરિતમ્ ।
“બ્રહ્મેશાનાદિભિઃ સર્વૈઃ સમેતૈર્યદ્ગુણાં શકઃ ।
નાવસાયયિતું શક્યો વ્યાચક્ષાણૈશ્ચ સર્વદા ॥ ૨.૧૦૮॥

(૫૧) મહા ૧૨.૩૩૭.૬૪ *

(૫૨) મહા ૧૨.૩૩૭.૬૭ *

(૫૩) મહા ૧૨.૩૩૮.૧ *

(૫૪) મહા ૧૨.૩૩૮.૨૩ *

ક્ષ્ક્ષ્વ્।સ એષ ભગવાન્ કૃષ્ણો નૈવ કેવલમાનુષઃ ।
યસ્ય પ્રસાદજો બ્રહ્મા રુદ્રશ્ચ ક્રોધસમ્ભવઃ” ॥ ૨.૧૦૯॥

વચનં ચૈવ કૃષ્ણસ્ય જ્યેષ્ઠં કુન્તીસુતં પ્રતિ ।
“રુદ્રં સમાશ્રિતા દેવા રુદ્રો બ્રહ્માણમાશ્રિતઃ ।
બ્રહ્મા મામાશ્રિતો નિત્યં નાહં કિઞ્ચિદુપાશ્રિતઃ ॥ ૨.૧૧૦॥

"
યથાશ્રિતાનિ જ્યોતીં ષિ જ્યોતિઃ શ્રેષ્ઠં દિવાકરમ્ ।
એવં મુક્તગણાઃ સર્વે વાસુદેવમુપાશ્રિતાઃ” ॥ ૨.૧૧૧॥

ભવિષ્યત્પર્વગં ચાપિ વચો વ્યાસસ્ય સાદરમ્ ।
“વાસુદેવસ્ય મહિમા ભારતે નિર્ણયોદિતઃ ॥ ૨.૧૧૨॥

તદર્થાસ્તુ કથાઃ સર્વા નાન્યાર્થં વૈષ્ણવં યશઃ ।
તત્પ્રતીપં તુ યદ્દૃશ્યેન્ન તન્મમ મનીષિતમ્ ॥ ૨.૧૧૩॥

ભાષાસ્તુ ત્રિવિધાસ્તત્ર મયા વૈ સમ્પ્રદર્શિતાઃ ।
ઉક્તો યો મહિમા વિષ્ણોઃ સ તૂક્તો હિ સમાધિના ॥ ૨.૧૧૪॥

શૈવદર્શનમાલમ્બ્ય ક્વચિચ્છૈવી કથોદિતા ।
સમાધિભાષયોક્તં યત્તત્સર્વં ગ્રાહ્યમેવ હિ ॥ ૨.૧૧૫॥

અવિરુદ્ધં સમાધેસ્તુ દર્શનોક્તં ચ ગૃહ્યતે ।
આદ્યન્તયોર્વિરુદ્ધં યદ્દર્શનં તદુદાહૃતમ્ ॥ ૨.૧૧૬॥

દર્શનાન્તરસિદ્ધં ચ ગુહ્યભાષાઽન્યથા ભવેત્ ।
તસ્માદ્વિષ્ણોર્હિ મહિમા ભારતોક્તો યથાર્થતઃ ॥ ૨.૧૧૭॥

તસ્યાઙ્ગં પ્રથમં વાયુઃ પ્રાદુર્ભાવત્રયાન્વિતઃ ।
પ્રથમો હનુમાન્નામ દ્વિતીયો ભીમ એવ ચ ।
પૂર્ણપ્રજ્ઞસ્તૃતીયસ્તુ ભગવત્કાર્યસાધકઃ ॥ ૨.૧૧૮॥

ત્રેતાદ્યેષુ યુગેષ્વેષ સમ્ભૂતઃ કેશવાજ્ઞયા ।
એકૈકશસ્ત્રિષુ પૃથગ્દ્વિતીયાઙ્ગં સરસ્વતી ॥ ૨.૧૧૯॥

ક્ષિક્ષ્વ।શં રૂપે તુ રતેર્વાયૌ શ્રીરિત્યેવ ચ કીર્ત્યતે ।
સૈવ ચ દ્રૌપદી નામ કાલ્. ઈ ચન્દ્રેતિ ચોચ્યતે ॥ ૨.૧૨૦॥

તૃતીયાઙ્ગં હરેઃ શેષઃ પ્રાદુર્ભાવસમન્વિતઃ ।
પ્રાદુર્ભાવા નરશ્ચૈવ લક્ષ્મણો બલ એવ ચ ॥ ૨.૧૨૧॥

રુદ્રાત્મકત્વાચ્છેષસ્ય શુકો દ્રૌણિશ્ચ તત્તનૂ ।
ઇન્દ્રે નરાં શસમ્પત્ત્યા પાર્થોઽપીષત્તદાત્મકઃ ॥ ૨.૧૨૨॥

પ્રદ્યુમ્નાદ્યાસ્તતો વિષ્ણોરઙ્ગભૂતાઃ ક્રમેણ તુ ।
ચરિતં વૈષ્ણવાનાં તદ્વિષ્ણૂદ્રેકાય કથ્યતે” ॥ ૨.૧૨૩॥

તથા ભાગવતેઽપ્યુક્તં હનૂમદ્વચનં પરમ્ ।
“મર્ત્યાવતારસ્ત્વિહ મર્ત્યશિક્ષણં રક્ષોવધાયૈવ ન કેવલં વિભોઃ ।
કુતોઽસ્ય હિ સ્યૂ રમતઃ સ્વ આત્મન્ સીતાકૃતાનિ વ્યસનાનીશ્વરસ્ય ॥ ૨.૧૨૪॥

ન વૈ સ આત્માऽત્મવતામધીશ્વરો ભુઙ્ક્તે હિ દુઃખં ભગવાન્ વાસુદેવઃ ।
ન સ્ત્રીકૃતં કશ્મલમશ્નુવીત ન લક્ષ્મણં ચાપિ જહાતિ કર્હિચિત્"(૫૫) ॥ ૨.૧૨૫॥

યત્પાદપઙ્કજપરાગનિષેવકાણાં દુઃખાનિ સર્વાણિ લયં પ્રયાન્તિ ।
સ બ્રહ્મવન્દ્યચરણો જનમોહનાય સ્ત્રીસઙ્ગિનામિતિ રતિં પ્રથયંશ્ચચાર ॥ ૨.૧૨૬॥

"ક્વચિચ્છિવં ક્વચિદૃષીન્ ક્વચિદ્દેવાન્ ક્વચિન્નરાન્ ।
નમત્યર્ચયતિ સ્તૌતિ વરાનર્થયતેऽપિ ચ ॥ ૨.૧૨૭॥

લિઙ્ગં પ્રતિષ્ઠાપયતિ વૃણોત્યસુરતો વરાન્ ।
સર્વેશ્વરઃ સ્વતન્ત્રોऽપિ સર્વશક્તિશ્ચ સર્વદા ।
સર્વજ્ઞોऽપિ વિમોહાય જનાનાં પુરુષોત્તમઃ" ॥ ૨.૧૨૮॥

તસ્માદ્યો મહિમા વિષ્ણોઃ સર્વશાસ્ત્રોદિતઃ સ હિ ।
નાન્યદિત્યેષ શાસ્ત્રાણાં નિર્ણયઃ સમુદાહૃતઃ ।
(૫૫) ભા. ઉ ૫.૧૯.૫૬
ક્ષ્વી। ભારતાર્થસ્ત્રિધા પ્રોક્તઃ સ્વયં ભગવતૈવ હિ ॥ ૨.૧૨૯॥

"મન્વાદિ કેચિદ્બ્રુવતે હ્યાસ્તીકાદિ તથા પરે ।
તથોપરિચરાદ્યન્યે ભારતં પરિચક્ષતે"(૫૬) ॥ ૨.૧૩૦॥

"સકૃષ્ણાન્ પાણ્ડવાન્ ગૃહ્ય યોऽયમર્થઃ પ્રવર્તતે ।
પ્રાતિલોમ્યાદિવૈચિત્ર્યાત્તમાસ્તીકં પ્રચક્ષતે ॥ ૨.૧૩૧॥

ધર્મો ભક્ત્યાદિદશકઃ શ્રુતાદિઃ શીલવૈનયૌ ।
સબ્રહ્મકાસ્તુ તે યત્ર મન્વાદિં તં વિદુર્બુધાઃ ॥ ૨.૧૩૨॥

નારાયણસ્ય નામાનિ સર્વાણિ વચનાનિ તુ ।
તત્સામર્થ્યાભિધાયીનિ તમૌપરિચરં વિદુઃ ॥ ૨.૧૩૩॥

ભક્તિર્જ્ઞાનં સવૈરાગ્યં પ્રજ્ઞા મેધા ધૃતિઃ સ્થિતિઃ ।
યોગઃ પ્રાણો બલં ચૈવ વૃકોદર ઇતિ સ્મૃતઃ ॥ ૨.૧૩૪॥

એતદ્દશાત્મકો વાયુસ્તસ્માદ્ભીમસ્તદાત્મકઃ ।
સર્વવિદ્યા દ્રૌપદી તુ યસ્માત્સૈવ સરસ્વતી ॥ ૨.૧૩૫॥

અજ્ઞાનાદિસ્વરૂપસ્તુ કલિર્દુર્યોધનઃ સ્મૃતઃ ।
વિપરીતં તુ યજ્જ્ઞાનં દુઃ શાસન ઇતીરિતઃ ॥ ૨.૧૩૬॥

નાસ્તિક્યં શકુનિર્નામ સર્વદોષાત્મકાઃ પરે ।

ધાર્તરાષ્ટ્રાસ્ત્વહઙ્કારો દ્રૌણી રુદ્રાત્મકો યતઃ ॥ ૨.૧૩૭॥

દ્રોણાદ્યા ઇન્દ્રિયાણ્યેવ પાપાન્યન્યે તુ સૈનિકાઃ ।
પાણ્ડવેયાશ્ચ પુણ્યાનિ તેષાં વિષ્ણુર્નિયોજકઃ ॥ ૨.૧૩૮॥

એવમધ્યાત્મનિષ્ઠં હિ ભારતં સર્વમુચ્યતે ।
દુર્વિજ્ઞેયમતઃ સર્વૈર્ભારતં તુ સુરૈરપિ ॥ ૨.૧૩૯॥

સ્વયં વ્યાસો હિ તદ્વેદ બ્રહ્મા વા તત્પ્રસાદતઃ ।
(૫૬) મહા. ૧.૧.૫૦ *
ક્ષ્ક્ષ્વીઇ।તથાઽપિ વિષ્ણુપરતા ભારતે સારસઙ્ગ્રહઃ” ॥ ૨.૧૪૦॥

ઇત્યાદિવ્યાસવાક્યૈસ્તુ વિષ્ણૂત્કર્ષોઽવગમ્યતે ।
વાય્વાદીનાં ક્રમશ્ચૈવ તદ્વાક્યૈરેવ ચિન્ત્યતે ॥ ૨.૧૪૧॥

“વાયુર્હિ બ્રહ્મતામેતિ તસ્માદ્બ્રહ્મૈવ સ સ્મૃતઃ ।
ન બ્રહ્મસદૃશઃ કશ્ચિચ્છિવાદિષુ કથઞ્ચન” ॥ ૨.૧૪૨॥

“જ્ઞાને વિરાગે હરિભક્તિભાવે ધૃતિસ્થિતિપ્રાણબલેષુ યોગે ।
બુદ્ધૌ ચ નાન્યો હનુમત્સમાનઃ પુમાન્ કદાચિત્ક્વ ચ કશ્ચનૈવ” ॥ ૨.૧૪૩॥

“બલ્। ઇત્થા તદ્વપુષે ધાયિ દર્શતં દેવસ્ય ભર્ગઃ સહસો યતો જનિ ।
યદીમુપહ્વરતે સાધતે મતિરૃતસ્ય ધેના અનયન્ત સસ્રુતઃ ॥ ૨.૧૪૪॥

પૃક્ષો વપુઃ પિતુમાન્નિત્ય આશયે દ્વિતીયમા સપ્તશિવાસુ માતૃષુ ।
તૃતીયમસ્ય વૃષભસ્ય દોહસે દશપ્રમતિં જનયન્ત યોષણઃ ॥ ૨.૧૪૫॥

નિર્યદીં બુધ્નાન્મહિષસ્ય વર્પસ ઈશાનાસઃ શવસા ક્રન્ત સૂરયઃ ।
યદીમનુ પ્રદિવો મધ્વ આધવે ગુહાસન્તં માતરિશ્વા મથાયતિ ॥ ૨.૧૪૬॥

પ્ર યત્પિતુઃ પરમાન્નીયતે પર્યા પૃક્ષુધો વીરુધો દં સુ રોહતિ ।
ઉભા યદસ્ય જનુષં યદિન્વત આદિદ્યવિષ્ઠો અભવદ્ઘૃણા શુચિઃ ॥ ૨.૧૪૭॥

આદિન્માતૃરાવિશદ્યાસ્વા શુચિરહિં સ્યમાન ઉર્વિયા વિવાવૃધે ।
અનુયત્પૂર્વા અરુહત્સનાજુવો નિ નવ્યશીષ્વવરાસુ ધાવતે”(૫૭) ॥ ૨.૧૪૮॥

“અશ્વમેધઃ ક્રતુશ્રેષ્ઠો જ્યોતિઃ શ્રેષ્ઠો દિવાકરઃ ।
બ્રાહ્મણો દ્વિપદાં શ્રેષ્ઠો દેવશ્રેષ્ઠસ્તુ મારુતઃ” ॥ ૨.૧૪૯॥

“બલમિન્દ્રસ્ય ગિરિશો ગિરિશસ્ય બલં મરુત્ ।
બલં તસ્ય હરિઃ સાક્ષાન્ન હરેર્બલમન્યતઃ” ॥ ૨.૧૫૦॥

“વાયુર્ભીમો ભીમનાદો મહૌજાઃ સર્વેષાં ચ પ્રાણિનાં પ્રાણભૂતઃ ।
(૫૭) ઋગ્વેદ ૧.૧૪૧.૧૫
ક્ષિક્ષક્ષ્ઽનાવૃત્તિર્દેહિનાં દેહપાતે તસ્માદ્વાયુર્દેવદેવો વિશિષ્ટઃ” ॥ ૨.૧૫૧॥

“તત્ત્વજ્ઞાને વિષ્ણુભક્તૌ ધૈર્યે સ્થૈર્યે પરાક્રમે ।
વેગે ચ લાઘવે ચૈવ પ્રલાપસ્ય ચ વર્જને ॥ ૨.૧૫૨॥

ભીમસેનસમો નાસ્તિ સેનયોરુભયોરપિ ।
પાણ્ડિત્યે ચ પટુત્વે ચ શૂરત્વે ચ બલેઽપિ ચ” ॥ ૨.૧૫૩॥

તથા યુધિષ્ઠિરેણાપિ ભીમં પ્રતિ સમીરિતમ્ ।
“ધર્મશ્ચાર્થશ્ચ કામશ્ચ મોક્ષશ્ચૈવ યશો ધ્રુવમ્ ।
ત્વય્યાયત્તમિદં સર્વં સર્વલોકસ્ય ભારત” ॥ ૨.૧૫૪॥

વિરાટપર્વગં ચાપિ વચો દુર્યોધનસ્ય હિ ॥ ૫૮
“વીરાણાં શાસ્ત્રવિદુષાં કૃતિનાં તત્ત્વનિર્ણયે ।
સત્ત્વે બાહુબલે ધૈર્યે પ્રાણે શારીરસમ્ભવે ॥ ૨.૧૫૫॥

સામ્પ્રતં માનુષે લોકે સદૈત્યનરરાક્ષસે ।
ચત્વારઃ પ્રાણિનાં શ્રેષ્ઠાઃ સમ્પૂર્ણબલપૌરુષાઃ ॥ ૨.૧૫૬॥

ભીમશ્ચ બલભદ્રશ્ચ મદ્રરાજશ્ચ વીર્યવાન્ ।
ચતુર્થઃ કીચકસ્તેષાં પઞ્ચમં નાનુશુશ્રુમઃ ।
અન્યોન્યાનન્તરબલાઃ ક્રમાદેવ પ્રકીર્તિતાઃ” ॥ ૨.૧૫૭॥

વચનં વાસુદેવસ્ય તથોદ્યોગગતં પરમ્ ।
“યત્કિઞ્ચાઽત્મનિ કલ્યાણં સમ્ભાવયસિ પાણ્ડવ ।
સહસ્રગુણમપ્યેતત્ત્વયિ સમ્ભાવયામ્યહમ્ ॥ ૨.૧૫૮॥

યાદૃશે ચ કુલે જાતઃ સર્વરાજાભિપૂજિતે ।
(૫૮) “વીરાણાં શાસ્ત્રવિદુષામ્”, “નાસ્તિ નારાયણસમમ્” ઇત્યાદિ મહાભારતાદ્યુક્તાનિ
ભગવત્પાદૈરુદાહૃતાનિ મુદ્રિતપુસ્તકેષુ અનુપલભ્યત્વેઽપિ પ્રાચીનકોશેષુ
પ્રાયશઃ દૃષ્યન્તે ।
ક્ષક્ષ્।યાદૃશાનિ ચ કર્માણિ ભીમ ત્વમસિ તાદૃશઃ” (૫૯) ॥ ૨.૧૫૯॥

“અસ્મિન્ યુદ્ધે ભીમસેન ત્વયિ ભારઃ સમાહિતઃ ।
ધૂરર્જુનેન વોઢવ્યા વોઢવ્ય ઇતરો જનઃ” (૬૦) ।

ઉક્તં પુરાણે બ્રહ્માણ્ડે બ્રહ્મણા નારદાય ચ ॥ ૨.૧૬૦॥

“યસ્યાઃ પ્રસાદાત્પરમં વિદન્તિ શેષઃ સુપર્ણો ગિરિશઃ સુરેન્દ્રઃ ।
માતા ચ યૈષાં પ્રથમૈવ ભારતી સા દ્રૌપદી નામ બભૂવ ભૂમૌ ॥ ૨.૧૬૧॥

યા મારુતાદ્ગર્ભમધત્ત પૂર્વં શેષં સુપર્ણં ગિરીશં સુરેન્દ્રમ્ ।
ચતુર્મુખાભાંશ્ચતુરઃ કુમારાન્ સા દ્રૌપદી નામ બભૂવ ભૂમૌ” ॥ ૨.૧૬૨॥

“યસ્યાધિકો બલે નાસ્તિ ભીમસેનમૃતે ક્વચિત્ ।
ન વિજ્ઞાને ન ચ જ્ઞાન એષ રામઃ સ લાઙ્ગલી” ॥ ૨.૧૬૩॥

“યસ્ય ન પ્રતિયોદ્ધાऽસ્તિ ભીમમેકમૃતે ક્વચિત્ ।
અન્વિષ્યાપિ ત્રિલોકેષુ સ એષ મુસલાયુધઃ” ॥ ૨.૧૬૪॥

તથા યુધિષ્ઠિરેણૈવ ભીમાય સમુદીરિતમ્ ।
“અનુજ્ઞાતો રૌહિણેયાત્ત્વયા ચૈવાપરાજિત ।
સર્વવિદ્યાસુ બીભત્સુઃ કૃષ્ણેન ચ મહાત્મના ॥ ૨.૧૬૫॥

અન્વેષ રૌહિણેયં ચ ત્વાં ચ ભીમાપરાજિતમ્ ।
વીર્યે શૌર્યેऽપિ વા નાન્યસ્તૃતીયઃ ફલ્ગુનાદૃતે” ॥ ૨.૧૬૬॥

તથૈવ દ્રૌપદીવાક્યં વાસુદેવં પ્રતીરિતમ્ ।
“અધિજ્યમપિ યત્કર્તું શક્યતે નૈવ ગાણ્ડિવમ્ ।
અન્યત્ર ભીમપાર્થાભ્યાં ભવતશ્ચ જનાર્દન” ॥ ૨.૧૬૭॥

તથૈવાન્યત્ર વચનં કૃષ્ણદ્વૈપાયનેરિતમ્ ।
(૫૯) મહા. ૫.૭૫.૩૪ *
(૬૦) મહા. ૫.૭૫.૧૮ *
ક્ષિક્ષ।“દ્વાવેવ પુરુષૌ લોકે વાસુદેવાદનન્તરૌ ।
ભીમસ્તુ પ્રથમસ્તત્ર દ્વિતીયો દ્રૌણિરેવ ચ” ॥ ૨.૧૬૮॥

“અક્ષયાવિષુધી દિવ્યે ધ્વજો વાનરલક્ષણઃ ।
ગાણ્ડીવં ધનુષાં શ્રેષ્ઠં તેન દ્રૌણેર્વરોऽર્જુનઃ” ॥ ૨.૧૬૯॥

ઇત્યાદ્યનન્તવાક્યાનિ સન્ત્યેવાર્થે વિવક્ષિતે ।
કાનિચિદ્દર્શિતાન્યત્ર દિઙ્માત્રપ્રતિપત્તયે ॥ ૨.૧૭૦॥

તસ્માદુક્તક્રમેણૈવ પુરુષોત્તમતા હરેઃ ।
અનૌપચારિકી સિદ્ધા બ્રહ્મતા ચ વિનિર્ણયાત્ ॥ ૨.૧૭૧॥

પૂર્ણપ્રજ્ઞકૃતેયં સઙ્ક્ષેપાદુદ્ધૃતિઃ સુવાક્યાનામ્ ।
શ્રીમદ્ભારતગાનાં વિષ્ણોઃ પૂર્ણત્વનિર્ણયાયૈવ ॥ ૨.૧૭૨॥

સ પ્રીયતાં પરતમઃ પરમાદનન્તઃ સન્તારકઃ સતતસં સૃતિદુસ્તરાર્ણાત્ ।
યત્પાદપદ્મમકરન્દજુષો હિપાર્થાઃ સ્વારાજ્યમાપુરુભયત્ર સદા વિનોદાત્ ॥ ૨.૧૭૩॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
વાક્યોદ્ધારો નામ દ્વિતીયોઽધ્યાયઃ ॥

## અથ તૃતીયોઽધ્યાયઃ ।

(સર્ગાનુસર્ગલયપ્રાદુર્ભાવનિર્ણયઃ )
ૐ । જયત્યજોઽખણ્ડગુણોરુમણ્ડલઃ સદોદિતો જ્ઞાનમરીચિમાલી ।
સ્વભક્તહાર્દોચ્ચતમોનિહન્તા વ્યાસાવતારો હરિરાત્મભાસ્કરઃ ॥ ૩.૧॥

જયત્યજોઽક્ષીણસુખાત્મબિમ્બઃ સ્વૈશ્વર્યકાન્તિપ્રતતઃ સદોદિતઃ ।
સ્વભક્તસન્તાપદુરિષ્ટહન્તા રામાવતારો હરિરીશચન્દ્રમાઃ ॥ ૩.૨॥

જયત્યસઙ્ખ્યોરુબલામ્બુપૂરો ગુણોચ્ચરત્નાકર આત્મવૈભવઃ ।
સદા સદાત્મજ્ઞાનદીભિરાપ્યઃ કૃષ્ણાવતારો હરિરેકસાગરઃ ॥ ૩.૩॥

“નારાયણં નમસ્કૃત્ય નરં ચૈવ નરોત્તમમ્ ।
દેવીં સરસ્વતીં વ્યાસં તતો જયમુદીરયે”(૬૧) ॥ ૩.૪॥

જયો નામેતિહાસોઽયં કૃષ્ણદ્વૈપાયનેરિતઃ ।
વાયુર્નરોત્તમો નામ દેવીતિ શ્રીરુદીરિતા ॥ ૩.૫॥

નારાયણો વ્યાસ ઇતિ વાચ્યવક્તૃસ્વરૂપકઃ ।
એકઃ સ ભગવાનુક્તઃ સાધકેશો નરોત્તમઃ ॥ ૩.૬॥

ઉપસાધકો નરશ્ચોક્તો દેવી ભાગ્યાત્મિકા નૃણામ્ ।
સરસ્વતી વાક્યરૂપા તસ્માન્નમ્યા હિ તેઽખિલાઃ ।
કૃષ્ણૌ સત્યા ભીમપાર્થૌ કૃષ્ણેત્યુક્તા હિભારતે ॥ ૩.૭॥

સર્વસ્ય નિર્ણયસુવાક્યસમુદ્ધૃતી તુસ્વાધ્યાયયોર્હરિપદસ્મરણેન કૃત્વા ।
આનન્દતીર્થવરનામવતી તૃતીયા ભૌમી તનુર્મરુત આહ કથાઃ પરસ્ય ॥ ૩.૮॥

વ્યૂઢશ્ચતુર્ધા ભગવાન્ સ એકો માયાં શ્રિયં સૃષ્ટિવિધિત્સયાઽર ।
રૂપેણ પૂર્વેણ સવાસુદેવનામ્ના વિરિઞ્ચં સુષુવે ચ સાઽતઃ ॥ ૩.૯॥

સઙ્કર્ષણાચ્ચાપિ જયાતનૂજો બભૂવ સાક્ષાદ્બલસં વિદાત્મા ।
વાયુર્ય એવાથ વિરિઞ્ચનામા ભવિષ્ય આદ્યો ન પરસ્તતો હિ ॥ ૩.૧૦॥

(૬૧) મહા. આદિ. ૧.૧ *
ક્ષ્ક્ષ્ક્ષીઇ। સૂત્રં સ વાયુઃ પુરુષો વિરિઞ્ચઃ પ્રદ્યુમ્નતશ્ચાથ કૃતૌ સ્ત્રિયૌ દ્વે ।
પ્રજજ્ઞતુર્યમલ્. એ તત્ર પૂર્વા પ્રધાનસંજ્ઞા પ્રકૃતિર્જનિત્રી ॥ ૩.૧૧॥

શ્રદ્ધા દ્વિતીયાઽથ તયોશ્ચ યોગો બભૂવ પું સૈવ ચ સૂત્રનામ્ના ।
હરેર્નિયોગાદથ સમ્પ્રસૂતૌ શેષઃ સુપર્ણશ્ચ તયોઃ સહૈવ ॥ ૩.૧૨॥

શેષસ્તયોરેવ હિ જીવનામા કાલાત્મકઃ સોઽથ સુપર્ણ આસીત્ ।
તૌ વાહનં શયનં ચૈવ વિષ્ણોઃ કાલા જયાદ્યાશ્ચ તત પ્રસૂતાઃ ॥ ૩.૧૩॥

કાલા જયાદ્યા અપિ વિષ્ણુપાર્ષદા યસ્માદણ્ડાત્પરતઃ સમ્પ્રસૂતાઃ ।
નીચાઃ સુરેભ્યસ્તત એવ તેઽખિલા વિષ્વક્સેનો વાયુજઃ ખેન તુલ્યઃ ॥ ૩.૧૪॥

વ્યૂહાત્તૃતીયાત્પુનરેવ વિષ્ણોર્દેવાંશ્ચતુર્વર્ણગતાન્ સમસ્તાન્ ।
સઙ્ગૃહ્ય બીજાત્મતયાઽનિરુદ્ધો ન્યધત્ત શાન્ત્યાં ત્રિગુણાત્મિકાયામ્ ॥ ૩.૧૫॥

તતો મહત્તત્ત્વતનુર્વિરિઞ્ચઃ સ્થૂલાત્મનૈવાજનિ વાક્ચ દેવી ।
તસ્યામહઙ્કારતનું સ રુદ્રં સસર્જ બુદ્ધિં ચ તદર્દ્ધદેહામ્ ॥ ૩.૧૬॥

બુદ્ધ્યામુમાયાં સ શિવસ્ત્રિરૂપો મનશ્ચ વૈકારિકદેવસઙ્ઘાન્ ।
દશેન્દ્રિયાણ્યેવ ચ તૈજસાનિ ક્રમેણ ખાદીન્ વિષયૈશ્ચ સાર્દ્ધમ્ ॥ ૩.૧૭॥

પું સઃ પ્રકૃત્યાં ચ પુનર્વિરિઞ્ચાચ્છિવોઽથ તસ્માદખિલાઃ સુરેશાઃ ।
જાતાઃ સશક્રાઃ પુનરેવ સૂત્રાચ્છ્રદ્ધા સુતાનાપ સુરપ્રવીરાન્ ।
શેષં શિવં ચેન્દ્રમથેન્દ્રતશ્ચ સર્વે સુરા યજ્ઞગણાશ્ચ જાતાઃ ॥ ૩.૧૮॥

પુનશ્ચ માયા ત્રિવિધા બભૂવ સત્ત્વાદિરૂપૈરથ વાસુદેવાત્ ।
સત્ત્વાત્મિકાયાં સ બભૂવ તસ્માત્સ વિષ્ણુનામૈવ નિરન્તરોઽપિ ।
રજસ્તનૌ ચૈવ વિરિઞ્ચ આસીત્તમસ્તનૌ શર્વ ઇતિ ત્રયોઽસ્માત્ ॥ ૩.૧૯॥

એતે હિ દેવાઃ પુનરણ્ડસૃષ્ટાવશક્નુવન્તો હરિમેત્ય તુષ્ટુવુઃ ।
ત્વં નો જગચ્ચિત્રવિચિત્રસર્ગનિસ્સીમશક્તિઃ કુરુ સન્નિકેતમ્ ॥ ૩.૨૦॥

ઇતિ સ્તુતસ્તૈઃ પુરુષોત્તમોઽસૌ સ વિષ્ણુનામા શ્રિયમાપ સૃષ્ટયે ।
સુષાવ સૈવાણ્ડમધોક્ષજસ્ય શુભ્રં હિરણ્યાત્મકમમ્બુમધ્યે ॥ ૩.૨૧॥

ક્ષ્ક્ષ્ક્ષવ્। તસ્મિન્ પ્રવિષ્ટા હરિણૈવ સાર્દ્ધં સર્વે સુરાસ્તસ્ય બભૂવ નાભેઃ ।

લોકાત્મકં પદ્મમમુષ્ય મધ્યે પુનર્વિરિઞ્ચોઽજનિ સદ્ગુણાત્મા ॥ ૩.૨૨॥

તસ્માત્પુનઃ સર્વસુરાઃ પ્રસૂતાસ્તે જાનમાના અપિ નિર્ણયાય ।
નિસ્સૃત્ય કાયાદુત પદ્મયોનેઃ સમ્પ્રાવિશન્ ક્રમશો મારુતાન્તાઃ ॥ ૩.૨૩॥

પપાત વાયોર્ગમનાચ્છરીરં તસ્યૈવ ચાઽવેશત ઉત્થિતં પુનઃ ।
તસ્માત્સ એકો વિબુધપ્રધાન ઇત્યાશ્રિતા દેવગણાસ્તમેવ ।
હરેર્વિરિઞ્ચસ્ય ચ મધ્યસં સ્થિતેસ્તદન્યદેવાધિપતિઃ સ મારુતઃ ॥ ૩.૨૪॥

તતો વિરિઞ્ચો ભુવનાનિ સપ્ત સસપ્તકાન્યાશુ ચકાર સોઽબ્જાત્ ।
તસ્માચ્ચ દેવા ઋષયઃ પુનશ્ચ વૈકારિકાદ્યાઃ સશિવા બભૂવુઃ ॥ ૩.૨૫॥

અગ્રે શિવોઽહમ્ભવ એવ બુદ્ધેરુમા મનોજૌ સહ શક્રકામૌ ।
ગુરુર્મનુર્દક્ષ ઉતાનિરુદ્ધઃ સહૈવ પશ્ચાન્મનસઃ પ્રસૂતાઃ ॥ ૩.૨૬॥

ચક્ષુઃ શ્રુતિભ્યાં સ્પર્શાત્સહૈવ રવિઃ શશી ધર્મ ઇમે પ્રસૂતાઃ ।
જિહ્વાભવો વારિપતિર્નસોશ્ચ નાસત્યદસ્રૌ ક્રમશઃ પ્રસૂતાઃ ॥ ૩.૨૭॥

તતઃ સનાદ્યાશ્ચ મરીચિમુખ્યા દેવાશ્ચ સર્વે ક્રમશઃ પ્રસૂતાઃ ।
તતોઽસુરાદ્યા ઋષયો મનુષ્યા જગદ્વિચિત્રં ચ વિરિઞ્ચતોઽભૂત્ ॥ ૩.૨૮॥

ઉક્તક્રમાત્પૂર્વભવસ્તુ યો યઃ શ્રેષ્ઠઃ સ સ હ્યાસુરકાનૃતે ચ ।
પૂર્વસ્તુ પશ્ચાત્પુનરેવ જાતો નાશ્રેષ્ઠતામેતિ કથઞ્ચિદસ્ય ।
ગુણાસ્તુ કાલાત્પિતૃમાતૃદોષાત્સ્વકર્મતો વાઽભિભવં પ્રયાન્તિ ॥ ૩.૨૯॥

લયો ભવેદ્વ્યુત્ક્રમતો હિ તેષાં તતો હરિઃ પ્રલ્। અયે શ્રીસહાયઃ ।
શેતેનિજાનન્દમમન્દસાન્દ્રસન્દોહમેકોઽનુભવન્નનન્તઃ ॥ ૩.૩૦॥

અનન્તશીર્ષાસ્યકરોરુપાદઃ સોઽનન્તમૂર્તિઃ સ્વગુણાનનન્તાન્ ।
અનન્તશક્તિઃ પરિપૂર્ણભોગો ભુઞ્જન્નજસ્રં નિજરૂપ આસ્તે ॥ ૩.૩૧॥

એવં પુનઃ સૃજતે સર્વમેતદનાદ્યનન્તો હિ જગત્પ્રવાહઃ ।
નિત્યાશ્ચ જીવાઃ પ્રકૃતિશ્ચ નિત્યા કાલશ્ચ નિત્યઃ કિમુ દેવદેવઃ ॥ ૩.૩૨॥

ક્ષ્ક્ષ્વ્।યથા સમુદ્રાત્સરિતઃ પ્રજાતાઃ પુનસ્તમેવ પ્રવિશન્તિ શશ્વત્ ।
એવં હરેર્નિત્યજગત્પ્રવાહસ્તમેવ ચાસૌ પ્રવિશત્યજસ્રમ્ ॥ ૩.૩૩॥

એવં વિદુર્યે પરમામનન્તામજસ્ય શક્તિં પુરુષોત્તમસ્ય ।
તસ્ય પ્રસાદાદથ દગ્ધદોષાસ્તમાપ્નુવન્ત્યાશુ પરં સુરેશમ્ ॥ ૩.૩૪॥

દેવાનિમાન્મુક્તસમસ્તદોષાન્ સ્વસન્નિધાને વિનિવેશ્ય દેવઃ ।

પુનસ્તદન્યાનધિકારયોગ્યાં સ્તત્તદ્ગણાનેવ પદે નિયુઙ્ક્તે ॥ ૩.૩૫॥

પુનશ્ચ મારીચત એવ દેવા જાતા આદિત્યામસુરાશ્ચ દિત્યામ્ ।
ગાવો મૃગાઃ પક્ષ્યુરગાદિસત્ત્વા દાક્ષાયણીષ્વેવ સમસ્તશોઽપિ ॥ ૩.૩૬॥

તતઃ સ મગ્નામલયો લયોદધૌ મહીં વિલોક્યાઽશુ હરિર્વરાહઃ ।
ભૂત્વા વિરિઞ્ચાર્થ ઇમાં સશૈલામુદ્ધૃત્ય વારામુપરિ ન્યધાત્સ્થિરમ્ ॥ ૩.૩૭॥

અથાબ્જનાભપ્રતિહારપાલૌ શાપાત્રિશો ભૂમિતલ્। એઽભિજાતૌ ।
દિત્યાં હિરણ્યાવથ રાક્ષસૌ ચ પૈતૃષ્વસેયૌ ચ હરેઃ પરસ્તાત્ ॥ ૩.૩૮॥

હતો હિરણ્યાક્ષ ઉદારવિક્રમો દિતેઃ સુતો યોઽવરજઃ સુરાર્થે ।
ધાત્રાઽર્થિતેનૈવ વરાહરૂપિણા ધરોદ્ધૃતૌ પૂર્વહતોઽબ્જજોદ્ભવઃ ॥ ૩.૩૯॥

અથો વિધાતુર્મુખતો વિનિઃ સૃતાન્ વેદાન્ હયાસ્યો જગૃહેઽસુરેન્દ્રઃ ।
નિહત્ય તં મત્સ્યવપુર્જુગોપ મનું મુનીં સ્તાંશ્ચ દદૌ વિધાતુઃ ॥ ૩.૪૦॥

મન્વન્તરપ્રલ્। અયે મત્સ્યરૂપો વિદ્યામદાન્મનવે દેવદેવઃ ।
વૈવસ્વતાયોત્તમસં વિદાત્મા વિષ્ણોઃ સ્વરૂપપ્રતિપત્તિરૂપામ્ ॥ ૩.૪૧॥

અથો દિતેર્જ્યેષ્ઠસુતેન શશ્વત્પ્રપીડિતા બ્રહ્મવરાત્સુરેશાઃ ।
હરિં વિરિઞ્ચેન સહોપજગ્મુર્દૌરાત્મ્યમસ્યાપિ શશં સુરસ્મૈ ॥ ૩.૪૨॥

અભિષ્ટુતસ્તૈર્હરિરુગ્રવીર્યો નૃસિં હરૂપેણ સાવિરાસીત્ ।
હત્વા હિરણ્યં ચ સુતાય તસ્ય દત્વાઽભયં દેવગણાનતોષયત્ ॥ ૩.૪૩॥

સુરાસુરાણામુદધિં વિમથ્નતાં દધાર પૃષ્ઠેન ગિરિં સ મન્દરમ્ ।
ક્ષિક્ષ્વ।વરપ્રદાનાદપરૈરધાર્યં હરસ્ય કૂર્મો બૃહદણ્ડવોઢા ॥ ૩.૪૪॥

વરાદજેયત્વમવાપ દૈત્યરાટ્ચતુર્મુખસ્યૈવ બલિર્યદા તદા ।
અજાયતેન્દ્રાવરજોઽદિતેઃ સુતો મહાનજોઽપ્યબ્જભવાદિસં સ્તુતઃ ॥ ૩.૪૫॥

સ વામનાત્માઽસુરભૂભૃતોઽધ્વરં જગામ "ગાં સન્નમયન્ પદે પદે"(૬૨) ।
જહાર ચાસ્માચ્છલતસ્ત્રિવિષ્ટપં ત્રિભિઃ ક્રમૈસ્તચ્ચ દદૌ નિજાગ્રજે ॥ ૩.૪૬॥

પિતામહેનાસ્ય પુરા હિયાચિતો બલેઃ કૃતે કેશવ આહ યદ્વચઃ ।
નાયાચ્ચયાઽહં પ્રતિહન્મિ તં બલિં શુભાનનેત્યેવ તતોઽભ્યયાચત ॥ ૩.૪૭॥

બભૂવિરે ચન્દ્રલલામતો વરાત્પુરા હ્યજેયા અસુરા ધરાતલ્। એ ।
તૈરર્દિતા વાસવનાયકાઃ સુરાઃ પુરો નિધાયાબ્જજમસ્તુવન્ હરિમ્ ॥ ૩.૪૮॥

વિરિઞ્ચસૃષ્ટૈર્નિતરામવધ્યૌ વરાદ્ધિધાતુર્દિતિજૌ હિરણ્યકૌ ।
તથા હયગ્રીવ ઉદારવિક્રમસ્ત્વયા હતા બ્રહ્મપુરાતનેન ॥ ૩.૪૯॥

સ ચાસુરાન્ રુદ્રવરાદવધ્યાનિમાન્ સમસ્તૈરપિ દેવદેવ ।
નિઃ સીમશક્ત્યૈવ નિહત્ય સર્વાન્ હૃદમ્બુજે નો નિવસાથ શશ્વત્ ॥ ૩.૫૦॥

ઇત્યાદરોક્તસ્ત્રિદશૈરજેયઃ સ શાર્ઙ્ગધન્વાઽથ ભૃગૂદ્વહોઽભૂત્ ।
રામો નિહત્યાસુરપૂગમુગ્રં નદાનનાદિર્વિદધેઽસૃજૈવ ॥ ૩.૫૧॥

તતઃ પુલસ્ત્યસ્ય કુલે પ્રસૂતૌ તાવાદિદૈત્યૌ જગદેકશત્રૂ ।
પરૈરવધ્યૌ વરતઃ પુરા હરેઃ સુરૈરજેયૌ ચ વરાદ્ધિધાતુઃ ॥ ૩.૫૨॥

સર્વૈરજેયઃ સ ચ કુમ્ભકર્ણઃ પુરાતને જન્મનિ ધાતુરેવ ।
વરાન્નરાદીનૃત એવ રાવણસ્તદાતનાત્તૌ ત્રિદશાનબાધતામ્ ॥ ૩.૫૩॥

તદાઽબ્જજં શૂલિનમેવ ચાગ્રતો નિધાય દેવાઃ પુરુહૂતપૂર્વકાઃ ।
પયોમ્બુધૌ ભોગિપભોગશાયિનં સમેત્ય યોગ્યાં સ્તુતિમભ્યયોજયન્ ॥ ૩.૫૪॥

ત્વમેક ઈશઃ પરમઃ સ્વતન્ત્રસ્ત્વમાદિરન્તો જગતો નિયોક્તા ।
(૬૨) ભા. ઉ. ૮.૧૭.૨૦
ક્ષ્ક્ષ્વી। ત્વદાજ્ઞયૈવાખિલમમ્બુજોદ્ભવા વિતેનિરેઽગ્ર્યાશ્ચરમાશ્ચ યેઽન્યે ॥ ૩.૫૫॥

મનુષ્યમાનાત્ત્રિશતં સષષ્ટિકં દિવૌકસામેકમુશન્તિ વત્સરમ્ ।
દ્વિષટ્સહસ્રૈરપિ તૈશ્ચતુર્યુગં ત્રેતાદિભિઃ પાદશ એવ હીનૈઃ ॥ ૩.૫૬॥

સહસ્રવૃત્તં તદહઃ સ્વયમ્ભુવો નિશા ચ તન્માનમિતં શરચ્છતમ્ ।
ત્વદાજ્ઞયા સ્વાનનુભૂય ભોગાનુપૈતિ સોઽપિ ત્વરિતસ્ત્વદન્તિકમ્ ॥ ૩.૫૭॥

ત્વયા પુરા કર્ણપુટાદ્વિનિર્મિતૌ મહાસુરૌ તૌ મધુકૈટભાખ્યૌ ।
પ્રભઞ્જનાવેશવશાત્તવાઽજ્ઞયા બલોદ્ધતાવાશુ જલે વ્યવર્ધતામ્ ॥ ૩.૫૮॥

ત્વદાજ્ઞયા બ્રહ્મવરાદવધ્યૌ ચિક્રીડિષાસમ્ભવયા મુખોદ્ધતાન્ ।
સ્વયમ્ભુવો વેદગણાનહાર્ષતાં તદાઽભવસ્ત્વં હયશીર્ષ ઈશ્વરઃ ॥ ૩.૫૯॥

આહૃત્ય વેદાનખિલાન્ પ્રદાય સ્વયમ્ભુવે તૌ ચ જઘન્થ દસ્યૂ ।
નિષ્પીડ્ય તાવૂરુતલ્. એ કરાભ્યાં તન્મેદસૈવાઽશુ ચકર્થ મેદિનીમ્ ॥ ૩.૬૦॥

એવં સુરાણાં ચ નિસર્ગજં બલં તથાઽસુરાણાં વરદાનસમ્ભવમ્ ।
વશે તવૈતદ્દ્વયમપ્યતો વયં નિવેદયામઃ પિતુરેવ તેઽખિલમ્ ॥ ૩.૬૧॥

ઇમૌ ચ રક્ષોઽધિપતી વરોદ્ધતૌ જહિ સ્વવીર્યેણ નૃષુ પ્રભૂતઃ ।

ઇતીરિતે તૈરખિલૈઃ સુરેશ્વરૈર્બભૂવ રામો જગતીપતિઃ પ્રભુઃ ॥ ૩.૬૨॥

સ કશ્યપસ્યાદિતિગર્ભજન્મનો વિવસ્વતસ્તન્તુભવસ્ય ભૂભૃતઃ ।
ગૃહે દશસ્યન્દનનામિનોઽભૂત્કૌસલ્યકાનામ્નિ તદર્થિનેષ્ટઃ ॥ ૩.૬૩॥

તદાજ્ઞયા દેવગણા બભૂવિરે પુરૈવ પશ્ચાદપિ તસ્ય ભૂમ્નઃ ।
નિષેવણાયોરુગુણસ્ય વાનરેષ્વથો નરેષ્વેવ ચ પશ્ચિમોદ્ભવાઃ ॥ ૩.૬૪॥

સ દેવતાનાં પ્રથમો ગુણાધિકો બભૂવ નામ્ના હનુમાન્ પ્રભઞ્જનઃ ।
સ્વસમ્ભવઃ કેસરિણો ગૃહે પ્રભુર્બભૂવ વાલી સ્વત એવ વાસવઃ ॥ ૩.૬૫॥

સુગ્રીવ આસીત્પરમેષ્ઠિતેજસા યુતો રવિઃ સ્વાત્મત એવ જામ્બવાન્ ।
ય એવ પૂર્વં પરમેષ્ઠિવક્ષસસ્ત્વગુદ્ભવો ધર્મ ઇહાઽસ્યતોઽભવત્ ॥ ૩.૬૬॥

ક્ષ્ક્ષ્વીઇ। ય એવ સૂર્યાત્પુનરેવ સંજ્ઞયા નામ્ના યમો દક્ષિણદિક્પ આસીત્ ।
સ જામ્બવાન્ દૈવતકાર્યદર્શિના પુરૈવ સૃષ્ટો મુખતઃ સ્વયમ્ભુવા ॥ ૩.૬૭॥

બ્રહ્મોદ્ભવઃ સોમ ઉતાસ્ય સૂનોરત્રેરભૂત્સોઽઙ્ગદ એવ જાતઃ ।
બૃહસ્પતિસ્તાર ઉતો શચી ચશક્રસ્ય ભાર્યૈવ બભૂવ તારા ॥ ૩.૬૮॥

બૃહસ્પતિર્બ્રહ્મસુતોઽપિ પૂર્વં સહૈવ શચ્યા મનસોઽભિજાતઃ ।
બ્રહ્મોદ્ભવસ્યાઙ્ગિરસઃ સુતોઽભૂન્મારીચજસ્યૈવ શચી પુલોમ્નઃ ॥ ૩.૬૯॥

સ એવ શચ્યા સહ વાનરોઽભૂત્સ્વસમ્ભવો દેવગુરુર્બૃહસ્પતિઃ ।
અભૂત્સુષેણો વરુણોઽશ્વિનૌ ચ બભૂવતુસ્તૌ વિવિદશ્ચ મૈન્દઃ ॥ ૩.૭૦॥

બ્રહ્મોદ્ભવૌ તૌ પુનરેવ સૂર્યાદ્બભૂવતુસ્તત્ર કનીયસસ્તુ ।
આવેશ ઐન્દ્રો વરદાનતોઽભૂત્તતો બલીયાન્ વિવિદો હિ મૈન્દાત્ ॥ ૩.૭૧॥

નીલોઽગ્નિરાસીત્કમલોદ્ભવોત્થઃ કામઃ પુનઃ શ્રીરમણાદ્રમાયામ્ ।
પ્રદ્યુમ્નનામાઽભવદેવમીશાત્સ સ્કન્દતામાપ સ ચક્રતાં ચ ॥ ૩.૭૨॥

પૂર્વં હરેશ્ચક્રમભૂદ્ધિ દુર્ગા તમઃ સ્થિતા શ્રીરિતિ યાં વદન્તિ ।
સત્ત્વાત્મિકા શઙ્ખમથો રજસ્થા ભૂર્નામિકા પદ્મમભૂદ્ધરેર્હિ ॥ ૩.૭૩॥

ગદા તુવાયુર્બલસં વિદાત્મા શાર્ઙ્ગશ્ચ વિદ્યેતિ રમૈવ ખડ્ગઃ ।
દુર્ગાત્મિકા સૈવ ચ ચર્મનામ્ની પઞ્ચાત્મકો મારુત એવ બાણાઃ ॥ ૩.૭૪॥

એવં સ્થિતેષ્વેવ પુરાતનેષુ વરાદ્રથાઙ્ગત્વમવાપ કામઃ ।
તત્સૂનુતામાપ ચ સોઽનિરુદ્ધો બ્રહ્મોદ્ભવઃ શઙ્ખતનુઃ પુમાત્મા ॥ ૩.૭૫॥

તાવેવ જાતૌ ભરતશ્ચ નામ્ના શત્રુઘ્ન ઇત્યેવ ચ રામતોઽનુ ।
પૂર્વં સુમિત્રાતનયશ્ચ શેષઃ સ લક્ષ્મણો નામ રઘૂત્તમાદનુ ॥ ૩.૭૬॥

કૌસલ્યકાપુત્ર ઉરુક્રમોઽસાવેકસ્તથૈકો ભરતસ્ય માતુઃ ।
ઉભૌ સુમિત્રાતનયૌ નૃપસ્ય ચત્વાર એતે હ્યમરોત્તમા સુતાઃ ॥ ૩.૭૭॥

સઙ્કર્ષણાદ્યૈસ્ત્રિભિરેવ રૂપૈરાવિષ્ટ આસીત્ત્રિષુ તેષુ વિષ્ણુઃ ।
ઇન્દ્રોઽઙ્ગદે ચૈવ તતોઽઙ્ગદો હિ બલી નિતાન્તં સ બભૂવ શશ્વત્ ॥ ૩.૭૮॥

ક્ષિક્ષક્ષક્ષ્।યેઽન્યે ચ ભૂપાઃ કૃતવીર્યજાદ્યા બલાધિકાઃ સન્તિ સહસ્રશોઽપિ ।
સર્વે હરેઃ સન્નિધિભાવયુક્તા ધર્મપ્રધાનાશ્ચ ગુણપ્રધાનાઃ ॥ ૩.૭૯॥

સ્વયં રમા સીરત એવ જાતા સીતેતિ રામાર્થમનૂપમા યા ।
વિદેહરાજસ્ય હિ યજ્ઞભૂમૌ સુતેતિ તસ્યૈવ તતસ્તુ સાઽભૂત્ ॥ ૩.૮૦॥

ઇત્યાદિકલ્પોત્થિત એષ સર્ગો મયા સમસ્તાગમનિર્ણયાત્મકઃ ।
સહાનુસર્ગઃ કથિતોઽત્ર પૂર્વો યો યો ગુણૈર્નિત્યમસૌ વરો હિ ॥ ૩.૮૧॥

પાશ્ચાત્ત્યકલ્પેષ્વપિ સર્ગભેદાઃ શ્રુતૌ પુરાણેષ્વપિ ચાન્યથોક્તાઃ ।
નોત્કર્ષહેતુઃ પ્રથમત્વમેષુ વિશેષવાક્યૈરવગમ્યમેતત્ ॥ ૩.૮૨॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
સર્ગાનુસર્ગલયપ્રાદુર્ભાવનિર્ણયો નામ તૃતીયોઽધ્યાયઃ ॥

## અથ ચતુર્થોઽધ્યાયઃ ।

(રામાવતારે અયોધ્યાપ્રવેશઃ )
ૐ । અથાભ્યવર્ધંશ્ચતુરાઃ કુમારા નૃપસ્ય ગેહે પુરુષોત્તમાદ્યાઃ ।
નિત્યપ્રવૃદ્ધસ્ય ચ તસ્ય વૃદ્ધિરપેક્ષ્ય લોકસ્ય હિ મન્દદૃષ્ટિમ્ ॥ ૪.૧॥

નિરીક્ષ્ય નિત્યં ચતુરઃ કુમારાન્ પિતા મુદં સન્તતમાપ ચોચ્ચમ્ ।
વિશેષતો રામમુખેન્દુબિમ્બમવેક્ષ્ય રાજા કૃતકૃત્ય આસીત્ ॥ ૪.૨॥

તન્માતરઃ પૌરજના અમાત્યા અન્તઃ પુરા વૈષયિકાશ્ચ સર્વે ।
અવેક્ષમાણાઃ પરમં પુમાં સં સ્વાનન્દતૃપ્તા ઇવ સમ્બભૂવુઃ ॥ ૪.૩॥

તતઃ સુવં શે શશિનઃ પ્રસૂતો ગાધીતિ શક્રસ્તનુજોઽસ્ય ચાઽસીત્ ।
વરેણ વિપ્રત્વમવાપ યોઽસૌ વિશ્વસ્ય મિત્રં સ ઇહાઽજગામ ॥ ૪.૪॥

તેનાર્થિતો યજ્ઞરિરક્ષયૈવ કૃચ્છ્રેણ પિત્રાઽસ્ય ભયાદ્વિસૃષ્ટઃ ।

જગામ રામઃ સહ લક્ષ્મણેન સિદ્ધાશ્રમં સિદ્ધજનાભિવન્દ્યઃ ॥ ૪.૫॥

અનુગ્રહાર્થં સ ઋષેરવાપ સલક્ષ્મણોઽસ્ત્રં મુનિતો હિ કેવલમ્ ।
વવન્દિરે બ્રહ્મમુખાઃ સુરેશાસ્તમસ્ત્રરૂપાઃ પ્રકટાઃ સમેત્ય ॥ ૪.૬॥

અથો જઘાનાઽશુ શરેણ તાટકાં વરાદ્વિધાતુસ્તદનન્યવધ્યામ્ ।
રરક્ષ યજ્ઞં ચ મુનેર્નિહત્ય સુબાહુમીશાનગિરા વિમૃત્યુમ્ ॥ ૪.૭॥

શરેણ મારીચમથાર્ણવેઽક્ષિપદ્વચો વિરિઞ્ચસ્ય તુ માનયાનઃ ।
અવધ્યતા તેન હિ તસ્ય દત્તા જઘાન ચાન્યાન્ રજનીચરાનથ ॥ ૪.૮॥

તદા વિદેહેન સુતાસ્વયં વરો વિઘોષિતો દિક્ષુ વિદિક્ષુ સર્વશઃ ।
નિધાર્ય તદ્વાધિસુતાનુયાયી યયૌ વિદેહાનનુજાનુયાતઃ ॥ ૪.૯॥

અથો અહલ્યાં પતિનાઽભિશપ્તાં પ્રધર્ષણાદિન્દ્રકૃતાચ્છિલીકૃતામ્ ।
સ્વદર્શનાન્માનુષતામુપેતાં સુયોજયામાસ સ ગૌતમેન ॥ ૪.૧૦॥

બલં સ્વભક્તેરધિકં પ્રકાશયન્નનુગ્રહં ચ ત્રિદશેષ્વતુલ્યમ્ ।
અનન્યભક્તાં ચ સુરેશકાઙ્ક્ષયા વિધાય નારીં પ્રયયૌ તયાઽર્ચિતઃ ॥ ૪.૧૧॥

ક્ષ્લિ। શ્યામાવદાતે જગદેકસારે સ્વનન્તચન્દ્રાધિકકાન્તિકાન્તે ।
સહાનુજે કાર્મુકબાણપાણૌ પુરીં પ્રવિષ્ટે તુતુષુર્વિદેહજાઃ ॥ ૪.૧૨॥

પપુર્નિતાન્તં સરસાક્ષિભૃઙ્ગૈર્વરાનનાબ્જં પુરુષોત્તમસ્ય ।
વિદેહનારીનરવર્યસઙ ન્ઘા યથા મહાપૂરુષિકાસ્તદઙ્ઘ્રિમ્ ॥ ૪.૧૩॥

તથા વિદેહઃ પ્રતિલભ્ય રામં સહસ્રનેત્રાવરજં ગવિષ્ઠમ્ ।
સમર્ચયામાસ સહાનુજં તમૃષિં ચ સાક્ષાજ્જ્વલનપ્રકાશમ્ ॥ ૪.૧૪॥

મેને ચ જામાતરમાત્મકન્યાગુણોચિતં રૂપનવાવતારમ્ ।
ઉવાચ ચાસ્મૈ ઋષિરુગ્રતેજાઃ કુરુષ્વ જામાતરમેનમાશ્વિતિ ॥ ૪.૧૫॥

સ આહ ચૈનં પરમં વચસ્તે કરોમિ નાત્રાસ્તિ વિચારણા મે ।
શ◌ૃણુષ્વ મેઽથાપિ યથા પ્રતિજ્ઞા સુતાપ્રદાનાય કૃતા પુરસ્તાત્ ॥ ૪.૧૬॥

તપો મયા ચીર્ણમુમાપતેઃ પુરા વરાયુધાવાપ્તિધૃતેન ચેતસા ।
સ મે દદૌ દિવ્યમિદં ધનુસ્તદા કથઞ્ચનાચાલ્યમૃતે પિનાકિનમ્ ॥ ૪.૧૭॥

ન દેવદૈત્યોરગદેવગાયકા અલં ધનુશ્ચાલયિતું સવાસવાઃ ।
કુતો નરાસ્તદ્ગરતો હિ કિઙ્કરા સહાનસૈવાત્ર કૃષન્તિ કૃચ્છ્રતઃ ॥ ૪.૧૮॥

અધાર્યમેતદ્ધનુરાપ્ય શઙ્કરાદહં નૃણાં વીર્યપરીક્ષણે ધૃતઃ ।
સુતાર્થમેતાં ચકર પ્રતિજ્ઞાં દદામિ કન્યાં ય ઇદં હિ પૂરયેત્ ॥ ૪.૧૯॥

ઇતીરિતાં મે ગિરમભ્યવેત્ય દિતેઃ સુતા દાનવયક્ષરાક્ષસાઃ ।
સમેત્ય ભૂપાશ્ચ સમીપમાશુ પ્રગૃહ્ય તચ્ચાલયિતું ન શેકુઃ ॥ ૪.૨૦॥

સં સ્વિન્નગાત્રાઃ પરિવૃત્તનેત્રા દશાનનાદ્યાઃ પતિતા વિમૂર્છિતાઃ ।
તથાઽપિ માં ધર્ષયિતું ન શેકુઃ સુતાકૃતે તે વચનાં સ્વયમ્ભુવઃ ॥ ૪.૨૧॥

પુરા હિ મેઽદાત્પ્રભુરબ્જજો વરં પ્રસાદિતો મે તપસા કથઞ્ચન ।
બલાન્ન તે કશ્ચિદુપૈતિ કન્યકાં તદિચ્છુભિસ્તે ન ચ ધર્ષણેતિ ॥ ૪.૨૨॥

તતસ્તુ તે નષ્ટમદા ઇતો ગતાઃ સમસ્તશો હ્યસ્તન એવ પાર્થિવાઃ ।
ક્ષ્લી। તતો મમાયં પ્રતિપૂર્ય માનસં વૃણોતુ કન્યામયમેવ મેઽર્થિતઃ ॥ ૪.૨૩॥

તથેતિ ચોક્તે મુનિના સ કિઙ્કરૈરનન્તભોગોપમમાશ્વથાઽનયત્ ।
સમીક્ષ્ય તદ્વામકરેણ રાઘવઃ સલીલમુદ્ધૃત્ય હસન્નપૂરયત્ ॥ ૪.૨૪॥

વિકૃષ્યમાણં તદનન્તરાધસા પરેણ નિઃ સીમબલેન લીલયા ।
અભજ્યતાસહ્યમમુષ્ય તદ્બલં પ્રસોઢુમીશં કુત એવ તદ્ભવેત્ ॥ ૪.૨૫॥

સ મધ્યતસ્તત્પ્રવિભજ્ય લીલયા યથેક્ષુદણ્ડં શતમન્યુકુઞ્જરઃ ।
વિલોકયન્ વક્ત્રમૃષેરવસ્થિતઃ સલક્ષ્મણઃ પૂર્ણતનુર્યથા શશી ॥ ૪.૨૬॥

તમબ્જનેત્રં પૃથુતુઙ્ગવક્ષસં શ્યામાવદાતં ચલકુણ્ડલોજ્જ્વલમ્ ।
શશાક્ષતોત્થોપમચન્દનોક્ષિતં દદર્શ વિદ્યુદ્વસનં નૃપાત્મજા ॥ ૪.૨૭॥

અથો કરાભ્યાં પ્રતિગૃહ્ય માલામમ્લાનપદ્માં જલજાયતાક્ષી ।
ઉપેત્ય મન્દં લલ્. ઇતૈઃ પદૈસ્તાં તદં સ આસજ્ય ચ પાર્શ્વતોઽભવત્ ॥ ૪.૨૮॥

તતઃ પ્રમોદો નિતરાં જનાનાં વિદેહપુર્યામભવત્સમન્તાત્ ।
રામં સમાલોક્ય નરેન્દ્રપુત્ર્યા સમેતમાનન્દનિધિં પરેશમ્ ॥ ૪.૨૯॥

લક્ષ્મ્યા સમેતે પ્રકટં રમેશે સમ્પ્રેષયામાસ તદાઽશુ પિત્રે ।
વિદેહરાજો દશદિગ્રથાય સ તન્નિશમ્યાઽશુ તુતોષ ભૂમિપઃ ॥ ૪.૩૦॥

અથાઽત્મજાભ્યાં સહિતઃ સભાર્યો યયૌ ગજસ્યન્દનપત્તિયુક્તયા ।
સ્વસેનયાઽગ્રે પ્રણિધાય ધાતૃજં વસિષ્ઠમાશ્વેવ સ યત્ર મૈથિલઃ ॥ ૪.૩૧॥

સ મૈથિલેનાતિતરાં સમર્ચિતો વિવાહયામાસ સુતં મુદમ્ભરઃ ।
પુરોહિતો ગાધિસુતાનુમોદિતો જુહાવ વહ્નિં વિધિના વસિષ્ઠઃ ॥ ૪.૩૨॥

તદા વિમાનાવલિભિર્નભસ્તલ્। અં દિદૃક્ષતાં સઙ્કુલમાસ નાકિનામ્ ।
સુરાનકા દુન્દભયોડ વિનેદિરે જગુશ્ચ ગન્ધર્વવરાઃ સહસ્રશઃ ॥ ૪.૩૩॥

વિજાનમાના જગતાં હિ માતરં પુરાડર્થિતું નાડયયુરત્ર દેવતાઃ ।
તદા તુરામં રમયા યુતં પ્રભું દિદૃક્ષવશ્ચક્રુરલં નભસ્તલ્. અમ્ ॥ ૪.૩૪॥

ક્ષ્લીઇ।યથા પુરા સાગરજાસ્વયં વરે સુમાનસાનામભવત્સમાગમઃ ।
તથા હ્યભૂત્સર્વદિવૌકસાં તદા તથા મુનીનાં સહભૂભૃતાં ભુવિ ॥ ૪.૩૫॥

પ્રગૃહ્ય પાણિં ચ નૃપાત્મજાયા રરાજ રાજીવસમાનનેત્રઃ ।
યથા પુરા સાગરજાસમેતઃ સુરાસુરાણામમૃતાબ્ધિમન્થને ॥ ૪.૩૬॥

સ્વલઙ્કૃતાસ્તત્ર વિચેરુરઙ્ગના વિદેહરાજસ્ય ચ યા હિ યોષિતઃ ।
મુદા સમેતં રમયા રમાપતિં વિલોક્ય રામાય દદૌ ધનં નૃપઃ ॥ ૪.૩૭॥

પ્રિયાણિ વસ્ત્રાણિ રથાન્ સકુઞ્જરાન્ પરાર્દ્ધ્યરત્નાન્યખિલસ્ય ચેશિતુઃ ।
દદૌ ચ કન્યાત્રયમુત્તમં મુદા તદા સ રામાવરજેભ્ય એવ ॥ ૪.૩૮॥

મહોત્સવં તં ત્વનુભૂય દેવતા નરાશ્ચ સર્વે પ્રયયુર્યથાગતમ્ ।
પિતા ચ રામસ્ય સુતૈઃ સમન્વિતો યયાવયોધ્યાં સ્વપુરીં મુદા તતઃ ॥ ૪.૩૯॥

તદન્તરે સોડથ દદર્શ ભાર્ગવં સહસ્રલક્ષામિતભાનુદીધિતિમ્ ।
વિભાસમાનં નિજરશ્મિમણ્ડલે ધનુર્ધરં દીપ્તપરશ્વધાયુધમ્ ॥ ૪.૪૦॥

અજાનતાં રાઘવમાદિપૂરુષં સમાગતં જ્ઞાપયિતું નિદર્શનૈઃ ।
સમાહ્વયન્તં રઘુપં સ્પૃધેવ નૃપો યયાચે પ્રણિપત્ય ભીતઃ ॥ ૪.૪૧॥

ન મે સુતં હન્તુમિહાર્હસિ પ્રભો વયોગતસ્યેત્યુદિતઃ સ ભાર્ગવઃ ।
સુતત્રયં તે પ્રદદામિ રાઘવં રણે સ્થિતં દ્રષ્ટુમિહાડગતોડસ્મ્યહમ્ ॥ ૪.૪૨॥

સ ઇત્થમુક્ત્વા નૃપતિં રઘૂત્તમં ભૃગૂત્તમઃ પ્રાહ નિજાં તનું હરિઃ ।
અભેદમજ્ઞેષ્વભિદર્શયન્ પરં પુરાતનોડહં હરિરેષ ઇત્યપિ ॥ ૪.૪૩॥

શ ृણુષ્વ રામ ત્વમિહોદિતં મયા ધનુર્દ્વયં પૂર્વમભૂન્મહાદ્ભુતમ્ ।
ઉમાપતિસ્ત્વેકમધારયત્તતો રમાપતિશ્ચાપરમુત્તમોત્તમમ્ ॥ ૪.૪૪॥

તદા તુ લોકસ્ય નિદર્શનાર્થિભિઃ સમર્થિતૌ તૌ હરિશઙ્કરૌ સુરૈઃ ।
રણસ્થિતૌ વાં પ્રસમીક્ષિતું વયં સમર્થયામોડત્ર નિદર્શનાર્થિનઃ ॥ ૪.૪૫॥

તતો હિ યુદ્ધાય રમેશશઙ્કરૌ વ્યવસ્થિતૌ તૌ ધનુષી પ્રગૃહ્ય ।

યતોઽન્તરસ્યૈષ નિયામકો હરિસ્તતો હરોઽગ્રેઽસ્ય શિલોપમોઽભવત્ ॥ ૪.૪૬॥

ક્ષ્લિવ્। શશાક નૈવાથ યદાઽભિવીક્ષિતું પ્રસ્પન્દિતું વા કુત એવ યોદ્ધુમ્ ।
શિવસ્તદા દેવગણઃ સમસ્તાઃ શશં સુરુચ્ચૈર્જગતો હરેર્બલમ્ ॥ ૪.૪૭॥

યદીરણેનૈવ વિનૈષ શઙ્કરઃ શશાક ન પ્રશ્વસિતું ચ કેવલમ્ ।
કિમત્ર વક્તવ્યમતો હરેર્બલં હરાત્પરં સર્વત એવ ચેતિ ॥ ૪.૪૮॥

તતઃ પ્રણમ્યાઽશુ જનાર્દનં હરઃ પ્રસન્નદૃષ્ટ્યા હરિણાઽભિવીક્ષિતઃ ।
જગામ કૈલાસમમુષ્ય તદ્ધનુસ્ત્વયા પ્રભગ્નં કિલ લોકસન્નિધૌ ॥ ૪.૪૯॥

ધનુર્યદન્યદ્ધરિહસ્તયોગ્યં તત્કાર્મુકાત્કોટિગુણં પુનશ્ચ ।
વરં હિ હસ્તે તદિદં ગૃહીતં મયા ગૃહાણૈતદતો હિ વૈષ્ણવમ્ ॥ ૪.૫૦॥

યદીદમાગૃહ્ય વિકર્ષસિ ત્વં તદા હરિર્નાત્ર વિચાર્યમસ્તિ ।
ઇતિ બ્રુવાણઃ પ્રદદૌ ધનુર્વરં પ્રદર્શયત્વિષ્ણુબલં હરાદ્વરમ્ ॥ ૪.૫૧॥

પ્રગૃહ્ય તચ્ચાપવરં સ રાઘવશ્ચકાર સજ્યં નિમિષેણ લીલયા ।
ચકર્ષ સન્ધાય શરં ચ પશ્યતઃ સમસ્તલોકસ્ય ચ સં શયં નુદન્ ॥ ૪.૫૨॥

પ્રદર્શિતે વિષ્ણુબલે સમસ્તતો હરાચ્ચ નિઃ સઙ્ખ્યતયા મહાધિકે ।
જગાદ મેઘૌઘગભીરયા ગિરા સરાઘવં ભાર્ગવ આદિપૂરુષઃ ॥ ૪.૫૩॥

અલં બલં તે જગતોઽખિલાદ્વરં પરોઽસિ નારાયણ એવ નાન્યથા ।
વિસર્જયસ્વેહ શરં તપોમયે મહાસુરે લોકમયે વરાદ્વિભોઃ ॥ ૪.૫૪॥

પુરાઽતુલો નામ મહાસુરોઽભવદ્વરાત્સ તુ બ્રહ્મણ આપ લોકતામ્ ।
પુનશ્ચ તં પ્રાહ જગદ્ગુરુર્યદા હરિર્જિતઃ સ્યાદ્ધિ તદૈવ વધ્યસે ॥ ૪.૫૫॥

અતો વધાર્થં જગદન્તકસ્ય સર્વાજિતોઽહં જિતવદ્વ્યવસ્થિતઃ ।
ઇતીરિતે લોકમયે સ રાઘવો મુમોચ બાણં જગદન્તકેઽસુરે ॥ ૪.૫૬॥

પુરા વરોઽનેન શિવોપલમ્ભિતો મુમુક્ષયા વિષ્ણુતનુપ્રવેશનમ્ ।
સ તેન રામોદરગો બહિર્ગતસ્તદાજ્ઞયૈવાઽશુ બભૂવ ભસ્મસાત્ ॥ ૪.૫૭॥

ઇતીવ રામાય સ રાઘવઃ શરં વિકર્ષમાણો વિનિહત્ય ચાસુરમ્ ।
ક્ષ્લ્વ્। તપસ્તદીયં પ્રવદન્મુમોદ તદીયમેવ હ્યભવત્સમસ્તમ્ ॥ ૪.૫૮॥

નિરન્તરાનન્તવિબોધસારઃ સ જાનમાનોઽખિલમાદિપૂરુષઃ ।
વદઞ્છૃણોતીવ વિનોદતો હરિઃ સ એક એવ દ્વિતનુર્મુમોદ ॥ ૪.૫૯॥

સ ચેષ્ટિતં ચૈવ નિજાશ્રયસ્ય જનસ્ય સત્તત્ત્વવિબોધકારણમ્ ।
વિમોહકં ચાન્યતમસ્ય કુર્વન્ ચિક્રીડ એકોઽપિ નરાન્તરે યથા ॥ ૪.૬૦॥

તતઃ સ કારુણ્યનિધિર્નિજે જને નિતાન્તમૈક્યં સ્વગતં પ્રકાશયન્ ।
દ્વિધેવ ભૂત્વા ભૃગુવર્ય આત્મના રઘૂત્તમેનૈક્યમગાત્સમક્ષમ્ ॥ ૪.૬૧॥

સમેત્ય ચૈક્યં જગતોઽભિપશ્યતઃ પ્રણુદ્ય શઙ્કામખિલાં જનસ્ય ।
પ્રદાય રામાય ધનુર્વરં તદા જગામ રામાનુમતો રમાપતિઃ ॥ ૪.૬૨॥

તતો નૃપોઽત્યર્થમુદાઽભિપૂરિતઃ સુતૈઃ સમસ્તૈઃ સ્વપુરીમવાપ હ ।
રેમેઽથ રામોઽપિ રમાસ્વરૂપયા તયૈવ રાજાત્મજયા હિસીતયા ॥ ૪.૬૩॥

યથા પુરા શ્રીરમણઃ શ્રિયા તયા રતો નિતાન્તં હિ પયોબ્ધિમધ્યે ।
તથા ત્વયોધ્યાપુરિગો રઘૂત્તમોઽપ્યુવાસ કાલં સુચિરં રતસ્તયા ॥ ૪.૬૪॥

ઇમાનિ કર્માણિ રઘૂત્તમસ્ય હરેર્વિચિત્રાણ્યપિ નાદ્ભુતાનિ ।
દુરન્તશક્તેરથ ચાસ્ય વૈભવં સ્વકીયકર્તવ્યતયાઽનુવર્ણ્યતે ॥ ૪.૬૫॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
રામાવતારે અયોધ્યાપ્રવેશો નામ ચતુર્થોઽધ્યાયઃ ॥

## અથ પઞ્ચમોઽધ્યાયઃ ।

(રામચરિતે હનૂમદ્દર્શનં )
ૐ । ઇત્થં વિશ્વેશ્વરેઽસ્મિન્નખિલ જગદવસ્થાપ્ય સીતાસહાયે
ભૂમિષ્ઠે સર્વલોકાસ્તુતુષુરનુદિનં વૃદ્ધભક્ત્યાનિતાન્તમ્ ।
રાજા રાજ્યાભિષેકે પ્રકૃતિજનવચો માનયન્નાત્મનોઽર્થ્યં
દધ્રે તન્મન્થરાયાઃ શ્રુતિપથમગમદ્ભૂમિગાયા અલક્ષ્મ્યાઃ ॥ ૫.૧॥

પૂર્વં ક્ષીરાબ્ધિજાતા કથમપિ તપસૈવાપ્સરસ્ત્વં પ્રયાતા
તાં નેતું તત્તમોઽન્ધં કમલજનિરુવાચાઽશુ રામાભિષેકમ્ ।
ભૂત્વા દાસી વિલુમ્પ સ્વગતિમપિ તતઃ કર્મણા પ્રાપ્સ્યસે ત્વં
સેત્યુક્તા મન્થરાઽસીત્તદનુ કૃતવત્યેવ ચૈતત્કુકર્મ ॥ ૫.૨॥

તદ્વાક્યાત્કૈકયી સા પતિગવરબલાદાજહારૈવ રાજ્યં
રામસ્તદ્ગૌરવેણ ત્રિદશમુનિકૃતેઽરણ્યમેવાઽવિવેશ ।
સીતાયુક્તોઽનુજેન પ્રતિદિનસુવિવૃદ્ધોરુભક્ત્યા સમેતઃ

સં સ્થાપ્યાશેષજન્તૂન્ સ્વવિરહજશુચા ત્યક્તસર્વેષણાર્થાન્ ॥ ૫.૩॥

વૃક્ષાન્ પશ્વાદિકીટાન્ પિતરમથ સખીન્માતૃપૂર્વાન્ વિસૃજ્ય
પ્રોત્થાં ગઙ્ગાં સ્વપાદાદ્ધર ઇવ ગુહેનાર્ચિતઃ સોઽથ તીર્ત્વા ।
દેવાર્ચ્યસ્યાપિ પુત્રાદૃષિગણસહિતાત્પ્રાપ્ય પૂજાં પ્રયાતઃ
શૈલેશં ચિત્રકૂટં કતિપયદિનાન્યત્ર મોદન્નુવાસ ॥ ૫.૪॥

એતસ્મિન્નેવ કાલે દશરથનૃપતિઃ સ્વર્ગતોઽભૂદ્વિયોગાદ્
રામસ્યૈવાથ પુત્રૌ વિધિસુતસહિતૈર્મન્ત્રિભિઃ કેકયેભ્યઃ ।
આનીતૌ તસ્ય કૃત્વા શ્રુતિગણવિહિતપ્રેતકાર્યાણિ સદ્યઃ
શોચન્તૌ રામમાર્ગં પુરજનસહિતૌ જગ્મતુર્માતૃભિશ્ચ ॥ ૫.૫॥

ધિક્કુર્વન્તૌ નિતાન્તં સકલદુરિતગાં મન્થરાં કૈકયીં ચ
પ્રાપ્તૌ રામસ્ય પાદૌ મુનિગણસહિતૌ તત્ર ચોવાચ નત્વા ।
રામં રાજીવનેત્રં ભરત ઇહ પુનઃ પ્રીતયેઽસ્માકમીશ
પ્રાપ્યાઽશુ સ્વામયોધ્યામવરજસહિતઃ પાલયેમાં ધરિત્રીમ્ ॥ ૫.૬॥

ઇત્યુક્તઃ કર્તુમીશઃ સકલસુરગણાપ્યાયનં રામદેવઃ
સત્યાં કર્તું ચ વાણીમવદદતિતરાં નેતિ સદ્ભક્તિનમ્રમ્ ।
ક્ષ્લ્વી। ભૂયોભૂયોઽર્થયન્તં દ્વિગુણિતશરદાં સપ્તકે ત્વભ્યતીતે
કર્તૈતત્તે વચોઽહં સુદૃઢમૃતમિદં મે વચો નાત્ર શઙ્કા ॥ ૫.૭॥

શ્રુત્વૈતદ્રામવાક્યં હુતભુજિ પતને સ પ્રતિજ્ઞાં ચ કૃત્વા
રામોક્તસ્યાન્યથાત્વે ન તુ પુરમભિવેક્ષ્યેઽહમિત્યેવ તાવત્ ।
કૃત્વાઽન્યાં સ પ્રતિજ્ઞામવસદથ બહિર્ગ્રામકે નન્દિનામ્નિ
શ્રીશસ્યૈવાસ્ય કૃત્વા શિરસિ પરમકં પૌરટં પાદપીઠમ્ ॥ ૫.૮॥

સમસ્તપૌરાનુગતેઽનુજે ગતે સ ચિત્રકૂટે ભગવાનુવાસ હ
અથાઽજગામેન્દ્રસુતોઽપિ વાયસો મહાસુરેણાઽત્મગતેન ચોદિતઃ ॥ ૫.૯॥

સ આસુરાવેશવશાદ્રમાસ્તને યદા વ્યધાત્તુણ્ડમથાભિવીક્ષિતઃ ।
જનાર્દનેનાઽશુ તૃણે પ્રયોજિતે ચચાર તેન જ્વલતાઽનુયાતઃ ॥ ૫.૧૦॥

સ્વયમ્ભુશર્વેન્દ્રમુખાન્સુરેશ્વરાન્ જિજીવિષુસ્તાઞ્છરણં ગતોઽપિ ।
બહિષ્કૃતસ્તૈર્હરિભક્તિભાવતો હ્યલઙ્ઘ્યશક્ત્યા પરમસ્ય ચાક્ષમૈઃ ॥ ૫.૧૧॥

પુનઃ પ્રયાતઃ શરણં રઘૂત્તમં વિસર્જિતસ્તેન નિહત્ય ચાસુરમ્ ।
તદક્ષિગં સાક્ષિકમપ્યવધ્યં પ્રસાદતશ્ચન્દ્રવિભૂષણસ્ય ॥ ૫.૧૨॥

સ વાયસાનામસુરોઽખિલાનાં વરાદુમેશસ્ય બભૂવ ચાક્ષિગઃ ।
નિપાતિતોઽસૌ સહ વાયસાક્ષિભિસ્તૃણેન રામસ્ય બભૂવ ભસ્મસાત્ ॥ ૫.૧૩ ॥

દદુર્હિ તસ્મૈ વિવરં બલાર્થિનો યદ્વાયસાસ્તેન તદક્ષિપાતનમ્ ।
કૃતં રમેશેન તદેકનેત્રા બભૂવુરન્યેઽપિ તુ વાયસાઃ સદા ॥ ૫.૧૪ ॥

ભવિષ્યતામપ્યથ યાવદેવ દ્વિનેત્રતા કાકકુલોદ્ભવાનામ્ ।
તાવત્તદક્ષ્યસ્ય કુરઙ્ગનામ્નઃ શિવેન દત્તં દિતિજસ્ય ચાક્ષયમ્ ॥ ૫.૧૫ ॥

અતઃ પુનર્ભાવમમુષ્ય હિન્વન્ ભવિષ્યતશ્ચૈકદૃશશ્ચકાર ।
સ વાયસાન્ રાઘવ આદિપૂરુષસ્તતો યયૌ શક્રસુતસ્તદાજ્ઞયા ॥ ૫.૧૬ ॥

રામોઽથ દણ્ડકવનં મુનિવર્યનીતો લોકાનનેકશ ઉદારબલૈર્નિરસ્તાન્ ।
શ્રુત્વા ખરપ્રભૃતિભિર્વરતો હરસ્ય સર્વૈરવધ્યતનુભિઃ પ્રયયૌ સભાર્યઃ ॥ ૫.૧૭ ॥

આસીચ્ચ તત્ર શરભઙ્ગ ઇતિ સ્મ જીર્ણો લોકં હરેર્જિગમિષુર્મુનિરુગ્રતેજાઃ ।
તેનાઽદરોપહૃતસાર્ધ્યસપર્યયા સપ્રીતો દદૌ નિજપદં પરમં રમેશઃ ॥ ૫.૧૮ ॥

ધર્મો યતોઽસ્ય વનગસ્ય નિતાન્તશક્તિહ્રાસે સ્વધર્મકરણસ્ય હુતાશનાદૌ ।
દેહાત્યયઃ સ તત એવ તનું નિજાગ્નૌ સન્ત્યજ્ય રામપુરતઃ પ્રયયૌ પરેશમ્ ॥ ૫.૧૯ ॥

રામોઽપિ તત્ર દદૃશે ધનદસ્ય શાપાદ્ગન્ધર્વમુર્વશિરતેરથ યાતુધાનીમ્ ।
પ્રાપ્તં દશાં સપદિ તુમ્બુરુનામધેયં નામ્ના વિરાધમપિ શર્વવરાદવધ્યમ્ ॥ ૫.૨૦ ॥

ભઙ્ક્ત્વાઽસ્ય બાહુયુગલ્। અં બિલગં ચકાર સમ્માનયન્ વચનમમ્બુજજન્મનોઽસૌ ।
પ્રાદાચ્ચ તસ્ય સુગતિં નિજગાયકસ્ય ભક્ષાર્થમં સકમિતોઽપિ સહાનુજેન ॥ ૫.૨૧ ॥

પ્રીતિં વિધિત્સુરગમદ્ભવનં નિજસ્ય કુમ્ભોદ્ભવસ્ય પરમાદરતોઽમુના ચ ।
સમ્પૂજિતો ધનુરનેન ગૃહીતમિન્દ્રાચ્છાર્ઙ્ગ તદાદિપુરુષો નિજમાજહાર ॥ ૫.૨૨ ॥

આત્માર્થમેવ હિ પુરા હરિણા પ્રદત્તમિન્દ્રે તદિન્દ્ર ઉત રામકરાર્થમેવ ।
પ્રાદાદગસ્ત્યમુનયે તદવાપ્ય રામો રક્ષન્નૃષીનવસદેવ સ દણ્ડકેષુ ॥ ૫.૨૩ ॥

કાલે તદૈવ ખરદૂષણયોર્બલેન રક્ષઃ સ્વસા પતિનિમાર્ગણતત્પરાઽસીત્ ।
વ્યાપાદિતે નિજપતૌ હિ દશાનનેન પ્રામાદિકેન વિધિનાઽભિસસાર રામમ્ ॥ ૫.૨૪ ॥

સાઽનુજ્ઞયૈવ રજનીચરભર્તુરુગ્રા ભ્રાતૃદ્વયેન સહિતા વનમાવસન્તી ।
રામં સમેત્ય ભવ મે પતિરિત્યવોચદ્ભાનું યથા તમ ઉપેત્ય સુયોગકામમ્ ॥ ૫.૨૫ ॥

તાં તત્ર હાસ્યકથયા જનકાસુતાગ્રે ગચ્છાનુજં મ ઇહ મેતિ વચઃ સ ઉક્ત્વા ।
તેનૈવ દુષ્ટચરિતાં હિ વિકર્ણનાસાં ચક્રે સમસ્તરજનીચરનાશહેતોઃ ॥ ૫.૨૬ ॥

તત્પ્રેરિતાન્ સપદિ ભીમબલાન્ પ્રયાતાં સ્તસ્યાઃ ખરત્રિશિરદૂષણમુખ્યબન્ધૂન્ ।
જઘ્ને ચતુર્દશસહસ્રમવારણીયકોદણ્ડપાણિરખિલસ્ય સુખં વિધાતુમ્ ॥ ૫.૨૭ ॥

દત્તેઽભયે રઘુવરેણ મહામુનીનાં દત્તે ભયે ચ રજનીચરમણ્ડલસ્ય ।
રક્ષઃ પતિઃ સ્વસૃમુખાદવિકમ્પનાચ્ચ શ્રુત્વા બલં રઘુપતેઃ પરમાપ ચિન્તામ્ ॥ ૫.૨૮ ॥

સ ત્વાશુ કાર્યમવમૃશ્ય જગામ તીરે ક્ષેત્રં નદીનદપતેઃ શ્રવણં ધરિત્ર્યાઃ ।
મારીચમત્ર તપસિ પ્રતિવર્તમાનં ભીતં શરાદ્રઘુપતેર્નિતરાં દદર્શ ॥ ૫.૨૯ ॥

તેનાર્થિતઃ સપદિ રાઘવવઞ્ચનાર્થે મારીચ આહ શરવેગમમુષ્ય જાનન્ ।
શક્યો ન તે રઘુવરેણ હિ વિગ્રહોઽત્ર જાનામિ સં સ્પર્શમસ્ય શરસ્ય પૂર્વમ્ ॥ ૫.૩૦ ॥

ઇત્યુક્તવન્તમથ રાવણ આહ ખડ્ગં નિષ્કૃષ્ય હન્મિ યદિ મે ન કરોષિ વાક્યમ્ ।
તચ્છુશ્રુવાન્ ભયયુતોઽથ નિસર્ગતશ્ચ પાપો જગામ રઘુવર્યસકાશમાશુ ॥ ૫.૩૧ ॥

સ પ્રાપ્ય હૈમમૃગતાં બહુરત્નચિત્રઃ સીતાસમીપ ઉરુધા વિચચાર શીઘ્રમ્ ।
નિર્દોષનિત્યવરસં વિદપિ સ્મ દેવી રક્ષોવધાય જનમોહકૃતે તથાઽહ ॥ ૫.૩૨ ॥

દેવેમમાશુ પરિગૃહ્ય ચ દેહિ મે ત્વં ક્રીડામૃગં ત્વિતિ તયોદિત એવ રામઃ ।
અન્વક્સસાર હ શરાસનબાણપાણિર્માયામૃગં નિશિચરં નિજઘાન જાનન્ ॥ ૫.૩૩ ॥

તેનાઽહતઃ શરવરેણ ભૃશં મમાર વિક્રુશ્ય લક્ષ્મણમુરુવ્યથયા સપાપઃ ।
શ્રુત્વૈવ લક્ષ્મણમચૂચુદદુગ્રવાક્યૈઃ સોઽપ્યાપ રામપથમેવ સચાપબાણઃ ॥ ૫.૩૪ ॥

યાં યાં પરેશ ઉરુધૈવ કરોતિ લીલાં તાં તાં કરોત્યનુ તથૈવ રમાપિ દેવી ।
નૈતાવતાઽસ્ય પરમસ્ય તથા રમાયા દોષોઽણુરપ્યનુવિચિન્ત્ય ઉરુપ્રભૂ યત્ ॥ ૫.૩૫ ॥

ક્વાજ્ઞાનમાપદપિ મન્દકટાક્ષમાત્રસર્ગસ્થિતિપ્રલ્। અયસં સૃતિમોક્ષહેતોઃ ।
દેવ્યા હરેઃ કિમુ વિડમ્બનમાત્રમેતદ્વિક્રીડતોઃ સુરનરાદિવદેવ તસ્માત્ ॥ ૫.૩૬ ॥

દેવ્યાઃ સમીપમથ રાવણ આસસાદ સાઽદૃશ્યતામગમદપ્યવિષહ્યશક્તિઃ ।
સૃષ્ટ્વાઽત્મનઃ પ્રતિકૃતિં પ્રયયૌ ચ શીઘ્રં કૈલાસમર્ચિતપદા ન્યવસચ્છિવાભ્યામ્ ॥ ૫.૩૭ ॥

તસ્યાસ્તુ તાં પ્રતિકૃતિં પ્રવિવેશ શક્રો દેવ્યાશ્ચ સન્નિધિયુતાં વ્યવહારસિદ્ધ્યૈ ।
આદાય તામથ યયૌ રજનીચરેન્દ્રો હત્વા જટાયુષમુરુશ્રમતો નિરુદ્ધઃ ॥ ૫.૩૮ ॥

માર્ગે વ્રજન્તમભિયાય તતો હનૂમાન્ સં વારિતો રવિસુતેન ચ જાનમાનઃ ।
દૈવં તુ કાર્યમથ કીર્તિમભીપ્સમાનો રામસ્ય નૈનમહનદ્વચનાદ્ધરેશ્ચ ॥ ૫.૩૯ ॥

પ્રાપ્યૈવ રાક્ષસ ઉતાઽત્મપુરીં સ તત્ર સીતાકૃતિં પ્રતિનિધાય રરક્ષ ચાથ ।

રામોઽપિ તત્તુ વિનિહત્ય સુદુષ્ટરક્ષઃ પ્રાપ્યાઽશ્રમં સ્વદયિતાં નહિ પશ્યતીવ ॥ ૫.૪૦॥

અન્વેષમાણ ઇવ તં ચ દદર્શ ગૃધ્રં સીતારિરક્ષિષુમથો રિપુણા વિશસ્તમ્ ।
લ્ંઅન્દાત્મચેષ્ટમમુનોક્તમરેશ્ચ કર્મ શ્રુત્વા મૃતં તમદહત્સ્વગતિં તથાઽદાત્ ॥ ૫.૪૧॥

અન્યત્ર ચૈવ વિચરન્ સહિતોઽનુજેન પ્રાપ્તઃ કરૌ સ સહસાઽથ કબન્ધનામ્નઃ ।
ધાતુર્વરાદખિલજાયિન ઉજ્ઝિતસ્ય મૃત્યોશ્ચ વજ્રપતનાદતિકુઞ્ચિતસ્ય ॥ ૫.૪૨॥

છિત્વાઽસ્ય બાહુયુગલ્ં અં સહિતોઽનુજેન તં પૂર્વવત્પ્રતિવિધાય સુરેન્દ્રભૃત્યમ્ ।
નામ્ના દનું ત્રિજટયૈવ પુરાઽભિજાતં ગન્ધર્વમાશુ ચ તતોઽપિ તદર્ચિતોઽગાત્ ॥ ૫.૪૩॥

દૃષ્ટ્વા તમેવ શબરી પરમં હરિં ચ જ્ઞાત્વા વિવેશ દહનં પુરતોઽસ્ય તસ્યૈ ।
પ્રાદાત્સ્વલોકમિમમેવ હિ સા પ્રતીક્ષ્ય પૂર્વં મતઙ્ગવચનેન વનેઽત્ર સાઽભૂત્ ॥ ૫.૪૪॥

શાપાદ્વરાપ્સરસમેવ હિ તાં વિમુચ્ય શચ્યા કૃતાત્પતિપુરસ્ત્વતિદર્પહેતોઃ ।
ગત્વા દદર્શ પવનાત્મજમૃશ્યમૂકે સ હ્યેક એનમવગચ્છતિ સમ્યગીશમ્ ॥ ૫.૪૫॥

દેહેઽપિ યત્ર પવનોઽત્ર હરિર્યતોઽસૌ તત્રૈવ વાયુરિતિ વેદવચઃ પ્રસિદ્ધમ્ ।
કસ્મિન્વહં ત્વિતિ તથૈવ હિ સોઽવતારે તસ્માત્સ મારુતિકૃતે રવિજં રરક્ષ ॥ ૫.૪૬॥

એવં સ કૃષ્ણતનુરર્જુનમપ્યરક્ષદ્ભીમાર્થમેવ તદરિં રવિજં નિહત્ય ।
પૂર્વં હિ મારુતિમવાપ રવેઃ સુતોઽયં તેનાસ્ય વાલિનમહન્ રઘુપઃ પ્રતીપમ્ ॥ ૫.૪૭॥

એવં સુરાશ્ચ પવનસ્ય વશે યતોઽતઃ સુગ્રીવમત્ર તુ પરત્ર ચ શક્રસૂનુમ્ ।
સર્વે શ્રિતા હનુમતસ્તદનુગ્રહાય તત્રાગમદ્રઘુપતિઃ સહ લક્ષ્મણેન ॥ ૫.૪૮॥

યત્પાદપઙ્કજરજઃ શિરસા વિભર્તિ શ્રીરબ્જજશ્ચ ગિરિશઃ સહ લોકપાલૈઃ ।
સર્વેશ્વરસ્ય પરમસ્ય હિ સર્વશક્તેઃ કિં તસ્ય શત્રુહનને કપયઃ સહાયાઃ ॥ ૫.૪૯॥

સમાગતે તુ રાઘવે પ્લવઙ્ગમાઃ સસૂર્યજાઃ ।
વિપુપ્લુવુર્ભયાર્દિતા ન્યવારયચ્ચ મારુતિઃ ॥ ૫.૫૦॥

સં સ્થાપ્યાઽશુ હરીન્દ્રાન્ જાનન્ વિષ્ણોર્ગુણાનનન્તાન્ સઃ ।
સાક્ષાદ્બ્રહ્મપિતાઽસાવિત્યેનેનાસ્ય પાદયોઃ પેતે ॥ ૫.૫૧॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
રામચરિતે હનૂમદ્દર્શનં નામ પઞ્ચમોઽધ્યાયઃ ॥

## અથ ષષ્ઠોઽધ્યાયઃ ।

(સમુદ્રતરણનિશ્ચયઃ )

ૐ । ઉત્થાપ્ય ચૈનમરવિન્દદલાયતાક્ષશ્ચક્રાઙ્કિતેન વરદેન કરામ્બુજેન ।
કૃત્વા ચ સં વિદમનેન નુતોઽસ્ય ચાં સં પ્રીત્યાઽરુરોહ સ હસન્ સહ લક્ષ્મણેન ॥ ૬.૧॥

આરોપ્ય ચાં સયુગલ્। અં ભગવન્તમેનં તસ્યાનુજં ચ હનુમાન્ પ્રયયૌ કપીન્દ્રમ્ ।
સખ્યં ચકાર હુતભુક્પ્રમુખે ચ તસ્ય રામેણ શાશ્વતનિજાર્તિહરેણ શીઘ્રમ્ ॥ ૬.૨॥

શ્રુત્વાઽસ્ય દુઃખમથ દેવવરઃ પ્રતિજ્ઞાં ચક્રે સ વાલિનિધનાય હરીશ્વરોઽપિ ।
સીતાનુમાર્ગણકૃતેઽથ સ વાલિનૈવ ક્ષિપ્તાં હિ દુન્દુભિતનું સમદર્શયચ્ચ ॥ ૬.૩॥

વીક્ષ્યૈવ તાં નિપતિતામથ રામદેવઃ સોઽઙ્ગુષ્ઠમાત્રચલનાદતિલીલયૈવ ।
સમ્પ્રાસ્ય યોજનશતેઽથ તયૈવ ચોર્વીં સર્વાં વિદાર્ય દિતિજાનહનદ્રસાસ્થાન્ ॥ ૬.૪॥

શર્વપ્રસાદજબલાદ્દિતિજાનવધ્યાન્ સર્વાન્નિહત્ય કુણપેન પુનશ્ચ સખ્યા ।
ભીતેન વાલિબલતઃ કથિતઃ સ્મ સપ્ત સાલાન્ પ્રદર્શ્ય દિતિજાન્ સુદૃઢાંશ્ચ વજ્રાત્ ॥ ૬.૫॥

એકૈકમેષુ સ વિકમ્પયિતું સમર્થઃ પત્રાણિ લોપ્તુમપિ તૂત્સહતે ન શક્તઃ ।
વિષ્વક્સ્થિતાન્ યદિ ભવાન્ પ્રતિભેત્સ્યતીમાનેકેષુણા તર્હિ વાલિવધે સમર્થઃ ॥ ૬.૬॥

જેતું ચતુર્ગુણબલો હિ પુમાન્ પ્રભુઃ સ્યાદ્ધન્તું શતાધિકબલોઽતિબલં સુશક્તઃ ।
તસ્માદિમાન્ હરિહયાત્મજબાહ્વલોપ્યપત્રાન્ વિભિદ્ય મમ સં શયમાશુ ભિન્ધિ ॥ ૬.૭॥

શ્રુત્વાઽસ્ય વાક્યમવમૃશ્ય દિતેઃ સુતાં સ્તાન્ ધાતુર્વરાદખિલપુમ્ભિરભેદ્યરૂપાન્ ।
બ્રહ્મત્વમાપ્તુમચલં તપસિ પ્રવૃત્તાનેકેષુણા સપદિ તાન્ પ્રવિભેદ રામઃ ॥ ૬.૮॥

સન્ધાય કાર્મુકવરે નિશિતે તુ બાણેઽથાઽકૃષ્ય દક્ષિણભુજેન તદા પ્રમુક્તે ।
રામેણ સત્વરમનન્તબલેન સર્વે ચૂર્ણીકૃતાઃ સપદિ તે તરવો રવેણ ॥ ૬.૯॥

ભિત્ત્વા ચતાન્ સગિરિકું ભગવત્પ્રમુક્તઃ પાતાલ્। અસપ્તકમથાત્ર ચ યે ત્વવધ્યાઃ ।
નામ્નાઽસુરાઃ કુમુદિનોઽબ્જજવાક્યરક્ષાઃ સર્વાંશ્ચ તાનદહદાશુ શરઃ સ એકઃ ॥ ૬.૧૦॥

નૈતદ્વિચિત્રમમિતોરુબલસ્ય વિષ્ણોર્યત્પ્રેરણાત્સપવનસ્ય ભવેત્પ્રવૃત્તિઃ ।
લોકસ્ય સપ્રકૃતિકસ્ય સરુદ્રકાલ કર્માદિકસ્ય તદપીદમનન્યસાધ્યમ્ ॥ ૬.૧૧॥

લી। દૃષ્ટ્વા બલં ભગવતોઽથ હરીશ્વરોઽસાવગ્રે નિધાય તમયાત્પુરમગ્રજસ્ય ।
આશ્રુત્ય રાવમનુજસ્ય બિલાત્સ ચાઽગાદભ્યેનમાશુ દયિતાપ્રતિવારિતોઽપિ ॥ ૬.૧૨॥

તન્મુષ્ટિભિઃ પ્રતિહતઃ પ્રયયાવશક્તઃ સુગ્રીવ આશુ રઘુપોઽપિ હિ ધર્મમીક્ષન્ ।
નૈનં જઘાન વિદિતાખિલલોકચેષ્ટોઽપ્યેનં સ આહ યુધિ વાં ન મયા વિવિક્તૌ ॥ ૬.૧૩॥

સૌભ્રાત્રમેષ યદિ વાઞ્છતિ વાલિનૈવ નાહં નિરાગસમથાગ્રજનિં હનિષ્યે ।
દીર્ઘઃ સહોદરગતો ન ભવેદ્ધિ કોપો દીર્ઘોઽપિ કારણમૃતે વિનિવર્તતે ચ ॥ ૬.૧૪॥

કોપઃ સહોદરજને પુનરન્તકાલે પ્રાયો નિવૃત્તિમુપગચ્છતિ તાપકશ્ચ ।
એકસ્ય ભઙ્ગ ઇતિ નૈવ ઝટિત્યપાસ્તદોષો નિહન્તુમિહ યોગ્ય ઇતિ સ્મ મેને ॥ ૬.૧૫॥

તસ્માન્ન બન્ધુજનગે જનિતે વિરોધે કાર્યો વધસ્તદનુબન્ધિભિરાશ્રિતીહ ।
ધર્મં પ્રદર્શયિતુમેવ રવેઃ સુતસ્ય ભાવી ન તાપ ઇતિ વિચ્ય ન તં જઘાન ॥ ૬.૧૬॥

યઃ પ્રેરકઃ સકલષેમુષિસન્તતેશ્ચ તસ્યાજ્ઞતા કુત ઇહેશવરસ્ય વિષ્ણોઃ ।
તેનોદિતોઽથ સુદૃઢં પુનરાગતેન વજ્રોપમં શરમમૂમુચદિન્દ્રસૂનોઃ ॥ ૬.૧૭॥

રામાજ્ઞયૈવ લતયા રવિજે વિભક્તે વાયોઃ સુતેન રઘુપેણ શરે ચ મુક્તે ।
શ્રુત્વાઽસ્ય શબ્દમતુલં હૃદિ તેન વિદ્ધ ઇન્દ્રાત્મજો ગિરિરિવાપતદાશુ સન્નઃ ॥ ૬.૧૮॥

ભક્તો મમૈષ યદિ મામભિપશ્યતીહ પાદૌ ધ્રુવં મમ સમેષ્યતિ નિર્વિચારઃ ।
યોગ્યો વધો નહિ જનસ્ય પદાનતસ્ય રાજ્યાર્થિના રવિસુતેન વધોઽર્થિતશ્ચ ॥ ૬.૧૯॥

કાર્યં હ્યભીષ્ટમપિ તત્પ્રણતસ્ય પૂર્વં શસ્તો વધો ન પદયોઃ પ્રણતસ્ય ચૈવ ।
તસ્માદદૃશ્યતનુરેવ નિહન્મિ શક્રપુત્રં ત્વિતીહ તમદૃષ્ટતયા જઘાન ॥ ૬.૨૦॥

યઃ પ્રેરકઃ સકલલોકબલસ્ય નિત્યં પૂર્ણાવ્યયોચ્ચબલવીર્યતનુઃ સ્વતન્ત્રઃ ।
કિં તસ્ય દૃષ્ટિપથગસ્ય ચ વાનરોઽયં કર્તેશચાપમપિ યેન પુરા વિભગ્નમ્ ॥ ૬.૨૧॥

સન્નેઽથ વાલિનિ જગામ ચ તસ્ય પાર્શ્વં પ્રાહૈનમાર્દ્રવચસા યદિ વાઞ્છસિ ત્વમ્ ।
ઉજ્જીવયિષ્ય ઇતિ નૈચ્છદસૌ ત્વદગ્રે કો નામ નેચ્છતિ મૃતિં પુરુષોત્તમેતિ ॥ ૬.૨૨॥

કાર્યાણિ તસ્ય ચરમાણિ વિધાય પુત્રં ત્વગ્રે નિધાય રવિજઃ કપિરાજ્ય આસીત્ ।
લીઇ।રામોઽપિ તદ્ગિરિવરે ચતુરોઽથ માસાન્ દૃષ્ટ્વા ઘનાગમમુવાસ સલક્ષ્મણોઽસૌ ॥ ૬.૨૩॥

અથાતિસક્તે ક્ષિતિપે કપીનાં પ્રવિસ્મૃતે રામકૃતોપકારે ।
પ્રસહ્ય તં બુદ્ધિમતાં વરિષ્ઠો રામાઙ્ઘ્રિભક્તો હનુમાનુવાચ ॥ ૬.૨૪॥

ન વિસ્મૃતિસ્તે રઘુવર્યકાર્યે કાર્યા કથઞ્ચિત્સ હિ નોઽભિપૂજ્યઃ ।
ન ચેત્સ્વયં કર્તુમભીષ્ટમદ્ય તે ધ્રુવં બલેનાપિ હિ કારયામિ ॥ ૬.૨૫॥

સ એવમુક્ત્વા હરિરાજસન્નિધૌ દ્વીપેષુ સપ્તસ્વપિ વાનરાન્ પ્રતિ ।
સમ્મેલ્. અનાયાઽઽશુગતીન્ સ્મ વાનરાન્ પ્રસ્થાપયામાસ સમસ્તશઃ પ્રભુઃ ॥ ૬.૨૬॥

હરીશ્વરાજ્ઞાપ્રણિધાનપૂર્વકં હનૂમતા તે પ્રહિતા હિવાનરાઃ ।

સમસ્તશૈલદ્રુમષણ્ડસં સ્થિતાન્ હરીન્ સમાદાય તદાઽભિજગ્મુઃ ॥ ૬.૨૭॥

તદૈવ રામોઽપિ હિ ભોગસક્તં પ્રમત્તમાલક્ષ્ય કપીશ્વરં પ્રભુઃ ।
જગાદ સૌમિત્રિમિદં વચો મે પ્લવઙ્ગમેશાય વદાઽશુ યાહિ ॥ ૬.૨૮॥

યદિ પ્રમત્તોઽસિ મદીયકાર્યે નયામ્યહં ત્વેન્દ્રસુતસ્ય માર્ગમ્ ।
પ્રાયઃ સ્વકાર્યે પ્રતિપાદિતે હિ મદોદ્ધતા ન પ્રતિકર્તુમીશતે ॥ ૬.૨૯॥

ઇતીઽરામેણ સમીરિતે તદા યયૌ સબાણઃ સધનુઃ સ લક્ષ્મણઃ ।
દૃષ્ટ્વૈવ તં તેન સહૈવ તાપનિર્ભયાદ્યયૌ રામપદાન્તિકં ત્વરન્ ॥ ૬.૩૦॥

હનૂમતઃ સાધુવચોભિરાશુ પ્રસન્નચેતસ્ત્યધિપે કપીનામ્ ।
સમાગતે સર્વહરિપ્રવીરૈઃ સહૈવ તં વીક્ષ્ય નનન્દ રાઘવઃ ॥ ૬.૩૧॥

સસમ્ભ્રમં તં પતિતં પદાબ્જયોસ્ત્વરન્ સમુત્થાપ્ય સમાશ્લિષત્પ્રભુઃ ।
સ ચોપવિષ્ટો જગદીશસન્નિધૌ તદાજ્ઞયૈવાઽદિશદાશુ વાનરાન્ ॥ ૬.૩૨॥

સમસ્તદિક્ષુ પ્રહિતેષુ તેન પ્રભુર્હનૂમન્તમિદં બભાષે ।
ન કશ્ચિદીશસ્ત્વદૃતેઽસ્તિ સાધને સમસ્તકાર્યપ્રવરસ્ય મેઽસ્ય ॥ ૬.૩૩॥

અતસ્ત્વમેવ પ્રતિયાહિ દક્ષિણાં દિશં સમાદાય મદઙ્ગુલીયકમ્ ।
ઇતીરિતોઽસૌ પુરુષોત્તમેન યયૌ દિશં તાં યુવરાજયુક્તઃ ॥ ૬.૩૪॥

લિવ્।સમસ્તદિક્ષુ પ્રતિયાપિતા હિ તે હરીશ્વરાજ્ઞામુપધાર્ય માસતઃ ।
સમાયયુસ્તેઽઙ્ગદજામ્બવન્મુખાઃ સુતેન વાયોઃ સહિતા નચાઽયયુઃ ॥ ૬.૩૫॥

સમસ્તદુર્ગપ્રવરં દુરાસદં વિમાર્ગતાં વિન્ધ્યગિરિં મહાત્મનામ્ ।
ગતઃ સ કાલો હરિરાડુદીરિતઃ સમાસદંશ્ચાથ બિલં મહાદ્ભુતમ્ ॥ ૬.૩૬॥

કૃતં મયેનાતિવિચિત્રમુત્તમં સમીક્ષ્ય તત્તાર ઉવાચ ચાઙ્ગદમ્ ।
વયં ન યામો હરિરાજસન્નિધિં વિલઙ્ઘિતો નઃ સમયો યતોઽસ્ય ॥ ૬.૩૭॥

દુરાસદોઽસાવતિચણ્ડશાસનો હનિષ્યતિ ત્વામપિ કિં મદાદિકાન્ ।
અગમ્યમેતદ્બિલમાપ્ય તત્સુખં વસામ સર્વે કિમસાવિહાઽચરેત્ ॥ ૬.૩૮॥

ન ચૈવ રામેણ સલક્ષ્મણેન પ્રયોજનં નો વનચારિણાં સદા ।
ન ચેહ નઃ પીડયિતું સ ચ ક્ષમસ્તતો મમેયં સુવિનિશ્ચિતા મતિઃ ॥ ૬.૩૯॥

ઇતીરિતં માતુલવાક્યમાશુ સ આદદે વાલિસુતોઽપિ સાદરમ્ ।
ઉવાચ વાક્યં ચ ન નો હરીશ્વરઃ ક્ષમી ભવેલ્લઙ્ઘિતશાસનાનામ્ ॥ ૬.૪૦॥

રાજ્યાર્થિના યેન હિ ઘાતિતોઽગ્રજો હૃતાશ્ચ દારાઃ સુનૃશં સકેન ।
સ નઃ કથં રક્ષતિ શાસનાતિગાન્નિરાશ્રયાન્ દુર્બલકાન્ બલે સ્થિતઃ ॥ ૬.૪૧॥

ઇતીરિતે શક્રસુતાત્મજેન તથેતિ હોચુઃ સહ જામ્બવન્મુખાઃ ।
સર્વેઽપિ તેષામથ ચૈકમત્યં દૃષ્ટ્વા હનૂમાનિદમાબભાષે ॥ ૬.૪૨॥

વિજ્ઞાતમેતદ્ધિ મયાઽઙ્ગદસ્ય રાજ્યાય તારાભિહિતં હિ વાક્યમ્ ।
સાધ્યં ન ચૈતન્નહિ વાયુસૂનૂ રામપ્રતીપં વચનં સહેત ॥ ૬.૪૩॥

ન ચાહમાક્રષ્ટુમુપાયતોઽપિ શક્યઃ કથઞ્ચિત્સકલૈઃ સમેતૈઃ ।
સન્માર્ગતો નૈવ ચ રાઘવસ્ય દુરન્તશક્તેર્બિલમપ્રધૃષ્યમ્ ॥ ૬.૪૪॥

વચો મમૈતદ્યદિ ચાઽદરેણ ગ્રાહ્યં ભવેદ્વસ્તદતિપ્રિયં મે ।
ન ચેદ્બલાદપ્યનયે પ્રવૃત્તાન્ પ્રશાસ્ય સન્માર્ગગતાન્ કરોમિ ॥ ૬.૪૫॥

ઇતીરિતં તત્પવનાત્મજસ્ય શ્રુત્વાઽતિભીતા ધૃતમૂકભાવાઃ ।
સર્વેઽનુજગ્મુસ્તમથાદ્રિમુખ્યં મહેન્દ્રમાસેદુરગાધબોધાઃ ॥ ૬.૪૬॥

લ્વ્ંઇરીક્ષ્ય તે સાગરમપ્રધૃષ્યમપારમેયં સહસા વિષણ્ણાઃ ।
દૃઢં નિરાશાશ્ચ મતિં હિ દધ્રુઃ પ્રાયોપવેશાય તથા ચ ચક્રુઃ ॥ ૬.૪૭॥

પ્રાયોપવિષ્ટાશ્ચ કથા વદન્તો રામસ્ય સં સારવિમુક્તિદાતુઃ ।
જટાયુષઃ પાતનમૂચુરેતત્સમ્પાતિનામ્નઃ શ્રવણં જગામ ॥ ૬.૪૮॥

તસ્યાગ્રજોઽસાવરુણસ્ય સૂનુઃ સૂર્યસ્ય બિમ્બં સહ તેન યાતઃ ।
જવં પરીક્ષન્નથ તં સુતપ્તં ગુપ્ત્વા પતત્રક્ષયમાપ્ય ચાપતત્ ॥ ૬.૪૯॥

સ દગ્ધપક્ષઃ સવિતૃપ્રતાપાચ્છ્રુત્વૈવ રામસ્ય કથાં સપક્ષઃ ।
ભૂત્વા પુનશ્ચાપિ મૃતિં જટાયુષઃ શુશ્રાવ પૃષ્ટ્વા પુનરેવ સમ્યક્ ॥ ૬.૫૦॥

સ રાવણસ્યાથ ગતિં સુતોક્તાં નિવેદ્ય દૃષ્ટ્વા જનકાત્મજાકૃતિમ્ ।
સ્વયં તથાઽશોકવને નિષણ્ણામવોચદેભ્યો હરિપુઙ્ગવેભ્યઃ ॥ ૬.૫૧॥

તતસ્તુ તે બ્રહ્મસુતેન પૃષ્ટા ન્યવેદયન્નાત્મબલં પૃથક્પૃથક્ ।
દશૈવ ચાઽરભ્ય દશોત્તરસ્ય ક્રમાત્પથો યોજનતોઽતિયાને ॥ ૬.૫૨॥

સનીલમૈન્દદ્વિવિદાઃ સતારાઃ સર્વેઽપ્યશીત્યાઃ પરતો ન શક્તાઃ ।
ગન્તું યદાઽથાઽત્મબલં સ જામ્બવાન્ જગાદ તસ્માત્પુનરષ્ટમાં શમ્ ॥ ૬.૫૩॥

બલેર્યદા વિષ્ણુરવાપ લોકાં સ્ત્રિભિઃ ક્રમૈર્નન્દિરવં પ્રકુર્વતા ।
તદા મયા ભ્રાન્તમિદં જગત્રયં સવેદનં જાનુ મમાઽસ મેરુતઃ ॥ ૬.૫૪॥

અતો જવો મે નહિ પૂર્વસમ્મિતઃ પુરા ત્વહં ષણ્ણવતિપ્લવોઽસ્મિ ।
તતઃ કુમારોઽઙ્ગદ આહ ચાસ્માચ્છતં પ્લવેયં ન તતોઽભિજાને ॥ ૬.૫૫॥

અપૂરિતે તૈઃ સકલૈઃ શતસ્ય ગમાગમે શત્રુબલં ચ વીક્ષ્ય ।
સુદુર્ગમત્વં ચ નિશાચરેશપુર્યાઃ સ ધાતુઃ સુત આબભાષે ॥ ૬.૫૬॥

અયં હિ ગૃધ્રઃ શતયોજનં ગિરિં ત્રિકૂટમાહેત ઉતાત્ર વિઘ્નાઃ ।
ભવેયુરન્યેઽપિ તતો હનૂમાનેકઃ સમર્થો ન પરોઽસ્તિ કશ્ચિત્ ॥ ૬.૫૭॥

ઉક્ત્વા સ ઇત્થં પુનરાહ સૂનું પ્રાણસ્ય નિઃ સીમબલં પ્રશં સયન્ ।
લ્વિ।ત્વમેક એવાત્ર પરં સમર્થઃ કુરુષ્વ ચૈતત્પરિપાહિ વાનરાન્ ॥ ૬.૫૮॥

ઇતીરિતોઽસૌ હનુમાન્નિજેપ્સિતં તેષામશક્તિં પ્રકટાં વિધાય ।
અવર્ધતાઽશુ પ્રવિચિન્ત્ય રામં સુપૂર્ણશક્તિં ચરિતોસ્તદાજ્ઞામ્ ॥ ૬.૫૯॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
શ્રીરામચરિતે સમુદ્રતરણનિશ્ચયો નામ ષષ્ઠોઽધ્યાયઃ ॥

## અથ સપ્તમોઽધ્યાયઃ ।

(હનૂમત્પ્રતિયાનમ્)
ૐ । રામાય શાશ્વતસુવિસ્તૃતષડ્ગુણાય સર્વેશ્વરાય સુખસારમહાર્ણવાય ।
નત્વા લિલઙ્ઘયિષુરર્ણવમુત્પપાત નિષ્પીડ્ય તં ગિરિવરં પવનસ્ય સૂનુઃ ॥ ૭.૧॥

ચુક્ષોભ વારિધિરનુપ્રયયૌ ચ શીઘ્રં યાદોગણૈઃ સહ તદીયબલાભિકૃષ્ટઃ ।
વૃક્ષાશ્ચ પર્વતગતાઃ પવનેન પૂર્વં ક્ષિપ્તોઽર્ણવે ગિરિરુદાગમદસ્ય હેતોઃ ॥ ૭.૨॥

સ્યાલો હરસ્ય ગિરિપક્ષવિનાશકાલે ક્ષિપ્ત્વાઽર્ણવે સ મરુતોર્વરિતાત્મપક્ષઃ ।
હૈમો ગિરિઃ પવનજસ્ય તુ વિશ્રમાર્થમુદ્ભિદ્ય વારિધિમવર્દ્ધદનેકસાનુઃ ॥ ૭.૩॥

નૈવાત્ર વિશ્રમણમૈચ્છત નિઃ શ્રમોઽસૌ નિઃ સીમપૌરુષગુણસ્ય કુતઃ શ્રમોઽસ્ય ।
આશ્લિષ્ય પર્વતવરં સ દદર્શ ગચ્છન્ દેવૈસ્તુ નાગજનનીં પ્રહિતાં વરેણ ॥ ૭.૪॥

જિજ્ઞાસુભિર્નિજબલં તવ ભક્ષમેતુ યદ્યત્ત્વમિચ્છસિ તદિત્યમરોદિતાયાઃ ।
આસ્યં પ્રવિશ્ય સપદિ પ્રવિનિઃ સૃતોઽસ્માદ્દેવાનનન્દયદુત સ્વૃતમેષુ રક્ષન્ ॥ ૭.૫॥

દૃષ્ટ્વા સુરપ્રણયિતાં બલમસ્ય ચોગ્રં દેવાઃ પ્રતુષ્ટુવુરમું સુમનોભિવૃષ્ટ્યા ।
તૈરાદૃતઃ પુનરસૌ વિયતૈવ ગચ્છન્ છાયાગ્રહં પ્રતિદદર્શ ચ સિં હિકાખ્યમ્ ॥ ૭.૬॥

લઙ્ઘનાય સકલસ્ય ચ નિગ્રહેઽસ્યાઃ સામર્થ્યમપ્રતિહતં પ્રદદૌ વિધાતા ।
છાયામવાક્ષિપદસૌ પવનાત્મજસ્ય સોઽસ્યાઃ શરીરમનુવિશ્ય બિભેદ ચાઽશુ ॥ ૭.૭॥

નિસ્સીમમાત્મબલમિત્યનુદર્શયાનો હત્વૈવ તામપિ વિધાતૃવરાભિગુપ્તામ્ ।
લમ્બે સ લમ્બશિખરે નિપપાત લઙ્કાપ્રાકારરૂપકગિરાવથ સઞ્ચુકોચ ॥ ૭.૮॥

ભૂત્વા બિલાલ્। અસમિતો નિશિ તાં પુરીં ચ પ્રાપ્સ્યન્ દદર્શ નિજરૂપવતીં સ લઙ્કામ્ ।
રુદ્ધોઽનયાઽશ્વથ વિજિત્ય ચ તાં સ્વમુષ્ટિપિષ્ટાં તયાઽનુમત એવ વિવેશ લઙ્કામ્ ॥ ૭.૯॥

માર્ગમાણો બહિશ્ચાન્તઃ સોઽશોકવનિકાતલ્। એ ।
દદર્શ શિં શપાવૃક્ષમૂલસ્થિતરમાકૃતિમ્ ॥ ૭.૧૦॥

નરલોકવિડમ્બસ્ય જાનન્ રામસ્ય હૃદ્ગતમ્ ।
તસ્ય ચેષ્ટાનુસારેણ કૃત્વા ચેષ્ટાશ્ચ સં વિદઃ ।
લ્વીઇ। તાદૃક્ચેષ્ટાસમેતાયા અઙ્ગુલીયમદાત્તતઃ ॥ ૭.૧૧॥

સીતાયા યાનિ ચૈવાઽસન્નાકૃતેસ્તાનિ સર્વશઃ ।
ભૂષણાનિ દ્વિધા ભૂત્વા તાન્યેવાઽસં સ્તથૈવ ચ ॥ ૭.૧૨॥

અથ ચૂલ્। આમણિં દિવ્યં દાતું રામાય સા દદૌ ।
યદ્યપ્યેતન્ન પશ્યન્તિ નિશાચરગણાસ્તુ તે ।
દ્યુલોકચારિણઃ સર્વં પશ્યન્ત્યૃષય એવ ચ ॥ ૭.૧૩॥

તેષાં વિડમ્બનાયૈવ દૈત્યાનાં વઞ્ચનાય ચ ।
પશ્યતાં કલિમુખ્યાનાં વિડમ્બોઽયં કૃતો ભવેત્ ॥ ૭.૧૪॥

કૃત્વા કાર્યમિદં સર્વં વિશઙ્કઃ પવનાત્મજઃ ।
આત્માવિષ્કરણે ચિત્તં ચક્રે મતિમતાં વરઃ ॥ ૭.૧૫॥

અથ વનમખિલં તદ્રાવણસ્યાવલુપ્ય ક્ષિતિરુહમિમમેકં વર્જયિત્વાઽશુ વીરઃ ।
રજનિચરવિનાશં કાઙ્ક્ષમાણોઽતિવેલં મુહુરતિરવનાદી તોરણં ચાઽરુરોહ ॥ ૭.૧૬॥

અથાશ્ૃણોદ્દશાનનઃ કપીન્દ્રચેષ્ટિતં પરમ્ ।
દિદેશ કિઙ્કરાન્ બહૂન્ કપિર્નિગૃહ્યતામિતિ ॥ ૭.૧૭॥

સમસ્તશો વિમૃત્યવો વરાદ્ધરસ્ય કિઙ્કરાઃ ।
સમાસદન્મહાબલં સુરાન્તરાત્મનોઽઙ્ગજમ્ ॥ ૭.૧૮॥

અશીતિકોટિયૂથપં પુરસ્સરાષ્ટકાયુતમ્ ।
અનેકહેતિસઙ્કુલં કપીન્દ્રમાવૃણોદ્બલમ્ ॥ ૭.૧૯॥

સમાવૃતસ્તથાઽયુધૈઃ સ તાડિતશ્ચ તૈર્ભૃશમ્ ।
ચકાર તાન્ સમસ્તશસ્તલ્. અપ્રહારચૂર્ણિતાન્ ॥ ૭.૨૦॥

પુનશ્ચ મન્ત્રિપુત્રકાન્ સ રાવણપ્રચોદિતાન્ ।
મમર્દ સપ્ત પર્વતપ્રભાન્ વરાભિરક્ષિતાન્ ॥ ૭.૨૧॥

બલાગ્રગામિનસ્તથા સશર્વવાક્સુગર્વિતાન્ ।
નિહત્ય સર્વરક્ષસાં તૃતીયભાગમક્ષિણોત્ ॥ ૭.૨૨॥

લિક્ષ્ઽનૌપમં હરેર્બલં નિશમ્ય રાક્ષસાધિપઃ ।
કુમારમક્ષમાત્મનઃ સમં સુતં ન્યયોજયત્ ॥ ૭.૨૩॥

સ સર્વલોકસાક્ષિણઃ સુતં શરૈર્વવર્ષ હ ।
શિતૈર્વરાસ્ત્રમન્ત્રિતૈર્ન ચૈનમભ્યચાલયત્ ॥ ૭.૨૪॥

સ મણ્ડમધ્યકાસુતં સમીક્ષ્ય રાવણોપમમ્ ।
તૃતીય એષ ચાં શકો બલસ્ય હીત્યચિન્તયત્ ॥ ૭.૨૫॥

નિધાર્ય એવ રાવણઃ સ રાઘવસ્ય નાન્યથા ।
યદીન્દ્રજિન્મયા હતો ન ચાસ્ય શક્તિરીક્ષ્યતે ॥ ૭.૨૬॥

અતસ્તયોઃ સમો મયા તૃતીય એષ હન્યતે ।
વિચાર્ય ચૈવમાશુ તં પદોઃ પ્રગૃહ્ય પુપ્લુવે ॥ ૭.૨૭॥

સ ચક્રવદ્ભ્રમાતુરં વિધાય રાવણાત્મજમ્ ।
અપોથયદ્ધરાતલ્. એ ક્ષણેન મારુતી તનુઃ ॥ ૭.૨૮॥

વિચૂર્ણિતે ધરાતલ્। એ નિજે સુતે સ રાવણઃ ।
નિશમ્ય શોકતાપિતસ્તદગ્રજં સમાદિશત્ ॥ ૭.૨૯॥

અથેન્દ્રજિન્મહાશરૈર્વરાસ્ત્રસમ્પ્રયોજિતૈઃ ।
તતક્ષ વાનરોત્તમં ન ચાશકદ્વિચાલને ॥ ૭.૩૦॥

અથાસ્ત્રમુત્તમં વિધેર્યુયોજ સર્વદુષ્ષહમ્ ।
સ તેન તાડિતો હરિર્વ્યચિન્તયન્નિરાકુલઃ ॥ ૭.૩૧॥

મયા વરા વિલઙ્ઘિતા હ્યનેકશઃ સ્વયમ્ભુવઃ ।
સ માનનીય એવ મે તતોઽત્ર માનયામ્યહમ્ ॥ ૭.૩૨॥

ઇમે ચ કુર્યુરત્ર કિં પ્રહૃષ્ટરક્ષસાં ગણાઃ ।
ઇતીહ લક્ષ્યમેવ મે સ રાવણશ્ચ દૃશ્યતે ॥ ૭.૩૩॥

ઇદં સમીક્ષ્ય બદ્ધવત્સ્થિતં કપીન્દ્રમાશુ તે ।
લક્ષ્।બબન્ધુરન્યપાશકૈર્જગામ ચાસ્ત્રમસ્ય તત્ ॥ ૭.૩૪॥

અથ પ્રગૃહ્ય તં કપિં સમીપમાનયંશ્ચ તે ।
નિશાચરેશ્વરસ્ય તં સ પૃષ્ટવાંશ્ચ રાવણઃ ॥ ૭.૩૫॥

કપે કુતોઽસિ કસ્ય વા કિમર્થમીદૃશં કૃતમ્ ।
ઇતીરિતઃ સ ચાવદત્પ્રણમ્ય રામમીશ્વરમ્ ॥ ૭.૩૬॥

અવૈહિ દૂતમાગતં દુરન્તવિક્રમસ્ય મામ્ ।
રઘૂત્તમસ્ય મારુતિં કુલક્ષયે તવેશ્વરમ્ ॥ ૭.૩૭॥

ન ચેત્પ્રદાસ્યસિ ત્વરન્ રઘૂત્તમપ્રિયાં તદા ।
સપુત્રમિત્રબાન્ધવો વિનાશમાશુ યાસ્યસિ ॥ ૭.૩૮॥

ન રામબાણધારણે ક્ષમાઃ સુરેશ્વરા અપિ ।
વિરિઞ્ચિશર્વપૂર્વકાઃ કિમુ ત્વમલ્પસારકઃ ॥ ૭.૩૯॥

પ્રકોપિતસ્ય તસ્ય કઃ પુરસ્થિતૌ ક્ષમો ભવેત્ ।
સુરાસુરોરગાદિકે જગત્યચિન્ત્યકર્મણઃ ॥ ૭.૪૦॥

ઇતીરિતે વધોદ્યતં ન્યવારયદ્વિભીષણઃ ।
સ પુચ્છદાહકર્મણિ ન્યયોજયન્નિશાચરાન્ ॥ ૭.૪૧॥

અથાસ્ય વસ્ત્રસઞ્ચયૈઃ પિધાય પુચ્છમગ્રયે ।
દદુર્દદાહ નાસ્ય તન્મરુત્સખો હુતાશનઃ ॥ ૭.૪૨॥

મમર્ષ સર્વચેષ્ટિતં સ રક્ષસાં નિરામયઃ ।
બલોદ્ધતશ્ચ કૌતુકાત્પ્રદગ્ધુમેવ તાં પુરીમ્ ॥ ૭.૪૩॥

દદાહ ચાખિલં પુરં સ્વપુચ્છગેન વહ્નિના ।
કૃતિસ્તુ વિશ્વકર્મણોઽપ્યદહ્યતાસ્ય તેજસા ॥ ૭.૪૪॥

સુવર્ણરત્નકારિતાં સ રાક્ષસોત્તમૈઃ સહ ।
પ્રદહ્ય સર્વશઃ પુરીં મુદાઽન્વિતો જગર્જ ચ ॥ ૭.૪૫॥

લ્ક્ષિ।સ રાવણં સપુત્રકં તૃણોપમં વિધાય ચ ।
તયોઃ પ્રપશ્યતોઃ પુરં વિધાય ભસ્મસાદ્યયૌ ॥ ૭.૪૬॥

વિલઙ્ઘ્ય ચાર્ણવં પુનઃ સ્વજાતિભિઃ પ્રપૂજિતઃ ।

પ્રભક્ષ્ય વાનરેશિતુર્મધુ પ્રભું સમેયિવાન્ ॥ ૭.૪૭॥

રામં સુરેશ્વરમગણ્યગુણાભિરામં સમ્પ્રાપ્ય સર્વકપિવીરવરૈઃ સમેતઃ ।
ચૂલ્. આમણિં પવનજઃ પદયોર્નિધાય સર્વાઙ્ગકૈઃ પ્રણતિમસ્ય ચકાર ભક્ત્યા ॥ ૭.૪૮॥

રામોઽપિ નાન્યદનુદાતુમમુષ્ય યોગ્યમત્યન્તભક્તિપરમસ્ય વિલક્ષ્ય કિઞ્ચિત્ ।
સ્વાત્મપ્રદાનમધિકં પવનાત્મજસ્ય કુર્વન્ સમાશ્વિષદમું પરમાભિતુષ્ટઃ ॥ ૭.૪૯॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
શ્રીરામચરિતે હનૂમત્પ્રતિયાનં નામ સપ્તમોઽધ્યાયઃ ॥

## અથ અષ્ટમોઽધ્યાયઃ ।

(હનૂમતિ શ્રીરામદયાદાનમ્)
ૐ । શ્રુત્વા હનૂમદુદિતં કૃતમસ્ય સર્વં પ્રીતઃ પ્રયાણમભિરોચયતે સ રામઃ ।
આરુહ્ય વાયુસુતમઙ્ગદગેન યુક્તઃ સૌમિત્રિણા સરવિજઃ સહ સેનયાઽગાત્ ॥ ૮.૧॥

સમ્પ્રાપ્ય દક્ષિણમપાન્નિધિમત્ર દેવઃ શિશ્યે જગદ્ગુરુતમોઽપ્યવિચિન્ત્યશક્તિઃ ।
અગ્રે હિ માર્દવમનુપ્રથયન્ સ ધર્મં પન્થાનમર્થિતુમપામ્પતિતઃ પ્રતીતઃ ॥ ૮.૨॥

તત્રાઽજગામ સ વિભીષણનામધેયો રક્ષઃ પતેરવરજોઽપ્યથ રાવણેન ।
ભક્તોઽધિકં રઘુપતાવિતિ ધર્મનિષ્ઠસ્ત્યક્તો જગામ શરણં ચ રઘૂત્તમં તમ્ ॥ ૮.૩॥

બ્રહ્માત્મજેન રવિજેન બલપ્રણેત્રા નીલેન મૈન્દવિવિદાઙ્ગદતારપૂર્વૈઃ ।
સર્વૈશ્ચ શત્રુસદનાદુપયાત એષ ભ્રાતાઽસ્ય ન ગ્રહણયોગ્ય ઇતિ સ્થિરોક્તઃ ॥ ૮.૪॥

અત્રાઽહ રૂપમપરં બલદેવતાયા ગ્રાહ્યઃ સ એષ નિતરાં શરણં પ્રપન્નઃ ।
ભક્તશ્ચ રામપદયોર્વિનશિષ્ણુ રક્ષો વિજ્ઞાય રાજ્યમુપભોક્તુમિહાભિયાતઃ ॥ ૮.૫॥

ઇત્યુક્તવત્યથ હનૂમતિ દેવદેવઃ સઙ્ગૃહ્ય તદ્વચનમાહ યથૈવ પૂર્વમ્ ।
સુગ્રીવહેતુત ઇમં સ્થિરમાગ્રહીષ્યે પાદપ્રપન્નમિદમેવ સદા વ્રતં મે ॥ ૮.૬॥

સબ્રહ્મકાઃ સુરગણાઃ સહદૈત્યમર્ત્યાઃ સર્વે સમેત્ય ચ મદઙ્ગુલિચાલનેઽપિ ।
નેશા ભયં ન મમ રાત્રિચરાદમુષ્માચ્છુદ્ધસ્વભાવ ઇતિ ચૈનમહં વિજાને ॥ ૮.૭॥

ઇત્યુક્તવાક્ય ઉત તં સ્વજનં વિધાય રાજ્યેઽભ્યષેચયદપારસુસત્ત્વરાશિઃ ।
મત્વા તૃણોપમમશેષસદન્તકં તં રક્ષઃ પતિં ત્વવરજસ્ય દદૌ સ લઙ્કામ્ ॥ ૮.૮॥

કલ્પાન્તમસ્ય નિશિચારિ પતિત્વપૂર્વમાયુઃ પ્રદાય નિજલોકગતિં તદન્તે ।
રાત્રિત્રયેઽપ્યનુપગામિનમીક્ષ્ય સોઽબ્ધિં ચુક્રોધ રક્તનયનાન્તમયુઞ્જદબ્ધૌ ॥ ૮.૯॥

સ ક્રોધદીપ્તનયનાન્તહતઃ પરસ્ય શોષં ક્ષણાદુપગતો દનુજાદિસત્ત્વૈઃ ।
“સિન્ધુઃ શિરસ્યર્હણં પરિગૃહ્ય રૂપી પાદારવિન્દમુપગમ્ય બભાષ એતત્”(૬૪) ॥ ૮.૧૦॥

(૬૪) ભા. ઉ. ૯.૮.૯૫

લ્ક્ષીઇ। “તં ત્વાં વયં જડધિયો ન વિદામ ભૂમન્ કૂટસ્થમાદિપુરુષં જગતામધીશમ્ ।
ત્વં સત્ત્વતઃ સુરગણાન્ રજસો” મનુષ્યાં સ્તાર્તીયતોઽસુરગણાનભિતસ્તથાઽસ્રાઃ (૬૫) ॥ ૮.૧૧॥

“કામં પ્રયાહિ જહિ વિશ્રવસોઽવમેહં ત્રૈલોક્યરાવણમવાપ્નુહિ વીર પત્નીમ્ ।
બધ્નીહિ સેતુમિહ તે યશસો વિતત્યૈ ગાયન્તિ દિગ્વિજયિનો યમુપેત્ય ભૂપાઃ” (૬૬) ॥ ૮.૧૨॥

ઇત્યુક્તવન્તમમુમાશ્વનુગૃહ્ય બાણં તસ્મૈ ધૃતં દિતિસુતાત્મસુ ચાન્ત્યજેષુ ।
શાર્વાદ્વરાદ્વિગતમૃત્યુષુ દુર્જયેષુ નિઃ સઙ્ખ્યકેષ્વમુચદાશુ દદાહ સર્વાન્ ॥ ૮.૧૩॥

કૃત્વેરિણં તદથ મૂલફલાનિ ચાત્ર સમ્યગ્વિધાય ભવશત્રુરમોઘચેષ્ટઃ ।
બદ્ધું દિદેશ સુરવર્ધકિણોઽવતારં તજ્જં નલ્. અં હરિવરાનપરાંશ્ચ સેતુમ્ ॥ ૮.૧૪॥

બધ્વોદધૌ રઘુપતિર્વિવિધાદ્રિકૂટૈઃ સેતું કપીન્દ્રકરકમ્પિતભૂરુહાઙ્ગૈઃ ।
સુગ્રીવનીલહનુમત્પ્રમુખૈરનીકૈર્લઙ ન્કાં વિભીષણદૃશાઽવિશદાશુ દગ્ધામ્ ॥ ૮.૧૫॥

પ્રાપ્તં નિશામ્ય પરમં ભુવનૈકસારં નિઃ સીમપૌરુષમનન્તમસૌ દશાસ્યઃ ।
ત્રાસાદ્વિષણ્ણહૃદયો નિતરાં બભૂવ કર્તવ્યકર્મવિષયે ચ વિમૂઢચેતાઃ ॥ ૮.૧૬॥

પ્રસ્થાપ્ય વાલિસુતમેવ ચ રાજનીત્યૈ રામસ્તદુક્તવચનેઽપ્યમુનાઽગૃહીતે ।
દ્વારો રુરોધ સ ચતસ્ર ઉદીર્ણસૈન્યો રક્ષઃ પતેઃ પુર ઉદારગુણઃ પરેશઃ ॥ ૮.૧૭॥

દ્વારાં નિરોધસમયે સ દિદેશ પુત્રં વારામ્પતેર્દિશિ સુરેશ્વરશત્રુમુગ્રમ્ ।
પ્રાચ્યાં પ્રહસ્તમદિશદ્દિશિ વજ્રદં ષ્ટ્રં પ્રેતાધિપસ્ય શશિનઃ સ્વયમેવ ચાગાત્ ॥ ૮.૧૮॥

વિજ્ઞાય તત્સ ભગવાન્ હનુમન્તમેવ દેવેન્દ્રશત્રુવિજયાય દિદેશ ચાઽશુ ।
નીલં પ્રહસ્તનિધનાય ચ વજ્રદં ષ્ટ્રં હન્તું સુરેન્દ્રસુતસૂનુમથાઽદિદેશ ॥ ૮.૧૯॥

મધ્યે હરીશ્વરમધિજ્યધનુર્નિયુજ્ય યસ્યાં સ રાક્ષસપતિર્દિશમેવ તાં હિ ।
ઉદ્દિશ્ય સં સ્થિત ઉપાત્તશરઃ સખડ્ગો દેદીપ્યમાનવપુરુત્તમપૂરુષોઽસૌ ॥ ૮.૨૦॥

વિદ્રાવિતો હનુમતેન્દ્રજિદાશુ હસ્તં તસ્ય પ્રપન્ન ઇવ વીર્યમમુષ્ય જાનન્ ।
નીલો વિભીષણ ઉભૌ શિલયા ચશક્ત્યા સઞ્ચક્રતુર્યમવશં ગમિતં પ્રહસ્તમ્ ॥ ૮.૨૧॥

(૬૫) ભા. ઉ. ૯.૮.૯૬

(૬૬) ભા. ઉ. ૯.૮.૯૭

લ્ક્ષિવૃંઈલસ્ય નૈવ વશમેતિ સ ઇત્યમોઘશક્ત્યા વિભીષણ ઇમં પ્રજહાર સાકમ્ ।
તસ્મિન્ હતેઽઙ્ગદ ઉપેત્ય જઘાન વજ્રદં ષ્ટ્રં નિપાત્ય ભુવિ શીર્ષમમુષ્ય મૃદ્નન્ ॥ ૮.૨૨॥

સર્વેષુ તેષુ નિહતેષુ દિદેશ ધૂમ્રનેત્રં સ રાક્ષસપતિઃ સ ચ પશ્ચિમેન ।
દ્વારેણ મારુતસુતં સમુપેત્ય દગ્ધો ગુપ્તોઽપિ શૂલિવચનેન દુરન્તશક્તિમ્ ॥ ૮.૨૩॥

અકમ્પનોઽપિ રાક્ષસો નિશાચરેશચોદિતઃ ।
ઉમાપતેર્વરોદ્ધતઃ ક્ષણાદ્ધતો હનૂમતા ॥ ૮.૨૪॥

અથાસ્ત્રસમ્પ્રદીપિતૈઃ સમસ્તશો મહોલ્મુકૈઃ ।
રઘુપ્રવીરચોદિતાઃ પુરં નિશિ સ્વદાહયન્ ॥ ૮.૨૫॥

તતસ્તૌ નિકુમ્ભોઽથ કુમ્ભશ્ચ કોપાત્પ્રદિષ્ટૌ દશાસ્યેન કુમ્ભશ્રુતેર્હિ ।
સુતૌ સુપ્રહૃષ્ટૌ રણાયાભિયાતૌ કપીં સ્તાન્ બહિઃ સર્વશો યાતયિત્વા ॥ ૮.૨૬॥

સ કુમ્ભો વિધાતુઃ સુતં તારનીલૌ નલ્। અં ચાશ્વિપુત્રૌ જિગાયાઙ્ગદં ચ ।
સુયુદ્ધં ચ કૃત્વા દિનેશાત્મજેન પ્રણીતો યમસ્યાઽશુ લોકં સુપાપઃ ॥ ૮.૨૭॥

તતો નિકુમ્ભોઽદ્રિવરપ્રદારણં મહાન્તમુગ્રં પરિઘં પ્રગૃહ્ય ।
સસાર સૂર્યાત્મજમાશુ ભીતઃ સ પુપ્લુવે પશ્ચિમતો ધનુઃ શતમ્ ॥ ૮.૨૮॥

તં ભ્રામયત્યાશુ ભુજેન વીરે ભ્રાન્તા દિશો દ્યૌશ્ચ સચન્દ્રસૂર્યા ।
સુરાશ્ચ તસ્યોરુબલં વરં ચ શર્વોદ્ભવં વીક્ષ્ય વિષેદુરીષત્ ॥ ૮.૨૯॥

અનન્યસાધ્યં તમથો નિરીક્ષ્ય સમુત્પપાતાઽશુ પુરોઽસ્ય મારુતિઃ ।
પ્રકાશબાહ્વન્તર આહ ચૈનં કિમેભિરત્ર પ્રહરાઽયુધં તે ॥ ૮.૩૦॥

ઇતીરિતસ્તેન સ રાક્ષસોત્તમો વરાદમોઘં પ્રજહાર વક્ષસિ ।
વિચૂર્ણિતોઽસૌ તદુરસ્યભેદ્યે યથૈવ વજ્રો વિપતૌ વૃથાઽભવત્ ॥ ૮.૩૧॥

વિચૂર્ણિતે નિજાયુધે નિકુમ્ભ એત્ય મારુતિમ્ ।
પ્રગૃહ્ય ચાત્મનોઽ‌ં સકે નિધાય જગ્મિવાન્ દ્રુતમ્ ॥ ૮.૩૨॥

પ્રગૃહ્ય કણ્ઠમસ્ય સ પ્રધાનમારુતાત્મજઃ ।
સ્વમાશુ મોચયં સ્તતો ન્યપાતયદ્ધરાતલ્. એ ॥ ૮.૩૩॥

લ્ક્ષ્વ્ૅહકાર તં રણાત્મકે મખે રમેશદૈવતે ।
પશું પ્રભઞ્જનાત્મજો વિનેદુરત્ર દેવતાઃ ॥ ૮.૩૪॥

સુમદ્ઘ્નો યજ્ઞકોપશ્ચ શકુનિર્દેવતાપનઃ ।
વિદ્યુજ્જિહ્વઃ પ્રમાથી ચશુકસારણસં યુતાઃ ॥ ૮.૩૫॥

રાવણપ્રેરિતાઃ સર્વાન્મથન્તઃ કપિકુઞ્જરાન્ ।
અવધ્યા બ્રહ્મવરતો નિહતા રામસાયકૈઃ ॥ ૮.૩૬॥

યુદ્ધોન્મત્તશ્ચ મત્તશ્ચ દેવાન્તકનરાન્તકૌ ।
ત્રિશિરા અતિકાયશ્ચ નિર્યયૂ રાવણાજ્ઞયા ॥ ૮.૩૭॥

નરાન્તકો રાવણજો હયવર્યોપરિ સ્થિતઃ ।
અભીઃ સસાર સમરે પ્રાસોદ્યતકરો હરીન્ ॥ ૮.૩૮॥

તં દહન્તમનીકાનિ યુવરાજોઽઙ્ગદો બલી ।
ઉત્પપાત નિરીક્ષ્યાઽશુ સમદર્શયદપ્યુરઃ ॥ ૮.૩૯॥

તસ્યોરસિ પ્રાસવરં પ્રજહાર સ રાક્ષસઃ ।
દ્વિધા સમભવત્તત્તુ વાલિપુત્રસ્ય તેજસા ॥ ૮.૪૦॥

અથાસ્ય હયમાશ્વેવ નિજઘાન મુખે કપિઃ ।
પેતતુશ્ચાક્ષિણી તસ્ય સ પપાત મમાર ચ ॥ ૮.૪૧॥

સ ખઙ્ગવરમાદાય પ્રસસાર રણે કપિમ્ ।
આચ્છિદ્ય ખઙ્ગમસ્યૈવ નિહતો વાલિસૂનુના ॥ ૮.૪૨॥

ગન્ધર્વકન્યકાસૂતે નિહતે રાવણાત્મજે ।
આજગામાગ્રજસ્તસ્ય સોદર્યો દેવતાન્તકઃ ॥ ૮.૪૩॥

તસ્યાઽપતત એવાઽશુ શરવર્ષપ્રતાપિતાઃ ।
પ્રદુદ્રુવુર્ભયાત્સર્વે કપયો જામ્બવન્મુખાઃ ॥ ૮.૪૪॥

સ શરં તરસાઽદાય રવિપુત્રાયુધોપમમ્ ।
ક્ષિપ્ત્વઽઙ્ગદં પ્રજહારોરસ્યપતત્સ મુમોહ ચ ॥ ૮.૪૫॥

અથ તિગ્માંશુતનયઃ શૈલં પ્રચલપાદપમ્ ।
અભિદુદ્રાવ સઙ્ગૃહ્ય ચિક્ષેપ ચ નિશાચરે ॥ ૮.૪૬॥

તમાપતન્તમાલક્ષ્ય દૂરાચ્છરવિદારિતમ્ ।
સુરાન્તકશ્ચકારાઽશુ દધાર ચ પરં શરમ્ ॥ ૮.૪૭॥

સ તમાકર્ણમાકૃષ્ય યમદણ્ડોપમં શરમ્ ।
અવિદ્ધ્યદ્ધૃદયે રાજ્ઞઃ કપીનાં સ પપાત હ ॥ ૮.૪૮॥

બલમપ્રતિમં વીક્ષ્ય સુરશત્રોસ્તુ મારુતિઃ ।

આહ્વયામાસ યુદ્ધાય કેશવઃ કૈટભં યથા ॥ ૮.૪૯॥

તમાપતન્તમાલોક્ય રથં સહયસારથિમ્ ।
ચૂર્ણયિત્વા ધનુશ્ચાસ્ય સમાચ્છિદ્ય બભઞ્જ હ ॥ ૮.૫૦॥

અથ ખડ્ગં સમાદાય પુર આપતતો રિપોઃ ।
હરિઃ પ્રગૃહ્ય કેશેષુ પાતયિત્વૈનમાહવે ।
શિરો મમર્દ તરસા પવમાનાત્મજઃ પદા ॥ ૮.૫૧॥

વરદાનાદવધ્યં તં નિહત્ય પવનાત્મજઃ ।
સમીડિતઃ સુરવરૈઃ પ્લવગૈર્વીક્ષિતો મુદા ॥ ૮.૫૨॥

વિદ્રાવિતાખિલકપિં વરાત્ત્રિશિરસં વિભોઃ ।
ભઙ્ક્ત્વા રથં ધનુઃ ખડ્ગમાચ્છિદ્યાશિરસં વ્યધાત્ ॥ ૮.૫૩॥

યુદ્ધોન્મત્તશ્ચ મત્તશ્ચ પાર્વતીવરદર્પિતૌ ।
પ્રમથન્તૌ કપીન્ સર્વાન્ હતૌ મારુતિમુષ્ટિના ॥ ૮.૫૪॥

તતોઽતિકાયોઽતિરથો રથેન સ્વયમ્ભુદત્તેન હરીન્ પ્રમૃદ્નન્ ।
ચચાર કાલાનલસન્નિકાશો ગન્ધર્વિકાયાં જનિતો દશાસ્યાત્ ॥ ૮.૫૫॥

બૃહત્તનુઃ કુમ્ભવદેવ કર્ણાવસ્યેત્યતો નામ ચ કુમ્ભકર્ણઃ ।
ઇત્યસ્ય સોઽર્કાત્મજપૂર્વકાન્ કપીન્ જિગાય રામં સહસાઽભ્યધાવત્ ॥ ૮.૫૬॥

લ્ક્ષ્વી। તમાપતન્તં શરવર્ષધારં મહાઘનાભં સ્તનયિત્નુઘોષમ્ ।
નિવારયામાસ યથા સમીરઃ સૌમિત્રિરાત્તેષ્વસનઃ શરૌઘૈઃ ॥ ૮.૫૭॥

વવર્ષતુસ્તાવતિમાત્રવીર્યૌ શરાન્ સુરેશાશનિતુલ્યવેગાન્ ।
તમોમયં ચક્રતુરન્તરિક્ષં સ્વશિક્ષયા ક્ષિપ્રતમાસ્તબાણૈઃ ॥ ૮.૫૮॥

શરૈઃ શરાનસ્ય નિવાર્ય વીરઃ સૌમિત્રિરસ્ત્રાણિ મહાસ્ત્રજાલૈઃ ।
ચિચ્છેદ બાહૂ શિરસા સહૈવ ચતુર્ભુજોઽભૂત્સ પુનર્દ્વિશીર્ષઃ ॥ ૮.૫૯॥

છિન્નેષુ તેષુ દ્વિગુણાસ્યબાહુઃ પુનઃ પુનઃ સોઽથ બભૂવ વીરઃ ।
ઉવાચ સૌમિત્રિમથાન્તરાત્મા સમસ્તલોકસ્ય મરુદ્વિષણણમ્ ॥ ૮.૬૦॥

બ્રહ્માસ્ત્રતોઽન્યેન ન વધ્ય એષ વરાદ્વિધાતુઃ સુમુખેત્યદૃશ્યઃ ।
રક્ષઃ સુતસ્યાશ્રવણીયમિત્થમુક્ત્વા સમીરોઽરુહદન્તરિક્ષમ્ ॥ ૮.૬૧॥

અથાનુજો દેવતમસ્ય સોઽસ્ત્રં બ્રાહ્મં તનૂજે દશકન્ધરસ્ય ।
મુમોચ દગ્ધઃ સરથાશ્વસૂતસ્તેનાતિકાયઃ પ્રવરોઽસ્ત્રવિત્સુ ॥ ૮.૬૨॥

હતેષુ પુત્રેષુ સરાક્ષસેશઃ સ્વયં પ્રયાણં સમરાર્થમૈચ્છત્ ।
સજ્જીભવત્યેવ નિશાચરેશે ખરાત્મજઃ પ્રાહ ધનુર્ધરોત્તમઃ ॥ ૮.૬૩॥

નિયુઙ્ક્ષ્વ માં મે પિતુરન્તકસ્ય વધાય રાજન્ સહલક્ષ્મણં તમ્ ।
કપિપ્રવીરાંશ્ચ નિહત્ય સર્વાન્ પ્રતોષયે ત્વામહમદ્ય સુષ્ઠુ ॥ ૮.૬૪॥

ઇતીરિતેઽનેન નિયોજિતઃ સ જગામ વીરો મકરાક્ષનામા ।
વિધૂય સર્વાંશ્ચ હરિપ્રવીરાન્ સહાઙ્ગદાન્ સૂર્યસુતેન સાકમ્ ॥ ૮.૬૫॥

અચિન્તયન્ લક્ષ્મણબાણસઙ્ઘાનવજ્ઞયા રામમથાઽહ્વયદ્રણે ।
ઉવાચ રામં રજનીચરોઽસૌ હતો જનસ્થાનગતઃ પિતા ત્વયા ॥ ૮.૬૬॥

કેનાપ્યુપાયેન ધનુર્ધરાણાં વરઃ ફલં તસ્ય દદામિ તેઽદ્ય ।
ઇતિ બ્રુવાણઃ સ સરોજયોનેર્વરાદવધ્યોઽમુચદસ્ત્રસઙ્ઘાન્ ॥ ૮.૬૭॥

પ્રહસ્ય રામોઽસ્ય નિવાર્ય ચાસ્ત્રૈરસ્ત્રાણ્યમેયોઽશનિસન્નિભેન ।
લ્ક્ષ્વીઇ। શિરઃ શરેણોત્તમકુણ્ડલોજ્જ્વલં ખરાત્મજસ્યાથ સમુન્મમાથ ॥ ૮.૬૮॥

વિદુદ્રુવુસ્તસ્ય તુ યેઽનુયાયિનઃ કપિપ્રવીરૈર્નિહતાવશેષિતાઃ ।
યથૈવ ધૂમ્રાક્ષમુખેષુ પૂર્વં હતેષુ પૃથ્વીરુહશૈલધારિભિઃ ॥ ૮.૬૯॥

તતઃ સ સજ્જીકૃતમાત્તધન્વા રથં સમાસ્થાય નિશાચરેશ્વરઃ ।
વૃતઃ સહસ્રાયુતકોટ્યનીકપૈર્નિશાચરૈરાશુ યયૌ રણાય ॥ ૮.૭૦॥

બલૈસ્તુ તસ્યાથ બલં કપીનાં નૈકપ્રકારાયુધપૂગભગ્નમ્ ।
દિશઃ પ્રદુદ્રાવ હરીન્દ્રમુખ્યાઃ સમાર્દયન્નાશુ નિશાચરાં સ્તદા ॥ ૮.૭૧॥

ગજો ગવાક્ષો ગવયો વૃષશ્ચ સગન્ધમાદા ધનદેન જાતાઃ ।
પ્રાણાદયઃ પઞ્ચ મરુત્પ્રવીરાઃ સ કત્થનો વિત્તપતિશ્ચ જઘ્નુઃ ॥ ૮.૭૨॥

શરૈસ્તુ તાન્ ષડ્ભિરમોઘવેગૈર્નિપાતયામાસ દશાનનો દ્રાક્ ।
અથાશ્વિપુત્રૌ ચ સજામ્બવન્તૌ પ્રજહ્રતુઃ શૈલવરૈસ્ત્રિભિસ્તમ્ ॥ ૮.૭૩॥

ગિરીન્ વિદાર્યાઽશુ શરૈરથાન્યાઞ્છરાન્ દશાસ્યોઽમુચદાશુ તેષુ ।
એકૈકમેભિર્વિનિપાતિતાસ્તે સસાર તં શક્રસુતાત્મજોઽથ ॥ ૮.૭૪॥

શિલાં સમાદાય તમાપતન્તં વિભેદ રક્ષો હૃદયે શરેણ ।
દૃઢાહતઃ સોઽપ્યગમદ્ધરાતલ્. અં રવેઃ સુતોઽથૈનમભિપ્રજગ્મિવાન્ ॥ ૮.૭૫॥

તદ્ધસ્તગં ભૂરુહમાશુ બાણૈર્દશાનનઃ ખણ્ડશ એવ કૃત્વા ।

ગ્રીવાપ્રદેશેઽસ્ય મુમોચ બાણં ભૃશાહતઃ સોઽપિ પપાત ભૂમૌ ॥ ૮.૭૬॥

અથો હનૂમાનુરગેન્દ્રભોગસમં સ્વબાહું ભૃશમુન્નમય્ય ।
તતાડ વક્ષસ્યધિપં તુ રક્ષસાં મુખૈઃ સ રક્તં પ્રવમન્ પપાત ॥ ૮.૭૭॥

સ લબ્ધસંજ્ઞઃ પ્રશશં સ મારુતિં ત્વયા સમો નાસ્તિ પુમાન્ હિ કશ્ચિત્ ।
કઃ પ્રાપયેદન્ય ઇમાં દશાં મામિતીરિતો મારુતિરાહ તં પુનઃ ॥ ૮.૭૮॥

અત્યલ્પમેતદ્યદુપાત્તજીવિતઃ પુનસ્ત્વમિત્યુક્ત ઉવાચ રાવણઃ ।
ગૃહાણ મત્તોઽપિ સમુદ્યતં ત્વં મુષ્ટિપ્રહારં ત્વિતિ તં પુપોથ ॥ ૮.૭૯॥

લ્ક્ષિક્ષ્। કિઞ્ચિત્પ્રહારેણ તુ વિહ્વલાઙ્ગવત્સ્થિતે હિ તસ્મિન્નિદમન્તરં મમ ।
ઇત્યગ્નિસૂનું પ્રયયૌ સ રાવણો નિવારિતો મારુતિનાઽપિ વાચા ॥ ૮.૮૦॥

તમાપતન્તં પ્રસમીક્ષ્ય નીલો ધનુર્ધ્વજાગ્રાશ્વરથેષુ તસ્ય ।
ચચાર મૂર્ધસ્વપિ ચઞ્ચલોઽલં જલ્. ઈકૃતસ્તેન સ રાવણોઽપિ ॥ ૮.૮૧॥

સ ક્ષિપ્રમાદાય હુતાશનાસ્ત્રં મુમોચ નીલે રજનીચરેશઃ ।
સ તેન ભૂમૌ પતિતો નચૈનં દદાહ વહ્નિઃ સ્વતનુર્યતોઽસૌ ॥ ૮.૮૨॥

તતો યયૌ રાઘવમેવ રાવણો નિવારયામાસ તમાશુ લક્ષ્મણઃ ।
તતક્ષતુસ્તાવધિકૌ ધનુર્ભૃતાં શરૈઃ શરીરાવરણાવદારણૈઃ ॥ ૮.૮૩॥

નિવારિતસ્તેન સ રાવણો ભૃશં રુષાઽન્વિતો બાણમમોઘમુગ્રમ્ ।
સ્વયમ્ભુદત્તં પ્રવિકૃષ્ય ચાઽશુ લલાટમધ્યે પ્રમુમોચ તસ્ય ॥ ૮.૮૪॥

ભૃશાહતસ્તેન મુમોહ લક્ષ્મણો રથાદવપ્લુત્ય દશાનનોઽપિ ।
ક્ષણાદભિદ્રુત્ય બલાત્પ્રગૃહ્ય સ્વબાહુભિર્નેતુમિમં સમૈચ્છત્ ॥ ૮.૮૫॥

સમ્પ્રાપ્ય સંજ્ઞાં સ સુવિહ્વલોઽપિ સસ્માર રૂપં નિજમેવ લક્ષ્મણઃ ।
શેષં હરેરં શયુતં નચાસ્ય સ ચાલનાયાપિ શશાક રાવણઃ ॥ ૮.૮૬॥

બલાત્સ્વદોર્ભિઃ પ્રતિગૃહ્ય ચાખિલૈર્યદા સવીરં પ્રચકર્ષ રાવણઃ ।
ચચાલ પૃથ્વી સહમેરુમન્દરા સસાગરા નૈવ ચચાલ લક્ષ્મણઃ ॥ ૮.૮૭॥

સહસ્રમૂર્ધ્નોઽસ્ય બતૈકમૂર્ધ્નિ સસપ્તપાતાલ્। અગિરીન્દ્રસાગરા ।
ધરાઽખિલેયં નનુ સર્ષપાયતિ પ્રસહ્ય કો નામ હરેત્તમેનમ્ ॥ ૮.૮૮॥

પ્રકર્ષતિ ત્વેવ નિશાચરેશ્વરે તથૈવ રામાવરજં ત્વરાન્વિતઃ ।
સમસ્તજીવાધિપતેઃ પરા તનુઃ સમુત્પપાતાસ્ય પુરો હનૂમાન્ ॥ ૮.૮૯॥

સ મુષ્ટિમાવર્ત્ય ચ વજ્રકલ્પં જઘાન તેનૈવ ચ રાવણં રુષા ।
પ્રસાર્ય બાહૂનખિલૈર્મુખૈર્વમન્ સ રક્તમુષ્ણં વ્યસુવત્પપાત ॥ ૮.૯૦॥

નિપાત્ય રક્ષોધિપતિં સ મારુતિઃ પ્રગૃહ્ય સૌમિત્રિમુરઙ્ગશાયિનઃ ।
જગામ રામાખ્યતનોઃ સમીપં સૌમિત્રિમુદ્ધર્તુમલં હ્યસૌ કપિઃ ॥ ૮.૯૧॥

લ્ક્ક્ષ્।સ રામસં સ્પર્શનિવારિતક્લમઃ સમુત્થિતસ્તેન સમુદ્ધૃતે શરે ।
બભૌ યથા રાહુમુખાત્પ્રમુક્તઃ શશી સુપૂર્ણો વિકચસ્વરશ્મિભિઃ ॥ ૮.૯૨॥

સ શેષભોગાભમથો જનાર્દનઃ પ્રગૃહ્ય ચાપં સશરં પુનશ્ચ ।
સુલબ્ધસંજ્ઞં રજનીચરેશં જગાદ સજ્જીભવ રાવણેતિ ॥ ૮.૯૩॥

રથં સમારુહ્ય પુનઃ સકાર્મુકઃ સમાર્ગણો રાવણ આશુ રામમ્ ।
અભ્યેત્ય સર્વાશ્ચ દિશશ્ચકાર શરાન્ધકારાઃ પરમાસ્ત્રવેત્તા ॥ ૮.૯૪॥

રથસ્થિતેઽસ્મિન્ રજનીચરેશે ન મે પતિર્ભૂમિતલ્। એ સ્થિતઃ સ્યાત્ ।
ઇતિ સ્મ પુત્રઃ પવનસ્ય રામં સ્કન્ધં સમારોપ્ય યયૌ ચ રાક્ષસમ્ ॥ ૮.૯૫॥

પ્રહસ્ય રામોઽસ્ય હયાન્નિહત્ય સૂતં ચ કૃત્વા તિલશો ધ્વજં રથમ્ ।
ધનૂ ષિ ખડ્ગં સકલાયુધાનિ છત્રં ચ સઞ્છિદ્ય ચકર્ત મૌલિમ્ ॥ ૮.૯૬॥

કર્તવ્યમૂઢં તમવેક્ષ્ય રામઃ પુનર્જગાદાઽશુ ગૃહં પ્રયાહિ ।
સમસ્તભોગાનનુભૂય શીઘ્રં પ્રતોષ્ય બન્ધૂન્ પુનરેહિ મર્તુમ્ ॥ ૮.૯૭॥

ઇતીરિતોઽવાગ્વદનો યયૌ ગૃહં વિચાર્ય કાર્યં સહ મન્ત્રિભિઃ સ્વકૈઃ ।
હતાવશેષૈરથ કુમ્ભકર્ણપ્રબોધનાયાઽશુ મતિં ચકાર ॥ ૮.૯૮॥

સશૈલશ ृङ्गાસિપરશ્વધાયુધૈર્નિશાચરાણામયુતૈરનેકૈઃ ।
તચ્છ્વાસવેગાભિહતૈઃ કથઞ્ચિદ્ધતૈઃ સમીપં કથમપ્યબોધયત્ ॥ ૮.૯૯॥

શૈલોપમાનસ્ય ચ માં સરાશીન્ વિધાય ભક્ષાનપિ શોણિતહ્રદાન્ ।
સુતૃપ્તમેનં પરમાદરેણ સમાહ્વયામાસ સભાતલ્. આય ॥ ૮.૧૦૦॥

ઉવાચ ચૈનં રજનીચરેન્દ્રઃ પરાજિતોઽસ્મ્યદ્ય હિ જીવતિ ત્વયિ ।
રણે નરેણૈવ ચ રામનામ્ના કુરુષ્વ મે પ્રીતિમમું નિહત્ય ॥ ૮.૧૦૧॥

ઇતીરિતઃ કારણમપ્યશેષં શ્રુત્વા જગર્હાગ્રજમેવ વીરઃ ।
અમોઘવીર્યેણ હિરાઘવેણ ત્વયા વિરોધશ્ચરિતો બતાદ્ય ॥ ૮.૧૦૨॥

પ્રશસ્યતે નો બલિભિર્વિરોધઃ કથઞ્ચિદેષોઽતિબલો મતો મમ ।
લ્ક્ક્ષ।ઇતીરિતો રાવણ આહ દુર્નયોઽપ્યહં ત્વયાઽવ્યો હિ કિમન્યથા ત્વયા ॥ ૮.૧૦૩॥

ચરન્તિ રાજાન ઉતાક્રમં ક્વચિત્ત્વયોપમાન્ બન્ધુજનાન્ બલાધિકાન્ ।
સમીક્ષ્ય હીત્થં ગદિતોઽગ્રજેન સ કુમ્ભકર્ણઃ પ્રયયૌ રણાય ॥ ૮.૧૦૪॥

પ્રાકારમાલઙ્ઘ્ય સ પઞ્ચયોજનં યદા યયૌ શૂલવરાયુધો રણમ્ ।
કપિપ્રવીરા અખિલાઃ પ્રદુદ્રુવુર્ભયાદતીત્યૈવ ચ સેતુમાશુ ॥ ૮.૧૦૫॥

શતવલિપનસાખ્યૌ તત્ર વસ્વં શભૂતૌ પવનગણવરાં શૌ શ્વેતસમ્પાતિનૌ ચ ।
નિરૃતિતનુમથોગ્રં દુર્મુખં કેસરીતિ પ્રવરમથ મરુત્સુ પ્રાસ્યદેતાન્મુખે સઃ ॥ ૮.૧૦૬॥

રજનિચરવરોઽસૌ કુમ્ભકર્ણઃ પ્રતાપી કુમુદમપિ જયન્તં પાણિના સમ્પિપેષ ।
નલ્. અમથ ચ ગજાદીન્ પઞ્ચ નીલં સતારં ગિરિવરતરુહસ્તાન્મુષ્ટિનાઽપાતયચ્ચ ॥ ૮.૧૦૭॥

અથાઙ્ગદશ્ચ જામ્બવાનિનાત્મજશ્ચ વાનરૈઃ ।
નિજઘ્નિરે નિશાચરં સવૃક્ષશૈલસાનુભિઃ ॥ ૮.૧૦૮॥

વિચૂર્ણિતાશ્ચ રાક્ષસાસ્તનૌ નિશાચરસ્ય તે ।
બભૂવ કાચન વ્યથા નચાસ્ય બાહુષાલ્. ઇનઃ ॥ ૮.૧૦૯॥

અથાપરં મહાચલં પ્રગૃહ્ય ભાસ્કરાત્મજઃ ।
મુમોચ રાક્ષસેઽથ તં પ્રગૃહ્ય તં જઘાન સઃ ॥ ૮.૧૧૦॥

તદા પપાત સૂર્યજસ્તતાડ ચાઙ્ગદં રુષા ।
સ જામ્બવન્તમાશુ તૌ નિપેતતુસ્તલ્. આહતૌ ॥ ૮.૧૧૧॥

અથ પ્રગૃહ્ય ભાસ્કરિં યયૌ સ રાક્ષસો બલી ।
જગામ ચાનુ મારુતિઃ સુસૂક્ષ્મમક્ષિકોપમઃ ॥ ૮.૧૧૨॥

યદૈનમેષ બાધતે તદા વિમોચયામ્યહમ્ ।
યદિ સ્મ શક્યતેઽસ્ય તુ સ્વમોચનાય તદ્વરમ્ ॥ ૮.૧૧૩॥

ઇતિ વ્રજત્યનુ સ્મ તં મરુત્સુતે નિશાચરઃ ।
પુરં વિવેશ ચાર્ચિતઃ સ્વબન્ધુભિઃ સમસ્તશઃ ॥ ૮.૧૧૪॥

લ્ક્ષ્ક્ષી। તુહિનસલિલમાલ્યૈઃ સર્વતોઽભિપ્રવૃષ્ટે રજનિચરવરેઽસ્મિં સ્તેન સિક્તઃ કપીશઃ ।
વિગતસકલયુદ્ધગ્લાનિરાવઞ્ચયિત્વા રજનિચરવરં તં તસ્ય નાસાં દદં શ ॥ ૮.૧૧૫॥

કરાભ્યામથ કર્ણૌ ચ નાસિકાં દશનૈરપિ ।
સઞ્છિદ્ય ક્ષિપ્રમેવાસાવુત્પપાત હરીશ્વરઃ ॥ ૮.૧૧૬॥

તલ્। એન ચૈનં નિજઘાન રાક્ષસઃ પિપેષ ભૂમૌ પતિતં તતોઽપિ ।

સમુદ્રતોઽસૌ વિવરેઽઙ્ગુલીનાં જઘાન શૂલેન પુનઃ સ રાક્ષસઃ ॥ ૮.૧૧૭॥

અમોઘશૂલં પ્રપતત્તદીક્ષ્ય રવેઃ સુતસ્યોપરિ મારુતાત્મજઃ ।
પ્રગૃહ્ય જાનૌ પ્રણિધાય શીઘ્રં બભઞ્જ તં પ્રેક્ષ્ય નનાદ ચોચ્ચૈઃ ॥ ૮.૧૧૮॥

અથૈનમાવૃત્ય જઘાન મુષ્ટિના સ રાક્ષસો વાયુસુતં સ્તનાન્તરે ।
જગર્જ તેનાભિહતો હનૂમાનચિન્તયં સ્તત્પ્રજહાર ચૈનમ્ ॥ ૮.૧૧૯॥

તલ્। એન વક્ષસ્યભિતાડિતો રુષા હનૂમતા મોહમવાપ રાક્ષસઃ ।
પુનશ્ચ સંજ્ઞાં સમવાપ્ય શીઘ્રં યયૌ સ યત્રૈવ રઘુપ્રવીરઃ ॥ ૮.૧૨૦॥

વિચિન્તયામાસ તતો હનૂમાન્મયૈવ હન્તું સમરે હિ શક્યઃ ।
અસૌ તથાઽપ્યેનમહં ન હન્મિ યશો હિ રામસ્ય દૃઢં પ્રકાશયન્ ॥ ૮.૧૨૧॥

અનન્યવધ્યં તમિમં નિહત્ય સ્વયં સ રામો યશ આહરેત ।
દત્તો વરો દ્વારપયોઃ સ્વયં ચ જનાર્દનેનૈવ પુરા તતશ્ચ ॥ ૮.૧૨૨॥

મયૈવ વધ્યૌ ભવતં ત્રિજન્મસુ પ્રવૃદ્ધવીર્યાવિતિ કેશવેન ।
ઉક્તં મમૈવૈષ યદપ્યનુગ્રહં વધેઽસ્ય કુર્યાન્નતુ મે સ ધર્મઃ ॥ ૮.૧૨૩॥

ઇતિ સ્મ સઞ્ચિન્ત્ય કપીશયુક્તો જગામ યત્રૈવ કપિપ્રવીરાઃ ।
સ કુમ્ભકર્ણોઽખિલવાનરાં સ્તુ પ્રભક્ષયન્ રામમુપાજગામ ॥ ૮.૧૨૪॥

તે ભક્ષિતાસ્તેન કપિપ્રવીરાઃ સર્વે વિનિર્જગ્મુરમુષ્ય દેહાત્ ।
સ્રોતોભિરેવાથ ચ રોમકૂપૈઃ કેચિત્તમેવાઽરુરુહુર્યથા ગિરિમ્ ॥ ૮.૧૨૫॥

સ તાન્ વિધૂયાઽશુ યથા મહાગજો જગામ રામં સમરાર્થમેકઃ ।
પ્રભક્ષયન્ સ્વાનપરાંશ્ચ સર્વશો મત્તઃ સમાઘ્રાય ચ શોણિતં પિબન્ ॥ ૮.૧૨૬॥

લ્ક્ષ્મીઇંયવારયત્તં શરવર્ષધારયા સ લક્ષ્મણો નૈનમચિન્તયત્સઃ ।
જગામ રામં ગિરિશ૽ૃઙ્ગધારી સમાહ્વયત્તં સમરાય ચાઽશુ ॥ ૮.૧૨૭॥

અથો સમાદાય ધનુઃ સુઘોરં શરાંશ્ચ વજ્રાશનિતુલ્યવેગાન્ ।
પ્રવેશયામાસ નિશાચરે પ્રભુઃ સ રાઘવઃ પૂર્વહતેષુ યદ્વત્ ॥ ૮.૧૨૮॥

યાવદ્બલેન ન્યહનત્ખરાદિકાન્ન તાવતૈવ ન્યપતત્સ રાક્ષસઃ ।
અથ પ્રહસ્યાઽત્મબલૈકદેશં પ્રદર્શયન્ બાણવરાન્મુમોચ ॥ ૮.૧૨૯॥

દ્વાભ્યાં સ બાહૂ નિચકર્ત તસ્ય પદદ્વયં ચૈવ તથા શરાભ્યામ્ ।
અથાપરેણાસ્ય શિરો નિકૃત્ય સમ્પ્રાક્ષિપત્સાગરતોય આશુ ॥ ૮.૧૩૦॥

અવર્ધતાબ્ધિઃ પતિતેઽસ્ય કાયે મહાચલાભે ક્ષણદાચરસ્ય ।
સુરાશ્ચ સર્વે વવૃષુઃ પ્રસૂનૈર્મુદા સ્તુવન્તો રઘુવર્યમૂર્ધ્નિ ॥ ૮.૧૩૧॥

યોજનાનાં ત્રિલક્ષં હિ કુમ્ભકર્ણો વ્યવર્ધત ।
પૂર્વં પશ્ચાત્સઞ્ચુકોચ લઙ્કાયામુષિતું સ્વયમ્ ॥ ૮.૧૩૨॥

સ તુ સ્વભાવમાપન્નો મ્રિયમાણો વ્યવર્ધત ।
તેનાસ્મિન્ પતિતે ત્વબ્ધિરવર્ધદધિકં તદા ॥ ૮.૧૩૩॥

અથાપરે યે રજનીચરાસ્તદા કપિપ્રવીરૈર્નિહતાશ્ચ સર્વશઃ ।
હતાવશિષ્ટાસ્ત્વરિતાઃ પ્રદુદ્રુવુર્ભ્રાતુર્વધં ચોચુરુપેત્ય રાવણમ્ ॥ ૮.૧૩૪॥

સ દુઃખતમો નિપપાત મૂર્છિતો નિરાશકશ્ચાભવદાત્મજીવિતે ।
તમાહ પુત્રસ્ત્રિદશેશશત્રુર્નિયુઙ્ક્ષ્વ માં શત્રુવધાય માચિરમ્ ॥ ૮.૧૩૫॥

મયા ગૃહીતસ્ત્રિદશેશ્વરઃ પુરા વિષીદસે કિં નરરાજપુત્રતઃ ।
સ એવમુક્ત્વા પ્રજુહાવ પાવકં શિવં સમભ્યર્ચ્ય સમારુહદ્રથમ્ ॥ ૮.૧૩૬॥

સ આત્તધન્વા સશરો રથેન વિયત્સમારુહ્ય યયાવદર્શનમ્ ।
સ નાગપાશૈર્વરતઃ શિવસ્ય બબન્ધ સર્વાન્ કપિવીરસઽ ન્ધાન્ ॥ ૮.૧૩૭॥

પુરાઽવતારાય યદા સ વિષ્ણુર્દિદેશ સર્વાં સ્ત્રિદશાં સ્તદૈવ ।
લ્ક્ષિક્ષવ્ંઅમાપિ સેવા ભવતે પ્રયોજ્યેત્યેવં ગરુત્માનવદદ્વૃષાકપિમ્ ॥ ૮.૧૩૮॥

તમાહ વિષ્ણુર્ન ભુવિ પ્રજાતિમુપૈહિ સેવાં તવ ચાન્યથાઽહમ્ ।
આદાસ્ય એવાત્ર યથા યશઃ સ્યાદ્ધર્મશ્ચ કર્તવ્યકૃદેવ ચ સ્યાઃ ॥ ૮.૧૩૯॥

વરેણ શર્વસ્ય હિ રાવણાત્મજો યદા નિબધ્નાતિ કપીન્ સલક્ષ્મણાન્ ।
ઉરઙ્ગપાશેન તદા ત્વમેવ સમેત્ય સર્વાનપિ મોચયસ્વ ॥ ૮.૧૪૦॥

અહં સમર્થોઽપિ સ લક્ષ્મણશ્ચ તથા હનૂમાન્ન વિમોચયામઃ ।
તવ પ્રિયાર્થં ગરુડૈષ એવ કૃતસ્તવાઽદેશ ઇમં કુરુષ્વ ॥ ૮.૧૪૧॥

તદેતદુક્તં હિ પુરાઽત્મના યત્તતો હિ રામો ન મુમોચ કઞ્ચન ।
ન લક્ષ્મણો નૈવ ચ મારુતાત્મજઃ સ ચૈવ જાનાતિ હિ દેવગુહ્યમ્ ॥ ૮.૧૪૨॥

અથો નિબદ્ધ્યાઽશુ હરીન્ સલક્ષ્મણાન્ જગામ રક્ષઃ સ્વપિતુઃ સકાશમ્ ।
નનન્દ ચાસૌ પિશિતાશનેશ્વરઃ શશં સ પુત્રં ચ કૃતાત્મકાર્યમ્ ॥ ૮.૧૪૩॥

સ પક્ષિરાજોઽથ હરેર્નિદેશં સ્મરં સ્ત્વરાવાનિહ ચાઽજગામ ।
તત્પક્ષવાતસ્પર્શેન કેવલં વિનષ્ટ એષાં સ ઉરઙ્ગબન્ધઃ ॥ ૮.૧૪૪॥

સ રામમાનમ્ય પરાત્મદૈવતં યયૌ સુમાલ્યાભરણાનુલેપનઃ ।
કપિપ્રવીરાશ્ચ તરૂઞ્છિલાશ્ચ પ્રગૃહ્ય નેદુર્બલિનઃ પ્રહૃષ્ટાઃ ॥ ૮.૧૪૫॥

શ્રુત્વા નિનાદં પ્લવગેશ્વરાણાં પુનઃ સપુત્રોઽત્રસદત્ર રાવણઃ ।
બન્ધાદમુષ્માત્પ્રતિનિસ્સૃતાસ્તે કિમત્ર કાર્યં ત્વિતિ ચિન્તયાનઃ ॥ ૮.૧૪૬॥

પુનશ્ચ હુત્વા સ હુતાશમેવ રથં સમારુહ્ય યયાવદર્શનમ્ ।
વવર્ષ ચાસ્ત્રાણિ મહાન્ત્યજસ્રં વરાદુમેશસ્ય તથાઽબ્જજસ્ય ॥ ૮.૧૪૭॥

પુનશ્ચ તસ્યાસ્ત્રનિપીડિતાસ્તે નિપેતુરુર્વ્યાં કપયઃ સલક્ષ્મણાઃ ।
સ્પૃશન્તિ નાસ્ત્રાણિ દુરન્તશક્તિં તનું સમીરસ્ય હિ કાનિચિત્ક્વચિત્ ॥ ૮.૧૪૮॥

વિજ્ઞાતુકામઃ પુરિ સમ્પ્રવૃત્તિં વિભીષણઃ પૂર્વગતસ્તદાઽગાત્ ।
દદર્શ સર્વાન્ પતિતાન્ સ વાનરાન્મરુત્સુતં ત્વેકમનાકુલં ચ ॥ ૮.૧૪૯॥

લ્ક્ષ્વ્।સ તં સમાદાય યયૌ વિધાતૃજં વિમૂર્ચ્છિતં ચોદકસેકતસ્તમ્ ।
આશ્વાસ્ય કિં જીવસિ હીત્યુવાચ તથેતિ સ પ્રાહ ચ મન્દવાક્યઃ ॥ ૮.૧૫૦॥

ઊચે પુનર્જીવતિ કિં હનૂમાન્ જીવાઃ સ્મ સર્વેઽપિ હિ જીવમાને ।
તસ્મિન્ હતે નિહતાશ્ચૈવ સર્વ ઇતીરિતેઽસ્મીત્યવદત્સ મારુતિઃ ॥ ૮.૧૫૧॥

ઇત્યુક્તો જામ્બવાનાહ હનૂમન્તમનન્તરમ્ ।
યોઽસૌ મેરોઃ સમીપસ્થો ગન્ધમાદનસંજ્ઞિતઃ ।
ગિરિસ્તસ્માત્સમાહાર્યં ત્વયૌષધચતુષ્ટયમ્ ॥ ૮.૧૫૨॥

મૃતસઞ્જીવની મુખ્યા સન્ધાનકરણી પરા ।
સવર્ણકરણી ચૈવ વિશલ્યકરણીતિ ચ ॥ ૮.૧૫૩॥

ઇત્યુક્તઃ સ ક્ષણેનૈવ પ્રાપતદ્ગન્ધમાદનમ્ ।
અવાપ ચામ્બરચરો રામમુક્તઃ શરો યથા ॥ ૮.૧૫૪॥

અન્તર્હિતાશ્ચૌષધીસ્તુ તદા વિજ્ઞાય મારુતિઃ ।
ઉદ્બબર્હ ગિરિં ક્રોધાચ્છતયોજનમણ્ડલમ્ ॥ ૮.૧૫૫॥

સ તં સમુત્પાટ્ય ગિરિં કરેણ પ્રતોલ્। અયિત્વા બલદેવસૂનુઃ ।
સમુત્પપાતામ્બરમુગ્રવેગો યથા હરિશ્ચક્રધરસ્ત્રિવિક્રમે ॥ ૮.૧૫૬॥

અવાપ ચાક્ષ્ણોઃ સ નિમેષમાત્રતો નિપાતિતા યત્ર કપિપ્રવીરાઃ ।
તચ્છૈલવાતસ્પર્શાત્સમુત્થિતાઃ સમસ્તશો વાનરયૂથપાઃ ક્ષણાત્ ॥ ૮.૧૫૭॥

અપૂજયન્મારુતિમુગ્રપૌરુષં રઘૂત્તમોઽસ્યાનુજનિસ્તથાઽપરે ।
પપાત મૂર્ધ્યસ્ય ચ પુષ્પસન્તતિઃ પ્રમોદિતૈર્દેવવરૈર્વિસર્જિતા ॥ ૮.૧૫૮॥

સ દેવગન્ધર્વમહર્ષિસત્તમૈરભિષ્ટુતો રામકરોપગૂહિતઃ ।
પુનર્ગિરિં તં શતયોજનોચ્છ્રિતં ન્યપાતયત્સં સ્થિત એવ તત્ર ચ ॥ ૮.૧૫૯॥

સ પૂર્વવન્મારુતિવેગચોદિતો નિરન્તરં શ્લિષ્ટતરોઽત્ર ચાભવત્ ।
પુનશ્ચ સર્વે તરુશૈલહસ્તા રણાય ચોત્તસ્થુરલં નદન્તઃ ॥ ૮.૧૬૦॥

પુનશ્ચ તાન્ પ્રેક્ષ્ય સમુત્થિતાન્ કપીન્ ભયં મહચ્છક્રજિતં વિવેશ ।
લ્ક્ષ્ક્ષ્વ।સ પૂર્વવદ્ધ્વ્યવહે સમર્ચ્ય શિવં તથાઽદર્શનમેવ જગ્મિવાન્ ॥ ૮.૧૬૧॥

વરાશ્રયેણાજગિરીશયોસ્તથા પુનર્મહાસ્ત્રૈઃ સ બબન્ધ તાન્ કપીન્ ।
અથાઽહ રામસ્ય મનોઽનુસારતઃ પુરાઽસ્ત્રમેવાનુસરન્ સ લક્ષ્મણઃ ॥ ૮.૧૬૨॥

પિતામહાસ્ત્રેણ નિહન્મિ દુર્મતિં તવાઽઽજ્ઞયા શક્રજિતં સબાન્ધવમ્ ।
ઇતીરિતે તેન સ ચાઽહ રાઘવો ભયાદદૃશ્યે ન વિમોક્તુમર્હસિ ॥ ૮.૧૬૩॥

ન સોઢુમીશોઽસિ યદિ ત્વમેતદસ્ત્રં તદાઽહં શરમાત્રકેણ ।
અદૃશ્યમપ્યાશુ નિહન્મિ સન્તં રસાતલ્. એઽથાપિ હિ સત્યલોકે ॥ ૮.૧૬૪॥

ઇતિ સ્મ વીન્દ્રસ્ય હનૂમતશ્ચ બલપ્રકાશાય પુરા પ્રભુઃ સ્વયમ્ ।
સમ્માનયિત્વાઽસ્ત્રમમુષ્ય રામો દુરન્તશક્તિઃ શરમાદદેઽથ ॥ ૮.૧૬૫॥

અનેન દૃષ્ટોઽહમિતિ સ્મ દુષ્ટો વિજ્ઞાય બાહ્વોર્બલમસ્ય ચોગ્રમ્ ।
વિનિશ્ચયં દેવતમસ્ય પશ્યન્ પ્રદુદ્રુવે પ્રાણપરીપ્સુરાશુ ॥ ૮.૧૬૬॥

હાહાકૃતે પ્રદ્રુત ઇન્દ્રશત્રૌ રઘૂત્તમઃ શત્રુવિભીષણત્વાત્ ।
વિભીષણેત્યેવ સુરૈરભિષ્ટુતો વિજ્ઞાનમસ્ત્રં ત્વમુચત્સ્વસૈન્યે ॥ ૮.૧૬૭॥

નિશાચરાસ્ત્રં હ્યગમત્ક્ષણેન રામાસ્ત્રવીર્યાદ્ધરયો નદન્તઃ ।
ઉત્તસ્થુરુચ્ચોરુગિરીન્ પ્રગૃહ્ય પ્રશં સમાના રઘુવીરમુચ્ચૈઃ ॥ ૮.૧૬૮॥

સુરૈશ્ચ પુષ્પં વર્ષદ્ભિરીડિતસ્તસ્થૌ ધનુષ્પાણિરનન્તવીર્યઃ ।
સ રાવણસ્યાથ સુતો નિકુમ્ભિલાં પુનઃ સમાસાદ્ય જુહાવ પાવકમ્ ॥ ૮.૧૬૯॥

વિભીષણોઽથાઽહ રઘૂત્તમં પ્રભું નિયોજયાદ્યૈવ વધાય દુર્મતેઃ ।
કૃતાગ્નિપૂજો નહિ વધ્ય એષ વરો વિધાતુઃ પ્રથિતોઽસ્ય તાદૃશઃ ॥ ૮.૧૭૦॥

ન વૈ વધં રામ ઇયેષ તસ્ય પલાયિતસ્યાઽત્મસમીક્ષણાત્પુનઃ ।
સત્ત્વોજ્ઝિતોઽસાવપિ કૂટયોધી ન મે વધાર્હોઽયમિતિ સ્મ સ પ્રભુઃ ॥ ૮.૧૭૧॥

સ આદિદેશાવરજં જનાર્દનો હનૂમતા ચૈવ વિભીષણેન ।
સહૈવ સર્વૈરપિ વાનરેન્દ્રૈર્યયૌ મહાત્મા સ ચ તદ્વધાય ॥ ૮.૧૭૨॥

લ્ક્ષ્વી।સ જુહ્વતસ્તસ્ય ચકાર વિઘ્નં પ્લવઙ્ગમૈઃ સોઽથ યુયુત્સયા રથમ્ ।
સમાસ્થિતઃ કાર્મુકબાણપાણિઃ પ્રયુધ્યયૌ લક્ષ્મણમાશુ ગર્જન્ ॥ ૮.૧૭૩॥

ઉભૌ ચ તાવસ્ત્રવિદાં વરિષ્ઠૌ શરૈઃ શરીરાન્તકરૈસ્તતક્ષતુઃ ।
દિશશ્ચ સર્વાઃ પ્રદિશઃ શરોત્તમૈર્વિધાય શિક્ષાસ્ત્રબલૈર્નિરન્તરાઃ ॥ ૮.૧૭૪॥

અસ્ત્રાણિ તસ્યાસ્ત્રવરૈઃ સ લક્ષ્મણો નિવાર્ય શત્રોશ્ચલકુણ્ડલોજ્જ્વલમ્ ।
શિરઃ શરેણાઽશુ સમુન્મમાથ સુરૈઃ પ્રસૂનૈરથ ચાભિવૃષ્ટઃ ॥ ૮.૧૭૫॥

નિપાતિતેઽસ્મિન્નિતરાં નિશાચરાન્ પ્લવઙ્ગમા જઘ્નુરનેકકોટિશઃ ।
હતાવશિષ્ટાસ્તુ દશાનનાય શશં સુરત્યાપ્તસુતપ્રણાશમ્ ॥ ૮.૧૭૬॥

સ તન્નિશમ્યાપ્રિયમુગ્રરૂપં ભૃશં વિનિશ્વસ્ય વિલપ્ય દુઃખાત્ ।
સં સ્થાપયામાસ મતિં પુનશ્ચ મરિષ્ય ઇત્યેવ વિનિશ્ચિતાર્થઃ ॥ ૮.૧૭૭॥

મરણાભિમુખઃ શીઘ્રં રાવણો રણકર્મણે ।
સજ્જીભવન્નન્તરૈવ દિદેશ બલમૂર્જિતમ્ ॥ ૮.૧૭૮॥

ત્રિં શત્સહસ્રાણિ મહૌઘકાનામક્ષોહિણીનાં સહષટ્સહસ્રમ્ ।
શ્રમેણ સં યોજયતાઽશુ રામં સજ્જો ભવામીતિ દિદેશ રાવણઃ ॥ ૮.૧૭૯॥

તદપ્રધૃષ્યં વરતઃ સ્વયમ્ભુવો યુગાન્તકાલાર્ણવઘૂર્ણિતોપમમ્ ।
પ્રગૃહ્ય નાનાવિધમસ્ત્રશસ્ત્રં બલં કપી ઝ્છીઘ્રતમં જગામ ॥ ૮.૧૮૦॥

આગચ્છમાનં તદપારમેયં બલં સુઘોરં પ્રલ્। અયાર્ણવોપમમ્ ।
ભયાત્સમુદ્વિગ્નવિષણ્ણચેતસઃ કપિપ્રવીરા નિતરાં પ્રદુદ્રુવુઃ ॥ ૮.૧૮૧॥

વરો હિ દત્તોઽસ્ય પુરા સ્વયમ્ભુવા ધરાતલ્। એઽલ્પેઽપિ નિવાસશક્તિઃ ।
અજેયતા ચેત્યત એવ સાર્કજાઃ પ્લવઙ્ગમા દ્રષ્ટુમપિ સ્મ નાશકન્ ॥ ૮.૧૮૨॥

પ્રગૃહ્ય રામોઽથ ધનુઃ શરાંશ્ચ સમન્તતસ્તાનવધીચ્છરૌઘૈઃ ।
સ એવ સર્વત્ર ચ દૃશ્યમાનો વિદિક્ષુ દિક્ષુ પ્રજહાર સર્વશઃ ॥ ૮.૧૮૩॥

ક્ષણેન સર્વાંશ્ચ નિહત્ય રાઘવઃ પ્લવઙ્ગમાનામૃષભૈઃ સ પૂજિતઃ ।
અભિષ્ટુતઃ સર્વસુરોત્તમૈર્મુદા ભૃશં પ્રસૂનોત્કરવર્ષિભિઃ પ્રભુઃ ॥ ૮.૧૮૪॥

લ્ક્ષ્વીઇઽથાઽયયૌ સર્વનિશાચરેશ્વરો હતાવશિષ્ટેન બલેન સં વૃતઃ ।

વિમાનમારુહ્ય ચ પુષ્પકં ત્વરન્ શરીરનાશાય મહાયુધોદ્ધતઃ ॥ ૮.૧૮૫॥

વિરૂપનેત્રોઽથચ યૂપનેત્રસ્તથા મહાપાર્શ્વમહોદરૌ ચ ।
યયુસ્તમાવૃત્ય સહૈવ મન્ત્રિણો મૃતિં પુરોધાય રણાય યાન્તમ્ ॥ ૮.૧૮૬॥

અથાસ્ય સૈન્યાનિ નિજઘ્નુરોજસા સમન્તતઃ શૈલશિલાભિવૃષ્ટિભિઃ ।
પ્લવઙ્ગમાસ્તાનભિવીક્ષ્ય વીર્યવાન્ સસાર વેગેન મહોદરો રુષા ॥ ૮.૧૮૭॥

વીક્ષ્યાતિકાયં તમભિદ્રવન્તં સ કુમ્ભકર્ણોઽયમિતિ બ્રુવન્તઃ ।
પ્રદુદ્રુવુર્વાનરવીરસઙ ન્ઘાસ્તમાસસાદાઽશુ સુતોઽથ વાલિનઃ ॥ ૮.૧૮૮॥

વદન્ સ તિષ્ઠધ્વમિતિ સ્મ વીરો વિભીષિકામાત્રમિદં ન યાત ।
ઇતીરયન્નગ્રત એષ પુપ્લુવે મહોદરસ્યેન્દ્રસુતાત્મજો બલી ॥ ૮.૧૮૯॥

અથો શરાનાશુ વિમુઞ્ચમાનં શિરઃ પરામૃશ્ય નિપાત્ય ભૂતલ્। એ ।
મમર્દ પદ્ભ્યામભવદ્ગતાસુર્મહોદરો વાલિસુતેન ચૂર્ણિતઃ ॥ ૮.૧૯૦॥

અથો મહાપાર્શ્વ ઉપાજગામ પ્રવર્ષમાણોઽસ્ય શરામ્બુધારાઃ ।
પ્રસં હ્ય ચાઽચ્છિદ્ય ધનુઃ કરસ્થં સમાદદે ખઙ્ગમમુષ્ય સોઽઙ્ગદઃ ॥ ૮.૧૯૧॥

નિગૃહ્ય કેશેષુ નિપાત્ય ભૂતલ્। એ ચકર્ત વામાં સત ઓદરં પરમ્ ।
યથોપવીતં સ તથા દ્વિધાકૃતો મમાર મન્ત્રી રજનીચરેશિતુઃ ॥ ૮.૧૯૨॥

અથૈનમાજગ્મતુરુદ્યતાયુધૌ વિરૂપનેત્રોઽપ્યથ યૂપનેત્રઃ ।
યથૈવ મેઘૌ દિવિ તિગ્મરશ્મિં તથા સમાચ્છાદયતાં શરૌઘૈઃ ॥ ૮.૧૯૩॥

તાભ્યાં સ બદ્ધઃ શરપઞ્જરેણ વિચેષ્ટિતું નાશકદત્ર વીરઃ ।
હરીશ્વરઃ શૈલમતિપ્રમાણમુત્પાટ્ય ચિક્ષેપ તયોઃ શરીરે ॥ ૮.૧૯૪॥

ઉભૌ ચ તૌ તેન વિચૂર્ણિતૌ રણે રવેઃ સુતસ્યોરુબલેરિતેન ।
નિશાચરેશોઽથ શરેણ સૂર્યજં બિભેદ વક્ષસ્યપિ સોઽપતદ્ભુવિ ॥ ૮.૧૯૫॥

તતઃ સ સર્વાંશ્ચ હરિપ્રવીરાન્ વિધૂય બાણૈર્બલવાન્ દશાનનઃ ।
લ્ક્ષ્ક્ષક્ષ્।જગામ રામાભિમુખસ્તદૈનં રુરોધ રામાવરજં શરૌઘૈઃ ॥ ૮.૧૯૬॥

તદા દશાસ્યોઽન્તકદણ્ડકલ્પાં મયાય દત્તાં કમલોદ્ભવેન ।
મયાદ્ગૃહીતાં ચ વિવાહકાલે પ્રગૃહ્ય શક્તિં વિસસર્જ લક્ષ્મણે ॥ ૮.૧૯૭॥

તયા સ વીરઃ સુવિદારિતોરાઃ પપાત ભૂમૌ સુભૃશં વિમૂર્ચ્છિતઃ ।
મરુત્સુતઃ શૈલમતિપ્રમાણં ચિક્ષેપ રક્ષઃ પતિવક્ષસિ દ્રુતમ્ ॥ ૮.૧૯૮॥

તેનાતિગાઢં વ્યથિતો દશાનનો મુખૈર્વમઞ્છોણિતપૂરમાશુ ।
તદન્તરેણ પ્રતિગૃહ્ય લક્ષ્મણં જગામ શક્ત્યા સહ રામસન્નિધિમ્ ॥ ૮.૧૯૯॥

સમુદ્ધબર્હાથ ચ તાં સ રાઘવો દિદેશ ચ પ્રાણવરાત્મજં પુનઃ ।
પ્રભુઃ સમાનેતુમથો વરૌષધીઃ સ ચાડનિનાયાડશુ ગિરિં પુનસ્તમ્ ॥ ૮.૨૦૦॥

તદ્ગન્ધમાત્રેણ સમુત્થિતોડસૌ સૌમિત્રિરાત્તોરુબલશ્ચ પૂર્વવત્ ।
શશં સ ચાશ્લિષ્ય મરુત્સુતં પ્રભુઃ સ રાઘવોડગણ્યગુણાર્ણવઃ સ્મયન્ ॥ ૮.૨૦૧॥

પ્રાક્ષિપત્તં ગિરિવરં લઙ્કાસ્થઃ સન્ સ મારુતિઃ ।
અર્ધલક્ષે યોજનાનાં યત્રાસૌ પૂર્વસં સ્થિતઃ ॥ ૮.૨૦૨॥

તદ્બાહુવેગાત્સં શ્લેષ પ્રાપ પૂર્વવદેવ સઃ ।
મૃતાશ્ચ યે પ્લવઙ્ગાસ્તુ તદ્ગન્ધાત્તેડપિ જીવિતાઃ ॥ ૮.૨૦૩॥

રામાજ્ઞયૈવ રક્ષાંસિ હરયોડબ્ધાવવાક્ષિપન્ ।
નોજ્જીવિતાસ્તતસ્તે તુ વાનરા નિરુજોડભવન્ ॥ ૮.૨૦૪॥

છિન્નપ્રરોહિણશ્ચૈવ વિશલ્યાઃ પૂર્વવર્ણિનઃ ।
ઔષધીનાં પ્રભાવેન સર્વેડપિ હરયોડભવન્ ॥ ૮.૨૦૫॥

અથાડસસાદોત્તમપૂરુષં પ્રભું વિમાનગો રાવણ આયુધૌઘાન્ ।
પ્રવર્ષમાણો રઘુવં શનાથં તમાત્તધન્વાડભિયયૌ ચ રામઃ ॥ ૮.૨૦૬॥

સમ્માનયન્ રાઘવમાદિપૂરુષં નિર્યાતયામાસ રથં પુરન્દરઃ ।
સહાયુધં માતલિસઙ્ગૃહીતં સમારુરોહાડશુ સ લક્ષ્મણાગ્રજઃ ॥ ૮.૨૦૭॥

લ્ક્ષ્ક્ષ્ક્ષ્।આરુહ્ય તં રથવરં જગદેકનાથો લોકાભયાય રજનીચરનાથમાશુ ।
અભ્યુદ્યયૌ દશશતાં શુરિવાન્ધકારં લોકાનશેષત ઇમાન્નિગિરન્તમુદ્યન્ ॥ ૮.૨૦૮॥

આયાન્તમીક્ષ્ય રજનીચરલોકનાથઃ શસ્ત્રાણ્યથાસ્ત્રસહિતાનિ મુમોચ રામે ।
રામસ્તુ તાનિ વિનિહત્ય નિજૈર્મહાસ્ત્રૈસ્તસ્યોત્તમાઙ્ગદશકં યુગપન્ન્યકૃન્તત્ ॥ ૮.૨૦૯॥

કૃત્તાનિ તાનિ પુનરેવ સમુત્થિતાનિ દૃષ્ટ્વા વરાચ્છતધૃતેર્હૃદયં વિભેદ ।
બાણેન વજ્રસદૃશેન સ ભિન્નહૃત્કો રક્તં વમન્ન્યપતદાશુ મહાવિમાનાત્ ॥ ૮.૨૧૦॥

તસ્મિન્ હતે ત્રિજગતાં પરમપ્રતીપે બ્રહ્મા શિવેન સહિતઃ સહ લોકપાલૈઃ ।
અભ્યેત્ય પાદયુગલ્. અં જગદેકભર્તૂ રામસ્ય ભક્તિભરિતઃ શિરસા નનામ ॥ ૮.૨૧૧॥

અથૈનમસ્તૌત્પિતરં કૃતાઞ્જલિર્ગુણાભિરામં જગતઃ પિતામહઃ ।
જિતં જિતં તેડજિત લોકભાવન પ્રપન્નપાલાય નતાઃ સ્મ તે વયમ્ ॥ ૮.૨૧૨॥

ત્વમેક ઈશોઽસ્ય નચાઽદિરન્તસ્તવેડ્ય કાલેન તથૈવ દેશતઃ ।
ગુણા હ્યગણ્યાસ્તવ તેઽપ્યનન્તાઃ પ્રત્યેકશશ્ચાઽદિવિનાશવર્જિતાઃ ॥ ૮.૨૧૩॥

નચોદ્ભવો નૈવ તિરસ્કૃતિસ્તે ક્વચિદ્ગુણાનાં પરતઃ સ્વતો વા ।
ત્વમેક આદ્યઃ પરમઃ સ્વતન્ત્રો ભૃત્યાસ્તવાહં શિવપૂર્વકાશ્ચ યે ॥ ૮.૨૧૪॥

યથાઽર્ચિષોઽગ્નેઃ પવનસ્ય વેગા મરીચયોઽર્કસ્ય નદીષુ ચાઽપઃ ।
ગચ્છન્તિ ચાઽયન્તિ ચ સન્તતાસ્ત્વત્તદ્વન્મદાદ્યાઃ શિવપૂર્વકાશ્ચ યે ॥ ૮.૨૧૫॥

યે યે ચ મુક્તાસ્ત્વથ યે ચ બદ્ધાઃ સર્વે તવેશેશ વશે સદૈવ ।
વયં સદા ત્વદ્ગુણપૂગમુચ્ચૈઃ સર્વે વદન્તોઽપિ ન પારગામિનઃ ॥ ૮.૨૧૬॥

કિમેષ ઈદૃગ્ગુણકસ્ય તે પ્રભો રક્ષોવધોઽશેષસુરપ્રપાલનમ્ ।
અનન્યસાધ્યં હિ તથાઽપિ તદ્વયં કૃતં ત્વયા તસ્ય નમોનમસ્તે ॥ ૮.૨૧૭॥

ઇતીરિતે ત્વબ્જભવેન શૂલી સમાહ્વયદ્રાઘવમાહવાય ।
વરં મદીયં ત્વગણય્ય રક્ષો હતં ત્વયા તેન રણાય મેહિ ॥ ૮.૨૧૮॥

ઇતીરિતેઽસ્ત્વિત્યભિધાય રાઘવો ધનુઃ પ્રગૃહ્યાઽશુ શરં ચ સન્દધે ।
વિકૃષ્યમાણે ચલિતા વસુન્ધરા પપાત રુદ્રોઽપિ ધરાપ્રકમ્પતઃ ॥ ૮.૨૧૯॥

લ્ક્ષિક્ષ્ક્ષઽથોત્થિતશ્ચાઽસુરભાવવર્જિતઃ ક્ષમસ્વ દેવેતિ નનામ પાદયોઃ ।
ઉવાચ ચ ત્વદ્વશગોઽસ્મિ સર્વદા પ્રસીદ મે ત્વદ્વિષયં મનઃ કુરુ ॥ ૮.૨૨૦॥

અથેન્દ્રમુખ્યાશ્ચ તમૂચિરે સુરાસ્ત્વયાઽવિતાઃ સ્મોઽદ્ય નિશાચરાદ્ભયમ્ ।
તથૈવ સર્વાપદ એવ નસ્ત્વં પ્રપાહિ સર્વે ભવદીયકાઃ સ્મ ॥ ૮.૨૨૧॥

સીતાકૃતિં તામથ તત્ર ચાઽગતાં દિવ્યચ્છલેન પ્રણિધાય પાવકે ।
કૈલાસતસ્તાં પુનરેવ ચાઽગતાં સીતામગૃહ્ણાદ્દુતભુક્સમર્પિતામ્ ॥ ૮.૨૨૨॥

જાનન્ ગિરીશાલયગાં સ સીતાં સમગ્રહીત્પાવકસમ્પ્રદત્તામ્ ।
મુમોદ સમ્પ્રાપ્ય ચ તાં સ રામઃ સા ચૈવ દેવી ભગવન્તમાપ્ય ॥ ૮.૨૨૩॥

અથો ગિરેરાનયનાત્પરસ્તાદ્યે વાનરા રાવણબાણપીડિતાઃ ।
તારાપિતા તાન્નિરુજશ્ચકાર સુષેણનામા ભિષજાં વરિષ્ઠઃ ॥ ૮.૨૨૪॥

તદા મૃતાન્ રાઘવ આનિનાય યમક્ષયાદ્દેવગણાંશ્ચ સર્વશઃ ।
સમન્વજાનાત્પિતરં ચ તત્ર સમાગતં ગન્તુમિયેષ ચાથ ॥ ૮.૨૨૫॥

વિભીષણેનાર્પિતમારુરોહ સ પુષ્પકં તત્સહિતઃ સવાનરઃ ।

પુરીં જગામાઽશુ નિજામયોધ્યાં પુરો હનૂમન્તમથ ન્યયોજયત્ ॥ ૮.૨૨૬॥

દદર્શ ચાસૌ ભરતં હુતાશનં પ્રવેષ્ટુકામં જગદીશ્વરસ્ય ।
અદર્શનાત્તં વિનિવાર્ય રામં સમાગતં ચાસ્ય શશં સ મારુતિઃ ॥ ૮.૨૨૭॥

શ્રુત્વા પ્રમોદોરુભરઃ સ તેન સહૈવ પૌરૈઃ સહિતઃ સમાતૃકઃ ।
શત્રુઘ્નયુક્તોઽભિસમેત્ય રાઘવં નનામ બાષ્પાકુલલોચનાનનઃ ॥ ૮.૨૨૮॥

ઉત્થાપ્ય તં રઘુપતિઃ સસ્વજે પ્રણયાન્વિતઃ ।
શત્રુઘ્નં ચ તદન્યેષુ પ્રતિપેદે યથાવયઃ ॥ ૮.૨૨૯॥

પુરીં પ્રવિશ્ય મુનિભિઃ સામ્રાજ્યે ચાભિષેચિતઃ ।
યથોચિતં ચ સમ્માન્ય સર્વાનાહેદમીશ્વરઃ ॥ ૮.૨૩૦॥

સર્વૈર્ભવદ્ભિઃ સુકૃતં વિધાય દેહં મનોવાક્સહિતં મદીયમ્ ।
લ્ક્ષ્ક્ષ્ક્ષી।એતાવદેવાખિલસદ્વિધેયં યત્કાયવાક્ચિત્તભવં મદર્ચનમ્ ॥ ૮.૨૩૧॥

મુક્તિપ્રદાનાત્પ્રતિકર્તૃતા મે સર્વસ્ય ચાથો ભવતાં ભવેત્ ।
હનૂમતો ન પ્રતિકર્તૃતા સ્યાત્સ્વભાવભક્તસ્ય નિરૌપધં મે ॥ ૮.૨૩૨॥

મદ્ભક્તૌ જ્ઞાનપૂર્તાવનુપધિકબલપ્રોન્નતૌ સ્થૈર્યધૈર્ય
સ્વાભાવ્યાધિક્યતેજઃ સુમતિદમશમેષ્વસ્ય તુલ્યો ન કશ્ચિત્ ।
શેષો રુદ્રઃ સુપર્ણોઽપ્યુરુગુણસમિતૌ નો સહસ્રાં શતુલ્યા
અસ્યેત્યસ્માન્મદૈશં પદમહમમુના સાર્ધમેવોપભોક્ષ્યે ॥ ૮.૨૩૩॥

પૂર્વં જિગાય ભુવનં દશકન્ધરોઽસાવબ્જોદ્ભવસ્ય વરતો નતુ તં કદાચિત્ ।
કશ્ચિજ્જિગાય પુરુહૂતસુતઃ કપિત્વાદ્વિષ્ણોર્વરાદજયદર્જુન એવ ચૈનમ્ ॥ ૮.૨૩૪॥

દત્તો વરો ન મનુજાન્ પ્રતિ વાનરાંશ્ચ ધાત્રાઽસ્ય તેન વિજિતો યુધિ વાલિનૈષઃ ।
અબ્જોદ્ભવસ્ય વરમાશ્વભિભૂય રક્ષો જિગ્યે ત્વહં રણમુખે બલિમાહ્વયન્તમ્ ॥ ૮.૨૩૫॥

બલેર્દ્વારસ્થોઽહં વરમસ્મૈ સમ્પ્રદાય પૂર્વં તુ ।
તેન મયા રક્ષોઽસ્તં યોજનમયુતં પદાઙ્ગુલ્યા ॥ ૮.૨૩૬॥

પુનશ્ચ યુદ્ધાય સમાહ્વયન્તં ન્યપાતયં રાવણમેકમુષ્ટિના ।
મહાબલોઽહં કપિલાખ્યરૂપસ્ત્રિકોટિરૂપઃ પવનશ્ચ મે સુતઃ ॥ ૮.૨૩૭॥

આવાં સ્વશક્ત્યા જયિનાવિતિ સ્મ શિવો વરાન્મેઽજયદેનમેવમ્ ।
જ્ઞાત્વા સુરાજેયમિમં હિ વવ્રે હરો જયેયાહમમું દશાનનમ્ ॥ ૮.૨૩૮॥

અતઃ સ્વભાવાજ્જયિનાવહં ચ વાયુશ્ચ વાયુર્હનુમાન્ સ એષઃ ।

અમુષ્ય હેતોસ્તુ પુરા હિ વાયુના શિવેન્દ્રપૂર્વા અપિ કાષ્ઠવત્કૃતાઃ ॥ ૮.૨૩૯ ॥

અતો હનૂમાન્ પદમેતુ ધાતુર્મદાજ્ઞયા સૃષ્ટ્યવનાદિ કર્મ ।
મોક્ષં ચ લોકસ્ય સદૈવ કુર્વન્મુક્તશ્ચ મુક્તાન્ સુખયન્ પ્રવર્તતામ્ ॥ ૮.૨૪૦ ॥

ભોગાશ્ચ યે યાનિ ચ કર્મજાતાન્યનાદ્યનન્તાનિ મમેહ સન્તિ ।
મદાજ્ઞયા તાન્યખિલાનિ સન્તિ ધાતુઃ પદે તત્સહભોગનામ ॥ ૮.૨૪૧ ॥

એતાદૃશં મે સહભોજનં તે મયા પ્રદત્તં હનુમન્ સદૈવ ।
લ્ક્ષ્ક્ષ્ક્ષીઇ। ઇતીરિતસ્તં હનુમાન્ પ્રણમ્ય જગાદ વાક્યં સ્થિરભક્તિનમ્રઃ ॥ ૮.૨૪૨ ॥

કો ન્વીશ તે પાદસરોજભાજાં સુદુર્લભોઽર્થેષુ ચતુર્ષ્વપીહ ।
તથાઽપિ નાહં પ્રવૃણોમિ ભૂમન્ ભવત્પદામ્ભોજનિષેવણાદૃતે ॥ ૮.૨૪૩ ॥

ત્વમેવ સાક્ષાત્પરમસ્વતન્ત્રસ્ત્વમેવ સાક્ષાદખિલોરુશક્તિઃ ।
ત્વમેવ ચાગણ્યગુણાર્ણવઃ સદા રમાવિરિઞ્ચાદિભિરપ્યશેષૈઃ ॥ ૮.૨૪૪ ॥

સમેત્ય સર્વેઽપિ સદા વદન્તોઽપ્યનન્તકાલાચ્ચ નવૈ સમાપ્નુયુઃ ।
ગુણાં સ્ત્વદીયાન્ પરિપૂર્ણસૌખ્યજ્ઞાનાત્મકસ્ત્વં હિ સદાઽતિશુદ્ધઃ ॥ ૮.૨૪૫ ॥

યસ્તે કથાસેવક એવ સર્વદા સદારતિસ્ત્વય્યચલૈકભક્તિઃ ।
સ જીવમાનો ન પરઃ કથઞ્ચિત્તજ્જીવનં મેઽસ્ત્વધિકં સમસ્તાત્ ॥ ૮.૨૪૬ ॥

પ્રવર્દ્ધતાં ભક્તિરલં ક્ષણેક્ષણે ત્વયીશ મે હ્રાસવિવર્જિતા સદા ।
અનુગ્રહસ્તે મયિ ચૈવમેવ નિરૌપધૌ તૌ મમ સર્વકામઃ ॥ ૮.૨૪૭ ॥

ઇતીરિતસ્તસ્ય દદૌ સ તદ્દ્વયં પદં વિધાતું સકલૈશ્ચ શોભનમ્ ।
સમાશ્લિષચ્ચૈનમથાઽર્દ્રયા ધિયા યથોચિતં સર્વજનાનપૂજયત્ ॥ ૮.૨૪૮ ॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
શ્રીરામચરિતે હનૂમતિ શ્રીરામદયાદાનં નામ અષ્ટમોઽધ્યાયઃ ॥

## અથ નવમોઽધ્યાયઃ ।

(રામસ્વધામપ્રવેશઃ )

ૐ । અથાઽમરાજ્યો ભગવાન્ સ લક્ષ્મણં જગાદ રાજા તરુણો ભવાઽશુ ।
ઇતીરિતસ્ત્વાહ સ લક્ષ્મણો ગુરું ભવત્પદાબ્જાન્ન પરં વૃણોમ્યહમ્ ॥ ૯.૧ ॥

ન માં ભવત્પાદનિષેવણૈકસ્પૃહં તદન્યત્ર નિયોક્તુમર્હતિ ।
નહીદૃશઃ કશ્ચિદનુગ્રહઃ ક્વચિત્તદેવ મે દેહિ તતઃ સદૈવ ॥ ૯.૨ ॥

ઇતીરિતસ્તસ્ય તદેવ દત્ત્વા દૃઢં સમાશ્લિષ્ય ચ રાઘવઃ પ્રભુઃ ।
સ યૌવરાજ્યં ભરતે નિધાય જુગોપ લોકાનખિલાન્ સધર્મકાન્ ॥ ૯.૩॥

પ્રશાસતીશે પૃથિવી બભૂવ વિરિઞ્ચલોકસ્ય સમા ગુણોન્નતૌ ।
જનોઽખિલો વિષ્ણુપરો બભૂવ ન ધર્મહાનિશ્ચ બભૂવ કસ્યચિત્ ॥ ૯.૪॥

ગુણૈશ્ચ સર્વૈરુદિતાશ્ચ સર્વે યથાયથા યોગ્યતયોચ્ચનીચાઃ ।
સમસ્તરોગાદિભિરુજ્ઝિતાશ્ચ સર્વે સહસ્રાયુષ ઊર્જિતા ધનૈઃ ॥ ૯.૫॥

સર્વેઽજરા નિત્યબલોપપન્ના યથેષ્ટસિદ્ધ્યા ચ સદોપપન્નાઃ ।
સમસ્તદોષૈશ્ચ સદા વિહીનાઃ સર્વે સુરૂપાશ્ચ સદા મહોત્સવાઃ ॥ ૯.૬॥

સર્વે મનોવાક્તનુભિઃ સદૈવ વિષ્ણું યજન્તે નતુ કશ્ચિદન્યમ્ ।
સમસ્તરત્નોદ્ભરિતા ચપૃથ્વી યથેષ્ટધાન્યા બહુદુગ્ધગોમતી ॥ ૯.૭॥

સમસ્તગન્ધાશ્ચ સદાઽતિહૃદ્યા રસા મનોહારિણ એવ તત્ર ।
શબ્દાશ્ચ સર્વે શ્રવણાતિહારિણઃ સ્પર્શાશ્ચ સર્વે સ્પર્શેન્દ્રિયપ્રિયાઃ ॥ ૯.૮॥

ન કસ્યચિદ્દુઃખમભૂત્કથઞ્ચિન્ન વિત્તહીનશ્ચ બભૂવ કશ્ચન ।
નાધર્મશીલો ન ચ કશ્ચનાપ્રજો ન દુષ્પ્રજો નૈવ કુભાર્યકશ્ચ ॥ ૯.૯॥

સ્ત્રિયો નચાઽસન્ વિધવાઃ કથઞ્ચિન્ન વૈ પુમાં સો વિધુરા બભૂવુઃ ।
નાનિષ્ટયોગશ્ચ બભૂવ કસ્યચિન્નચેષ્ટહાનિર્નચ પૂર્વમૃત્યુઃ ॥ ૯.૧૦॥

યથેષ્ટમાલ્યાભરણાનુલેપના યથેષ્ટપાનાશનવાસસોઽખિલાઃ ।
બભૂવુરીશે જગતાં પ્રશાસતિ પ્રકૃષ્ટધર્મેણ જનાર્દને નૃપે ॥ ૯.૧૧॥

લ્ક્ષ્ક્ષ્વ્।સ બ્રહ્મરુદ્રમરુદશ્વિદિવાકરાદિમૂર્દ્ધન્યરત્નપરિઘટ્ટિતપાદપીઠઃ ।
નિત્યં સુરૈઃ સહ નરૈરથ વાનરૈશ્ચ સમ્પૂજ્યમાનચરણો રમતે રમેશઃ ॥ ૯.૧૨॥

તસ્યાખિલેશિતુરનાદ્યનુગૈવ લક્ષ્મીઃ સીતાભિધા ત્વરમયત્સ્વરતં સુરેશમ્ ।
નિત્યાવિયોગિપરમોચ્ચનિજસ્વભાવા સૌન્દર્યવિભ્રમસુલક્ષણપૂર્વભાવા ॥ ૯.૧૩॥

રેમે તયા સ પરમઃ સ્વરતોઽપિ નિત્યં નિત્યોન્નતપ્રમદભારભૃતસ્વભાવઃ ।
પૂર્ણોડુરાજસુવિરાજિતસન્નિશાસુ દીપ્યન્નશોકવનિકાસુ સુપુષ્પિતાસુ ॥ ૯.૧૪॥

ગાયન્તિ ચૈનમનુરક્તધિયઃ સુકણ્ઠા ગન્ધર્વચારણગણાઃ સહ ચાપ્સરોભિઃ ।
તં તુષ્ટુવુર્મુનિગણાઃ સહિતાઃ સુરેશૈ રાજાન એનમનુયાન્તિ સદાઽપ્રમત્તાઃ ॥ ૯.૧૫॥

એવં ત્રયોદશસહસ્રમસૌ સમાસ્તુ પૃથ્વીં રરક્ષ વિજિતારિરમોઘવીર્યઃ ।

આનન્દમિન્દુરિવ સન્દધદિન્દિરેશો લોકસ્ય સાન્દ્રસુખવારિધિરપ્રમેયઃ ॥ ૯.૧૬॥

દેવ્યાં સ ચાજનયદિન્દ્રહુતાશનૌ દ્વૌ પુત્રૌ યમૌ કુશલવૌ બલિનૌ ગુણાઢ્યૌ ।
શત્રુઘ્નતો લવણમુદ્ધણબાણદગ્ધં કૃત્વા ચકાર મધુરાં પુરમુગ્રવીર્યઃ ॥ ૯.૧૭॥

કોટિત્રયં સ નિજઘાન તથાઽસુરાણાં ગન્ધર્વજન્મ ભરતેન સતાં ચ ધર્મમ્ ।
સં શિક્ષયન્નયજદુત્તમકલ્પકૈઃ સ્વં યજ્ઞૈર્ભવાજમુખસત્સચિવાશ્ચ યત્ર ॥ ૯.૧૮॥

અથ શૂદ્રતપશ્ચર્યાનિહતં વિપ્રપુત્રકમ્ ।
ઉજ્જીવયામાસ વિભુર્હત્વા તં શૂદ્રતાપસમ્ ॥ ૯.૧૯॥

જઙ્ઘનામાઽસુરઃ પૂર્વં ગિરિજાવરદાનતઃ ।
બભૂવ શૂદ્રઃ કલ્પાયુઃ સ લોકક્ષયકામ્યયા ।
તપશ્ચચાર દુર્બુદ્ધિરિચ્છન્માહેશ્વરં પદમ્ ॥ ૯.૨૦॥

અનન્યવધ્યં તં તસ્માજ્જઘાન પુરુષોત્તમઃ ।
શ્વેતદત્તાં તથા માલામગસ્ત્યાદાપ રાઘવઃ ॥ ૯.૨૧॥

અનન્નયજ્ઞકૃચ્છ્વેતો રાજા ક્ષુદ્વિનિવર્તનમ્ ।
કુર્વન્ સ્વમાં સૈર્ધાત્રોક્તો માલાં રામાર્થમર્પયત્ ।
અગસ્ત્યાય ન સાક્ષાત્તુ રામે દદ્યાદયં નૃપઃ ॥ ૯.૨૨॥

લ્ક્ષ્ક્ષ્વ।ક્ષુદભાવમાત્રફલદં ન સાક્ષાદ્રાઘવેઽર્પિતમ્ ।
ક્ષુદભાવમાત્રમાકાઙ્ક્ષન્મામસૌ પરિપૃચ્છતિ ॥ ૯.૨૩॥

વ્યવધાનતસ્તતો રામે દદ્યાચ્છ્વેત ઇતિ પ્રભુઃ ।
મત્વા બ્રહ્માઽદિશન્માલાં પ્રદાતું કુમ્ભયોનયે ॥ ૯.૨૪॥

તામગસ્ત્યકરપલ્લવાર્પિતાં ભક્ત એષ મમ કુમ્ભસમ્ભવઃ ।
ઇત્યવેત્ય જગૃહે જનાર્દનસ્તેન સં સ્તુત ઉપાગમત્પુરમ્ ॥ ૯.૨૫॥

અથ કેચિદાસુરસુરાઃ સુરાણકા ઇત્યુરુપ્રથિતપૌરુષાઃ પુરા ।
તે તપઃ સુમહદાસ્થિતા વિભું પદ્મસમ્ભવમવેક્ષ્ય ચોચિરે ॥ ૯.૨૬॥

ભૂરિપાપકૃતિનોઽપિ નિશ્ચયાન્મુક્તિમાપ્નુમ ઉદારસદ્ગુણ ।
ઇત્યુદીરિતમજોઽવધાર્ય તત્પ્રાહ ચ પ્રહસિતાનનઃ પ્રભુઃ ॥ ૯.૨૭॥

યાવદેવ રમયા રમેશ્વરં નો વિયોજયથ સદ્ગુણાર્ણવમ્ ।
તાવદુચ્ચમપિ દુષ્કૃતં ભવન્મોક્ષમાર્ગપરિપન્થિ નો ભવેત્ ॥ ૯.૨૮॥

ઇત્યુદીરિતમવેત્ય તેઽસુરાઃ ક્ષિપ્રમોક્ષગમનોત્સુકાઃ ક્ષિતૌ ।

સાધનોપચયકાઙ્ક્ષિણો હરૌ શાસતિ ક્ષિતિમશેષતોઽભવન્ ॥ ૯.૨૯॥

તાનનાદિકૃતદોષસઞ્ચયૈર્મોક્ષમાર્ગગતિયોગ્યતોજ્ઝિતાન્ ।
મૈથિલસ્ય તનયા વ્યચાલયન્માયયા સ્વતનુવા સ્વમાર્ગતઃ ॥ ૯.૩૦॥

આજ્ઞયૈવ હિ હરેસ્તુ માયયા મોહિતાસ્તુ દિતિજા વ્યનિન્દયન્ ।
રાઘવં નિશિચરાહૃતાં પુનર્જાનકીં જગૃહ ઇત્યનેકશઃ ॥ ૯.૩૧॥

બ્રહ્મવાક્યમૃતમેવ કારયન્ પાતયં સ્તમસિ ચાન્ધ આસુરાન્ ।
નિત્યમેવ સહિતોઽપિ સીતયા સોઽજ્ઞસાક્ષિકમભૂદ્વિયુક્તવત્ ॥ ૯.૩૨॥

તેન ચાન્ધતમ ઈયુરાસુરા યજ્ઞમાહ્વયદસૌ ચ મૈથિલીમ્ ।
તત્ર ભૂમિશપથચ્છલાન્નૃણાં દૃષ્ટિમાર્ગમપહાય સા સ્થિતા ॥ ૯.૩૩॥

ગુરું હિ જગતો વિષ્ણુર્બ્રહ્માણમસૃજત્સ્વયમ્ ।
લ્ક્ષ્ક્ષ્વી।તેન તદ્વચનં સત્સુ નાનૃતં કુરુતે ક્વચિત્ ॥ ૯.૩૪॥

નાસત્સ્વપ્યનૃતં કુર્યાદ્વચનં પારલૌકિકમ્ ।
ઐહિકં ત્વસુરેષ્વેવ ક્વચિદ્ધન્તિ જનાર્દનઃ ॥ ૯.૩૫॥

નિજાધિક્યસ્ય વિજ્ઞપ્ત્યૈ ક્વચિદ્વાયુસ્તદાજ્ઞયા ।
હન્તિ બ્રહ્મત્વમાત્મીયમદ્ધા જ્ઞાપયિતું પ્રભુઃ ॥ ૯.૩૬॥

નાન્યઃ કશ્ચિત્તદ્વરાણાં શાપાનામપ્યતિક્રમી ।
અયોગ્યેષુ તુ રુદ્રાદિવાક્યં તૌ કુરુતો મૃષા ।
એકદેશેન સત્યં તુ યોગ્યેષ્વપિ કદાચન ॥ ૯.૩૭॥

ન વિષ્ણોર્વચનં ક્વાપિ મૃષા ભવતિ કસ્યચિત્ ।
એતદર્થોઽવતારશ્ચ વિષ્ણોર્ભવતિ સર્વદા ॥ ૯.૩૮॥

પ્રવિશ્ય ભૂમૌ સા દેવી લોકદૃષ્ટ્યનુસારતઃ ।
રેમે રામેણાવિયુક્તા ભાસ્કરેણ પ્રભા યથા ॥ ૯.૩૯॥

એવં રમાલાલ્। ઇતપાદપલ્લવઃ પુનઃ સ યજ્ઞૈશ્ચ યજન્ સ્વમેવ ।
વરાશ્વમેધાદિભિરાપ્તકામો રેમેઽભિરામો નૃપતીન્ વિશિક્ષયન્ ॥ ૯.૪૦॥

રામસ્ય દૃશ્યા ત્વન્યેષામદૃશ્યા જનકાત્મજા ।
ભૂમિપ્રવેશાદૂર્ધ્વં સા રેમે સપ્તશતં સમાઃ ॥ ૯.૪૧॥

એવં વિધાન્યગણિતાનિ જનાર્દનસ્ય રામાવતારચરિતાનિ તદન્યપુમ્ભિઃ ।
શક્યાનિ નૈવ મનસાઽપિ હિ તાનિ કર્તું બ્રહ્મેશશેષપુરુહૂતમુખૈઃ સુરૈશ્ચ ॥ ૯.૪૨॥

તસ્યૈવમબ્જભવલોકસમામિમાં ક્ષ્માં કૃત્વાઽનુશાસત ઉદીક્ષ્ય ગુણાન્ ધરાયાઃ ।
વૈશેષ્યમાત્મસદનસ્ય હિ કાઙ્ક્ષમાણા વૃન્દારકાઃ કમલજં પ્રતિ તચ્છશં સુઃ ॥ ૯.૪૩॥

આમન્ત્ર્ય તૈઃ સહ વિભુર્ભગવત્પ્રયાણં સ્વીયાય સદ્મન ઇયેષ દિદેશ ચૈવ ।
રુદ્રં સ્વલોકગમનાય રઘૂત્તમસ્ય સમ્પ્રાર્થને સ ચ સમેત્ય વિભું યયાચે ॥ ૯.૪૪॥

એકાન્તમેત્ય રઘુપેણ સમસ્તકાલો રુદ્રો જગાદ વચનં જગતો વિધાતુઃ ।
વૈશેષ્યમાત્મભવનસ્ય હિ કાઙ્ક્ષમાણાસ્ત્વામર્થયન્તિ વિબુધાઃ સહિતા વિધાત્રા ॥ ૯.૪૫॥

લ્ક્ષ્ક્ષ્ક્ષ્વીઇ।પુત્રસ્તવેશ કમલપ્રભવસ્તથાઽહં પૌત્રસ્તુ પૌત્રકવચો યદપિ હ્યયોગ્યમ્ ।
સમ્ભાવયન્તિ ગુણિનસ્તદહં યયાચે ગન્તું સ્વસદ્મ નતિપૂર્વમિતો ભવન્તમ્ ॥ ૯.૪૬॥

યત્કાર્યસાધનકૃતે વિબુધાર્થિતસ્ત્વં પ્રાદુશ્ચકર્થ નિજરૂપમશેષમેવ ।
તત્સાધિતં હિ ભવતા તદિતઃ સ્વધામ ક્ષિપ્રં પ્રયાહિ હર્ષં વિબુધેષુ કુર્વન્ ॥ ૯.૪૭॥

ઓમિત્યુવાચ ભગવાં સ્તદશેષમેવ શ્રુત્વા રહસ્યથ તનુસ્ત્વપરા હરસ્ય ।
દુર્વાસનામયુગિહાઽગમદાશુ રામ માં ભોજય ક્ષુધિતમિત્યસકૃદ્બ્રુવાણા ॥ ૯.૪૮॥

સિદ્ધં ન દેયમથ સાધ્યમપીતિ વાચં શ્રુત્વાઽસ્ય વાક્સમયજાતમુરુ સ્વહસ્તાત્ ।
અન્નં ચતુર્ગુણમદાદમૃતોપમાનં રામસ્તદાપ્ય બુભુજેઽથ મુનિઃ સુતુષ્ટઃ ॥ ૯.૪૯॥

તૃપ્તો યયૌ ચ સકલાન્ પ્રતિ કોપયાનઃ કશ્ચિન્ન મેઽર્થિતવરં પ્રતિદાતુમીશઃ ।
એવમ્પ્રતિજ્ઞક ઋષિઃ સ હિ તત્પ્રતિજ્ઞાં મોઘાં ચકાર ભગવાન્નતુ કશ્ચિદન્યઃ ॥ ૯.૫૦॥

કુન્તી તુ તસ્ય હિ મુનેર્વરતોઽજયત્તુ રામઃ સ કૃષ્ણતનુવા સ્વબલાજ્જિગાય ।
તસ્મિઞ્છિવે પ્રતિગતે મુનિરૂપકે ચ યાહીતિ લક્ષ્મણમુવાચ રમાપતિઃ સઃ ॥ ૯.૫૧॥

એકાન્તે તુ યદા રામશ્ચક્રે રુદ્રેણ સં વિદમ્ ।
દ્વારપાલં સ કૃતવાં સ્તદા લક્ષ્મણમેવ સઃ ॥ ૯.૫૨॥

યદ્યત્ર પ્રવિશેત્કશ્ચિદ્ધન્મિ ત્વેતિ વચો બ્રુવન્ ।
તદન્તરાઽગતમૃષિં દૃષ્ટ્વાઽમન્યત લક્ષ્મણઃ ॥ ૯.૫૩॥

દુર્વાસસઃ પ્રતિજ્ઞા તુ રામં પ્રાપ્યૈવ ભજ્યતામ્ ।
અન્યથા ત્વયશો રામે કરોત્યેષ મુનિર્ધ્રુવમ્ ॥ ૯.૫૪॥

રાઘવો ઘ્નન્નપિ તુ માં કરોત્યેવ દયાં મયિ ।
ઇતિ મત્વા દદૌ માર્ગં સ તુ દુર્વાસસે તદા ॥ ૯.૫૫॥

સ્વલોકગમનાકાઙ્ક્ષી સ્વયમેવ તુ રાઘવઃ ।

ઇયં પ્રતિજ્ઞા હેતુઃ સ્યાદિતિ હન્મીતિ સોઽકરોત્ ॥ ૯.૫૬॥

અત્યન્તબન્ધુનિધનં ત્યાગ એવેતિ ચિન્તયન્ ।
લ્ક્ષ્ક્ષ્ક્ષ્।યાહિ સ્વલોકમચિરાદિત્યુવાચ સ લક્ષ્મણમ્ ॥ ૯.૫૭॥

ઇત્યુક્તઃ સ યયૌ જગદ્ભવભયધ્વાન્તચ્છિદં રાઘવં
ધ્યાયન્નાપ ચ તત્પદં દશશતૈર્યુક્તો મુખામ્ભોરુહૈઃ ।
આસીચ્છેષમહાફણી મુસલભૃદ્દિવ્યાકૃતિર્લાઙ્ગલી
પર્યઙ્કત્વમવાપ યો જલનિધૌ વિષ્ણોઃ શયાનસ્ય ચ ॥ ૯.૫૮॥

અથ રાઘવઃ સ્વભવનોપગતૌ વિદધે મતિં સહ જનૈરખિલૈઃ ।
સમઘોષયચ્ચ ય ઇહેચ્છતિ તત્પદમક્ષયં સપદિ મૈત્વિતિસઃ ॥ ૯.૫૯॥

શ્રુત્વા તુ તદ્ધ ઇહ મોક્ષપદેચ્છવસ્તે સર્વે સમાયયુરથાઽતૃણમાપિપીલમ્ ।
રામાજ્ઞયા ગમનશક્તિરભૂત્તૃણાદેર્યે તત્ર દીર્ઘભવિનો નહિ તે તદૈચ્છન્ ॥ ૯.૬૦॥

સં સ્થાપયામાસ કુશં સ્વરાજ્યે તૈઃ સાકમેવ ચ લવં યુવરાજમીશઃ ।
સં સ્થાપ્ય વાલિતનયં કપિરાજ્ય આશુ સૂર્યાત્મજોઽપિ રઘુવીરસમીપમાયાત્ ॥ ૯.૬૧॥

અથાઽહ વાયુનન્દનં સ રાઘવઃ સમાશ્લિષન્ ।
તવાહમક્ષગોચરઃ સદા ભવામિ નાન્યથા ॥ ૯.૬૨॥

ત્વયા સદા મહત્તપઃ સુકાર્યમુત્તમોત્તમમ્ ।
તદેવ મે મહત્પ્રિયં ચિરં તપસ્ત્વયા કૃતમ્ ॥ ૯.૬૩॥

દશાસ્યકુમ્ભકર્ણકૌ યથા સુશક્તિમાનપિ ।
જઘન્થ ન પ્રિયાય મે તથૈવ જીવ કલ્પકમ્ ॥ ૯.૬૪॥

પયોબ્ધિમધ્યગં ચ મે સુસદ્મ ચાન્યદેવ વા ।
યથેષ્ટતો ગમિષ્યસિ સ્વદેહસં યુતોઽપિ સન્ ॥ ૯.૬૫॥

યથેષ્ટભોગસં યુતઃ સુરેશગાયકાદિભિઃ ।
સમીડ્યમાનસદ્યશા રમસ્વ મત્પુરઃ સદા ॥ ૯.૬૬॥

તવેપ્સિતં ન કિઞ્ચન ક્વચિત્કુતશ્ચિદેવ વા ।
મૃષા ભવેત્પ્રિયશ્ચ મે પુનઃ પુનર્ભવિષ્યસિ ॥ ૯.૬૭॥

ઇતીરિતો મરુત્સુતો જગાદ વિશ્વનાયકમ્ ।
ક્ષ્ય્।વિધેહિ પાદપઙ્કજે તવેશ ભક્તિમુત્તમામ્ ॥ ૯.૬૮॥

સદા પ્રવર્દ્ધમાનયા તયા રમેઽહમઞ્જસા ।

સમસ્તજીવસઞ્ચયાત્સદાઽધિકા હિ મેઽસ્તુ સા ॥ ૯.૬૯॥

નમો નમો નમો નમો નતોઽસ્મિ તે સદા પદમ્ ।
સમસ્તસદ્ગુણોચ્છ્રિતં નમામિ તે પદં પુનઃ ॥ ૯.૭૦॥

ઇતીરિતે તથેતિ તં જગાદ પુષ્કરેક્ષણઃ ।
જગામ ધામ ચાઽત્મનસ્તૃણાદિના સહૈવ સઃ ॥ ૯.૭૧॥

ખગા મૃગાસ્તૃણાદયઃ પિપીલિકાશ્ચ ગર્દભાઃ ।
તદાઽસુરુત્તમા યતો નૃવાનરાસ્તુ કિં પુનઃ ॥ ૯.૭૨॥

સદૈવ રામભાવનાઃ સદા સુતત્ત્વવેદિનઃ ।
યતોઽભવં સ્તતસ્તુ તે યયુઃ પદં હરેસ્તદા ॥ ૯.૭૩॥

સ તૈઃ સમાવૃતો વિભુર્યયૌ દિશં તદોત્તરામ્ ।
અનન્તસૂર્યદીધિતિર્દુરન્તસદ્ગુણાર્ણવઃ ॥ ૯.૭૪॥

સહસ્રસૂર્યમણ્ડલજ્વલત્કિરીટમૂર્દ્ધજઃ ।
સુનીલકુન્તલ્. આવૃતામિતેન્દુકાન્તસન્મુખઃ ॥ ૯.૭૫॥

સુરક્તપદ્મલોચનઃ સુવિદ્યુદાભકુણ્ડલઃ ।
સુહાસવિદ્રુમાધરઃ સમસ્તવેદવાગ્રસઃ ॥ ૯.૭૬॥

દિવાકરૌઘકૌસ્તુભપ્રભાસકોરુકન્ધરઃ ।
સુપીવરોન્નતોરુસજ્જગદ્ભરાં સયુગ્મકઃ ॥ ૯.૭૭॥

સુવૃત્તદીર્ઘપીવરોલ્લસદ્ભુજદ્વયાઙ્કિતઃ ।
જગદ્વિમથ્ય સમ્ભૃતઃ શરોઽસ્ય દક્ષિણે કરે ॥ ૯.૭૮॥

સ્વયં સ તેન નિર્મિતો હતૌ મધુશ્ચ કૈટભઃ ।
શરેણ તેન વિષ્ણુના દદૌ ચ લક્ષ્મણાનુજે ॥ ૯.૭૯॥

ક્ષ્ચિ।સ શત્રુસૂદનોઽવધીન્મધોઃ સુતં રસાહ્વયમ્ ।
શરેણ યેન ચાકરોત્પુરીં ચ માધુરાભિધામ્ ॥ ૯.૮૦॥

સમસ્તસારસમ્ભવં શરં દધાર તં કરે ।
સ વામબાહુના ધનુર્દધાર શાર્ઙ્ગસંજ્ઞિતમ્ ॥ ૯.૮૧॥

ઉદારબાહુભૂષણઃ શુભાઙ્ગદઃ સકઙ્કણઃ ।
મહાઙ્ગુલીયભૂષિતઃ સુરક્તસત્કરામ્બુજઃ ॥ ૯.૮૨॥

અનર્ઘરત્નમાલયા વનાખ્યયા ચમાલયા ।
વિલાસિવિસ્તૃતોરસા બભાર ચ શ્રિયં પ્રભુઃ ॥ ૯.૮૩॥

સ ભૂતિવત્સભૂષણસ્તનૂદરે વલિત્રયી ।
ઉદારમધ્યભૂષણોલ્લસત્તટિત્પ્રભામ્બરઃ ॥ ૯.૮૪॥

કરીન્દ્રસત્કરોરુયુક્સુવૃત્તજાનુમણ્ડલઃ ।
ક્રમાલ્પવૃત્તજઙ્ઘકઃ સુરક્તપાદપલ્લવઃ ॥ ૯.૮૫॥

લસદ્ધરિન્મણિદ્યુતી રરાજ રાઘવોઽધિકમ્ ।
અસઙ્ખ્યસત્સુખાર્ણવઃ સમસ્તશક્તિસત્તનુઃ ॥ ૯.૮૬॥

જ્ઞાનં નેત્રાબ્જયુગ્માન્મુખવરકમલાત્સર્વવેદાર્થસારં
સ્તન્વા બ્રહ્માણ્ડબાહ્યાન્તરમધિકરુચા ભાસયન્ ભાસુરાસ્યઃ ।
સર્વાભીષ્ટાભયે ચ સ્વકરવરયુગેનાર્થિનામાદધાનઃ
પ્રાયાદ્દેવાધિદેવઃ સ્વપદમભિમુખશ્ચોત્તરાશાં વિશોકામ્ ॥ ૯.૮૭॥

દધ્રે છત્રં હનૂમાન્ સ્રવદમૃતમયં પૂર્ણચન્દ્રાયુતાભં
સીતા સૈવાખિલાક્ષણાં વિષયમુપગતા શ્રીરિતિ હ્રીરથૈકા ।
દ્વેધા ભૂત્વા દધાર વ્યજનમુભયતઃ પૂર્ણચન્દ્રાં શુગૌરં
પ્રોદ્યદ્ભાસ્વત્પ્રભાભા સકલગુણતનુર્ભૂષિતા ભૂષણૈઃ સ્વૈઃ ॥ ૯.૮૮॥

સાક્ષાચ્ચક્રતનુસ્તથૈવ ભરતશ્ચક્રં દધદ્દક્ષિણે
નાડયાત્સવ્યત એવ શઙ્ખવરભૃચ્છઙ્ખાત્મકઃ શત્રુહા ।
અગ્રે બ્રહ્મપુરોગમાઃ સુરગણા વેદાશ્ચ સોઙ્કારકાઃ
પશ્ચાત્સર્વજગજ્જગામ રઘુપં યાન્તં નિજં ધામ તમ્ ॥ ૯.૮૯॥

ક્ષ્મી।તસ્ય સૂર્યસુતપૂર્વવાનરા દક્ષિણેન મનુજાસ્તુ સવ્યતઃ ।
રામજન્મચરિતાનિ તસ્ય તે કીર્તયન્ત ઉચ્ચૈર્દ્રુતં યયુઃ ॥ ૯.૯૦॥

ગન્ધર્વૈર્ગીયમાનો વિબુધમુનિગણૈરબ્જસમ્ભૂતિપૂર્વૈ
ર્વેદોદારાર્થવાગ્ભિઃ પ્રણિહિતસુમનઃ સર્વદા સ્તૂયમાનઃ ।
સર્વૈર્ભૂતૈશ્ચ ભક્ત્યા સ્વનિમિષનયનૈઃ કૌતુકાદ્વીક્ષ્યમાણઃ
પ્રાયાચ્છેષગરુત્મદાદિકનિજૈઃ સં સેવિતઃ સ્વં પદમ્ ॥ ૯.૯૧॥

બ્રહ્મરુદ્રગરુડૈઃ સશેષકૈઃ પ્રોચ્યમાનસુગુણોરુવિસ્તરઃ ।
આરુરોહ વિભુરમ્બરં શનૈસ્તે ચ દિવ્યવપુષોઽભવં સ્તદા ॥ ૯.૯૨॥

અથ બ્રહ્મા હરિં સ્તુત્વા જગાદેદં વચો વિભુમ્ ।

ત્વદાજ્ઞયા મયા દત્તં સ્થાનં દશરથસ્ય હિ ॥ ૯.૯૩॥

માતૃણાં ચાપિ તલ્લોકસ્ત્વયુતાબ્દાદિતોઽગ્રતઃ ।
અનર્હાયાસ્ત્વયાઽઽપ્તા કૈકેય્યા અપિ સદ્ગતિઃ ।
સૂત્વા તુ ભરતં નૈષા ગચ્છેત નિરયાનિતિ ॥ ૯.૯૪॥

તથાઽપિ સા યદાવેશાચ્ચકાર ત્વય્યશોભનમ્ ।
નિકૃતિર્નામ સા ક્ષિપ્તા મયા તમસિ શાશ્વતે ॥ ૯.૯૫॥

કૈકયી તુ ચલાન્ લોકાન્ પ્રાપ્તા નૈવાચલાન્ ક્વચિત્ ।
પશ્ચાદ્ભક્તિમતી યસ્માત્ત્વયિ સા યુક્તમેવ તત્ ॥ ૯.૯૬॥

મન્થરા તુ તમસ્યન્ધે પાતિતા દુષ્ટચારિણી ।
સીતાર્થં યેઽપ્યનિન્દં સ્ત્વાં તેઽપિ યાતા મહત્તમઃ ॥ ૯.૯૭॥

પ્રાયશો રાક્ષસાશ્ચૈવ ત્વયિ કૃષ્ણત્વમાગતે ।
શેષા યાસ્યન્તિ તચ્છેષા અષ્ટાવિં શે કલૌ યુગે ।
ગતે ચતુસ્સહસ્રાબ્દે તમોગાસ્ત્રિશતોત્તરે ॥ ૯.૯૮॥

અથ યે ત્વત્પદામ્ભોજમકરન્દૈકલિપ્સવઃ ।
ત્વયા સહાઽગતાસ્તેષાં વિધેહિ સ્થાનમુત્તમમ્ ॥ ૯.૯૯॥

ક્ષ્યીઇઽહં ભવઃ સુરેશાદ્યાઃ કિઙ્કરાઃ સ્મ તવેશ્વર ।
યચ્ચ કાર્યમિહાસ્માભિસ્તદપ્યાજ્ઞાપયાઽશુ નઃ ॥ ૯.૧૦૦॥

ઇત્યુદીરિતમાકર્ણ્ય શતાનન્દેન રાઘવઃ ।
જગાદ ભાવગમ્ભીરસુસ્મિતાધરપલ્લવઃ ॥ ૯.૧૦૧॥

જગદ્ગુરુત્વમાદિષ્ટં મયા તે કમલોદ્ભવ ।
ગુર્વાદિશાનુસારેણ મયાઽદિષ્ટા ચ સદ્ગતિઃ ॥ ૯.૧૦૨॥

અતસ્ત્વયા પ્રદેયા હિ લોકા એષાં મદાજ્ઞયા ।
હૃદિ સ્થિતં ચ જાનાસિ ત્વમેવૈકઃ સદા મમ ॥ ૯.૧૦૩॥

ઇતીરિતો હરેર્ભાવવિજ્ઞાની કઞ્જસમ્ભવઃ ।
પિપીલિકાતૃણાન્તાનાં દદૌ લોકાનનુત્તમાન્ ।
વૈષ્ણવાન્ સન્તતત્વાચ્ચ નામ્ના સાન્તાનિકાન્ વિભુઃ ॥ ૯.૧૦૪॥

તે જરામૃતિહીનાશ્ચ સર્વદુઃખવિવર્જિતાઃ ।
સં સારમુક્તા ન્યવસં સ્તત્ર નિત્યસુખાધિકાઃ ॥ ૯.૧૦૫॥

યે તુ દેવા ઇહોદ્ભૂતા નૃવાનરશરીરિણઃ ।
તે સર્વે સ્વાં શિતામાપુસ્તમૈન્દવિવિદાવૃતે ॥ ૯.૧૦૬॥

અસુરાવેશતસ્તૌ તુ ન રામમનુજગ્મતુઃ ।
પીતામૃતૌ પુરા યસ્માન્મમ્રતુર્નચ તૌ તદા ॥ ૯.૧૦૭॥

તયોશ્ચ તપસા તુષ્ટશ્ચક્રે તાવજરામરૌ ।
પુરા સ્વયમ્ભૂસ્તેનોભૌ દર્પાદમૃતમન્થને ।
પ્રસં હ્યાપિબતાં દેવૈર્દેવાં શત્વાદુપેક્ષિતૌ ॥ ૯.૧૦૮॥

પીતામૃતેષુ દેવેષુ યુદ્ધ્યમાનેષુ દાનવૈઃ ।
તૈર્દત્તમાત્મહસ્તે તે રક્ષાયૈ પીતમાશુ તત્ ।
તસ્માદ્દોષાદાપતુસ્તાવાસુરં ભાવમૂર્જિતમ્ ॥ ૯.૧૦૯॥

અઙ્ગદઃ કાલતસ્ત્યક્ત્વા દેહમાપ નિજાં તનુમ્ ।
રામાજ્ઞયૈવ કુર્વાણો રાજ્યં કુશસમન્વિતઃ ॥ ૯.૧૧૦॥

ક્ષ્ચિવ્। વિભીષણશ્ચ ધર્માત્મા રાઘવાજ્ઞાપુરસ્કૃતઃ ।
સેનાપતિર્ધનેશસ્ય કલ્પમાવીત્સ રાક્ષસાન્ ॥ ૯.૧૧૧॥

રામાજ્ઞયા જામ્બવાંશ્ચ ન્યવસત્પૃથિવીતલ્। એ ।
ઉત્પત્ત્યર્થં જામ્બવત્યાસ્તદર્થં સુતપશ્ચરન્ ॥ ૯.૧૧૨॥

અથો રઘૂણાં પ્રવરઃ સુરાર્ચિતઃ સ્વયૈકતન્વા ન્યવસત્સુરાલયે ।
દ્વિતીયયા બ્રહ્મસદસ્યધીશ્વરસ્તેનાર્ચિતોઽથાપરયા નિજાલયે ॥ ૯.૧૧૩॥

તૃતીયરૂપેણ નિજં પદં પ્રભું વ્રજન્તમુચ્ચૈરનુગમ્ય દેવતાઃ ।
અગમ્યમર્યાદમુપેત્ય ચ ક્રમાદ્વિલોકયન્તોઽતિવિદૂરતોઽસ્તુવન્ ॥ ૯.૧૧૪॥

બ્રહ્મા મરુન્મારુતસૂનુરીશઃ શેષો ગરુત્માન્ હરિજઃ શક્રકાદ્યાઃ ।
ક્રમાદનુવ્રજ્ય તુ રાઘવસ્ય શિરસ્યથાઽજ્ઞાં પ્રણિધાય નિર્યયુઃ ॥ ૯.૧૧૫॥

સ્વં સ્વં ચ સર્વે સદનં સુરા યયુઃ પુરન્દરાદ્યાશ્ચ વિરિઞ્ચપૂર્વકાઃ ।
મરુત્સુતોઽથો બદરીમવાપ્ય નારાયણસ્યૈવ પદં સિષેવે ॥ ૯.૧૧૬॥

સમસ્તશાસ્ત્રોદ્ભરિતં હરેર્વચો મુદા તદા શ્રોત્રપુટેન સમ્ભરન્ ।
વદંશ્ચ તત્ત્વં વિબુધર્ષભાણાં સદા મુનીનાં ચ સુખં હ્યુવાસ ॥ ૯.૧૧૭॥

રામાજ્ઞયા કિમ્પુરુષેષુ રાજ્યં ચકાર રૂપેણ તથાઽપરેણ ।
રૂપૈસ્તથાઽન્યૈશ્ચ સમસ્તસદ્મન્યુવાસ વિષ્ણોઃ સતતં યથેષ્ટમ્ ॥ ૯.૧૧૮॥

ઇત્થં સ ગાયચ્છતકોટિવિસ્તરં રામાયણં ભારતપઞ્ચરાત્રમ્ ।
વેદાંશ્ચ સર્વાન્ સહિતબ્રહ્મસૂત્રાન્ વ્યાચક્ષાણો નિત્યસુખોદ્ભરોઽભૂત્ ॥ ૯.૧૧૯॥

રામોઽપિ સાર્દ્ધં પવમાનાત્મજેન સ સીતયા લક્ષ્મણપૂર્વકૈશ્ચ ।
તથા ગરુત્મત્પ્રમુખૈશ્ચ પાર્ષદૈઃ સં સેવ્યમાનો ન્યવસત્પયોબ્ધૌ ॥ ૯.૧૨૦॥

કદાચિદીશઃ સકલાવતારાનેકં વિધાયાહિપતૌ ચ શેતે ।
પૃથક્ચ્ય સં વ્યૂહ્ય કદાચિદિચ્છયા રેમે રમેશોઽમિતસદ્ગુણાર્ણવઃ ॥ ૯.૧૨૧॥

ઇત્યશેષપુરાણેભ્યઃ પઞ્ચરાત્રેભ્ય એવ ચ ।
ક્ષ્ચ્વ્। ભારતાચ્ચૈવ વેદેભ્યો મહારામાયણાદપિ ॥ ૯.૧૨૨॥

પરસ્પરવિરોધસ્ય હાનાન્નિર્ણીય તત્ત્વતઃ ।
યુક્ત્યા બુદ્ધિબલાચ્ચૈવ વિષ્ણોરેવ પ્રસાદતઃ ॥ ૯.૧૨૩॥

બહુકલ્પાનુસારેણ મયેયં સત્કથોદિતા ।
નૈકગ્રન્થાશ્રયાત્તસ્માન્નાઽશઙ્ક્યાઽત્ર વિરુદ્ધતા ॥ ૯.૧૨૪॥

ક્વચિન્મોહાયાસુરાણાં વ્યત્યાસઃ પ્રતિલોમતા ।
ઉક્તા ગ્રન્થેષુ તસ્માદ્ધિ નિર્ણયોઽયં કૃતો મયા ॥ ૯.૧૨૫॥

એવં ચ વક્ષ્યમાણેષુ નૈવાઽશઙ્ક્યા વિરુદ્ધતા ।
સર્વકલ્પસમશ્ચાયં પારાવર્યક્રમઃ સદા ॥ ૯.૧૨૬॥

પું વ્યત્યાસેન ચોક્તિઃ સ્યાત્પુરાણાદિષુ કુત્રચિત્ ।
કૃષ્ણામાહ યથા કૃષ્ણો ધનઞ્જયશરૈર્હતાન્ ।
શતં દુર્યોધનાદીં સ્તે દર્શયિષ્ય ઇતિ પ્રભુઃ ॥ ૯.૧૨૭॥

ભીમસેનહતાસ્તે હિ જ્ઞાયન્તે બહુવાક્યતઃ ।
વિસ્તારે ભીમનિહતાઃ સઙ્ક્ષેપેઽર્જુનપાતિતાઃ ।
ઉચ્યન્તે બહવશ્ચાન્યે પું વ્યત્યાસસમાશ્રયાત્ ॥ ૯.૧૨૮॥

વિસ્તારે કૃષ્ણનિહતા બલભદ્રહતા ઇતિ ।
ઉચ્યન્તે ચ ક્વચિત્કાલવ્યત્યાસોઽપિ ક્વચિદ્ભવેત્ ॥ ૯.૧૨૯॥

યથા સુયોધનં ભીમઃ પ્રાહસત્કૃષ્ણસન્નિધૌ ।
ઇતિ વાક્યેષુ બહુષુ જ્ઞાયતે નિર્ણયાદપિ ।
અનિર્ણયે તુ કૃષ્ણસ્ય પૂર્વમુક્તા ગતિસ્તતઃ ॥ ૯.૧૩૦॥

વ્યત્યાસાસ્ત્વેવમાદ્યાશ્ચ પ્રાતિલોમ્યાદયસ્તથા ।

દૃશ્યન્તે ભારતાદ્યેષુ લક્ષણગ્રન્થતશ્ચ તે ।
જ્ઞાયન્તે બહુભિર્વાક્યૈર્નિર્ણયગ્રન્થતસ્તથા ॥ ૯.૧૩૧॥

તસ્માદ્વિનિર્ણયગ્રન્થાનાશ્રિત્યૈવ ચ લક્ષણમ્ ।
બહુવાક્યાનુસારેણ નિર્ણયોઽયં મયા કૃતઃ ॥ ૯.૧૩૨॥

ક્ષ્ચિ્વ । ઉક્તં લક્ષણશાસ્ત્રે ચ કૃષ્ણદ્વૈપાયનોદિતે ।
“ત્રિભાષા યોન જાનાતિ રીતીનાં શતમેવ ચ ॥ ૯.૧૩૩॥

વ્યત્યાસાદીન્ સપ્ત ભેદાન્ વેદાદ્યર્થં તથા વદેત્ ।
સ યાતિ નિરયં ઘોરમન્યથાજ્ઞાનસમ્ભવમ્” ॥ ૯.૧૩૪॥

ઇત્યન્યેષુ ચશાસ્ત્રેષુ તત્રતત્રોદિતં બહુ ।
“વ્યત્યાસઃ પ્રાતિલોમ્યં ચ ગોમૂત્રી પ્રઘસસ્તથા ।
ઉક્ષણઃ સુધુરઃ સાધુ સપ્ત ભેદાઃ પ્રકીર્તિતાઃ” ॥ ૯.૧૩૫॥

ઇત્યાદિલક્ષણાન્યત્ર નોચ્યન્તેઽન્યપ્રસઙ્ગતઃ ॥ ૬૭
(૬૭) “વ્યત્યાસઃ પ્રાતિલોમ્યં ચ ગોમૂત્રી પ્રઘસસ્તથા ।
ઉક્ષણઃ સુધુરઃ સાધુઃ સપ્તભેદાઃ પ્રકીર્તિતાઃ ॥ (૯.૧૩૫.૧)॥

શ્રદ્ધાનાય શિષ્યાય પૃચ્છતે મે સુતાય ચ ।
વિધિવદ્વદ હે (ભો)તાત વ્યત્યાસાદ્યર્થનિર્ણયમ્ ॥ (૯.૧૩૫.૨)॥

શ઼ૃણુ નારદ વક્ષ્યામિ યાવત્તે મતિગોચરમ્ ।
વ્યત્યાસાદિપ્રભેદાનાં સઙ્કોચાદર્થનિર્ણયમ્ ॥ (૯.૧૩૫.૩)॥

એષ્વેકૈકપ્રભેદસ્તુ પૃથગ્ભિન્નઃ સહસ્રધા ।
તલ્લક્ષણં તદર્થાંશ્ચ તદુદાહરણાનિ ચ ॥ (૯.૧૩૫.૪)॥

મુલરામાયણે પ્રોક્તં પઞ્ચરાત્રાગમેષુ ચ ।
વિસ્તરાદ્વ્યાસરૂપેણ હરિણૈવામિતાત્મના ॥ (૯.૧૩૫.૫)॥

તે સર્વેઽનન્તવેદાર્થનિર્ણયાયૈવ કીર્તિતાઃ ।
તતઃ કલિબલાન્મર્ત્યાઃ મન્દાયુર્મતિશાલિનઃ ॥ (૯.૧૩૫.૬)॥

દૃષ્ટ્વા વેદાન્ વિભજ્યૈવ તદર્થજ્ઞાપનાય ચ ।
કૃત્વા લક્ષણશાસ્ત્રં ચ તસ્મિન્નપિ ચ ઈરિતાઃ ॥ (૯.૧૩૫.૭)॥

વ્યત્યાસેનૈવ સઙ્કોચાત્સ્વોક્તવાદાર્થનિર્ણયઃ ।
યાવદ્ભિઃ સ્યાત્પ્રભેદાનાં પ્રભેદૈસ્તે ચ નોઽખિલાઃ ॥ (૯.૧૩૫.૮)॥

ઇદાનીં તત્સમાલોચ્ય નિશ્ચિત્યૈવ પ્રવચ્મિ ચ ।
ભારતસ્ય પુરાણાનાં યાવદ્ભિઃ સ્યાદ્વિનિર્ણયઃ ।
ક્ષ્વ્વી । તત્ર ભેદાન્ તદર્થાંશ્ચ શ ृણુષ્વૈકાગ્રમાનસઃ ॥ (૯.૧૩૫.૯) ॥

વ્યત્યાસો વ્યત્યયઃ પ્રોક્તઃ પું વ્યત્યાસસ્તદાદિમઃ ।
યથાઽરણ્યે પર્વણિ તુ કેશવઃ પ્રાહ પાર્ષતીમ્ ॥ (૯.૧૩૫.૧૦) ॥

સાન્ત્વયન્ ધાર્તરાષ્ટ્રાંશ્ચ શતમર્જુનસાયકૈઃ ।
મૃતાન્ સન્દર્શયિષ્યેઽહમિતિ પું વ્યત્યયઃ સ્મૃતઃ ॥ (૯.૧૩૫.૧૧) ॥

હરિવં શે હરિઃ કૃષ્ણો ગોપગોજનસં વૃતઃ ।
ચિક્રીડે જાહ્નવીતીરે વ્યત્યાસો દૈશિકઃ સ્મૃતઃ ॥ (૯.૧૩૫.૧૨) ॥

માર્કણ્ડેયે તથા પૂર્વં રામઃ કૃતયુગેઽહનત્ ।
દશકણ્ઠં કથેત્યાદૌ વ્યત્યાસઃ કાલિકઃ સ્મૃતઃ ॥ (૯.૧૩૫.૧૩) ॥

હિં સાકર્મરતત્વાત્તુ હિં સાર ઇતિ કેસરીમ્ ।
વ્યત્યાસઃ સિં હ ઇત્યાદાવક્ષરવ્યત્યયઃ સ્મૃતઃ ॥ (૯.૧૩૫.૧૪) ॥

ક્વચિદ્રામો દાશરથિર્હત્વા કં સમપીપલત્ ।
મધુરાં પુરમિત્યાદૌ કથાવ્યત્યય ઈરિતઃ ॥ (૯.૧૩૫.૧૫) ॥

વિપરીતક્રમં યત્ર પ્રતિલોમં તદીરિતમ્ ।
તદ્ભાવઃ પ્રાતિલોમ્યં ચ તત્પ્રભેદઃ ક્વચિદ્ભવેત્ ॥ (૯.૧૩૫.૧૬) ॥

વિધિપ્રાણૌ તયોર્ભાર્યે ગુરુત્મચ્છેષશઙ્કરાઃ ।
ષણ્મહિષ્ય હરેસ્તદ્વત્સૌપર્ણી વારુણી ઉમા ॥ (૯.૧૩૫.૧૭) ॥

ઇન્દ્રકામૌ તયોઃ પત્ન્યૌ ક્રમાચ્છતગુણાધિકાઃ ।
ઇત્યાગ્નેયપુરાણોક્તં તારતમ્યપ્રકાશનમ્ ।
ઇત્યાદાવર્થનિર્વાહઃ પ્રાતિલોમ્યપ્રભેદતઃ ॥ (૯.૧૩૫.૧૮) ॥

કલિશ્ચ દ્વાપરસ્ત્રેતા કૃતં પુણ્યં પુરા યુગાઃ ।
ક્રમાદિત્યાદિષુ પ્રાતિલોમ્યાદુક્તો વિનિર્ણયઃ ॥ (૯.૧૩૫.૧૯) ॥

વત્સો ગોસ્તનમક્ષીરં યદાઽદૌ પિબતિ સ્ફુટમ્ ।
તદા ગોમૂત્રોદયઃ સ્યાત્ક્ષીરસ્યાધિક્યસિદ્ધયે ॥ (૯.૧૩૫.૨૦) ॥

યદા ગોપો દુહત્યેનાં તદા મૂત્રો ન વિદ્યતે ।
પશ્ચાત્પિબતિ વત્સે તુ પુનર્મૂત્રોદયો ભવેત્ ॥ (૯.૧૩૫.૨૧) ॥

એવં ક્વચિત્કથાસુ સ્યાદાદાવન્તે ચ સઙ્ગતિઃ ।
મધ્યે સઙ્ગતિવિચ્છેદઃ કથાન્તરસમાગમઃ ॥ (૯.૧૩૫.૨૨)॥

ક્ષ્વીઇડનુસારેણ તેષાં તુ નિર્ણયઃ ક્રિયતે મયા ।
એવમાદિષુ વિજ્ઞેયો ગોમૂત્રીભેદતઃ ક્રમાત્ ।
યથાઽરણ્યે પાણ્ડવાનાં કથાસઙ્ગતિસમ્મતાઃ ॥ (૯.૧૩૫.૨૩)॥

તાન્ વિહાયૈવ તન્મધ્યે હરિશ્ચન્દ્રસ્ય ભૂભૃતઃ ।
નલ્. અસ્ય રાઘવસ્યાપિ ગોમૂત્રીભેદતઃ ક્રમાત્ ॥ (૯.૧૩૫.૨૪)॥

એવં સર્વપુરાણેષુ મધ્યે ચિત્રકથાઃ સ્મૃતાઃ ।
આદ્યન્તયોઃ સઙ્ગતિશ્ચ ગોમૂત્રીભેદતઃ સ્મૃતાઃ ॥ (૯.૧૩૫.૨૫)॥

પ્રઘસઃ સર્વશાસ્ત્રાર્થવિરુદ્ધાર્થાનુવર્ણનમ્ ।
ક્વચિન્મોહાયાસુરાણાં પુરાણેષુ તથોચ્યતે ।
તાદૃશાનાં તુ વાક્યાનાં ગ્રાહ્યોઽર્થસ્ત્વવિરોધતઃ ॥ (૯.૧૩૫.૨૬)॥

મૂર્ખં દૃષ્ટ્વા સુતં તાતો વિષં ભુઙ્ક્ષ્વેતિ વક્ષ્યતિ ।
તચ્છ્રુત્વા તદ્વિરુદ્ધાર્થમાચરન્ન તથાઽચરેત્ ॥ (૯.૧૩૫.૨૭)॥

એવં સર્વસ્ય જગતઃ પિતા ગુરુરુદારધીઃ ।
વ્યાસોઽન્યથા ક્વચિદ્ભક્તિ હિતાય સ્વજનાય ચ ।
તથા જગત્સત્યં ચ મિથ્યાભૂતં નિરીશ્વરમ્ ॥ (૯.૧૩૫.૨૮)॥

અપ્રતિષ્ઠમજ્ઞેયં હરેર્જીવૈરભિન્નતામ્ ।
નીચતામવરેભ્યશ્ચ દેવેભ્યશ્ચ જરામૃતમ્ ॥ (૯.૧૩૫.૨૯)॥

જન્માદિદોષસમ્પર્કઃ નિર્ગુણત્વમપૂર્ણતા ।
અસર્વજ્ઞત્વમજ્ઞત્વમભેદો જડજીવયોઃ ॥ (૯.૧૩૫.૩૦)॥

જડયોર્જીવયોર્વાઽપિ જડસર્વેશયોરપિ ।
અનધીનં જગદ્વિષ્ણોરસ્વાતન્ત્ર્યં હરેસ્તથા ॥ (૯.૧૩૫.૩૧)॥

સ્વતન્ત્રતા ચજીવસ્ય સર્વજ્ઞત્વમદુઃખિતા ।
વિષ્ણોઃ પ્રાકૃતદેહાદિઃ સ્વાવતારવિપર્યયઃ ।
ઇત્યાદૌ પ્રઘસાદ્ભેદાત્ગ્રાહ્યોઽર્થસ્ત્વવિરોધતઃ ॥ (૯.૧૩૫.૩૨)॥

પ્રામાણ્યમેકદેશસ્યાન્યસ્યૈવાપ્રમાણતા ।
યત્ર તત્રોક્ષણાદ્ભેદાત્ગ્રાહ્યોઽર્થો ન ચાપરઃ ॥ (૯.૧૩૫.૩૩)॥

ઉક્તં રામાયણે ગઙ્ગાપાર્વત્યૌ હિમવત્સુતે ।
રુદ્રસ્ય વલ્લભેઽતસ્તં ગઙ્ગાધરમુમાપતિમ્ ॥ (૯.૧૩૫.૩૪)॥

પ્રાહુસ્તત્રેતરદ્ગ્રાહ્યં પૂર્વં ત્યાજ્યં સતાં મતે ।
ઉચ્છિષ્ટં શિવનિર્માલ્યં વમનં મૃતકર્પટમ્ ॥ (૯.૧૩૫.૩૫)॥

ક્ષ્ચિક્ષ્।કાકવિષ્ટાસમુદ્ભૂતં પઞ્ચ પૂતાનિ ભારત ।
ઇત્યાદૌ ઉક્ષણાદ્ભેદાત્તત્ત્વં નિશ્ચીયતે બુધૈઃ ॥ (૯.૧૩૫.૩૬)॥

ક્રમં ચ વ્યુત્ક્રમં ત્યક્ત્વા યત્ર બોધઃ ક્રમોદ્ભમઃ ।
તત્રૈવ સુધુરાદ્ભેદાદ્ગ્રાહ્યોઽર્થો બહુસમ્મતઃ ॥ (૯.૧૩૫.૩૭)॥

રૂપં શબ્દશ્ચ ગં ધશ્ચ સ્પર્શશ્ચાપિ તથા રસઃ ।
વ્યોમાદિપઞ્ચભૂતાનાં ગુણા હ્યેતે વિશેષતઃ ॥ (૯.૧૩૫.૩૮)॥

ઇત્યુક્તં પઞ્ચરાત્રે તુ ભેદાશ્ચ સુધુરાત્તથા ।
તત્ર નોક્તપ્રકારેણ ગ્રાહ્યોઽર્થસ્તુ યથાક્રમમ્ ॥ (૯.૧૩૫.૩૯)॥

કલ્પભેદાત્કથાભેદો યત્રોક્તસ્સત્કથાસુ ચ ।
તત્રોભયં ગ્રાહ્યમેવ દુષ્યાં શો નૈવ વર્તતે ॥ (૯.૧૩૫.૪૦)॥

તત્ર સાધુપ્રભેદેન સઙ્ગ્રાહ્યસ્તત્ત્વનિર્ણયઃ ।
ઉક્તં ભાગવતે ષષ્ઠસ્કન્ધે વ્યાસેન તત્ત્વતઃ ॥ (૯.૧૩૫.૪૧)॥

ઇન્દ્રો હત્વાઽકરોત્ત્વાષ્ટ્રં વિશ્વરૂપં દ્વિજોત્તમમ્ ।
બ્રહ્મહત્યાપીડિતસ્તુ બ્રહ્માણં શરણં યયૌ ॥ (૯.૧૩૫.૪૨)॥

ચતુર્મુખશ્ચતુર્ધા તં વિભજ્ય પ્રાક્ષિપન્મહાન્ ।
ભૂમૌ વારિષુ વૃક્ષેષુ નારી ઋતુષુ ક્રમાત્ ॥ (૯.૧૩૫.૪૩)॥

ઉષરં દૂષિતં ભૂમૌ ફેનં દુષ્ટં જલેષુ ચ ।
સ્રવ્યં દૂષ્યં ચ વૃક્ષાદૌ હ્યઙ્ગના ઋતુદૂષિતા ।
હત્યામુક્તઃ શચીનાથઃ પુનઃ સ્વર્ગમપીપલત્ ॥ (૯.૧૩૫.૪૪)॥

શ્રીભવિષ્યત્પુરાણે તુ ઇત્યર્થો વ્યાસચોદિતઃ ।
વૃત્રહત્યાં વિભજ્યાથ ક્ષિપ્તવાન્ સ ચતુર્મુખઃ ॥ (૯.૧૩૫.૪૫)॥

વહ્નૌ પ્રથમજાતાસુ જ્વાલાસુ ચ નદીષુ ચ ।
પર્વતાગ્રેષુ વિપ્રેન્દ્ર નારીઋતુષુ તાં ક્રમાત્ ॥ (૯.૧૩૫.૪૬)॥

ઇત્યાદૌ સાધુભેદેન કીર્તિતં કલ્પભેદતઃ ।

તત્રોભયં ગ્રાહ્યમેવ સપ્તભેદાઃ પ્રકીર્તિતાઃ ॥ (૯.૧૩૫.૪૭)॥

ઇદં રહસ્યં પરમં ગુહ્યં યચ્છ્રુતં શ્રીહરેર્મુખાત્ ।
તત્તે સમાસતઃ પ્રોક્તં જ્ઞાત્વા મુક્તિં ગમિષ્યસિ ।
તદુક્તમવિવિચ્યૈવ મુક્તિઃ કસ્યાપિ નો ભવેત્ ॥ (૯.૧૩૫.૪૮)॥

ઇતિ વ્યત્યાસાદિસપ્તભેદપ્રતિપાદકપુરાણવાક્યસઙ્ગ્રહઃ” ।
ચ્।તસ્માન્નિર્ણયશાસ્ત્રત્વાદ્ગ્રાહ્યમેતદ્બુભૂષુભિઃ ॥ ૯.૧૩૬॥

ઇતીરિતા રામકથા પરા મયા સમસ્તશાસ્ત્રાનુસૃતેર્ભવાપહા ।
પઠેદિમાં યઃ શ‍ૃણુયાદથાપિ વા વિમુક્તબન્ધશ્ચરણં હરેર્વ્રજેત્ ॥ ૯.૧૩૭॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
રામસ્વધામપ્રવેશો નામ નવમોઽધ્યાયઃ ॥

મમ સઙ્ગ્રહે (શ્રીજયતીર્થસં સ્કૃતહસ્તલિખિતગ્રન્થાલયે),
ઉત્તરાદિમઠીય ગ્રન્થસઙ્ગ્રહે ચ વર્તન્તે વ્યાસનકેરે પ્રભઞ્જનાચાર્યઃ

## અથ દશમોઽધ્યાયઃ ।

(વ્યાસાવતારાનુવર્ણનમ્)
ૐ । દ્વાપરેઽથ યુગે પ્રાપ્તે ત્વષ્ટાવિં શતિમે પુનઃ ।
સ્વયમ્ભુશર્વશક્રાદ્યા દુગ્ધાબ્ધેસ્તીરમાયયુઃ ॥ ૧૦.૧॥

પયોબ્ધેરુત્તરં તીરમાસાદ્ય વિબુધર્ષભાઃ ।
તુષ્ટુવુઃ પુણ્ડરીકાક્ષમક્ષયં પુરુષોત્તમમ્ ॥ ૧૦.૨॥

નમોનમોઽગણ્યગુણૈકધામ્ને સમસ્તવિજ્ઞાનમરીચિમાલિને ।
અનાદ્યવિજ્ઞાનતમોનિહન્ત્રે પરામૃતાનન્દપદપ્રદાયિને ॥ ૧૦.૩॥

સ્વદત્તમાલાભુવિપાતકોપતો દુર્વાસસઃ શાપત આશુ હિ શ્રિયા ।
શક્રે વિહીને દિતિજૈઃ પરાજિતે પુરા વયં ત્વાં શરણં ગતાઃ સ્મ ॥ ૧૦.૪॥

ત્વદાજ્ઞયા બલિના સન્દધાના વરાદ્રિરીશસ્ય પરૈરચાલ્યમ્ ।
વૃન્દારકા મન્દરમેત્ય બાહુભિર્ન શેકુરુદ્ધર્તુમિમે સમેતાઃ ॥ ૧૦.૫॥

તદા ત્વયા નિત્યબલત્વહેતુતો યોઽનન્તનામા ગરુડસ્તદં સકે ।
ઉત્પાટ્ય ચૈકેન કરેણ મન્દરો નિધાપિતસ્તં સ સહ ત્વયાઽવહત્ ॥ ૧૦.૬॥

પુનઃ પરીક્ષદ્ભિરસૌ ગિરિઃ સુરૈઃ સહાસુરૈરુન્નમિતસ્તદં સતઃ ।

વ્યચૂર્ણયત્તાનખિલાન્ પુનશ્ચ તે ત્વદીક્ષયા પૂર્વવદુત્થિતાઃ પ્રભો ॥ ૧૦.૭॥

પુનશ્ચ વામેન કરેણ વીશ્વરે નિધાય તં સ્કન્ધગતસ્ત્વમસ્ય ।
અગાઃ પયોબ્ધિં સહિતઃ સુરાસુરૈર્મન્થા ચ તેનાબ્ધિમથાપ્યમન્થાઃ ॥ ૧૦.૮॥

કૃતશ્ચ કદ્રૂવાસ્તનયોઽત્ર વાસુકિર્નેત્રં ત્વયા કશ્યપજઃ સ નાગરાટ્ ।
મમન્થુરબ્ધિં સહિતાસ્ત્વયા સુરાઃ સહાસુરા દિવ્યપયો ઘૃતાધિકમ્ ॥ ૧૦.૯॥

નૈચ્છન્ત પુચ્છં દિતિજા અમઙ્ગલ્। અં તદિત્યથાગ્રં જગૃહુર્વિષોલ્બણમ્ ।
શ્રાન્તાશ્ચ તેઽતો વિબુધાસ્તુ પુચ્છં ત્વયા સમેતા જગૃહુસ્ત્વદાશ્રયાઃ ॥ ૧૦.૧૦॥

અથાતિભારાદવિશત્સુકાઞ્ચનો ગિરિઃ સ પાતાલ્। અમથ ત્વમેવ ।
તં કચ્છપાત્મા ત્વભરઃ સ્વપૃષ્ઠે હ્યનન્યધાર્યં પુરુલીલયૈવ ॥ ૧૦.૧૧॥

ચી। ઉપર્યધશ્ચાઽત્મનિ નેત્રગોત્રયોસ્ત્વયા પરેણાઽવિશતા સમેધિતાઃ ।
મમન્થુરબ્ધિં તરસા મદોત્કટાઃ સુરાસુરાઃ ક્ષોભિતનક્રચક્રમ્ ॥ ૧૦.૧૨॥

શ્રાન્તેષુ તેષ્વેક ઉરુક્રમ ત્વં સુધારસાસ્યૈ મુદિતો હ્યમન્થાઃ ।
તદા જગદ્ગ્રાસિ વિષં સમુત્થિતં ત્વદાજ્ઞયા વાયુરધાત્કરે નિજે ॥ ૧૦.૧૩॥

કલેઃ સ્વરૂપં તદતીવ દુષ્ષહં વરાદ્વિધાતુઃ સકલૈશ્ચ દુઃ સ્પૃશમ્ ।
કરે વિમથ્યાસ્તબલં વિધાય દદૌ સ કિઞ્ચિદ્ગિરિશાય વાયુઃ ॥ ૧૦.૧૪॥

સ તત્પિબત્કણ્ઠગતેન તેન નિપાતિતો મૂર્ચ્છિત આશુ રુદ્રઃ ।
હરેઃ કરસ્પર્શબલાત્સ સંજ્ઞામવાપ નીલોઽસ્ય ગલ્. અસ્તદાઽસીત્ ॥ ૧૦.૧૫॥

અથ ત્વદાજ્ઞાં પુરતો નિધાય નિધાય પાત્રે તપનીયરૂપે ।
સ્વયં ચ નિર્મથ્ય બલોપપન્નં પપૌ સ વાયુસ્તદુ ચાસ્ય જીર્ણમ્ ॥ ૧૦.૧૬॥

અત્યલ્પપાનાચ્ચ બભૂવ શૂલા શિવસ્ય શીર્ષણ્શ્ચ કરાવશિષ્ટમ્ ।
અભૂત્કલિઃ સર્વજગત્સુ પૂર્ણં પીત્વા વિકારો ન બભૂવ વાયોઃ ।
કલેઃ શરીરાદભવન્ કુનાગાઃ સવૃશ્ચિકાઃ શ્વાપદયાતુધાનાઃ ॥ ૧૦.૧૭॥

અથ ત્વયાઽબ્ધૌ તુ વિમથ્યમાને સુરાઽભવત્તામસુરા અવાપુઃ ।
ઉચ્ચૈઃ શ્રવા નામ તુરઙ્ગમોઽથ કરી તથૈરાવતનામધેયઃ ॥ ૧૦.૧૮॥

અન્યે ચ દિક્પાલગજા બભૂવુર્વરં તથૈવાપ્સરસાં સહસ્રમ્ ।
તથાઽયુધાન્યાભરણાનિ ચૈવ દિવૌકસાં પારિજાતસ્તરુશ્ચ ॥ ૧૦.૧૯॥

તથૈવ સાક્ષાત્સુરભિર્નિશેશો બભૂવ તત્કૌસ્તુભં લોકસારમ્ ।
અથેન્દિરા યદ્યપિ નિત્યદેહા બભૂવ તત્રાપરયા સ્વતન્વા ॥ ૧૦.૨૦॥

તતો ભવાન્ દક્ષિણબાહુના સુધાકમણ્ડલું કલશં ચાપરેણ ।
પ્રગૃહ્ય તસ્માન્નિરગાત્સમુદ્રાદ્ધન્વન્તરિર્નામ હરિન્મણિદ્યુતિઃ ॥ ૧૦.૨૧॥

તતો ભવદ્ધસ્તગતં દિતેઃ સુતાઃ સુધાભરં કલશં ચાપજહ્રુઃ ।
મુક્તં ત્વયા શક્તિમતાઽપિ દૈત્યાન્ સત્યચ્યુતાન્ કારયતા વધાય ॥ ૧૦.૨૨॥

ચીઇ। તતો ભવાનનુપમમુત્તમં વપુર્બભૂવ દિવ્યપ્રમદાત્મકં ત્વરન્ ।
શ્યામં નિતમ્બાર્પિતરત્નમેખલં જામ્બૂનદાભામ્બરભૃત્સુમધ્યમમ્ ॥ ૧૦.૨૩॥

બૃહન્નિતમ્બં કલશોપમસ્તનં સત્પુણ્ડરીકાયતનેત્રમુજ્જ્વલમ્ ।
સમસ્તસારં પરિપૂર્ણસદ્ગુણં દૃષ્ટ્વૈવ તત્સમ્મુમુહુઃ સુરારયઃ ॥ ૧૦.૨૪॥

પરસ્પરં તેઽમૃતહેતુતોઽખિલા વિરુદ્ધ્યમાનાઃ પ્રદદુઃ સ્મ તે કરે ।
સમં સુધાયાઃ કલશં વિભજ્ય નિપાયયાસ્માનિતિ વઞ્ચિતાસ્ત્વયા ॥ ૧૦.૨૫॥

ધર્મચ્છલં પાપજનેષુ ધર્મ ઇતિ ત્વયા જ્ઞાપયિતું તદોક્તમ્ ।
યદ્યત્કૃતં મે ભવતાં યદીહ સં વાદ એવોદ્વિભજે સુધામિમામ્ ॥ ૧૦.૨૬॥

યથેષ્ટતોઽહં વિભજામિ સર્વથા નવિશ્વસધ્વં મયિ કેનચિત્ક્વચિત્ ।
ઇતિ પ્રહસ્યાભિહિતં નિશમ્ય સ્ત્રીભાવમુગ્ધાસ્તુ તથેતિ તેઽવદન્ ॥ ૧૦.૨૭॥

તતશ્ચ સં સ્થાપ્ય પૃથક્સુરાસુરાં સ્તવાતિરૂપોચ્ચલિતાન્ સુરેતરાન્ ।
સર્વાન્ ભવદ્દર્શિન ઈક્ષ્ય લજ્જિતાઽસ્મ્યહં દૃશો મીલયતેત્યવોચઃ ॥ ૧૦.૨૮॥

નિમીલિતાક્ષેષ્વસુરેષુ દેવતા ન્યપાયયઃ સાધ્વમૃતં તતઃ પુમાન્ ।
ક્ષણેન ભૂત્વા પિબતઃ સુધાં શિરો રાહોર્ન્યકૃન્તશ્ચ સુદર્શનેન ॥ ૧૦.૨૯॥

તેનામૃતાર્થં હિ સહસ્રજન્મસુ પ્રતપ્ય ભૂયસ્તપ આરિતો વરઃ ।
સ્વયમ્ભુવસ્તેન ભવાન્ કરેઽસ્ય બિન્દું સુધાં પ્રાસ્ય શિરો જહાર ॥ ૧૦.૩૦॥

શિરસ્તુ તસ્ય ગ્રહતામવાપ સુરૈઃ સમાવિષ્ટમથો સબાહુ ।
ક્ષિપ્તઃ કબન્ધોઽસ્ય શુભોદસાગરે ત્વયા સ્થિતોઽદ્યાપિ હિ તત્ર સામૃતઃ ॥ ૧૦.૩૧॥

અથાસુરાઃ પ્રત્યપતન્નુદાયુધાઃ સમસ્તશસ્તે ચ હતાસ્ત્વયા રણે ।
કલિસ્તુ સ બ્રહ્મવરાદજેયો હ્યૃતે ભવન્તં પુરુષેષુ સં સ્થિતઃ ॥ ૧૦.૩૨॥

તસ્યાર્દ્ધદેહાત્સમભૂદલક્ષ્મીસ્તત્પુત્રકા દોષગણાશ્ચ સર્વશઃ ।
અથેન્દિરા વક્ષસિ તે સમાસ્થિતા ત્વત્કણ્ઠગં કૌસ્તુભમાસ ધાતા ॥ ૧૦.૩૩॥

યથાવિભાગં ચ સુરેષુ દત્તાસ્ત્વયા તથાઽન્યેઽપિ હિ તત્ર જાતાઃ ।

ઇત્થં ત્વયા સાધ્વમૃતં સુરેષુ દત્તં હિ મોક્ષસ્ય નિદર્શનાય ॥ ૧૦.૩૪॥

ચિવ્।ભવેદ્ધિ મોક્ષો નિયતં સુરાણાં નૈવાસુરાણાં સ કથઞ્ચન સ્યાત્ ।
ઉત્સાહયુક્તસ્ય ચ તત્પ્રતીપં ભવેદ્ધિ રાહોરિવ દુઃખરૂપમ્ ॥ ૧૦.૩૫॥

કલિસ્ત્વયં બ્રહ્મવરાદિદાનીં વિબાધતેઽસ્માન્ સકલાન્ પ્રજાશ્ચ ।
અજ્ઞાનમિથ્યામતિરૂપતોઽસૌ પ્રવિશ્ય સજ્જ્ઞાનવિરુદ્ધરૂપઃ ॥ ૧૦.૩૬॥

ત્વદાજ્ઞયા તસ્ય વરોઽબ્જજેન દત્તઃ સ આવિશ્ય શિવં ચકાર ।
કદાગમાં સ્તસ્ય કુયુક્તિબાધાન્નહિ ત્વદન્યશ્ચરિતું સમર્થઃ ॥ ૧૦.૩૭॥

વેદાશ્ચ સર્વે સહશાસ્ત્રસઙ્ઘા ઉત્સાદિતાસ્તેન ન સન્તિ તેઽદ્ય ।
તત્સાધુ ભૂમાવવતીર્ય વેદાનુદ્ધૃત્ય શાસ્ત્રાણિ કુરુષ્વ સમ્યક્ ॥ ૧૦.૩૮॥

અદૃશ્યમજ્ઞેયમતર્ક્યરૂપં કલિં નિલીનં હૃદયેઽખિલસ્ય ।
સચ્છાસ્ત્રશસ્ત્રેણ નિહત્ય શીઘ્રં પદં નિજં દેહિ મહાજનસ્ય ॥ ૧૦.૩૯॥

ઋતે ભવન્તં નહિ તં નિહન્તા ત્વમેક એવાખિલશક્તિપૂર્ણઃ ।
તતો ભવન્તં શરણં ગતા વયં તમોનિહત્યૈ નિજબોધવિગ્રહમ્ ॥ ૧૦.૪૦॥

ઇતીરિતસ્તૈરભયં પ્રદાય સુરેશ્વરાણાં પરમોઽપ્રમેયઃ ।
પ્રાદુર્બભૂવામૃતભૂરિલ્. આયાં વિશુદ્ધવિજ્ઞાનઘનસ્વરૂપઃ ॥ ૧૦.૪૧॥

વસિષ્ઠનામા કમલ્। ઓદ્ભવાત્મજઃ સુતોઽસ્ય શક્તિસ્તનયઃ પરાશરઃ ।
તસ્યોત્તમં સોઽપિ તપોઽચરદ્ધરિઃ સુતો મમ સ્યાદિતિ તદ્ધરિર્દદૌ ॥ ૧૦.૪૨॥

ઉવાચ ચૈનં ભગવાન્ સુતોષિતો વસોર્મદીયસ્ય સુતાઽસ્તિ શોભના ।
વને મૃગાર્થં ચરતોઽસ્ય વીર્યં પપાત ભાર્યાં મનસા ગતસ્ય ॥ ૧૦.૪૩॥

તચ્છ્યેનહસ્તે પ્રદદૌ સ તસ્યૈ દાતું તદન્યેન તુ યુદ્ધ્યતોઽપતત્ ।
જગ્રાસ તન્મત્સ્યવધૂર્યમસ્વસુર્જલસ્થમેનાં જગૃહુશ્ચ દાશાઃ ॥ ૧૦.૪૪॥

તદ્ગર્ભતોઽભૂન્મિથુનં સ્વરાજ્ઞે ન્યવેદયન્ સોઽપિ વસોઃ સમર્પયત્ ।
પુત્રં સમાદાય સુતાં સ તસ્મૈ દદૌ સુતોઽભૂદથ મત્સ્યરાજઃ ॥ ૧૦.૪૫॥

કન્યા તુસા દાશરાજસ્ય સદ્મન્યવર્દ્ધતાતીવ સુરૂપયુક્તા ।
ય્વ્ંઆમ્ના ચ સા સત્યવતીતિ તસ્યાં તવાઽત્મજોઽહં ભવિતાઽસ્મ્યજોઽપિ ॥ ૧૦.૪૬॥

ઇતીરિતશ્ચક્રધરેણ તાં મુનિર્જગામ માર્તાણ્ડસુતાં સમુદ્રગામ્ ।
ઉત્તારયન્તીમથ તત્ર વિષ્ણુઃ પ્રાદુર્બભૂવાઽશુ વિશુદ્ધચિદ્ઘનઃ ॥ ૧૦.૪૭॥

વિદોષવિજ્ઞાનસુખૈકરૂપોઽપ્યજો જનાન્મોહયિતું મૃષૈવ ।
યોષિત્સુ પું સો હ્યજનીવ દૃશ્યતે ન જાયતે ક્વાપિ બલાદિવિગ્રહઃ ॥ ૧૦.૪૮॥

યથા નૃસિં હાકૃતિરાવિરાસીત્સ્તમ્ભાત્તથા નિત્યતનુત્વતો વિભુઃ ।
આવિર્ભવદ્યોષિતિ નો મલોત્થસ્તથાઽપિ મોહાય નિદર્શયેત્તથા ॥ ૧૦.૪૯॥

સ્ત્રીપુમ્પ્રસઙ્ગાત્પરતો યતો હરિઃ પ્રાદુર્ભવત્યેષ વિમોહયન્ જનમ્ ।
અતો મલોત્થોઽયમિતિ સ્મ મન્યતે જનોઽશુભઃ પૂર્ણગુણૈકવિગ્રહમ્ ॥ ૧૦.૫૦॥

દ્વીપે ભગિન્યાઃ સ યમસ્ય વિશ્વકૃત્પ્રકાશતે જ્ઞાનમરીચિમણ્ડલઃ ।
પ્રભાસયન્નણ્ડબહિસ્તથાઽન્તઃ સહસ્રલક્ષામિતસૂર્યદીધિતિઃ ॥ ૧૦.૫૧॥

અગણ્યદિવ્યોરુગુણાર્ણવઃ પ્રભુઃ સમસ્તવિદ્યાધિપતિર્જગદ્ગુરુઃ ।
અનન્તશક્તિર્જગદીશ્વરઃ સમસ્તદોષાતિવિદૂરવિગ્રહઃ ॥ ૧૦.૫૨॥

શુભમરતકવર્ણો રક્તપાદાબ્જનેત્રાધરકરનખરસનાગ્રશ્ચક્રશઙ્ખાબ્જરેખઃ ।
રવિકરવરગૌરં ચર્મ ચૈણં વસાનસ્તટિદમલજટાસન્દીપ્તજૂટં દધાનઃ ॥ ૧૦.૫૩॥

વિસ્તીર્ણવક્ષાઃ કમલ્। આયતાક્ષો બૃહદ્ભુજઃ કમ્બુસમાનકણ્ઠઃ ।
સમસ્તવેદાન્મુખતઃ સમુદ્ગિરન્નનન્તચન્દ્રાધિકકાન્તસન્મુખઃ ॥ ૧૦.૫૪॥

પ્રબોધમુદ્રાભયદોર્દ્વયાન્વિતો યજ્ઞોપવીતાજિનમેખલોલ્લસન્ ।
દૃશા મહાજ્ઞાનભુજઙ્ગદષ્ટમુજ્જીવયાનો જગદત્યરોચત ॥ ૧૦.૫૫॥

સ લોકધર્માભિરિરક્ષયા પિતુર્દ્વિજત્વમાપ્યાઽશુ પિતુર્દદૌ નિજમ્ ।
જ્ઞાનં તયોઃ સં સ્મૃતિમાત્રતઃ સદા પ્રત્યક્ષભાવં પરમાત્મનો દદૌ ॥ ૧૦.૫૬॥

દ્વૈપાયનઃ સોઽથ જગામ મેરું ચતુર્મુખાદ્યૈરનુગમ્યમાનઃ ।
ઉદ્ધૃત્ય વેદાનખિલાન્ સુરેભ્યો દદૌ મુનિભ્યશ્ચ યથાઽદિસૃષ્ટૌ ॥ ૧૦.૫૭॥

ચ્વિ।સર્વાણિ શાસ્ત્રાણિ તથૈવ કૃત્વા વિનિર્ણયં બ્રહ્મસૂત્રં ચકાર ।
તચ્છુશ્રુવુર્બ્રહ્મગિરીશમુખ્યાઃ સુરા મુનીનાં પ્રવરાશ્ચ તસ્માત્ ॥ ૧૦.૫૮॥

સમસ્તશાસ્ત્રાર્થનિદર્શનાત્મકં ચક્રે મહાભારતનામધેયમ્ ।
વેદોત્તમં તચ્ચ વિધાતૃશઙ્કરપ્રધાનકૈસ્તન્મુખતઃ સુરૈઃ શ્રુતમ્ ॥ ૧૦.૫૯॥

અથો ગિરીશાદિમનોનુશાયી કલિર્મમારાઽશુ સુવાન્મયૈઃ શરૈઃ ।
નિકૃત્તશીર્ષો ભગવન્મુખેરિતૈઃ સુરાશ્ચ સજ્જ્ઞાનસુધારસં પપુઃ ॥ ૧૦.૬૦॥

અથો મનુષ્યેષુ તથાઽસુરેષુ રૂપાન્તરૈઃ કલિરેવાવશિષ્ટઃ ।
તતો મનુષ્યેષુ ચ સત્સુ સં સ્થિતો વિનાશ્ય ઇત્યેષ હરિર્વ્યચિન્તયત્ ॥ ૧૦.૬૧॥

તતો નૃણાં કાલબલાત્સુમન્દમાયુર્મતિં કર્મ ચ વીક્ષ્ય કૃષ્ણઃ ।
વિવ્યાસ વેદાન્ સ વિભુશ્ચતુર્ધા ચક્રે તથા ભાગવતં પુરાણમ્ ॥ ૧૦.૬૨॥

યેયે ચ સન્તસ્તમસાઽનુવિષ્ટાસ્તાં સ્તાન્ સુવાક્યૈસ્તમસો વિમુઞ્ચન્ ।
ચચાર લોકાન્ સ પથિ પ્રયાન્તં કીટં વ્યપશ્યત્તમુવાચ કૃષ્ણઃ ॥ ૧૦.૬૩॥

ભવસ્વ રાજા કુશરીરમેતત્ત્યક્ત્વેતિ નૈચ્છત્તદસૌ તતસ્તમ્ ।
અત્યક્તદેહં નૃપતિં ચકાર પુરા સ્વભક્તં વૃષલં સુલુબ્ધમ્ ॥ ૧૦.૬૪॥

લોભાત્સ કીટત્વમુપેત્ય કૃષ્ણપ્રસાદતશ્ચાઽશુ બભૂવ રાજા ।
તદૈવ તં સર્વનૃપાઃ પ્રણેમુર્દદુઃ કરં ચાસ્ય યથૈવ વૈશ્યાઃ ॥ ૧૦.૬૫॥

ઉવાચ તં ભગવાન્મુક્તિમસ્મિં સ્તવ ક્ષણે દાતુમહં સમર્થઃ ।
તથાઽપિ સીમાર્થમવાપ્ય વિપ્રતનું વિમુક્તો ભવ મત્પ્રસાદાત્ ॥ ૧૦.૬૬॥

જ્ઞાનં ચ તસ્મૈ વિમલં દદૌ સ મહીં ચ સર્વાં બુભુજે તદન્તે ।
ત્યક્ત્વા તનું વિપ્રવરત્વમેત્ય પદં હરેરાપ સુતત્ત્વવેદી ॥ ૧૦.૬૭॥

એવં બહૂન્ સં સૃતિબન્ધતઃ સ વ્યમોચયદ્વ્યાસતનુર્જનાર્દનઃ ।
બહૂન્યચિન્ત્યાનિ ચ તસ્ય કર્માણ્યશેષદેવેશસદોદિતાનિ ॥ ૧૦.૬૮॥

અથાસ્ય પુત્રત્વમવાપ્તુમિચ્છંશ્ચચાર રુદ્રઃ સુતપસ્તદીયમ્ ।
દદૌ ચ તસ્મૈ ભગવાન્ વરં તં સ્વયં ચ તસ્વેવ તપો વિમોહયન્ ॥ ૧૦.૬૯॥

ચ્વી। વિમોહનાયાસુરસર્ગિણાં પ્રભુઃ સ્વયં કરોતીવ તપઃ પ્રદર્શયેત્ ।
કામાદિદોષાંશ્ચ મૃષૈવ દર્શયેન્ન તાવતા તેઽસ્ય હિ સન્તિ કુત્રચિત્ ॥ ૧૦.૭૦॥

તતસ્ત્વરણ્યોઃ સ્મ બભૂવ પુત્રકઃ શિવોઽસ્ય સોઽભૂચ્છુકનામધેયઃ ।
શુકી હિ ભૂત્વાઽભ્યગમદ્ઘૃતાચી વ્યાસં વિમથ્નન્તમુતારણી તમ્ ॥ ૧૦.૭૧॥

અકામયન્ કામુકવત્સ ભૂત્વા તયાઽર્થિતસ્તં શુકનામધેયમ્ ।
ચક્રે હ્યરણ્યોસ્તનયં ચ સૃષ્ટ્વા વિમોહયં સ્તત્ત્વમાર્ગેષ્વયોગ્યાન્ ॥ ૧૦.૭૨॥

શુકં તમાશુ પ્રવિવેશ વાયુર્વ્યાસસ્ય સેવાર્થમથાસ્ય સર્વમ્ ।
જ્ઞાનં દદૌ ભગવાન્ સર્વવેદાન્ સભારતં ભાગવતં પુરાણમ્ ॥ ૧૦.૭૩॥

શેષોઽથ પૈલં મુનિમાવિશત્તદા વીશઃ સુમન્તુમપિ વારુણિં મુનિમ્ ।
બ્રહ્માઽવિશત્તમુત વૈશપાયનં શક્રશ્ચ જૈમિનિમથાઽવિશદ્વિભુઃ ॥ ૧૦.૭૪॥

કૃષ્ણસ્ય પાદપરિસેવનોત્સુકાઃ સુરેશ્વરા વિવિશુરાશુ તાન્મુનીન્ ।

સમસ્તવિદ્યાઃ પ્રતિપાદ્ય તેષ્વસૌ પ્રવર્તકાં સ્તાન્ વિદધે હરિઃ પુનઃ ॥ ૧૦.૭૫॥

ઋચાં પ્રવર્તકં પૈલં યજુષાં ચ પ્રવર્તકમ્ ।
વૈશમ્પાયનમેવૈકં દ્વિતીયં સૂર્યમેવ ચ ॥ ૧૦.૭૬॥

ચક્રેઽથ જૈમિનિં સામ્નામથર્વાઙ્ગિરસામપિ ।
સુમન્તું ભારતસ્યાપિ વૈશમ્પાયનમાદિશત્ ।
પ્રવર્તને માનુષેષુ ગન્ધર્વાદિષુ ચાઽત્મજમ્ ॥ ૧૦.૭૭॥

નારદં પાઠયિત્વા ચ દેવલોકપ્રવૃત્તયે ।
આદિશત્સસૃજે સોઽથ રોમાઞ્ચાદ્રોમહર્ષણમ્ ॥ ૧૦.૭૮॥

તં ભારતપુરાણાનાં મહારામાયણસ્ય ચ ।
પઞ્ચરાત્રસ્ય કૃત્સ્નસ્ય પ્રવૃત્ત્યર્થમથાઽદિશત્ ॥ ૧૦.૭૯॥

તમાવિશત્કામદેવઃ કૃષ્ણસેવાસમુત્સુકઃ ।
સ તસ્મૈ જ્ઞાનમખિલં દદૌ દ્વૈપાયનઃ પ્રભુઃ ॥ ૧૦.૮૦॥

ત્વીઇ। સનત્કુમારપ્રમુખાંશ્ચક્રે યોગપ્રવર્તકાન્ ।
ભૃગ્વાદીન્ કર્મયોગસ્ય જ્ઞાનં દત્વાઽમલં શુભમ્ ॥ ૧૦.૮૧॥

જૈમિનિં કર્મમીમાં સાકર્તારમકરોત્પ્રભુઃ ।
દેવમીમાં સિકાધન્તઃ કૃત્વા પૈલમથાઽદિશત્ ।
શેષં ચ મધ્યકરણે પુરાણાન્યથ ચાકરોત્ ॥ ૧૦.૮૨॥

શૈવાન્ પાશુપતાઞ્ચક્રે સં શયાર્થં સુરદ્વિષામ્ ।
વૈષ્ણવાન્ પઞ્ચરાત્રાઞ્ચ યથાર્થજ્ઞાનસિદ્ધયે ।
બ્રાહ્માંશ્ચ વેદતશ્ચક્રે પુરાણગ્રન્થસઙ્ગ્રહાન્ ॥ ૧૦.૮૩॥

એવં જ્ઞાનં પુનઃ પ્રાપુર્દેવાશ્ચ ઋષયસ્તથા ।
સનત્કુમારપ્રમુખા યોગિનો માનુષાસ્તથા ।
કૃષ્ણદ્વૈપાયનાત્પ્રાપ્ય જ્ઞાનં તે મુમુદુઃ સુરાઃ ॥ ૧૦.૮૪॥

સમસ્તવિજ્ઞાનગભસ્તિચક્રં વિતાય વિજ્ઞાનમહાદિવાકરઃ ।
નિરસ્ય(નિપીય)૬૮ ચાજ્ઞાનતમો જગત્તતં પ્રભાસતે ભાનુરિવાવભાસયન્ ॥ ૧૦.૮૫॥

ચતુર્મુખેશાનસુરેન્દ્રપૂર્વકૈઃ સદા સુરૈઃ સેવિતપાદપલ્લવઃ ।
પ્રકાશયં સ્તેષુ સદાઽત્મગુહ્યં મુમોદ મેરૌ ચ તથા બદર્યામ્ ॥ ૧૦.૮૬॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે

વ્યાસાવતારાનુવર્ણનં નામ દશમોઽધ્યાયઃ ॥

(૬૮) પ્રાચીનકોશેષ્વેવઽનિરસ્યઽ,ઽનિપીયઽ ઇતિ દ્વિવિધોઽપિ પાઠો લિખિતઃ ।
યત્ર સન્નિકૃષ્ટોઽપિ જનઃ સમધિગ્ન વિપ્રકૃષ્ટસ્તત્ર કથં નિર્ણયાત્?
બન્નઞ્જે ગોવિન્દાચાર્યઃ

## અથ એકાદશોઽધ્યાયઃ ।

(ભગવદવતારપ્રતિજ્ઞા)
ૐ । શશાઙ્કપુત્રાદભવત્પુરૂરવાસ્તસ્યાઽયુરાયોર્નહુષો યયાતિઃ ।
તસ્યાઽસ પત્નીયુગલ્. અં સુતાશ્ચ પઞ્ચાભવન્ વિષ્ણુપદૈકભક્તાઃ ॥ ૧૧.૧॥

"યદું ચ તુર્વશું ચૈવ દેવયાની વ્યજાયત ।
દ્રુહ્યં ચાનું તથા પૂરું શર્મિષ્ઠા વાર્ષપર્વણી" (૬૯) ॥ ૧૧.૨॥

યદોર્વં શે ચક્રવર્તી કાર્તવીર્યાર્જુનોઽભવત્ ।
વિષ્ણોર્દત્તાત્રેયનામ્નઃ પ્રસાદાદ્યોગવીર્યવાન્ ।
તસ્યાન્વવાયે યદવો બભૂવુર્વિષ્ણુસં શ્રયાઃ ॥ ૧૧.૩॥

પૂરોર્વં શે તુ ભરતશ્ચક્રવર્તી હરિપ્રિયઃ ।
તદ્વં શજઃ કુરુર્નામ પ્રતીપોઽભૂત્તદન્વયે ॥ ૧૧.૪॥

પ્રતીપસ્યાભવન્ પુત્રાસ્ત્રયસ્ત્રેતાગ્નિવર્ચસઃ ।
દેવાપિરથ બાહ્લીકો ગુણજ્યેષ્ઠશ્ચ શન્તનુઃ ॥ ૧૧.૫॥

ત્વગ્દોષયુક્તો દેવાપિર્જગામ તપસે વનમ્ ।
વિષ્ણોઃ પ્રસાદાત્સ કૃતે યુગે રાજા ભવિષ્યતિ ॥ ૧૧.૬॥

પુત્રિકાપુત્રતાં યાતો બાહ્લીકો રાજસત્તમઃ ।
હિરણ્યકશિપોઃ પુત્રઃ પ્રહ્લાદો ભગવત્પરઃ ॥ ૧૧.૭॥

વાયુના ચ સમાવિષ્ટો મહાબલસમન્વિતઃ ।
યેનૈવ જાયમાનેન તરસા ભૂર્વિદારિતા ॥ ૧૧.૮॥

ભૂભારક્ષપણે વિષ્ણોરઙ્ગતામાપ્તુમેવ સઃ ।
પ્રતીપપુત્રતામાપ્ય બાહ્લીકેષ્વભવત્પતિઃ ।
રુદ્રેષુ પત્રતાપાપ્યઃ સોમદત્તોઽસ્ય ચાઽત્મજઃ ॥ ૧૧.૯॥

અજૈકપાદહિર્બુધ્નિર્વિરૂપાક્ષ ઇતિ ત્રયઃ ।

વિ. ઉ. ૪.૧૦.૬
રુક્ષ્।રુદ્રાણાં સોમદત્તસ્ય બભૂવુઃ પ્રથિતાઃ સુતાઃ ।
વિષ્ણોરેવાઙ્ગતામાપ્તું ભૂરિર્ભૂરિશ્રવાઃ શલઃ ॥ ૧૧.૧૦॥

શિવાદિસર્વરુદ્રાણામાવેશાદ્ધરતસ્તથા ।
ભૂરિશ્રવા અતિબલસ્તત્રાઽસીત્પરમાસ્ત્રવિત્ ॥ ૧૧.૧૧॥

તદર્થં હિ તપશ્ચીર્ણં સોમદત્તેન શમ્ભવે ।
દત્તો વરશ્ચ તેનાસ્ય ત્વત્પ્રતીપાભિભૂતિકૃત્ ।
બલવીર્યગુણોપેતો નામ્ના ભૂરિશ્રવાઃ સુતઃ ॥ ૧૧.૧૨॥

ભવિષ્યતિ મયાઽવિષ્ટો યજ્ઞશીલ ઇતિ સ્મ હ ।
તેન ભૂરિશ્રવા જાતઃ સોમદત્તસુતો બલી ॥ ૧૧.૧૩॥

પૂર્વોદધેસ્તીરગતેઽબ્જસમ્ભવે ગઙ્ગાયુતઃ પર્વણિ ઘૂર્ણિતોઽબ્ધિઃ ।
અવાક્ષિપત્તસ્ય તનૌ નિજોદબિન્દું શશાપૈનમથાબ્જયોનિઃ ॥ ૧૧.૧૪॥

મહાભિષઙ્નામ નરેશ્વરસ્ત્વં ભૂત્વા પુનઃ શન્તનુનામધેયઃ ।
જનિષ્યસે વિષ્ણુપદી તથૈષા તત્રાપિ ભાર્યા ભવતો ભવિષ્યતિ ॥ ૧૧.૧૫॥

શાન્તો ભવત્યેવ મયોદિતસ્ત્વં તનુત્વમાપ્તોઽસિ તતશ્ચ શન્તનુઃ ।
ઇતીરિતઃ સોઽથ નૃપો બભૂવ મહાભિષઙ્નામ હરેઃ પદાશ્રયઃ ॥ ૧૧.૧૬॥

સ તત્ર ભુક્ત્વા ચિરકાલમુર્વીં તનું વિહાયાઽપ સદો વિધાતુઃ ।
તત્રાપિ તિષ્ઠન્ સુરવૃન્દસન્નિધૌ દદર્શ ગઙ્ગાં શ્લથિતામ્બરાં સ્વકામ્ ॥ ૧૧.૧૭॥

અવાઙ્મુખેષુ દ્યુસદસ્સુ રાગાન્નિરીક્ષમાણં પુનરાત્મસમ્ભવઃ ।
ઉવાચ ભૂમૌ નૃપતિર્ભવાઽશુ શપ્તો યથા ત્વં હિ પુરા મયૈવ ॥ ૧૧.૧૮॥

ઇતીરિતસ્તત્ક્ષણતઃ પ્રતીપાદ્બભૂવ નામ્ના નૃપતિઃ સ શન્તનુઃ ।
અવાપ્ય ગઙ્ગાં દયિતાં સ્વકીયાં તયા મુમોદાબ્દગણાન્ બહૂંશ્ચ ॥ ૧૧.૧૯॥

અથાષ્ટમો વસુરાસીદ્દ્યુનામા વરાઙ્ગિનામ્ન્યસ્ય બભૂવ ભાર્યા ।
બભૂવ તસ્યાશ્ચ સખી નૃપસ્ય સુવિન્દનામ્નો દયિતા સનામ્ની ॥ ૧૧.૨૦॥

તસ્યા જરામૃતિવિધ્વં સહેતોર્વસિષ્ઠધેનું સ્વમૃતં ક્ષરન્તીમ્ ।
રિક્ષ।જરાપહાં નન્દિનિનામધેયાં બદ્ધું પતિં ચોદયામાસ દેવી ॥ ૧૧.૨૧॥

તયા દ્યુનામા સ વસુઃ પ્રચોદિતો ભ્રાતૃસ્નેહાત્સપ્તભિરન્વિતોઽપરૈઃ ।
બબન્ધ તાં ગામથ તાઞ્છશાપ વસિષ્ઠસં સ્થઃ કમલોદ્ભવઃ પ્રભુઃ ॥ ૧૧.૨૨॥

અધર્મવૃત્તાઃ પ્રતિયાત માનુષીં યોનિં દ્રુતં યત્કૃતે સર્વ એવ ।
ધર્માચ્ચ્યુતાઃ સ તથાઽષ્ટાયુરાપ્યતામન્યે પુનઃ ક્ષિપ્રમતો વિમોક્ષ્યથ ॥ ૧૧.૨૩ ॥

પ્રચોદયામાસ ચ યા કુમાર્ગે પતિં હિ સાઽમ્બેતિ નરેષુ જાતા ।
અભર્તૃકા પું સ્ત્વસમાશ્રયેણ પત્યુર્મૃતૌ કારણત્વં વ્રજેત ॥ ૧૧.૨૪ ॥

ભવત્વસૌ બ્રહ્મચર્યૈકનિષ્ઠો મહાન્ વિરોધશ્ચ તયોર્ભવેત ।
સ ગર્ભવાસાષ્ટકદુઃખમેવ સમાપ્નુતાં શરતલ્પે શયાનઃ ॥ ૧૧.૨૫ ॥

મૃત્યષ્ટકોત્થામપિ વેદનાં સઃ પ્રાપ્નોતુ શસ્ત્રૈર્બહુધા નિકૃત્તઃ ।
ઇતીરિતાસ્તે કમલોદ્ભવં તં જ્ઞાત્વા સમુત્સૃજ્ય ચ ગાં પ્રણેમુઃ ॥ ૧૧.૨૬ ॥

ન માનુષીં ગર્ભમવાપ્નુમો વયં ભવત્વયં સર્વવિત્કીર્તિમાંશ્ચ ।
મહાસ્ત્રવેત્તા ભવદં શયુક્તસ્તથા બલં નોઽખિલાનામુપૈતુ ॥ ૧૧.૨૭ ॥

ઇતીરિતેઽસ્ત્વિત્યુદિતાઃ સ્વયમ્ભુવા વસિષ્ઠસં સ્થેન સુરાપગાં યયુઃ ।
ઊચુસ્તથૈનામુદરે વયં તે જાયેમહિ ક્ષિપ્રમસ્માન્ હન ત્વમ્ ॥ ૧૧.૨૮ ॥

ઇતીરિતા સા વરમાશુ વવ્રે તેભ્યોઽપ્યપાપત્વમથ પ્રિયત્વમ્ ।
તેષાં સદૈવાઽત્મન એકમેષાં દીર્ઘાયુષં તાન્ સુષુવેઽથ શન્તનોઃ ॥ ૧૧.૨૯ ॥

અવિઘ્નતસ્તાન્ વિનિહન્તુમેવ પુરા પ્રતીપસ્ય હિ દક્ષિણોરુમ્ ।
સમાશ્રિતા કામિનીવત્ત્વકામા તત્પુત્રભાર્યા ભવિતું વિડમ્બાત્ ॥ ૧૧.૩૦ ॥

તેનૈવ ચોક્તા ભવ મે સુતસ્ય ભાર્યા યતો દક્ષિણોરુસ્થિતાઽસિ ।
ભાગો હિ દક્ષો દુહિતુઃ સ્નુષાયા ભાર્યાભાગો વામ ઇતિ પ્રસિદ્ધઃ ॥ ૧૧.૩૧ ॥

ઉવાચ સા તં નતુ માં સુતસ્તે કાઽસીતિ પૃચ્છેન્નતુ માં નિવારયેત્ ।
અયોગ્યકર્ત્રીમપિ કારણં ચ મત્કર્મણો નૈવ પૃચ્છેત્કદાચિત્ ॥ ૧૧.૩૨ ॥

ચ્ક્ષી। યદા ત્રયાણામપિ ચૈકમેષ કરોતિ ગચ્છેયમહં વિસૃજ્ય ।
તદા ત્વદીયં સુતમિત્યુદીરિતે તથેતિ રાજાઽપ્યવદત્પ્રતીપઃ ॥ ૧૧.૩૩ ॥

તથૈવ પુત્રાય ચ તેન તદ્વચો વધૂક્તમુક્તં વચનાદ્વ્યુનદ્યાઃ ।
કનીયસે સા હ્યવદત્સુતસ્તે નાન્યઃ પતિઃ શન્તનુરેવ મે વૃતઃ ॥ ૧૧.૩૪ ॥

તતસ્તુ સા શન્તનુતોઽષ્ટ પુત્રાનવાપ્ય સપ્ત ન્યહનત્તથાઽષ્ટમમ્ ।
ગન્તું તતો મતિમાધાય હન્તુમિવોદ્યોગં સા હિમૃષા ચકાર ॥ ૧૧.૩૫ ॥

અવસ્થિતિર્નાતિસુખાય માનુષે યતઃ સુરાણામત એવ ગન્તુમ્ ।
ઐચ્છન્ન તસ્યા હિ બભૂવ માનુષો દેહો નરોત્થો હિ તદાઽસ શન્તનોઃ ॥ ૧૧.૩૬ ॥

તાં પુત્રનિધનોદ્યુક્તાં ન્યવારયત શન્તનુઃ ।
કાઽસિ ત્વં હેતુના કેન હં સિ પુત્રાન્નૃશં સવત્ ॥ ૧૧.૩૭ ॥

રૂપં સુરવરસ્ત્રીણાં તવ તેન ન પાપકમ્ ।
ભવેત્કર્મ ત્વદીયં તન્મહત્કારણમત્ર હિ ॥ ૧૧.૩૮ ॥

તત્કારણં વદ શુભે યદિ મચ્છ્રોત્રમર્હતિ ।
ઇતીરિતાઽવદત્સર્વં પ્રયયૌ ચ સુરાપગા ॥ ૧૧.૩૯ ॥

ન ધર્મો દેવતાનાં હિ જ્ઞાતવાસશ્ચિરં નૃષુ ।
કારણાદેવ હિ સુરા નૃષુ વાસં પ્રકુર્વતે ।
કારણાપગમે યાન્તિ ધર્મોઽપ્યેષાં તથાવિધઃ ॥ ૧૧.૪૦ ॥

અદૃશ્યત્વમસં સ્પર્શો હ્યસમ્ભાષણમેવ ચ ।
સુરૈરપિ નૃજાતૈસ્તુ ગુહ્યધર્મો દિવૌકસામ્ ॥ ૧૧.૪૧ ॥

અતઃ સા વરુણં દેવં પૂર્વભર્તારમપ્યમુમ્ ।
નૃજાતં શન્તનું ત્યક્ત્વા પ્રયયૌ વરુણાલયમ્ ॥ ૧૧.૪૨ ॥

સુતમષ્ટમમાદાય ભર્તુરેવાપ્યનુજ્ઞયા ।
વધોદ્યોગાન્નિવૃત્તા સા દદૌ પુત્રં બૃહસ્પતૌ ॥ ૧૧.૪૩ ॥

દેવવ્રતોઽસાવનુશાસનાય માત્રા દત્તો દેવગુરૌ શતાર્દ્ધમ્ ।
ચ્ક્ષીઇ । સં વત્સરાણામખિલાંશ્ચ વેદાન્ સમભ્યસત્તદ્ગશગાન્તરાત્મા ॥ ૧૧.૪૪ ॥

તતશ્ચ માત્રા જગતાં ગરીયસ્યનન્તપારેઽખિલસદ્ગુણાર્ણવે ।
રામે ભૃગૂણામધિપે પ્રદત્તઃ શુશ્રાવ તત્ત્વં ચ શતાર્દ્ધવર્ષમ્ ॥ ૧૧.૪૫ ॥

સ પઞ્ચવિં શત્પુનરબ્દકાનામસ્ત્રાણિ ચાભ્યસ્ય પતેર્ભૃગૂણામ્ ।
માત્રા સમાનીય તટે નિજે તુ સં સ્થાપિતઃ પ્રાર્પયિતું સ્વપિત્રે ॥ ૧૧.૪૬ ॥

સ તત્ર બદ્ધ્વા શરપઞ્જરેણ ગઙ્ગાં વિજહ્રેઽસ્ય પિતા તદૈવ ।
વ્રજન્મૃગાર્થી તૃષિતો વિલોકયન્ ગઙ્ગામતોયામભવત્સુવિસ્મિતઃ ॥ ૧૧.૪૭ ॥

સ માર્ગયામાસ તતોઽસ્ય હેતુઙ્ગાસ્યૈ તદા સ્વં ચ દદર્શ સૂનુમ્ ।
ક્રીડન્તમસ્ત્રેણ બભૂવ સોઽપિ ક્ષણાદદૃશ્યઃ પિતૃદર્શનાદનુ ॥ ૧૧.૪૮ ॥

મીમાં સમાનં તમવાપ ગઙ્ગા સુતં સમાદાય પતિં જગાદ ચ ।
અયં સુતસ્તે પરમાસ્ત્રવેત્તા સમર્પિતો વીર્યબલોપપન્નઃ ॥ ૧૧.૪૯ ॥

અસ્યાગ્રજાઃ સ્વાં સ્થિતિમેવ યાતા હરેઃ પદામ્ભોજસુપાવિતે જલે ।
તનૂર્મદીયે પ્રણિધાય તત્ત્વં તાન્મા શુચોઽનેન ચ મોદમાનઃ ॥ ૧૧.૫૦॥

ઇતિ પ્રદાયામુમદૃશ્યતામગાદ્ગઙ્ગા તમાદાય યયૌ સ્વકં ગૃહમ્ ।
રાજાઽભિષિચ્યાથ ચ યૌવરાજ્યે મુમોદ તત્સદ્ગુણતર્પિતો ભૃશમ્ ॥ ૧૧.૫૧॥

પુનઃ સ પિત્રાઽનુમતો બૃહસ્પતેરવાપ વેદાન્ પુરુષાયુષોઽર્દ્ધતઃ ।
રામાત્તથાઽસ્ત્રાણિ પુનસ્ત્વવાપ તાવદ્ભિરબ્દૈસ્ત્રિશતૈશ્ચ તત્ત્વમ્ ॥ ૧૧.૫૨॥

સ સર્વવિત્ત્વં સમવાપ્ય રામાત્સમસ્તવિદ્યાધિપતેર્ગુણાર્ણવાત્ ।
પિતું સમીપં સમવાપ્ય તં ચ શુશ્રૂષમાણઃ પ્રમુમોદ વીરઃ ॥ ૧૧.૫૩॥

યદૈવ ગઙ્ગા સુષુવેઽષ્ટમં સુતં તદૈવ યાતો મૃગયાં સ શન્તનુઃ ।
શરદ્વતો જાતમપશ્યદુત્તમં વને વિસૃષ્ટં મિથુનં ત્વયોનિજમ્ ॥ ૧૧.૫૪॥

શરદ્વાં સ્તુ તપઃ કુર્વન્ દદર્શ સહસોર્વશીમ્ ।
ચસ્કન્દ રેતસ્તસ્યાથ શરસ્તમ્બે તતોઽભવત્ ॥ ૧૧.૫૫॥

ચ્ક્ષિવ્। વિષ્કમ્ભો નામ રુદ્રાણાં ભૂભારહરણેઽઙ્ગતામ્ ।
હરેઃ પ્રાપ્તું તથા તારા ભાર્યા યા હિબૃહસ્પતેઃ ॥ ૧૧.૫૬॥

તાવુભૌ શન્તનુર્દૃષ્ટ્વા કૃપાવિષ્ટઃ સ્વકં ગૃહમ્ ।
નિનાય નામ ચક્રે ચ કૃપાયા વિષયૌ યતઃ ।
કૃપઃ કૃપીતિ સ કૃપસ્તપો વિષ્ણોશ્ચકાર હ ॥ ૧૧.૫૭॥

તસ્ય પ્રીતસ્તદા વિષ્ણુઃ સર્વલોકેશ્વરેશ્વરઃ ।
પ્રાદાદેષ્યત્સમર્ષિત્વમાયુઃ કલ્પાન્તમેવ ચ ।
સ શન્તનુગૃહે તિષ્ઠન્ દેવવ્રતસખાઽભવત્ ॥ ૧૧.૫૮॥

પુત્રવચ્છન્તનોશ્ચાઽસીત્સ ચ પુત્રવદેવ તત્ ।
મિથુનં પાલયામાસ સ કૃપોઽસ્ત્રાણ્યવાપ ચ ॥ ૧૧.૫૯॥

સર્વવેદાનધિજગૌ સર્વશાસ્ત્રાણિ કૌશિકાત્ ।
તત્ત્વજ્ઞાનં તથા વ્યાસાદાપ્ય સર્વજ્ઞતાં ગતઃ ॥ ૧૧.૬૦॥

યદા હિજાતઃ સ કૃપસ્તદૈવ બૃહસ્પતેઃ સૂનુરગાચ્ચ ગઙ્ગામ્ ।
સ્નાતું ઘૃતાચીં સ દદર્શ તત્ર શ્લથદ્દુકૂલાં સુરવર્યકામિનીમ્ ॥ ૧૧.૬૧॥

તદ્દર્શનાત્સ્કન્નમથેન્દ્રિયં સ દ્રોણે દધારાઽશુ તતોઽભવત્સ્વયમ્ ।
અમ્ભોજજાવેશયુતો બૃહસ્પતિઃ કર્તું હરેઃ કર્મ ભુવો ભરોદ્ધૃતૌ ॥ ૧૧.૬૨॥

દ્રોણેતિનામાસ્ય ચકાર તાતો મુનિર્ભરદ્વાજ ઉતાસ્ય વેદાન્ ।
અધ્યાપયામાસ સશાસ્ત્રસઙ્ઘાન્ સર્વજ્ઞતામાપ ચ સોઽચિરેણ ॥ ૧૧.૬૩ ॥

કાલે ચ તસ્મિન્ પૃષતોઽનપત્યો વને તુ પાઞ્ચાલપતિશ્ચચાર ।
તપો મહત્તસ્ય તથા વરાપ્સરાવલોકનાત્સ્કન્દિતમાશુ રેતઃ ॥ ૧૧.૬૪ ॥

સ તદ્વિલજ્જાવશતઃ પદેન સમાક્રમત્તસ્ય બભૂવ સૂનુઃ ।
હહૂ તુનામ્ના સ વિરિઞ્ચગાયકો નામ્નાઽવહો યો મરુતાં તદં શયુક્ ॥ ૧૧.૬૫ ॥

સ દ્રોણતાતાત્સમવાપ વેદાનસ્ત્રાણિ વિદ્યાશ્ચ તથા સમસ્તાઃ ।
દ્રોણેન યુક્તઃ સ તદા ગુરોઃ સુતં સહૈવ નૌ રાજ્યમિતિ હ્યવાદીત્ ॥ ૧૧.૬૬ ॥

રક્ષ્વ્।પદે દ્રુતત્વાદ્દ્રુપદાભિધેયઃ સ રાજ્યમાપાથ નિજાં કૃપીં સઃ ।
દ્રોણોઽપિ ભાર્યાં સમવાપ્ય સર્વપ્રતિગ્રહોજ્ઝશ્ચ પુરેઽવસત્સુખી ॥ ૧૧.૬૭ ॥

સિલોઞ્છવૃત્ત્યૈવ હિ વર્તયન્ સ ધર્મં મહાન્તં વિરજં જુષાણઃ ।
ઉવાસ નાગાખ્યપુરે સખા સ દેવવ્રતસ્યાથ કૃપસ્ય ચૈવ ॥ ૧૧.૬૮ ॥

તેષાં સમાનો વયસા વિરાટસ્ત્વભૂદ્ધહા નામ વિધાતૃગાયકઃ ।
મરુત્સુ યો વિવહો નામ તસ્યાપ્યં શેન યુક્તો નિજધર્મવર્તી ॥ ૧૧.૬૯ ॥

તતઃ કદાચિન્મૃગયાં ગતઃ સ દદર્શ કન્યાપ્રવરાં તુ શન્તનુઃ ।
યા પૂર્વસર્ગે પિતૃપુત્રિકા સતી ચચાર વિષ્ણોસ્તપ ઉત્તમં ચિરમ્ ॥ ૧૧.૭૦ ॥

યસ્યૈ વરં વિષ્ણુરદાત્પુરાઽહં સુતસ્તવ સ્યામિતિ યા વસોઃ સુતા ।
જાતા પુનર્દાશગૃહે વિવર્દ્ધિતા વ્યાસાત્મના વિષ્ણુરભૂચ્ચ યસ્યામ્ ॥ ૧૧.૭૧ ॥

તદ્દર્શનાન્નૃપતિર્જાતહૃચ્છ્રયો વવ્રે પ્રદાનાય ચ દાશરાજમ્ ।
ऋતે સ તસ્યાસ્તનયસ્ય રાજ્યં નૈચ્છદ્દાતું તામથાઽયાદ્ગૃહં સ્વમ્ ॥ ૧૧.૭૨ ॥

તચ્ચિન્તયા ગ્લાનમુખં જનિત્રં દૃષ્ટ્વૈવ દેવવ્રત આશ્વપૃચ્છત્ ।
તત્કારણં સારથિમસ્ય તસ્માચ્છ્રુત્વાઽખિલં દાશગૃહં જગામ ॥ ૧૧.૭૩ ॥

સ તસ્ય વિશ્વાસકૃતે પ્રતિજ્ઞાં ચકાર નાહં કરવાણિ રાજ્યમ્ ।
તથૈવ મે સન્તતિતો ભયં તે વ્યૈતૂર્ધ્વરેતાઃ સતતં ભવાનિ ॥ ૧૧.૭૪ ॥

ભીમવ્રતત્વાદ્ધિ તદાઽસ્ય નામ કૃત્વા દેવા ભીષ્મ ઇતિ હ્યચીક્લૃપન્ ।
પ્રસૂનવૃષ્ટિં સ ચ દાશદત્તાં કાલ્. ઈં સમાદાય પિતુઃ સમર્પયત્ ॥ ૧૧.૭૫ ॥

જ્ઞાત્વા તુતાં રાજપુત્રીં ગુણાઢ્યાં સત્યસ્ય વિષ્ણોર્માતરં નામતસ્તત્ ।
લોકે પ્રસિદ્ધાં સત્યવતીત્યુદારાં વિવાહયામાસ પિતુઃ સ ભીષ્મઃ ॥ ૧૧.૭૬ ॥

પ્રાયઃ સતાં ન મનઃ પાપમાર્ગે ગચ્છેદિતિ હ્યાત્મમનશ્ચ સક્તમ્ ।
જ્ઞાત્વાઽપિ તાં દાશગૃહે વિવર્દ્ધિતાં જગ્રાહ સદ્ધર્મરતશ્ચ શન્તનુઃ ॥ ૧૧.૭૭॥

સ્વચ્છન્દમૃત્યુત્વવરં પ્રદાય તથાઽપ્યજેયત્વમધૃષ્યતાં ચ ।
યુદ્ધેષુ ભીષ્મસ્ય નૃપોત્તમઃ સ રેમે તયૈવાબ્દગણાન્ બહૂંશ્ચ ॥ ૧૧.૭૮॥

ચિક્ષ્વ।લેભે સ ચિત્રાઙ્ગદમત્ર પુત્રં તથા દ્વિતીયં ચ વિચિત્રવીર્યમ્ ।
તયોશ્ચ બાલ્યે વ્યધુનોચ્છરીરં જીર્ણેન દેહેન હિ કિં મમેતિ ॥ ૧૧.૭૯॥

સ્વેચ્છયા વરુણત્વં સ પ્રાપ નાનિચ્છયા તનુઃ ।
તસ્મિન્ કાલે ત્યજ્યતે હિ બલવદ્ભિર્વધં વિના ॥ ૧૧.૮૦॥

અતિસક્તાસ્તપોહીનાઃ કથઞ્ચિન્મૃતિમાપ્નુયુઃ ।
અનિચ્છયાઽપિ હિ યથા મૃતશ્ચિત્રાઙ્ગદાનુજઃ ॥ ૧૧.૮૧॥

અથૌર્ધ્વદૈહિકં કૃત્વા પિતુર્ભીષ્મોઽભ્યષેચયત્ ।
રાજ્યે ચિત્રાઙ્ગદં વીરં યૌવરાજ્યેઽસ્ય ચાનુજમ્ ॥ ૧૧.૮૨॥

ચિત્રાઙ્ગદેન નિહતો નામ સ્વં ત્વપરિત્યજન્ ।
ચિત્રાઙ્ગદોઽકૃતોદ્વાહો ગન્ધર્વેણ મહારણે ।
વિચિત્રવીર્યં રાજાનં કૃત્વા ભીષ્મોઽન્વપાલયત્ ॥ ૧૧.૮૩॥

અથ કાશિસુતાસ્તિસ્રસ્તદર્થં ભીષ્મ આહરત્ ।
અમ્બામપ્યમ્બિકાનામ્નીં તથૈવામ્બાલિકાં પરામ્ ॥ ૧૧.૮૪॥

પાણિગ્રહણકાલે તુ બ્રહ્મદત્તસ્ય વીર્યવાન્ ।
વિજિત્ય તં સાલ્વરાજં સમેતાન્ ક્ષત્રિયાનપિ ॥ ૧૧.૮૫॥

અમ્બિકામ્બાલિકે તત્ર સં વાદં ચક્રતુઃ શુભે ।
અમ્બા સા ભીષ્મભાર્યૈવ પૂર્વદેહે તુ નૈચ્છત ॥ ૧૧.૮૬॥

શાપાદ્ધિરણ્યગર્ભસ્ય સાલ્વકામાઽહમિત્યપિ ।
ઉવાચ તાં સ તત્યાજ સાઽગમત્સાલ્વમેવ ચ ॥ ૧૧.૮૭॥

તેનાપિ સમ્પરિત્યક્તા પરામૃષ્ટેતિ સા પુનઃ ।
ભીષ્મમાપ સ નાગૃહ્ણાત્પ્રયયૌ સાઽપિ ભાર્ગવમ્ ॥ ૧૧.૮૮॥

ભ્રાતુર્વિવાહયામાસ સોઽમ્બિકામ્બાલિકે તતઃ ।
ભીષ્માય તુ યશો દાતું યુયુધે તેન ભાર્ગવઃ ॥ ૧૧.૮૯॥

ઋક્ષ્વીઽનન્તશક્તિરપિ સ ન ભીષ્મં નિજઘાન હ ।
નચામ્બાં ગ્રાહયામાસ ભીષ્મકારુણ્યયન્ત્રિતઃ ॥ ૧૧.૯૦॥

અનન્તશક્તિઃ સકલાન્તરાત્મા યઃ સર્વવિત્સર્વવશી ચ સર્વજિત્ ।
ન યત્સમોઽન્યોઽસ્તિ કથઞ્ચ કુત્રચિત્કથં હ્યશક્તિઃ પરમસ્ય તસ્ય ॥ ૧૧.૯૧॥

ભીષ્મં સ્વભક્તં યશસાઽભિપૂરયન્ વિમોહયન્નાસુરાંશ્ચૈવ રામઃ ।
જિત્વૈવ ભીષ્મં ન જઘાન દેવો વાચં ચ સત્યામકરોત્સ તસ્ય ॥ ૧૧.૯૨॥

"વિદ્ધવન્મુગ્ધવચ્ચૈવ કેશવો વેદનાર્તવત્ ।
દર્શયન્નપિ મોહાય નૈવ વિષ્ણુસ્તથા ભવેત્" ।
એવમાદિપુરાણોત્થવાક્યાદ્રામઃ સદા જયી ॥ ૧૧.૯૩॥

યશો ભીષ્મસ્ય દત્વા તુ સોઽમ્બાં ચ શરણાગતામ્ ।
ઉન્મુચ્ય ભર્તૃદ્વેષોત્થાત્પાપાત્તેનાઽશ્વયોજયત્ ॥ ૧૧.૯૪॥

અનન્તરં શિખણ્ડિત્વાત્તદા સા શાઙ્કરં તપઃ ।
ભીષ્મસ્ય નિધનાર્થાય પું સ્ત્વાર્થં ચ ચકાર હ ॥ ૧૧.૯૫॥

ભીષ્મો યથા ત્વાં ગૃહ્ણીયાત્તથા કુર્યામિતીરિતમ્ ।
રામેણ સત્યં તચ્ચક્રે ભીષ્મે દેહાન્તરં ગતે ॥ ૧૧.૯૬॥

રુદ્રસ્તુ તસ્યાસ્તપસા તુષ્ટઃ પ્રાદાદ્વરં તદા ।
ભીષ્મસ્ય મૃતિહેતુત્વં કાલાત્પુન્દેહસમ્ભવમ્ ॥ ૧૧.૯૭॥

માલાં ચ ય ઇમાં માલાં ગૃહ્ણીયાત્સ હનિષ્યતિ ।
ભીષ્મમિત્યેવ તાં માલાં ગૃહીત્વા સા નૃપાન્ યયૌ ॥ ૧૧.૯૮॥

તાં ન ભીષ્મભયાત્કેઽપિ જગૃહુસ્તાં હિ સા તતઃ ।
દ્રુપદસ્ય ગૃહદ્વારિ ન્યસ્ય યોગાત્તનું જહૌ ॥ ૧૧.૯૯॥

એતસ્મિન્નેવ કાલે તુ સુતાર્થં દ્રુપદસ્તપઃ ।
ચકાર શમ્ભવે ચૈનં સોઽબ્રવીત્કન્યકા તવ ॥ ૧૧.૧૦૦॥

ભૂત્વા ભવિષ્યતિ પુમાનિતિ સામ્બા તતોઽજનિ ।
ઋક્ષ્વીઇઆમ્ના શિખણ્ડિની તસ્યાઃ પું વત્કર્માણિ ચાકરોત્ ॥ ૧૧.૧૦૧॥

તસ્યૈ પાઞ્ચાલરાજઃ સ દશાર્ણાધિપતેઃ સુતામ્ ।
ઉદ્વાહયામાસ સા તાં પું વેષેણૈવ ગૂહિતામ્ ।
અન્યત્ર માતાપિત્રોસ્તુ ન વિજ્ઞાતાં બુબોધ હ ॥ ૧૧.૧૦૨॥

ધાત્ર્યૈ ન્યવેદયત્સાઽથ તત્પિત્રે સા ન્યવેદયત્ ।
સ ક્રુદ્ધઃ પ્રેષયામાસ નિહન્મિ ત્વાં સબાન્ધવમ્ ।
ઇતિ પાઞ્ચાલરાજાય નિર્જગામ ચ સેનયા ॥ ૧૧.૧૦૩ ॥

વિશ્વસ્ય વાક્યં રુદ્રસ્ય પુમાનેવેતિ પાર્ષતઃ ।
પ્રેષયામાસ ધિગ્બુદ્ધિર્ભિન્ના તેબાલવાક્યતઃ ।
અપરીક્ષકસ્ય તે રાષ્ટ્રં કથમિત્યેવ નર્મકૃત્ ॥ ૧૧.૧૦૪ ॥

અથ ભાર્યાસમેતં તં પિતરં ચિન્તયાઽકુલમ્ ।
દૃષ્ટ્વા શિખણ્ડિની દુઃખાન્મન્નિમિત્તાન્ન નશ્યતુ ॥ ૧૧.૧૦૫ ॥

ઇતિ મત્વા વનાયૈવ યયૌ તત્ર ચ તુમ્બુરુઃ ।
સ્થૂણાકર્ણાભિધેયસ્તામપશ્યદ્દૃઢકર્ણતઃ ॥ ૧૧.૧૦૬ ॥

સ તસ્યા અખિલં શ્રુત્વા કૃપાં ચક્રે મહામનાઃ ।
સ તસ્યૈ સ્વં વપુઃ પ્રાદાત્તદીયં જગૃહે તથા ।
અં શેન પું સ્વભાવાર્થં પૂર્વદેહે સમાસ્થિતઃ ॥ ૧૧.૧૦૭ ॥

પું સાં સ્ત્રીત્વં ભવેત્ક્વાપિ તથાઽપ્યન્તે પુમાન્ ભવેત્ ।
સ્ત્રીણાં નૈવ હિ પું સ્ત્વં સ્યાદ્બલવત્કારણૈરપિ ॥ ૧૧.૧૦૮ ॥

અતઃ શિવવરેઽપ્યેષાં જજ્ઞે યોષૈવ નાન્યથા ।
પશ્ચાત્પુન્દેહમપિ સા પ્રવિવેશૈવ પું યુતમ્ ॥ ૧૧.૧૦૯ ॥

નાસ્યા દેહઃ પું સ્ત્વમાપ નચ પું સાઽનધિષ્ઠિતે ।
પું દેહે ન્યવસત્સાઽથ ગન્ધર્વેણ ત્વધિષ્ઠિતમ્ ।
ગાન્ધર્વં દેહમાવિશ્ય સ્વકીયં ભવનં યયૌ ॥ ૧૧.૧૧૦ ॥

તસ્યાસ્તદ્દેહસાદૃશ્યં ગન્ધર્વસ્ય પ્રસાદતઃ ।
સ્ક્ષિક્ષ્.પ્રાપ ગન્ધર્વદેહોઽપિ તયા પશ્ચાદધિષ્ઠિતઃ ॥ ૧૧.૧૧૧ ॥

શ્વો દેહિ મમ દેહં મે સ્વં ચ દેહં સમાવિશ ।
ઇત્યુક્ત્વા સ તુ ગન્ધર્વઃ કન્યાદેહં સમાસ્થિતઃ ।
ઉવાસૈવ વને તસ્મિન્ ધનદસ્તત્ર ચાઽગમત્ ॥ ૧૧.૧૧૨ ॥

અપ્રત્યુત્થાયિનં તન્તુલીયમાનં વિલજ્જયા ।
શશાપ ધનદો દેવશ્ચિરમિત્થં ભવેતિ તમ્ ॥ ૧૧.૧૧૩ ॥

યદા યુદ્ધે મૃતિં યાતિ સા કન્યા પુન્તનુસ્થિતા ।

તદા પું સ્ત્વં પુનર્યાસિ ચપલત્વાદિતીરિતઃ ॥ ૧૧.૧૧૪॥

તથાऽવસત્સ ગન્ધર્વઃ કન્યા પિત્રોરશેષતઃ ।
કથયામાસાનુભૂતં તૌ ભૃશં મુદમાપતુઃ ॥ ૧૧.૧૧૫॥

પરીક્ષ્ય તામુપાયૈશ્ચ શ્વશુરો લજ્જિતો યયૌ ।
શ્વોભૂતે સા તુ ગન્ધર્વં પ્રાપ્ય તદ્વચનાત્પુનઃ ॥ ૧૧.૧૧૬॥

યયૌ તેનૈવ દેહેન પું સ્ત્વમેવ સમાશ્રિતા ।
સ શિખણ્ડી નામતોऽભૂદસ્ત્રશસ્ત્રપ્રતાપવાન્ ॥ ૧૧.૧૧૭॥

વિચિત્રવીર્યઃ પ્રમદાદ્વયં તત્સમ્પ્રાપ્ય રેમેऽબ્દગણાન્ સુસક્તઃ ।
તત્યાજ દેહં ચ સ યક્ષ્મણાऽર્દિતસ્તતોऽસ્ય માતાऽસ્મરદાશુ કૃષ્ણમ્ ॥ ૧૧.૧૧૮॥

આવિર્બભૂવાऽશુ જગજ્જનિત્રો જનાર્દનો જન્મજરાભયાપહઃ ।
સમસ્તવિજ્ઞાનતનુઃ સુખાર્ણવઃ સમ્પૂજયામાસ ચ તં જનિત્રી ॥ ૧૧.૧૧૯॥

તં ભીષ્મપૂર્વૈઃ પરમાદરાર્ચિતં સ્વભિષ્ટુતં ચાવદદસ્ય માતા ।
પુત્રૌ મૃતૌ મે નતુ રાજ્યમૈચ્છદ્ભીષ્મો મયા નિતરામર્થિતોऽપિ ॥ ૧૧.૧૨૦॥

ક્ષેત્રે તતો ભ્રાતુરપત્યમુત્તમમુત્પાદયાસ્મત્પરમાદરાર્થિતઃ ।
ઇતીરિતઃ પ્રણતશ્ચાપ્યભિષ્ટુતો ભીષ્માદિભિશ્ચાऽહ જગદ્ગુરુર્વચઃ ॥ ૧૧.૧૨૧॥

ઋતે રમાં જાતુ મમાઙ્ગયોગયોગ્યાऽઙ્ગના નૈવ સુરાલયેऽપિ ।
તથાऽપિ તે વાક્યમહં કરિષ્યે સાં વત્સરં સા ચરતુ વ્રતં ચ ॥ ૧૧.૧૨૨॥

ચક્ષ્ક્ષ્।સા પૂતદેહાऽથ ચ વૈષ્ણવવ્રતાન્મત્તઃ સમાપ્નોતુ સુતં વરિષ્ઠમ્ ।
ઇતીરિતે રાષ્ટ્રમુપૈતિ નાશમિતિ બ્રુવન્તીં પુનરાહ વાક્યમ્ ॥ ૧૧.૧૨૩॥

સૌમ્યસ્વરૂપોऽપ્યતિભીષણં મૃષા તચ્ચક્ષુષો રૂપમહં પ્રદર્શયે ।
સહેત સા તદ્યદિ પુત્રકોऽસ્યા ભવેદ્ગુણાઢ્યો બલવીર્યયુક્તઃ ॥ ૧૧.૧૨૪॥

ઇતીરિતેऽસ્ત્વિત્યુદિતસ્તયાऽગમત્કૃષ્ણોऽમ્બિકાં સા તુ ભિયા ન્યમીલયત્ ।
અભૂચ્ચ તસ્યાં ધૃતરાષ્ટ્રનામકો ગન્ધર્વરાટ્પવનાવેશયુક્તઃ ॥ ૧૧.૧૨૫॥

સ મારુતાવેશબલાદ્બલાધિકો બભૂવ રાજા ધૃતરાષ્ટ્રનામા ।
અદાદ્વરં ચાસ્ય બલાધિકત્વં કૃષ્ણોऽન્ધ આસીત્સ તુ માતૃદોષતઃ ॥ ૧૧.૧૨૬॥

જ્ઞાત્વા તમન્ધં પુનરેવ કૃષ્ણં માતાऽબ્રવીજ્જનયાન્યં ગુણાઢ્યમ્ ।
અમ્બાલિકાયામિતિ તત્તથાऽકરોદ્ભયાત્તુ સા પાણ્ડુરભૂન્મૃષાદૃક્ ॥ ૧૧.૧૨૭॥

પરાવહો નામ મરુત્તતોઽભવદ્વર્ણેન પાણ્ડુઃ સ હિ નામતશ્ચ ।
સ ચાઽસ વીર્યાધિક એવ વાયોરાવેશતઃ સર્વશસ્ત્રાસ્ત્રવેત્તા ॥ ૧૧.૧૨૮॥

તસ્મૈ તથા બલવીર્યાધિકત્વવરં પ્રાદાત્કૃષ્ણ એવાથ પાણ્ડુમ્ ।
વિજ્ઞાય તં પ્રાહ પુનશ્ચ માતા નિર્દોષમન્યં જનયોત્તમં સુતમ્ ॥ ૧૧.૧૨૯॥

ઉક્ત્વેતિ કૃષ્ણં પુનરેવ ચ સ્નુષામાહ ત્વયાઽક્ષ્ણોર્હિ નિમીલનં પુરા ।
કૃતં તતસ્તે સુત આસ ચાન્ધસ્તતઃ પુનઃ કૃષ્ણમુપાસ્વ ભક્તિતઃ ॥ ૧૧.૧૩૦॥

ઇતીરિતાઽપ્યસ્ય હિ માયયા સા ભીતા ભુજિષ્યાં કુમતિર્ન્યયોજયત્ ।
સા તં પરાનન્દતનું ગુણાર્ણવં સમ્પ્રાપ્ય ભક્ત્યા પરયૈવ રેમે ॥ ૧૧.૧૩૧॥

તસ્યાં સ દેવોઽજનિ ધર્મરાજો માણ્ડવ્યશાપાદ્ધ ઉવાહ શૂદ્રતામ્ ।
વસિષ્ઠસામ્યં સમભીપ્સમાનં પ્રાચ્યાવયન્નિચ્છયા શાપમાપ ॥ ૧૧.૧૩૨॥

અયોગ્યસમ્પ્રાપ્તિકૃતપ્રયત્નદોષાત્સમારોપિતમેવ શૂલે ।
ચોરૈર્હૃતેઽર્થેઽપિતુ ચોરબુદ્ધ્યા મક્ષીવધાદિત્યવદદ્ધમસ્તમ્ ॥ ૧૧.૧૩૩॥

નાસત્યતા તસ્ય ચ તત્ર હેતુતઃ શાપં ગૃહીતું સ તથૈવ ચોક્ત્વા ।
ચ્છિક્ષઽવાપ શૂદ્રત્વમથાસ્ય નામ ચક્રે કૃષ્ણઃ સર્વવિત્ત્વં તથાઽદાત્ ॥ ૧૧.૧૩૪॥

વિદ્યારતેર્વિદુરો નામ ચાયં ભવિષ્યતિ જ્ઞાનબલોપપન્નઃ ।
મહાધનુર્બાહુબલાધિકશ્ચ સુનીતિમાનિત્યવદત્સ કૃષ્ણઃ ॥ ૧૧.૧૩૫॥

જ્ઞાત્વાઽસ્ય શૂદ્રત્વમથાસ્ય માતા પુનશ્ચ કૃષ્ણં પ્રણતા યયાચે ।
અમ્બાલિકાયાં જનયાન્યમિત્યથો નૈચ્છત્સ કૃષ્ણોઽભવદપ્યદૃશ્યઃ ॥ ૧૧.૧૩૬॥

યોગ્યાનિ કર્માણિ તતસ્તુ તેષાં ચકાર ભીષ્મો મુનિભિર્યથાવત્ ।
વિદ્યાઃ સમસ્તા અદદાચ્ચ કૃષ્ણસ્તેષાં પાણ્ડોરસ્ત્રશસ્ત્રાણિ ભીષ્મઃ ॥ ૧૧.૧૩૭॥

તે સર્વવિદ્યાપ્રવરા બભૂવુર્વિશેષતો વિદુરઃ સર્વવેત્તા ।
પાણ્ડુઃ સમસ્તાસ્ત્રવિદેકવીરો જિગાય પૃથ્વીમખિલાં ધનુર્ધરઃ ॥ ૧૧.૧૩૮॥

ગવદ્ગણાદાસ તથૈવ સૂતાત્સમસ્તગન્ધર્વપતિઃ સ તુમ્બુરુઃ ।
ય ઉદ્વહો નામ મરુત્તદં શયુક્તો વશી સઞ્જયનામધેયઃ ॥ ૧૧.૧૩૯॥

વિચિત્રવીર્યસ્ય સ સૂતપુત્રઃ સખા ચ તેષામભવત્પ્રિયશ્ચ ।
સમસ્તવિન્મતિમાન્ વ્યાસશિષ્યો વિશેષતો ધૃતરાષ્ટ્રાનુવર્તી ॥ ૧૧.૧૪૦॥

ગાન્ધારરાજસ્ય સુતામુવાહ ગાન્ધારિનામ્નીં સુબલસ્ય રાજા ।
જ્યેષ્ઠો જ્યેષ્ઠાં શકુનેર્દ્વાપરસ્ય નાસ્તિક્યરૂપસ્ય કુકર્મહેતોઃ ॥ ૧૧.૧૪૧॥

શૂરસ્ય પુત્રી ગુણશીલરૂપયુક્તા દત્તા સખ્યુરેવ સ્વપિત્રા ।
નામ્ના પૃથા કુન્તિભોજસ્ય તેન કુન્તી ભાર્યા પૂર્વદેહેઽપિ પાણ્ડોઃ ॥ ૧૧.૧૪૨॥

કૂર્મશ્ચ નામ્ના મરુદેવ કુન્તિભોજોઽથૈનાં વર્દ્ધયામાસ સમ્યક્ ।
તત્રાઽગમચ્છઙ્કરાં શોઽતિકોપો દુર્વાસાસ્તં પ્રાહ માં વાસયેતિ ॥ ૧૧.૧૪૩॥

તમાહ રાજા યદિ કન્યકાયાઃ ક્ષમિષ્યસે શક્તિતઃ કર્મ કર્ત્ર્યાઃ ।
સુખં વસેત્યોમિતિ તેન ચોક્તઃ શુશ્રૂષણાયાઽદિશદાશુ કુન્તીમ્ ॥ ૧૧.૧૪૪॥

ચકાર કર્મ સા પૃથા મુનેઃ સુકોપનસ્ય હિ ।
યથા નશક્યતે પરૈઃ શરીરવાઙ્મનોનુગા ॥ ૧૧.૧૪૫॥

ચક્ષ્ક્ષી।સ વત્સરત્રયોદશં તયા યથાવદર્ચિતઃ ।
ઉપાદિશત્પરં મનું સમસ્તદેવવશ્યદમ્ ॥ ૧૧.૧૪૬॥

ઋતૌ તુ સા સમાપ્લુતા પરીક્ષણાય તન્મનોઃ ।
સમાહ્વયદ્દિવાકરં સ ચાઽજગામ તત્ક્ષણાત્ ॥ ૧૧.૧૪૭॥

તતો ન સા વિસર્જિતું શશાક તં વિના રતિમ્ ।
સુવાક્યપ્રયત્નતોઽપિ તામથાઽસસાદ ભાસ્કરઃ ॥ ૧૧.૧૪૮॥

સ તત્ર જજ્ઞિવાન્ સ્વયં દ્વિતીયરૂપકો વિભુઃ ।
સવર્મદિવ્યકુણ્ડલો જ્વલન્નિવ સ્વતેજસા ॥ ૧૧.૧૪૯॥

પુરા સવાલિમારણપ્રભૂતદોષકારણાત્ ।
સહસ્રવર્મનામિનાઽસુરેણ વેષ્ટિતોઽજનિ ॥ ૧૧.૧૫૦॥

યથા ગ્રહૈર્વિદૂષ્યતે મતિર્નૃણાં તથૈવ હિ ।
અભૂચ્ચ દૈત્યદૂષિતા મતિર્દિવાકરાત્મનઃ ॥ ૧૧.૧૫૧॥

તથાઽપિ રામસેવનાદ્ધરેશ્ચ સન્નિધાનયુક્ ।
સુદર્શનીયકર્ણતઃ સ કર્ણનામકોઽભવત્ ॥ ૧૧.૧૫૨॥

સ રત્નપૂર્ણમઞ્જુષાગતો વિસર્જિતો જલે ।
જનાપવાદભીતિતસ્તયા યમસ્વસુર્દ્રુતમ્ ॥ ૧૧.૧૫૩॥

નદીપ્રવાહતો ગતં દદર્શ સૂતનન્દનઃ ।
તમગ્રહીત્સરત્નકં ચકાર પુત્રકં નિજમ્ ॥ ૧૧.૧૫૪॥

સૂતેનાધિરથેન લાલ્। ઇતતનુસ્તદ્ભાર્યયા રાધયા

સં વૃદ્ધો નિખિલાઃ શ્રુતીરધિજગૌ શાસ્ત્રાણિ સર્વાણિ ચ ।
બાલ્યાદેવ મહાબલો નિજગુણૈઃ સમ્ભાસમાનોઽવસન્ન્-
અમ્નાઽસૌ વસુષેણતામગમદસ્યાઽસીદ્ધ્યમા તદ્વસુ ॥ ૧૧.૧૫૫॥

અથ કુન્તી દત્તા સા પાણ્ડોઃ સોઽપ્યેતયા ચિરં રેમે ।
શૂરાચ્છૂદ્ગાં જાતાં વિદુરોઽવહદારુણીં ગુણાઢ્યાં ચ ॥ ૧૧.૧૫૬॥

ઋક્ષીઇઽથ ચર્તાયનનામા મદ્રેશઃ શક્રતુલ્યપુત્રાર્થી ।
કન્યારત્નં ચેચ્છંશ્ચક્રે બ્રાહ્મં તપો વરં ચાઽપ ॥ ૧૧.૧૫૭॥

પ્રહ્લાદાવરજો યઃ સહ્લાદો નામતો હરેર્ભક્તઃ ।
સોઽભૂદ્બ્રહ્મવરાન્તે વાયોરાવેશયુક્સુતો રાજ્ઞઃ ॥ ૧૧.૧૫૮॥

સ મારુતાવેશવશાત્પૃથિવ્યાં બલાધિકોઽભૂદ્વરતશ્ચ ધાતુઃ ।
શલ્યશ્ચ નામ્નાઽખિલશત્રુશલ્યો બભૂવ કન્યાઽસ્ય ચ માદ્રિનામ્ની ॥ ૧૧.૧૫૯॥

સા પાણ્ડુભાર્યૈવ ચ પૂર્વજન્મન્યભૂત્પુનશ્ચ પ્રતિપાદિતાઽસ્મૈ ।
શલ્યશ્ચ રાજ્યં પિતૃદત્તમગ્ર્યો જુગોપ ધર્મેણ સમસ્તશાસ્ત્રવિત્ ॥ ૧૧.૧૬૦॥

અથાઙ્ગનારત્નમવાપ્ય તદ્દ્વયં પાણ્ડુસ્તુ ભોગાન્ બુભુજે યથેષ્ટતઃ ।
અપીપલદ્ધર્મસમાશ્રયો મહીં જ્યેષ્ઠાપચાયી વિદુરોક્તમાર્ગતઃ ॥ ૧૧.૧૬૧॥

ભીષ્મો હિ રાષ્ટ્રે ધૃતરાષ્ટ્રમેવ સં સ્થાપ્ય પાણ્ડું યુવરાજમેવ ।
ચક્રે તથાઽપ્યન્ધ ઇતિ સ્મ રાજ્યં ચકાર નાસાવકરોચ્ચ પાણ્ડુઃ ॥ ૧૧.૧૬૨॥

ભીષ્મામ્બિકેયોક્તિપરઃ સદૈવ પાણ્ડુઃ શશાસાવનિમેકવીરઃ ।
અથાઽમ્બિકેયો બહુભિશ્ચ યજ્ઞૈરીજે સપાણ્ડુશ્ચ મહાધનૌઘૈઃ ॥ ૧૧.૧૬૩॥

નૈષા વિરોધે કુરુપાણ્ડવાનાં તિષ્ઠેદિતિ વ્યાસ ઉદીર્ણસદ્ગુણઃ ।
સ્વમાતરં સ્વાશ્રમમેવ નિન્યે સ્નુષે ચ તસ્યા યયતુઃ સ્મ તામનુ ॥ ૧૧.૧૬૪॥

સુતોક્તમાર્ગેણ વિચિન્ત્ય તં હરિં સુતાત્મના બ્રહ્મતયા ચસા યયૌ ।
પરં પદં વૈષ્ણવમેવ કૃષ્ણપ્રસાદતઃ સ્વર્યયતુઃ સ્નુષે ચ ॥ ૧૧.૧૬૫॥

માતા ચસા વિદુરસ્યાઽપ લોકં વૈરિઞ્ચમન્વેવ ગતાઽમ્બિકાં સતી ।
વ્યાસપ્રસાદાત્સુતસદ્ગુણૈશ્ચ કાલેન મુક્તિં ચ જગામ સન્મતિઃ ॥ ૧૧.૧૬૬॥

અમ્બાલિકાઽપિ ક્રમયોગતોઽગાત્પરાં ગતિં નૈવ તથાઽમ્બિકા યયૌ ।
યથાયથા વિષ્ણુપરશ્ચિદાત્મા તથાતથા હ્યસ્ય ગતિઃ પરત્ર ॥ ૧૧.૧૬૭॥

પાણ્ડુસ્તતો રાજ્યભરં નિધાય જ્યેષ્ઠેઽનુજે ચૈવ વનં જગામ ।

પત્નીદ્વયેનાનુગતો બદર્યામુવાસ નારાયણપાલિતાયામ્ ॥ ૧૧.૧૬૮॥

ચ્ક્ષિક્ષ્વ્।ગૃહાશ્રમેણૈવ વને નિવાસં કુર્વન્ સ ભોગાન્ બુભુજે તપશ્ચ ।
ચક્રે મુનીન્દ્રૈઃ સહિતો જગત્પતિં રમાપતિં ભક્તિયુતોઽભિપૂજયન્ ॥ ૧૧.૧૬૯॥

સ કામતો હરિણત્વં પ્રપન્નં દૈવાદૃષિં ગ્રામ્યકર્માનુષક્તમ્ ।
વિદ્ધ્વા શાપં પ્રાપ તસ્માત્સ્ત્રિયા યુઙ્મરિષ્યસીત્યેવ બભૂવ ચાઽર્તઃ ॥ ૧૧.૧૭૦॥

ન્યસિષ્ણુરુક્તઃ પૃથયા સ નેતિ પ્રણામપૂર્વં ન્યવસત્તથૈવ ।
તાભ્યાં સમેતઃ શતશ‌ૃઙ્ગપર્વતે નારાયણસ્યાઽશ્રમમધ્યગે પુરઃ ॥ ૧૧.૧૭૧॥

તપો નિતાન્તં સ ચચાર તાભ્યાં સમન્વિતઃ કૃષ્ણપદામ્બુજાશ્રયઃ ।
તત્સઙ્ગપૂતદ્યુસરિદ્વરામ્ભઃ સદાવગાહાતિપવિત્રિતાઙ્ગઃ ॥ ૧૧.૧૭૨॥

એતસ્મિન્નેવ કાલે કમલભવશિવાગ્રેસરાઃ શક્રપૂર્વા ।
ભૂમ્યા પાપાત્મદૈત્યૈર્ભુવિ કૃતનિલયૈરાક્રમં ચાસહન્ત્યા ।
ઈયુર્દેવાદિદેવં શરણમજમુરું પૂર્ણષાડ્ગુણ્યમૂર્તિં
ક્ષીરાબ્ધૌ નાગભોગે શયિતમનુપમાનન્દસન્દોહદેહમ્ ॥ ૧૧.૧૭૩॥

ઊચુઃ પરં પુરુષમેનમનન્તશક્તિં સૂક્તેન તેઽબ્જજમુખા અપિ પૌરુષેણ ।
સ્તુત્વા ધરાઽસુરવરાક્રમણાત્પરેશ ખિન્ના યતો હિ વિમુખાસ્તવ તેઽતિપાપાઃ ॥ ૧૧.૧૭૪॥

દુસ્સઙ્ગતિર્ભવતિ ભારવદેવ દેવ નિત્યં સતામપિ હિ નઃ શ‌ૃણુ વાક્યમીશ ।
પૂર્વં હતા દિતિસુતા ભવતા રણેષુ હ્યસ્મત્પ્રિયાર્થમધુના ભુવિ તેઽભિજાતાઃ ॥ ૧૧.૧૭૫॥

આસીત્પુરા દિતિસુતૈરમરોત્તમાનાં સઙ્ગ્રામ ઉત્તમગજાશ્વરથદ્વિપદ્ભિઃ ।
અક્ષોહિણી શતમહૌઘમહૌઘમેવ સૈન્યં સુરાત્મકમભૂત્પરમાસ્ત્રયુક્તમ્ ।
તસ્માન્મહૌઘગુણમાસ મહાસુરાણાં સૈન્યં શિલાગિરિમહાસ્ત્રધરં સુઘોરમ્ ॥ ૧૧.૧૭૬॥

તેષાં રથાશ્ચ બહુનલ્વપરિપ્રમાણા દેવાસુરપ્રવરકાર્મુકબાણપૂર્ણાઃ ।
નાનામ્બરાભરણવેષવરાયુધાઢ્યા દેવાસુરાઃ સસૃપુરાશુ પરસ્પરં તે ॥ ૧૧.૧૭૭॥

જઘ્નુર્ગિરીન્દ્રતલ્। અમુષ્ટિમહાસ્ત્રશસ્ત્રૈશ્ચક્રુર્નદીશ્ચ રુધિરૌઘવહા મહૌઘમ્ ।
તત્ર સ્મ દેવવૃષભૈરસુરેશચમ્વા યુદ્ધે નિસૂદિત ઉતૌઘબલૈઃ શતાં શઃ ॥ ૧૧.૧૭૮॥

અથાઽત્મસેનામવમૃદ્યમાનાં વીક્ષ્યાસુરઃ શમ્બરનામધેયઃ ।
ચ્ક્ષ્ક્ષ્વ્।સસાર માયાવિદસં હ્યમાયો વરાદુમેશસ્ય સુરાન્ વિમોહયન્ ॥ ૧૧.૧૭૯॥

માયાસહસ્રેણ સુરાઃ સમર્દિતા રણે વિષેદુઃ શશિસૂર્યમુખ્યાઃ ।
તાન્ વીક્ષ્ય વજ્રી પરમાં તુ વિદ્યાં સ્વયમ્ભુદત્તાં પ્રયુયોજ વૈષ્ણવીમ્ ॥ ૧૧.૧૮૦॥

સમસ્તમાયાપહયા તયૈવ વરાદ્રમેશસ્ય સદાઽપ્યસં હ્યયા ।
માયા વિનેશુર્દિતિજેન્દ્રસૃષ્ટા વારીશવહ્નીન્દ્રમુખાશ્ચ મોચિતાઃ ॥ ૧૧.૧૮૧॥

યમેન્દુસૂર્યાદિસુરાસ્તતોઽસુરાન્નિજઘ્નુરાપ્યાયિતવિક્રમાસ્તદા ।
સુરેશ્વરેણોર્જિતપૌરુષા બહૂન્ વજ્રેણ વજ્રી નિજઘાન શમ્બરમ્ ॥ ૧૧.૧૮૨॥

તસ્મિન્ હતે દાનવલોકપાલે દિતેઃ સુતા દુદ્રુવુરિન્દ્રભીષિતાઃ ।
તાન્ વિપ્રચિત્તિર્વિનિવાર્ય ધન્વી સસાર શક્રપ્રમુખાન્ સુરોત્તમાન્ ॥ ૧૧.૧૮૩॥

વરાદજેયેન વિધાતુરેવ સુરોત્તમાં સ્તેન શરૈર્નિપાતિતાન્ ।
નિરીક્ષ્ય શક્રં ચ વિમોહિતં દ્રુતં ન્યવારયત્તં પવનઃ શરૌઘૈઃ ॥ ૧૧.૧૮૪॥

અસ્ત્રાણિ તસ્યાસ્ત્રવરૈર્નિવાર્ય ચિક્ષેપ તસ્યોરસિ કાઞ્ચનીં ગદામ્ ।
વિચૂર્ણિતોઽસૌ નિપપાત મેરૌ મહાબલો વાયુબલાભિનુન્નઃ ॥ ૧૧.૧૮૫॥

અથાઽસસાદાઽશુ સ કાલનેમિસ્ત્વદાજ્ઞયા યસ્ય વરં દદૌ પુરા ।
સર્વૈરજેયત્વમજોઽસુરઃ સસહસ્રશીર્ષો દ્વિસહસ્રબાહુયુક્ ॥ ૧૧.૧૮૬॥

તમાપતન્તં પ્રસમીક્ષ્ય મારુતસ્ત્વદાજ્ઞયા દત્તવરસ્ત્વયૈવ ।
હન્તવ્ય ઇત્યસ્મરદાશુ હિ ત્વાં તદાઽવિરાસીસ્ત્વમનન્તપૌરુષઃ ॥ ૧૧.૧૮૭॥

તમસ્ત્રશસ્ત્રાણિ બહૂનિ બાહુભિઃ પ્રવર્ષમાણં ભુવનાપ્તદેહમ્ ।
ચક્રેણ બાહૂન્ વિનિકૃત્ય કાનિ ચ ન્યવેદયશ્ચાઽશુ યમાય પાપમ્ ॥ ૧૧.૧૮૮॥

તતોઽસુરાસ્તે નિહતા અશેષાસ્ત્વયા ત્રિભાગા નિહતાશ્ચતુર્થમ્ ।
જઘાન વાયુઃ પુનરેવ જાતાસ્તે ભૂતલ્. એ ધર્મબલોપપન્નાઃ ॥ ૧૧.૧૮૯॥

રાજ્ઞાં મહાવં શસુજન્મનાં તુ તેષામભૂદ્ધર્મમતિર્વિપાપા ।
શિક્ષામવાપ્ય દ્વિજપુઙ્ગવાનાં ત્વદ્ભક્તિરપ્યેષુ હિકાચન સ્યાત્ ॥ ૧૧.૧૯૦॥

ચ્ક્ષિવ। ત્વદ્ભક્તિલેશાભિયુતઃ સુકર્મા વ્રજેન્ન પાપાં તુ ગતિં કથઞ્ચિત્ ।
દૈત્યેશ્વરાણાં ચ તમોઽન્ધમેવ ત્વયૈવ ક્લૃપ્તં નનુ સત્યકામ ॥ ૧૧.૧૯૧॥

ધર્મસ્ય મિથ્યાત્વભયાદ્વયં ત્વામથાપિવા દૈત્યશુભાપ્તિભીષા ।
સમ્પ્રાર્થયામો દિતિજાન્ સુકર્મણસ્ત્વદ્ભક્તિતશ્ચ્યાવયિતું ચ શીઘ્રમ્ ॥ ૧૧.૧૯૨॥

ય ઉગ્રસેનઃ સુરગાયકઃ સ જાતો યદુષ્વેષ તથાઽભિધેયઃ ।
તવૈવ સેવાર્થમમુષ્ય પુત્રો જાતોઽસુરઃ કાલનેમિઃ સ ઈશ ॥ ૧૧.૧૯૩॥

યસ્ત્વત્પ્રિયાર્થં ન હતો હિ વાયુના ભવત્પ્રસાદાત્પરમીશિતાઽપિ ।
સ એષ ભોજેષુ પુનશ્ચ જાતો વરાદુમેશસ્ય પરૈરજેયઃ ॥ ૧૧.૧૯૪॥

સ ઔગ્રસેને જનિતોઽસુરેણ ક્ષેત્રે હિ તદ્રૂપધરેણ માયયા ।
ગન્ધર્વિજેન દ્રમિલ્. એન નામ્ના કં સો જિતો યેન વરાચ્છચીપતિઃ ॥ ૧૧.૧૯૫॥

જિત્વા જલેશં ચ હૃતાનિ યેન રત્નાનિ યક્ષાશ્ચ જિતાઃ શિવસ્ય ।
કન્યાવનાર્થં મગધાધિપેન પ્રયોજિતાસ્તે ચ હૃતે બલેન ॥ ૧૧.૧૯૬॥

સ વિપ્રચિત્તિશ્ચ જરાસુતોઽભૂદ્વરાદ્વિધાતુર્ગિરિશસ્ય ચૈવ ।
સર્વૈરજેયો બલમુત્તમં તતો જ્ઞાત્વૈવ કં સસ્ય મુદા સુતે દદૌ ॥ ૧૧.૧૯૭॥

નિવારયામાસ ન કં સમુદ્ધતં શક્તોઽપિ યો યસ્ય બલે ન કશ્ચિત્ ।
તુલ્યઃ પૃથિવ્યાં વિવરેષુ વા ક્વચિદ્વશે બલાદ્યો નૃપતીશ્ચ ચક્રે ॥ ૧૧.૧૯૮॥

હતૌ પુરા યૌ મધુકૈટભાખ્યૌ ત્વયૈવ હં સો ડિભકશ્ચ જાતૌ ।
વરાદજેયૌ ગિરિશસ્ય વીરૌ ભક્તૌ જરાસન્ધમનુ સ્મ તૌ શિવે ॥ ૧૧.૧૯૯॥

અન્યેઽપિ ભૂમાવસુરાઃ પ્રજાતાસ્ત્વયા હતા યે સુરદૈત્યસઙ્ગરે ।
અન્યે તથૈવાન્ધતમઃ પ્રપેદિરે કાર્યા તથૈષાં ચ તમોગતિસ્ત્વયા ॥ ૧૧.૨૦૦॥

વ્યાસાવતારે નિહતસ્ત્વયાયઃ કલિઃ સુશાસ્ત્રોક્તિભિરેવ ચાદ્ય ।
શ્રુત્વા ત્વદુક્તીઃ પુરુષેષુ તિષ્ઠન્નીષચ્ચકારેવ મનસ્ત્વયીશ ॥ ૧૧.૨૦૧॥

રામાત્મના યે નિહતાશ્ચ રાક્ષસા દૃષ્ટ્વા બલં તેઽપિ તદા તવાદ્ય ।
સમં તવાન્યં નહિ ચિન્તયન્તિ સુપાપિનોઽપીશ તથા હનૂમતઃ ॥ ૧૧.૨૦૨॥

ચ્ક્ષ્વી।યે કેશવ ત્વદ્બહુમાનયુક્તાસ્તથૈવ વાયૌ નહિ તે તમોઽન્ધમ્ ।
યોગ્યાઃ પ્રવેષ્ટું તદતો હિ માર્ગાચ્ચાલ્યાસ્ત્વયા જનયિત્વૈવ ભૂમૌ ॥ ૧૧.૨૦૩॥

નિતાન્તમુત્પાદ્ય ભવદ્વિરોધં તથાચ વાયૌ બહુભિઃ પ્રકારૈઃ ।
સર્વેષુ દેવેષુ ચપાતનીયાસ્તમસ્યથાન્ધે કલિપૂર્વકાસુરાઃ ॥ ૧૧.૨૦૪॥

હતૌ ચ યૌ રાવણકુમ્ભકર્ણૌ ત્વયા ત્વદીયૌ પ્રતિહારપાલૌ ।
મહાસુરાવેશયુતૌ હિ શાપાત્ત્વયૈવ તાવદ્ય વિમોચનીયૌ ॥ ૧૧.૨૦૫॥

યૌ તૌ તવારી હ તયોઃ પ્રવિષ્ટૌ દૈત્યૌ તુ તાવન્ધતમઃ પ્રવેશ્યૌ ।
યૌ તૌ ત્વદીયૌ ભવદીયવેશ્મ ત્વયા પુનઃ પ્રાપણીયૌ પરેશ ॥ ૧૧.૨૦૬॥

આવિશ્ય યો બલિમઞ્જશ્ચકાર પ્રતીપમસ્માસુ તથા ત્વયીશ ।
સ ચાસુરો બલિનામૈવ ભૂમૌ સાલ્વો નામ્ના બ્રહ્મદત્તસ્ય જાતઃ ॥ ૧૧.૨૦૭॥

માયામયં તેન વિમાનમગ્ર્યમભેદ્યમાપ્તં સકલૈર્ગિરીશાત્ ।

વિદ્રાવિતો યો બહુશસ્ત્વયૈવ રામસ્વરૂપેણ ભૃગૂદ્વહેન ॥ ૧૧.૨૦૮॥

નાસૌ હતઃ શક્તિમતાઽપિ તત્ર કૃષ્ણાવતારે સ મયૈવ વધ્યઃ ।
ઇત્યાત્મસઙ્કુલ્પમૃતં વિધાતું સ ચાત્ર વધ્યો ભવતાઽતિપાપી ॥ ૧૧.૨૦૯॥

યદીયમારુહ્ય વિમાનમસ્ય પિતાઽભવત્સૌભપતિશ્ચ નામ્ના ।
યદા સભીષ્મેણ જિતઃ પિતાઽસ્ય તદા સ સાલ્વસ્તપસિ સ્થિતોઽભૂત્ ॥ ૧૧.૨૧૦॥

સ ચાદ્ય તસ્માત્તપસો નિવૃત્તો જરાસુતસ્યાનુમતે સ્થિતો હિ ।
અનન્યવધ્યો ભવતાઽદ્ય વધ્યઃ સ પ્રાપણીયશ્ચ તમસ્યથોગ્રે ॥ ૧૧.૨૧૧॥

યો બાણમાવિશ્ય મહાસુરોઽભૂત્સ્થિતઃ સ નામ્ના પ્રથિતોઽપિ બાણઃ ।
સ કીચકો નામ બભૂવ રુદ્રવરાદવધ્યઃ સ તમઃ પ્રવેશ્યઃ ॥ ૧૧.૨૧૨॥

અતસ્ત્વયા ભુવ્યવતીર્ય દેવકાર્યાણિ કાર્યાણ્યખિલાનિ દેવ ।
ત્વમેવ દેવેશ ગતિઃ સુરાણાં બ્રહ્મેશશક્રેન્દુયમાદિકાનામ્ ॥ ૧૧.૨૧૩॥

ત્વમેવ નિત્યોદિતપૂર્ણશક્તિસ્ત્વમેવ નિત્યોદિતપૂર્ણચિદ્ઘનઃ ।
ચક્ષ્વીઇ। ત્વમેવ નિત્યોદિતપૂર્ણસત્સુખસ્ત્વાદૃઙ્નકશ્ચિત્કુત એવ તેઽધિકઃ ॥ ૧૧.૨૧૪॥

ઇતીરિતો દેવવરૈરુદારગુણાર્ણવોઽક્ષોભ્યતમામૃતાકૃતિઃ ।
ઉત્થાય તસ્માત્પ્રયયાવનન્તસોમાર્કકાન્તિદ્યુતિરન્વિતોઽમરૈઃ ॥ ૧૧.૨૧૫॥

સ મેરુમાપ્યાઽહ ચતુર્મુખં પ્રભુર્યત્ર ત્વયોક્તોઽસ્મિ હિ તત્ર સર્વથા ।
પ્રાદુર્ભવિષ્યે ભવતો હિ ભક્ત્યા વશસ્ત્વિવાહં સ્વવશોઽપિ ચેચ્છયા ॥ ૧૧.૨૧૬॥

બ્રહ્મા પ્રણમ્યાઽહ તમાત્મકારણં પ્રાદાં પુરાઽહં વરુણાય ગાઃ શુભાઃ ।
જહાર તાસ્તસ્ય પિતાઽમૃતસ્રવાઃ સ કશ્યપો દ્રાક્સહસાઽતિગર્વિતઃ ॥ ૧૧.૨૧૭॥

માત્રા ત્વદિત્યા ચ તથા સુરભ્યા પ્રચોદિતેનૈવ હૃતાસુ તાસુ ।
શ્રુત્વા જલેશાત્સ મયા તુશપ્તઃ ક્ષત્રેષુ ગોજીવનકો ભવેતિ ॥ ૧૧.૨૧૮॥

શૂરાત્સ જાતો બહુગોધનાઢ્યો ભૂમૌ યમાહુર્વસુદેવ ઇત્યપિ ।
તસ્યૈવ ભાર્યા ત્વદિતિશ્ચ દેવકી બભૂવ ચાન્યા સુરભિશ્ચ રોહિણી ॥ ૧૧.૨૧૯॥

તત્ત્વં ભવસ્વાઽશુ ચ દેવકીસુતસ્તથૈવ યો દ્રોણનામા વસુઃ સઃ ।
સ્વભાર્યયા ધરયા ત્વત્પિતૃત્વં પ્રાપ્તું તપસ્તેપ ઉદારમાનસઃ ॥ ૧૧.૨૨૦॥

તસ્મૈ વરઃ સ મયા સન્નિસૃષ્ટઃ સ ચાઽસ નન્દાખ્ય ઉતાસ્ય ભાર્યા ।
નમ્ના યશોદા સચ શૂરતાતસુતસ્ય વૈશ્યાપ્રભવોઽથ ગોપઃ ॥ ૧૧.૨૨૧॥

તૌ દેવકીવસુદેવૌ ચ તેપતુસ્તપસ્ત્વદીયં સુતમિચ્છમાનૌ ।
ત્વામેવ તસ્માત્પ્રથમં પ્રદર્શ્ય તત્ર સ્વરૂપં હિ તતો વ્રજં વ્રજ ॥ ૧૧.૨૨૨॥

ઇતીરિતે સોઽબ્જભવેન કેશવસ્તથેતિ ચોક્ત્વા પુનરાહ દેવતાઃ ।
સર્વે ભવન્તો ભવતાઽશુ માનુષે કાર્યાનુસારેણ યથાનુરૂપતઃ ॥ ૧૧.૨૨૩॥

અથાવતીર્ણાઃ સકલાશ્ચ દેવતા યથાયથૈવાઽહ હરિસ્તથાતથા ।
વિત્તેશ્વરઃ પૂર્વમભૂદ્ધિ ભૌમાદ્ધરેઃ સુતત્વેઽપિ તદિચ્છયાઽસુરાત્ ॥ ૧૧.૨૨૪॥

પાપેન તેનાપહૃતો હિ હસ્તી શિવપ્રદત્તઃ સુપ્રતીકાભિધાનઃ ।
તદર્થમેવાસ્ય સુતોઽભિજાતો ધનેશ્વરો ભગદત્તાભિધાનઃ ॥ ૧૧.૨૨૫॥

ચ્ક્ષિક્ષક્ષ્ંઅહાસુરસ્યાં શયુતઃ સ એવ રુદ્રાવેશાદ્બલવાનસ્ત્રવાંશ્ચ ।
શિષ્યો મહેન્દ્રસ્ય હતે બભૂવ તાતે સ્વધર્માભિરતશ્ચ નિત્યમ્ ॥ ૧૧.૨૨૬॥

અભૂચ્છિનિર્નામ યદુપ્રવીરસ્તસ્યાઽત્મજઃ સત્યક આસ તસ્માત્ ।
કૃષ્ણઃ પક્ષો યુયુધાનાભિધેયો ગુરુત્મતોઽં શેન યુતો બભૂવ ॥ ૧૧.૨૨૭॥

યઃ સં વહો નામ મરુત્તદં શશ્ચક્રસ્ય વિષ્ણોશ્ચ બભૂવ તસ્મિન્ ।
યદુષ્વભૂદ્ધૃદિકો ભોજવં શે સિતઃ પક્ષસ્તસ્ય સુતો બભૂવ ॥ ૧૧.૨૨૮॥

સ પાઞ્ચજન્યાં શયુતો મરુત્સુ તથાઽં શયુક્તઃ પ્રવહસ્ય વીરઃ ।
નામાસ્ય ચાભૂત્કૃતવર્મેત્યથાન્યે યે યાદવાસ્તેઽપિ સુરાઃ સગોપાઃ ॥ ૧૧.૨૨૯॥

યે પાણ્ડવાનામભવન્ સહાયા દેવાશ્ચ દેવાનુચરાઃ સમસ્તાઃ ।
અન્યે તુ સર્વેઽપ્યસુરા હિ મધ્યમા યેમાનુષાસ્તે ચલબુદ્ધિપ્રવૃત્તયઃ ॥ ૧૧.૨૩૦॥

લિ ઙ્ગં સુરાણાં હિ પરૈવ ભક્તિર્વિષ્ણૌ તદન્યેષુ ચ તત્પ્રતીપતા ।
અતોઽત્ર યેયે હરિભક્તિતત્પરાસ્તેતે સુરાસ્તદ્ભરિતા વિશેષતઃ ॥ ૧૧.૨૩૧॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
ભગવદવતારપ્રતિજ્ઞા નામ એકાદશોઽધ્યાયઃ ॥

## અથ દ્વાદશોઽધ્યાયઃ ।

(પાણ્ડવોત્પત્તિઃ )

ૐ । બભૂવ ગન્ધર્વમુનિસ્તુ દેવકઃ સ આસ સેવાર્થમથાઽહુકાદ્ધરેઃ ।
સ ઉગ્રસેનાવરજસ્તથૈવ નામાસ્ય તસ્માદજનિ સ્મ દેવકી ॥ ૧૨.૧॥

અન્યાશ્ચ યાઃ કાશ્યપસ્યૈવ ભાર્યા જ્યેષ્ઠાં તુ તામાહુક આત્મપુત્રીમ્ ।

ચકાર તસ્માદ્ધિ પિતૃષ્વસા સા સ્વસા ચ કં સસ્ય બભૂવ દેવકી ॥ ૧૨.૨॥

સૈવાદિતિર્વસુદેવસ્ય દત્તા તસ્યા રથં મઙ્ગલ્। અં કં સ એવ ।
સં યાપયામાસ તદા હિ વાયુર્જગાદ વાક્યં ગગનસ્થિતોઽમુમ્ ॥ ૧૨.૩॥

વિનાઽપરાધં ન તતો ગરીયસો ન માતુલો વધ્યતામેતિ વિષ્ણોઃ ।
લોકસ્ય ધર્માનનુવર્તતોઽતઃ પિત્રોર્વિરોધાર્થમુવાચ વાયુઃ ॥ ૧૨.૪॥

મૃત્યુસ્તવાસ્યા ભવિતાઽષ્ટમઃ સુતો મૂઢેતિ ચોક્તો જગૃહે કૃપાણામ્ ।
પુત્રાન્ સમર્પ્યાસ્ય ચ શૂરસૂનુર્વિમોચ્ય તાં તત્સહિતો ગૃહં યયૌ ॥ ૧૨.૫॥

ષટ્કન્યકાશ્ચાવરજા ગૃહીતાસ્તેનૈવ તાભિશ્ચ મુમોદ શૂરજઃ ।
બાહ્લીકપુત્રી ચ પુરા ગૃહીતા પુરાઽસ્ય ભાર્યા સુરભિસ્તુ રોહિણી ॥ ૧૨.૬॥

રાજ્ઞશ્ચ કાશિપ્રભવસ્ય કન્યાં સ પુત્રિકાપુત્રકધર્મતોઽવહત્ ।
કન્યાં તથા કરવીરેશ્વરસ્ય ધર્મેણ તેનૈવ દિતિં દનું પુરા ॥ ૧૨.૭॥

યો મન્યતે વિષ્ણુરેવાહમિત્યસૌ પાપો વેનઃ પૌણ્ડ્રકો વાસુદેવઃ ।
જાતઃ પુનઃ શૂરજાત્કાશિજાયાં નાન્યો મત્તો વિષ્ણુરસ્તીતિ વાદી ॥ ૧૨.૮॥

ધુન્ધુર્હતો યો હરિણા મધોઃ સુત આસીત્સુતાયાં કરવીરેશ્વરસ્ય ।
સૃગાલનામા વાસુદેવોઽથ દેવકીમુદૂહ્ય શૌરિર્નિ યયાવુભે તે ॥ ૧૨.૯॥

તતસ્તુ તૌ વૃષ્ણિશત્રૂ બભૂવતુર્જ્યેષ્ઠૌ સુતૌ શૂરસુતસ્ય નિત્યમ્ ।
અન્યાસુ ચ પ્રાપ સુતાનુદારાન્ દેવાવતારાન્ વસુદેવોઽખિલજ્ઞઃ ॥ ૧૨.૧૦॥

યેયે હિ દેવાઃ પૃથિવીં ગતાસ્તે સર્વે શિષ્યાઃ સત્યવતીસુતસ્ય ।
વિષ્ણુજ્ઞાનં પ્રાપ્ય સર્વેઽખિલજ્ઞાસ્તસ્માદ્યથાયોગ્યતયા બભૂવુઃ ॥ ૧૨.૧૧॥

ષ્ક્ષ્ક્ષ્કંઅરીચિજાઃ ષણ્મુનયો બભૂવુસ્તે દેવકં પ્રાહસન્ કાર્ષ્યહેતોઃ ।
તચ્છાપતઃ કાલનેમિપ્રસૂતા અવધ્યતાર્થં તપ એવ ચક્રુઃ ॥ ૧૨.૧૨॥

ધાતા પ્રાદાદ્વરમેષાં તથૈવ શશાપ તાન્ ક્ષ્માતલ્। એ સમ્ભવધ્વમ્ ।
તત્ર સ્વતાતો ભવતાં નિહન્તેત્યાત્માન્યતો વરલિપ્સૂન્ હિરણ્યઃ ॥ ૧૨.૧૩॥

દુર્ગા તદા તાન્ ભગવત્પ્રચોદિતા પ્રસ્વાપયિત્વા પ્રચકર્ષ કાયાત્ ।
ક્રમાત્સમાવેશયદાશુ દેવકીગર્ભાશયે તાન્ચહનઅ્ચ કં સઃ ॥ ૧૨.૧૪॥

તદા મુનીન્દ્રસં યુતઃ સદો વિધાતુરુત્તમમ્ ।
સ પાણ્ડુરામુમૈચ્છત ન્ચવારયંશ્ચ તે તદા ॥ ૧૨.૧૫॥

યદર્થમેવ જાયતે પુમાન્ હિ તસ્ય સોઽકૃતેઃ ।
શુભાં ગતિં નતુ વ્રજેદ્ધ્રુવં તતો ન્યવારયન્ ॥ ૧૨.૧૬॥

પ્રધાનદેવતાજને નિયોક્તુમાત્મનઃ પ્રિયામ્ ।
બભૂવ પાણ્ડુરેષ તદ્વિના ન તસ્ય સદ્ગતિઃ ॥ ૧૨.૧૭॥

અતોઽન્યથા સુતાનૃતે વ્રજન્તિ સદ્ગતિં નરાઃ ।
યથૈવ ધર્મભૂષણો જગામ સન્ધ્યકાસુતઃ ॥ ૧૨.૧૮॥

તદા કલિશ્ચ રાક્ષસા બભૂવુરિન્દ્રજિન્મુખાઃ ।
વિચિત્રવીર્યનન્દનપ્રિયોદરે હિ ગર્ભગાઃ ॥ ૧૨.૧૯॥

તદસ્ય સોઽનુજોઽશ ૃણોન્મુનીન્દ્રદૂષિતં ચ તત્ ।
વિચાર્ય તુ પ્રિયામિદં જગાદ વાસુદેવધીઃ ॥ ૧૨.૨૦॥

ય એવ મદ્ગુણાધિકસ્તતઃ સુતં સમાપ્નુહિ ।
સુતં વિના ન નો ગતિં શુભાં વદન્તિ સાધવઃ ॥ ૧૨.૨૧॥

તદસ્ય કૃચ્છ્રતો વચઃ પૃથાઽગ્રહીજ્જગાદ ચ ।
મમાસ્તિ દેવવશ્યદો મનૂત્તમઃ સુતામિદઃ ॥ ૧૨.૨૨॥

ન તે સુરાનૃતે સમઃ સુરેષુ કેચિદેવ ચ ।
ચ્ક્ષક્ષીઽતસ્તવાધિકં સુરં કમાહ્વયે ત્વદાજ્ઞયા ॥ ૧૨.૨૩॥

વરં સમાશ્રિતા પતિં વ્રજેત યા તતોઽધમમ્ ।
ન કાચિદસ્તિ નિષ્કૃતિર્ન ભર્તૃલોકમૃચ્છતિ ॥ ૧૨.૨૪॥

કૃતે પુરા સુરાસ્તથા સુરાઙ્ગનાશ્ચ કેવલમ્ ।
નિમિત્તતોઽપિ તાઃ ક્વચિન્ન તાન્ વિહાય મેનિરે ॥ ૧૨.૨૫॥

મનોવચઃ શરીરતો યતો હિ તાઃ પતિવ્રતાઃ ।
અનાદિકાલતોઽભવં સ્તતઃ સભર્તૃકાઃ સદા ॥ ૧૨.૨૬॥

સ્વભર્તૃભિર્વિમુક્તિગાઃ સહૈવ તા ભવન્તિ હિ ।
કૃતાન્તમાપ્ય ચાપ્સરઃ સ્ત્રિયો બભૂવુરૂર્જિતાઃ ॥ ૧૨.૨૭॥

અનાવૃતાશ્ચ તાસ્તથા યથેષ્ટભર્તૃકાઃ સદા ।
અતસ્તુ તા ન ભર્તૃભિર્વિમુક્તિમાપુરુત્તમામ્ ॥ ૧૨.૨૮॥

સુરસ્ત્રિયોઽતિકારણૈર્યદાઽન્યથા સ્થિતાસ્તદા ।
દુરન્વયાત્સુદુઃ સહા વિપત્તતો ભવિષ્યતિ ॥ ૧૨.૨૯॥

અયુક્તમુક્તવાં સ્તતો ભવાં સ્તથાઽપિ તે વચઃ ।
અલઙ્ઘ્યમેવ મે તતો વદસ્વ પુત્રદં સુરમ્ ॥ ૧૨.૩૦॥

ઇતીરિતોઽબ્રવીન્નૃપો ન ધર્મતો વિના ભુવઃ ।
નૃપોઽભિરક્ષિતા ભવેત્તદાહ્વયાઽશુ તં વિભુમ્ ॥ ૧૨.૩૧॥

સ ધર્મજઃ સુધાર્મિકો ભવેદ્ધિ સૂનુરુત્તમઃ ।
ઇતીરિતે તયા યમઃ સમાહુતોઽગમદ્દ્રુતમ્ ॥ ૧૨.૩૨॥

તતશ્ચ સદ્ય એવ સા સુષાવ પુત્રમુત્તમમ્ ।
યુધિષ્ઠિરં યમો હિ સ પ્રપેદ આત્મપુત્રતામ્ ॥ ૧૨.૩૩॥

યમે સુતે તુ કુન્તિતઃ પ્રજાત એવ સૌબલી ।
અદં હ્યતેર્ષ્યયા ચિરં બભઞ્જ ગર્ભમેવ ચ ॥ ૧૨.૩૪॥

સ્ક્ષ્ક્ષ્ક્ષીઇ।સ્વગર્ભપાતને કૃતે તયા જગામ કેશવઃ ।
પરાશરાત્મજો ન્યધાદ્ઘટેષુ તાન્ વિભાગશઃ ॥ ૧૨.૩૫॥

શતાત્મના વિભેદિતાઃ શતં સુયોધનાદયઃ ।
બભૂવુરન્વહં તતઃ શતોત્તરા ચ દુઃ શલ્. આ ॥ ૧૨.૩૬॥

સ દેવકાર્યસિદ્ધયે રરક્ષ ગર્ભમીશ્વરઃ ।
પરાશરાત્મજઃ પ્રભુર્વિચિત્રવીર્યજોદ્ભવમ્ ॥ ૧૨.૩૭॥

કલિઃ સુયોધનોઽજનિ પ્રભૂતબાહુવીર્યયુક્ ।
પ્રધાનવાયુસન્નિધેર્બલાધિકત્વમસ્ય તત્ ॥ ૧૨.૩૮॥

પુરા હિ મેરુમૂર્ધનિ ત્રિવિષ્ટપૌકસાં વચઃ ।
વસુન્ધરાતલ્. ઓદ્ભવોન્મુખં શ્રુતં દિતેઃ સુતૈઃ ॥ ૧૨.૩૯॥

તતસ્તુ તે ત્રિલોચનં તપોબલાદતોષયન્ ।
વૃતશ્ચ દેવકણ્ટકો હ્યવધ્ય એવ સર્વતઃ ॥ ૧૨.૪૦॥

વરાદુમાપતેસ્તતઃ કલિઃ સ દેવકણ્ટકઃ ।
બભૂવ વજ્રકાયયુક્સુયોધનો મહાબલઃ ॥ ૧૨.૪૧॥

અવધ્ય એવ સર્વતઃ સુયોધને સમુત્થિતે ।
ઘૃતાભિપૂર્ણકુમ્ભતઃ સ ઇન્દ્રજિત્સમુત્થિતઃ ॥ ૧૨.૪૨॥

સ દુઃખશાસનોઽભવત્તતોઽતિકાયસમ્ભવઃ ।

સ વૈ વિકર્ણ ઉચ્યતે તતઃ ખરોऽભવદ્બલી ॥ ૧૨.૪૩॥

સ ચિત્રસેનનામકસ્તથાऽપરે ચ રાક્ષસાઃ ।
બભૂવુરુગ્રપૌરુષા વિચિત્રવીર્યજાત્મજાઃ ॥ ૧૨.૪૪॥

સમસ્તદોષરૂપિણઃ શરીરિણો હિ તેऽભવન્ ।
મૃષેતિ નામતો હિ યા બભૂવ દુઃ શલ્. આऽસુરી ॥ ૧૨.૪૫॥

કુહૂપ્રવેશસં યુતા યયાऽર્જુનેર્વધાય હિ ।
તપઃ કૃતં ત્રિશૂલિને તતો હિ સાऽત્ર જજ્ઞુષી ॥ ૧૨.૪૬॥

ચ્ક્ષિક્ષ્વ્।તયોદિતો હિ સૈન્ધવો બભૂવ કારણં વધે ।
સ કાલકેયદાનવસ્તદર્થમાસ ભૂતલ્. એ ॥ ૧૨.૪૭॥

તથાऽસ નિરૃથાભિધોऽનુજઃ સ નિરૃતેરભૂત્ ।
સ નાસિકામરુદ્યુતો યુયુત્સુનામકઃ કૃતી ॥ ૧૨.૪૮॥

સ ચાऽમ્બિકેયવીર્યજઃ સુયોધનાદનન્તરઃ ।
બભૂવ વૈશ્યકન્યકોદરોદ્ભવો હરિપ્રિયઃ ॥ ૧૨.૪૯॥

યુધિષ્ઠિરે જાત ઉવાચ પાણ્ડુર્બાહ્વોર્બલાજ્જ્ઞાનબલાચ્ચ ધર્મઃ ।
રક્ષ્યોऽન્યથા નાશમુપૈતિ તસ્માદ્બલદ્વયાઢ્યં પ્રસુવાऽશુ પુત્રમ્ ॥ ૧૨.૫૦॥

યજ્ઞાધિકો હ્યશ્વમેધો મનુષ્યદૃશ્યેષુ તેજસ્સ્વધિકો હિ ભાસ્કરઃ ।
વર્ણેષુ વિપ્રઃ સકલૈર્ગુણૈર્વરો દેવેષુ વાયુઃ પુરુષોત્તમાદૃતે ॥ ૧૨.૫૧॥

વિશેષતોऽપ્યેષ પિતૈવ મે પ્રભુર્વ્યાસાત્મના વિષ્ણુરનન્તપૌરુષઃ ।
અતશ્ચ તે શ્વશુરો નૈવ યોગ્યો દાતું પુત્રં વાયુમુપૈહિ તત્પ્રભુમ્ ॥ ૧૨.૫૨॥

ઇતીરિતે પૃથયાऽહૂતવાયુસં સ્પર્શમાત્રાદભવદ્બલદ્વયે ।
સમો જગત્યસ્તિ ન યસ્ય કશ્ચિદ્ભક્તૌ ચ વિષ્ણોર્ભગવદ્વશઃ સુતઃ ॥ ૧૨.૫૩॥

સ વાયુરેવાભવદત્ર ભીમનામા ભૃતા માઃ સકલા હિ યસ્મિન્ ।
સ વિષ્ણુનેશેન યુતઃ સદૈવ નામ્ના સેનો ભીમસેનસ્તતોऽસૌ ॥ ૧૨.૫૪॥

તજ્જન્મમાત્રેણ ધરા વિદારિતા શાર્દૂલભીતાજ્જનનીકરાદ્યદા ।
પપાત સઞ્ચૂર્ણિત એવ પર્વતસ્તેનાખિલોऽસૌ શતશ◌ૃઙ્ગનામા ॥ ૧૨.૫૫॥

તસ્મિન્ પ્રજાતે રુધિરં પ્રસુસ્રુવુર્મહાસુરા વાહનસૈન્યસં યુતાઃ ।
નૃપાશ્ચ તત્પક્ષભવાઃ સમસ્તાસ્તદા ભીતા અસુરા રાક્ષસાશ્ચ ॥ ૧૨.૫૬॥

અવર્દ્ધતાત્રૈવ વૃકોદરો વને મુદં સુરાણામભિતઃ પ્રવર્દ્ધયન્ ।
તદૈવ શેષો હરિણોદિતોઽવિશદ્ગર્ભં સુતાયા અપિ દેવકસ્ય ॥ ૧૨.૫૭॥

સ તત્ર માસત્રયમુષ્ય દુર્ગયાઽપવાહિતો રોહિણીગર્ભમાશુ ।
ચ્ક્ષ્ક્ષ્વ્ઇયુક્તયા કેશવેનાથ તત્ર સ્થિત્વા માસાન્ સપ્ત જાતઃ પૃથિવ્યામ્ ॥ ૧૨.૫૮॥

સ નામતો બલદેવો બલાઢ્યો બભૂવ તસ્યાનુ જનાર્દનઃ પ્રભુઃ ।
આવિર્બભૂવાખિલસદ્ગુણૈકપૂર્ણઃ સુતાયામિહ દેવકસ્ય ॥ ૧૨.૫૯॥

યઃ સત્સુખજ્ઞાનબલૈકદેહઃ સમસ્તદોષસ્પર્શોજ્ઝિતઃ સદા ।
અવ્યક્તતત્કાર્યમયો ન યસ્ય દેહઃ કુતશ્ચિત્ક્વચ સ હ્યજો હરિઃ ॥ ૧૨.૬૦॥

ન શુક્લરક્તપ્રભવોઽસ્ય કાયસ્તથાઽપિ તત્પુત્રતયોચ્યતે મૃષા ।
જનસ્ય મોહાય શરીરતોઽસ્યા યદાવિરાસીદમલસ્વરૂપઃ ॥ ૧૨.૬૧॥

આવિશ્ય પૂર્વં વસુદેવમેવ વિવેશ તસ્માદૃતુકાલ એવ ।
દેવીમુવાસાત્ર ચ સપ્ત માસાન્ સાર્ધાં સ્તતશ્ચાઽવિરભૂદજોઽપિ ॥ ૧૨.૬૨॥

યથા પુરા સ્તમ્ભત આવિરાસીદશુક્લરક્તોઽપિ નૃસિં હરૂપઃ ।
તથૈવ કૃષ્ણોઽપિ તથાઽપિ માતાપિતૃક્રમાદેવ વિમોહયત્યજઃ ॥ ૧૨.૬૩॥

પિતૃક્રમં મોહનાર્થં સમેતિ ન તાવતા શુક્લતો રક્તતશ્ચ ।
જાતોઽસ્ય દેહસ્ત્વિતિ દર્શનાય સશઙ્ખચક્રાબ્જગદઃ સ દૃષ્ટઃ ॥ ૧૨.૬૪॥

અનેકસૂર્યાભકિરીટયુક્તો વિદ્યુત્પ્રભે કુણ્ડલે ધારયંશ્ચ ।
પીતામ્બરો વનમાલી સ્વનન્તસૂર્યોરુદીપ્તિર્દદૃશે સુખાર્ણવઃ ॥ ૧૨.૬૫॥

સ કઞ્ચયોનિપ્રમુખૈઃ સુરૈઃ સ્તુતઃ પિત્રા ચ માત્રા ચજગાદ શૂરજમ્ ।
નયસ્વ માં નન્દગૃહાનિતિ સ્મ તતો બભૂવ દ્વિભુજો જનાર્દનઃ ॥ ૧૨.૬૬॥

તદૈવ જાતા ચ હરેરનુજ્ઞયા દુર્ગાભિધા શ્રીરનુ નન્દપત્ન્યામ્ ।
તતસ્તમાદાય હરિં યયૌ સ શૂરાત્મજો નન્દગૃહાન્નિશીથે ॥ ૧૨.૬૭॥

સં સ્થાપ્ય તં તત્ર તથૈવ કન્યકામાદાય તસ્માત્સ્વગૃહં પુનર્યયૌ ।
હત્વા સ્વસુર્ગર્ભષટ્કં ક્રમેણ મત્વાઽષ્ટમં તત્ર જગામ કં સઃ ॥ ૧૨.૬૮॥

ગર્ભં દેવક્યાં સપ્તમં મેનિરે હિ લોકાઃ સુતં ત્વષ્ટમં તાં તતઃ સઃ ।
મત્વા હન્તું પાદયોઃ સમ્પ્રગૃહ્ય સમ્પોથયામાસ શિલાતલ્. એ ચ ॥ ૧૨.૬૯॥

ચ્ક્ષ્ક્ષ્વ।સા તદ્ધસ્તાત્ક્ષિપ્રમુત્પત્ય દેવી ખેઽદૃશ્યતૈવાષ્ટભુજા સમગ્રા ।
બ્રહ્માદિભિઃ પૂજ્યમાના સમગ્રૈરત્યદ્ભુતાકારવતી હરિપ્રિયા ॥ ૧૨.૭૦॥

ઉવાચ ચાઽર્યા તવ મૃત્યુરત્ર ક્વચિત્પ્રજાતો હિ વૃથૈવ પાપ ।
અનાગસીં માં વિનિહન્તુમિચ્છસ્યશક્યકાર્યે તવ ચોદ્યમોઽયમ્ ॥ ૧૨.૭૧॥

ઉક્ત્વેતિ કં સં પુનરેવ દેવકીતલ્પેઽશયદ્બાલરૂપૈવ દુર્ગા ।
નાજ્ઞાસિષુસ્તામથ કેચનાત્ર ઋતે હિ માતાપિતરૌ ગુણાઢ્યામ્ ॥ ૧૨.૭૨॥

શ્રુત્વા તયોક્તં તુ તદૈવ કં સઃ પશ્ચાત્તાપાદ્વસુદેવં સભાર્યમ્ ।
પ્રસાદયામાસ પુનઃ પુનશ્ચ વિહાય કોપં ચ તમૂચતુસ્તૌ ।
સુખસ્ય દુઃખસ્ય ચ રાજસિં હ નાન્યઃ કર્તા વાસુદેવાદિતિ સ્મ ॥ ૧૨.૭૩॥

આનીય કં સોઽથ ગૃહે સ્વમન્ત્રિણઃ પ્રોવાચ કન્યાવચનં સમસ્તમ્ ।
શ્રુત્વા ચ તે પ્રોચુરત્યન્તપાપાઃ કાર્યં બાલાનાં નિધનં સર્વશોઽપિ ॥ ૧૨.૭૪॥

તથેતિ તાં સ્તત્ર નિયુજ્ય કં સો ગૃહં સ્વકીયં પ્રવિવેશ પાપઃ ।
ચેરુશ્ચ તે બાલવધે સદોદ્યતા હિં સાવિહારાઃ સતતં સ્વભાવતઃ ॥ ૧૨.૭૫॥

અથ પ્રભાતે શયને શયાનમપશ્યતામબ્જદલાયતાક્ષમ્ ।
કૃષ્ણં યશોદા ચ તથૈવ નન્દ આનન્દસાન્દ્રાકૃતિમપ્રમેયમ્ ॥ ૧૨.૭૬॥

મેનાત એતૌ નિજપુત્રમેનં સ્રષ્ટારમબ્જપ્રભવસ્ય ચેશમ્ ।
મહોત્સવાત્પૂર્ણમનાશ્ચ નન્દો વિપ્રેભ્યોઽદાલ્લક્ષમિતાસ્તદા ગાઃ ॥ ૧૨.૭૭॥

સુવર્ણરત્નામ્બરભૂષણાનાં બહૂનિ ગોજીવિગણાધિનાથઃ ।
પ્રાદાદથોપાયનપાણયસ્તં ગોપા યશોદાં ચ મુદા સ્ત્રિયોઽગમન્ ॥ ૧૨.૭૮॥

ગતેષુ તત્રૈવ દિનેષુ કેષુચિજ્જગામ કં સસ્ય ગૃહં સ નન્દઃ ।
પૂર્વં હિ નન્દઃ સ કરં હિ દાતું બૃહદ્વનાન્નિસ્સૃતઃ પ્રાપ કૃષ્ણામ્ ॥ ૧૨.૭૯॥

સહાઽગતા તેન તદા યશોદા સુષાવ દુર્ગામથ તત્ર શૌરિઃ ।
નિધાય કૃષ્ણં પ્રતિગૃહ્ય કન્યકાં ગૃહં યયૌ નન્દ ઉવાસ તત્ર ॥ ૧૨.૮૦॥

નિરુષ્ય તસ્મિન્ યમુનાતટે સ માસં યયૌ દ્રષ્ટુકામો નરેન્દ્રમ્ ।
રક્ષક્ષ્વી।રાજ્ઞેઽથ તં દત્તકરં દદર્શ શૂરાત્મજો વાક્યમુવાચ ચૈનમ્ ॥ ૧૨.૮૧॥

યાહ્યુત્પાતાઃ સન્તિ તત્રેત્યુદીરિતો જગામ શીઘ્રં યમુનાં સ નન્દઃ ।
રાત્રાવેવાઽગચ્છમાને તુ નન્દે કં સસ્ય ધાત્રી તુજગામ ગોષ્ઠમ્ ॥ ૧૨.૮૨॥

સા પૂતના નામ નિજસ્વરૂપમાચ્છાદ્ય રાત્રૌ શુભરૂપવચ્ચ ।
વિવેશ નન્દસ્ય ગૃહં બૃહદ્વનપ્રાન્તે હિ માર્ગે રચિતં પ્રયાણે ॥ ૧૨.૮૩॥

તીરે ભગિન્યાસ્તુ યમસ્ય વસ્ત્રગૃહે શયાનં પુરુષોત્તમં તમ્ ।
જગ્રાહ માત્રા તુયશોદયા તયા નિદ્રાયુજા પ્રેક્ષ્યમાણા શુભેવ ॥ ૧૨.૮૪॥

તન્માયયા ધર્ષિતા નિદ્રયા ચ ન્યવારયન્નૈવ હિ નન્દજાયા ।
તયા પ્રદત્તં સ્તનમીશિતાऽસુભિઃ પપૌ સહૈવાऽશુ જનાર્દનઃ પ્રભુઃ ॥ ૧૨.૮૫॥

મૃતા સ્વરૂપેણ સુભીષણેન પપાત સા વ્યાપ્ય વનં સમસ્તમ્ ।
તદાऽગમન્નન્દગોપોऽપિ તત્ર દૃષ્ટ્વા ચ સર્વેऽપ્યભવન્ સુવિસ્મિતાઃ ॥ ૧૨.૮૬॥

સા તાટકા ચોર્વશિસમ્પ્રવિષ્ટા કૃષ્ણાવધ્યાનાન્નિરયં જગામ ।
સા તૂર્વશી કૃષ્ણભુક્તસ્તનેન પૂતા સ્વર્ગં પ્રયયૌ તત્ક્ષણેન ॥ ૧૨.૮૭॥

સા તુમ્બુરોઃ સઙ્ગત આવિવેશ રક્ષસ્તનું શાપતો વિત્તપસ્ય ।
કૃષ્ણસ્પર્શાચ્છુદ્ધરૂપા પુનર્દિવં યયૌ તુષ્ટે કિમલભ્યં રમેશે ॥ ૧૨.૮૮॥

યદાऽપ દેવશ્ચતુરઃ સ માસાં સ્તદોપનિષ્ક્રામણમસ્ય ચાऽસીત્ ।
જન્મર્ક્ષમસ્મિન્ દિન એવ ચાऽસીત્પ્રાતઃ કિઞ્ચિત્તત્ર મહોત્સવોऽભવત્ ॥ ૧૨.૮૯॥

તદા શયાનઃ શકટસ્ય સોऽધઃ પદાऽક્ષિપત્તં દિતિજં નિહન્તુમ્ ।
અનઃ સમાવિશ્ય દિતેઃ સુતોऽસૌ સ્થિતઃ પ્રતીપાય હરેઃ સુપાપઃ ॥ ૧૨.૯૦॥

ક્ષિપ્તોऽનસિસ્થઃ શકટાક્ષનામા સ વિષ્ણુનેત્વા સહિતઃ પપાત ।
મમાર ચાऽશુ પ્રતિભગ્નગાત્રો વ્યત્યસ્તચક્રાક્ષમભૂદનશ્ચ ॥ ૧૨.૯૧॥

સસમ્ભ્રમાત્તં પ્રતિગૃહ્ય શઙ્કયા કૃષ્ણં યશોદા દ્વિજવર્યસૂક્તિભિઃ ।
સા સ્નાપયામાસ નદીતટાત્તદા સમાગતા નન્દવચોऽભિતર્જિતા ॥ ૧૨.૯૨॥

ચ્ક્ષક્ષ્વીઇઅત્વા તુ તં કં સભૃત્યં સ કૃષ્ણઃ શિશ્યે પુનઃ શિશુવત્સર્વશાસ્તા ।
એવં ગોપાન્ પ્રીણયન્ બાલકેલ્. ઈવિનોદતો ન્યવસત્તત્ર દેવઃ ॥ ૧૨.૯૩॥

વિવર્દ્ધમાને લોકદૃષ્ટ્યૈવ કૃષ્ણે પાણ્ડુઃ પુનઃ પ્રાહ પૃથામિદં વચઃ ।
ધર્મિષ્ઠો નૌ સૂનુરગ્રે બભૂવ બલદ્વયજ્યેષ્ઠ ઉતાપરશ્ચ ॥ ૧૨.૯૪॥

યદૈક એવાતિબલોપપન્નો ભવેત્તદા તેન પરાવમર્દે ।
પ્રવર્ત્યમાને સ્વપુરં હરેયુશ્ચૌર્યાત્પરે તદ્વયમત્ર યોગ્યમ્ ॥ ૧૨.૯૫॥

શસ્ત્રાસ્ત્રવિદ્વીર્યવાન્નૌ સુતોऽન્યો ભવેદ્દેવં તાદૃશમાહ્વયાતઃ ।
શેષસ્તવ ભ્રાતૃસુતોऽભિજાતસ્તસ્માન્નાસૌ સુતદાનાય યોગ્યઃ ॥ ૧૨.૯૬॥

નવૈ સુપર્ણઃ સુતદો નરેષુ પ્રજાયતે વાऽસ્ય યતસ્તથાऽજ્ઞા ।
કૃતા પુરા હરિણા શઙ્કરસ્તુ ક્રોધાત્મકઃ પાલને નૈવ યોગ્યઃ ॥ ૧૨.૯૭॥

અતો મહેન્દ્રો બલવાનનન્તરસ્તેષાં સમાહ્વાનમિહાર્હતિ સ્વરાટ્ ।
ઇતીરિતા સાઽહ્વયદાશુ વાસવં તતઃ પ્રજજ્ઞે સ્વયમેવ શક્રઃ ॥ ૧૨.૯૮॥

સ ચાર્જુનો નામ નરાં શયુક્તો વિષ્ણ્વાવેશી બલવાનસ્ત્રવેત્તા ।
રૂપ્યન્યઃ સ્યાત્સૂનુરિત્યુચ્યમાના ભર્ત્રા કુન્તી નેતિ તં પ્રાહ ધર્માત્ ॥ ૧૨.૯૯॥

બૃહસ્પતિઃ પૂર્વમભૂદ્ધરેઃ પદં સં સેવિતું પવનાવેશયુક્તઃ ।
સ ઉદ્ધવો નામ યદુપ્રવીરાજ્જાતો વિદ્વાનુપગવનામધેયાત્ ॥ ૧૨.૧૦૦॥

દ્રોણાત્મકં નાતિતરાં સ્વસેવકં કુર્યાદ્ધરિર્મામિતિ ભૂય એવ ।
સ ઉદ્ધવાત્માઽવતતાર યાદવેષ્વાસેવનાર્થં પુરુષોત્તમસ્ય ॥ ૧૨.૧૦૧॥

બૃહસ્પતેરેવ સ સર્વવિદ્યા અવાપ મન્ત્રી નિપુણઃ સર્વવેત્તા ।
વર્ષત્રયે તત્પરતઃ સ સાત્યકિર્જજ્ઞે દિને ચેકિતાનશ્ચ તસ્મિન્ ॥ ૧૨.૧૦૨॥

મરુત્સુ નામ પ્રતિભો યદુષ્વભૂત્સ ચેકિતાનો હરિસેવનાર્થમ્ ।
તદૈવ જાતો હૃદિકાત્મજોઽપિ વર્ષત્રયે તત્પરતો યુધિષ્ઠિરઃ ॥ ૧૨.૧૦૩॥

તતોઽબ્દતો ભૂભરસં હૃતૌ હરેરઙ્ગત્વમાપ્તું ગિરિશોઽજનિષ્ટ ।
અશ્વત્થામા નામતોઽશ્વધ્વનિં સ યસ્માચ્ચક્રે જાયમાનો મહાત્મા ॥ ૧૨.૧૦૪॥

ચ્ક્ષ્ક્ષ્ક્ષ્ક્ષ્।સ સર્વવિદ્બલવાનસ્ત્રવેત્તા કૃપસ્વસાયાં દ્રોણવીર્યોદ્ભવોઽભૂત્ ।
દુર્યોધનસ્તચ્ચતુર્થેઽહ્નિ જાતસ્તસ્યાપરેદ્યુર્ભીમસેનઃ સુધીરઃ ॥ ૧૨.૧૦૫॥

યદા સમાસદ્વિતયી બભૂવ તદા રોહિણ્યાં બલદેવોઽભિજાતઃ ।
બલી ગુણાઢ્યઃ સર્વવેદી ચ એવ સેવાખિન્નો લક્ષ્મણોઽગ્રે હરેર્ભૂત્ ॥ ૧૨.૧૦૬॥

યદા હિ પુત્રાન્ વિનિહન્તુમેતૌ સહૈવ બદ્ધૌ ગતિશ‌ૃઙ્ખલાયામ્ ।
કં સેનાપાપૌ દેવકીશૂરપુત્રૌ વિયોજિતાઃ શૌરિભાર્યાઃ પરાશ્ચ ॥ ૧૨.૧૦૭॥

વિનિશ્ચયાર્થં દેવકીગર્ભજાનામન્યા ભાર્યા ધૃતગર્ભાઃ સ કં સઃ ।
સ્થાનાન્તરે પ્રસવો યાવદાસાં સં સ્થાપયામાસ સુપાપબુદ્ધિઃ ॥ ૧૨.૧૦૮॥

હેતોરેતસ્માદ્રોહિણી નન્દગેહે પ્રસૂત્યર્થં સ્થાપિતા તેન દેવી ।
લેભે પુત્રં ગોકુલે પૂર્ણચન્દ્રકાન્તાનનં બલભદ્રં સુશુભ્રમ્ ॥ ૧૨.૧૦૯॥

યદા ત્રિમાસઃ સ બભૂવ દેવસ્તદાઽવિરાસીત્પુરુષોત્તમોઽજઃ ।
કૃષ્ણશેષાવામુકામૌ સુતૌ હિ તપશ્ચક્રાતે દેવકીશૂરપુત્રૌ ॥ ૧૨.૧૧૦॥

વિષ્ણ્વાવેશી બલવાન્ યો ગુણાધિકઃ સ મે સુતઃ સ્યાદિતિ રોહિણી ચ ।

તેપે તપોઽતો હરિશુક્લકેશયુતઃ શેષો દેવકીરોહિણીજઃ ॥ ૧૨.૧૧૧॥

અવર્દ્ધતાસૌ હરિશુક્લકેશસમાવેશી ગોકુલે રૌહિણેયઃ ।
કૃષ્ણોઽપિ લીલા લલ્. ઇતાઃ પ્રદર્શયન્ બલદ્વિતીયો રમયામાસ ગોષ્ઠમ્ ॥ ૧૨.૧૧૨॥

સ પ્રાકૃતં શિશુમાત્માનમુચ્ચૈર્વિજાનન્ત્યા માતુરાદર્શનાય ।
વિજૃમ્ભમાણોઽખિલમાત્મસં સ્થં પ્રદર્શયામાસ કદાચિદીશઃ ॥ ૧૨.૧૧૩॥

સાઽણ્ડં મહાભૂતમનોઽભિમાનમહત્પ્રકૃત્યાવૃતમબ્જજાદિભિઃ ।
સુરૈઃ શિવેતૈર્નરદૈત્યસઙ્ઘૈર્યુતં દદર્શાસ્ય તનૌ યશોદા ॥ ૧૨.૧૧૪॥

ન્યમીલયચ્ચાક્ષિણી ભીતભીતા જુગૂહ ચાઽત્માનમથો રમેશઃ ।
વપુઃ સ્વકીયં સુખચિત્સ્વરૂપં પૂર્ણં સત્સુ જ્ઞાપયં સ્તદ્ધ્યદર્શયત્ ॥ ૧૨.૧૧૫॥

કદાચિત્તં લાલ્। અયન્તી યશોદા વોઢું નાશક્નોદ્ભૂરિભારાધિકાર્તા ।
ચ્ક્ષ્લ્ંઇધાય તં ભૂમિતલ્. એ સ્વકર્મ યદા ચક્રે દૈત્ય આગાત્સુઘોરઃ ॥ ૧૨.૧૧૬॥

તૃણાવર્તો નામતઃ કં સભૃત્યઃ સૃષ્ટ્વાઽત્યુગ્રં ચક્રવાતઃ શિશું તમ્ ।
આદાયાઽયાદન્તરિક્ષં સ તેન શસ્તઃ કણ્ઠગ્રાહસં રુદ્ધવાયુઃ ॥ ૧૨.૧૧૭॥

પપાત કૃષ્ણેન હતઃ શિલાતલ્। એ તૃણાવર્તઃ પર્વતોદગ્રદેહઃ ।
સુવિસ્મયં ચાઽપુરથો જનાસ્તે તૃણાવર્તં વીક્ષ્ય સઞ્ચૂર્ણિતાઙ્ગમ્ ॥ ૧૨.૧૧૮॥

અક્રુદ્ધ્યતાં કેશવોઽનુગ્રહાય શુભં સ્વયોગ્યાદધિકં નિહન્તુમ્ ।
સ ક્રુદ્ધ્યતાં નવનીતાદિ મૃષ્ણંશ્ચચાર દેવો નિજસત્સુખામ્બુધિઃ ॥ ૧૨.૧૧૯॥

યસ્મિન્નબ્દે ભાદ્રપદે સ માસે સિં હસ્થયોર્ગુરુરવ્યોઃ પરેશઃ ।
ઉદૈત્તતઃ ફાલ્ગુને ફલ્ગુનોઽભૂદ્વતે તતો માદ્રવતી બભાષે ॥ ૧૨.૧૨૦॥

જાતાઃ સુતાસ્તે પ્રવરાઃ પૃથાયામેકાઽનપત્યાઽહમતઃ પ્રસાદાત્ ।
તવૈવ ભૂયાસમહં સુતેતા વિધત્સ્વ કુન્તીં મમ મન્ત્રદાત્રીમ્ ॥ ૧૨.૧૨૧॥

ઇતીરિતઃ પ્રાહ પૃથાં સ માદ્યૈ દિશસ્વ મન્ત્રં સુતદં વરિષ્ઠમ્ ।
ઇત્યૂચિવાં સં પતિમાહ યાદવી દદ્યાં ત્વદર્થે તુ સકૃત્ફલાય ॥ ૧૨.૧૨૨॥

ઉવાચ માદ્યૈ સુતદં મનું ચ પુનઃ ફલં તે ન ભવિષ્યતીતિ ।
મન્ત્રં સમાદાય ચ મદ્રપુત્રી વ્યચિન્તયત્સ્યાં નુ કથં દ્વિપુત્રા ॥ ૧૨.૧૨૩॥

સદાઽવિયોગૌ દિવિજેષુ દસ્રૌ નચૈતયોર્નામભેદઃ ક્વચિદ્ધિ ।
એકા ભાર્યા સૈતયોરપ્યુષા હિ તદાયાતઃ સકૃદાવર્તનાદ્વૌ ॥ ૧૨.૧૨૪॥

ઇતીક્ષન્ત્યાઽકારિતાવશ્વિનૌ તૌ શીઘ્રપ્રાપ્તૌ પુત્રકૌ તત્પ્રસૂતૌ ।
તાવેવ દેવૌ નકુલઃ પૂર્વજાતઃ સહદેવોઽભૂત્પશ્ચિમસ્તૌ યમૌ ચ ॥ ૧૨.૧૨૫॥

પુનર્મનોઃ ફલવત્ત્વાય માદ્રી સમ્પ્રાર્થયામાસ પતિં તદુક્તા ।
પૃથાઽવાદીત્કુટિલૈષા મદાજ્ઞામૃતે દેવાવાહ્વયામાસ દસ્રૌ ॥ ૧૨.૧૨૬॥

અતો વિરોધં ચ મદાત્મજાનાં કુર્યાદિષેત્યેવ ભીતાં ન માં ત્વમ્ ।
નિયોક્તુમર્હઃ પુનરેવ રાજન્નિતીરિતોઽસૌ વિરરામ ક્ષિતીશઃ ॥ ૧૨.૧૨૭॥

ચ્ક્ષ્લ। વિશેષનામ્નૈવ સમાહુતઃ સુતાન્ દદ્યુઃ સુરા ઇત્યવિશેષિતં યયોઃ ।
વિશેષનામાપિ સમાહ્વયત્તૌ મન્ત્રાવૃત્તિર્નામભેદેઽસ્ય ચોક્તા ॥ ૧૨.૧૨૮॥

યુધિષ્ઠિરાદ્યેષુ ચતુર્ષુ વાયુઃ સમાવિષ્ટઃ ફલ્ગુનેઽથો વિશેષાત્ ।
યુધિષ્ઠિરે સૌમ્યરૂપેણ વિષ્ટો વીરેણ રૂપેણ ધનઞ્જયેઽસૌ ॥ ૧૨.૧૨૯॥

શ‍ૃઙ્ગારરૂપં કેવલં દર્શયાનો વિવેશ વાયુર્યમજૌ પ્રધાનઃ ।
શ‍ૃઙ્ગારકૈવલ્યમભીપ્સમાનઃ પાણ્ડુર્હિ પુત્રં ચકમે ચતુર્થમ્ ॥ ૧૨.૧૩૦॥

શ‍ૃઙ્ગારરૂપો નકુલે વિશેષાત્સુનીતિરૂપઃ સહદેવં વિવેશ ।
ગુણૈઃ સમસ્તૈઃ સ્વયમેવ વાયુર્બભૂવ ભીમો જગદાન્તરાત્મા ॥ ૧૨.૧૩૧॥

સુપુલ્લવાકારતનુર્હિ કોમલ્। અઃ પ્રાયો જનૈઃ પ્રોચ્યતે રૂપશાલી ।
તતઃ સુજાતં વરવજ્રકાયૌ ભીમાર્જુનાવપ્યૃતે પાણ્ડુરૈચ્છત્ ॥ ૧૨.૧૩૨॥

અપ્રાકૃતાનાં તુ મનોહરં યદ્રૂપં દ્વાત્રિં શલ્લક્ષણોપેતમગ્ર્યમ્ ।
તન્મારુતો નકુલે કોમલ્. આભ એવં વાયુઃ પઞ્ચરૂપોઽત્ર ચાઽસીત્ ॥ ૧૨.૧૩૩॥

અતીતેન્દ્રા એવ તે વિષ્ણુષષ્ઠાઃ પૂર્વેન્દ્રોઽસૌ યજ્ઞનામા રમેશઃ ।
સ વૈ કૃષ્ણો વાયુરથ દ્વિતીયઃ સ ભીમસેનો ધર્મ આસીત્તૃતીયઃ ॥ ૧૨.૧૩૪॥

યુધિષ્ઠિરોઽસાવથ નાસત્યદસ્રૌ ક્રમાત્તાવેતૌ માદ્રવતીસુતૌ ચ ।
પુરન્દરઃ ષષ્ઠ ઉતાત્ર સપ્તમઃ સ એવૈકઃ ફલ્ગુનો હ્યેત ઇન્દ્રાઃ ॥ ૧૨.૧૩૫॥

ક્રમાત્સં સ્કારાન્ ક્ષત્રિયાણામવાપ્ય તેઽવર્દ્ધન્ત સ્વતવસો મહિત્વના ।
સર્વે સર્વજ્ઞાઃ સર્વધર્મોપપન્નાઃ સર્વે ભક્તાઃ કેશવેઽત્યન્તયુક્તાઃ ॥ ૧૨.૧૩૬॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
પાણ્ડવોત્પત્તિર્નામ દ્વાદશોઽધ્યાયઃ ॥

# અથ ત્રયોદશોઽધ્યાયઃ ।

(કંસવધઃ )

ૐ । ગર્ગઃ શૂરસુતોક્ત્યા વ્રજમાયાત્સાત્ત્વતાં પુરોધાઃ સઃ ।
ચક્રે ક્ષત્રિયયોગ્યાન્ સં સ્કારાન્ કૃષ્ણરોહિણીસૂન્વોઃ ॥ ૧૩.૧॥

ઊચે નન્દ સુતોઽયં તવ વિષ્ણોર્નાવમો ગુણૈઃ સર્વૈઃ ।
સર્વે ચૈતત્ત્રાતાઃ સુખમાપ્સ્યન્ત્યુન્નતં ભવત્પૂર્વાઃ ॥ ૧૩.૨॥

ઇત્યુક્તઃ સ મુમોદ પ્રયયૌ ગર્ગોઽપિ કેશવોઽથાઽધઃ ।
સ્વપદૈરગ્રજયુક્તશ્ચક્રે પુણ્યં વ્રજન્ વ્રજોદ્દેશમ્ ॥ ૧૩.૩॥

સ કદાચિચ્છિશુભાવં કુર્વન્ત્યા માતુરાત્મનો ભૂયઃ ।
અપનેતું પરમેશો મૃદં જઘાસેક્ષતાં વયસ્યાનામ્ ॥ ૧૩.૪॥

માત્રોપાલબ્ધ ઈશો મુખવિવૃતિમકર્નામ્બ મૃદ્ભક્ષિતાઽહમ્ ।
પશ્યેત્યાસ્યાન્તરે તુ પ્રકૃતિવિકૃતિયુક્સા જગત્પર્યપશ્યત્ ।
ઇત્થં દેવોઽત્યચિન્ત્યામપરદુરધિગાં શક્તિમુચ્ચાં પ્રદર્શ્ય
પ્રાયો જ્ઞાતાત્મતત્ત્વાં પુનરપિ ભગવાનાવૃણોદાત્મશક્ત્યા ॥ ૧૩.૫॥

ઇતિ પ્રભુઃ સ લીલયા હરિર્જગદ્વિડમ્બયન્ ।
ચચાર ગોષ્ઠમણ્ડલેઽપ્યનન્તસૌખ્યચિદ્ઘનઃ ॥ ૧૩.૬॥

કદાચિદીશ્વરઃ સ્તનં પિબન્ યશોદયા પયઃ ।
શ◌ૃતં નિધાતુમુજ્ઝિતો બભઞ્જ દધ્યમત્રકમ્ ॥ ૧૩.૭॥

સ મથ્યમાનદધ્યુરુપ્રજાતમિન્દુસન્નિભમ્ ।
નવં હિ નીતમાદદે રહો જઘાસ ચેશિતા ॥ ૧૩.૮॥

પ્રજાયતે હિ યત્કુલે યથા યુગં યથા વયઃ ।
તથા પ્રવર્તનં ભવેદ્દિવૌકસાં સમુદ્ભવે ॥ ૧૩.૯॥

ઇતિ સ્વધર્મમુત્તમં દિવૌકસાં પ્રદર્શયન્ ।
અધર્મપાવકોઽપિ સન્ વિડમ્બતે જનાર્દનઃ ॥ ૧૩.૧૦॥

ન્ક્લીઇંઋતિર્યગાદિરૂપકઃ સ બાલ્યયૌવનાદિ યત્ ।
ક્રિયાશ્ચ તત્તદુદ્ભવાઃ કરોતિ શાશ્વતોઽપિ સન્ ॥ ૧૩.૧૧॥

સ વિપ્રરાજગોપકસ્વરૂપકસ્તદુદ્ભવાઃ ।
તદાતદા વિચેષ્ટતે ક્રિયાઃ સુરાન્ વિશિક્ષયન્ ॥ ૧૩.૧૨॥

તથાઽપ્યનન્યદેવતાસમં નિજં બલં પ્રભુઃ ।
પ્રકાશયન્ પુનઃ પુનઃ પ્રદર્શયત્યજો ગુણાન્ ॥ ૧૩.૧૩॥

અથાઽત્તયષ્ટિમીક્ષ્ય તાં સ્વમાતરં જગદ્ગુરુઃ ।
પ્રપુપ્લુવે તમન્વયાન્મનોવિદૂરમઙ્ગના ॥ ૧૩.૧૪॥

પુનઃ સમીક્ષ્ય તચ્છ્રમં જગામ તત્કરગ્રહમ્ ।
પ્રભુઃ સ્વભક્તવશ્યતાં પ્રકાશયન્નુરુક્રમઃ ॥ ૧૩.૧૫॥

સદા વિમુક્તમીશ્વરં નિબદ્ધુમઞ્જસાઽદદે ।
યદૈવ દામ ગોપિકા ન તત્પુપૂર તં પ્રતિ ॥ ૧૩.૧૬॥

સમસ્તદામસઞ્ચયઃ સુસન્ધિતોઽપ્યપૂર્ણતામ્ ।
યયાવનન્તવિગ્રહે શિશુત્વસમ્પ્રદર્શકે ॥ ૧૩.૧૭॥

અબન્ધયોગ્યતાં પ્રભુઃ પ્રદર્શ્ય લીલયા પુનઃ ।
સ એકવત્સપાશકાન્તરં ગતોઽખિલમ્ભરઃ ॥ ૧૩.૧૮॥

સુતસ્ય માતૃવશ્યતાં પ્રદર્શ્ય ધર્મમીશ્વરઃ ।
બભઞ્જ તૌ દિવિસ્પૃશૌ યમાર્જુનૌ સુરાત્મજૌ ॥ ૧૩.૧૯॥

પુરા ધુનિશ્ચુમુસ્તથાઽપિ પૂતનાસમન્વિતૌ ।
અનોક્ષસં યુતૌ તપઃ પ્રચક્રતુઃ શિવાં પ્રતિ ।
તયા વરોઽપ્યવધ્યતા ચતુર્ષુ ચ પ્રયોજિતઃ ॥ ૧૩.૨૦॥

અનન્તરં તૃણોદ્ભૃમિસ્તપોઽચરદ્વરં ચ તમ્ ।
અવાપ તે ત્રયો હતાઃ શિશુસ્વરૂપવિષ્ણુના ॥ ૧૩.૨૧॥

ધુનિશ્ચુમુશ્ચ તૌ તરૂ સમાશ્રિતૌ નિસૂદિતૌ ।
ષ્ક્ષ્લવ્।તરુપ્રભઙ્ગતોઽમુના તરૂ ચશાપસમ્ભવૌ ॥ ૧૩.૨૨॥

પુરા હિનારદાન્તિકે દિગમ્બરૌ શશાપ સઃ ।
ધનેશપુત્રકૌ દ્રુતં તરુત્વમાપ્નુતં ત્વિતિ ॥ ૧૩.૨૩॥

તતો હિ તૌ નિજાં તનું હરેઃ પ્રસાદતઃ શુભૌ ।
અવાપતુઃ સ્તુતિં પ્રભોર્વિધાય જગ્મતુર્ગૃહમ્ ॥ ૧૩.૨૪॥

નલ્। અકૂબરમણિગ્રીવૌ મોચયિત્વા તુશાપતઃ ।
વાસુદેવોઽથ ગોપાલૈર્વિસ્મિતૈરભિવીક્ષિતઃ ॥ ૧૩.૨૫॥

વૃન્દાવનયિયાસુઃ સ નન્દસૂનુર્બૃહદ્વને ।

સસર્જ રોમકૂપેભ્યો વૃકાન્ વ્યાઘ્રસમાન્ બલે ॥ ૧૩.૨૬॥

અનેકકોટિસઙ્ઘૈસ્તૈઃ પીડ્યમાના વ્રજાલયાઃ ।
યુયુર્વૃન્દાવનં નિત્યાનન્દમાદાય નન્દજમ્ ॥ ૧૩.૨૭॥

ઇન્દિરાપતિરાનન્દપૂર્ણો વૃન્દાવને પ્રભુઃ ।
નન્દયામાસ નન્દાદીનુદ્દામતરચેષ્ટિતૈઃ ॥ ૧૩.૨૮॥

સ ચન્દ્રતો હસત્કાન્તવદનેનેન્દુવર્ચસા ।
સં યુતો રૌહિણેયેન વત્સપાલો બભૂવ હ ॥ ૧૩.૨૯॥

દૈત્યં સ વત્સતનુમપ્રમયઃ પ્રગૃહ્ય કં સાનુગં હરવરાદપરૈરવધ્યમ્ ।
પ્રક્ષિપ્ય વૃક્ષશિરસિ ન્યહનદ્બકોઽપિ કં સાનુગોઽથ વિભુમચ્યુતમાસસાદ ॥ ૧૩.૩૦॥

સ્કન્દપ્રસાદકવચઃ સ મુખે ચકાર ગોવિન્દમગ્નિવદમું પ્રદહન્તમુચ્ચૈઃ ।
ચચ્છર્દ તુણ્ડશિરસૈવ નિહન્તુમેતમાયાન્તમીક્ષ્ય જગૃહેઽસ્ય સ તુણ્ડમીશઃ ॥ ૧૩.૩૧॥

તુણ્ડદ્વયં યદુપતિઃ કરપલ્લવાભ્યાં સઙ્ગૃહ્ય ચાઽશુ વિદદાર હ પક્ષિદૈત્યમ્ ।
બ્રહ્માદિભિઃ કુસુમવર્ષિભિરીડ્યમાનઃ સાયં યયૌ વ્રજભુવં સહિતોઽગ્રજેન ॥ ૧૩.૩૨॥

એવં સ દેવવરવન્દિતપાદપદ્મો ગોપાલકેષુ વિહરન્ ભુવિ ષષ્ઠમબ્દમ્ ।
પ્રાપ્તો ગવામખિલપોઽપિ સ પાલકોઽભૂદ્વૃન્દાવનાન્તરગસાન્દ્રલતાવિતાને ॥ ૧૩.૩૩॥

ચ્ક્ષ્લ્વ્।જ્યેષ્ઠં વિહાય સ કદાચિદચિન્ત્યશક્તિર્ગોગોપગોગણયુતો યમુનાજલેષુ ।
રેમે ભવિષ્યદનુવીક્ષ્ય હિ ગોપદુઃખં તદ્બાધનાય નિજમગ્રમેષુ સોઽધાત્ ॥ ૧૩.૩૪॥

સ બ્રહ્મણો વરબલાદુરગં ત્વવધ્યં સર્વૈરવાર્યવિષવીર્યમૃતે સુપર્ણાત્ ।
વિજ્ઞાય તદ્વિષવિદૂષિતવારિપાનસન્નાન્ પશૂનપિ વયસ્યજનાન્ સ આવીત્ ॥ ૧૩.૩૫॥

તદ્દૃષ્ટિદિવ્યસુધયા સહસાઽભિવૃષ્ટાઃ સર્વેઽપિ જીવિતમવાપુરથોચ્ચશાખમ્ ।
"કૃષ્ણઃ કદમ્બમધિરુહ્ય તતોઽતિતુઙ્ગાદાસ્ફોટ્ય ગાઢરશનો ન્યપતદ્વિષોદે ॥ ૧૩.૩૬॥

સાર્પહ્રદઃ પુરુષસારનિપાતવેગસઙ્ક્ષોભિતોરગવિષોચ્છ્વસિતામ્બુરાશિઃ ।
પર્યુપ્લુતો વિષકષાયવિભીષણોર્મિભીમો ધનુઃ શતમનન્તબલસ્ય કિં તત્" (૭૦) ॥ ૧૩.૩૭॥

તં યામુનહ્રદવિલોલ્। અકમાપ્ય નાગઃ કાલ્। યો નિજૈઃ સમદશત્સહ વાસુદેવમ્ ।
ભોગૈર્બબન્ધ ચ નિજેશ્વરમેનમજ્ઞઃ સેહે તમીશ ઉત ભક્તિમતોઽપરાધમ્ ॥ ૧૩.૩૮॥

ઉત્પાતમીક્ષ્ય તુ તદાઽખિલગોપસઙ્ઘસ્તત્રાઽજગામ હલિના પ્રતિબોધિતોઽપિ ।
દૃષ્ટ્વા નિજાશ્રયજનસ્ય બહોઃ સુદુઃખં કૃષ્ણઃ સ્વભક્તમપિ નાગમમું મમર્દ ॥ ૧૩.૩૯॥

તસ્યોન્નતેષુ સ ફણેષુ નનર્ત કૃષ્ણો બ્રહ્માદિભિઃ કુસુમવર્ષિભિરીડ્યમાનઃ ।
આર્તો મુખૈરુરુ વમન્ રુધિરં સ નાગો નારાયણં તમરણં મનસા જગામ ॥ ૧૩.૪૦॥

તચ્ચિત્રતાણ્ડવવિરુગ્ણફણાતપત્રં રક્તં વમન્તમુરુ સન્નધિયં નિતાન્તમ્ ।
દૃષ્ટ્વાऽહિરાજમુપસેદુરમુષ્ય પત્ન્યો નેમુશ્ચ સર્વજગદાદિગુરું ભુવીશમ્ ॥ ૧૩.૪૧॥

તાભિઃ સ્તુતઃ સ ભગવાનમુના ચ તસ્મૈ દત્ત્વાऽભયં યમસહોદરવારિતોऽમુમ્ ।
ઉત્સૃજ્ય નિર્વિષજલાં યમુનાં ચકાર સં સ્તૂયમાનચરિતઃ સુરસિદ્ધસાધ્યૈઃ ॥ ૧૩.૪૨॥

ગોપૈર્બલાદિભિરુદીર્ણતરપ્રમોદૈઃ સાર્દ્ધં સમેત્ય ભગવાનરવિન્દનેત્રઃ ।
તાં રાત્રિમત્ર નિવસન્ યમુનાતટે સદાવાગ્નિમુદ્ધતબલં ચ પપૌ વ્રજાર્થે ॥ ૧૩.૪૩॥

ઇત્થં સુરાસુરગણૈરવિચિન્ત્યદિવ્યકર્માણિ ગોકુલગતેऽગણિતોરુશક્તૌ ।
કુર્વત્યજે વ્રજભુવામભવદ્વિનાશ ઉગ્રાભિધાદસુરતસ્તરુરૂપતોऽલમ્ ॥ ૧૩.૪૪॥

(૭૦) ભા. ઉ. ૧૦.૧૪.૬૭
ચ્ક્ષ્લ્વ। તદ્ગન્ધતો નૃપશુમુખ્યસમસ્તભૂતાન્યાપુર્મૃતિં બહલ્। અરોગનિપીડિતાનિ ।
ધાતુર્વરાજ્જગદભાવકૃતૈકબુદ્ધિર્વદ્ધ્યો ન કેનચિદસૌ તરુરૂપદૈત્યઃ ॥ ૧૩.૪૫॥

સઙ્કર્ષણેऽપિ તદુદારવિષાનુવિષ્ટે કૃષ્ણો નિજસ્પર્શતસ્તમપેતરોગમ્ ।
કૃત્વા બભઞ્જ વિષવૃક્ષમમું બલેન તસ્યાનુગૈઃ સહ તદાકૃતિભિઃ સમસ્તૈઃ ॥ ૧૩.૪૬॥

દૈત્યાંશ્ચ ગોવપુષ આત્તવરાન્ વિરિઞ્ચાન્મૃત્યૂજ્ઝિતાનપિ નિપાત્ય દદાહ વૃક્ષાન્ ।
વિક્રીડ્ય રામસહિતો યમુનાજલે સ નીરોગમાશુ કૃતવાન્ વ્રજમબ્જનાભઃ ॥ ૧૩.૪૭॥

સમ્પ્રોક્ષણોऽતિબલવીર્યયુતાનદમ્યાન્ સર્વૈર્ગિરીશવરતો દિતિજપ્રધાનાન્ ।
હત્વા સુતામલભદાશુ વિભુર્યશોદાભ્રાતુઃ સ કુમ્ભકસમાહ્વયિનોऽપિ નીલામ્ ॥ ૧૩.૪૮॥

યા પૂર્વજન્મનિ તપઃ પ્રથમૈવ ભાર્યા ભૂયાસમિત્યચરદસ્ય હિ સઙ્ગમો મે ।
સ્યાત્કૃષ્ણજન્મનિ સમસ્તવરાઙ્ગનાભ્યઃ પૂર્વં ત્વિતિ સ્મ તદિમાં પ્રથમં સ આપ ॥ ૧૩.૪૯॥

અગ્રે દ્વિજત્વત ઉપાવહદેષ નીલાં ગોપાઙ્ગના અપિ પુરા વરમાપિરે યત્ ।
સં સ્કારતઃ પ્રથમમેવ સુસઙ્ગમો નો ભૂયાત્તવેતિ પરમાપ્સરસઃ પુરા યાઃ ॥ ૧૩.૫૦॥

તત્રાથ કૃષ્ણમવદન્ સબલં વયસ્યાઃ પક્વાનિ તાલસુફલાન્યનુભોજયેતિ ।
ઇત્યર્થિતઃ સબલ આપ સ તાલવૃન્દં ગોપૈર્દુરાસદમતીવ હિ ધેનુકેન ॥ ૧૩.૫૧॥

વિઘ્નેશતો વરમવાપ્ય સ દુષ્ટદૈત્યો દીર્ઘાયુરુત્તમબલઃ કદનપ્રિયોऽભૂત્ ।
નિત્યોદ્ધતઃ સ ઉત રામમવેક્ષ્ય તાલવૃન્તાત્ફલાનિ ગલ્। અયન્તમથાભ્યધાવત્ ।
તસ્ય પ્રહારમભિકાઙ્ક્ષત આશુ પૃષ્ઠપાદૌ પ્રગૃહ્ય તૃણરાજશિરોऽહરત્સઃ ॥ ૧૩.૫૨॥

તસ્મિન્ હતે ખરતરે ખરરૂપદૈત્યે સર્વે ખરાશ્ચ ખરતાલવનાન્તરસ્થાઃ ।
પ્રાપુઃ ખરસ્વરતરા ખરરાક્ષસારિં કૃષ્ણં બલેન સહિતં નિહતાશ્ચ તેન ॥ ૧૩.૫૩॥

સર્વાન્નિહત્ય ખરરૂપધરાન્ સ દૈત્યાન્ વિઘ્નેશ્વરસ્ય વરતોઽન્યજનૈરવધ્યાન્ ।
પક્વાનિ તાલસુફલાનિ નિજેષુ ચાદાદ્દુર્વારપૌરુષગુણોદ્ભરિતો રમેશઃ ॥ ૧૩.૫૪॥

પક્ષદ્વયેન વિહરત્સ્વથ ગોપકેષુ દૈત્યઃ પ્રલમ્બ ઇતિ કં સવિસૃષ્ટ આગાત્ ।
કૃષ્ણસ્ય પક્ષિષુ જયત્સુ સ રામમેત્ય પાપઃ પરાજિત ઉવાહ તમુગ્રરૂપઃ ॥ ૧૩.૫૫॥

ભીતેન રોહિણિસુતેન હરિઃ સ્તુતોઽસૌ સ્વાવિષ્ટતામુપદિદેશ બલાભિપૂર્ત્યૈ ।
ચ્ક્ષ્લ્વી। તેનૈવ પૂરિતબલોઽમ્બરચારિણં તં પાપં પ્રલમ્બમુરુમુષ્ટિહતં ચકાર ॥ ૧૩.૫૬॥

તસ્મિન્ હતે સુરગણા બલદેવનામ રામસ્ય ચક્રુરતિતૃપ્તિયુતા હરિશ્ચ ।
વહ્નિં પપૌ પુનરપિ પ્રદહન્તમુચ્ચૈર્ગોપાંશ્ચ ગોગણમગણ્યગુણાર્ણવોઽપાત્ ॥ ૧૩.૫૭॥

કૃષ્ણં કદાચિદતિદૂરગતં વયસ્યા ઊચુઃ ક્ષુધાઽર્દિતતરા વયમિત્યુદારમ્ ।
સોઽપ્યાહ સત્રમિહ વિપ્રગણાશ્ચરન્તિ તાન્ યાચતેતિ પરિપૂર્ણસમસ્તકામઃ ॥ ૧૩.૫૮॥

તાન્ પ્રાપ્ય કામમનવાપ્ય પુનશ્ચ ગોપાઃ કૃષ્ણં સમાપુરથ તાનવદત્સ દેવઃ ।
પત્નીઃ સમર્થયતમદ્વચનાદિતિ સ્મ ચક્રુશ્ચ તે તદપિ તા ભગવન્તમાપુઃ ॥ ૧૩.૫૯॥

તાઃ ષડ્વિધાન્નપરિપૂર્ણકરાઃ સમેતાઃ પ્રાપ્તા વિસૃજ્ય પતિપુત્રસમસ્તબન્ધૂન્ ।
આત્માર્ચનૈકપરમા વિસસર્જ કૃષ્ણ એકા પતિપ્રવિધુતા પદમાપ વિષ્ણોઃ ॥ ૧૩.૬૦॥

ભુક્ત્વાઽથ ગોપસહિતો ભગવાં સ્તદન્નં રેમે ચ ગોકુલમવાપ્ય સંસ્તનાથઃ ।
આજ્ઞાતિલઙ્ઘનકૃતેઃ સ્વકૃતાપરાધાત્પશ્ચાત્સુતપ્તમનસોઽપ્યભવન્ સ્મ વિપ્રાઃ ॥ ૧૩.૬૧॥

કૃષ્ણોઽથ વીક્ષ્ય પુરુહૂતમહપ્રયત્નં ગોપાન્ન્યવારયદવિસ્મરણાય તસ્ય ।
મા માનુષોઽયમિતિ મામવગચ્છતાં સ ઇત્યવ્યયોઽસ્ય વિદધે મહભઙ્ગમીશઃ ॥ ૧૩.૬૨॥

ગોપાંશ્ચ તાન્ ગિરિમહોઽસ્મદુરુસ્વધર્મ ઇત્યુક્તિસચ્છલત આત્મમહેઽવતાર્ય ।
ભૂત્વાઽતિવિસ્તૃતતનુર્બુભુજે બલિં સ નાનાવિધાન્નરસપાનગુણૈઃ સહૈવ ॥ ૧૩.૬૩॥

ઇન્દ્રોઽથ વિસ્મૃતરથાઙ્ગધરાવતારો મેઘાન્ સમાદિશદુરૂદકપૂગવૃષ્ટ્યૈ ।
તે પ્રેરિતાઃ સકલગોકુલનાશનાય ધારા વિતેરુરુનાગકરપ્રકારાઃ ॥ ૧૩.૬૪॥

તાભિર્નિપીડિતમુદીક્ષ્ય સ કઞ્જનાભઃ સર્વં વ્રજં ગિરિવરં પ્રસભં દધાર ।
વામેન કઞ્જદલકોમલ્. અપાણિનૈવ તત્રાખિલાઃ પ્રવિવિશુઃ પશુષાઃ સ્વગોભિઃ ॥ ૧૩.૬૫॥

વૃષ્ટ્વોરુવાર્યથ નિરન્તરસપ્તરાત્રં ત્રાતં સમીક્ષ્ય હરિણા વ્રજમશ્રમેણ ।
શક્રોઽનુસં સ્મૃતસુરપ્રવરાવતારઃ પાદામ્બુજં યદુપતેઃ શરણં જગામ ॥ ૧૩.૬૬॥

તુષ્ટાવ ચૈનમુરુવેદશિરોગતાભિર્ગીર્ભિઃ સદાઽગણિતપૂર્ણગુણાર્ણવં તમ્ ।
ગોભૃદ્ગુરું હરગુરોરપિ ગોગણેન યુક્તઃ સહસ્રગુરગાધગુમગ્ર્યમગ્ર્યાત્ ॥ ૧૩.૬૭॥

ૹ્લ્વીઇ।ત્વત્તો જગત્સકલમાવિરભૂદગણ્યધામ્નસ્ત્વમેવ પરિપાસિ સમસ્તમન્તે ।
અત્સિ ત્વયૈવ જગતોઽસ્ય હિ બન્ધમોક્ષૌ ન ત્વત્સમોઽસ્તિ કુહચિત્પરિપૂર્ણશક્તે ॥ ૧૩.૬૮॥

ક્ષન્તવ્યમેવ ભવતા મમ બાલ્યમીશ ત્વત્સં શ્રયોઽસ્મિ હિ સદેત્યભિવન્દિતોઽજઃ ।
ક્ષાન્તં સદૈવ ભવતસ્તવ શિક્ષણાય પૂજાપહારવિધિરિત્યવદદ્રમેશઃ ॥ ૧૩.૬૯॥

ગોવિન્દમેનમભિષિચ્ય સ ગોગણેતો ગોભિર્જગામ ગુણપૂર્ણમમું પ્રણમ્ય ।
ગોપૈર્ગિરામ્પતિરપિ પ્રણતોઽભિગમ્ય ગોવર્દ્ધનોદ્ધરણસઙ્ગતસં શયૈઃ સઃ ॥ ૧૩.૭૦॥

કૃષ્ણં તતઃ પ્રભૃતિ ગોપગણા વ્યજાનન્નારાયણોઽયમિતિ ગર્ગવચશ્ચ નન્દાત્ ।
નારાયણસ્ય સમ ઇત્યુદિતં નિશમ્ય પૂજાં ચ ચક્રુરધિકામરવિન્દનેત્રે ॥ ૧૩.૭૧॥

સ્કન્દાદુપાત્તવરતો મરણાદપેતં દૃષ્ટ્વા ચરામનિહતં બલિનં પ્રલમ્બમ્ ।
ચક્રુર્વિનિશ્ચયમમુષ્ય સુરાધિકત્વે ગોપા અથાસ્ય વિદધુઃ પરમાં ચ પૂજામ્ ॥ ૧૩.૭૨॥

કાત્યાયનીવ્રતપરાઃ સ્વપતિત્વહેતોઃ કન્યા ઉવાહ ભગવાનપરાશ્ચ ગોપીઃ ।
અન્યૈર્ધૃતા અયુગબાણશરાભિનુન્નાઃ પ્રાપ્તા નિશાસ્વરમયચ્છશિરાજિતાસુ ॥ ૧૩.૭૩॥

તાસ્વત્ર તેન જનિતા દશલક્ષપુત્રા નારાયણાહ્વયયુતા બલિનશ્ચ ગોપાઃ ।
સર્વેઽપિ દૈવતગણા ભગવત્સુતત્વમામું ધરાતલ્. અગતા હરિભક્તિહેતોઃ ॥ ૧૩.૭૪॥

તાસ્તત્ર પૂર્વવરદાનકૃતે રમેશો રામા દ્વિજત્વગમનાદપિ પૂર્વમેવ ।
સર્વા નિશાસ્વરમયત્સમભીષ્ટસિદ્ધિચિન્તામણિર્હિ ભગવાનશુભૈરલિપ્તઃ ॥ ૧૩.૭૫॥

સમ્પૂર્ણચન્દ્રકરરાજિતસદ્રજન્યાં વૃન્દાવને કુમુદકુન્દસુગન્ધવાતે ।
શ્રુત્વા મુકુન્દમુખનિસ્સૃતગીતસારં ગોપાઙ્ગના મુમુહુરત્ર સસાર યક્ષઃ ॥ ૧૩.૭૬॥

રુદ્રપ્રસાદકૃતરક્ષ ઉતાસ્ય સખ્યુર્ભૃત્યો બલી ખલતરોઽપિચ શઙ્ખચૂડઃ ।
તાઃ કાલયન્ ભગવતસ્તલ્. અતાડનેન મૃત્યું જગામ મણિમસ્ય જહાર કૃષ્ણઃ ॥ ૧૩.૭૭॥

નામ્નાઽપ્યરિષ્ટ ઉરુગાયવિલોમચેષ્ટો ગોષ્ઠં જગામ વૃષભાકૃતિરપ્યવધ્યઃ ।
શમ્ભોર્વરાદનુગતશ્ચ સદૈવ કં સં ગા ભીષયન્તમમુમાહ્વયદાશુ કૃષ્ણઃ ॥ ૧૩.૭૮॥

સોઽપ્યાસસાદ હરિમુગ્રવિષાણકોટિમગ્રે નિધાય જગૃહેઽસ્ય વિષાણમીશઃ ।
ભૂમૌ નિપાત્ય ચ વૃષાસુરમુગ્રવીર્યં યજ્ઞે યથા પશુમમારયદગ્ર્યશક્તિઃ ॥ ૧૩.૭૯॥

ૹ્િક્ષ્લક્ષ્।કેશી ચ કં સવિહિતસ્તુરગસ્વરૂપો ગિર્યાત્મજાવરમવાપ્ય સદા વિમૃત્યુઃ ।

પાપઃ સ કેશવમવાપ મુખેઽસ્ય બાહું પ્રાવેશયત્સ ભગવાન્ વવૃધેઽથ દેહે ॥ ૧૩.૮૦॥

તત્ખાદનાય કુમતિઃ સ કૃતપ્રયાસઃ શીર્ણાસ્યદન્તદશનચ્છદરુદ્ધવાયુઃ ।
દીર્ણઃ પપાત ચ મૃતો હરિરપ્યશેષૈર્બ્રહ્મેશશક્રદિનકૃત્પ્રમુખૈઃ સ્તુતોઽભૂત્ ॥ ૧૩.૮૧॥

વ્યોમશ્ચ નામ મયસૂનુરજપ્રસાદાલ્લબ્ધાયુતાયુરખિલાન્ વિદધે બિલે સઃ ।
તં શ્રીપતિઃ પશુપતિઃ પશુવદ્વિશસ્ય નિઃ સારિતાન્ બિલમુખાદખિલાંશ્ચકાર ॥ ૧૩.૮૨॥

કુર્વત્યનન્યવિષયાણિ દુરન્તશક્તૌ કર્માણિ ગોકુલગતેઽખિલલોકનાથે ।
કં સાય સર્વમવદત્સુરકાર્યહેતોર્બ્રહ્માઙ્ગજો મુનિરકારિ યદીશપિત્રા ॥ ૧૩.૮૩॥

શ્રુત્વાઽતિકોપરભસોચ્ચલિતઃ સ કં સો બદ્ધ્વા સભાર્યમથ શૂરજમુગ્રકર્મા ।
અક્રૂરમાશ્વદિશદાનયનાય વિષ્ણો રામાન્વિતસ્ય સહ ગોપગણૈ રથેન ॥ ૧૩.૮૪॥

સં સેવનાય સ હરેરભવત્પુરૈવ નામ્ના કિશોર ઇતિ યઃ સુરગાયનોઽભૂત્ ।
સ્વાયમ્ભુવસ્ય ચ મનોઃ પરમાં શયુક્ત આવેશયુક્કમલજસ્ય બભૂવ વિદ્વાન્ ॥ ૧૩.૮૫॥

સોઽક્રૂર ઇત્યભવદુત્તમપૂજ્યકર્મા વૃષ્ણિષ્વથાઽસ સ હિ ભોજપતેશ્ચ મન્ત્રી ।
આદિષ્ટ એવ જગદીશ્વરદૃષ્ટિહેતોરાનન્દપૂર્ણસુમના અભવત્કૃતાર્થઃ ॥ ૧૩.૮૬॥

આરુહ્ય તદ્રથવરં ભગવત્પદાબ્જમબ્જોદ્ભવપ્રણતમન્તરમન્તરેણ ।
સઞ્ચિન્તયન્ પથિ જગામ સ ગોષ્ઠમારાદ્દૃષ્ટ્વા પદાઙ્કિતભુવં મુમુદે પરસ્ય ॥ ૧૩.૮૭॥

સોઽવેષ્ટતાત્ર જગદીશિતુરઙ્ગસઙ્ગલબ્ધોચ્ચયેન નિખિલાઘવિદારણેષુ ।
પાં સુષ્વજેશપુરુહૂતમુખોચ્ચવિદ્યુદ્ભ્રાજત્કિરીટમણિલોચનગોચરેષુ ॥ ૧૩.૮૮॥

સોઽપશ્યતાથ જગદેકગુરું સમેતમગ્રોદ્ભવેન ભુવિ ગા અપિ દોહયન્તમ્ ।
આનન્દસાન્દ્રતનુમક્ષયમેનમીક્ષ્ય હૃષ્ટઃ પપાત પદયોઃ પુરુષોત્તમસ્ય ॥ ૧૩.૮૯॥

ઉત્થાપ્ય તં યદુપતિઃ સબલો ગૃહં સ્વં નીત્વોપચારમખિલં પ્રવિધાય તસ્મિન્ ।
નિત્યોદિતાક્ષયચિદપ્યખિલં સ તસ્માચ્છુશ્રાવ લોકચરિતાનુવિડમ્બનેન ॥ ૧૩.૯૦॥

શ્રુત્વા સ કં સહૃદિ સં સ્થિતમબ્જનાભઃ પ્રાતસ્તુ ગોપસહિતો રથમારુરોહ ।
ઋ્લ્।રામશ્ચફલ્કતનયાભિયુતો જગામ યાનેન તેન યમુનાતટમવ્યયાત્મા ॥ ૧૩.૯૧॥

સં સ્થાપ્ય તૌ રથવરે જગતાઽભિવન્દ્યૌ શ્વાફલ્કિરાશ્વવતતાર યમસ્વસારમ્ ।
સ્નાત્વા સ તત્ર વિધિનૈવ કૃતાઘમર્ષઃ શેષાસનં પરમપૂરુષમત્ર ચૈક્ષત્ ॥ ૧૩.૯૨॥

નિત્યં હિ શેષમભિપશ્યતિ સિદ્ધમન્ત્રો દાનેશ્વરઃ સ તુ તદા દદૃશે હરિં ચ ।
અગ્રે હિ બાલતનુમીક્ષ્ય સ કૃષ્ણમત્ર કિં નાસ્તિ યાન ઇતિ યાનમુખો બભૂવ ॥ ૧૩.૯૩॥

તત્રાપિ કૃષ્ણમભિવીક્ષ્ય પુનર્નિમજ્જ્ય શેષોરુભોગશયનં પરમં દદર્શ ।
બ્રહ્મેશશક્રમુખદેવમુનીન્દ્રવૃન્દસં વન્દિતાઙ્ઘ્રિયુગમિન્દિરયા સમેતમ્ ॥ ૧૩.૯૪॥

સ્તુત્વા વરસ્તુતિભિરવ્યયમબ્જનાભં સોઽન્તર્હિતે ભગવતિ સ્વકમારુરોહ ।
યાનં ચ તેન સહિતો ભગવાન્ જગામ સાયં પુરીં સહબલો મધુરામનન્તઃ ॥ ૧૩.૯૫॥

અગ્રેઽથ દાનપતિમક્ષયપૌરુષોઽસાવીશો વિસૃજ્ય સબલઃ સહિતો વયસ્યૈઃ ।
દ્રષ્ટું પુરીમભિજગામ નરેન્દ્રમાર્ગે પૌરૈઃ કુતૂહલયુતૈરભિપૂજ્યમાનઃ ॥ ૧૩.૯૬॥

આસાદ્ય કુઞ્જરગતં રજકં યયાચે વસ્ત્રાણિ કં સદયિતં ગિરિશાવરેણ ।
મૃત્યૂજ્ઝિતં સપદિ તેન દુરુક્તિવિદ્ધઃ પાપં કરાગ્રમૃદિતં વ્યનયદ્યમાય ॥ ૧૩.૯૭॥

હત્વા તમક્ષતબલો ભગવાન્ પ્રગૃહ્ય વસ્ત્રાણિ ચાઽત્મસમિતાનિ બલસ્ય ચાઽદાત્ ।
દત્વાઽપરાણિ સખિગોપજનસ્ય શિષ્ટાન્યાસ્તીર્ય તત્ર ચ પદં પ્રણિધાય ચાઽગાત્ ॥ ૧૩.૯૮॥

ગ્રાહ્યાઽપહેયરહિતૈકચિદાત્મસાન્દ્રસ્વાનન્દપૂર્ણવપુરપ્યયશોષહીનઃ ।
લોકાન્ વિડમ્બ્ય નરવત્સમલક્તકાદ્યૈર્વપ્ત્રા વિભૂષિત ઇવાભવદપ્રમેયઃ ॥ ૧૩.૯૯॥

માલા અવાપ્ય ચ સુદામત આત્મતન્ત્રસ્તાવક્ષયોઽનુજગૃહે નિજપાર્ષદૌ હિ ।
પૂર્વં વિકુણ્ઠસદનાદ્ધરિસેવનાય પ્રાપ્તૌ ભુવં મૃજનપુષ્પકરૌ પુરાઽપિ ॥ ૧૩.૧૦૦॥

સર્વેષ્ટપુષ્ટિમિહ તત્ર સરૂપતાં ચ કૃષ્ણસ્તયોર્વરમદાદથ રાજમાર્ગે ।
ગચ્છન્ દદર્શ વનિતાં નરદેવયોગ્યમાદાય ગન્ધમધિકં કુટિલાં વ્રજન્તીમ્ ॥ ૧૩.૧૦૧॥

તેનાર્થિતા સપદિ ગન્ધમદાત્ત્રિવક્રા તેનાગ્રજેન સહિતો ભગવાન્ લિલિમ્પે ।
તાં ચાઽશ્વૃજુત્વમનયત્સ તયાઽર્થિતોઽલમાયામિ કાલત ઇતિ પ્રહસન્નમુગ્ચત્ ॥ ૧૩.૧૦૨॥

ચ્લિ।પૂર્ણેન્દુવૃન્દનિવહાધિકકાન્તશાન્તસૂર્યામિતોરુપરમદ્યુતિસૌખ્યદેહઃ ।
પીતામ્બરઃ કનકભાસુરગન્ધમાલ્યઃ શ ૃઙ્ગારવારિધિરગણ્યગુણાર્ણવોઽગાત્ ॥ ૧૩.૧૦૩॥

પ્રાપ્યાથ ચાઽયુધગૃહં ધનુરીશદત્તં કૃષ્ણઃ પ્રસં હ્ય જગૃહે સકલૈરભેદ્યમ્ ।
કાં સં સ નિત્યપરિપૂર્ણસમસ્તશક્તિરારોપ્ય ચૈનમનુકૃષ્ય બભઞ્જ મધ્યે ॥ ૧૩.૧૦૪॥

તસ્મિન્ સુરાસુરગણૈરખિલૈરભેદ્યે ભગ્ને બભૂવ જગદણ્ડવિભેદભીમઃ ।
શબ્દઃ સ યેન નિપપાત ભુવિ પ્રભગ્નસારોઽસુરો ધૃતિયુતોઽપિ તદૈવ કં સઃ ॥ ૧૩.૧૦૫॥

આદિષ્ટમપ્યુરુબલં ભગવાન્ સ તેન સર્વં નિહત્ય સબલઃ પ્રયયૌ પુનશ્ચ ।
નન્દાદિગોપસમિતિં હરિરત્ર રાત્રૌ ભુક્ત્વા પયોઽન્વિતશુભાન્નમુવાસ કામમ્ ॥ ૧૩.૧૦૬॥

કં સોઽપ્યતીવ ભયકમ્પિતહૃત્સરોજઃ પ્રાતર્નરેન્દ્રગણમધ્યગતોઽધિકોચ્ચમ્ ।
મઞ્ચં વિવેશ સહ જાનપદૈશ્ચ પૌરૈર્નાનાઽનુમઞ્ચકગતૈર્યુવતીસમેતૈઃ ॥ ૧૩.૧૦૭॥

સં સ્થાપ્ય નાગમુરુરઙ્ગમુખે કુવલ્યાપીડં ગિરીન્દ્રસદૃશં કરિસાદિયુક્તમ્ ।
ચાણૂરમુષ્ટિકમુખાનપિ મલ્લવીરાન્ રઙ્ગે નિધાય હરિસં યમનં કિલૈચ્છત્ ॥ ૧૩.૧૦૮॥

અક્ષોહિણી ગણિતમસ્ય બલં ચ વિં શદાસીદસં હ્યમુરુવીર્યમનન્યવધ્યમ્ ।
શમ્ભોર્વરાદપિ ચ તસ્ય સુનીથનામા યઃ પૂર્વમાસ વૃકિત્યસુરોઽનુજોઽભૂત્ ॥ ૧૩.૧૦૯॥

સપ્તાનુજા અપિ હિ તસ્ય પુરાતના યે સર્વેઽપિ કં સપૃતનાસહિતાઃ સ્મ રઙ્ગે ।
તસ્થુઃ સરામમભિયાન્તમુદીક્ષ્ય કૃષ્ણમાત્તાયુધા યુધિ વિજેતુમજં સુપાપાઃ ॥ ૧૩.૧૧૦॥

કૃષ્ણોઽપિ સૂર ઉદિતે સબલો વયસ્યૈઃ સાર્દ્ધં જગામ વરરઙ્ગમુખં સુરેશૈઃ ।
સં સ્તૂયમાન ઉરુવિક્રમ આસુરાણાં નિર્મૂલનાય સકલ્. આચલિતોરુશક્તિઃ ॥ ૧૩.૧૧૧॥

આયન્ જગદ્ગુરુતમો બલિનં ગજેન્દ્રં રુદ્રપ્રસાદપરિરક્ષિતમાશ્વપશ્યત્ ।
દુષ્ટોરુરઙ્ગમુખસં સ્થિતમીક્ષ્ય ચૈભ્યં પાપાપયાહિ નચિરાદિતિ વાચમૂદે ॥ ૧૩.૧૧૨॥

ક્ષિપ્તઃ સ ઈશ્વરતમેન ગિરીશલબ્ધાદૃપ્તો વરાજ્જગતિ સર્વજનૈરવધ્યઃ ।
નાગં ત્વવધ્યમભિયાપયતે તતોઽગ્રે પાપો દુરન્તમહિમં પ્રતિ વાસુદેવમ્ ॥ ૧૩.૧૧૩॥

વિક્રીડ્ય તેન કરિણા ભગવાન્ સ કિઞ્ચિદ્ધસ્તે પ્રગૃહ્ય વિનિકૃષ્ય નિપાત્ય ભૂમૌ ।
કુમ્ભે પદં પ્રતિનિધાય વિષાણયુગ્મમુત્કૃષ્ય હસ્તિપમહન્નિપપાત સોઽપિ ॥ ૧૩.૧૧૪॥

ચ્લીંઆગં સસાદિનમવધ્યમસૌ નિહત્ય સ્કન્ધે વિષાણમવસજ્જ્ય સહાગ્રજેન ।
નાગેન્દ્રસાન્દ્રમદબિન્દુભિરઞ્ચિતાઙ્ગઃ પૂર્ણાત્મશક્તિરમલઃ પ્રવિવેશ રઙ્ગમ્ ॥ ૧૩.૧૧૫॥

વિષ્ટે જગદ્ગુરુતમે બલવીર્યમૂર્તૌ રઙ્ગં મુમોદ ચ શુશોષ જનોઽખિલોઽત્ર ।
કઞ્જં તથાઽપિ કુમુદં ચ યથૈવ સૂર્ય ઉદ્યત્યજેઽનુભવિનો વિપરીતકાશ્ચ ॥ ૧૩.૧૧૬॥

રઙ્ગપ્રવિષ્ટમભિવીક્ષ્ય જગાદ મલ્લઃ કં સપ્રિયાર્થમભિભાષ્ય જગન્નિવાસમ્ ।
ચાણૂર ઇત્યભિહિતો જગતામવધ્યઃ શમ્ભુપ્રસાદત ઇદં શ ृણુ માધવેતિ ॥ ૧૩.૧૧૭॥

રાજૈવ દૈવતમિતિ પ્રવદન્તિ વિપ્રા રાજ્ઞઃ પ્રિયં કૃતવતઃ પરમા હિ સિદ્ધિઃ ।
યોત્સ્યાવ તેન નૃપતિપ્રિયકામ્યયા વાં રામોઽભિયુદ્ધ્યતુ બલી સહ મુષ્ટિકેન ॥ ૧૩.૧૧૮॥

ઇત્યુક્ત આહ ભગવાન્ પરિહાસપૂર્વમેવં ભવત્વિતિ સ તેન તદાઽભિયાતઃ ।
સન્દર્શ્ય દૈવતપતિર્યુધિ મલ્લલીલાં મૌહૂર્તિકીમથ પદોર્જગૃહે સ્વશત્રુમ્ ॥ ૧૩.૧૧૯॥

ઉત્ક્ષિપ્ય તં ગગનગં ગિરિસન્નિકાશમુદ્ભ્રામ્ય ચાથ શતશઃ કુલિશાક્ષતાઙ્ગમ્ ।
આવિદ્ધ્ય દુર્ધરબલો ભુવિ નિષ્પિપેષ ચૂર્ણીકૃતઃ સ નિપપાત યથા ગિરીન્દ્રઃ ॥ ૧૩.૧૨૦॥

કૃષ્ણં ચ તુષ્ટુવુરથો દિવિ દેવસઙ્ઘા મર્ત્યા ભુવિ પ્રવરમુત્તમપૂરુષાણામ્ ।

તદ્વદ્બલસ્ય દૃઢમુષ્ટિનિપિષ્ટમૂર્ધા ભ્રષ્ટસ્તદૈવ નિપપાત સ મુષ્ટિકોઽપિ ॥ ૧૩.૧૨૧॥

કૂટશ્ચ કોસલ ઉત ચ્છલનામધેયો દ્વૌ તત્ર કૃષ્ણનિહતાવપરો બલેન ।
કં સસ્ય યે ત્વવરજાશ્ચ સુનીથમુખ્યાઃ સર્વે બલેન નિહતાઃ પરિઘેણ વીરાઃ ॥ ૧૩.૧૨૨॥

તાભ્યાં હતાનભિસમીક્ષ્ય નિજાન્ સમસ્તાન્ કં સો દિદેશ બલમક્ષયમુગ્રવીર્યમ્ ।
રુદ્રપ્રસાદકૃતરક્ષમવધ્યમેનૌ નિસ્સાર્ય દણ્ડમધિકં કુરુતેતિ પાપઃ ॥ ૧૩.૧૨૩॥

શ્રુત્વૈવ રાજવચનં બલમક્ષયં તદક્ષોહિણીદશકયુગ્મમનન્તવીર્યમ્ ।
કૃષ્ણં ચકાર વિવિધાસ્ત્રધરં સ્વકોષ્ઠે સિં હં યથા કિલ સૃગાલબલં સમેતમ્ ॥ ૧૩.૧૨૪॥

જાનન્નપીશ્વરમનન્તબલં મહેન્દ્રઃ કૃષ્ણં રથં નિજમયાપયદાયુધાઢ્યમ્ ।
શુશ્રૂષણાય પરમસ્ય યથા સમુદ્રમર્ઘ્યેણ પૂરયતિ પૂર્ણજલં જનોઽયમ્ ॥ ૧૩.૧૨૫॥

સ્વસ્યન્દનં તુ ભગવાન્ સ મહેન્દ્રદત્તમારુહ્ય સૂતવરમાતલિસઙ્ગૃહીતમ્ ।
ચ્લીઇઆનાયુધોગ્રકિરણસ્તરણિર્યથૈવ ધ્વાન્તં વ્યનાશયદશેષત આશુ સૈન્યમ્ ॥ ૧૩.૧૨૬॥

નિઃ શેષતો વિનિહતે સ્વબલે સ કં સશ્ચર્માસિપાણિરભિયાતુમિયેષ કૃષ્ણમ્ ।
તાવત્તમેવ ભગવન્તમભિપ્રયાતમુત્તુઙ્ગમઞ્ચશિરસિ પ્રદદર્શ વીરમ્ ॥ ૧૩.૧૨૭॥

તં શ્યેનવેગમભિતઃ પ્રતિસઞ્ચરન્તં નિશ્છિદ્રમાશુ જગૃહે ભગવાન્ પ્રસહ્ય ।
કેશેષુ ચૈનમભિમૃશ્ય કરેણ વામેનોદ્ધૃત્ય દક્ષિણકરેણ જઘાન કેઽસ્ય ॥ ૧૩.૧૨૮॥

સઞ્ચાલિતેન મુકુટેન વિકુણ્ડલેન કર્ણદ્વયેન વિગતાભરણોરસા ચ ।
સ્રસ્તામ્બરેણ જઘનેન સુશોચ્યરૂપઃ કં સો બભૂવ નરસિં હકરાગ્રસં સ્થઃ ॥ ૧૩.૧૨૯॥

ઉત્કૃષ્ય તં સુરપતિઃ પરમોચ્ચમઞ્ચાદન્યૈરજેયમતિવીર્યબલોપપન્નમ્ ।
અબ્જોદ્ભવેશવરગુપ્તમનન્તશક્તિર્ભૂમૌ નિપાત્ય સ દદૌ પદયોઃ પ્રહારમ્ ॥ ૧૩.૧૩૦॥

દેહે તુ યોઽભવદમુષ્ય રમેશબન્ધુર્વાયુઃ સ કૃષ્ણતનુમાશ્રયદન્યપાપમ્ ।
દૈત્યં ચકર્ષ હરિરત્ર શરીરસં સ્થં પશ્યત્સુ કઞ્જજમુખેષુ સુરેષ્વનન્તઃ ॥ ૧૩.૧૩૧॥

દ્વેષાત્સ સર્વજગદેકગુરોઃ સ્વકીયૈઃ પૂર્વપ્રમાપિતજનૈઃ સહિતઃ સમસ્તૈઃ ।
ધાત્ર્યાદિભિઃ પ્રતિયયૌ કુમતિસ્તમોઽન્ધમન્યેઽપિ ચૈવમુપયાન્તિ હરાવભક્તાઃ ॥ ૧૩.૧૩૨॥

નિત્યાતિદુઃખમનિવૃત્તિ સુખવ્યપેતમન્ધં તમો નિયતમેતિ હરાવભક્તઃ ।
ભક્તોઽપિ કઞ્જજગિરીશમુખેષુ સર્વધર્માર્ણવોઽપિ નિખિલાગમનિર્ણયેન ॥ ૧૩.૧૩૩॥

યો વેત્તિ નિશ્ચિતમતિર્હરિમબ્જજેશપૂર્વાખિલસ્ય જગતઃ સકલેઽપિ કાલે ।
સૃષ્ટિસ્થિતિપ્રલ્. અયમોક્ષદમાત્મતન્ત્રં લક્ષ્મ્યા અપીશમતિભક્તિયુતઃ સ મુચ્યેત્ ॥ ૧૩.૧૩૪॥

તસ્માદનન્તગુણપૂર્ણમમું રમેશં નિશ્ચિત્ય દોષરહિતં પરયૈવ ભક્ત્યા ।
વિજ્ઞાય દૈવતગણાંશ્ચ યથાક્રમેણ ભક્ત્વા હરેરિતિ સદૈવ ભજેત ધીરઃ ॥ ૧૩.૧૩૫॥

નિહત્ય કં સમોજસા વિધાતૃશમ્ભુપૂર્વકૈઃ ।
સ્તુતઃ પ્રસૂનવર્ષિભિર્મુમોદ કેશવોઽધિકમ્ ॥ ૧૩.૧૩૬॥

સદૈવ મોદરૂપિણો મુદોક્તિરસ્ય લૌકિકી ।
યથોદયો રવેર્ભવેત્સદોદિતસ્ય લોકતઃ ॥ ૧૩.૧૩૭॥

ચ્ચિવ્ઽનન્તચિત્સુખાર્ણવઃ સદોદિતૈકરૂપકઃ ।
સમસ્તદોષવર્જિતો હરિર્ગુણાત્મકઃ સદા ॥ ૧૩.૧૩૮॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
કંસવધો નામ ત્રયોદશોઽધ્યાયઃ ॥

## અથ ચતુર્દશોઽધ્યાયઃ ।

(ઉદ્ધવપ્રતિયાનમ્)
ૐ । કૃષ્ણો વિમોચ્ય પિતરાવભિવન્દ્ય સર્વવન્દ્યોઽપિ રામસહિતઃ પ્રતિપાલનાય ।
ધર્મસ્ય રાજ્યપદવીં પ્રણિધાય ચોગ્રસેને દ્વિજત્વમુપગમ્ય મુમોચ નન્દમ્ ॥ ૧૪.૧॥

નન્દોઽપિ સાન્ત્વવચનૈરનુનીય મુક્તઃ કૃષ્ણેન તચ્ચરણપઙ્કજમાત્મસં સ્થમ્ ।
કૃત્વા જગામ સહ ગોપગણેન કૃચ્છ્રાદ્ધ્યાયન્ જનાર્દનમુવાસ વને સભાર્યઃ ॥ ૧૪.૨॥

કૃષ્ણોઽપ્યવન્તિપુરવાસિનમેત્ય વિપ્રં સાન્દીપનિં સહ બલેન તતોઽધ્યગીષ્ટ ।
વેદાન્ સકૃન્નિગદિતાન્નિખિલાશ્ચ વિદ્યાઃ સમ્પૂર્ણસં વિદપિ દૈવતશિક્ષણાય ॥ ૧૪.૩॥

ધર્મો હિ સર્વવિદુષામપિ દૈવતાનાં પ્રાપ્તે નરેષુ જનને નરવત્પ્રવૃત્તિઃ ।
જ્ઞાનાદિગૂહનમુતાધ્યયનાદિરત્ર તજ્જ્ઞાપનાર્થમવસદ્ભગવાન્ ગુરૌ ચ ॥ ૧૪.૪॥

ગુર્વર્થમેષ મૃતપુત્રમદાત્પુનશ્ચ રામેણ સાર્દ્ધમગમન્મધુરાં રમેશઃ ।
પૌરૈઃ સજાનપદબન્ધુજનૈરજસ્રમભ્યર્ચિતો ન્યવસદિષ્ટકૃદાત્મપિત્રોઃ ॥ ૧૪.૫॥

સર્વેઽપિ તે પતિમવાપ્ય હરિં પુરાઽભિતપ્તા હિ ભોજપતિના મુમુર્દુનિતાન્તમ્ ।
કિં વાચ્યમત્ર સુતમાપ્ય હરિં સ્વપિત્રોર્યત્રાખિલસ્ય સુજનસ્ય બભૂવ મોદઃ ॥ ૧૪.૬॥

કૃષ્ણાશ્રયો વસતિ યત્ર જનોઽપિ તત્ર વૃદ્ધિર્ભવેત્કિમુ રમાધિપતેર્નિવાસે ।
વૃન્દાવનં યદધિવાસત આસ સદ્યઝ્માહેન્દ્રસદ્મસદૃશં કિમુ તત્ર પુર્યાઃ ॥ ૧૪.૭॥

યેનાધિવાસમૃષભો જગતાં વિધત્તે વિષ્ણુસ્તતો હિ વરતા સદને વિધાતુઃ ।

તસ્માત્પ્રભોર્નિવસનાન્મધુરા પુરી સા શશ્વત્સમૃદ્ધજનસઙ્કુલિતા બભૂવ ॥ ૧૪.૮॥

રક્ષત્યજે ત્રિજગતાં પરિરક્ષકેઽસ્મિન્ સર્વાન્ યદૂન્મગધરાજસુતે સ્વભર્તુઃ ।
કૃષ્ણાન્મૃતિં પિતુરવાપ્ય સમીપમસ્તિપ્રાસ્તી શશં સતુરતીવ ચ દુઃખિતેઽસ્મૈ ॥ ૧૪.૯॥

શ્રુત્વૈવ તન્મગધરાજ ઉરુપ્રરૂઢબાહ્વોર્બલેન નજિતો યુધિ સર્વલોકૈઃ ।
બ્રહ્મેશચણ્ડમુનિદત્તવરૈરજેયો મૃત્યૂજ્ઝિતશ્ચ વિજયી જગતશ્ચુકોપ ॥ ૧૪.૧૦॥

ક્ષુબ્ધોઽતિકોપવશતઃ સ્વગદામમોઘાં દત્તાં શિવેન જગૃહે શિવભક્તવન્દ્યઃ ।
શૈવાગમાખિલવિદત્ર ચ સુસ્થિરોઽસૌ ચિક્ષેપ યોજનશતં સ તુ તાં પરસ્મૈ ॥ ૧૪.૧૧॥

ચિલ્વિઽર્વાક્પપાત ચ ગદા મધુરાપ્રદેશાત્સા યોજનેન યદિમં પ્રજગાદ પૃષ્ટઃ ।
એકોત્તરામપિ શતાચ્છતયોજનેતિ દેવર્ષિરત્ર મધુરાં ભગવત્પ્રિયાર્થે ॥ ૧૪.૧૨॥

શક્તસ્ય ચાપિ હિ ગદાપ્રવિઘાતને તુ શુશ્રૂષણં મદુચિતં ત્વિતિ ચિન્તયાનઃ ।
વિષ્ણોર્મુનિઃ સ નિજગાદ હ યોજનોનં માર્ગં પુરો ભગવતો મગધેશપૃષ્ટઃ ॥ ૧૪.૧૩॥

ક્ષિપ્તા તુ સા ભગવતોઽથ ગદા જરાખ્યાં તત્સન્ધિનીમસુભિરાશુ વિયોજ્ય પાપામ્ ।
મર્ત્યાશિનીં ભગવતઃ પુનરાજ્ઞયૈવ યાતા ગિરીશસદનં મગધં વિસૃજ્ય ॥ ૧૪.૧૪॥

રાજા સ્વમાતૃત ઉતો ગદયા ચહીનઃ ક્રોધાત્સમસ્તનૃપતીનભિસન્નિપાત્ય ।
અક્ષોહિણીત્ર્યધિકવિં શયુતોઽતિવેલદર્પોદ્ધતઃ સપદિ કૃષ્ણપુરીં જગામ ॥ ૧૪.૧૫॥

સર્વાં પુરીં પ્રતિનિરુદ્ધ્ય દિદેશ વિન્દવિન્દાનુજૌ ભગવતઃ કુમતિઃ સ દૂતૌ ।
તાવૂચતુર્ભગવતેઽસ્ય વચોઽતિદર્પપૂર્ણં તથા ભગવતોઽપ્યપહાસયુક્તમ્ ॥ ૧૪.૧૬॥

લોકેઽપ્રતીતબલપૌરુષસારરૂપસ્ત્વં હ્યેક એષ્યભવતો બલવીર્યસારમ્ ।
જ્ઞાત્વા સુતે નતુ મયા પ્રતિપાદિતે હિ કં સસ્ય વીર્યરહિતેન હતસ્ત્વયા સઃ ॥ ૧૪.૧૭॥

સોઽહં હિ દુર્બલતમો બલિનાં વરિષ્ઠં કૃત્વૈવ દૃષ્ટિવિષયં વિગતપ્રતાપઃ ।
યાસ્યે તપોવનમથો સહિતઃ સુતાભ્યાં ક્ષિપ્રં મમાદ્ય વિષયે ભવ ચક્ષુષોઽતઃ ॥ ૧૪.૧૮॥

સાક્ષેપમીરિતમિદં બલદર્પપૂર્ણમાત્માપહાસસહિતં ભગવાન્નિશમ્ય ।
સત્યં તદિત્યુરુ વચોઽર્થવદભ્યુદીર્ય મન્દં પ્રહસ્ય નિરગાત્સહિતો બલેન ॥ ૧૪.૧૯॥

દ્વારેષુ સાત્યકિપુરસ્સરમાત્મસૈન્યં ત્રિષ્વભ્યુદીર્ય ભગવાન્ સ્વયમુત્તરેણ ।
રામદ્વિતીય ઉદગાન્મગધાધિરાજં યોદ્ધું નૃપેન્દ્રકટકેન યુતં પરેશઃ ॥ ૧૪.૨૦॥

તસ્યેચ્છયૈવ પૃથિવીમવતેરુરાશુ તસ્યાઽયુધાનિ સબલસ્ય સુભાસ્વરાણિ ।
શાર્ઙ્ગાસિચક્રદરતૂણગદાઃ સ્વકીયા જગ્રાહ દારુકગૃહીતરથે સ્થિતઃ સઃ ॥ ૧૪.૨૧॥

આરુહ્ય ભૂમયરથં પ્રતિયુક્તમશ્વૈર્વેદાત્મકૈર્ધનુરધિજ્યમથ પ્રગૃહ્ય ।
શાર્ઙ્ગ શરાંશ્ચ નિશિતાન્મગધાધિરાજમુગ્રં નૃપેન્દ્રસહિતં પ્રયયૌ જવેન ॥ ૧૪.૨૨॥

રામઃ પ્રગૃહ્ય મુસલં સ હલં ચ યાનમાસ્થાય સાયકશરાસનતૂણયુક્તઃ ।
લ્વી। સૈન્યં જરાસુતસુરક્ષિતમભ્યધાવદ્ધર્ષાન્નદન્નુરુબલોઽરિબલૈરધૃષ્યઃ ॥ ૧૪.૨૩॥

ઉદ્વીક્ષ્ય કૃષ્ણમભિયાન્તમનન્તશક્તિં રાજેન્દ્રવૃન્દસહિતો મગધાધિરાજઃ ।
ઉદ્વેલસાગરવદાશ્વભિયાય કોપાન્નાનાવિધાયુધવરૈરભિવર્ષમાણઃ ॥ ૧૪.૨૪॥

તં વૈ ચુકોપયિષુરગ્રત ઉગ્રસેનં કૃષ્ણો નિધાય સમગાત્સ્વયમસ્ય પશ્ચાત્ ।
દૃષ્ટ્વાઽગ્રતો મગધરાટ્સ્થિતમુગ્રસેનં કોપાચ્ચલત્તનુરિદં વચનં બભાષે ॥ ૧૪.૨૫॥

પાપાપયાહિ પુરતો મમ રાજ્યકામ નિર્લજ્જ પુત્રવધકારણ શત્રુપક્ષ ।
ત્વં જીર્ણબસ્તસદૃશો ન મયેહ વધ્યઃ સિં હો હિ સિં હમભિયાતિ ન વૈ સૃગાલમ્ ॥ ૧૪.૨૬॥

આક્ષિપ્ત ઇત્થમમુનાઽથ સ ભોજરાજસ્તૂણાત્પ્રગૃહ્ય નિશિતં શરમાશુ તેન ।
છિત્વા જરાસુતધનુર્બલવન્નનાદ વિવ્યાધ સાયકગણૈશ્ચ પુનસ્તમુગ્રૈઃ ॥ ૧૪.૨૭॥

અન્યચ્છરાસનવરં પ્રતિગૃહ્ય કોપસં રક્તનેત્રમભિયાન્તમુદીક્ષ્ય કૃષ્ણઃ ।
ભોજાધિરાજવધકાઙ્ક્ષિણમુગ્રવેગં બાર્હદ્રથં પ્રતિયયૌ પરમો રથેન ॥ ૧૪.૨૮॥

આયાન્તમીક્ષ્ય ભગવન્તમનન્તવીર્યં ચેદીશપૌણ્ડ્રમુખરાજગણૈઃ સમેતઃ ।
નાનાવિધાસ્ત્રવરશસ્ત્રગણૈર્વવર્ષ મેરું યથા ઘન ઉદીર્ણરવો જલૌઘૈઃ ॥ ૧૪.૨૯॥

શસ્ત્રાસ્ત્રવૃષ્ટિમભિતો ભગવાન્ વિવૃશ્ચ્ય શાર્ઙ્ગાત્થસાયકગણૈર્વિરથાશ્વસૂતમ્ ।
ચક્રે નિરાયુધમસૌ મગધેન્દ્રમાશુ ચ્છિન્નાતપત્રવરકેતુમચિન્ત્યશક્તિઃ ॥ ૧૪.૩૦॥

નૈનં જઘાન ભગવાન્ સુશકં ચ ભીમે ભક્તિં નિજાં પ્રથયિતું યશ ઉચ્ચધર્મમ્ ।
ચેદીશપૌણ્ડ્રકસકીચકમદ્રરાજસાલ્વૈકલવ્યકમુખાન્ વિરથાંશ્ચકાર ॥ ૧૪.૩૧॥

યે ચાપિ હં સડિભકદ્રુમરુગ્મિમુખ્યા બાહ્લીકભૌમસુતમૈન્દપુરસ્સરાશ્ચ ।
સર્વે પ્રદુદ્રુવુરજસ્ય શરૈર્વિભિન્ના અન્યે ચ ભૂમિપતયો ય ઇહાઽસુરુર્વ્યામ્ ॥ ૧૪.૩૨॥

છિન્નાયુધધ્વજપતાકરથાશ્વસૂતવર્માણ ઉગ્રશરતાડિતભિન્નગાત્રાઃ ।
સ્રસ્તામ્બરાભરણમૂર્ધજમાલ્યદીના રક્તં વમન્ત ઉરુ દુદ્રુવુરાશુ ભીતાઃ ॥ ૧૪.૩૩॥

શોચ્યાં દશામુપગતેષુ નૃપેષુ સર્વેષ્વસ્તાયુધેષુ હરિણા યુધિ વિદ્રવત્સુ ।
નાનાયુધાઢ્યમપરં રથમુગ્રવીર્ય આસ્થાય માગધપતિઃ પ્રસસાર રામમ્ ॥ ૧૪.૩૪॥

લ્વીઇ। આધાવતોઽસ્ય મુસલેન રથં બભઞ્જ રામો ગદામુરુતરોરસિ સોઽપિ તસ્ય ।
ચિક્ષેપ તં ચ મુસલેન તતાડ રામસ્તાવુત્તમૌ બલવતાં યુયુધાત ઉગ્રમ્ ॥ ૧૪.૩૫॥

તૌ ચક્રતુઃ પુરુ નિયુદ્ધમપિ સ્મ તત્ર સઞ્ચૂર્ણ્ય સર્વગિરિવૃક્ષશિલાસમૂહાન્ ।
દીર્ઘં નિયુદ્ધમભવત્સમમેતયોસ્તદ્વજ્રાદૃઢાઙ્ગતમયોર્બલિનોર્નિતાન્તમ્ ॥ ૧૪.૩૬॥

શ્રુત્વાઽથ શઙ્ખરવમમ્બુજલોચનસ્ય વિદ્રાવિતાનપિ નૃપાનભિવીક્ષ્ય રામઃ ।
યુદ્ધ્યન્તમીક્ષ્ય ચ રિપું વવૃધે બલેન ત્યક્ત્વા રિપું મુસલમાદદ આશ્વમોઘમ્ ॥ ૧૪.૩૭॥

તેનાઽહતઃ શિરસિ સમ્મુમુહેઽતિવેલં બાર્હદ્રથો જગૃહ એનમથો હલી સઃ ।
તત્રૈકલવ્ય ઉત કૃષ્ણશરૈઃ પલાયન્નસ્ત્રાણિ રામશિરસિ પ્રમુમોચ શીઘ્રમ્ ॥ ૧૪.૩૮॥

ભીતેન તેન સમરં ભગવાનનિચ્છન્ પ્રદ્યુમ્નમાશ્વસૃજદાત્મસુતં મનોજમ્ ।
પ્રદ્યુમ્ન એનમભિયાય મહાસ્ત્રજાલૈ રામસ્તુ માગધમથાઽત્મરથં નિનાય ॥ ૧૪.૩૯॥

યુદ્ધ્વા ચિરં રણમુખે ભગવત્સુતોઽસૌ ચક્રે નિરાયુધમમું સ્થિરમેકલવ્યમ્ ।
અં શેન યો ભુવમગાન્મણિમાનિતિ સ્મ સ ક્રોધતન્ત્રકગણેષ્વધિપો નિષાદઃ ॥ ૧૪.૪૦॥

પ્રદ્યુમ્નમાત્મનિ નિધાય પુનઃ સ કૃષ્ણઃ સં હૃત્ય માગધબલં નિખિલં શરૌઘૈઃ ।
ભૂયશ્ચમૂમભિવિનેતુમુદારકર્મા બાર્હદ્રથં ત્વમુચદક્ષયપૌરુષોઽજઃ ॥ ૧૪.૪૧॥

વ્રીલ્। આનતાચ્છવિમુખઃ સહિતો નૃપૈસ્તૈર્બાર્હદ્રથઃ પ્રતિયયૌ સ્વપુરીં સ પાપઃ ।
આત્માભિષિક્તમપિ ભોજવરાધિપત્યે દૌહિત્રમગ્રત ઉત પ્રણિધાય મન્દઃ ॥ ૧૪.૪૨॥

જિત્વા તમૂર્જિતબલં ભગવાનજેશશક્રાદિભિઃ કુસુમવર્ષિભિરીડ્યમાનઃ ।
રામાદિભિઃ સહિત આશુ પુરીં પ્રવિશ્ય રેમેઽભિવન્દિતપદો મહતાં સમૂહૈઃ ॥ ૧૪.૪૩॥

વર્દ્ધત્સુ પાણ્ડુતનયેષુ ચતુર્દશં તુ જન્મર્ક્ષમાસ તનયસ્ય સહસ્રદૃષ્ટેઃ ।
પ્રત્યાબ્દિકં મુનિગણાન્ પરિવેષયન્તી કુન્તી તદાઽસ બહુકાર્યપરા નયજ્ઞા ॥ ૧૪.૪૪॥

તત્કાલ એવ નૃપતિઃ સહ માદ્રવત્યા પું સ્કોકિલાકુલિતફુલ્લવનં દદર્શ ।
તસ્મિન્ વસન્તપવનસ્પર્શેધિતઃ સ કન્દર્પમાર્ગણવશં સહસા જગામ ॥ ૧૪.૪૫॥

જગ્રાહ તામથ તયા રમમાણ એવ યાતો યમસ્ય સદનં હરિપાદસઙ્ગી ।
પૂર્વં શચીરમણમિચ્છત એવ વિઘ્નં શક્રસ્ય તદ્દર્શનોપગતો હિ ચક્રે ॥ ૧૪.૪૬॥

શ્લિક્ષ્। તેનૈવ માનુષમવાપ્ય રતિસ્થ એવ પઞ્ચત્વમાપ રતિવિઘ્નપુત્રતાં ચ ।
સ્વાત્મોત્તમેષ્વથ સુરેષુ વિશેષતશ્ચ સ્વલ્પોઽપિ દોષ ઉરુતામભિયાતિ યસ્માત્ ॥ ૧૪.૪૭॥

માદ્રી પતિં મૃતમવેક્ષ્ય રુરાવ દૂરાત્તચ્છુશ્રુવુશ્ચ પૃથયા સહ પાણ્ડુપુત્રાઃ ।
તેષ્વાગતેષુ વચનાદપિ માદ્રવત્યાઃ પુત્રાન્નિવાર્ય તુ પૃથા સ્વયમત્ર ચાઽગાત્ ॥ ૧૪.૪૮॥

પત્યુઃ કલ્। એવરમવેક્ષ્ય નિશમ્ય માદ્યાઃ કુન્તી ભૃશં વ્યથિતહૃત્કમલ્। ઐવ માદ્રીમ્ ।

ધિક્કૃત્ય ચાનુમરણાય મતિં ચકાર તસ્યાઃ સ્વનો રુદિતજઃ શ્રુત આશુ પાર્થૈઃ ॥ ૧૪.૪૯॥

તેષ્વાગતેષ્વધિક આસ વિરાવ એતં સર્વેઽપિ શુશ્રુવુરૃષિપ્રવરા અથાત્ર ।
આજગ્મુરુત્તમકૃપા ઋષિલોકમધ્યે પત્ની નૃપાનુગમનાય ચ પસ્પૃધાતે ॥ ૧૪.૫૦॥

તે સન્નિવાર્ય તુ પૃથામથ માદ્રવત્યા ભર્તુઃ સહાનુગમનં બહુ ચાર્થયન્ત્યાઃ ।
સં વાદમેવ નિજદોષમવેક્ષ્ય તસ્યાશ્ચક્રુઃ સદાઽવગતભાગવતોચ્ચધર્માઃ ॥ ૧૪.૫૧॥

ભર્તુર્ગુણૈરનધિકૌ તનયાર્થમેવ માધ્વ્યા કૃતૌ સુરવરાવધિકૌ સ્વતોઽપિ ।
તેનૈવ ભર્તૃમૃતિહેતુરભૂત્સમસ્તલોકૈશ્ચ નાતિમહિતા સુગુણાઽપિ માદ્રી ॥ ૧૪.૫૨॥

પાણ્ડોઃ સુતા મુનિગણૈઃ પિતૃમેધમત્ર ચક્રુર્યથાવદથ તેન સહૈવ માદ્રી ।
હુત્વાઽત્મદેહમુરુ પાપમદઃ કૃતં ચ સમ્માર્જ્ય લોકમગમન્નિજભર્તુરેવ ॥ ૧૪.૫૩॥

પાણ્ડુશ્ચ પુત્રકગુણૈઃ સ્વગુણૈશ્ચ સાક્ષાત્કૃષ્ણાત્મજઃ સતતમસ્ય પદૈકભક્તઃ ।
લોકાનવાપ વિમલાન્મહિતાન્મહદ્ભિઃ કિં ચિત્રમત્ર હરિપાદવિનમ્રચિત્તે ॥ ૧૪.૫૪॥

પાણ્ડોઃ સુતાશ્ચ પૃથયા સહિતા મુનીન્દ્રૈર્નારાયણાશ્રમત આશુ પુરં સ્વકીયમ્ ।
જગ્મુસ્તથૈવ ધૃતરાષ્ટ્રપુરો મુનીન્દ્રાઃ વૃત્તં સમસ્તમવદન્નનુજં મૃતં ચ ॥ ૧૪.૫૫॥

તૂષ્ણીં સ્થિતે તુ નૃપતૌ તનુજે ચ નદ્યાઃ ક્ષત્તર્યુતાઽપ્ત ઉરુમોદમતીવ પાપાઃ ।
ઊચુઃ સુયોધનમુખાઃ સહ સૌબલેન પાણ્ડોર્મૃતિઃ કિલ પુરા તનયાઃ ક્વ તસ્ય ॥ ૧૪.૫૬॥

ન ક્ષેત્રજા અપિ મૃતે પિતરિ સ્વકીયૈઃ સમ્યઙ્નિયોગમનવાપ્ય ભવાય યોગ્યાઃ ।
તેષામિતીરિતવચોઽનુ જગાદ વાયુરાભાષ્ય કૌરવગણાન્ ગગનસ્થ એવ ॥ ૧૪.૫૭॥

એતે હિ ધર્મમરુદિન્દ્રભિષગ્વરેભ્યો જાતાઃ પ્રજીવતિ પિતર્યુરુધામસારાઃ ।
અ્લક્ષ્।શક્યાશ્ચ નૈવ ભવતાં ક્વચિદગ્રહાય નારાયણેન સતતં પરિરક્ષિતા યત્ ॥ ૧૪.૫૮॥

વાયોરદૃશ્યવચનં પરિશઙ્કમાનેષ્વાવિર્બભૂવ ભગવાન્ સ્વયમબ્જનાભઃ ।
વ્યાસસ્વરૂપ ઉરુસર્વગુણૈકદેહ આદાય તાનગમદાશુ ચ પાણ્ડુગેહમ્ ॥ ૧૪.૫૯॥

તત્સ્વીકૃતેષુ સકલા અપિ ભીષ્મમુખ્યા વૈચિત્રવીર્યસહિતાઃ પરિપૂજ્ય સર્વાન્ ।
કુન્ત્યા સહૈવ જગૃહુઃ સુભૃશં તદાઽર્તા વૈચિત્રવીર્યતનયાઃ સહ સૌબલેન ॥ ૧૪.૬૦॥

વૈચિત્રવીર્યતનયાઃ કૃપતો મહાસ્ત્રાણ્યાપુશ્ચ પાણ્ડુતનયૈઃ સહ સર્વરાજ્ઞામ્ ।
પુત્રાશ્ચ તત્ર વિવિધા અપિ બાલચેષ્ટાઃ કુર્વત્સુ વાયુતનયેન જિતાઃ સમસ્તાઃ ॥ ૧૪.૬૧॥

પક્વોરુભોજ્યફલસન્નયનાય વૃક્ષેષ્વારૂઢરાજતનયાનભિવીક્ષ્ય ભીમઃ ।
પાદપ્રહારમુરુવૃક્ષતલ્. એ પ્રદાય સાકં ફલૈર્વિનિપતત્સુ ફલાન્યભુઙ્ક્ત ॥ ૧૪.૬૨॥

યુદ્ધે નિયુદ્ધ ઉત ધાવન ઉત્પ્લવે ચ વારિપ્લવે ચ સહિતાન્નિખિલાન્ કુમારાન્ ।
એકો જિગાય તરસા પરમાર્યકર્મા વિષ્ણોઃ સુપૂર્ણસદનુગ્રહતઃ સુનિત્યાત્ ॥ ૧૪.૬૩ ॥

સર્વાન્ પ્રગૃહ્ય વિનિમજ્જતિ વારિમધ્યે શ્રાન્તાન્ વિસૃજ્ય હસતિ સ્મ સ વિષ્ણુપધામ્ ।
સર્વાનુદૂહ્ય ચ કદાચિદુરુપ્રવાહાં ગઙ્ગાં સુતારયતિ સારસુપૂર્ણપૌં સ્ચઃ ॥ ૧૪.૬૪ ॥

દ્વેષં હ્યૃતે નહિ હરૌ તમસિ પ્રવેશઃ પ્રાણે ચ તેન જગતીમનુ તૌ પ્રપન્નૌ ।
તત્કારણાન્ચકુરુતાં પરમૌ કરાં સિ દેવદ્વિષાં સતતવિસ્તૃતસાધુપૌં સ્ચૌ ॥ ૧૪.૬૫ ॥

દૃષ્ટ્વાઽમિતાન્યથ કરાં સિ મરુત્સુતેન નિત્યં કૃતાનિ તનયા નિખિલાશ્ચ રાજ્ઞામ્ ।
તસ્યામિતં બલમુદીક્ષ્ય સદોરુવૃદ્ધદ્વેષા બભૂવુરથ મન્ત્રમમન્ત્રયંશ્ચ ॥ ૧૪.૬૬ ॥

યેયે હિ તત્ર નરદેવસુતાઃ સુરાં શાઃ પ્રીતિં પરાં પવનજે નિખિલા અકુર્વન્ ।
તાં સ્તાન્ વિહાય દિતિજા નરદેવવં શજાતા વિચાર્ય વધનિશ્ચયમસ્ય ચક્રુઃ ॥ ૧૪.૬૭ ॥

અસ્મિન્ હતે વિનિહતા અખિલાશ્ચ પાર્થાઃ શક્યો બલાચ્ચ ન નિહન્તુમયં બલાઢ્યઃ ।
છદ્મપ્રયોગત ઇમં વિનિહત્ય વીર્યાત્પાર્થં નિહત્ય નિગલ્. એ ચ વિદધ્મહેઽન્યાન્ ॥ ૧૪.૬૮ ॥

એવં કૃતે નિહતકણ્ટકમસ્ય રાજ્યં દુર્યોધનસ્ય હિ ભવેન્ન તતોઽન્યથા સ્યાત્ ।
અસ્મિન્ હતે નિપતિતે ચ સુરેન્દ્રસૂનૌ શેષા ભવેયુરપિ સૌબલિપુત્રદાસાઃ ॥ ૧૪.૬૯ ॥

ચ્લ્ક્ષ। એવં વિચાર્ય વિષમુલ્બણમન્તકાભં ક્ષીરોદધેર્મથનજં તપસા ગિરીશાત્ ।
શુક્રેણ લબ્ધમમુતઃ સુબલાત્મજેન પ્રાપ્તં પ્રતોષ્ય મરુતસ્તનયાય ચાદુઃ ॥ ૧૪.૭૦ ॥

સમ્મન્ત્ર્ય રાજતનયૈર્ધૃતરાષ્ટ્રજૈસ્તદ્દત્તં સ્વસૂદમુખતોઽખિલભક્ષ્યભોજ્યે ।
જ્ઞાત્વા યુયુત્સુગદિતં બલવાન્ સ ભીમો વિષ્ણોરનુગ્રહબલાજ્જરયાઞ્ચકાર ॥ ૧૪.૭૧ ॥

જીર્ણે વિષે કુમતયઃ પરમાભિતપ્તાઃ પ્રાસાદમાશુ વિદધુર્હરિપાદતોયે ।
જ્ઞાત્વા યુયુત્સુમુખતઃ સ્વયમત્ર ચાન્તે સુષ્વાપ મારુતિરમા ધૃતરાષ્ટ્રપુત્રૈઃ ॥ ૧૪.૭૨ ॥

દોષાન્ પ્રકાશયિતુમેવ વિચિત્રવીર્યપુત્રાત્મજેષુ નૃવરં પ્રતિસુપ્તમીક્ષ્ય ।
બદ્ધ્વાઽભિમન્ત્રણદૃઢૈરયસા કૃતૈસ્તં પાશૈર્વિચિક્ષિપુરુદે હરિપાદજાયાઃ ॥ ૧૪.૭૩ ॥

તત્કોટિયોજનગભીરમુદં વિગાહ્ય ભીમો વિજૃમ્ભણત એવ વિવૃશ્ચ્ય પાશાન્ ।
ઉત્તીર્ય સજ્જનગણસ્ય વિધાય હર્ષં તસ્થાવનન્તગુણવિષ્ણુસદાતિહાર્દઃ ॥ ૧૪.૭૪ ॥

તં વીક્ષ્ય દુષ્ટમનસોઽતિવિપન્નચિત્તાઃ સમ્મન્ત્ર્ય ભૂય ઉરુનાગગણાનથાષ્ટૌ ।
શુક્રોક્તમન્ત્રબલતઃ પુર આહ્વયિત્વા પશ્ચાત્સુપઞ્જરગતાન્ પ્રદદુઃ સ્વસૂતે ॥ ૧૪.૭૫ ॥

દુર્યોધનેન પૃથુમન્ત્રબલોપહૂતાં સ્તત્સારથિઃ ફણિગણાન્ પવનાત્મજસ્ય ।
સુપ્તસ્ય વિસ્તૃત ઉરસ્યમુચદ્વિશીર્ણદન્તા બભૂવુરમુમાશુ વિદશ્ય નાગાઃ ॥ ૧૪.૭૬ ॥

ક્ષિપ્ત્વા સુદૂરમુરુનાગવરાનથાષ્ટૌ તદ્વં શજાન્ સ વિનિહત્ય પિપીલિકાવત્ ।
જઘ્ને ચ સૂતમપહસ્તત એવ ભીમઃ સુષ્વાપ પૂર્વવદનુત્થિત એવ તલ્પાત્ ॥ ૧૪.૭૭॥

તત્તસ્ય નૈજબલમપ્રમયં નિરીક્ષ્ય સર્વે ક્ષિતીશતનયા અધિકં વિષેદુઃ ।
નિશ્વાસતો દર્શનાદપિ ભસ્મ યેષાં ભૂયાસુરેવ ભુવનાનિ ચ તે મૃષાઽસન્ ॥ ૧૪.૭૮॥

દદ્ભિર્વિદશ્ય ન વિકારમમુષ્ય કર્તું શેકુર્ભુજઙ્ગમવરા અપિ સુપ્રયત્નાઃ ।
કસ્યાપિ નેદૃશબલં શ્રુતપૂર્વમાસીદૃષ્ટં કિમુ સ્મ તનયેઽપિ હિરણ્યકસ્ય ॥ ૧૪.૭૯॥

સ્વાત્માવનાર્થમધિકાં સ્તુતિમેવ કૃત્વા વિષ્ણોઃ સ દૈત્યતનયો હરિણાઽવિતોઽભૂત્ ।
નત્વૌરસં બલમમુષ્ય સ કૃષ્યતે હિ ભૃત્યૈર્બલાત્સ પિતુરૌરસમસ્ય વીર્યમ્ ॥ ૧૪.૮૦॥

નૈસર્ગિકપ્રિયમિમં પ્રવદન્તિ વિપ્રા વિષ્ણોર્નિતાન્તમપિ સત્યમિદં ધ્રુવં હિ ।
નૈવાન્યથૌરસબલં ભવતીદૃશં તદુત્સાદ્ય એષ હરિણૈવ સહૈષ નોઽર્થઃ ॥ ૧૪.૮૧॥

ચ્લ્ક્ષી। કૃષ્ણઃ કિલૈષ ચ હરિર્યદુષુ પ્રજાતઃ સોઽસ્યાઽશ્રયઃ કુરુત તસ્ય બહુ પ્રતીપમ્ ।
સમ્મન્ત્ર્ય ચૈવમતિપાપતમા નરેન્દ્રપુત્રા હરેશ્ચ બહુ ચક્રુરથ પ્રતીપમ્ ॥ ૧૪.૮૨॥

તૈઃ પ્રેરિતા નૃપતયઃ પિતરશ્ચ તેષાં સાકં બૃહદ્રથસુતેન હરેઃ સકાશમ્ ।
યુદ્ધાય જગ્મુરમુનાઽષ્ટદશેષુ યુદ્ધેષ્વત્યન્તભગ્નબલદર્પમદા નિવૃત્તાઃ ॥ ૧૪.૮૩॥

તેનાઽગૃહીતગજવાજિરથા નિતાન્તં શસ્ત્રૈઃ પરિક્ષતતનૂભિરલં વમન્તઃ ।
રક્તં વિશસ્ત્રકવચધ્વજવાજિસૂતાઃ સ્રસ્તામ્બરાઃ શ્લથિતમૂર્દ્ધજિનો નિવૃત્તાઃ ॥ ૧૪.૮૪॥

એવં બૃહદ્રથસુતોઽપિ સુશોચ્યરૂપ આર્તો યયૌ બહુશ એવ પુરં સ્વકીયમ્ ।
કૃષ્ણેન પૂર્ણબલવીર્યગુણેન મુક્તો જીવેત્યતીવ વિજિતઃ શ્વસિતાવશેષઃ ॥ ૧૪.૮૫॥

એવં ગતેષુ બહુશો નતકન્ધરેષુ રાજસ્વજોઽપિ મધુરાં સ્વપુરીં પ્રવિશ્ય ।
રામેણ સાર્ધમખિલૈર્યદુભિઃ સમેતો રેમે રમાપતિરચિન્ત્યબલો જયશ્રીઃ ॥ ૧૪.૮૬॥

વ્યર્થોદ્યમાઃ પુનરપિ સ્મ સધાર્તરાષ્ટ્રા ભીમં નિહન્તુમુરુયત્નમકુર્વતાજ્ઞાઃ ।
રાજ્ઞાં સુતાસ્તમખિલં સ મૃષૈવ કૃત્વા ચક્રે જયાય ચ દિશાં બલવાન્ પ્રયત્નમ્ ॥ ૧૪.૮૭॥

પ્રાચીં દિશં પ્રથમમેવ જિગાય પશ્ચાદ્યામ્યાં જલેશપરિપાલિતયા સહાન્યામ્ ।
યૌ તૌ પુરાતનદશાનનકુમ્ભકર્ણૌ માતૃષ્વસાતનયતાં ચ ગતૌ જિગાય ॥ ૧૪.૮૮॥

પૂર્વસ્તયોર્હિ દમઘોષસુતઃ પ્રજાતઃ પ્રાહુશ્ચ યં નૃપતયઃ શિશુપાલનામ્ના ।
અન્યં વદન્તિ ચ કરૂશનૃપં તથાઽન્યમાતૃષ્વસાતનયમેવ ચ દન્તવક્રમ્ ॥ ૧૪.૮૯॥

જિત્વૈવ તાવપિ જિગાય ચ પૌણ્ડ્રકાખ્યં શૌરેઃ સુતં સુતમજૈદથ ભીષ્મકસ્ય ।

યઃ પૂર્વમાસ દિતિજો નરહેલ્વલાખ્યો રુગ્મીતિ નામ ચ બભૂવ સ કુણ્ડિનેશઃ ॥ ૧૪.૯૦॥

ભાગેત એવ તનયસ્ય સ એવ વહ્નેર્નામ્ના શુચેઃ સ તુ પિતાઽસ્ય હિ મિત્રભાગઃ ।
રાજ્ઞ શયુક્તદનુજૌ ક્રથકૈશિકાખ્યૌ ભાગૌ તથાઽગ્નિસુતયોઃ પવમાનશુન્ધ્યોઃ ॥ ૧૪.૯૧॥

બન્ધોર્નિજસ્ય તુ બલં સુપરીક્ષમાણઃ શલ્યોઽપિ તેન યુયુધે વિજિતસ્તથૈવ ।
ભીમો જિગાય યુધિ વીરમથૈકલવ્યં સર્વે નૃપાશ્ચ વિજિતા અમુનૈવમેવ ॥ ૧૪.૯૨॥

તદ્બાહુવીર્યપરિપાલિત ઇન્દ્રસૂનુઃ શેષાન્નૃપાંશ્ચ સમજૈદ્બલવાનયત્નાત્ ।
ચ્લ્ક્ષીઇ। સાલ્વં ચ હં સડિભકૌ ચ વિજિત્ય ભીમો નાગાહ્વયં પુરમગાત્સહિતોઽર્જુનેન ॥ ૧૪.૯૩॥

તદ્બાહુવીર્યમથ વીક્ષ્ય મુમોદ ધર્મસૂનુઃ સમાતૃયમજો વિદુરઃ સભીષ્મઃ ।
અન્યે ચ સજ્જનગણાઃ સહપૌરરાષ્ટ્રાઃ શ્રુત્વૈવ સર્વયદવો જહૃષુર્નિતાન્તમ્ ॥ ૧૪.૯૪॥

કૃષ્ણઃ સુયોધનમુખાક્રમમામ્બિકેયં જાનન્ સ્વપુત્રવશવર્તિનમેવ ગત્વા ।
શ્વાફલ્કિનો ગૃહમમું ધૃતરાષ્ટ્રશાન્ત્યૈ ગન્તું દિદેશ ગજનામ પુરં પરેશઃ ॥ ૧૪.૯૫॥

સોઽયાદ્ગજાહ્વયમમુત્ર વિચિત્રવીર્યપુત્રેણ ભીષ્મસહિતૈઃ કુરુભિઃ સમસ્તૈઃ ।
સમ્પૂજિતઃ કતિપયાનવસચ્ચ માસાન્ જ્ઞાતું હિ પાણ્ડુષુ મનઃ પ્રસૃતિં કુરૂણામ્ ॥ ૧૪.૯૬॥

જ્ઞાત્વા સ કુન્તિવિદુરોક્તિત આત્મના ચ મિત્રારિમધ્યમજનાં સ્તનયેષુ પાણ્ડોઃ ।
વિજ્ઞાય પુત્રવશગં ધૃતરાષ્ટ્રમગ્જઃ સામ્નૈવ ભેદસહિતેન જગાદ વિદ્વાન્ ॥ ૧૪.૯૭॥

પુત્રેષુ પાણ્ડુતનયેષુ ચસામ્યવૃત્તિઃ કીર્તિં ચ ધર્મમુરુમેષિ તથાઽર્થકામૌ ।
પ્રીતિં પરાં ત્વયિ કરિષ્યતિ વાસુદેવઃ સાકં સમસ્તયદુભિઃ સહિતઃ સુરાદ્યૈઃ ॥ ૧૪.૯૮॥

ધર્માર્થકામસહિતાં ચ વિમુક્તિમેષિ તત્પ્રીતિતઃ સુનિયતં વિપરીતવૃત્તિઃ ।
યાસ્યેવ રાજવર તત્ફલવૈપરીત્યમિત્થં વચો નિગદિતં તવ કાર્ષ્ણમદ્ય ॥ ૧૪.૯૯॥

ઇત્થં સમસ્તકુરુમધ્ય ઉપાત્તવાક્યો રાજાઽપિ પુત્રવશગો વચનં જગાદ ।
સર્વં વશે ભગવતો ન વયં સ્વતન્ત્રા ભૂભારસં હૃતિકૃતે સ ઇહાવતીર્ણઃ ॥ ૧૪.૧૦૦॥

એતન્નિશમ્ય વચનં સ તુ યાદવોઽસ્ય જ્ઞાત્વા મનોઽસ્ય કલુષં તવ નૈવ પુત્રાઃ ।
ઇત્યૂચિવાન્ સહ મરુત્તનયાર્જુનાભ્યાં પ્રાયાત્પુરીં ચ સહદેવયુતઃ સ્વકીયામ્ ॥ ૧૪.૧૦૧॥

જ્ઞાનં તુ ભાગવતમુત્તમમાત્મયોગ્યં ભીમાર્જુનૌ ભગવતઃ સમવાપ્ય કૃષ્ણાત્ ।
તત્રોષતુર્ભગવતા સહ યુક્તચેષ્ટૌ સમ્પૂજિતૌ યદુભિરુત્તમકર્મસારૌ ॥ ૧૪.૧૦૨॥

પ્રત્યુદ્યમો ભગવતાઽપિ ભવેદ્ગદાયાઃ શિક્ષા યદા ભગવતા ક્રિયતે નયેમમ્ ।
કુર્યાદિતિ સ્મ ભગવત્સમનુજ્ઞયૈવ રામાદશિક્ષદુરુગાયપુરઃ સ ભીમઃ ॥ ૧૪.૧૦૩॥

રામોઽપિ શિક્ષિતમરીન્દ્રધરાત્પુરોઽસ્ય ભીમે દદાવથ વરાણિ હરેરવાપ ।
અસ્ત્રાણિ શક્રતનયઃ સહદેવ આર નીતિં તથોદ્ધવમુખાત્સકલામુદારામ્ ॥ ૧૪.૧૦૪॥

ષ્વિક્ષવ્। કૃષ્ણોઽથ ચૌપગવિમુત્તમનીતિયુક્તં સમ્પ્રેષયન્નિદમુવાચ હ ગોકુલાય ।
દુઃખં વિનાશય વચોભિરરે મદીયૈર્નન્દાદિનાં વિરહજં મમ ચાઽશુ યાહિ ॥ ૧૪.૧૦૫॥

મત્તો વિયોગ ઇહ કસ્યચિદસ્તિ નૈવ યસ્માદહં તનુભૃતાં નિહતોઽન્તરેવ ।
નાહં મનુષ્ય ઇતિ કુત્રચ વોઽસ્તુ બુદ્ધિર્બ્રહ્મૈવ નિર્મલતમં પ્રવદન્તિ માં હિ ॥ ૧૪.૧૦૬॥

પૂર્વં યદા હ્યજગરો નિજગાર નન્દં સર્વે ન શેકુરથ તત્પ્રવિમોક્ષણાય ।
મત્પાદસં સ્પર્શતઃ સ તદાઽતિદિવ્યો વિદ્યાધરસ્તદુદિતં નિખિલં સ્મરન્તુ ॥ ૧૪.૧૦૭॥

પૂર્વં સ રૂપમદતઃ પ્રજહાસ વિપ્રાન્નિત્યં તપઃ કૃશતરાઙ્ગિરસો વિરૂપાન્ ।
તૈઃ પ્રાપિતઃ સપદિ સોઽજગરત્વમેવ મત્તો નિજાં તનુમવાપ્ય જગાદ નન્દમ્ ॥ ૧૪.૧૦૮॥

નાયં નરો હરિરયં પરમઃ પરેભ્યો વિશ્વેશ્વરઃ સકલકારણ આત્મતન્ત્રઃ ।
વિજ્ઞાય ચૈનમુરુસં સૃતિતો વિમુક્તા યાન્ત્યસ્ય પાદયુગલ્. અં મુનયો વિરાગાઃ ॥ ૧૪.૧૦૯॥

નન્દં યદા ચ જગૃહે વરુણસ્ય દૂતસ્તત્રાપિ માં જલપતેર્ગૃહમાશુ યાતમ્ ।
સમ્પૂજ્ય વારિપતિરાહ વિમુચ્ય નન્દં નાયં સુતસ્તવ પુમાન્ પરમઃ સ એષઃ ॥ ૧૪.૧૧૦॥

સન્દર્શિતો નનુ મયૈવ વિકુણ્ઠલોકો ગોજીવિનાં સ્થિતિરપિ પ્રવરા મદીયા ।
માનુષ્યબુદ્ધિમપનેતુમજે મયિ સ્મ તસ્માન્મયિ સ્થિતિમવાપ્ય શમં પ્રયાન્તુ ॥ ૧૪.૧૧૧॥

શ્રુત્વોદ્ધવો નિગદિતં પરમસ્ય પું સો વૃન્દાવનં પ્રતિ યયૌ વચનૈશ્ચ તસ્ય ।
દુઃખં વ્યપોહ્ય નિખિલં પશુજીવનાનામાયાત્પુનશ્ચરણસન્નિધિમેવ વિષ્ણોઃ ॥ ૧૪.૧૧૨॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
ઉદ્ધવપ્રતિયાનં નામ ચતુર્દશોઽધ્યાયઃ ॥

## અથ પઞ્ચદશોઽધ્યાયઃ ।

(પાણ્ડવશાસ્ત્રાભ્યાસઃ )
ૐ । એવં પ્રશાસતિ જગત્પુરુષોત્તમેઽસ્મિન્ ભીમાર્જુનૌ તુ સહદેવયુતાવનુજ્ઞામ્ ।
કૃષ્ણાદવાપ્ય વર્ષત્રિતયાત્પુરં સ્વમાજગ્મતુર્હરિસુતેન વિશોકનામ્ના ॥ ૧૫.૧॥

સૈરન્ધ્રિકોદરભવઃ સ તુ નારદસ્ય શિષ્યો વૃકોદરરથસ્ય બભૂવ યન્તા ।
યા પિઙ્ગલાઽન્યભવ આત્મનિ સં સ્થિતં તં સં સ્મૃત્ય કાન્તમુરુગાયમભૂત્રિવક્રા ॥ ૧૫.૨॥

તં પઞ્ચરાત્રવિદમાપ્ય સુષારથિં સ ભીમો મુમોદ પુનરાપ પરાત્મવિદ્યામ્ ।

વ્યાસાત્પરાત્મત ઉવાચ ચ ફલ્ગુનાદિદૈવેષુ સર્વવિજયી પરવિદ્યયૈષઃ ॥ ૧૫.૩॥

સર્વાનભાગવતશાસ્ત્રપથાન્ વિધૂય માર્ગં ચકાર સ તુ વૈષ્ણવમેવ શુભ્રમ્ ।
ક્રીડાર્થમેવ વિજિગાય તથોભયાત્મયુદ્ધે બલં ચ કરવાક્પ્રભવેઽમિતાત્મા ॥ ૧૫.૪॥

નિત્યપ્રભૂતસુશુભપ્રતિભોઽપિ વિષ્ણોઃ શ્રુત્વા પરાં પુનરપિ પ્રતિભામવાપ ।
કો નામ વિષ્ણ્વનુપજીવક આસ યસ્ય નિત્યાશ્રયાદભિહિતાઽપિ રમા સદા શ્રીઃ ॥ ૧૫.૫॥

વ્યાસાદવાપ પરમાત્મસતત્ત્વવિદ્યાં ધર્માત્મજોઽપિ સતતં ભગવત્પ્રપન્નાઃ ।
તે પઞ્ચ પાણ્ડુતનયા મુમુદુર્નિતાન્તં સદ્ધર્મચારિણ ઉરુક્રમશિક્ષિતાર્થાઃ ॥ ૧૫.૬॥

યદા ભરદ્વાજસુતસ્ત્વસઞ્ચયી પ્રતિગ્રહોજ્ઝો નિજધર્મવર્તી ।
દ્રૌણિસ્તદા ધાર્તરાષ્ટ્રૈઃ સમેત્ય ક્રીડન્ પયઃ પાતુમુપૈતિ સદ્મ ॥ ૧૫.૭॥

તસ્મૈ માતા પિષ્ટમાલોડ્ય પાતું દદાતિ પીત્વૈતિ તદેષ નિત્યમ્ ।
પીતક્ષીરાન્ ધાર્તરાષ્ટ્રાન્ સ ચૈત્ય મયા પીતં ક્ષીરમિત્યાહ નિત્યમ્ ॥ ૧૫.૮॥

નૃત્યન્તમેનં પાયયામાસુરેતે પયઃ કદાચિદ્રસમસ્ય સોઽવેત્ ।
પુનઃ કદાચિત્સ તુ માતૃદત્તે પિષ્ટે નેદં ક્ષીરમિત્યારુરાવ ॥ ૧૫.૯॥

દૃષ્ટ્વા રુવન્તં સુતમાત્મજસ્ય સ્નેહાન્નિયત્યૈવ જનાર્દનસ્ય ।
સમ્પ્રેરિતઃ કૃપયા ચાઽર્તરૂપો દ્રોણો યયાવાર્જયિતું તદા ગામ્ ॥ ૧૫.૧૦॥

પ્રતિગ્રહાત્સન્નિવૃત્તઃ સ રામં યયૌ ન વિષ્ણોર્હિ ભવેત્પ્રતિગ્રહઃ ।
દોષાય યસ્માત્સ પિતાઽખિલસ્ય સ્વામી ગુરુઃ પરમં દૈવતં ચ ॥ ૧૫.૧૧॥

ચ્લિક્ષ્વ। દૃષ્ટ્વૈવૈનં જામદગ્ન્યોઽપ્યચિન્તયદ્દ્રોણં કર્તું ક્ષિતિભારાપનોદે ।
હેતું સુરાણાં નરયોનિજાનાં હન્તા ચાયં સ્યાત્સહ પુત્રેણ ચેતિ ॥ ૧૫.૧૨॥

તેષાં વૃદ્ધિઃ સ્યાત્પાણ્ડવાર્થે હતાનાં મોક્ષેઽપિ સૌખ્યસ્ય ન સન્તતિશ્ચ ।
યોગ્યા સુરાણાં કલિજા સુપાપાઃ પ્રાયો યસ્માત્કલિજાઃ સમ્ભવન્તિ ॥ ૧૫.૧૩॥

ન દેવાનામાશતં પૂરુષા હિ સન્તાનજાઃ પ્રાયશઃ પાપયોગ્યાઃ ।
નાકારણાત્સન્તતેરપ્યભાવો યોગ્યઃ સુરાણાં સદમોઘરેતસામ્ ॥ ૧૫.૧૪॥

અવ્યુચ્છિન્ને સકલાનાં સુરાણાં તન્તૌ કલિર્નો ભવિતા કથઞ્ચિત્ ।
તસ્માદુત્સાદ્યાઃ સર્વ એતે સુરાં શા એતેન સાકં તનયેન વીરાઃ ॥ ૧૫.૧૫॥

એવં વિચિન્ત્યાપ્રતિમઃ સ ભાર્ગવો બભાષ ઈષત્સ્મિતશોચિષા ગિરા ।
અનન્તશક્તિઃ સકલેશ્વરોઽપિ ત્યક્તં સર્વં નાદ્ય વિત્તં મમાસ્તિ ॥ ૧૫.૧૬॥

આત્મા વિદ્યા શસ્ત્રમેતાવદસ્તિ તેષાં મધ્યે રુચિતં ત્વં ગૃહાણ ।
ઉક્તઃ સ ઇત્થં પ્રવિચિન્ત્ય વિપ્રો જગાદ કસ્ત્વદ્ગ્રહણે સમર્થઃ ॥ ૧૫.૧૭॥

સર્વેશિતા સર્વપરઃ સ્વતન્ત્રસ્ત્વમેવ કોઽન્યઃ સદૃશસ્તવેશ ।
સ્વામ્યં તવેચ્છન્ પ્રતિયાત્યધો હિ યસ્માન્નચોત્થાતુમલં કદાચિત્ ॥ ૧૫.૧૮॥

સર્વોત્તમસ્યેશ તવોચ્ચશસ્ત્રૈઃ કાર્યં કિમસ્માકમનુદ્ધલાનામ્ ।
વિદ્યૈવ દેયા ભવતા તતોઽજ સર્વપ્રકાશિન્યચલા સુસૂક્ષ્મા ॥ ૧૫.૧૯॥

ઇતીરિતસ્તત્ત્વવિદ્યાદિકાઃ સ વિદ્યાઃ સર્વાઃ પ્રદદૌ સાસ્ત્રશસ્ત્રાઃ ।
અબ્દદ્વિષટ્કેન સમાપ્ય તાઃ સ યયૌ સખાયં દ્રુપદં મહાત્મા ॥ ૧૫.૨૦॥

દાનેઽર્દ્ધરાજ્યસ્ય હિ તત્પ્રતિજ્ઞાં સં સ્મૃત્ય પૂર્વામુપયાતં સખાયમ્ ।
સખા તવાસ્મીતિ તદોદિતોઽપિ જગાદ વાક્યં દ્રુપદોઽતિદર્પાત્ ॥ ૧૫.૨૧॥

ન નિર્ધનો રાજસખો ભવેત યથેષ્ટતો ગચ્છ વિપ્રેતિ દૈવાત્ ।
ઇતીરિતસ્યાઽશુ બભૂવ કોપો જિતેન્દ્રિયસ્યાપિ મુનેર્હરીચ્છયા ॥ ૧૫.૨૨॥

પ્રતિગ્રહાત્સન્નિવૃત્તેન સોઽયં મયા પ્રાપ્તો મત્પિતુઃ શિષ્યકત્વાત્ ।
ચલ્ક્ષ્વી। પિતુઃ શિષ્યો હ્યાત્મશિષ્યો ભવેત શિષ્યસ્યાર્થઃ સ્વીય એવેતિ મત્વા ॥ ૧૫.૨૩॥

સોઽયં પાપો મામવજ્ઞાય મૂઢો દુષ્ટં વચોઽશ્રાવયદસ્ય દર્પમ્ ।
હનિષ્ય ઇત્યેવ મતિં નિધાય યયૌ કુરૂઞ્છિષ્યતાં નેતુમેતાન્ ॥ ૧૫.૨૪॥

પ્રતિગ્રહાદ્વિનિવૃત્તસ્ય ચાર્થઃ સ્યાચ્છિષ્યેભ્યઃ કૌરવેભ્યો મમાત્ર ।
એવં મન્વાનઃ ક્રીડતઃ પાણ્ડવેયાન્ સધાર્તરાષ્ટ્રાન્ પુરબાહ્યતોઽખ્યત્ ॥ ૧૫.૨૫॥

વિક્રીડતો ધર્મસૂનોસ્તદૈવ સહાઙ્ગુલીયેન ચ કન્દુકોઽપતત્ ।
કૂપે ન શેકુઃ સહિતાઃ કુમારા ઉદ્ધર્તુમેતં પવનાત્મજોઽવદત્ ॥ ૧૫.૨૬॥

નિષ્પત્ય ચોદ્ધૃત્ય સમુત્પતિષ્યે કૂપાદમુષ્માદ્ભૃશનીચાદપિ સ્મ ।
સકન્દુકાં મુદ્રિકાં પશ્યતાદ્ય સર્વે કુમારા ઇતિ વીર્યસં શ્રયાત્ ॥ ૧૫.૨૭॥

તદા કુમારાનવદત્સ વિપ્રો ધિગસ્ત્રબાહ્યાં ભવતાં પ્રવૃત્તિમ્ ।
જાતાઃ કુલે ભરતાનાં ન વિત્થ દિવ્યાનિ ચાસ્ત્રાણિ સુરાર્ચિતાનિ ॥ ૧૫.૨૮॥

ઇતીરિતા અસ્ત્રવિદં કુમારા વિજ્ઞાય વિપ્રં સુરપૂજ્યપૌત્રમ્ ।
સમ્પ્રાર્થયામાસુરથોદ્ધૃતિં પ્રતિ પ્રધાનમુદ્રાયુતકન્દુકસ્ય ॥ ૧૫.૨૯॥

સ ચાઽશ્વિષીકાભિરથોત્તરોત્તરં સમ્પ્રાસ્ય દિવ્યાસ્ત્રબલેન કન્દુકમ્ ।
ઉદ્ધૃત્ય મુદ્રોદ્ધરણાર્થિનઃ પુનર્જગાદ ભુક્તિર્મમ કલ્પ્યતામિતિ ॥ ૧૫.૩૦॥

યથેષ્ટવિત્તાશનપાનમસ્ય ધર્માત્મજઃ પ્રતિજજ્ઞે સુશીઘ્રમ્ ।
તથૈવ તેનોદ્ધૃતમઙ્ગુલીયં ત્રિવર્ગમુખ્યાત્મજવાક્યતોઽનુ ॥ ૧૫.૩૧॥

પપ્રચ્છુરેનં સહિતાઃ કુમારાઃ કોઽસીતિ સોઽપ્યાહ પિતામહો વઃ ।
વક્તેતિ તે દુદ્રુવુરાશુ ભીષ્મં દ્રોણોઽયમિત્યેવ સ તાં સ્તદોચે ॥ ૧૫.૩૨॥

ન રાજગેહં સ કદાચિદેતિ તેનાદૃષ્ટઃ સ કુમારૈઃ પુરાઽતઃ ।
ભીષ્મો વિદ્યાસ્તેન સહૈવ ચિન્તયન્નસ્ત્રપ્રાપ્તિં તસ્ય શુશ્રાવ રામાત્ ॥ ૧૫.૩૩॥

શ્રુત્વા વૃદ્ધં કૃષ્ણવર્ણં દ્વિજં તં મહાસ્ત્રવિદ્યામપિ તાં મહામતિઃ ।
દ્રોણં જ્ઞાત્વા તસ્ય શિષ્યત્વ એતાન્ દદૌ કુમારાં સ્તત્ર ગત્વા સ્વયં ચ ॥ ૧૫.૩૪॥

ચક્ષ્વીઇ।દ્રોણોઽથ તાનવદદ્યો મદિષ્ટં કર્તું પ્રતિજ્ઞાં પ્રથમં કરોતિ ।
તં ધન્વિનાં પ્રવરં સાધયિષ્ય ઇત્યર્જુનસ્તામકરોત્પ્રતિજ્ઞામ્ ॥ ૧૫.૩૫॥

ઉન્માદનાદીનિ સ વેદ કૃષ્ણાદસ્ત્રાણ્યનાપત્સુ ન તાનિ મુઞ્ચેત્ ।
ઇત્યાજ્ઞયા કેશવસ્યાપરાણિ પ્રયોગયોગ્યાનિ સદેચ્છતિ સ્મ ॥ ૧૫.૩૬॥

ભીષ્માદિભિર્ભવિતા સઙ્ગરો નસ્તદા નાહં ગુરુભિર્નિત્યયોદ્ધા ।
ભવેયમેકઃ ફલ્ગુનોઽસ્ત્રજ્ઞ એષાં નિવારકશ્ચેન્મમ ધર્મલાભઃ ॥ ૧૫.૩૭॥

ન બુદ્ધિપૂર્વં વર ઇન્દિરાપતેરન્યત્ર મે ગ્રાહ્ય ઇતશ્ચ જિષ્ણુઃ ।
કરોતુ ગુર્વર્થમિતિ સ્મ ચિન્તયન્ ભીમઃ પ્રતિજ્ઞાં ન ચકાર તત્ર ॥ ૧૫.૩૮॥

તત્પ્રેરિતેનાર્જુનેન પ્રતિજ્ઞા કૃતા યદા વિપ્રવરસ્તતઃ પરમ્ ।
સ્નેહં નિતાન્તં સુરરાજસૂનૌ કૃત્વા મહાસ્ત્રાણિ દદૌ સ તસ્ય ॥ ૧૫.૩૯॥

સ પક્ષપાતં ચ ચકાર તસ્મિન્ કરોતિ ચાસ્યોરુતરાં પ્રશં સામ્ ।
રહસ્યવિદ્યાશ્ચ દદાતિ તસ્ય નાન્યસ્ય કસ્યાપિ તથા કથઞ્ચિત્ ॥ ૧૫.૪૦॥

ભીમઃ સમસ્તં પ્રતિભાબલેન જાનન્ સ્નેહં ત્વદ્વિતીયં કનિષ્ઠે ।
દ્રોણસ્ય કૃત્વા સકલાસ્ત્રવેદિનં કર્તું પાર્થં નાર્જુનવચ્ચકાર ॥ ૧૫.૪૧॥

નૈવાતિયત્નેન દદર્શ લક્ષં શુશ્રૂષાયાં પાર્થમગ્રે કરોતિ ।
સ્વબાહુવીર્યાદ્ભગવત્પ્રસાદાન્નિહન્મિ શત્રૂન્ કિમનેન ચેતિ ॥ ૧૫.૪૨॥

તદા સમીયુઃ સકલાઃ ક્ષિતીશપુત્રા દ્રોણાત્સકલાસ્ત્રાણ્યવાપ્તુમ્ ।
દદૌ સ તેષાં પરમાસ્ત્રાણિ વિપ્રો રામાદવાપ્તાન્યગતાનિ ચાન્યૈઃ ॥ ૧૫.૪૩॥

અસ્ત્રાણિ ચિત્રાણિ મહાન્તિ દિવ્યાન્યન્યૈર્નૃપૈર્મનસાઽપ્યસ્મૃતાનિ ।

અવાપ્ય સર્વે તનયા નૃપાણાં શક્તા બભૂવુર્ન યથૈવ પૂર્વે ॥ ૧૫.૪૪॥

નૈતાદૃશાઃ પૂર્વમાસન્નરેન્દ્રા અસ્ત્રે બલે સર્વવિદ્યાસુ ચૈવ ।
દૌષ્યન્તિમાન્ધાતૃમરુત્તપૂર્વાશ્ચૈતત્સમાનાઃ સુરદારવીર્યાઃ ॥ ૧૫.૪૫॥

તદા કર્ણોઽથૈકલવ્યશ્ચ દિવ્યાન્યસ્ત્રાણ્યાપ્તું દ્રોણસમીપમીયતુઃ ।
સૂતો નિષાદ ઇતિ નૈતયોરદાદસ્ત્રાણિ વિપ્રઃ સ તુ રામશિષ્યઃ ॥ ૧૫.૪૬॥

ચ્લિક્ષક્ષ્। કર્ણોઽનવાપ્ય નિજમીપ્સિતમુચ્ચમાનો યસ્માદવાપ પુરુષોત્તમતોઽસ્ત્રવૃન્દમ્ ।
વિપ્રોઽપ્યયં તમજમેમિ ભૃગોઃ કુલોત્થમિત્થં વિચિન્ત્ય સ યયૌ ભૃગુપાશ્રમાય ॥ ૧૫.૪૭॥

સ સર્વવેત્તુશ્ચ વિભોર્ભયેન વિપ્રોઽહમિત્યવદદસ્ત્રવરાતિલોભાત્ ।
જાનન્નપિ પ્રદદાવસ્ય રામો દિવ્યાન્યસ્ત્રાણ્યખિલાન્યવ્યયાત્મા ॥ ૧૫.૪૮॥

અસ્ત્રજ્ઞચૂલ્।  આમણિમિન્દ્રસૂનું વિશ્વસ્ય હન્તું ધૃતરાષ્ટ્રપુત્રઃ ।
એનં સમાશ્રિત્ય દૃઢો ભવેતેત્યદાજ્ઞ્ઞાત્વૈવાસ્ત્રમસ્મૈ રમેશઃ ॥ ૧૫.૪૯॥

જ્ઞાનં ચ ભાગવતમપ્યપરાશ્ચ વિદ્યા રામાદવાપ્ય વિજયં ધનુરગ્ર્યયાનમ્ ।
અબ્દૈશ્ચતુર્ભિરથ ચ ન્યવસત્તદન્તે હાતું ન શક્ત ઉરુગાયમિમં સ કર્ણઃ ॥ ૧૫.૫૦॥

અઙ્કે નિધાય સ કદાચિદમુષ્ય રામઃ શિશ્યે શિરો વિગતનિદ્ર ઉદારબોધઃ ।
સં સુપ્તવત્સુરવરઃ સુરકાર્યહેતોર્દાતું ચ વાલિનિધનસ્ય ફલં તદસ્ય ॥ ૧૫.૫૧॥

તત્રાઽસ રાક્ષસવરઃ સ તુ હેતિનામા કાલે મહેન્દ્રમનુપાસ્ય હિ શાપતોઽસ્ય ।
કીટસ્તમિન્દ્ર ઉત તત્ર સમાવિવેશ કર્ણસ્ય શાપમુપપાદયિતું સુતાર્થે ॥ ૧૫.૫૨॥

કર્ણઃ સ કીટતનુગેન કિરીટિનૈવ હ્યૂરોરધસ્તનત ઓપરિગાત્વચશ્ચ ।
વિદ્ધઃ શરેણ સ યથા રુધિરસ્ય ધારાં સુસ્રાવ તં વિગતનિદ્ર ઇવાઽહ રામઃ ॥ ૧૫.૫૩॥

કિં ત્વં ન ચાલયસિ માં રુધિરપ્રસેકે પ્રાપ્તેઽપિ પાવનવિરોધિનિ કોઽસિ ચેતિ ।
તં પ્રાહ કર્ણ ઇહ નૈવ મયા વિધેયો નિદ્રાવિરોધ ઇતિ કીટ ઉપેક્ષિતો મે ॥ ૧૫.૫૪॥

જાત્યાઽસ્મિ સૂત ઉત તે તનયોઽસ્મિ સત્યં તેનાસ્મિ વિપ્ર ઇતિ ભાર્ગવવં શજોઽહમ્ ।
અગ્રેઽબ્રુવં ભવત ઈશ નહિ ત્વદન્યો માતા પિતા ગુરુતરો જગતોઽપિ મુખ્યઃ ॥ ૧૫.૫૫॥

ઇત્યુક્તમાત્રવચને સ તુ કીટકોઽસ્ય રામસ્ય દૃષ્ટિવિષયત્વત એવ રૂપમ્ ।
સમ્પ્રાપ્ય નૈજમતિપૂર્ણગુણસ્ય તસ્ય વિષ્ણોરનુગ્રહત આપ વિમાનગઃ સ્વઃ ॥ ૧૫.૫૬॥

અથાઽહ રામસ્તમસત્યવાચો ન તે સકાશે મમ વાસયોગ્યતા ।
તથાઽપિ તે નૈવ વૃથા મદીયા ભક્તિર્ભવેજ્જેષ્યસિ સર્વશત્રૂન્ ॥ ૧૫.૫૭॥

અસ્પર્ધમાનં ન કથઞ્ચન ત્વાં જેતા કશ્ચિત્સ્પર્ધમાનસ્તુ યાસિ ।
ય્લક્ષ્।પરાભૂતિં નાત્ર વિચાર્યમસ્તિ પ્રમાદી ત્વં ભવિતા ચાસ્ત્રસઙ્ઘે ॥ ૧૫.૫૮॥

યાહીતિ તેનોક્ત ઉદારકર્મણા કર્ણો યયૌ તં પ્રણમ્યેશિતારમ્ ।
તથૈકલવ્યોઽપિ નિરાકૃતોઽમુના દ્રોણેન તસ્ય પ્રતિમાં વનેઽર્ચયત્ ॥ ૧૫.૫૯॥

તતઃ કદાચિદ્ધૃતરાષ્ટ્રપુત્રૈઃ પાણ્ડોઃ સુતા મૃગયાં સમ્પ્રયાતાઃ ।
અગ્રે ગચ્છન્ સારમેયો રુરાવ ધર્માત્મજસ્યાત્ર વને મૃગાર્થી ॥ ૧૫.૬૦॥

શ્રુત્વા રાવં સારમેયસ્ય દૂરાચ્છરૈર્મુખં શબ્દવેધી પુપૂરે ।
સ એકલવ્યો વ્રણમસ્ય નાકરોચ્છ્વા પૂરિતાસ્યઃ પાણ્ડવાનભ્યયાત્સઃ ॥ ૧૫.૬૧॥

દૃષ્ટ્વા ચિત્રં કુરવઃ પાણ્ડવાશ્ચ દ્રષ્ટું કર્તારં માર્ગયામાસુરત્ર ।
દ્રોણાકૃતિં માર્ત્તિકીં પૂજયન્તં દદૃશુશ્ચૈનં ધનુરેવાભ્યસન્તમ્ ॥ ૧૫.૬૨॥

પૈશાચમેવૈષ પિશાચકેભ્યઃ પૂર્વં વિવેદાસ્ત્રવૃન્દં નિષાદઃ ।
દિવ્યાન્યસ્ત્રાણ્યામુમેતાં ચ શિક્ષાં દ્રોણં સદા પૂજયતિ સ્મ ભક્ત્યા ॥ ૧૫.૬૩॥

દૃષ્ટ્વા વિશેષં તમમુષ્ય પાર્થો દ્રોણાયોચે ત્વદ્વરો મે મૃષાઽસીત્ ।
ઇત્યુક્ત એનં ત્વભિગમ્ય દક્ષિણાં વિપ્રો યયાચે દક્ષિણાઙ્ગુષ્ઠમેવ ॥ ૧૫.૬૪॥

તસ્ય પ્રસાદોપચિતોરુશિક્ષો નિષાદોઽદાદ્દક્ષિણાઙ્ગુષ્ઠમસ્મૈ ।
તતઃ પરં નાસ્ય બભૂવ શિક્ષા સન્મુષ્ટિહીનસ્ય સમાઽર્જુનેન ॥ ૧૫.૬૫॥

પુનઃ કૃપાલ્। ઊરૈવતપર્વતે તં દ્રોણઃ પ્રાપ્યાઽદાદસ્ત્રવરાણિ તસ્મૈ ।
એકાન્ત એવાસ્ય ભક્ત્યા સુતુષ્ટો ધન્વિશ્રેષ્ઠં કૃતવાનર્જુનં ચ ॥ ૧૫.૬૬॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
પાણ્ડવશાસ્ત્રાભ્યાસો નામ પઞ્ચદશોઽધ્યાયઃ ॥

## અથ ષોડશોઽધ્યાયઃ ।

(સૃગાલવધઃ )
કાલે ત્વેતસ્મિન્ ભૂય એવાખિલૈશ્ચ નૃપૈર્યુક્તો માગધો યોદ્ધુકામઃ ।
પ્રાયાદ્યદૂ સ્તત્ર નિત્યાવ્યયાતિબલૈશ્વર્યોઽપીચ્છયાઽગાત્સ કૃષ્ણઃ ॥ ૧૬.૧॥

સન્દર્શયન્ બલિનામલ્પસેનાદ્યુપસ્કરાણાં બહલ્। ઓપસ્કરૈશ્ચ ।
પ્રાપ્તે વિરોધે બલિભિર્નીતિમગ્ર્યાં યયૌ સરામો દક્ષિણાશાં રમેશઃ ॥ ૧૬.૨॥

સોઽનન્તવીર્યઃ પરમોઽભયોઽપિ નીત્યૈ ગચ્છન્ જામદગ્ન્યં દદર્શ ।

ક્રીડાર્થમેકોઽપિ તતોઽતિદુર્ગં શ્રુત્વા ગોમન્તં તત્ર યયૌ સહાગ્રજઃ ॥ ૧૬.૩॥

તદા દુગ્ધાબ્ધૌ સં સૃતિસ્થૈઃ સુરાદ્યૈઃ પૂજાં પ્રાપ્તું સ્થાનમેષાં ચ યોગ્યમ્ ।
મુક્તસ્થાનાદાપ નારાયણોઽજો બલિશ્ચાઽગાત્તત્ર સન્દ્રષ્ટુમીશમ્ ॥ ૧૬.૪॥

તત્રાસુરાવેશમમુષ્ય વિષ્ણુઃ સન્દર્શયન્ સુપ્તિહીનોઽપિ નિત્યમ્ ।
સં સુપ્તવિચ્છશ્ય ઉદારકર્મા સંજ્ઞાયૈ દેવાનાં મુખમીક્ષ્યાપ્રમેયઃ ॥ ૧૬.૫॥

દેવાશ્ચ તદ્ભાવવિદોઽખિલાશ્ચ નિમીલિતાક્ષાઃ શયનેષુ શિશ્યરે ।
તદા બલિસ્તસ્ય વિષ્ણોઃ કિરીટમાદાયાગાજ્જહસુઃ સર્વદેવાઃ ॥ ૧૬.૬॥

નારાયણે સર્વદેવૈઃ સમેતે બ્રહ્માદિભિર્હાસમાને સુપર્ણઃ ।
ગત્વા પાતાલ્. અં યુધિ જિત્વા બલિં ચ કિરીટમાદાયાભ્યયાદ્યત્ર કૃષ્ણઃ ॥ ૧૬.૭॥

તત્તસ્ય શીર્ષ્ણિ પ્રતિમુચ્ય નત્વા ખગઃ સ્તુત્વા દેવદેવં રમેશમ્ ।
સ્મૃત આગચ્છેત્યેવ વિસર્જિતોઽમુના યયૌ દુગ્ધાબ્ધિં યત્ર નારાયણોઽસૌ ॥ ૧૬.૮॥

કિરીટં તત્કૃષ્ણમૂર્ઘ્નિ પ્રવિષ્ટં તત્તુલ્યમાસીત્તસ્ય રૂપેષ્વભેદાત્ ।
તદિચ્છયા ચૈવ નારાયણસ્ય શીષર્ણ્યપ્યાસીદ્યુગપદ્દુગ્ધવાર્ધૌ ॥ ૧૬.૯॥

પૂર્વં પ્રાપ્તાન્યેવ દિવ્યાયુધાનિ પુનર્વૈકુણ્ઠં લોકમિતાનિ ભૂયઃ ।
તદાઽવતેરૂ રૌહિણેયસ્ય ચૈવં ભાર્યાઽપ્યાયાદ્વારુણી નામ પૂર્વા ॥ ૧૬.૧૦॥

સૈવાપરં રૂપમાસ્થાય ચાઽગાચ્છ્રીરિત્યાખ્યં સેન્દિરાવેશમગ્ર્યમ્ ।
કાન્તિશ્ચાઽગાત્તસ્ય સોમસ્ય ચાન્યા ભાર્યા દ્વયોઃ પૂર્વતના સુરૂપા ॥ ૧૬.૧૧॥

ય્લ્ક્ષ્મી।તાભી રામો મુમુદે તત્ર તિષ્ઠગ્ચ્છશાઙ્કુપૂગોદ્રિક્તકાન્તિઃ સુધામા ।
તસ્યા વારુણ્યાઃ પ્રતિમા પેયરૂપા કાદમ્બરી વારુણી તાં પપૌ સઃ ॥ ૧૬.૧૨॥

એવં તયોઃ ક્રીડતોઃ સ્વૈરમત્ર રાજન્યવૃન્દાનુગતો જરાસુતઃ ।
ગિરિં ગોમન્તં પરિવાર્યાદહત્તં દૃષ્ટ્વા દેવૌ પુપ્લુવતુર્બલાબ્ધૌ ॥ ૧૬.૧૩॥

ગિરિસ્તાભ્યાં પીડિતઃ સન્નિમગ્નો ભૂમૌ પદ્ભ્યાં યોજનૈકાદશં સઃ ।
નિષ્પીડિતાજ્જલધારોદ્ધતાઽસ્માદ્વહ્નિં વ્યાપ્તં શમયામાસ સર્વમ્ ॥ ૧૬.૧૪॥

સેનાં પ્રવિષ્ટૌ સર્વરાજન્યવૃન્દં વ્યમથ્નાતાં દેવવરૌ સ્વશસ્ત્રૈઃ ।
તત્ર હં સો ડિભકશ્ચૈકલવ્યઃ સકીચકસ્તૌ શિશુપાલપૌણ્ડ્રકૌ ॥ ૧૬.૧૫॥

ભૌમાત્મજો દન્તવક્રશ્ચ રુગ્મી સૌભાધિપો મૈન્દમૈન્દાનુજૌ ચ ।
અન્યે ચ યે પાર્થિવાઃ સર્વ એવ ક્રોધાત્કૃષ્ણં પરિવાર્યાભ્યવર્ષન્ ॥ ૧૬.૧૬॥

શસ્ત્રૈરસ્ત્રૈર્દ્રુમપૂગૈઃ શિલાભિર્ભક્તાશ્ચ યે શલ્યબાહ્લીકમુખ્યાઃ ।
સસોમદત્તાઃ સૌમદત્તિર્વિરાટઃ પાઞ્ચાલરાજશ્ચ જરાસુતસ્ય ।
ભયાત્કૃષ્ણં શસ્ત્રવર્ષૈરવર્ષન્ કારાગૃહે વાસિતા માગધેન ॥ ૧૬.૧૭॥

સર્વાનેતાઞ્છરવર્ષેણ કૃષ્ણો વિસૂતવાજિધ્વજશસ્ત્રવર્મણઃ ।
કૃત્વા વમચ્છોણિતાનાર્તરૂપાન્ વિદ્રાવયામાસ હરિર્યથા મૃગાન્ ॥ ૧૬.૧૮॥

હત્વા સેનાં વિં શદક્ષોહિણીં તાં ત્રિભિર્યુક્તાં રુગ્મિણં નૈવ કૃષ્ણઃ ।
રુગ્મિણ્યર્થે પીડયામાસ શસ્ત્રાણ્યસ્ય ચ્છિત્વા વિરથં દ્રાવયાનઃ ॥ ૧૬.૧૯॥

જરાસુતો રૌહિણેયેન યુદ્ધં ચિરં કૃત્વા તન્મુસલેન પોથિતઃ ।
વિમોહિતઃ પ્રાપ્તસંજ્ઞશ્ચિરેણ ક્રુદ્ધો ગદાં તદુરસ્યભ્યપાતયત્ ॥ ૧૬.૨૦॥

તેનાऽહતઃ સુભૃશં રૌહિણેયઃ પપાત મૂર્ચ્છાભિગતઃ ક્ષણેન ।
અજેયત્વં તસ્ય દત્તં હિ ધાત્રા પૂર્વં ગૃહીતો વિષ્ણુના રામગેન ॥ ૧૬.૨૧॥

તથાકૃતે બલભદ્રે તુ કૃષ્ણો ગદામાદાય સ્વામગાન્માગધેશમ્ ।
તતાઽ જત્રૌ સ તયાऽભિતાડિતો જગામ ગાં મૂર્ચ્છયાऽભિપ્લુતાઙ્ગઃ ॥ ૧૬.૨૨॥

ચ્લ્ક્ષ્ક્ષીઇऽથોત્તસ્થૌ રૌહિણેયઃ સહૈવ સમુત્તસ્થૌ માગધોऽપ્યગ્ર્યવીર્યઃ ।
ક્રુદ્ધો ગૃહીત્વા મૌલિમસ્યાऽશુ રામો વધાયોદ્યચ્છન્મુસલં બાહુષાલ્. ઈ ॥ ૧૬.૨૩॥

અથાબ્રવીદ્વાયુરેનં ન રામ ત્વયા હન્તું શક્યતે માગધોऽયમ્ ।
વૃથા નતે બાહુબલં પ્રયોજ્યમમોઘં તે યદ્બલં તદ્વદસ્ત્રમ્ ॥ ૧૬.૨૪॥

અન્યો હન્તા બલવાનસ્ય ચેતિ શ્રુત્વા યયૌ બલભદ્રો વિમુચ્ય ।
જરાસુતં પુનરુદ્યચ્છમાનં જઘાન કૃષ્ણો ગદયા સ્વયૈવ ॥ ૧૬.૨૫॥

તેનાऽહતઃ સ્રસ્તસમસ્તગાત્રઃ પપાત મૂર્છાભિગતઃ સ રાજા ।
ચિરાત્સંજ્ઞાં પ્રાપ્ય ચાન્તર્હિતોऽસૌ સમ્પ્રાદ્રવદ્ભીતભીતઃ સલજ્જઃ ॥ ૧૬.૨૬॥

યયૌ શિષ્ટૈ રાજભિઃ સં યુતશ્ચ પુરં જીવેત્યેવ કૃષ્ણેન મુક્તઃ ।
પુનર્યુદ્ધં બહુશઃ કેશવેન કૃત્વા જિતો રાજગણૈઃ સમેતઃ ॥ ૧૬.૨૭॥

કૃષ્ણો જિત્વા માગધં રૌહિણેયયુક્તો યયૌ દમઘોષેણ સાર્દ્ધમ્ ।
પિતૃષ્વસાયાઃ પતિના તેન ચોક્તઃ પૂર્વં જિતેનાપિ યુધિ સ્મ બાન્ધવાત્ ॥ ૧૬.૨૮॥

યામઃ પુરં કરિવીરાખ્યમેવ મહાલક્ષ્મ્યાઃ ક્ષેત્રસન્દર્શનાય ।
શ્રુત્વા વાક્યં તસ્ય યુદ્ધે જિતસ્ય ભીત્યા યુક્તસ્યાऽત્મના તદ્યુતોऽગાત્ ॥ ૧૬.૨૯॥

ગન્ધર્વોऽસૌ દનુનામા નરોऽભૂત્તસ્માત્કૃષ્ણે ભક્તિમાંશ્ચાऽસ રાજા ।

પુરપ્રાપ્તાં સ્તાન્ સ વિજ્ઞાય પાપઃ સૃગાલાખ્યો વાસુદેવઃ ક્રુધાऽગાત્ ॥ ૧૬.૩૦॥

સૂર્યપ્રદત્તં રથમારુહ્ય દિવ્યં વરાદવધ્યસ્તિગ્મરુચેઃ સ કૃષ્ણમ્ ।
યોદ્ધું યયાવમુચચ્ચાસ્ત્રસઙ્ઘાઞ્છિરસ્તસ્યાથાऽશુ જહાર કૃષ્ણઃ ॥ ૧૬.૩૧॥

દ્વિધા કૃત્વા દેહમસ્યારિણા ચ પુત્રં ભક્તં તસ્ય રાજ્યેऽભિષિચ્ય ।
સ શક્રદેવં માણિભદ્રઃ પુરા યો યયૌ પુરીં સ્વાં સહિતોऽગ્રજેન ॥ ૧૬.૩૨॥

ચિક્ષ્વઇતિં બલિષ્ઠસ્ય વિહાય સેનાં દૂરાદ્યુદ્ધં યુદ્ધં દર્શયિત્વૈવ ગુપ્ત્યૈ ।
સ્વસેનાયાઃ સર્વપૂર્ણાત્મશક્તિઃ પુનઃ પુરીં પ્રાપ્ય સ પૂજિતોऽવસત્ ॥ ૧૬.૩૩॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
સૃગાલવધો નામ ષોડશોऽધ્યાયઃ ॥

## અથ સપ્તદશોऽધ્યાયઃ ।

(હંસડિભકવધઃ )
ૐ । ગતેऽથ ચેદિપે સ્વકં પુરં જનાર્દનોऽશૃણોત્ ।
રમૈવ રુગ્મિણીતિ યોદ્યતાં સ્વયમ્બરાય તામ્ ॥ ૧૭.૧॥

સ રુગ્મિનામકોऽગ્રજઃ શ્રિયો દ્વિષન્ રમાપતિમ્ ।
હરેઃ પ્રદાતુમુદ્યતાં ન્યવારયદ્ધરિપ્રિયામ્ ॥ ૧૭.૨॥

પ્રઘોષિતે સ્વયમ્બરેऽથ તેન માગધાદયઃ ।
સમીયુરુગ્રપૌરુષાઃ સસાલ્વપૌણ્ડ્રચેદિપાઃ ॥ ૧૭.૩॥

તદા જગામ કેશવો જવેન કુણ્ડિનં પુરમ્ ।
સ્મૃતોऽથ તેન પક્ષિરાટ્સમાજગામ કેશવમ્ ॥ ૧૭.૪॥

પતત્રવાયુનાऽસ્ય તે નરેશ્વરાઃ પ્રપાતિતાઃ ।
યદેદૃશં પતત્રિણો બલં હરેઃ કિમુચ્યતે ॥ ૧૭.૫॥

કિમત્ર નઃ કૃતં ભવેત્સુખાય હીતિ તેऽબ્રુવન્ ।
અથાબ્રવીજ્જરાસુતો જયી પયોબ્ધિમન્દિરઃ ।
કિલૈષ પક્ષિવાહનો યતશ્ચ નાન્યથા ભવેત્ ॥ ૧૭.૬॥

જિતા વયં ચ સર્વશોऽમુનૈકલેન સં યુગે ।
અનેકશો ન સઙ્ગતૈર્જિતઃ કદાચિદેષ હિ ॥ ૧૭.૭॥

અમુષ્ય ચાગ્રજઃ પુરા નિહન્તુમુદ્યતો હિ મામ્ ।

અદૃશ્યવાક્યતોઽત્યજત્પ્રતાડનાત્સુપીડિતમ્ ॥ ૧૭.૮॥

કિમસ્ય તૂચ્યતે બલં વયં તૃણોપમાઃ કૃતાઃ ।
સમસ્તશો મૃધેમૃધે હિ યેન ચાક્ષતેન હા ॥ ૧૭.૯॥

કિમત્ર કુર્વતાં સુખં ભવેદુદીર્ણસઙ્કટે ।
ઇતિ બ્રુવન્નવાઙ્મુખં નૃપશ્ચકાર વિચ્છવિ ॥ ૧૭.૧૦॥

અથાઽહ ચેદિભૂપતિઃ સદન્તવક્રકો વચઃ ।
ચ્લિક્ષ્ક્ષ્વ।પુરા હરેર્હિ પાર્ષદઃ પ્રસન્નબુદ્ધિરેકદા ॥ ૧૭.૧૧॥

શ્ૃણુષ્વ રાજસત્તમ પ્રભું શિવસ્વયમ્ભુવોઃ ।
હરિં વદન્તિ કેચિદપ્યદો ભવેન્ન વૈ મૃષા ॥ ૧૭.૧૨॥

તથાઽવયોશ્ચ દર્શને ભવેત્કદાચિદૂર્જિતા ।
અમુષ્ય ભક્તિરન્યથા પુનશ્ચ જાયતે ક્રુધા ॥ ૧૭.૧૩॥

ન કારણં ન વિદ્મહે ન સં શયઃ પરો હરિઃ ।
વ્રજામ તં સુખાર્થિનો વયં વિહાય શત્રુતામ્ ॥ ૧૭.૧૪॥

ઇદં હિ નઃ શુભપ્રદં નચાન્યથા શુભં ક્વચિત્ ।
ઇતીરિતો જરાસુતો દદર્શ તૌ દહન્નિવ ॥ ૧૭.૧૫॥

અથ પ્રહસ્ય સૌભરાડ્વચો જગાદ માગધમ્ ।
વિનિન્દ્ય તૌ ક્રુધા સ્ફુરન્ ક્રુધા સ્ફુરન્તમીક્ષ્ય ચ ॥ ૧૭.૧૬॥

ન તન્મૃષા હરિઃ સ્વયં જનાર્દનો વધાય નઃ ।
પ્રજાત એષ યાદવો વયં ચ દાનવેશ્વરાઃ ॥ ૧૭.૧૭॥

સ્વધર્મ એષ નઃ સદા દૃઢપ્રતીપતા હરૌ ।
સ્વધર્મિણો હતા અપિ પ્રયામ સદ્ગતિં ધ્રુવમ્ ॥ ૧૭.૧૮॥

શિવશ્ચ નઃ પરા ગતિર્ગુરુર્ભવાનરિર્હરિઃ ।
ઇતીરિતઃ સ માગધો જગાદ સાધુસાધ્વિતિ ॥ ૧૭.૧૯॥

તથૈવ રુગ્મિપૂર્વકાઃ કરૂશચેદિપૌ ચ તૌ ।
વિનિશ્ચયં કુબુદ્ધયો યુધે ચ ચક્રુરૂર્જિતમ્ ॥ ૧૭.૨૦॥

સદા પ્રતીપકારિણૌ ભવાવ કૃષ્ણ ઇત્યપિ ।
ગુરોઃ પ્રસાદમાપ્નુતાં કરૂશચેદિભૂભૃતૌ ॥ ૧૭.૨૧॥

પુનશ્ચ તે ત્વમન્ત્રયન્ સહૈવ પાપબુદ્ધયઃ ।
ધ્રુવં સમાગતો હરિર્લભેત રુગ્મિણીમિમામ્ ॥ ૧૭.૨૨॥

ચ્લ્ક્ષ્વીડયં ત્રિલોકસુન્દરોઽનુરૂપિણી ચ રુગ્મિણી ।
મુખેન બાહુનાઽપ્યયં સમસ્તલોકજિદ્વશી ॥ ૧૭.૨૩॥

સમસ્તવેદિનાં વરં જિતારિમગ્ર્યરૂપિણમ્ ।
સમસ્તયોષિતાં વરા વ્રજેત રુગ્મિણી ધ્રુવમ્ ॥ ૧૭.૨૪॥

વયં ચ માનસઙ્ક્ષયં નિતાન્તમાપ્નુમસ્તદા ।
ન શક્નુમો નિવારિતું શરૈરમું કથઞ્ચન ॥ ૧૭.૨૫॥

અતઃ સ્વયમ્બરે યથા નસઙ્ગમો હરેર્ભવેત્ ।
તથા વિધાનમેવ નઃ સુનીતિરૂર્જિતા ધ્રુવમ્ ॥ ૧૭.૨૬॥

અતો ન દેયમસ્ય નઃ સુભૂભુજાં સમાગમે ।
ક્વચિત્કદાચિદાસનં નચાર્ઘ્યપૂર્વકો વિધિઃ ॥ ૧૭.૨૭॥

નચાઽસ્યતિ ક્ષિતૌ ક્વચિદ્વિમાનિતઃ પુરો હિ નઃ ।
વરાસનસ્થભૂભુજાં સ માનિતો હિ દૈવતૈઃ ॥ ૧૭.૨૮॥

સ દર્પમાનસં યુતઃ ક્રુધા પ્રયાસ્યતિ ધ્રુવમ્ ।
પુરીં સ્વકાં તતૌ વયં વિધેમ ચ સ્વયમ્બરમ્ ॥ ૧૭.૨૯॥

ઇતિ સ્મ સર્વભૂભૃતાં વિનિશ્ચયં સકૈશિકઃ ।
ક્રથોઽવગમ્ય ભીષ્મકાનુજોઽભ્યયાદ્ધરિં દ્રુતમ્ ॥ ૧૭.૩૦॥

પ્રણમ્ય પાદપદ્મયોર્નિજં ગૃહં પ્રવેશ્ય ચ ।
મહાસનં પ્રદાય તૌ પ્રચક્રતુર્વરાર્ચનમ્ ॥ ૧૭.૩૧॥

અથાઽગમચ્છતક્રતોર્વચઃ પ્રગૃહ્ય ભૂભુજઃ ।
જરાસુતાદિકાન્ પુમાનુવાચ ચાર્થવદ્વચઃ ॥ ૧૭.૩૨॥

અહં પ્રિયઃ શચીપતેઃ સદાઽસ્ય ચાક્ષિગોચરઃ ।
સુરેન્દ્ર આજ્ઞયાઽવદન્નૃપાન્ વ ઈશ્વરો હિ સઃ ॥ ૧૭.૩૩॥

સમસ્તરાજસત્પતિર્હરિર્નચાન્ય ઇત્યપિ ।
વરાભિષેકમીશિતુઃ કુરુધ્વમાશ્વસં શયમ્ ॥ ૧૭.૩૪॥

ચ્લ્ક્ષ્વીઇઽતોઽન્યથા શિરસ્યહં નિપાતયામિ વોઽશનિમ્ ।
ઇતીદમિન્દ્રશાસનં કુરુધ્વમિત્યસૌ યયૌ ॥ ૧૭.૩૫॥

તદીરિતં નિશમ્ય તે પુનઃ સુતપ્તચેતસઃ ।
બભૂવુરૂચિરે વચઃ સુગર્વિતો હિ વાસવઃ ॥ ૧૭.૩૬॥

પુરા બિભેતિ નઃ સદા પ્રતિપ્રતિ સ્મ વાસવઃ ।
ઉતાદ્ય કૃષ્ણસં શ્રયાદ્દૃઢં વિભીષયત્યસૌ ॥ ૧૭.૩૭॥

અદૃશ્ય એવ દેવરાડ્યદિ સ્મ વજ્રમુત્સૃજેત્ ।
ભવેમ પીડિતા વયં વરાદમૃત્યવોઽપિ હિ ॥ ૧૭.૩૮॥

પુરા દિવિસ્થિતસ્ય ચ પ્રમર્દને વયં ક્ષમાઃ ।
ઉતાદ્ય યદ્યમું વયં વ્રજેમ કૃષ્ણ એષ્યતિ ॥ ૧૭.૩૯॥

અતોઽભિષેચનાદ્યદીહ શાર્ઙ્ગિણઃ શચીપતિઃ ।
ન વજ્રમુત્સૃજેત્તદાઽભિષેચયામ તં વયમ્ ॥ ૧૭.૪૦॥

અતોઽન્યથા દનુર્યથા વરાદમૃત્યુકોઽપિ સન્ ।
સુરેન્દ્રવજ્રતાડિતો બભૂવ કુક્ષિગાસ્યયુક્ ॥ ૧૭.૪૧॥

તથૈવ કૃષ્ણસં શ્રયાત્સ નઃ શચીપતિર્નયેત્ ।
ઇતિ સ્મ નિશ્ચિતા નૃપાનયાતયન્ત શૌરયે ॥ ૧૭.૪૨॥

સમસ્તશો જરાસુતાદિભિઃ કૃતેઽભિષેચને ।
અતીવ ભગ્નમાનકાન્નચાનુયાતિ કશ્ચન ॥ ૧૭.૪૩॥

સમાશ્રયં ચ કેશવં તદૈવ જીવનાર્થિનઃ ।
પ્રકુર્યુરાસુરા અપીતિ દેવકાર્યસઙ્ક્ષયઃ ॥ ૧૭.૪૪॥

ઇતીક્ષ્ય પાકશાસનોઽવદજ્જરાસુતાદિકાન્ ।
સરુગ્મિચેદિસાલ્વપો ન યાતુ માગધો હરિમ્ ॥ ૧૭.૪૫॥

તતસ્તુ તાન્ વિનાઽપરેઽધિરાજરાજ ઇત્યમુમ્ ।
ચિક્ષિક્ષક્ષ્। તદાઽભિષેક્તુમુદ્યતા નૃપાઃ સુરેશશાસનાત્ ॥ ૧૭.૪૬॥

અતઃ શચીપતિર્નિજં વરાસનં હરેરદાત્ ।
વિવેશ તત્ર કેશવો નભસ્તલ્. આવતારિતે ॥ ૧૭.૪૭॥

કરે પ્રગૃહ્ય કેશવો ન્યવેશયત્સહાઽસને ।
પતત્રિપુઙ્ગવં ચ તૌ સ ભીષ્મકાનુજૌ પ્રભુઃ ॥ ૧૭.૪૮॥

અથાખિલા નરેશ્વરા મુનીન્દ્રસં યુતા હરિમ્ ।

સુશાતકૌમ્ભકુમ્ભકૈઃ પ્રચક્રુરાભિષેકિણમ્ ॥ ૧૭.૪૯॥

વિરિઞ્ચશર્વપૂર્વકૈરભિષ્ટુતઃ સુરાદિભિઃ ।
સમસ્તદેવગાયકૈઃ પ્રગીત આસ કેશવઃ ॥ ૧૭.૫૦॥

અથાઽહ ભીષ્મકં પ્રભુઃ સ્વયં વરઃ કિલ ત્વયા ।
અભીપ્સિતઃ સુતાકૃતે શુભાય તે ભવેન્ન સઃ ॥ ૧૭.૫૧॥

ઇયં રમા તવાઽત્મજા બભૂવ તાં હરેર્નચ ।
દદાતિ ચેત્તદા પિતા નિરિન્દિરો વ્રજેદધઃ ॥ ૧૭.૫૨॥

હિતાય ચૈતદીરિતં તવાન્યથા ન ચિન્તય ।
ન યોષિદિચ્છયા ત્વહં બ્રવીમિ પશ્ય યાદૃશઃ ॥ ૧૭.૫૩॥

ઉદીર્ય ચૈવમીશ્વરશ્ચકાર હાઽવિરાત્મનઃ ।
સ વિશ્વરૂપમુત્તમં વિસઙ્ખ્યશીર્ષબાહુકમ્ ॥ ૧૭.૫૪॥

અનન્તતેજ આતતં વિસઙ્ખ્યરૂપસં યુતમ્ ।
વિચિત્રમૌલિકુણ્ડલાઙ્ગદોરુહારનૂપુરમ્ ॥ ૧૭.૫૫॥

જ્વલત્સુકૌસ્તુભપ્રભાઽભિભાસકં શુભામ્બરમ્ ।
પ્રપશ્ય યાદૃશાઃ સ્ત્રિયો મમેત્યદર્શયચ્છ્રિયમ્ ॥ ૧૭.૫૬॥

અનન્તરૂપિણીં પરાં મનુષ્યદૃષ્ટિતોઽધિકામ્ ।
સ્વરુગ્મિણીતનોરપિ વ્યદર્શયચ્ચ દેવતાઃ ॥ ૧૭.૫૭॥

ચ્લ્ક્ક્ક્ષ્।તદદ્ભુતં સમીક્ષ્ય તુ પ્રભીત આશુ ભીષ્મકઃ ।
પપાત પાદયોર્વિભોઃ કરોમિ તત્તથેતિ ચ ॥ ૧૭.૫૮॥

પુનશ્ચ વિશ્વરૂપતાં પિધાય પદ્મલોચનઃ ।
જગામ પક્ષિવાહનઃ પુરીં સ્વબાહુપાલિતામ્ ॥ ૧૭.૫૯॥

અપામ્પતિશ્ચ મૈથિલઃ સ્વયં વરઙ્કૃતાવપિ ।
હરિં વિનિશ્ચયાદિયં વ્રજેદિતિ સ્મ ચક્રતુઃ ॥ ૧૭.૬૦॥

સ્વયં વરઃ ક્ષિતેર્ભુજાં સ્વધર્મ ઇત્યતો દ્વયોઃ ।
ન દોષ આસ ભીષ્મકો ન કેશવાર્થમૈચ્છત ॥ ૧૭.૬૧॥

અતો હરૌ પ્રબોધ્ય તં ગતે કૃપાલુસત્તમે ।
વશીકૃતે ચ ભીષ્મકે નૃપાસ્ત્વમન્ત્રયન્ પુનઃ ॥ ૧૭.૬૨॥

યશશ્ચ ધર્મમુત્તમં વિધિત્સતા વૃકોદરે ।
ન કેશવેન સૂદિતો જરાસુતો હિ મન્યતે ॥ ૧૭.૬૩॥

વરાચ્છિવસ્ય મામયં ન હન્તુમીષ્ટ ઉત્તમાત્ ।
અતઃ શિવપ્રસાદતો જિતોઽપિ જેષ્ય ઉત્તરમ્ ॥ ૧૭.૬૪॥

મૃધેમૃધે જિતોઽપિ સન્ દૃઢાશયા પુનઃ પુનઃ ।
સમીહતે યુધે શિવં નચાવમન્યતે ક્વચિત્ ॥ ૧૭.૬૫॥

અતઃ પુનશ્ચ ભૂમિપાનુવાચ બાર્હદ્રથઃ ।
ધિગેવ પૌરુષં હિ નો યદેષ નોઽજયત્સદા ॥ ૧૭.૬૬॥

અભૂપતેર્નચાઽસનં પ્રદેયમિત્યુદાહૃતમ્ ।
અમુષ્ય નસ્તદન્યથા બભૂવ ચિન્તિતં નૃપાઃ ॥ ૧૭.૬૭॥

અયં નૃપોત્તમાઙ્ગણે મહેન્દ્રપીઠમારુહત્ ।
સમસ્તરાજરાજતામવાપ નોઽપ્યનિચ્છતામ્ ॥ ૧૭.૬૮॥

અતઃ પુનઃ કથં હરિં વયં જયેમ ચિન્ત્યતામ્ ।
યથા ચભીષ્મકાત્મજામવાપ્નુયાચ્ચ ચેદિરાટ્ ॥ ૧૭.૬૯॥

ચ્છિક્ષક્ષઽયં હિ દત્તપુત્રકો મ ઔરસાદ્વિશિષ્યતે ।
અતો નિવેશ્ય એષ મે સુરૂપિણી ચ રુગ્મિણી ॥ ૧૭.૭૦॥

શિવાગમેષુ શિષ્યકાઃ સરુગ્મિસાલ્વપૌણ્ડ્રકાઃ ।
મમાખિલા નૃપાસ્તતઃ કુરુધ્વમેતદેવ મે ॥ ૧૭.૭૧॥

ઇતીરિતે તુ સૌભરાઙ્જગાદ રુગ્મિસં વિદા ।
સ્વયં વરો નિવર્તિતઃ સ્વસારમેષ દાસ્યતિ ॥ ૧૭.૭૨॥

નચાતિવર્તિતું ક્ષમઃ પિતાઽસ્ય ચેદિપાય તામ્ ।
પ્રદાતુકામમાત્મજં વયોગતસ્તથાઽબલઃ ॥ ૧૭.૭૩॥

સ્વયં તુ કૃષ્ણ એત્ય નો વિજિત્ય કન્યકાં હરેત્ ।
તતોઽસ્ય પૂર્વમેવ નો હ્યભાવતા કૃતા શુભા ॥ ૧૭.૭૪॥

ઉપાય એષ ચિન્તિતો મયાઽત્ર માગધેશ્વર ।
મુનિં હિ ગર્ગનામકં હ્યમુષ્ય સાલ આક્ષિપત્ ॥ ૧૭.૭૫॥

યદાઽસ્ય ષણ્ઢતોદિતા મુનેઃ પુરો હિ તસ્ય ચ ।
પરેણ વૃષ્ણયોઽહસંશ્ચુકોપ ગર્ગ એષુ હ ॥ ૧૭.૭૬॥

ચકાર હિ પ્રતિશ્રવં સમાર્જયે સુતં દ્રુતમ્ ।
અકૃષ્ણતાં ચ આનયેદ્ભુવોઽપિ વૃષ્ણિનાશકઃ ॥ ૧૭.૭૭॥

યતો હિ કૃષ્ણસંશ્રયાદ્ધતાપહાસિતા વયમ્ ।
ઇતિ બ્રુવન્ વનં યયૌ તપશ્ચ શૈવમાચરત્ ॥ ૧૭.૭૮॥

સ ચૂર્ણમાયસં ત્વદન્ દદર્શ ચાબ્દતઃ શિવમ્ ।
વરં તતોઽભિપેદિવાન્ સુતં હરેરભાવદમ્ ॥ ૧૭.૭૯॥

સ વિષ્ણુદૈવતોઽપિ સન્ પ્રવિષ્ટ ઉલ્બણાસુરૈઃ ।
વ્યધાદ્ધરેઃ પ્રતીપકં વ્રતં ચ નૈષ્ઠિકં જહૌ ॥ ૧૭.૮૦॥

તમાર ચાઽસુરાપ્સરા બલિષ્ઠપુત્રકામ્યયા ।
ચ્લ્ક્ષ્ક્ષ્ક્ષી.પ્રવિશ્ય ગોપિકાઙ્ગનાસમૂહમધ્યમુલ્બણા ॥ ૧૭.૮૧॥

સ યાવનેન ભૂભૃતા હિ ગોપિકાભિરર્ચિતઃ ।
અપુત્રકેણ જાનતા મુનેર્મનોઽનુચિન્તિતમ્ ॥ ૧૭.૮૨॥

સ ચાપ્સરસ્તનૌ સુતં નિષિચ્ય યાવનાય ચ ।
દદૌ વિમોહિતઃ ક્ષુધા કિમેતદીશ વૈરિણઃ ॥ ૧૭.૮૩॥

સ આશ્રમાચ્ચ નૈષ્ઠિકાદ્વિદૂષિતઃ પ્રતીપકૃત્ ।
હરેશ્ચ તાપમેયિવાન્ જગર્હ ચાઽત્મશેમુષીમ્ ॥ ૧૭.૮૪॥

જગામ ચારણં હરિં પ્રપાહિ માં સુપાપિનમ્ ।
ઇતિ સ્મ વિષ્ણ્વનુજ્ઞયા ચકાર વૈષ્ણવં તપઃ ॥ ૧૭.૮૫॥

કુતો હિ ભાગ્યમાપતેન્મુનેઃ શિવાર્ચને સદા ।
ભવાદૃશા હિદાનવાઃ સ્થિરાઃ શિવાર્ચને સદા ॥ ૧૭.૮૬॥

સુતોઽસ્ય કાલનામકો બભૂવ કૃષ્ણમર્દિતુમ્ ।
સદૈવ કાલકાઙ્ક્ષણાત્સ યાવનાભિષેચિતઃ ॥ ૧૭.૮૭॥

તવૈવ શિષ્ય એષ ચાતિભક્તિમાન્ હિ શઙ્કરે ।
પ્રભૂતસેનયા યુતો બલોદ્ધતશ્ચ સર્વદા ॥ ૧૭.૮૮॥

તમેષ યામિ શાસનાત્તવોપનીય સત્વરમ્ ।
વિકૃષ્ણકં ક્ષિતેસ્તલ્. અં વિધાય સં રમામ હા ॥ ૧૭.૮૯॥

તતશ્ચ રુગ્મિણીં વયં પ્રદાપયામ ચેદિપે ।

વિનાશ્ય દેવપક્ષિણો યથેષ્ટમાસ્મ સર્વદા ॥ ૧૭.૯૦ ॥

ઇતીરિતો જરાસુતો બભૂવ દુર્મના ભૃશમ્ ।
કિરીટમણ્ડિતં શિરશ્ચકાર ચાઽશ્વવાગ્ભૃશમ્ ॥ ૧૭.૯૧ ॥

કરં કરેણ પીડયન્નિશામ્ય ચાઽત્મનો ભુજૌ ।
જગાદ કાર્યસિદ્ધયે કથં પ્રયાચયે પરમ્ ॥ ૧૭.૯૨ ॥

ચ્લ્ક્ક્ક્ષીઇ। સુદુર્ગકાર્યસન્તતિં હ્યગુઃ સ્મ મદ્ભુજાશ્રયાઃ ।
સમસ્તભૂતલ્. એ નૃપાઃ સ ચાહમેષ માગધઃ ॥ ૧૭.૯૩ ॥

કદાઽપ્યચીર્ણમદ્ય તત્કથં કરોમિ કેવલમ્ ।
ગિરીશપાદસં શ્રયઃ પ્રભુઃ સમસ્તભૂભૃતામ્ ॥ ૧૭.૯૪ ॥

ઇતીરિતઃ સ સૌભરાડ્જગાદ વાક્યમુત્તરમ્ ।
ભવાનપિ સ્મ મુહ્યતે કિમસ્મદાદયઃ પ્રભો ॥ ૧૭.૯૫ ॥

સ્વશિષ્યકૈઃ કૃતં તુ યત્કિમન્યસાધિતં ભવેત્ ।
સ્વશિષ્યદાસવર્ગકૈઃ સમર્થયન્તિ ભૂભુજઃ ॥ ૧૭.૯૬ ॥

અપિ સ્મ તે બલાશ્રયપ્રવૃત્તયોઽસ્મદાદયઃ ।
પુમાન્ કુઠારસઙ્ગ્રહાદશક્ત ઈર્યતે હિ કિમ્ ॥ ૧૭.૯૭ ॥

કુઠારસમ્મિતો હ્યસૌ તવૈવ યાવનેશ્વરઃ ।
વિના ભવદ્બલં ક્વચિત્પ્રવર્તિતું નહિ ક્ષમઃ ॥ ૧૭.૯૮ ॥

વરો હિ કૃષ્ણમર્દને વૃતોઽસ્ય કેવલઃ શિવાત્ ।
તદન્યશત્રુપીડનાત્ત્વમેવ તસ્ય રક્ષકઃ ॥ ૧૭.૯૯ ॥

તવાખિલૈરજેયતા શિવપ્રસાદતોઽસ્તિ હિ ।
વિશેષતો હરેર્જયે વરાદયં વિમાર્ગ્યતે ॥ ૧૭.૧૦૦ ॥

ઇતીરિતેઽપ્યતૃપ્તવત્સ્થિતે તુ બાર્હદ્રથે ।
જગામ સૌભમાસ્થિતઃ સ સૌભરાટ્ચ યાવનમ્ ॥ ૧૭.૧૦૧ ॥

સ કાલયાવનોઽથ તં જરાસુતાન્તિકાગતમ્ ।
નિશમ્ય ભક્તિપૂર્વકં પ્રણમ્ય ચાઽર્ચયદ્દ્રુતમ્ ॥ ૧૭.૧૦૨ ॥

જરાસુતો હિ દૈવતં સમસ્તકેશવદ્વિષામ્ ।
ઇતિ પ્રણમ્ય તાં દિશં તદીયમાશ્વપૂજયત્ ॥ ૧૭.૧૦૩ ॥

તદીરિતં નિશમ્ય ચ દ્રુતં ત્રિકોટિસઙ્ખ્યયા ।
અક્ષોહિણીકયા યુતઃ સ્વસેનયા નિરાક્રમત્ ॥ ૧૭.૧૦૪॥

ય્લ્ક્ષ્ક્ષ્વ્। તદશ્વમૂત્રવિષ્ઠયા બભૂવ નામત શકૃત્ ।
નદી સુવેગગામિની કલૌ ચ યા વહેદ્દ્રુતમ્ ॥ ૧૭.૧૦૫॥

પુનઃ પુનર્નદીભવં નિશામ્ય દેશસઙ્ક્ષયમ્ ।
તદન્યદેશમૂત્રિતં વ્યશોષયદ્ધિ મારુતઃ ॥ ૧૭.૧૦૬॥

હરિશ્ચ વૈનતેયયુગ્વિચાર્ય રામસં યુતઃ ।
સદાઽતિપૂર્ણસં વિદપ્યજોઽથ લીલયાઽસ્મરત્ ॥ ૧૭.૧૦૭॥

યુયુત્સુરેષ યાવનઃ સમીપમાગતોઽદ્ય નઃ ।
યુયુત્સતામનેન નો જરાસુતોઽભિયાસ્યતિ ॥ ૧૭.૧૦૮॥

સ યાદવાન્ હનિષ્યતિ પ્રભઙ્ગતસ્તુ કોપિતઃ ।
પુરા જયાશયા હિ નૌ યદૂન્ન જઘ્નિવાનસૌ ॥ ૧૭.૧૦૯॥

નિરાશકોઽદ્ય યાદવાનપિ સ્મ પીડયિષ્યતિ ।
અતઃ સમુદ્રમધ્યગાપુરીવિધાનમદ્ય મે ।
પ્રરોચતે નિધાનમપ્યમુત્ર સર્વસાત્ત્વતામ્ ॥ ૧૭.૧૧૦॥

ઉદીર્ય ચૈવમીશ્વરોઽસ્મરત્સુરેશવર્ધકિમ્ ।
સ ભૌવનઃ સમાગતઃ કુશસ્થલીં વિનિર્મમે ॥ ૧૭.૧૧૧॥

નિરમ્બુકે તુ સાગરે જનાર્દનાજ્ઞયા કૃતે ।
મહોદકસ્ય મધ્યતશ્ચકાર તાં પુરીં શુભામ્ ।
દ્વિષટ્કયોજનાયતાં પયોબ્ધિમધ્યગોપમામ્ ॥ ૧૭.૧૧૨॥

ચકાર લાવણોદકં જનાર્દનોઽમૃતોપમમ્ ।
સભાં સુધર્મનામકાં દદૌ સમીરણોઽસ્ય ચ ॥ ૧૭.૧૧૩॥

શતક્રતોઃ સભાં તુ તાં પ્રદાય કેશવાય સઃ ।
નિધીન્ સમર્પ્ય સર્વશો યયૌ પ્રણમ્ય તં પ્રભુમ્ ॥ ૧૭.૧૧૪॥

સમસ્તદેવતાગણાઃ સ્વકીયમર્પયન્ હરૌ ।
વિમુચ્ય પક્ષિપુઙ્ગવં સ યોદ્ધુમૈચ્છદચ્યુતઃ ॥ ૧૭.૧૧૫॥

ય્લ્ક્ષ્ક્ષ્વ્। સમસ્તમાધુરાન્ પ્રભુઃ કુશસ્થલીસ્થિતાન્ ક્ષણાત્ ।
વિધાય બાહુયોધકઃ સ યાવનં સમભ્યયાત્ ॥ ૧૭.૧૧૬॥

અનન્તશક્તિરપ્યજઃ સુનીતિદૃષ્ટયે નૃણામ્ ।
વ્યવાસયન્નિજાન્ જનાન્ સ લીલયૈવ કેવલમ્ ॥ ૧૭.૧૧૭॥

અનાદ્યનન્તકાલકં સમસ્તલોકમણ્ડલમ્ ।
યદીક્ષયૈવ રક્ષ્યતે કિમસ્ય વૃષ્ણિરક્ષણમ્ ॥ ૧૭.૧૧૮॥

નિરાયુધં ચ મામયં વરાચ્છિવસ્ય ન ક્ષમઃ ।
સમસ્તસેનયા યુતોઽપિ યોદ્ધુમિત્યદર્શયત્ ॥ ૧૭.૧૧૯॥

સ કૃષ્ણપન્નગં ઘટે નિધાય કેશવોઽર્પયત્ ।
નિરાયુધોઽપ્યહં ક્ષમો નિહન્તુમપ્રિયાનિતિ ॥ ૧૭.૧૨૦॥

ઘટં પિપીલિકાગણૈઃ પ્રપૂર્ય યાવનોઽસ્ય ચ ।
બહુત્વતો વિજેષ્ય ઇત્યહિં મૃતં વ્યદર્શયત્ ॥ ૧૭.૧૨૧॥

કિમત્ર સત્યમિત્યહં પ્રદર્શયિષ્ય ઇત્યજઃ ।
ઉદીર્ય દૂતમભ્યયાત્સ યાવનં પ્રબાધિતુમ્ ॥ ૧૭.૧૨૨॥

સ બાહુનૈવ કેશવો વિજિત્ય યાવનં પ્રભુઃ ।
નિહત્ય સર્વસૈનિકાન્ સ્વમસ્ય યાપયત્પુરીમ્ ॥ ૧૭.૧૨૩॥

સહાસ્ત્રશસ્ત્રસઞ્ચયાન્ સૃજન્તમાશુ યાવનમ્ ।
ન્યપાતયદ્રથોત્તમાત્તલ્. એન કેશવોઽરિહા ॥ ૧૭.૧૨૪॥

વિવાહનં નિરાયુધં વિધાય બાહુના ક્ષણાત્ ।
વિમૂર્ચ્છિતં નચાહનત્સુરાર્થિતં સ્મરન્ હરિઃ ॥ ૧૭.૧૨૫॥

પુરા હિ યૌવનાશ્વજે વરપ્રદાઃ સુરેશ્વરાઃ ।
યયાચિરે જનાર્દનં વરં વરપ્રદેશ્વરમ્ ॥ ૧૭.૧૨૬॥

અનર્થકો વરોઽમુના વૃતોઽપિ સાર્થકો ભવેત્ ।
ચ્લ્ક્ષક્ષ્વઽરિં ભવિષ્યયાવનં દહત્વયં તવેશ્વર ॥ ૧૭.૧૨૭॥

તથાઽસ્ત્વિતિ પ્રભાષિતં સ્વવાક્યમેવ કેશવઃ ।
ઋતં વિધાતુમભ્યયાત્સ યૌવનાશ્વજાન્તિકમ્ ॥ ૧૭.૧૨૮॥

સસંજ્ઞકોઽથ યાવનો ધરાતલ્। આત્સમુત્થિતઃ ।
નિપાત્ય યાન્તમીશ્વરં સ પૃષ્ઠતોઽન્વયાત્ક્રુધા ॥ ૧૭.૧૨૯॥

હરિર્ગુહાં નૃપસ્ય તુ પ્રવિશ્ય સં વ્યવસ્થિતઃ ।
સ યાવનઃ પદાઽહનન્નૃપં સ તં દદર્શ હ ॥ ૧૭.૧૩૦॥

સ તસ્ય દૃષ્ટિમાત્રતો બભૂવ ભસ્મસાત્ક્ષણાત્ ।
સ એવ વિષ્ણુરવ્યયો દદાહ તં હિ વહ્નિવત્ ॥ ૧૭.૧૩૧॥

વરાચ્છિવસ્ય દૈવતૈરવધ્યદાનવાન્ પુરા ।
હરેર્વરાન્નિહત્ય સ પ્રપેદ આશ્વિમં વરમ્ ॥ ૧૭.૧૩૨॥

સુદીર્ઘસુપ્તિમાત્મનઃ પ્રસુપ્તિભઙ્ગકૃત્ક્ષયમ્ ।
સ્વદૃષ્ટિમાત્રતસ્તતો હતઃ સ યાવનસ્તદા ॥ ૧૭.૧૩૩॥

અતશ્ચ પુણ્યમાપ્તવાન્ સુરપ્રસાદતોઽક્ષયમ્ ।
સ યૌવનાશ્વજો નૃપો ન દેવતોષણં વૃથા ॥ ૧૭.૧૩૪॥

તતો હરિં નિરીક્ષ્ય સ સ્તુતિં વિધાય ચોત્તમામ્ ।
હરેરનુજ્ઞાયા તપશ્ચચાર મુક્તિમાપ ચ ॥ ૧૭.૧૩૫॥

તતો ગુહામુખાદ્ધરિર્વિનિસ્સૃતો જરાસુતમ્ ।
સમસ્તભૂપસં વૃતં જિગાય બાહુનેશ્વરઃ ॥ ૧૭.૧૩૬॥

તલ્। એન મુષ્ટિભિસ્તથા મહીરુહૈશ્ચ ચૂર્ણિતાઃ ।
નિપેતુરસ્ય સૈનિકાઃ સ્વયં ચ મૂર્ચ્છિતોઽપતત્ ॥ ૧૭.૧૩૭॥

સસાલ્વપૌણ્ડ્રચેદિપાન્નિપાત્ય સર્વભૂભુજઃ ।
સ પુપ્લુવે જનાર્દનઃ ક્ષણેન તાં કુશસ્થલીમ્ ॥ ૧૭.૧૩૮॥

ચ્લ્ક્ષ્ક્ષ્વી।સસંજ્ઞકાઃ સમુત્થિતાસ્તતો નૃપાઃ પુનર્યયુઃ ।
જિગીષવોઽથ રુગ્મિણીં વિધાય ચેદિપે હરિમ્ ॥ ૧૭.૧૩૯॥

સમસ્તરાજમણ્ડલે વિનિશ્ચયાદુપાગતે ।
સભીષ્મકે ચ રુગ્મિણિ પ્રદાતુમુદ્યતે મુદા ॥ ૧૭.૧૪૦॥

સમસ્તલોકયોષિતાં વરા વિદર્ભનન્દના ।
દ્વિજોત્તમં હરેઃ પદોઃ સકાશમાશ્વયાતયત્ ॥ ૧૭.૧૪૧॥

નિશમ્ય તદ્વચો હરિઃ ક્ષણાદ્વિદર્ભકાનગાત્ ।
તમન્વયાદ્ધલાયુધઃ સમસ્તયાદવૈઃ સહ ॥ ૧૭.૧૪૨॥

સમસ્તરાજમણ્ડલં પ્રયાન્તમીક્ષ્ય કેશવમ્ ।
સુયત્તમાત્તકાર્મુકં બભૂવ કન્યકાવને ॥ ૧૭.૧૪૩॥

પુરા પ્રદાનતઃ સુરેક્ષણચ્છલાદ્બહિર્ગતામ્ ।

રથે ન્યવેશયદ્ધરિઃ પ્રપશ્યતાં ચ ભૂભૃતામ્ ॥ ૧૭.૧૪૪॥

જરાસુતાદયો રુષા તમભ્યયુઃ શરોત્તમૈઃ ।
વિધાય તાન્નિરાયુધાન્ જગામ કેશવઃ શનૈઃ ॥ ૧૭.૧૪૫॥

પુનર્ગૃહીતકાર્મુકાન્ હરિં પ્રયાતુમુદ્યતાન્ ।
ન્યવારયદ્ધલાયુધો બલાદ્બલોર્જિતાગ્રણીઃ ॥ ૧૭.૧૪૬॥

તદા સિતઃ શિરોરુહો હરેર્હલાયુધસ્થિતઃ ।
પ્રકાશમાવિશદ્બલં વિજેતુમત્ર માગધમ્ ॥ ૧૭.૧૪૭॥

સ તસ્ય માગધો રણે ગદાનિપાતચૂર્ણિતઃ ।
પપાત ભૂતલ્. એ બલો વિજિત્ય તં યયૌ પુરીમ્ ॥ ૧૭.૧૪૮॥

વરોરુવેષસં વૃતોઽથ ચેદિરાટ્સમભ્યયાત્ ।
તમાસસાર સાત્યકિર્નદન્મૃગાધિપો યથા ॥ ૧૭.૧૪૯॥

ચિરં પ્રયુદ્ધ્ય તાવુભૌ વરાસ્ત્રશસ્ત્રવર્ષિણૌ ।
ક્રુધા નિરીક્ષ્ય તસ્થતુઃ પરસ્પરં સ્ફુરત્તનૂ ॥ ૧૭.૧૫૦॥

ચ્લ્ક્ષ્ક્ષ્વીઇ।સમાનભાવમક્ષમી શિનેઃ સુતાત્મજઃ શરમ્ ।
અથોદ્બબર્હ તત્ક્ષણાદ્બલાન્મુમોચ વક્ષસિ ॥ ૧૭.૧૫૧॥

સ તેન તાડિતોઽપતદ્વિસંજ્ઞકો નૃપાત્મજઃ ।
વિજિત્ય તં સ સાત્યકિર્યયૌ પ્રહૃષ્ટમાનસઃ ॥ ૧૭.૧૫૨॥

અથાપરે ચ યાદવા વિજિત્ય તદ્બલં યયુઃ ।
પુરૈવ રુગ્મિપૂર્વકાઃ પ્રજગ્મુરચ્યુતં પ્રતિ ॥ ૧૭.૧૫૩॥

સહૈકલવ્યપૂર્વકૈઃ સમેત્ય ભીષ્મકાત્મજઃ ।
હરિં વવર્ષ સાયકૈઃ સ સિં હવન્ન્યવર્તત ॥ ૧૭.૧૫૪॥

અક્ષોહિણીત્રયં હરિસ્તદા નિહત્ય સાયકૈઃ ।
અવાહનાયુધં વ્યધાન્નિષાદપં શરૈઃ ક્ષણાત્ ॥ ૧૭.૧૫૫॥

શરં શરીરનાશકં સમાદદાનમીશ્વરમ્ ।
સ એકલવ્ય આશુ તં વિહાય દુદ્રુવે ભયાત્ ॥ ૧૭.૧૫૬॥

ધનુર્ભૃતાં વરે ગતે રણં વિહાય ભૂભૃતઃ ।
કરૂશરાજપૂર્વકાઃ ક્ષણાત્પ્રદુદ્રુવુર્ભયાત્ ॥ ૧૭.૧૫૭॥

અથાઽસસાદ કેશવં રુષા સ ભીષ્મકાત્મજઃ ।
શરામ્બુધાર આશુ તં વિવાહનં વ્યધાદ્ધરિઃ ॥ ૧૭.૧૫૮॥

ચકર્ત કાર્મુકં પુનઃ સ ખડ્ગચર્મભૃદ્ધરેઃ ।
રથં સમારુહચ્છરૈશ્ચકર્ત ખડ્ગમીશ્વરઃ ॥ ૧૭.૧૫૯॥

શરૈર્વિતસ્તિમાત્રકૈર્વિધાય તં નિરાયુધમ્ ।
પ્રિયાવચઃ પ્રપાલયન્ જઘાન નૈનમચ્યુતઃ ॥ ૧૭.૧૬૦॥

નિબદ્ધ્ય પઞ્ચચૂલ્। ઇનં વિધાય તં વ્યસર્જયત્ ।
જગજ્જનિત્રયોરિદં વિડમ્બનં રમેશયોઃ ॥ ૧૭.૧૬૧॥

સદૈકમાનસાવપિ સ્વધર્મશાસકૌ નૃણામ્ ।
ચ્ક્ષ્ક્ષ્ક્ષક્ષ્। રમા હરિશ્ચ તત્ર તૌ વિજહ્રતુર્હિ રુગ્મિણા ॥ ૧૭.૧૬૨॥

અથાઽસસાદ સૌભરાઢરિં શરામ્બુવર્ષણઃ ।
હરિઃ શરં યમોપમં મુમોચ તસ્ય વક્ષસિ ॥ ૧૭.૧૬૩॥

શરેણ તેન પીડિતઃ પપાત મન્દચેષ્ટિતઃ ।
ચિરાત્તસંજ્ઞકોઽગમત્ત્રિનેત્રતોષણેચ્છયા ॥ ૧૭.૧૬૪॥

સમસ્તરાજસન્નિધાવયાદવીં મહીમહમ્ ।
કરિષ્ય ઇત્યુદીર્ય સ વ્યધાત્તપોઽતિદુશ્ચરમ્ ॥ ૧૭.૧૬૫॥

અથો વિવેશ કેશવઃ પુરીં કુશસ્થલીં વિભુઃ ।
પ્રિયાયુતોઽબ્જજાદિભિઃ સમીડિતઃ સુરેશ્વરૈઃ ॥ ૧૭.૧૬૬॥

પુરા તતો હલાયુધઃ પ્રિયાં નિજાં પુરાઽપિ હિ ।
સ વારુણીસમાહ્વયામવાપ રૈવતીં વિભુઃ ॥ ૧૭.૧૬૭॥

પતિં યથાઽનુરૂપિણં તદીયમેવ પૂર્વકમ્ ।
પિતા તદીય ઐચ્છત પ્રવેત્તુમબ્જસમ્ભવાત્ ॥ ૧૭.૧૬૮॥

સ તત્સદો ગતો વરાત્તદીયતઃ પ્રગીતિકામ્ ।
નિશમ્ય નાવિદદ્ગતં યુગોરુકાલપર્યયમ્ ॥ ૧૭.૧૬૯॥

નરાનયોગ્યગીતિકા વિમોહયેત્તતો નૃપઃ ।
સુમૂઢબુદ્ધિરન્તતોઽલ્પકાલ ઇત્યમન્યત ॥ ૧૭.૧૭૦॥

સ મૂર્ચ્છિતઃ પ્રબોધિતોઽબ્જજેન તં ત્વપૃચ્છત ।
સુતાપતિં બલં ચ સોઽબ્રવીદ્યુગાત્યયે બહૌ ॥ ૧૭.૧૭૧॥

સ રૈવતો બલાય તાં પ્રદાય ગન્ધમાદનમ્ ।
ગતોઽત્ર ચીર્ણસત્તપા અવાપ કેશવાન્તિકમ્ ॥ ૧૭.૧૭૨॥

બલોઽપિ તાં પુરાતનપ્રમાણસમ્મિતાં વિભુઃ ।
હલેન ચાઽજ્ઞયા સમાં ચકાર સત્યવાઞ્છિતઃ ॥ ૧૭.૧૭૩॥

ર્ક્ષ્ચ્।તયા રતઃ સુતાવુભૌ શઠોલ્મુકાભિધાવધાત્ ।
પુરાઽર્યમાં શકૌ સુરાવુદારચેષ્ટિતો બલઃ ॥ ૧૭.૧૭૪॥

જનાર્દનશ્ચ રુગ્મિણીકરં શુભે દિનેઽગ્રહીત્ ।
મહોત્સવસ્તદાઽભવત્કુશસ્થલીનિવાસિનામ્ ॥ ૧૭.૧૭૫॥

ચતુર્મુખેશપૂર્વકાઃ સુરા વિયત્યવસ્થિતાઃ ।
પ્રતુષ્ટુવુર્જનાર્દનં રમાસમેતમવ્યયમ્ ॥ ૧૭.૧૭૬॥

મુનીન્દ્રદેવગાયનાદયોઽપિ યાદવૈઃ સહ ।
વિચેરુરુત્તમોત્સવે રમારમેશયોગિનિ ॥ ૧૭.૧૭૭॥

સુરાં શકાશ્ચ યે નૃપાઃ સમાહુતા મહોત્સવે ।
સપાણ્ડવાઃ સમાયયુર્હરિં રમાસમાયુતમ્ ॥ ૧૭.૧૭૮॥

સમસ્તલોકસુન્દરૌ યુતૌ રમારમેશ્વરૌ ।
સમીક્ષ્ય મોદમાયયુઃ સમસ્તલોકસજ્જનાઃ ॥ ૧૭.૧૭૯॥

તયા રમન્ જનાર્દનો વિયોગશૂન્યયા સદા ।
અધત્ત પુત્રમુત્તમં મનોભવં પુરાતનમ્ ॥ ૧૭.૧૮૦॥

ચતુસ્તનોર્હરેઃ પ્રભોસ્તૃતીયરૂપસં યુતઃ ।
તતસ્તદાહ્વયોઽભવત્સ રુગ્મિણીસુતો બલી ॥ ૧૭.૧૮૧॥

પુરૈવ મૃત્યવેઽવદત્તમેવ શમ્બરસ્ય હ ।
પ્રજાતમબ્જજાઙ્ગજસ્તવાન્તકોઽયમિત્યપિ ॥ ૧૭.૧૮૨॥

સ માયયા હરેઃ સુતં પ્રગૃહ્ય સૂતિકાગૃહાત્ ।
અવાક્ષિપન્મહોદધાવુપેક્ષિતોઽરિપાણિના ॥ ૧૭.૧૮૩॥

તમગ્રસજ્જલેચરઃ સ દાશહસ્તમાગતઃ ।
કુમારમસ્ય તૂદરે નિરીક્ષ્ય શમ્બરે દદુઃ ॥ ૧૭.૧૮૪॥

વિપાટ્ય મત્સ્યકોદરં સ શમ્બરઃ કુમારકમ્ ।

ન્યવેદયન્મનોભવપ્રિયાકરે સુરૂપિણમ્ ॥ ૧૭.૧૮૫॥

ચ્ક્ષિચ્ડનઙ્ગતામુપાગતે પુરા હરેણ સાઽઙ્ગજે ।
વશં વિરિઞ્ચશાપતો જગામ શમ્બરસ્ય હિ ॥ ૧૭.૧૮૬॥

પુરા હિપઞ્ચભર્તૃકાં નિશમ્ય કઞ્જજોદિતામ્ ।
જહાસ પાર્ષતાત્મજાં શશાપ તાં તતસ્ત્વજઃ ॥ ૧૭.૧૮૭॥

ભવાસુરેણ દૂષિતેતિ સા તતો હિ માયયા ।
પિધાય તાં નિજાં તનું જગામ ચાન્યયાઽસુરમ્ ॥ ૧૭.૧૮૮॥

ગૃહેઽપિ સાઽસુરે સ્થિતા નિજસ્વરૂપતોઽસુરમ્ ।
ન ગચ્છતિ સ્મ સા પતિં નિજં સમીક્ષ્ય હર્ષિતા ॥ ૧૭.૧૮૯॥

રસાયનૈઃ કુમારકં વ્યવર્દ્ધયદ્રતિઃ પતિમ્ ।
સ પૂર્ણયૌવનોઽભવચ્ચતુર્ભિરેવ વત્સરૈઃ ॥ ૧૭.૧૯૦॥

પતિં સુપૂર્ણયૌવનં નિરીક્ષ્ય તાં વિષજ્જતીમ્ ।
ઉવાચ કાર્ષ્ણિરમ્બ તે કુચેષ્ટિતં કથં ન્વિતિ ॥ ૧૭.૧૯૧॥

જગાદ સાઽખિલં પતૌ તદસ્ય જન્મ ચાઽગતિમ્ ।
તતોઽગ્રહીત્સ તાં પ્રિયાં રતિં રમાપતેઃ સુતઃ ॥ ૧૭.૧૯૨॥

દદૌ ચ મન્ત્રમુત્તમં સમસ્તમાયિનાશકમ્ ।
ભૃગૂત્થરામદૈવતં રતિર્હરેઃ સુતાય સા ॥ ૧૭.૧૯૩॥

તતઃ સ્વદારધર્ષકં સમાહ્વયદ્યુધેઽઙ્ગજઃ ।
સ શમ્બરં સ ચૈત્ય તં યુયોધ શક્તિતો બલી ॥ ૧૭.૧૯૪॥

સ ચર્મખડ્ગધારિણં વરાસ્ત્રશસ્ત્રપાદપૈઃ ।
યદા ન યોદ્ધુમાશકદ્ધરેઃ સુતં ન દૃશ્યતે ॥ ૧૭.૧૯૫॥

સહસ્રમાયમુલ્બણં ત્વદૃશ્યમમ્બરાદ્ગિરીન્ ।
સૃજન્તમેત્ય વિદ્યયા જઘાન કૃષ્ણનન્દનઃ ॥ ૧૭.૧૯૬॥

સ વિદ્યયા વિનાશિતોરુમાય આશુ શમ્બરઃ ।
ચ્ક્ષ્ચીંઇકૃત્તકન્ધરોઽપતદ્વરાસિનાઽમુના ક્ષણાત્ ॥ ૧૭.૧૯૭॥

નિહત્ય તં હરેઃ સુતસ્તયૈવ વિદ્યયાઽમ્બરમ્ ।
સમાસ્થિતઃ સ્વભાર્યયા સમં કુશસ્થલીં યયૌ ॥ ૧૭.૧૯૮॥

સમસ્તવેદિનોર્મુનિર્નરાન્ વિડમ્બમાનયોઃ ।
રમારમેશયોઃ સુતં જગાદ તં સ્મ નારદઃ ॥ ૧૭.૧૯૯॥

સ રુગ્મિણીજનાર્દનાદિભિઃ સરામયાદવૈઃ ।
પિતામહેન ચાઽદરાત્સુલાલ્. ઇતોઽવસત્સુખમ્ ॥ ૧૭.૨૦૦॥

તતઃ પુરા સ્યમન્તકં હ્યવાપ સૂર્યમણ્ડલે ।
સ્થિતાદ્ધરેઃ સ સત્રજિત્સદાઽત્ર કેશવાર્ચકઃ ॥ ૧૭.૨૦૧॥

સદાઽસ્ય વિષ્ણુભાવિનોઽપ્યતીવ લોભમાન્તરમ્ ।
પ્રકાશયન્ રમાપતિર્યયાચ ઈશ્વરો મણિમ્ ॥ ૧૭.૨૦૨॥

સ તં ન દત્તવાં સ્તતોઽનુજો નિબદ્ધ્ય તં મણિમ્ ।
વનં ગતઃ પ્રસેનકો મૃગાધિપેન પાતિતઃ ॥ ૧૭.૨૦૩॥

તદા સ સત્રજિદ્ધરિં શશં સ સોદરાન્તકમ્ ।
ઉપાં શુ વર્ત્મના તતો હરિઃ સયાદવો યયૌ ॥ ૧૭.૨૦૪॥

વને સ સિં હસૂદિતં પદૈઃ પ્રદર્શ્ય વૃષ્ણિનામ્ ।
પ્રસેનમૃક્ષપાતિતં સ સિં હમપ્યદર્શયત્ ॥ ૧૭.૨૦૫॥

તતો નિધાય તાન્ બિલં સ જામ્બવત્પરિગ્રહમ્ ।
વિવેશ તત્ર સં યુગં બભૂવ તેન ચેશિતુઃ ॥ ૧૭.૨૦૬॥

યુયોધ મન્દમેવ સ પ્રભુઃ સ્વભક્ત ઇત્યજઃ ।
ચકાર ચોગ્રમન્તતઃ પ્રકાશયન્ સ્વમસ્ય હિ ॥ ૧૭.૨૦૭॥

સ મુષ્ટિપિષ્ટવિગ્રહો નિતાન્તમાપદં ગતઃ ।
જગામ ચેતસા રઘૂત્તમં નિજં પતિં ગતિમ્ ॥ ૧૭.૨૦૮॥

ર્ક્ષ્યીઇ।સ્મૃતિં ગતે તુ રાઘવે તદાકૃતિં યદૂત્તમે ।
સમસ્તભેદવર્જિતાં સમીક્ષ્ય સોઽયમિત્યવેત્ ॥ ૧૭.૨૦૯॥

તતઃ ક્ષમાપયન્ સુતાં પ્રદાય રોહિણીં શુભામ્ ।
મણિં ચ તં નુનાવ સ પ્રપન્ન આશુ પાદયોઃ ॥ ૧૭.૨૧૦॥

વિધાય ચક્રદારિતં સુજીર્ણદેહમસ્ય સઃ ।
યુવાનમાશુ કેશવશ્ચકાર વેદનાં વિના ॥ ૧૭.૨૧૧॥

વિધાય ભક્તવાઞ્છિતં પ્રિયાસહાય ઈશ્વરઃ ।
પ્રગૃહ્ય તં મહામણિં વિનિર્યયૌ ગુહામુખાત્ ॥ ૧૭.૨૧૨॥

ગુહાપ્રવિષ્ટમીશ્વરં બહૂન્યહાન્યનિર્ગતમ્ ।
પ્રતીક્ષ્ય યાદવાસ્તુ યે ગતા ગૃહં તદાઽહૃષુઃ ॥ ૧૭.૨૧૩॥

સમસ્તવૃષ્ણિસન્નિધૌ યદૂત્તમઃ સ્યમન્તકમ્ ।
દદૌ ચ સત્રજિત્કરે સ વિચ્છવિર્બભૂવ હ ॥ ૧૭.૨૧૪॥

સ દુર્યશો રમાપતાવનૂચ્ય મિથ્યયા તપન્ ।
સ્વપાપહાનકાઙ્ક્ષયા દદૌ સુતાં જનાર્દને ॥ ૧૭.૨૧૫॥

મણિં ચ તં પ્રદાય તં નનામ હ ક્ષમાપયન્ ।
મણિં પુનર્દદૌ હરિર્મુમોદ સત્યભામયા ॥ ૧૭.૨૧૬॥

રમૈવ સા હિભૂરિતિ દ્વિતીયમૂર્તિરુત્તમા ।
બભૂવ સત્રજિત્સુતા સમસ્તલોકસુન્દરી ॥ ૧૭.૨૧૭॥

તતો હિ સા ચ રુગ્મિણી પ્રિયે પ્રિયાસુ તેઽધિકમ્ ।
જનાર્દનસ્ય તે હરેઃ સદાઽવિયોગિની યતઃ ॥ ૧૭.૨૧૮॥

અથાઽપ સામ્બનામકં સુતં ચ રોહિણી હરેઃ ।
ચતુર્મુખાં શસં યુતં કુમારમેવ ષણ્મુખમ્ ॥ ૧૭.૨૧૯॥

ઇતિ પ્રશાસતિ પ્રભૌ જગજ્જનાર્દનેઽખિલમ્ ।
અગણ્યસદ્ગુણાર્ણવે કદાચિદાયયૌ દ્વિજઃ ॥ ૧૭.૨૨૦॥

ચ્ક્ષ્યવ્।જનાર્દનઃ સ નામતો રમેશપાદસં શ્રયઃ ।
સ માનિતશ્ચ વિષ્ણુના પ્રણમ્ય વાક્યમબ્રવીત્ ॥ ૧૭.૨૨૧॥

ક્ષમસ્વ મે વચઃ પ્રભો બ્રવીમ્યતીવ પાપકમ્ ।
યતઃ સુપાપદૂતકસ્તતો હિ તાદૃશં વચઃ ॥ ૧૭.૨૨૨॥

ન તેઽસ્ત્યગોચરં ક્વચિત્તથાઽપિ ચાઽઽજ્ઞયા વદે ।
વદેતિ ચોદિતોઽમુના દ્વિજો જગાદ માધવમ્ ॥ ૧૭.૨૨૩॥

સુતૌ હિ સાલ્વભૂપતેર્બભૂવતુઃ શિવાશ્રયૌ ।
શિવપ્રસાદસમ્ભવૌ પિતુસ્તપોબલેન તૌ ॥ ૧૭.૨૨૪॥

અજેયવધ્યતાં ચ તૌ શિવાદ્વરં સમાપતુઃ ।
જરાસુતસ્ય શિષ્યકૌ તપોબલેન કેવલમ્ ॥ ૧૭.૨૨૫॥

મહોદરં ચ કુણ્ડધારિણં ચ ભૂતકાવુભૌ ।

તથાઽજિતાવવધ્યકૌ દિદેશ શઙ્કરસ્તયોઃ ॥ ૧૭.૨૨૬॥

તયોઃ સહાય એવ તૌ વરાચ્છિવસ્ય ભૂતકૌ ।
અજેયતામવાપતુર્નચાન્યથાઽમરાવપિ ॥ ૧૭.૨૨૭॥

અજેયતામવધ્યતામવાપ્ય તાવુભૌ શિવાત્ ।
પિતુસ્તુ રાજસૂયિતાં સમિચ્છતો મદોદ્ધતૌ ॥ ૧૭.૨૨૮॥

જરાસુતો ગુરુત્વતો વિરોદ્ધુમત્ર નેચ્છતિ ।
નૃપાં સ્તુ દેવપક્ષિણો વિજિત્ય કર્તુમિચ્છતઃ ॥ ૧૭.૨૨૯॥

સ્વયં હિ રાજસૂયિતાં જરાસુતો ન મન્યતે ।
યતો હિ વૈષ્ણવં ક્રતું તમાહુરીશ વૈદિકાઃ ॥ ૧૭.૨૩૦॥

ઇમૌ પિતુર્યશોઽર્થિનૌ પરાભવાય તે તથા ।
સમિચ્છતોઽદ્ય તં ક્રતું ભવન્તમૂચતુશ્ચ તૌ ॥ ૧૭.૨૩૧॥

સમુદ્રસં શ્રયો ભવાન્ બહૂન્ પ્રગૃહ્ય લાવણાન્ ।
ચક્ષ્વ્।સુભારકાનુપૈહિ નાવિતિ ક્ષમસ્વ મે વચઃ ॥ ૧૭.૨૩૨॥

ઇતીર્ય તં નનામ સ પ્ર ચાહસન્ સ્મ યાદવાઃ ।
હરિસ્તુ સાત્યકિં વચો જગાદ મેઘનિસ્વનઃ ॥ ૧૭.૨૩૩॥

પ્રયાહિ સાત્યકે વચો બ્રવીહિ મે નૃપાધમૌ ।
સમેત્ય વાં વરાયુધૈઃ કરં દદાન્યસં શયમ્ ॥ ૧૭.૨૩૪॥

ઉપૈતમાશુ સં યુગાર્થિનૌ ચ પુષ્કરં પ્રતિ ।
ઇતીરિતઃ શિનેઃ સુતો જગામ વિપ્રસં યુતઃ ॥ ૧૭.૨૩૫॥

ઉપેત્ય તૌ હરેર્વચો જગાદ સાત્યકિર્બલી ।
વિધાય તૌ તૃણોપમૌ ગિરા જગામ કેશવમ્ ॥ ૧૭.૨૩૬॥

તતઃ પુરૈવ તાવુભૌ દ્વિજં હરસ્વરૂપિણમ્ ।
સુદુઃખવાસનામકં પ્રચક્રતુસ્તૃણોપમમ્ ॥ ૧૭.૨૩૭॥

દશત્રિકૈઃ શતૈર્વૃતો યતીશ્વરૈઃ સ સર્વવિત્ ।
વિપાટિતાત્મકૌપિનાદિસર્વમાત્રકોઽભવત્ ॥ ૧૭.૨૩૮॥

વરાત્સ્વસમ્ભવાદસૌ ન શાપશક્તિમાનભૂત્ ।
તતઃ સમસ્તભઞ્જનોરુશક્તિમાપ કેશવમ્ ॥ ૧૭.૨૩૯॥

સ તાન્ સમર્ચ્ય માધવઃ પ્રદાય ચોરુમાત્રકાઃ ।
યયૌ ચ તૈઃ સમન્વિતો વધાય સાલ્વપુત્રયોઃ ॥ ૧૭.૨૪૦ ॥

તમત્રિજં હરાત્મકં યતો હિ વેદ માગધઃ ।
તતોઽત્યજત્સ્વશિષ્યકૌ નિશમ્ય તત્પ્રતીપકૌ ॥ ૧૭.૨૪૧ ॥

હરૌ તુ પુષ્કરં ગતે મુનીશ્વરૈઃ સમર્ચિતે ।
સમીયતુશ્ચ તાવુભાવથાત્ર હં સડીભકૌ ॥ ૧૭.૨૪૨ ॥

સ બ્રહ્મદત્તનામકોઽત્ર તત્પિતાઽપ્યુપાયયૌ ।
સમાગતૌ ચ ભૂતકૌ શિવસ્ય યૌ પુરસ્સરૌ ॥ ૧૭.૨૪૩ ॥

ચિક્ષ્વ। વિચક્રનામકોઽસુરઃ પુરા વિરિઞ્ચતો વરમ્ ।
અવધ્યતામજેયતામવાપ્ય બાધતે સુરાન્ ॥ ૧૭.૨૪૪ ॥

સ ચાભવત્તયોઃ સખા સહાયકામ્યયાઽગમત્ ।
હિડિમ્બરાક્ષસોઽપિ યઃ પુરાઽપ શઙ્કરાદ્વરમ્ ॥ ૧૭.૨૪૫ ॥

ન જીયસે ન વધ્યસે કુતશ્ચનેતિ તોષિતાત્ ।
સ ચૈતયોઃ સખાઽભવત્સમાજગામ તત્ર ચ ॥ ૧૭.૨૪૬ ॥

અક્ષોહિણીદશાત્મકં બલં તયોર્બભૂવ હ ।
વિચક્રગં ષડાત્મકં તથૈકમેવ રાક્ષસમ્ ॥ ૧૭.૨૪૭ ॥

દ્વિરષ્ટસેનયા યુતૌ સહૈકયૈવ તૌ નૃપૌ ।
સમીયતુર્યુધે હરિં હરિશ્ચ તૌ સસાર હ ॥ ૧૭.૨૪૮ ॥

અથ દ્વયોર્દ્વયોરભૂદ્રણો ભયાનકો મહાન્ ।
હરિર્વિચક્રમેયિવાન્ બલશ્ચ હં સમુદ્ધતમ્ ॥ ૧૭.૨૪૯ ॥

તદાઽસ્ય ચાનુજં યયૌ શિનિપ્રવીર આયુધી ।
ગદશ્ચ નામતોઽનુજો હરેઃ સ રોહિણીસુતઃ ॥ ૧૭.૨૫૦ ॥

પુરા સ ચણ્ડકો ગણો હરેર્નિવેદિતાશનઃ ।
સમાહ્વયદ્રણાય વૈ તયોઃ સ તાતમેવ હિ ॥ ૧૭.૨૫૧ ॥

અક્ષોહિણીત્રયાન્વિતાઃ સમસ્તયાદવાસ્તદા ।
ત્રિલોચનાનુગૌ ચ તૌ ન્યવારયન્ સરાક્ષસૌ ॥ ૧૭.૨૫૨ ॥

હરિર્વિચક્રમોજસા મહાસ્ત્રશસ્ત્રવર્ષિણમ્ ।
વિવાહનં નિરાયુધં ક્ષણાચ્ચકાર સાયકૈઃ ॥ ૧૭.૨૫૩ ॥

પુનશ્ચ પાદપાન્ ગિરીન્ પ્રમુઞ્ચતોऽરિણાऽરિહા ।
શિરો જહાર દેવતા વિનેદુરત્ર હર્ષિતાઃ ॥ ૧૭.૨૫૪॥

પ્રસૂનવર્ષિભિઃ સ્તુતશ્ચતુર્મુખાદિભિઃ પ્રભુઃ ।
સસાર તૌ હરાનુગૌ પ્રભક્ષકૌ સ સાત્ત્વતામ્ ॥ ૧૭.૨૫૫॥

ચ્ક્ષ્વ્વી।સમસ્તયાદવાન્ રણે વિધૂય તૌ જનાર્દનમ્ ।
ઉપેત્ય ચાં સગૌ હરેરદં શતાં સુકર્ણકૌ ॥ ૧૭.૨૫૬॥

સ તૌ ભુજપ્રવેગતો વિધૂય શઙ્કરાલયે ।
ન્યપાતયદ્બલાર્ણવોऽમિતસ્ય કિં તદુચ્યતે ॥ ૧૭.૨૫૭॥

પ્રભક્ષયન્તમોજસા હિડિમ્બમુદ્ધતં બલમ્ ।
સહોગ્રસેનકો યયૌ પિતા હરેઃ શરાન્ ક્ષિપન્ ॥ ૧૭.૨૫૮॥

તયો રથૌ સહાયુધૌ પ્રભક્ષ્ય રાક્ષસો બલી ।
પ્રગૃહ્ય તાવભાષત પ્રયાતમાશુ મે મુખમ્ ॥ ૧૭.૨૫૯॥

તદા ગદાવરાયુધઃ સહૈવ હં સભૂભૃતા ।
પ્રયુદ્ધ્યમાન આયયૌ વિહાય તં હલાયુધઃ ॥ ૧૭.૨૬૦॥

તમાગતં સમીક્ષ્ય તૌ વિહાય રાક્ષસાધિપઃ ।
ઉપેત્ય મુષ્ટિનાऽહનદ્બલં સ વક્ષસિ ક્રુધા ॥ ૧૭.૨૬૧॥

ઉભૌ હિ બાહુષાલ્। ઇનાવયુદ્ધ્યતાં ચ મુષ્ટિભિઃ ।
ચિરં પ્રયુદ્ધ્ય તં બલોऽગ્રહીત્સ જઙ્ઘયોર્વિભુઃ ॥ ૧૭.૨૬૨॥

અથૈનમુદ્ધૃતં બલાદ્બલઃ સ દૂરમાક્ષિપત્ ।
પપાત પાદયોજને સ નાऽજગામ તં પુનઃ ॥ ૧૭.૨૬૩॥

વિહાય સૈનિકાંશ્ચ તૌ નૃપૌ યયૌ વનાય સઃ ।
નિહત્ય તસ્ય રાક્ષસાન્ હલાયુધો નનાદ હ ॥ ૧૭.૨૬૪॥

ગદસ્તુ સાલ્વભૂભૃતા વયોગતેન યોધયન્ ।
વિવાહનં નિરાયુધં ચકાર સોऽપ્યપાદ્રવત્ ॥ ૧૭.૨૬૫॥

સુતેન તસ્ય કન્યસા યુયોધ સાત્યકી રથી ।
વરાસ્ત્રશસ્ત્રયોધિનૌ વિજહ્રતુશ્ચ તાવુભૌ ॥ ૧૭.૨૬૬॥

ચિરં પ્રયુદ્ધ્ય સાત્યકિઃ સ હં સકન્યસા બલી ।

ક્ષ્ચ્વીઇ। શતં સપઞ્ચકં રણે ચકર્ત તસ્ય ધન્વનામ્ ॥ ૧૭.૨૬૭॥

સ ખડ્ગચર્મભૃદ્રણેઽભ્યયાત્સુતાત્મજં શિનેઃ ।
સ ચૈનમભ્યયાત્તથા વરાસિચર્મભૃદ્દ્વિભીઃ ॥ ૧૭.૨૬૮॥

દ્વિષોઽશપ્રભેદકં વરાસિયુદ્ધમશ્રમૌ ।
પ્રદર્શ્ય નિર્વિશેષકાવુભૌ વ્યવસ્થિતૌ ચિરમ્ ॥ ૧૭.૨૬૯॥

પરસ્પરાન્તરૈષિણૌ નચાન્તરં વ્યપશ્યતામ્ ।
તતો વિહાય સઙ્ગરં ગતૌ નિરર્થકં ત્વિતિ ॥ ૧૭.૨૭૦॥

તતઃ સ હં સસં યુતો જગામ યોદ્ધુમચ્યુતમ્ ।
ક્ષણેન તૌ નિરાયુધૌ ચકાર કેશવઃ શરૈઃ ॥ ૧૭.૨૭૧॥

હતં ચ સૈન્યમેતયોશ્ચતુર્થભાગશેષિતમ્ ।
ક્ષણેન કેશવેન તદ્ભયાદપેયતુશ્ચ તૌ ॥ ૧૭.૨૭૨॥

સ પુષ્કરેક્ષણસ્તદા સુરૈર્નુતોઽથ પુષ્કરે ।
ઉવાસ તાં નિશાં પ્રભુઃ સયાદવોઽમિતપ્રભઃ ॥ ૧૭.૨૭૩॥

પરે દિને જનાર્દનો નૃપાત્મજૌ પ્રવિદ્રુતૌ ।
યમસ્વસુસ્તટે પ્રભુઃ સમાસસાદ પૃષ્ઠતઃ ॥ ૧૭.૨૭૪॥

સ રૌહિણેયસં યુતઃ સમન્વિતશ્ચ સેનયા ।
સ્વશિષ્ટસેનયા વૃતૌ પલાયિનાવવારયત્ ॥ ૧૭.૨૭૫॥

નિવૃત્ય તૌ સ્વસેનયા શરોત્તમૈર્વવર્ષતુઃ ।
સુકોપિતૌ સમસ્તશો યદૂનવાર્યપૌરુષૌ ॥ ૧૭.૨૭૬॥

અથાઽઽસસાદ હં સકો હલાયુધં મહાધનુઃ ।
અનન્તરોઽસ્ય સાત્યકિં ગદં ચ સર્વસૈનિકાન્ ॥ ૧૭.૨૭૭॥

સ સાત્યકિં નિરાયુધં વિવાહનં વિવર્મકમ્ ।
વ્યધાદ્ગદં ચ તૌ રણં વિહાય હાપજગ્મતુઃ ॥ ૧૭.૨૭૮॥

ચ્ક્ષ્ચક્ષ્। વિધૂય સૈનિકાંશ્ચ સ પ્રગૃહ્ય ચાપમાતતમ્ ।
હરિં જગામ ચોન્નદન્મહાસ્ત્રશસ્ત્રવર્ષણઃ ॥ ૧૭.૨૭૯॥

તમાશુ કેશવોઽરિહા સમસ્તસાધનોજ્ઝિતમ્ ।
ક્ષણાચ્ચકાર સોઽપ્યગાદ્વિસૃજ્ય તં હલાયુધમ્ ॥ ૧૭.૨૮૦॥

હલાયુધો નિરાયુધં વિધાય હં સમોજસા ।
વિકૃષ્ટચાપ આગતં દદર્શ તસ્ય ચાનુજમ્ ॥ ૧૭.૨૮૧॥

સ હં સ આશુ કાર્મુકં પુનઃ પ્રગૃહ્ય તં બલમ્ ।
યદાઽસસાદ કેશવો ન્યવારયત્તમોજસા ॥ ૧૭.૨૮૨॥

શિનેઃ સુતાત્મજોઽપ્યસૌ વિહાય હં સકાનુજમ્ ।
રથાન્તરં સમાસ્થિતો જગામ તાતમસ્ય ચ ॥ ૧૭.૨૮૩॥

વયોગતઃ પિતા તયોર્યુયોધ તેન વૃષ્ણિના ।
શરં ચ કણ્ઠકૂબરે વ્યસર્જયત્સ સાત્યકેઃ ॥ ૧૭.૨૮૪॥

સ સાત્યકિર્દૃઢાહતો જગામ મોહમાશુ ચ ।
સુલબ્ધસંજ્ઞ ઉત્થિતઃ સમાદદેઽર્દ્ધચન્દ્રકમ્ ॥ ૧૭.૨૮૫॥

સ તેન તચ્છિરો બલી ચકર્ત શુક્લમૂર્દ્ધજમ્ ।
યદમ્બયાઽભિકામિતં પુરા પપાત તત્ક્ષિતૌ ॥ ૧૭.૨૮૬॥

નદંશ્ચ સાત્યકિર્હરેર્જગામ પાર્શ્વમુદ્ધતઃ ।
બલોઽપિ હં સકાનુજં યુયોધ સેનયા યુતમ્ ॥ ૧૭.૨૮૭॥

હરિસ્તુ હં સમુલ્બણૈઃ શરૈઃ સમર્દયન્ બલમ્ ।
જઘાન તસ્ય સર્વશો ન કશ્ચિદત્ર શેષિતઃ ॥ ૧૭.૨૮૮॥

સ એક એવ કેશવં મહાસ્ત્રમુક્સસાર હ ।
નિવાર્ય તાનિ સર્વશો હરિર્નિજાસ્ત્રમાદદે ॥ ૧૭.૨૮૯॥

સ વૈષ્ણવાસ્ત્રમુદ્યતં નિરીક્ષ્ય યાનતો મહીમ્ ।
ગતઃ પરાદ્રવદ્ભયાત્પપાત યામુનોદકે ॥ ૧૭.૨૯૦॥

અ્ ।વરાસ્ત્રપાણિરીશ્વરઃ પદાઽહનચ્છિરસ્યમુમ્ ।
સ મૂર્છિતો મુખેઽપતન્મહાભુજઙ્ગમસ્ય હ ॥ ૧૭.૨૯૧॥

સ ધાર્તરાષ્ટ્રકોદરે યથા તમોઽન્ધમેયિવાન્ ।
તથા સુદુઃખસં યુતો વસન્મનોઃ પરં મ્રિયેત્ ॥ ૧૭.૨૯૨॥

તતોઽન્ધમેવ તત્તમો હરેર્દ્વિડેતિ નિશ્ચયાત્ ।
તદાઽસ્ય ચાનુજોઽગ્રજં વિમાર્ગયન્ જલેઽપતત્ ॥ ૧૭.૨૯૩॥

વિહાય રોહિણીસુતં જલે નિમજ્જ્ય માર્ગયન્ ।
અપશ્યમાન આત્મનો વ્યપાટયચ્ચ કાકુદમ્ ॥ ૧૭.૨૯૪॥

વિહાય દેહમુલ્બણં તમોઽવતાર્ય ચાગ્રજમ્ ।
પ્રતીક્ષમાણ ઉલ્બણં સમત્તિ તત્સુખેતરમ્ ॥ ૧૭.૨૯૫॥

તતો હરિર્બલૈર્યુતો બલાન્વિતો મુનીશ્વરૈઃ ।
સમં કુશસ્થલીં યયૌ સ્તુતઃ કશઙ્કુરાદિભિઃ ॥ ૧૭.૨૯૬॥

સ્વકીયપાદપલ્લવાશ્રયં જનં પ્રહર્ષયન્ ।
ઉવાસ નિત્યસત્સુખાર્ણવો રમાપતિર્ગૃહે ॥ ૧૭.૨૯૭॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
હંસડિભકવધો નામ સપ્તદશોઽધ્યાયઃ ॥

## અથ અષ્ટાદશોઽધ્યાયઃ ।

(ભીમાર્જુનદિગ્વિજયઃ )
ૐ । યદા રામાદવાપ્તાનિ દિવ્યાસ્ત્રાણિ પ્રપેદિરે ।
દ્રોણાત્કુમારાસ્તેષ્વાસીત્સર્વેષ્વપ્યધિકોઽર્જુનઃ ॥ ૧૮.૧॥

નિજપ્રતિભયા જાનન્ સર્વાસ્ત્રાણિ તતોઽધિકમ્ ।
નાસ્ત્રયુદ્ધં ક્વચિદ્ભીમો મન્યતે ધર્મમઞ્જસા ॥ ૧૮.૨॥

નહિ ભાગવતો ધર્મો દેવતાભ્યુપયાચનમ્ ।
જ્ઞાનભક્તી હરેસ્તૃપ્તિં વિના વિષ્ણોરપિ ક્વચિત્ ॥ ૧૮.૩॥

નાઽકાઙ્ક્ષ્યં કિમુતાન્યેભ્યો હ્યસ્ત્રં કામ્યફલપ્રદમ્ ।
શુદ્ધે ભાગવતે ધર્મે નિરતો યદ્વૃકોદરઃ ॥ ૧૮.૪॥

ન કામ્યકર્મકૃત્તસ્માન્નાયાચદ્દેવમાનુષાન્ ।
ન હરિશ્ચાર્થિતસ્તેન કદાચિત્કામલિપ્સયા ॥ ૧૮.૫॥

ભિક્ષામટંશ્ચ હુઙ્કારાત્કરવદ્વૈશ્યતોઽગ્રહીત્ ।
નાન્યદેવા નતાસ્તેન વાસુદેવાન્ન પૂજિતાઃ ॥ ૧૮.૬॥

ન પ્રતીપં હરેઃ ક્વાપિ સ કરોતિ કથઞ્ચન ।
અનુપસ્કરિણો યુદ્ધે નાભિયાતિ હ્યુપસ્કરી ।
નાપયાતિ યુધઃ ક્વાપિ ન ક્વચિચ્છદ્મ ચાઽચરેત્ ॥ ૧૮.૭॥

નૈવોર્ધ્વદૈહિકાનુજ્ઞામવૈષ્ણવકૃતેઽકરોત્ ।

ન કરોતિ સ્વયં નૈષાં પ્રિયમપ્યાચરેત્ક્વચિત્ ॥ ૧૮.૮॥

સખ્યં નાવૈષ્ણવૈશ્ચક્રે પ્રતીપં વૈષ્ણવે નચ ।
પરોક્ષેઽપિ હરેર્નિન્દાકૃતો જિહ્વાં છિનત્તિ ચ ॥ ૧૮.૯॥

પ્રતીપકારિણો હન્તિ વિષ્ણોર્વૈનાનજીઘનત્ ।
ન સં શયં કદાઽપ્યેષ ધર્મે જ્ઞાનેઽપિ વાઽકરોત્ ॥ ૧૮.૧૦॥

વિદ્યોપજીવનં નૈષ ચકારાઽપદ્યપિ ક્વચિત્ ।
ચ્યીઽતો ન ધર્મનહુષૌ પ્રત્યુવાચ કથઞ્ચન ॥ ૧૮.૧૧॥

આજ્ઞયૈવ હરેર્દ્રૌણેરસ્ત્રાણ્યસ્ત્રૈરશાતયત્ ।
અદૃશ્યોઽલમ્બુસો ભગ્નો નાન્યત્ર તુ કથઞ્ચન ॥ ૧૮.૧૨॥

નહ્યસ્ત્રયુદ્ધે સદૃશો દ્રૌણેરસ્ત્યર્જુનાદૃતે ।
સર્વવિત્ત્વં તતો ભીમે પ્રદર્શયિતુમીશ્વરઃ ।
અદાદાજ્ઞામસ્ત્રયુદ્ધે તથૈવાલમ્બુસં પ્રતિ ॥ ૧૮.૧૩॥

પ્રત્યક્ષીભૂતદેવેષુ બન્ધુજ્યેષ્ઠેષુ વા નતિમ્ ।
મર્યાદાસ્થિતયેઽશાસદ્ભગવાન્ પુરુષોત્તમઃ ॥ ૧૮.૧૪॥

તત્રાપિ વિષ્ણુમેવાસૌ નમેન્નાન્યં કથઞ્ચન ।
આજ્ઞયૈવાસ્ત્રદેવાંશ્ચ પ્રેરયામાસ નાર્થનાત્ ॥ ૧૮.૧૫॥

અન્વેનમેવ તદ્ધર્મે કૃષ્ણૈકા સં સ્થિતા સદા ।
ધૃતરાષ્ટ્રાદપિ વરં તતો નાઽત્માર્થમગ્રહીત્ ॥ ૧૮.૧૬॥

નાશપદ્ધાર્તરાષ્ટ્રાંશ્ચ મહાપદ્યપિ સા તતઃ ।
ન વાચા મનસા વાઽપિ પ્રતીપં કેશવેઽચરત્ ॥ ૧૮.૧૭॥

અન્યે ભાગવતત્વેઽપિ ખિન્નધર્માઃ ક્વચિત્ક્વચિત્ ।
સ્યમન્તકાર્થે રામોઽપિ કૃષ્ણસ્ય વિમનાઽભવત્ ॥ ૧૮.૧૮॥

અવમેનેઽર્જુનઃ કૃષ્ણં વિપ્રસ્ય શિશુરક્ષણે ।
પ્રદ્યુમ્ન ઉદ્ધવઃ સામ્બોઽનિરુદ્ધાદ્યાશ્ચ સર્વશઃ ॥ ૧૮.૧૯॥

હરેરિષ્ટં સુભદ્રાયાઃ ફલ્ગુને દાનમઞ્જસા ।
જ્ઞાત્વાઽપિ રુરુધુઃ સમ્યક્સાત્યકિઃ કૃષ્ણસમ્મિતમ્ ॥ ૧૮.૨૦॥

કદાચિન્મન્યતે પાર્થં ધર્મજોઽપિ નરં હરિમ્ ।
મત્વાઽબિભેજ્જરાસન્ધવધે કૃષ્ણમુદીરિતુમ્ ॥ ૧૮.૨૧॥

બન્ધનં શઙ્કમાનો હિ કૃષ્ણસ્ય વિદુરોઽપિતુ ।
કૌરવેયસભામધ્યે નાવતારમરોચયત્ ॥ ૧૮.૨૨॥

અ્વીઇઅકુલઃ કરદાનાય પ્રેષયામાસ કેશવે ।
અવમેને હરેર્બુદ્ધિં સહદેવઃ કુલક્ષયાત્ ॥ ૧૮.૨૩॥

દેવકીવસુદેવાદ્યા મેનિરે માનુષં હરિમ્ ।
ભીષ્મસ્તુ ભાર્ગવં રામમવમેને યુયોધ ચ ॥ ૧૮.૨૪॥

દ્રોણકર્ણદ્રૌણિકૃપાઃ કૃષ્ણાભાવે મનો દધુઃ ।
દેવાઃ શિવાદ્યા અપિતુ વિરોધં ચક્રિરે ક્વચિત્ ॥ ૧૮.૨૫॥

ઋષિમાનુષગન્ધર્વા વક્તવ્યાઃ કિમતઃ પરમ્ ।
જન્મજન્માન્તરેઽજ્ઞાનાદવજાનન્તિ યત્સદા ॥ ૧૮.૨૬॥

તસ્માદેકો વાયુરેવ ધર્મે ભાગવતે સ્થિરઃ ।
લક્ષ્મીઃ સરસ્વતી ચેતિ પરશુક્લત્રયં શ્રુતમ્ ॥ ૧૮.૨૭॥

સર્વમેતચ્ચ કથિતં તત્રતત્રામિતાત્મના ।
વ્યાસેનૈવ પુરાણેષુ ભારતે ચ સ્વસં વિદા ॥ ૧૮.૨૮॥

યદા તે સર્વશસ્ત્રાસ્ત્રવેદિનો રાજપુત્રકાઃ ।
બભૂવૂ રઙ્ગમધ્યે તાન્ ભારદ્વાજોઽપ્યદર્શયત્ ॥ ૧૮.૨૯॥

રક્તચન્દનસત્પુષ્પવસ્ત્રશસ્ત્રગુલ્। ઓદનૈઃ ।
સમ્પૂજ્ય ભાર્ગવં રામમનુજજ્ઞે કુમારકાન્ ॥ ૧૮.૩૦॥

તે ભીષ્મદ્રોણવિદુરગાન્ધારીધૃતરાષ્ટ્રકાન્ ।
સરાજમણ્ડલાન્નત્વા કુન્તીં ચાદર્શયઞ્છ્રમમ્ ॥ ૧૮.૩૧॥

સર્વૈઃ પ્રદર્શિતેઽસ્ત્રે તુ દ્રોણાદાત્તમહાસ્ત્રવિત્ ।
દ્રૌણિરસ્ત્રાણ્યમેયાનિ દર્શયામાસ ચાધિકમ્ ॥ ૧૮.૩૨॥

તતોઽપ્યતિતરાં પાર્થો દિવ્યાસ્ત્રાણિ વ્યદર્શયત્ ।
અવિધ્યન્માશકે પાદે પક્ષિણઃ પક્ષ્મ એવ ચ ।
એવમાદીનિ ચિત્રાણિ બહૂન્યેષ વ્યદર્શયત્ ॥ ૧૮.૩૩॥

અ્વિવ્। તદૈવ કર્ણ આગત્ય રામોપાત્તાસ્ત્રસમ્પદમ્ ।
દર્શયન્નધિકઃ પાર્થાદભૂદ્રાજન્યસં સદિ ॥ ૧૮.૩૪॥

કુન્તી નિજં સુતં જ્ઞાત્વા લજ્જયા નાવદચ્ચ તમ્ ।
પાર્થોઽસહં સ્તં યુદ્ધાયૈવાઽહ્વયામાસ સં સદિ ॥ ૧૮.૩૫॥

રણાયાક્ષત્રિયાહ્વાનં જાનન્ ધર્મપ્રતીપકમ્ ।
ભીમો નિવાર્ય બીભત્સું કર્ણાયાદાત્પ્રતોદકમ્ ॥ ૧૮.૩૬॥

અક્ષત્રસં સ્કારયુતો જાતોઽપિ ક્ષત્રિયે કુલે ।
ન ક્ષત્રિયો હિ ભવતિ યથા વ્રાત્યો દ્વિજોત્તમઃ ॥ ૧૮.૩૭॥

નિરુત્તરે કૃતે કર્ણે ભીમેનૈવ સુયોધનઃ ।
અભ્યષેચયદઙ્ગેષુ રાજાનં પિત્રનુજ્ઞયા ।
ધૃતરાષ્ટ્રઃ પક્ષપાતાત્પુત્રસ્યાનુવશોઽભવત્ ॥ ૧૮.૩૮॥

અભિષિક્તે તદા કર્ણે પ્રાયાદધિરથઃ પિતા ।
સર્વરાજસદોમધ્યે વવન્દે તં વૃષા તદા ।
તુતુષુઃ કર્મણા તસ્ય સન્તઃ સર્વે સમાગતાઃ ॥ ૧૮.૩૯॥

ભીમદુર્યોધનૌ તત્ર શિક્ષાસન્દર્શનચ્છલાત્ ।
સમાદાય ગદે ગુર્વી સં રમ્ભાદભ્યુદીયતુઃ ॥ ૧૮.૪૦॥

દેવાસુરમનુષ્યાદિ જગદેતચ્ચરાચરમ્ ।
સર્વં તદા દ્વિધા ભૂતં ભીમદુર્યોધનાશ્રયાત્ ॥ ૧૮.૪૧॥

દેવા દેવાનુકૂલાશ્ચ ભીમમેવ સમાશ્રિતાઃ ।
અસુરા આસુરાશ્ચૈવ દુર્યોધનસમાશ્રયાઃ ।
દ્વિધાભૂતા માનુષાશ્ચ દેવાસુરવિભેદતઃ ॥ ૧૮.૪૨॥

જય ભીમ મહાબાહો જય દુર્યોધનેતિ ચ ।
હુઙ્કારાંશ્ચૈવ ભિટ્કારાંશ્ચક્રુર્દેવાસુરા અપિ ॥ ૧૮.૪૩॥

દૃષ્ટ્વા જગત્સુસં રબ્ધં દ્રોણોઽથ દ્વિજસત્તમઃ ।
નેદં જગદ્વિનશ્યેત ભીમદુર્યોધનાશ્રયાત્ ।
ઞ્વ્।ઇતિ પુત્રેણ તૌ વીરૌ ન્યવારયદરિન્દમૌ ॥ ૧૮.૪૪॥

સ્વકીયાયાં સ્વકીયાયાં યોગ્યતાયાં નતુ ક્વચિત્ ।
યુવયોઃ સમ ઇત્યુક્ત્વા દ્રૌણિરેતૌ ન્યવારયત્ ।
દ્રોણાજ્ઞયા વારિતૌ તૌ યયતુઃ સ્વં સ્વમાલયમ્ ॥ ૧૮.૪૫॥

સુરાસુરાન્ સુસં રબ્ધાન્ કાલેન દ્રક્ષ્યથેતિ ચ ।

બ્રહ્મા નિવાર્ય સસુરો યયૌ સેશઃ સ્વમાલયમ્ ॥ ૧૮.૪૬॥

કર્ણં હસ્તે પ્રગૃહ્યૈવ ધાર્તરાષ્ટ્રો ગૃહં યયૌ ।
પાર્થં હસ્તે પ્રગૃહ્યૈવ ભીમઃ પ્રાયાત્સ્વમાલયમ્ ॥ ૧૮.૪૭॥

પાર્થેન કર્ણો હન્તવ્ય ઇત્યાસીદ્ભીમનિશ્ચયઃ ।
વૈપરીત્યેન તસ્યાઽસીદ્દુર્યોધનવિનિશ્ચયઃ ।
તદર્થં નીતિમતુલાં ચક્રતુસ્તાવુભાવપિ ॥ ૧૮.૪૮॥

તથોત્કર્ષે ફલ્ગુનસ્ય યશસો વિજયસ્ય ચ ।
ઉદ્યોગ આસીદ્ભીમસ્ય ધાર્તરાષ્ટ્રસ્ય ચાન્યથા ॥ ૧૮.૪૯॥

ભીમાર્થં કેશવોઽન્યે ચ દેવાઃ ફલ્ગુનપક્ષિણઃ ।
આસન્ યથૈવ રામાદ્યાઃ સઙ્ગ્રહેણ હનૂમતઃ ।
સુરાઃ સુગ્રીવપક્ષસ્થાઃ પૂર્વમાસં સ્તથૈવ હિ ॥ ૧૮.૫૦॥

તદર્થમેવ ભીમસ્ય હ્યનુજત્વં સુરેશ્વરઃ ।
આપ પૂર્વાનુતાપેન તેન ભીમસ્તથાઽકરોત્ ॥ ૧૮.૫૧॥

દુર્યોધનાર્થં કર્ણસ્ય પક્ષિણો દૈત્યદાનવાઃ ।
આસુઃ સર્વે ગ્લહાવેતાવાસતુઃ કર્ણફલ્ગુનૌ ॥ ૧૮.૫૨॥

અથ પૃષ્ટો દક્ષિણાર્થં દ્રોણ આહ કુમારકાન્ ।
બદ્ધ્વા પાઞ્ચાલરાજાનં દત્તેત્યૂચુસ્તથેતિ તે ॥ ૧૮.૫૩॥

તે ધાર્તરાષ્ટ્રાઃ કર્ણેન સહિતાઃ પાણ્ડવા અપિ ।
યયુર્દ્રોણેન સહિતાઃ પાઞ્ચાલનગરં પ્રતિ ॥ ૧૮.૫૪॥

ઋિવઽથાઽહ ભીમઃ સામર્થ્યવિવેકાભીપ્સયા ગુરુમ્ ।
ગર્વ એષ કુમારાણામનિવાર્યો દ્વિજોત્તમ ।
ગચ્છન્ત્વેતેઽગ્રતો નૈષાં વશગો દ્રુપદો ભવેત્ ॥ ૧૮.૫૫॥

નિવૃત્તેષ્વકૃતાર્થેષુ વયં બદ્ધ્વા રિપું તવ ।
આનયામ ન સન્દેહ ઇતિ તસ્થૌ સસોદરઃ ॥ ૧૮.૫૬॥

સદ્રોણકેષુ પાર્થેષુ સ્થિતેષ્વન્યે સસૂતજાઃ ।
યયુરાત્તપ્રહરણાઃ પાઞ્ચાલાન્તઃ પુરં દ્રુતમ્ ॥ ૧૮.૫૭॥

કુમારાન્ ગ્રહણેપ્સૂં સ્તાનુપયાતાનુદીક્ષ્ય સઃ ।
અક્ષોહિણીત્રિતયયુઽ ન્નિસ્સૃતો દ્રુપદો ગૃહાત્ ॥ ૧૮.૫૮॥

તે શરૈરભિવર્ષન્તઃ પરિવાર્ય કુમારકાન્ ।
અર્દયામાસુરુદ્વૃત્તાન્ સ્ત્રિયો બાલાશ્ચ સર્વશઃ ॥ ૧૮.૫૯ ॥

હર્મ્યસંસ્થાઃ સ્ત્રિયો બાલા ગ્રાવભિર્મુસલૈરપિ ।
અત્યર્થમર્દયામાસુઃ કુમારાન્ સુસુખેધિતાન્ ॥ ૧૮.૬૦ ॥

દ્રુપદસ્ય વરો હ્યસ્તિ સૂર્યદત્તસ્તપોબલાત્ ।
આ યોજનાત્પુરમુપ ન ત્વા જેષ્યતિ કશ્ચન ॥ ૧૮.૬૧ ॥

ઇતિ તેન વરેણૈવ સુખસંવર્દ્ધિતાશ્ચ તે ।
ભગ્નાઃ કુમારા આવૃત્ય દુદ્રુવુર્યત્ર પાણ્ડવાઃ ॥ ૧૮.૬૨ ॥

સ્ત્રીબાલવૃદ્ધસહિતૈઃ પાઞ્ચાલૈરપ્યનુદ્રુતાઃ ।
ભીમાર્જુનેતિ વાશન્તો યયુર્યત્ર સ્મ પાણ્ડવાઃ ॥ ૧૮.૬૩ ॥

તાન્ પ્રભગ્નાન્ સમાલોક્ય ભીમઃ પ્રહરતાં વરઃ ।
આરુરોહ રથં વીરઃ પુર આત્તશરાસનઃ ॥ ૧૮.૬૪ ॥

તમન્વયાદિન્દ્રસુતો યમૌ તસ્યૈવ ચક્રયોઃ ।
યુધિષ્ઠિરસ્તુ દ્રોણેન સહ તસ્થૌ નિરીક્ષકઃ ॥ ૧૮.૬૫ ॥

આયાન્તમગ્રતો દૃષ્ટ્વા ભીમમાત્તશરાસનમ્ ।
અવ્વી।દુદ્રુવુઃ સર્વપાઞ્ચાલાઃ વિવિશુઃ પુરમેવ ચ ॥ ૧૮.૬૬ ॥

દ્રુપદસ્ત્વભ્યયાદ્ભીમં સપુત્રઃ સારસેનયા ।
ચક્રરક્ષૌ તુ તસ્યાઽસ્તાં યુધામન્યૂત્તમૌજસૌ ॥ ૧૮.૬૭ ॥

ધાત્ર્યર્યમાવેશયુતૌ વિશ્વાવસુપરાવસૂ ।
સુતૌ તસ્ય મહાવીર્યૌ સત્યજિત્પૃષ્ઠતોઽભવત્ ।
સ મિત્રાંશયુતો વીરશ્ચિત્રસેનો મહારથઃ ॥ ૧૮.૬૮ ॥

અગ્રતસ્તુ શિખણ્ડ્યાગાદ્રથોદારઃ શરાન્ ક્ષિપન્ ।
જનમેજયસ્તમન્વેવ પૂર્વં ચિત્રરથો હિ યઃ ।
ત્વષ્ટુરાવેશસંયુક્તઃ સ શરાનભ્યવર્ષત ॥ ૧૮.૬૯ ॥

તાવુભૌ વિરથૌ કૃત્વા વિચાપૌ ચ વિવર્મકૌ ।
ભીમો જઘાન તાં સેનાં સવાજિરથકુઞ્જરામ્ ॥ ૧૮.૭૦ ॥

અથૈનં શરવર્ષેણ યુધામન્યૂત્તમૌજસૌ ।
અભીયતુસ્તૌ વિરથૌ ચક્રે ભીમો નિરાયુધૌ ॥ ૧૮.૭૧ ॥

હસ્તપ્રાપ્તં ચ પાઞ્ચાલં નાગ્રહીત્સ વૃકોદરઃ ।
ગુર્વર્થામર્જુનસ્યોર્વી પ્રતિજ્ઞાં કર્તુમપ્યૃતામ્ ।
માનભઙ્ગાય કર્ણસ્ય પાર્થમેવ ન્યયોજયત્ ॥ ૧૮.૭૨॥

સ શરાન્ ક્ષિપતસ્તસ્ય પાઞ્ચાલસ્યાર્જુનો દ્રુતમ્ ।
પુપ્લુવે સ્યન્દને ચાપં છિત્વા તં ચાગ્રહીત્ક્ષણાત્ ।
સિંહો મૃગમિવાઽદાય સ્વરથે ચાભિપેતિવાન્ ॥ ૧૮.૭૩॥

અથ પ્રકુપિતં સૈન્યં ફલ્ગુનં પર્યવારયત્ ।
જઘાન ભીમસ્તરસા તત્સૈન્યં શરવૃષ્ટિભિઃ ॥ ૧૮.૭૪॥

અથ સત્યજિદભ્યાગાત્પાર્થં મુઞ્ચઞ્છરાન્ બહૂન્ ।
તમર્જુનઃ ક્ષણેનૈવ ચક્રે વિરથકાર્મુકમ્ ॥ ૧૮.૭૫॥

ઘ્નન્તં ભીમં પુનઃ સૈન્યમર્જુનઃ પ્રાહ મા ભવાન્ ।
સેનામર્હતિ રાજ્ઞોઽસ્ય વીર હન્તુમશેષતઃ ॥ ૧૮.૭૬॥

અવીઇ।સમ્બન્ધયોગ્યસ્તાતસ્ય સખાઽયં ન સુધાર્મિકઃ ।
નેષ્યામ એનમેવાતો ગુરોર્વચનગૌરવાત્ ॥ ૧૮.૭૭॥

સ્નેહપાશં તતશ્ચક્રે બીભત્સૌ દ્રુપદોઽધિકમ્ ।
તતઃ સેનાં વિહાયૈવ ભીમો બીભત્સુમન્વયાત્ ॥ ૧૮.૭૮॥

મુક્તા કથઞ્ચિદ્ભીમાસ્યાત્સા સેના દુદ્રુવે ભયાત્ ।
દ્રુપદં સ્થાપયામાસાથાર્જુનો દ્રોણસન્નિધૌ ॥ ૧૮.૭૯॥

પપ્રચ્છૈનં તદા દ્રોણસખ્યમસ્ત્યુત નેતિ હ ।
અસ્તીદાનીમિતિ પ્રાહ દ્રુપદોઽઙ્ગિરસાં વરમ્ ॥ ૧૮.૮૦॥

અથાઽહ દ્રુપદં દ્રોણઃ સખ્યમિચ્છેઽક્ષયં તવ ।
નહ્યરાજ્ઞા ભવેત્સખ્યં તવેતીદં કૃતં મયા ॥ ૧૮.૮૧॥

ન વિપ્રધર્મો યદ્યુદ્ધમતસ્ત્વં ન મયા ધૃતઃ ।
શિષ્યૈરેતત્કારિતં મે તવ સખ્યમભીપ્સતા ॥ ૧૮.૮૨॥

અતઃ સખ્યાર્થમેવાદ્ય ત્વદ્રાજ્યાર્દ્ધો હૃતો મયા ।
ગઙ્ગાયા દક્ષિણે કૂલે ત્વં રાજૈવોત્તરે ત્વહમ્ ।
નહ્યરાજત્વ એકસ્ય સખ્યં સ્યાદાવયોઃ સખે ॥ ૧૮.૮૩॥

ઇત્યુક્ત્વોન્મુચ્ય તં દ્રોણો રાજ્યાર્દ્ધં ગૃહ્ય ચામુતઃ ।

યયૌ શિષ્યૈર્નાગપુરં ન્યવસત્સુખમત્ર ચ ।
બ્રાહ્મણ્યત્યાગભીરુઃ સ ન ગૃહ્ણન્ ધનુરપ્યસૌ ॥ ૧૮.૮૪॥

ધાર્તરાષ્ટ્રૈસ્તુ ભીમસ્ય ભયાત્પાદૌ પ્રણમ્ય ચ ।
શરણાર્થં યાચિતત્વાત્સપુત્રો યુયુધે પરૈઃ ।
એવં હરીચ્છયૈવાસૌ ક્ષાત્રં ધર્મમુપેયિવાન્ ॥ ૧૮.૮૫॥

દ્રુપદસ્તુ દિવારાત્રં તપ્યમાનઃ પરાભવાત્ ।
ભીમાર્જુનબલં દૃષ્ટ્વા ચેચ્છન્ પાણ્ડવસં શ્રયમ્ ॥ ૧૮.૮૬॥

સમ્બન્ધીત્યર્જુનવચશ્ચિકીર્ષુઃ સત્યમેવ ચ ।
ચ્ચિક્ષ્ંઆર્દવં ચાર્જુને દૃષ્ટ્વા સુતામૈચ્છત્તદર્થતઃ ।
પુત્રં ચ દ્રોણહન્તારમિચ્છન્ વિપ્રવરૌ યયૌ ॥ ૧૮.૮૭॥

યાજોપયાજાવાનીયાથાર્બુદેન ગવાં નૃપઃ ।
ચકારેષ્ટિં તુ તદ્ભાર્યા દ્વિજાભ્યામત્ર ચાऽહુતા ।
દ્રુપદાત્સુતલબ્ધ્યર્થં સાऽહઙ્કારાદ્વ્યલ્. અમ્બયત્ ॥ ૧૮.૮૮॥

કિમેતયેત્યવજ્ઞાય તાવુભૌ વિપ્રસત્તમૌ ।
અજુહ્વતાં તત્પુત્રાર્થં પત્ન્યાઃ પ્રાશ્યં હવિસ્તદા ॥ ૧૮.૮૯॥

હુતે હવિષિ મન્ત્રાભ્યાં વૈષ્ણવાભ્યાં તદૈવ હિ ।
દીપ્તાઙ્ગારનિભો વહ્નિઃ કુણ્ડમદ્ધ્યાત્સમુત્થિતઃ ॥ ૧૮.૯૦॥

કિરીટી કુણ્ડલી દીપ્તૌ હેમમાલી વરાસિમાન્ ।
રથેનાऽદિત્યવર્ણેન નદન્ દ્રુપદમાદ્રવત્ ॥ ૧૮.૯૧॥

ધૃષ્ટત્વાદ્દ્યોતનત્વાચ્ચ ધૃષ્ટદ્યુમ્ન ઇતીરિતઃ ।
મુનિભિર્દ્રુપદેનાપિ સર્વવેદાર્થતત્ત્વવિત્ ॥ ૧૮.૯૨॥

અન્વેનં ભારતી સાક્ષાદ્વેદિમદ્ધ્યાત્સમુત્થિતા ।
પ્રાણો હિ ભરતો નામ સર્વસ્ય ભરણાચ્છ્રુતઃ ॥ ૧૮.૯૩॥

તદ્ભાર્યા ભારતી નામ વેદરૂપા સરસ્વતી ।
શં રૂપમાશ્રિતા વાયું શ્રીરિત્યેવ ચ કીર્તિતા ॥ ૧૮.૯૪॥

આવેશયુક્તા શચ્યાશ્ચ શ્યામલ્। આયાસ્તથોષસઃ ।
તાશ્ચેન્દ્રધર્મનાસત્યસં શ્રયાચ્છ્રિય ઈરિતાઃ ॥ ૧૮.૯૫॥

સા કૃષ્ણા નામતશ્ચાऽસીદુત્કૃષ્ટત્વાદ્ધિ યોષિતામ્ ।

કૃષ્ણા સા વર્ણતશ્ચાઽસીદુત્કૃષ્ટાનન્દિની ચસા ॥ ૧૮.૯૬॥

ઉત્પત્તિતશ્ચ સર્વજ્ઞા સર્વાભરણભૂષિતા ।
સમ્પ્રાપ્તયૌવનૈવાઽસીદજરા લોકસુન્દરી ।
ઉમાં શચ્યુક્તાઽતિતરાં સર્વલક્ષણસં યુતા ॥ ૧૮.૯૭॥

અક્ષ્ ।પૂર્વં હ્યુમા ચ દેવ્યસ્તાઃ કદાચિદ્ભર્તૃભિર્યુતાઃ ।
વિલાસં દર્શયામાસુર્બ્રહ્મણઃ પશ્યતોઽધિકમ્ ॥ ૧૮.૯૮॥

શશાપ તાસ્તદા બ્રહ્મા માનુષીં યોનિમાપ્સ્યથ ।
તત્રાન્યગાશ્ચ ભવતેત્યેવં શપ્તાઃ સુરાઙ્ગનાઃ ॥ ૧૮.૯૯॥

વિચાર્ય ભારતીમેત્ય સર્વમસ્યૈ નિવેદ્ય ચ ।
સહસ્રવત્સરં ચૈનાં શુશ્રૂષિત્વા બભાષિરે ॥ ૧૮.૧૦૦॥

દેવિ નો માનુષં પ્રાપ્યમન્યગાત્વં ચ સર્વથા ।
તથાઽપિ મારુતાદન્યં ન સ્પૃશેમ કથઞ્ચન ॥ ૧૮.૧૦૧॥

બ્રહ્મણૈવ ચ શપ્તાઃ સ્મ પૂર્વં ચાન્યત્ર લીલયા ।
એકદેહત્વમાપ્યૈનં યદા વઞ્ચયિતું ગતાઃ ॥ ૧૮.૧૦૨॥

એકદેહા માનુષત્વમાપ્સ્યથ ત્રિશ ઉદ્ધતાઃ ।
ત્રિશો મદ્વઞ્ચનાયેતા ઇતિ તેનોદિતા વયમ્ ॥ ૧૮.૧૦૩॥

અતસ્ત્વયૈકદેહત્વમિચ્છામો દેવિ જન્મસુ ।
ચતુર્ષ્વપિ યતોઽસ્માકં શાપદ્વયનિમિત્તતઃ ।
ચતુર્જન્મ ભવેદ્ભૂમૌ ત્વાં નાન્યો મારુતાદ્વ્રજેત્ ॥ ૧૮.૧૦૪॥

નિયમોઽયં હરેર્યસ્માદનાદિર્નિત્ય એવ ચ ।
અતસ્ત્વયૈકદેહાન્નો નાન્ય આપ્નોતિઃ મારુતાત્ ॥ ૧૮.૧૦૫॥

ઇતીરિતે તથેત્યુક્ત્વા પાર્વત્યાદિયુતૈવ સા ।
વિપ્રકન્યાઽભવત્તત્ર ચતસ્રઃ પાર્વતીયુતાઃ ।
એકદેહસ્થિતાશ્ચક્રુર્ગિરીશાય તપો મહત્ ॥ ૧૮.૧૦૬॥

તદ્દેહસ્થા ભારતી તુ રુદ્રદેહસ્થિતં હરિમ્ ।
તોષયામાસ તપસા કર્મૈક્યાર્થં ધૃતવ્રતા ॥ ૧૮.૧૦૭॥

તસ્યૈ સ રુદ્રદેહસ્થો હરિઃ પ્રાદાદ્વરં પ્રભુઃ ।
અનન્તતોષણં વિષ્ણોઃ સ્વભર્ત્રા સહ જન્મસુ ॥ ૧૮.૧૦૮॥

ચ્ક્ષિ। સર્વેષ્વપીતિ ચાન્યાસાં દદૌ શઙ્કર એવ ચ ।
વરં સ્વભર્તૃસં યોગં માનુષેષ્વપિ જન્મસુ ॥ ૧૮.૧૦૯॥

તતસ્તદૈવ દેહં તા વિસૃજ્ય નલ્। અનન્દિની ।
બભૂવુરિન્દ્રસેનેતિ દેહૈક્યેન સુસઙ્ગતાઃ ॥ ૧૮.૧૧૦॥

તદાऽસીન્મુદ્ગલો નામ મુનિસ્તપસિ સં સ્થિતઃ ।
ચકમે પુત્રિકાં બ્રહ્મેત્યશ◌ૃણોત્સ કથાન્તરે ॥ ૧૮.૧૧૧॥

અપાહસત્સોऽબ્જયોનિં શશાપૈનં ચતુર્મુખઃ ।
ભારત્યાદ્યાઃ પઞ્ચ દેવીર્ગચ્છ માનિન્નભૂતયે ॥ ૧૮.૧૧૨॥

ઇતીરિતસ્તં તપસા તોષયામાસ મુદ્ગલઃ ।
શાપાનુગ્રહમસ્યાથ ચક્રે કઞ્જસમુદ્ભવઃ ॥ ૧૮.૧૧૩॥

ન ત્વં યાસ્યસિ તા દેવી મારુતસ્ત્વચ્છરીરગઃ ।
યાસ્યતિ ત્વં સદા મૂર્છાં ગતો નૈવ વિબુદ્ધ્યસે ॥ ૧૮.૧૧૪॥

નચ પાપં તતસ્તે સ્યાદિત્યુક્તે ચૈનમાવિશત્ ।
મારુતોऽથેન્દ્રસેનાં ચ ગૃહીત્વાऽથાભવદ્ગૃહી ॥ ૧૮.૧૧૫॥

રેમે ચે સ તયા સાર્દ્ધં દીર્ઘકાલં જગત્પ્રભુઃ ।
તતો મુદ્ગલમુદ્બોધ્ય યયૌ ચ સ્વં નિકેતનમ્ ॥ ૧૮.૧૧૬॥

તતો દેશાન્તરં ગત્વા તપશ્ચક્રે સ મુદ્ગલઃ ।
સેન્દ્રસેના વિયુક્તાથ ભર્ત્રા ચક્રે મહત્તપઃ ॥ ૧૮.૧૧૭॥

તદ્દેહગા ભારતી તુકેશવં શઙ્કરે સ્થિતમ્ ।
તોષયામાસ તપસા કર્મૈક્યાર્થં હિ પૂર્વવત્ ।
ઉમાદ્યા રૌદ્રમેવાત્ર તપશ્ચક્રુર્યથા પુરા ॥ ૧૮.૧૧૮॥

પ્રત્યક્ષે ચશિવે જાતે તદ્દેહસ્થે ચ કેશવે ।
પૃથક્પૃથક્સ્વભર્ત્રાસ્યૈ તાઃ પઞ્ચાપ્યેકદેહગાઃ ।
પ્રાર્થયામાસુરભવત્પઞ્ચકૃત્વો વચો હિ તત્ ॥ ૧૮.૧૧૯॥

ચ્ક્ષી। શિવદેહસ્થિતો વિષ્ણુર્ભારત્યૈ તુ દદૌ પતિમ્ ।
અન્યાસાં શિવ એવાથ પ્રદદૌ ચતુરઃ પતીન્ ॥ ૧૮.૧૨૦॥

દેવ્યશ્ચતસ્રસ્તુ તદા દત્તમાત્રે વરેऽમુના ।
દેવાનામવતારાર્થં પઞ્ચ દેવ્યઃ સ્મ ઇત્યથ ।

નાજાનન્નેકદેહત્વાચ્ચિદ્યોગાત્ક્ષીરનીરવત્ ॥ ૧૮.૧૨૧॥

તાઃ શ્રુત્વા સ્વપતિં દેવિ નચિરાત્પ્રાપ્સ્યસીતિ ચ ।
વિષ્ણૂક્તં શઙ્કરોક્તં ચ ચત્વારઃ પતયઃ પૃથક્ ॥ ૧૮.૧૨૨॥

ભવિષ્યન્તીત્યથૈકસ્યા મેનિરે પઞ્ચભર્તૃતામ્ ।
રુરુદુશ્ચૈકદેહસ્થા એકૈવાહમિતિ સ્થિતાઃ ॥ ૧૮.૧૨૩॥

અથાભ્યાગાન્મહેન્દ્રોઽત્ર સોઽબ્રવીત્તાં વરસ્ત્રિયમ્ ।
કિમર્થં રોદિષીત્યેવ સાઽબ્રવીદ્રુદ્રરૂપિણમ્ ॥ ૧૮.૧૨૪॥

શઙ્કરં દર્શયિત્વૈવ પઞ્ચભર્તૃત્વમેષ મે ।
વરાર્થમર્થિતઃ પ્રાદાદિતિ તં શિવ ઇત્યથ ॥ ૧૮.૧૨૫॥

અજાનન્ શક્ર આહોચ્ચૈઃ કિમેતદ્ભુવનત્રયે ।
મત્પાલિતે યોષિતં ત્વં વૃથા શપસિ દુર્મતે ॥ ૧૮.૧૨૬॥

ઇતીરિતે શિવઃ પ્રાહ પત માનુષ્યમાપ્નુહિ ।
અસ્યાશ્ચ ભર્તા ભવસિ ત્વામેવૈષા વરિષ્યતિ ॥ ૧૮.૧૨૭॥

પશ્ચાત્ર મદવજ્ઞાનાત્પતિતાં સ્ત્વાદૃશાન્ સુરાન્ ।
ગિરેરધસ્તાદસ્યૈવેત્યુક્તોઽસૌ પાકશાસનઃ ॥ ૧૮.૧૨૮॥

ઉદ્બબર્હ ગિરિં તં તુ દદર્શાત્ર ચ તાન્ સુરાન્ ।
પૂર્વેન્દ્રાન્મારુતવૃષનાસત્યાંશ્ચતુરઃ સ્થિતાન્ ।
માનુષેષ્વવતારાય મન્ત્રં રહસિ કુર્વતઃ ॥ ૧૮.૧૨૯॥

તતો વરેણ્યં વરદં વિષ્ણું પ્રાપ્ય સ વાસવઃ ।
તત્પ્રસાદાન્નરાં શેન યુક્તો ભૂમાવજાયત ॥ ૧૮.૧૩૦॥

અક્ષીઇંઅદવજ્ઞાનિમિત્તેન પતિતા ઇતિ તાન્ સુરાન્ ।
મારુતાદીન્મૃષાઽવાદીરિતિ બ્રહ્મા શિવં તદા ॥ ૧૮.૧૩૧॥

શશાપ માનુષેષુ ત્વં ક્ષિપ્રં જાતઃ પરાભવમ્ ।
શક્રાન્નરતનોર્યાસિ યસ્મૈ ત્વં તુ મૃષાઽવદઃ ॥ ૧૮.૧૩૨॥

મચ્છમાનાં ચ દેવીનામવિચાર્ય મયા યતઃ ।
પતિયોગવરં પ્રાદા નાવાપ્સ્યસિ તતઃ પ્રિયામ્ ॥ ૧૮.૧૩૩॥

માનુષેષુ તતઃ પશ્ચાદ્ભારતીદેહનિર્ગતામ્ ।
સ્વલોકે પ્રાપ્સ્યસિ સ્વાર્થે વરોઽયં તે મૃષા ભવેત્ ॥ ૧૮.૧૩૪॥

એષા સા દ્રૌપદી નામ પઞ્ચદેવીતનુર્ભવેત્ ।
મૃષા વાગ્યેષુ તે પ્રોક્તા મારુતાદ્યાસ્તુ તેઽખિલાઃ ॥ ૧૮.૧૩૫॥

તાસાં પતિત્વમાપ્સ્યન્તિ ભારત્યૈવ તુ પાર્વતી ।
સં યુક્તા વ્યવહારેષુ પ્રવર્તેત નચાન્યથા ॥ ૧૮.૧૩૬॥

એતે હિ મારુતાદ્યાસ્તે દેવકાર્યાર્થગૌરવાત્ ।
જાતા ઇતિ શ્રુતિસ્તત્ર નાવજ્ઞા તેઽત્ર કારણમ્ ।
દીર્ઘકાલં મનુષ્યેષુ તતસ્ત્વં સ્થિતિમાપ્સ્યસિ ॥ ૧૮.૧૩૭॥

ઇત્યુક્ત્વા પ્રયયૌ બ્રહ્મા સોઽશ્વત્થામા શિવોઽભવત્ ।
પઞ્ચદેવીતનુસ્ત્વેષા દ્રૌપદી નામ ચાભવત્ ॥ ૧૮.૧૩૮॥

વેદેષુ સપુરાણેષુ ભારતે ચાવગમ્યતે ।
ઉક્તોઽર્થઃ સર્વ એવાયં તથા પૂર્વોદિતાશ્ચ યે ॥ ૧૮.૧૩૯॥

મુમુદુઃ સર્વપાઞ્ચાલા જાતયોઃ સુતયોસ્તયોઃ ।
માનુષાન્નોપભોગેન સં સર્ગાન્માનુષેષુ ચ ॥ ૧૮.૧૪૦॥

મનુષ્યપુત્રતાયાશ્ચ ભાવો માનુષ એતયોઃ ।
અભૂન્નાતિતરામાસીત્તદયોનિત્વહેતુતઃ ॥ ૧૮.૧૪૧॥

યાજોપયાજૌ તાવેવ દયિતા દ્રુપદસ્ય સા ।
ઋક્ષવ્ંઆતૃસ્નેહાર્થમનયોર્યયાચે દદતુશ્ચ તૌ ॥ ૧૮.૧૪૨॥

જાતમાત્મનિહન્તારં ભારદ્વાજો નિશમ્ય તમ્ ।
યશોર્થમસ્ત્રાણિ દદાવગ્રહીત્સોઽપિ લોભતઃ ।
રામાસ્ત્રાણાં દુર્લભત્વાત્ત્રિદશેષ્વપિ વીર્યવાન્ ॥ ૧૮.૧૪૩॥

ભીમાર્જુનાભ્યાં બદ્ધં તં શ્રુત્વા પાઞ્ચાલભૂપતિમ્ ।
પ્રાહિણોત્કૃતવર્માણં પાણ્ડવાનાં જનાર્દનઃ ।
પાણ્ડવેષ્વતુલાં પ્રીતિં લોકે ખ્યાપયિતું પ્રભુઃ ॥ ૧૮.૧૪૪॥

સ માન્ય પાણ્ડવાન્ સોઽપિ શૂરાનુજસુતાસુતઃ ।
તૈર્માનિતઃ કૃષ્ણભક્ત્યા ભ્રાતૃત્વાચ્ચ હરિં યયૌ ॥ ૧૮.૧૪૫॥

તતઃ પ્રભૃતિ સન્ત્યજ્ય દેવપક્ષા જરાસુતમ્ ।
પાણ્ડવાનાશ્રિતા ભૂપા જ્ઞાત્વા ભૈમાર્જુનં બલમ્ ॥ ૧૮.૧૪૬॥

વિશેષતશ્ચ કૃષ્ણસ્ય વિજ્ઞાય સ્નેહમેષુ હિ ।
પરાજિતાશ્ચ બહુશઃ કૃષ્ણેનાચિન્ત્યકર્મણા ॥ ૧૮.૧૪૭॥

પ્રતાપાદ્ધ્યેવ તે પૂર્વં જરાસન્ધવશં ગતાઃ ।
ન સ્નેહાત્તદ્બલં જ્ઞાત્વા પાર્થાનાં કેશવસ્ય ચ ॥ ૧૮.૧૪૮॥

જન્માન્તરાભ્યાસવશાત્સ્નિગ્ધાઃ કૃષ્ણે ચપાણ્ડુષુ ।
જરાસન્ધભયં ત્યક્ત્વા તાનેવ ચ સમાશ્રિતાઃ ॥ ૧૮.૧૪૯॥

અપિ તં બહુશઃ કૃષ્ણવિજિતં નૈવ તત્યજુઃ ।
આસુરાઃ પૂર્વસં સ્કારાત્સં સ્કારો બલવાન્ યતઃ ॥ ૧૮.૧૫૦॥

દેવા હિ કારણાદન્યાનાશ્રયન્તોઽપિ નાઽન્તરમ્ ।
સ્નેહં ત્યજન્તિ દૈવેષુ તથાઽન્યેઽન્યેષ્વપિ સ્ફુટમ્ ॥ ૧૮.૧૫૧॥

ધૃતરાષ્ટ્રો બલં જ્ઞાત્વા બહુશો ભીમપાર્થયોઃ ।
દૈવત્વાચ્ચ સ્વભાવેન જ્યેષ્ઠત્વાદ્ધર્મજસ્ય ચ ।
સુપ્રીત એવ તં ચક્રે યૌવરાજ્યાભિષેકિણમ્ ॥ ૧૮.૧૫૨॥

અક્ષ્વ્।ભીમાર્જુનાવથો જિત્વા સર્વદિક્ષુ ચભૂપતીન્ ।
ચક્રતુઃ કરદાન્ સર્વાન્ ધૃતરાષ્ટ્રસ્ય દુર્જયૌ ॥ ૧૮.૧૫૩॥

તયોઃ પ્રીતોઽભવત્સોઽપિ પૌરજાનપદાસ્તથા ।
ભીષ્મદ્રોણમુખાઃ સર્વેઽપ્યતિમાનુષકર્મણા ॥ ૧૮.૧૫૪॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
ભીમાર્જુનદિગ્વિજયો નામ અષ્ટાદશોઽધ્યાયઃ ॥

## અથ એકોનવિંશોઽધ્યાયઃ ।

(પાણ્ડવરાજ્યલાભઃ )
ૐ । એવં શુભોચ્ચગુણવત્સુ જનાર્દનેન યુક્તેષુ પાણ્ડુષુ ચરત્સ્વધિકં શુભાનિ ।
નાસ્તિક્યનીતિમખિલાં ગુરુદેવતાદિસત્સ્વઞ્જસૈવ જગૃહુર્ધૃતરાષ્ટ્રપુત્રાઃ ॥ ૧૯.૧॥

નામ્ના કણિઙ્ક ઇતિ ચાસુરકો દ્વિજોઽભૂચ્છિષ્યઃ સુરેતરગુરોઃ શકુનેર્ગુરુઃ સઃ ।
નીતિં સ કુત્સિતતમાં ધૃતરાષ્ટ્રપુત્રેષ્વાધાદ્રહો વચનતઃ શકુનેઃ સમસ્તામ્ ॥ ૧૯.૨॥

છદ્મૈવ યત્ર પરમં ન સુરાશ્ચ પૂજ્યાઃ સ્વાર્થેન વઞ્ચનકૃતે જગતોઽખિલં ચ ।
ધર્માદિ કાર્યમપિ યસ્ય મહોપાધિઃ સ્યાચ્છ્રેષ્ઠઃ સ એવ નિખિલાસુરદૈત્યસઙ્ઘાત્ ॥ ૧૯.૩॥

ઇત્યાદિ કુત્સિતતમાં જગૃહુઃ સ્મ વિદ્યામજ્ઞાત એવ ધૃતરાષ્ટ્રમુખૈઃ સમસ્તૈઃ ।
તેષાં સ્વભાવબલતો રુચિતા ચ સૈવ વિસ્તારિતા ચ નિજબુદ્ધિબલાદતોઽપિ ॥ ૧૯.૪॥

સમ્પૂર્ણદુર્મતિરથો ધૃતરાષ્ટ્રસૂનુસ્તાતપ્યમાનહૃદયો નિખિલાન્યહાનિ ।
દૃષ્ટ્વા શ્રિયં પરમિકાં વિજયં ચ પાર્થેષ્વાહેદમેત્ય પિતરં સહ સૌબલેન ॥ ૧૯.૫॥

જ્યેષ્ઠસ્ય તેઽપિ હિ વયં હૃદયપ્રજાતા નાર્હત્વમેવ ગમિતા ભવતૈવ રાજ્યે ।
ભ્રાતુઃ કનીયસ ઉતાપિ હિ દારજાતા અન્યૈશ્ચ રાજ્યપદવીં ભવતૈવ નીતાઃ ॥ ૧૯.૬॥

રાજ્યં મહચ્ચ સમવાપ્સ્યતિ ધર્મસૂનુસ્ત્વત્તોઽથવાઽનુજબલાત્પ્રસભં વયં તુ ।
દાસા ભવેમ નિજતન્તુભિરેવ સાકં કુન્તીસુતસ્ય પરતોઽપિ તદન્વયસ્ય ॥ ૧૯.૭॥

નાઽત્માર્થમસ્તિ મમ દુઃખમથાતિશુદ્ધલોકપ્રસિદ્ધયશસસ્તવ કીર્તિનાશઃ ।
અસ્મન્નિમિત્ત ઇતિ દુઃખમતો હિ સર્વેઽપીચ્છામ મર્તુમથ નઃ કુરુ ચાપ્યનુજ્ઞામ્ ॥ ૧૯.૮॥

એવં સ્વપુત્રવચનં સ નિશમ્ય રાજા પ્રોવાચ નાનુગુણમેતદહો મનસ્તે ।
કો નામ પાણ્ડુતનયેષુ ગુણોત્તમેષુ પ્રીતિં ન યાતિ નિજવીર્યભવોચ્ચયેષુ ॥ ૧૯.૯॥

તે હિ સ્વબાહુબલતોઽખિલભૂપભૂતિં મય્યાકૃષન્તિ નચ વઃ પ્રતિષેધકાસ્તે ।
તસ્માચ્છમં વ્રજ શુભાય કુલસ્ય તાત ક્ષેમાય નો ભવતિ વો બલવદ્વિરોધઃ ॥ ૧૯.૧૦॥

એવં બ્રુવત્યપિ નૃપે પુનરાહ પાપ આશ્રિત્ય સૌબલમતં યદિ નૈવ પાર્થાન્ ।
અન્યત્ર યાપયસિ નાગપુરાત્પરેતાન્ દૃષ્ટ્વાઽખિલાનપિ હિ નો મુદમેહિ પાર્થૈઃ ॥ ૧૯.૧૧॥

અક્ષ્વી।એવં નિશમ્ય ગદિતં સુતહાર્દપાશૈરાકૃષ્યતાઽશુ સ નૃપોઽરિધરેચ્છયૈવ ।
પ્રોવાચ પુત્રમપિ તે બલિનો ન પાર્થાઃ શક્યાઃ પુરાત્તનય યાપયિતું કથઞ્ચિત્ ॥ ૧૯.૧૨॥

ઇત્યુક્ત આહ પિતરં શકુનિં નિરીક્ષ્ય સૃષ્ટો મયા વિધિરિહાદ્ય શ◌ૃણુષ્વ તં ચ ।
આસં સ્ત્રયોદશ સમા નગરં પ્રવિષ્ટેષ્વેતેષુ તાવદયમેવ વિધિર્મયેષ્ટઃ ॥ ૧૯.૧૩॥

દ્રૌણેર્હિ નાસ્તિ સદૃશો બલવાન્ પ્રતાપી સોઽયં મયા બહુવિધૈઃ પરમૈરુપાયૈઃ ।
નીતો વશં વશગતોઽસ્ય ચ માતુલેન સાકં પિતા તમનુ ચૈષ નદીપ્રસૂતઃ ॥ ૧૯.૧૪॥

એવં હિ સૈનિકગણા અપિ દાનમાનૈઃ પ્રાયો વશં મમ ગતા અપિ ચૈષ કર્ણઃ ।
અસ્ત્રે બલેઽપ્યધિક એવ સુરેન્દ્રસૂનોર્જેષ્યે ચ મન્ત્રબલતસ્ત્વહમેવ ભીમમ્ ॥ ૧૯.૧૫॥

ત્રિં શચ્છતં પરમકાઃ સુરદુર્લભાશ્ચ દુર્વાસસો હિ મનવોઽદ્ય મયા ગૃહીતાઃ ।
અન્યત્ર તે પ્રવિહિતા નહિ વીર્યવન્તઃ સ્યુર્ભીમ ઇત્યહમમૂન્ન નિયોજયામિ ॥ ૧૯.૧૬॥

તે વીર્યદા વિજયદા અપિ વહ્નિવારિસ્તમ્ભાદિદાઃ સકલદેવનિકાયરોધાઃ ।
વૃષ્ટ્યાદ્યભીપ્સિતસમસ્તકરા અમૂભિર્જેષ્યામિ ભીમમમુમેકમયાતયામૈઃ ॥ ૧૯.૧૭॥

સૌહાર્દમેષુ યદિવાઽતિતરાં કરોષિ તત્રાપિ નૈવ હિ મયા ક્રિયતે વિરોધઃ ।
વત્સ્યન્તુ વારણવતે ભવતુ સ્મ રાષ્ટ્રં તેષાં તદેવ મમ નાગપુરં ત્વદર્થે ॥ ૧૯.૧૮॥

એવં સ્વપુત્રપરિપાલનતો યશસ્તે ભૂયાદ્ધિનશ્યતિ પરપ્રસવાતિપુષ્ટૌ ।
જાતે બલે તવ વિરોધકૃતશ્ચ તે સ્યુઃ સ્વાર્થં હિ તાવદનુયાન્ત્યપિ કેવલં ત્વામ્ ॥ ૧૯.૧૯॥

ક્ષત્તૈક એવ સતતં પરિપોષકોઽલં તેષાં મમ દ્વિડથ મન્ત્રબલાદમુષ્ય ।
પૌરાશ્ચ જાનપદકાઃ સતતં દ્વિષન્તિ માં તેષ્વતીવ દૃઢસૌહૃદયેતસશ્ચ ॥ ૧૯.૨૦॥

તે તેષુ દૂરગમિતેષુ નિરાશ્રયત્વાન્મામેવ દુર્બલતયા પરિતઃ શ્રયન્તે ।
ભીષ્માદયશ્ચ નહિ તન્નિકટે વિરોધં કુર્યુર્વિનશ્યતિ ગતેષુ હિ સૌહૃદં તત્ ॥ ૧૯.૨૧॥

ભેદઃ કુલસ્ય ભવિતા કુલનાશહેતુરસ્માભિરેષુ સહિતેષુ પુરે વસત્સુ ।
તસ્માદુપાયબલતઃ પ્રતિયાતનીયાસ્તે વારણાવતમિતો વિહિતોઽપ્યુપાયઃ ॥ ૧૯.૨૨॥

વિષ્ણુર્જયન્ત ઇતિ શમ્ભુસહાય આસ્તે દેવોત્સવશ્ચ સુમહાન્ ભવિતાઽત્ર સુષ્ઠુ ।
અક્ષ્વીઇ।ભક્તાશ્ચ તે હિ નિતરામરિશઙ્ખપાણૌ ત્વચ્ચોદિતાઃ સમુપયાન્તિ તમુત્સવં દ્રાક્ ॥ ૧૯.૨૩॥

અજ્ઞાપ્ય મત્પુરુષતાં પુરુષૈર્મદીયૈર્મધ્યસ્થવદ્બહુગુણા ઉદિતાશ્ચ તત્ર ।
તેષાં પુરોઽત્ર ગમનાભિરુચિશ્ચ જાતા દ્રષ્ટું પુરં બહુગુણં નનુ પાણ્ડવાનામ્ ॥ ૧૯.૨૪॥

ઇત્યુક્તવત્યથ સુતે સ તથેત્યુવાચ પ્રાપ્તેષુ પાણ્ડુતનયેષુ તથૈવ ચોચે ।
જ્ઞાત્વૈવ તેઽપિ નૃપતેર્હૃદયં સમસ્તં જગ્મુઃ પિતેતિ પૃથયા સહ નીતિહેતોઃ ॥ ૧૯.૨૫॥

ભીમસ્તદા હ ભવિતાઽત્ર હિ ભૈક્ષચાર ઇત્યેવ સમ્યગનુવિદ્ય નિજં ન કર્મ ।
ત્યાજ્યં ત્વિતિ પ્રતિજગાદ નિજાગ્રજાય યામો વયં નતુ ગૃહાત્સ હિ નઃ સ્વધર્મઃ ॥ ૧૯.૨૬॥

નિષ્કાલ્। અયન્તિ યદિ નો નિજધર્મસં સ્થાન્ યોત્સ્યામહેઽત્ર નહિ દસ્યુવધોઽપ્યધર્મઃ ।
ઇત્યૂચિવાં સમમુમાહ ચ ધર્મસૂનુઃ કીર્તિર્વિનશ્યતિ હિ નો ગુરુભિર્વિરોધે ॥ ૧૯.૨૭॥

ઇત્યુક્તવાક્યમમુમગ્રજમન્વગાત્સ ભીમઃ પ્રદર્શ્ય નિજધર્મમથાનુવૃત્ત્યૈ ।
દોષો ભવેદુભયતો યત એવ તેન વાચ્યઃ સ્વધર્મ ઉત ન સ્થિતિરત્ર કાર્યા ॥ ૧૯.૨૮॥

કીર્ત્યર્થમેવ નિજધર્મપરિપ્રહાણે પ્રાપ્તેઽગ્રજસ્ય વચનાત્પ્રવિહાતુમેવ ।
ભીમસ્ય દોષમુભયં પ્રતિહન્તુમીશો જ્યેષ્ઠં ચકાર હરિરત્ર સુતં વૃષસ્ય ॥ ૧૯.૨૯॥

હન્તવ્યતામુપગતેષુ સુયોધનાદિષ્વન્યોપધાન્નહિ ભવેન્નિજધર્મ એવ ।
પૂર્વં વધે નહિ સમસ્તશ એવ દોષાસ્તેષાં પ્રયાન્તિ વિવૃતિં ચ તદર્થતોઽપિ ॥ ૧૯.૩૦॥

ક્ષત્તાઽથ ચાઽહ સુવચોઽન્ત્યજભાષયૈવ ધર્માત્મજં વિષહુતાશભયાત્પ્રતીતાઃ ।

આધ્વં ત્વિતિ સ્મ સ તથેતિ વચોઽપ્યુદીર્ય પ્રાયાચ્ચ વારણવતં પૃથયાઽનુજૈશ્ચ ॥ ૧૯.૩૧॥

તાન્ હન્તુમેવ ચ તદા ધૃતરાષ્ટ્રસૂનુર્લાક્ષાગૃહં સપદિ કાઞ્ચનરત્નગૂઢમ્ ।
કૃત્વાઽભ્યયાતયદમુત્ર હિ વિષ્ણુપદ્યા સ્વામાત્યમેવ ચ પુરોચનનામધેયમ્ ॥ ૧૯.૩૨॥

પૂર્વં પ્રહસ્ત ઇતિ યસ્ત્વભવત્સુપાપઃ સોઽભ્યેત્ય પાણ્ડુતનયાનભવચ્ચ મન્ત્રી ।
દુર્યોધનં પ્રતિવિહાય ભવત્સકાશમાયાત ઇત્યવદદેષુ સકૂટવાક્યમ્ ॥ ૧૯.૩૩॥

દિવ્યં ગૃહં ચ ભવતાં હિ મયોપનીતં પ્રીત્યૈવ પાપમનુયાતુમહં ન શક્તઃ ।
યુષ્માસુ ધર્મધૃતિમત્સુ સદા નિવત્સ્ય ઇત્યૂચિવાં સમમુમાહુરહો સુભદ્રમ્ ॥ ૧૯.૩૪॥

ચ્ક્ષિક્ષ્।દૃષ્ટ્વૈવ જાતુષગૃહં વસયા સમેતં તદ્ગન્ધતો વૃષસુતઃ પવમાનજાતમ્ ।
તં ચાતિપાપમવદત્સુમુખૈષ પાપો હન્તું ન ઇચ્છતિ સદા ભવ ચ પ્રતીતઃ ॥ ૧૯.૩૫॥

ક્ષત્તાઽથ નીતિબલતોઽખિલલોકવૃત્તં જાનન્ સ્વચારમુખતઃ ખનકાય ચોચે ।
ઉક્ત્વૈવ ધર્મતનયાય મદીયવાક્યં પૂર્વોક્તમાશુ કુરુ તત્ર બિલં સુદૂરમ્ ॥ ૧૯.૩૬॥

ચક્રે સ ચૈવમથ વર્ત્મ વૃતિચ્છલેન દ્વારં ચ તસ્ય સ પિધાય યયૌ ગૃહં સ્વમ્ ।
ભીમઃ પુરોચન ઉભાવપિ તૌ વધાય ચ્છિદ્રાર્થિનૌ મિથ ઉતોષતુરબ્દકાર્દ્ધમ્ ॥ ૧૯.૩૭॥

તસ્યાગ્રજા ચ સહિતા સુતપઞ્ચકેન તત્રાઽગમત્તદનુ મારુતિરેષ કાલઃ ।
ઇત્થં વિચિન્ત્ય સ નિશામ્ય ચ તાન્ પ્રસુપ્તાન્ ભ્રાતૄંશ્ચ માતરમથાઽશુ બિલે ન્યધાત્પ્રાક્ ॥ ૧૯.૩૮॥

તં ભાગિનેયસહિતં ભગિનીં ચ તસ્ય પાપાં દદાહ સગૃહાં પવમાનસૂનુઃ ।
સાઽપ્યાગતા હિ ગરલ્. એન નિહન્તુમેતાન્ ભીમસ્ય પૂર્વભુજિતો ન શશાક ચૈતત્ ॥ ૧૯.૩૯॥

તમં તયા સસુતયા ચ તપો નિતાન્તં સ્યાં સૂનુભિઃ સહ બલાદદિતિસ્તથાઽબ્દાત્ ।
તસ્યા અદાચ્ચ ગિરિશો યદિ પુત્રકૈસ્ત્વં યુક્તા ન યાસિ મૃતિમેષ વરસ્તવેતિ ॥ ૧૯.૪૦॥

જાનન્નિદં સકલમેવ સ ભીમસેનો હત્વા સુતૈઃ સહ કુબુદ્ધિમિમાં હિ તં ચ ।
ભ્રાતૄંશ્ચ માતરમુદૂહ્ય યયૌ બિલાત્સ નિર્ગત્ય ભીતિવશતોઽબલતાં પ્રયાતાન્ ॥ ૧૯.૪૧॥

જ્ઞાત્વા પુરોચનવધં યદિ ભીષ્મમુખ્યૈર્વૈચિત્રવીર્યતનયા અભિયોધયેયુઃ ।
કિં નો ભવેદિતિ ભયં સમુહદ્વિવેશ ભીમં ત્વૃતે ચ તનયાન્ સકલાન્ પૃથાયાઃ ॥ ૧૯.૪૨॥

ભીમોઽભયોઽપિ ગુરુભિઃ સ્વમુખેન યુદ્ધમપ્રીયમાણ ઉત ધર્મજવાક્યહેતોઃ ।
ઊહ્યૈવ તાનપિ યયૌ દ્યુનદીં ચ તીર્ત્વા ક્ષત્ત્રાઽતિસૃષ્ટમધિરુહ્ય જલપ્રયાણમ્ ॥ ૧૯.૪૩॥

વિશ્વાસિતા વિદુરપૂર્વવચોભિરેવ દાશોદિતાભિરધિરુહ્ય ચ ભીમપૃષ્ઠમ્ ।
સર્વે યયુર્વનમથાભ્યુદિતે ચ સૂર્યે દૃષ્ટ્વૈવ સપ્ત મૃતકાનરુદંશ્ચ પૌરાઃ ॥ ૧૯.૪૪॥

હા પાણ્ડવાનદહદેષ હિ ધાર્તરાષ્ટ્રો ધર્મસ્થિતાન્ કુમતિરેવ પુરોચનેન ।
સોઽપ્યેષ દગ્ધ ઇહ દૈવવશાત્સુપાપઃ કો નામ સત્સુ વિષમઃ પ્રભવેત્સુખાય ॥ ૧૯.૪૫॥

પૌરેભ્ય એવ નિખિલેન ચ ભીષ્મમુખ્યા વૈચિત્રવીર્યસહિતાસ્તુ નિશમ્ય હેતિ ।
ઊચુઃ સુદુઃખિતધિયોઽથ સુયોધનાદ્યાઃ ક્ષત્તા મૃષૈવ રુરુદુર્યુયુજુશ્ચ કર્મ ॥ ૧૯.૪૬॥

અ્ક્ક્ષ્।ભીમોઽપ્યુદૂહ્ય વનમાપ હિડિમ્બકસ્ય ભ્રાતૄન્ પૃથાં ચ તૃષિતૈરભિયાચિતશ્ચ ।
પાનીયમુત્તરપટેઽમ્બુજપત્રનદ્ધં દૂરાદુદૂહ્ય દદૃશે સ્વપતોઽથ તાંશ્ચ ॥ ૧૯.૪૭॥

રક્ષાર્થમેવ પરિજાગ્રતિ ભીમસેને રક્ષઃ સ્વસારમભિયાપયતે હિડિમ્બીમ્ ।
સા રૂપમેત્ય શુભમેવ દદર્શ ભીમં સાક્ષાત્સમસ્તશુભલક્ષણસારભૂતમ્ ॥ ૧૯.૪૮॥

સા રાક્ષસીતનુમવાપ સુરેન્દ્રલોકશ્રીરેવ શક્રદયિતા ત્વપરૈવ શચ્યાઃ ।
શાપાત્સ્પૃધા પતિમવાપ્ય ચ મારુતં સા પ્રાપ્તું નિજાં તનુમયાચત ભીમસેનમ્ ॥ ૧૯.૪૯॥

તાં ભીમ આહ કમનીયતનું ન પૂર્વં જ્યેષ્ઠાદુપૈમિ વનિતાં નહિ ધર્મ એષઃ ।
સા ચાઽહ કામવશગા પુનરેતદેવ સ્વાવેશયુઙ્ધિ મરુદગ્ર્યપરિગ્રહસ્ય ॥ ૧૯.૫૦॥

સા ભારતી વરમિમં પ્રદદાવમુષ્યૈ સ્વાવેશમાત્મદયિતસ્ય ચ સઙ્ગમેન ।
શાપાદ્વિમુક્તિમતિતીવ્રતપઃ પ્રસન્ના તેનાઽહ સા નિજતનું પવમાનસૂનોઃ ॥ ૧૯.૫૧॥

જ્ઞાનં ચ નૈજમભિદર્શયિતું પુનશ્ચ પ્રાહેશ્વરોઽખિલજગદ્ગુરુરિન્દિરેશઃ ।
વ્યાસસ્વરૂપ ઇહ ચેત્ય પરશ્ચ એવ માં તે પ્રદાસ્યતિ તદા પ્રકરોષિ મેઽર્થ્યમ્ ॥ ૧૯.૫૨॥

કાલે તદૈવ કુપિતઃ પ્રયયૌ હિડિમ્બો ભીમં નિહન્તુમપિ તાં ચ નિજસ્વસારમ્ ।
ભક્ષાર્થમેવ હિ પુરા સ તુતાં ન્યયુઙ્ક્ત નેતું ચ તાનથ સમાસદદાશુ ભીમમ્ ॥ ૧૯.૫૩॥

સા ભીમમેવ શરણં પ્રજગામ તાં ચ ભ્રાતૄંશ્ચ માતરમથાવિતુમભ્યયાત્તમ્ ।
ભીમઃ સુદૂરમપકૃષ્ય સહોદરાણાં નિદ્રાપ્રભઙ્ગભયતો યુયુધેઽમુના ચ ॥ ૧૯.૫૪॥

તૌ મુષ્ટિભિસ્તરુભિરશ્મભિરદ્રિભિશ્ચ યુદ્ધ્વા નિતાન્તરવતઃ પ્રતિબોધિતાં સ્તાન્ ।
સઞ્ચક્રતુસ્તદનુ સોદરસમ્ભ્રમં તં દૃષ્ટ્વૈવ મારુતિરહન્નુરસિ સ્મ રક્ષઃ ॥ ૧૯.૫૫॥

તદ્ભીમબાહુબલતાડિતમીશવાક્યાત્સર્વૈરજેયમપિ ભૂમિતલ્। એ પપાત ।
વક્ત્રસ્રવદ્બહુલશોણિતમાપ મૃત્યું પ્રાયાત્તમોઽન્ધમપિ નિત્યમથ ક્રમેણ ॥ ૧૯.૫૬॥

હત્વૈવ શર્વરરક્ષિતરાક્ષસં તં સર્વૈરવધ્યમપિ સોદરમાતૃયુક્તઃ ।
ભીમો યયૌ તમનુ સા પ્રયયૌ હિડિમ્બી કુન્તીં યુધિષ્ઠિરમથાસ્ય કૃતે યયાચે ॥ ૧૯.૫૭॥

તાભ્યામનૂક્તમપિ યન્ન કરોતિ ભીમઃ પ્રાદુર્બભૂવ નિખિલોરુગુણાભિપૂર્ણઃ ।
અિ્ક્ક્ષ।વ્યાસાત્મકો હરિરનન્તસુખામ્બુરાશિર્વિદ્યામરીચિવિતતઃ સકલોત્તમોઽલમ્ ॥ ૧૯.૫૮॥

દૃષ્ટ્વૈવ તં પરમમોદિન આશુ પાર્થા માત્રા સહૈવ પરિપૂજ્ય ગુરું વિરિઞ્ચેઃ ।
ઉલ્લાલ્. ઇતાશ્ચ હરિણા પરમાતિહાર્દપ્રોત્ફુલ્લપદ્મનયનેન તદોપવિષ્ટાઃ ॥ ૧૯.૫૯ ॥

તાન્ ભક્તિનમ્રશિરસઃ સમુદીક્ષ્ય કૃષ્ણો ભીમં જગાદ નત આશુ હિડિમ્બયા ચ ।
એતાં ગૃહાણ યુવતીં સુરસદ્મશોભાં જાતે સુતે સહસુતા પ્રતિયાતુ ચૈષા ॥ ૧૯.૬૦ ॥

એવં બ્રુવત્યગણિતોરુગુણે રમેશ ઓમિત્યુદીર્ય કૃતવાંશ્ચ તથૈવ ભીમઃ ।
સ્કન્ધેન ચોહ્ય વિબુધાચરિતપ્રદેશાન્ ભીમં પ્રયાત્યુદય એવ રવેર્હિડિમ્બી ॥ ૧૯.૬૧ ॥

સા નન્દનાદિષુ વનેષુ વિહૃત્ય તેન સાયં પ્રયાતિ પૃથયા સહિતાંશ્ચ પાર્થાન્ ।
એવં યયાવપિ તયોરિહ વત્સરાર્દ્ધો જાતશ્ચ સૂનુરતિવીર્યબલોપપન્નઃ ॥ ૧૯.૬૨ ॥

દેવોઽપિ રાક્ષસતનુર્નિરૃતિઃ પુરા યાવેશયુક્ચ્ય ગિરિશસ્ય ઘટોત્કચાખ્યઃ ।
પૂર્વં ઘટોપમમમુષ્ય શિરો બભૂવ કેશા નિમેષત ઉદાસુરતો હિ નામ ॥ ૧૯.૬૩ ॥

જાતે સુતે સમયતો ભગવત્કૃતાત્સ ભીમો જગાદ સસુતાં ગમનાય તાં ચ ।
સ્મૃત્યાઽભિયાન ઉભયોરપિ સા પ્રતિજ્ઞાં તેષાં વિધાય ચ યયૌ સુરલોકમેવ ॥ ૧૯.૬૪ ॥

વ્યાસોઽપિ પાણ્ડુતનયૈઃ સહિતો બકસ્ય રૌદ્રાદ્ધરાજજયવધાપગતસ્ય નિત્યમ્ ।
યાતો વધાય પરમાગણિતોરુધામા પૂર્ણાક્ષયોરુસુખ આશુ તદૈકચક્રામ્ ॥ ૧૯.૬૫ ॥

તાન્ બ્રાહ્મણસ્ય ચ ગૃહે પ્રણિધાય કૃષ્ણઃ શિષ્યા મમૈત ઇતિ વિપ્રકુમારરૂપાન્ ।
આયામિ કાલ ઇતિ તાનનુશાસ્ય ચાયાત્તે તત્ર વાસમથ ચક્રુરનૂચ્ય વેદાન્ ॥ ૧૯.૬૬ ॥

ભિક્ષામટત્સુ સતતં પ્રતિહુઙ્કૃતેન ભીમે વિશાં સદન એવ ગૃહપ્રમાણમ્ ।
ભાણ્ડં કુલાલવિહિતં પ્રતિગૃહ્ય ગચ્છત્યાશઙ્કયાઽવગમનસ્ય તમાહ ધાર્મઃ ॥ ૧૯.૬૭ ॥

સ્થૂલં હિ સદ્મ પૃથિવીસહિતં ત્વરક્ષ ઉદ્ધૃત્ય વહ્નિમુખતસ્તદુ ચૈકદોષ્ણા ।
ભાણ્ડં તદર્થમુરુ કુમ્ભકરેણ દત્તં ભિક્ષાં ચ તેન ચરસિ પ્રતિહુઙ્કૃતેન ॥ ૧૯.૬૮ ॥

ધર્મસ્ય તે સુનિયતેર્બલતશ્ચ બોધો ભૂયાત્સુયોધનજનસ્ય તતો ભયં મે ।
માત્રા સહૈવ વસ ફલ્ગુનપૂર્વકૈસ્ત્વમાનીતમેવ પરિભુઙ્ક્ષ્વ નતુ વ્રજેથાઃ ॥ ૧૯.૬૯ ॥

અ્ક્ષ્ક્ષી। ઇત્યુક્ત આશુ સ ચકાર તથૈવ ભીમસ્તેઽપિ સ્વધર્મપરિરક્ષણહેતુમૌનાઃ ।
ભિક્ષાં ચરન્ત્યથ ચતુર્ષ્વપિ તેષુ યાતેષ્વેકત્ર માતૃસહિતઃ સ કદાચિદાસ્તે ॥ ૧૯.૭૦ ॥

તત્કાલ એવ રુદિતં નિજવાસહેતોર્વિપ્રસ્ય દારસહિતસ્ય નિશમ્ય ભીમઃ ।
સ્ત્રીબાલસં યુતગૃહે શિશુલાલ્. અનાદૌ લજ્જેદિતિ સ્મ જનનીમવદન્નચાગાત્ ॥ ૧૯.૭૧ ॥

જાનીહિ વિપ્રરુદિતં કુત ઇત્યતશ્ચ યોગ્યં વિધાસ્ય ઇતિ સા પ્રયયૌ ચ શીઘ્રમ્ ।

સા સં વૃતૈવ સકલં વચનં ગૃહેઽસ્ય શુશ્રાવ વિપ્રવર આહ તદા પ્રિયાં સઃ ॥ ૧૯.૭૨॥

દાતવ્ય એવ હિ કરોઽદ્ય ચ રક્ષસોઽસ્ય સાક્ષાદ્બકસ્ય ગિરિસન્નિભભક્ષ્યભોજ્યઃ ।
પું સાઽનસા ચ સહિતાનડુહા પુમાં સ્તુ નૈવાસ્તિ નોઽપ્રદદતાં ચ સમસ્તનાશઃ ॥ ૧૯.૭૩॥

અન્યત્ર યામ ઇતિ પૂર્વમુદાહૃતં મે નૈતત્પ્રિયે તવ મનોગતમાસ તેન ।
યાસ્યામિ રાક્ષસમુખં સ્વયમેવ મર્તું ભાર્યૈનમાહ ન ભવાનહમત્ર યામિ ॥ ૧૯.૭૪॥

અર્થે તવાદ્ય તનુસન્ત્યજનાદહં સ્યાં લોકે સતીપ્રચરિતે તદૃતે ત્વધશ્ચ ।
કન્યાઽહ ચૈનમહમેવ ન કન્યયાઽર્થ ઇત્યુક્ત આહ ધિગિતિ સ્મ સ વિપ્રવર્યઃ ॥ ૧૯.૭૫॥

કન્યોદિતા બત કુલદ્વયતારિણીતિ જાયા સખેતિ વચનં શ્રુતિગં સુતશ્ચ ।
આત્મૈવ તેન નતુ જીવનહેતુતોઽહં ધીપૂર્વકં નૃશનકે પ્રતિપાદયામિ ॥ ૧૯.૭૬॥

એવં રુદત્સુ સહિતેષુ કુમારકોઽસ્ય પ્રાહ સ્વહસ્તગતૃણં પ્રતિદર્શ્ય ચૈષામ્ ।
એતેન રાક્ષસમહં નિહનિષ્ય એવેત્યુક્તે સુવાક્યમનુ સા પ્રવિવેશ કુન્તી ॥ ૧૯.૭૭॥

પૃષ્ટસ્તયાઽહ સ તુ વિપ્રવરો બકસ્ય વીર્યં બલં ચ દિતિજારિભિરપ્યસહ્યમ્ ।
સં વત્સરત્રયયુતે દશકે કરં ચ પ્રાતિસ્વિકં દશમુખસ્ય ચ માતુલસ્ય ॥ ૧૯.૭૮॥

શ્રુત્વા તમુગ્રબલમત્યુરુવીર્યમેવ રામાયણે રઘુવરોરુશરાતિભીતમ્ ।
વિષ્ટં બિલેષ્વથ નૃપાન્ વશમાશુ કૃત્વા ભીત્યૈવ તૈસ્તદનુ દત્તકરં નનન્દ ॥ ૧૯.૭૯॥

એવં બલાઢ્યમમુમાશુ નિહત્ય ભીમઃ કીર્તિં ચ ધર્મમધિકં પ્રતિયાસ્યતીહ ।
સર્વે વયં ચ તમનુ પ્રગૃહીતધર્મા યાસ્યામ ઇત્યવદદાશુ ધરાસુરં તમ્ ॥ ૧૯.૮૦॥

સન્તિ સ્મ વિપ્રવર પઞ્ચ સુતા મમાદ્ય તેષ્વેક એવ નરવૈરિમુખાય યાતુ ।
ઇત્યુક્ત આહ સ ન તે સુતવધ્યયાઽહં પાપો ભવાનિ તવ હન્ત મનોઽતિધીરમ્ ॥ ૧૯.૮૧॥

અક્ક્ષીઇ। ઉક્તૈવમાહ ચ પૃથા તનયે મદીયે વિદ્યાઽસ્તિ દિક્પતિભિરપ્યવિષહ્યરૂપા ।
ઉક્તોઽપિ નો ગુરુભિરેષ નિયુઙ્ક્ત એતાં વધ્યસ્તથાઽપિ ન સુરાસુરપાલકૈશ્ચ ॥ ૧૯.૮૨॥

ઉક્ત્વૈવમેત્ય નિખિલં ચ જગાદ ભીમ ઉદ્ધર્ષ આસ સ નિશમ્ય મહાસ્વધર્મમ્ ।
પ્રાપ્તં વિલોક્ય તમતીવ વિઘૂર્ણનેત્રં દૃષ્ટ્વા જગાદ યમસૂનુરુપેત્ય ચાન્યૈઃ ॥ ૧૯.૮૩॥

માતઃ કિમેષ મુદિતોઽતિતરામિતિ સ્મ તસ્મૈ ચ સા નિખિલમાહ સ ચાબ્રવીત્તામ્ ।
કષ્ટં ત્વયા કૃતમહો બલમેવ યસ્ય સર્વે શ્રિતા વયમમું ચ નિહં સિ ભીમમ્ ॥ ૧૯.૮૪॥

યદ્બાહુવીર્યપરમાશ્રયતો હિ રાજ્યમિચ્છામ એવ નિખિલારિવધં સ્વધર્મમ્ ।
સોઽયં ત્વયાઽદ્ય નિશિચારિમુખાય માતઃ પ્રસ્થાપ્યતે વદ મમાઽશુ કયૈવ બુદ્ધ્યા ॥ ૧૯.૮૫॥

ઇત્યુક્તવન્તમમુમાહ સુધીરબુદ્ધિઃ કુન્તી ન પુત્રક નિહન્તુમયં હિ શક્યઃ ।
સર્વૈઃ સુરૈરસુરયોગિભિરપ્યનેન ચૂર્ણીકૃતો હિ શતશ◌ૃઙ્ગગિરિઃ પ્રસૂત્યામ્ ॥ ૧૯.૮૬॥

એષ સ્વયં હિ મરુદેવ નરાત્મકોઽભૂત્કો નામ હન્તુમિમમાપ્તબલો જગત્સુ ।
ઇત્યેવમસ્ત્વિતિ સ તામવદત્પરેદ્યુર્ભીમો જગામ શકટેન કૃતોરુભોગઃ ॥ ૧૯.૮૭॥

ગત્વા ત્વરન્ બકવનસ્ય સકાશ આશુ ભીમઃ સ પાયસસુભક્ષ્યપયોઘટાદ્યૈઃ ।
યુક્તં ચ શૈલનિભમુત્તમમાદ્યરાશિં સ્પર્શાત્પુરૈવ નરભક્ષિતુરત્તુમૈચ્છત્ ॥ ૧૯.૮૮॥

તેનૈવ ચાન્નસમિતૌ પરિભુજ્યમાન ઉત્પાટ્ય વૃક્ષમમુમાદ્રવદાશુ રક્ષઃ ।
વામેન મારુતિરપોહ્ય તદા પ્રહારાન્ હસ્તેન ભોજ્યમખિલં સહભક્ષ્યમાદત્ ॥ ૧૯.૮૯॥

પીત્વા પયો ત્વરિત એનમવીક્ષમાણ આચમ્ય તેન યુયુધે ગુરુવૃક્ષશૈલૈઃ ।
તેનાઽહતોઽથ બહુભિર્ગિરિભિર્બલેન જગ્રાહ ચૈનમથ ભૂમિતલ્. એ પિપેષ ॥ ૧૯.૯૦॥

આક્રમ્ય પાદમપિ પાદતલ્। એન તસ્ય દોર્ભ્યાં પ્રગૃહ્ય ચ પરં વિદદાર ભીમઃ ।
મૃત્વા સ ચોરુ તમ એવ જગામ પાપો વિષ્ણુદ્વિડેવ હિ શનૈરનિવૃત્તિ ચોગ્રમ્ ॥ ૧૯.૯૧॥

હત્વા તમક્ષતબલો જગદન્તકં સ યો રાક્ષસો ન વશ આસ જરાસુતસ્ય ।
ભૌમસ્ય પૂર્વમપિ નો ભરતસ્ય રાજ્ઞો ભીમો ન્યધાપયદમુષ્ય શરીરમગ્રે ॥ ૧૯.૯૨॥

દ્વાર્યેવ તત્પ્રતિનિધાય પુનઃ સ ભીમઃ સ્નાત્વા જગામ નિજસોદરપાર્શ્વમેવ ।
ચ્ક્ષિષવ્।શ્રુત્વાઽસ્ય કર્મ પરમં તુતુષુઃ સમેતા માત્રા ચ તે તદનુવવ્રુરતઃ પુરસ્થાઃ ॥ ૧૯.૯૩॥

દૃષ્ટ્વૈવ રાક્ષસશરીરમુરુ પ્રભીતા જ્ઞાત્વૈવ હેતુભિરથ ક્રમશો મૃતં ચ ।
વિપ્રસ્ય તસ્ય વચનાદપિ ભીમસેનભગ્નં નિશમ્ય પરમં તુતુષુશ્ચ તસ્મૈ ॥ ૧૯.૯૪॥

અન્નાત્મકં કરમમુષ્ય ચ સમ્પ્રચક્રુઃ સોઽપ્યેતમાશુ નરસિં હવપુર્ધરસ્ય ।
ચક્રે હરેસ્તદનુ સત્યવતીસુતસ્ય વિષ્ણોર્હિ વાક્પ્રચુદિતાઃ પ્રયયુસ્તતશ્ચ ॥ ૧૯.૯૫॥

ઉત્પત્તિપૂર્વકકથાં દ્રુપદાત્મજાયા વ્યાસો હ્યનૂચ્ય જગતાં ગુરુરીશ્વરેશઃ ।
યાતેત્યચોદયદથાપ્યપરે દ્વિજાગ્ર્યાસ્તાન્ બ્રાહ્મણા ઇતિ ભુજિર્ભવતીતિ ચોચુઃ ॥ ૧૯.૯૬॥

પૂર્વં હિ પાર્ષત ઇમાન્ જતુગેહદગ્ધાન્ શ્રુત્વાઽતિદુઃખિતમનાઃ પુનરેવ મન્ત્રઃ ।
યાજોપયાજમુખનિસ્સૃત એવમેષ નાસત્યતાર્હ ઇતિ જીવનમેષુ મેને ॥ ૧૯.૯૭॥

યત્રક્વચિત્પ્રતિવસન્તિ નિલીનરૂપાઃ પાર્થા ઇતિ સ્મ સ તુ ફલ્ગુનકારણેન ।
ચક્રે સ્વયમ્બરવિઘોષણમાશુ રાજસ્વન્યૈરધાર્યધનુરીશવરાચ્ચ ચક્રે ॥ ૧૯.૯૮॥

તત્કાલ એવ વસુદેવસુતોઽપિ કૃષ્ણઃ સમ્પૂર્ણનૈજપરિબોધત એવ સર્વમ્ ।
જાનન્નપિ સ્મ હલિના સહિતો જગામ પાર્થાન્નિશમ્ય ચ મૃતાનથ કુલ્યહેતોઃ ॥ ૧૯.૯૯॥

સ પ્રાપ્ય હસ્તિનપુરં ધૃતરાષ્ટ્રપુત્રાન્ સં વઞ્ચયં સ્તદનુસારિકથાશ્ચ કૃત્વા ।
ભીષ્માદિભિઃ પરિગતોઽપ્રિયવજ્જગામ દ્વારાવતીમુદિતપૂર્ણસુનિત્યસૌખ્યઃ ॥ ૧૯.૧૦૦॥

તસ્યાન્તરે હૃદિકસૂનુરનન્તરં સ્વં શ્વાફલ્કિબુદ્ધિબલમાશ્રિત ઇત્યુવાચ ।
સત્રાજિદેષ હિ પુરા પ્રતિજજ્ઞ એનામસ્મત્કૃતે સ્વતનયાં મણિના સહૈવ ॥ ૧૯.૧૦૧॥

સર્વાંશ્ચ નઃ પુનરસાવવમત્ય કૃષ્ણાયાદાત્સુતાં જહિ ચ તં નિશિ પાપબુદ્ધિમ્ ।
આદાય રત્નમુપયાહિ ચ નૌ વિરોધે કૃષ્ણસ્ય દાનપતિના સહ સાહ્યમેમિ ॥ ૧૯.૧૦૨॥

ઇત્યુક્ત આશુ કુમતિઃ સ હિ પૂર્વદેહે દૈત્યો યતસ્તદકરોદથ સત્યભામા ।
આનન્દસં વિદપિ લોકવિડમ્બનાય તદ્દેહમસ્ય તિલજે પતિમભ્યુપાગાત્ ॥ ૧૯.૧૦૩॥

શ્રુત્વા તદીયવચનં ભગવાન્ પુરીં સ્વામાયાત એવ તુ નિશમ્ય મહોત્સવં તમ્ ।
પાઞ્ચાલરાજપુરુષોદિતમાશુ વૃષ્ણિવર્યૈરગાન્મુસલિના સહ તત્પુરીં ચ ॥ ૧૯.૧૦૪॥

અક્ષ્ક્ષ્વ્।ભીમોઽપિ રુદ્રવરરક્ષિતરાક્ષસં તં હત્વા તૃણોપમતયા હરિભક્તવન્દ્યઃ ।
ઉષ્યાથ તત્ર કતિચિદ્દિનમચ્યુતસ્ય વ્યાસાત્મનો વચનતઃ પ્રયયૌ નિજૈશ્ચ ॥ ૧૯.૧૦૫॥

મઙ્ગલ્યમેતદતુલં પ્રતિયાત શીઘ્રં પાઞ્ચાલકાન્ પરમભોજનમત્ર સિદ્ધ્યેત્ ।
વિપ્રૈરિતસ્તત ઇતીરિતવાક્યમેતે શ◌ૃણ્વન્ત એવ પરિચક્રમુરુત્તરાશામ્ ॥ ૧૯.૧૦૬॥

ષણ્ણાં ચ મધ્યગમુદીર્ણભુજં વિશાલવક્ષસ્થલં બહલ્। અપૌરુષલક્ષણં ચ ।
દૃષ્ટ્વૈવ મારુતિમસાવુપલપ્સ્યતીહ કૃષ્ણામિતિ સ્મ ચ વચઃ પ્રવદન્તિ વિપ્રાઃ ॥ ૧૯.૧૦૭॥

રાત્રૌ દિવા ચ સતતં પથિ ગચ્છમાનાઃ પ્રાપુઃ કદાચિદથ વિષ્ણુપદીં નિશાયામ્ ।
સર્વસ્ય રક્ષિતુમગાદિહ પૃષ્ઠતસ્તુ ભીમોઽગ્ર એવ શતમન્યુસુતોઽન્તરાઽન્યે ॥ ૧૯.૧૦૮॥

પ્રાપ્તે તદોલ્મુકધરેઽર્જુન એવ ગઙ્ગાં ગન્ધર્વરાજ ઇહ ચિત્રરથોઽર્દ્ધરાત્રે ।
દૃષ્ટ્વૈવ વિપ્રરહિતાનુદકાન્તરસ્થઃ ક્ષત્રાત્મજા ઇતિ હ ધર્ષયિતું સ ચાઽગાત્ ॥ ૧૯.૧૦૯॥

હન્તાઽસ્મિ વો હ્યુપગતાનુદકાન્તમસ્યા નદ્યાશ્ચ મર્ત્યચરણાય નિષિદ્ધકાલે ।
ઇત્થં વદન્તમમુમાહ સુરેન્દ્રસૂનુર્ગન્ધર્વ નાસ્ત્રવિદુષાં ભયમસ્તિ તેઽદ્ય ॥ ૧૯.૧૧૦॥

સર્વં હિ ફેનવદિદં બહુલં બલં તે નાર્થપ્રદં ભવતિ ચાસ્ત્રવિદિ પ્રયુક્તમ્ ।
ઇત્યુક્તવન્તમમુમુત્તમયાનસં સ્થો બાણાન્ ક્ષિપન્નભિસસાર સુરેશભૃત્યઃ ॥ ૧૯.૧૧૧॥

આગ્નેયમસ્ત્રમભિમન્ત્ર્ય તદોલ્મુકે સ ચિક્ષેપ શક્રતનયોઽસ્ય રથશ્ચ દગ્ધઃ ।
તં ચાગ્નિના પરિગૃહીતમભિપ્રગૃહ્ય કેશેષુ સઞ્ચકર્ષાઽશુ સુરેન્દ્રસૂનુઃ ॥ ૧૯.૧૧૨॥

પાર્થેન સન્ધર્ષિતઃ શરણં જગામ ધર્માત્મજં તમપિ સોઽથ નિજાસ્ત્રમુગ્રમ્ ।

સઞ્જહ્રુ એવ તત આસ ચ નામતોઽસાવઙ્ગારવર્ણ ઇતિ વર્ણવિપર્યયેણ ॥ ૧૯.૧૧૩ ॥

ગન્ધર્વ ઉલ્બણસુરક્તતનુઃ સ ભૂત્વા સ્વર્ણાવદાત ઉત પૂર્વમુપેત્ય સખ્યમ્ ।
પાર્થેન દુર્લભમહાસ્ત્રમિદં યયાચે જાનન્નપિ સ્મ નહિ તાદૃશમેષ વેદ ॥ ૧૯.૧૧૪ ॥

વિદ્યા સુશિક્ષિતતમા હિ સુરેશસૂનૌ તામસ્ય ચાવદદસાવપિ કાલતોઽસ્મૈ ।
ગન્ધર્વગામવદદન્વગદૃશ્યવિદ્યાં પશ્ચાદિતિ સ્મ પુરુહૂતસુતસ્ય વાક્યાત્ ॥ ૧૯.૧૧૫ ॥

આધિક્યતઃ સ્વગતસં વિદ એવ સામ્યે નૈવેચ્છતિ સ્મ નિમયં સ ધનઞ્જયોઽત્ર ।
ધર્માર્થમેવ સ તુ તાં પરિદાય તસ્મૈ કાલેન સં વિદમમુષ્ય ચ ધર્મતોઽયાત્ ॥ ૧૯.૧૧૬ ॥

અિક્ષક્ષ્વ।પાર્થેન સોઽપિ બહુલાશ્ચ કથાઃ કથિત્વા ધૌમ્યસ્ય સઙ્ગ્રહણમાહ પુરોહિતત્વે ।
દાસ્યામિ દિવ્યતુરગાનિતિ સોઽર્જુનાય વાચં નિગદ્ય દિવમારુહદપ્યગુસ્તે ॥ ૧૯.૧૧૭ ॥

તે ધૌમ્યમાપ્ય ચ પુરોધસમુત્તમજ્ઞં વિપ્રાત્મજોપમતયા વિવિશુઃ પુરં ચ ।
પાઞ્ચાલકસ્ય નિખિલાં દદૃશુશ્ચ તત્ર મૂર્ધાવસિક્તસમિતિં સમલઙ્કૃતાં ચ ॥ ૧૯.૧૧૮ ॥

રાજન્યમણ્ડલમુદીક્ષ્ય સુપૂર્ણમત્ર કૃષ્ણાં પ્રગૃહ્ય સહજઃ પ્રગૃહીતમાલામ્ ।
તેષાં ચ મધ્યમગમત્તુલવીર્યસમ્પદ્યુક્તાં વિભૂતિમથ ચાઽહ સમસ્તરાજ્ઞામ્ ॥ ૧૯.૧૧૯ ॥

તાંશ્ચ પ્રદર્શ્ય સકલાન્ સ હુતાશનાં શશ્ચાપં ચ તત્પ્રતિનિધાય સપઞ્ચબાણમ્ ।
આહાભિભાષ્ય સકલાન્નૃપતીનથોચ્ચૈર્દીપ્યદ્ધુતાશનવપુર્ઘનતુલ્યઘોષઃ ॥ ૧૯.૧૨૦ ॥

એતેન કાર્મુકવરેણ તરૂપરિસ્થં મત્સ્યાવભાસમુદકે પ્રતિવીક્ષ્ય યેન ।
એતૈઃ શરૈઃ પ્રતિહતો ભવતીહ મત્સ્યઃ કૃષ્ણાઽનુયાસ્યતિ તમદ્ય નરેન્દ્રવીરાઃ ॥ ૧૯.૧૨૧ ॥

ઇત્યસ્ય વાક્યમનુ સર્વનરેન્દ્રપુત્રા ઉત્તસ્થુરુદ્ધતમદાશ્ચલકુણ્ડલાસ્યાઃ ।
અસ્ત્રં બલં ચ બહુ નૈજમભીક્ષમાણાઃ સ્પર્ધન્ત એવ ચ મિથઃ સમલઙ્કૃતાઙ્ગાઃ ॥ ૧૯.૧૨૨ ॥

કેચિન્નિરીક્ષ્ય ધનુરેત્ય ન મે સુશક્યમિત્યેવ ચાપયયુરન્ય ઉત પ્રચાલ્ય ।
તત્રાઽસસાદ શિશુપાલ ઉરુપ્રતાપઃ સઙ્ગૃહ્ય તત્સમનુરોપણયત્ન આસીત્ ॥ ૧૯.૧૨૩ ॥

માષાન્તરાય સ ચકર્ષ યદૈવ કોટ્યા ઉન્નમ્ય તત્પ્રતિજઘાન તમેવ ચાઽશુ ।
અન્યત્ર ફલ્ગુનત એતદશક્યમેવેત્યઞ્જો ગિરીશવરતઃ સ યયૌ ચ ભગ્નઃ ॥ ૧૯.૧૨૪ ॥

મદ્રેશ એત્ય ચકૃષે સ્થવિરોઽપિ વીર્યાચ્ચેદીશતોઽપ્યધિકમેવ સ મુદ્ગમાત્રે ।
શિષ્ટેઽમુના પ્રતિહતઃ સ યયાવશક્યં મત્વાઽત્મનસ્તદનુ ભૂપતયો વિષણ્ણાઃ ॥ ૧૯.૧૨૫ ॥

સન્નેષુ ભૂપતિષુ માગધ આસસાદ સોઽવજ્ઞયૈવ બલવીર્યમદેન દૃપ્તઃ ।
ચાપં ચકર્ષ ચલપાદતલ્. ઓ બલેન શિષ્ટે સ સર્ષપમિતેઽભિહતોઽમુનૈવ ॥ ૧૯.૧૨૬ ॥

જાનુન્યમુષ્ય ધરણીં યયતુસ્તદૈવ દર્પેણ ચાસ્થિરપદઃ સ્થિતિમાત્રહેતોઃ ।
રૌદ્રાદ્ધરાત્સ જલ્. અતાં ગમિતોઽથ રાજા રાજ્ઞાં મુખાન્યનભિવીક્ષ્ય યયૌ સ્વરાષ્ટ્રમ્ ॥ ૧૯.૧૨૭॥

પ્રાયો ગતાસ્તમનુ ભૂપતયોઽથ કર્ણો દુર્યોધનાર્થમનુગૃહ્ય ધનુશ્ચકર્ષ ।
અક્ષ્ક્ષ્વી। રામાદુપાત્તશુભશિક્ષિતમાત્રતોઽસૌ રોમાવશિષ્ટમકરોદ્ધનુષોઽન્તમાશુ ॥ ૧૯.૧૨૮॥

તસ્મિંશ્ચ તેન વિહતે પ્રતિસન્નિવૃત્તે ભીમાર્જુનૌ દ્વિજસદસ્યુપસન્નિવિષ્ટૌ ।
ઉત્તસ્થતૂ રવિશશિપ્રતિમાનરૂપૌ વિપ્રેષુ તત્ર ચ ભિયા વિનિવારયત્સુ ॥ ૧૯.૧૨૯॥

વિપ્રાશ્ચ કેચિદતિયુક્તમિમૌ હિ વીરૌ દેવોપમાવિતિ વચો જગદુસ્તતસ્તૌ ।
દૃષ્ટ્વૈવ કૃષ્ણમુખપઙ્કજમાશુ ચાપસાન્નિધ્યમાયયતુરુત્તમવીર્યસારૌ ॥ ૧૯.૧૩૦॥

તત્રાર્જુનઃ પવનજાત્પ્રિયતોઽપ્યનુજ્ઞામાદાય કેશવમજં મનસા પ્રણમ્ય ।
કૃત્વા ગુણાન્વિતમદો ધનુરશ્રમેણ યન્ત્રાન્તરેણ સશરૈરધુનોચ્ચ લક્ષમ્ ॥ ૧૯.૧૩૧॥

કૃષ્ણા તદાઽસ્ય વિદધે નવકઞ્જમાલાં મધ્યે ચ તાં પ્રતિવિધાય નરેન્દ્રપુત્રૌ ।
ભીમાર્જુનૌ યયતુરચ્યુતમાભિનમ્ય ક્ષુબ્ધં તદા નૃપવરાબ્ધિરિમાવધાવત્ ॥ ૧૯.૧૩૨॥

દ્રષ્ટું હિ કેવલગતિર્નતુ કન્યકાયા અર્થે ન ચાપમિહ વૃષ્ણિવરાઃ સ્પૃશન્તુ ।
ઇત્યાજ્ઞયૈવ વરચક્રધરસ્ય લિપ્સામપ્યત્ર ચક્રુરિહ નૈવ યદુપ્રવીરાઃ ॥ ૧૯.૧૩૩॥

ભીમસ્તુ રાજસમિતિં પ્રતિસમ્પ્રયાતાં દૃષ્ટ્વૈવ યોજનદશોચ્છ્રયમાશુ વૃક્ષમ્ ।
આરુજ્ય સર્વનૃપતીનભિતોઽપ્યતિષ્ઠદ્દૃષ્ટ્વા પલાયનપરાશ્ચ બભૂવુરેતે ॥ ૧૯.૧૩૪॥

ભીમોઽયમેષ પુરુહૂતસુતોઽન્ય એતે પાર્થા ઇતિ સ્મ હલિને હરિરભ્યવોચત્ ।
દૃષ્ટ્વૈવ સોઽપિ મુદમાપ શિનેશ્ચ પૌત્રઃ ખડ્ગં પ્રગૃહ્ય હર્ષાત્પરિપુપ્લુવેઽત્ર ॥ ૧૯.૧૩૫॥

પ્રીતેષુ સર્વયદુષુ પ્રપલાયિતેષુ દુર્યોધનાદિનૃપતિષ્વખિલેષુ ભીમાત્ ।
કર્ણોઽભ્યયાદ્ધરિહયાત્મજમાશુ મદ્રરાજો જગામ પવનાત્મજમેવ વીરઃ ॥ ૧૯.૧૩૬॥

વિપ્રેષુ દણ્ડપટદર્ભમહાજિનાનિ કોપાત્ક્ષિપત્સુ ન વિનાશનમત્ર ભૂયાત્ ।
ક્ષત્રસ્ય વૈરત ઇતિ દ્રુપદે ચ કૃષ્ણં વિપ્રાંશ્ચ યાચતિ સ મારુતિરાર શલ્યમ્ ॥ ૧૯.૧૩૭॥

વૃક્ષં ત્વસૌ પ્રતિનિધાય ચ મદ્રરાજં દોર્ભ્યાં પ્રગૃહ્ય જવતો ગગને નિધાય ।
બન્ધુત્વતો ભુવિ શનૈરદધાત્સ તસ્ય વિજ્ઞાય વીર્યમગમન્નિજરાજધાનીમ્ ॥ ૧૯.૧૩૮॥

પાર્થોઽપિ તેન ધનુષા યુયુધે સ્મ કર્ણં સોઽપ્યસ્ત્રબાહુબલમાવિરમુત્ર ચક્રે ।
તૌ ધન્વિનામનુપમૌ ચિરમસ્યતાં ચ સૂર્યાત્મજોઽત્ર વચનં વ્યથિતો બભાષે ॥ ૧૯.૧૩૯॥

અક્ષ્ક્ષ્વીઇ। ત્વં ફલ્ગુનો હરિહયો દ્વિજસત્તપો વા મૂર્તં ન મે પ્રમુખતઃ સ્થિતિમન્ય ઈષ્ટે ।
યો વાઽસ્મિ કોઽપિ યદિ તે ક્ષમમદ્ય બાણાન્મુઞ્ચાન્યથેહિ રણતસ્ત્વિતિ પાર્થ આહ ॥ ૧૯.૧૪૦॥

કાર્યં ન મે દ્વિજવરૈઃ પ્રતિયોધનેનેત્યુક્ત્વા યયૌ રવિસુતઃ સ સુયોધનાદ્યૈઃ ।
નાગાહ્વયં પુરમથ દ્રુપદાત્મજાં તામાદાય ચાર્જુનયુતઃ પ્રયયૌ સ ભીમઃ ॥ ૧૯.૧૪૧॥

અગ્રેઽશ્વિપુત્રસહિતઃ સ તુ ધર્મસૂનુઃ પ્રાયાત્કુલાલગૃહમન્વપિ ભીમપાર્થૌ ।
ભિક્ષેતિ તૈરભિહિતે પ્રજગાદ કુન્તી ભુઙ્ગ્ધ્વં સમસ્તશ ઇતિ પ્રદદર્શ કન્યામ્ ॥ ૧૯.૧૪૨॥

પ્રામાદિકં ચ વચનં ન મૃષા તયોક્તં પ્રાયો હિ તેન કથમેતદિતિ સ્મ ચિન્તા ।
તેષાં બભૂવ વસુદેવસુતો હરિશ્ચ તત્રાઽજગામ પરમેણ હિ સૌહૃદેન ॥ ૧૯.૧૪૩॥

સમ્ભાષ્ય તૈઃ સ ભગવાનમિતાત્મશક્તિઃ પ્રાયાન્નિજં પુરમમા યદુભિઃ સમસ્તૈઃ ।
જ્ઞાતું ચ તાન્નિશિ સ તુ દ્રુપદઃ સ્વપુત્રં પ્રાસ્થાપયત્સ ચ વિલીનમિમાનપશ્યત્ ॥ ૧૯.૧૪૪॥

ભિક્ષાન્નભોજિન ઉતો ભગિનીં નિજાં ચ તત્રાતિતૃપ્તહૃદયામથ યુદ્ધવાર્તામ્ ।
તેષાં નિશમ્ય નદતાં ધનવદ્ગભીરાં ક્ષત્રોત્તમા ઇતિ મતિં સ ચકાર વીરઃ ॥ ૧૯.૧૪૫॥

પ્રાતસ્તુ તસ્ય જનિતુર્વચસા પુરોધાસ્તાન્ પ્રાપ્ય મન્ત્રવિધિના મરુદાત્મજેન ।
સમ્પૂજિતોઽતિવિદુષા પ્રતિગૃહ્ય તાંશ્ચ પ્રાવેશયન્નૃપતિગેહમમૈવ માત્રા ॥ ૧૯.૧૪૬॥

તાનાગતાન્ સમભિપૂજ્ય નિજાત્મજાં ચ વિપ્રાદિયોગ્યપૃથગુક્તપદાર્થજાતૈઃ ।
પૂર્ણાન્ ગૃહાંશ્ચતુર એવ દિદેશ રાજા તત્રાઽયુધાદિપરિપૂર્ણગૃહં ચ તેઽગુઃ ॥ ૧૯.૧૪૭॥

ચેષ્ટાસ્વરાકૃતિવિવક્ષિતવીર્યશૌર્યપ્રાગલ્ભ્યપૂર્વકગુણૈઃ ક્ષિતિભર્તૃપુત્રાન્ ।
વિજ્ઞાય તાન્ દ્રુપદ એત્ય ચ ધર્મસૂનું પપ્રચ્છ કોઽસિ નરવર્ય વદસ્વ સત્યમ્ ॥ ૧૯.૧૪૮॥

સ પ્રાહ મન્દહસિતઃ કિમિહાદ્ય રાજન્ પૂર્વં હિ વર્ણવિષયે ન વિશેષ ઉક્તઃ ।
પુત્રીકૃતે તવ સુતેન તુ લક્ષવેધ ઉક્તો નરેન્દ્રસમિતૌ સ કૃતોઽપ્યનેન ॥ ૧૯.૧૪૯॥

એવં બ્રુવાણમથ તં પૃથયા સહૈવ રાજા વદેતિ પુનરેવ યયાચ એષઃ ।
સર્વં પૃથાઽપ્યવદતાં સ ચ તેન તુષ્ટો વાચં જગાદ કૃતકૃત્ય ઇહાઽસમદ્ય ॥ ૧૯.૧૫૦॥

પાર્થાર્થમેવ હિ મયૈષ કૃતઃ પ્રયત્નસ્ત્વં ફલ્ગુનોઽન્ય ઉતવાઽદ્ય કરં સુતાયાઃ ।
ગૃહ્ણાત્વિતીરિત ઇમં સ તુ ધર્મસૂનુરાહ સ્મ સર્વ ઇતિ મે મનસિ પ્રરૂઢમ્ ॥ ૧૯.૧૫૧॥

ચ્ક્ષ્ક્ષક્ષ્ંઆત્ર પ્રમા મમ હૃદિ પ્રતિભાત્યથાપિ ધર્માચલા મમ મતિર્હિ તદેવ માનમ્ ।
ઇત્યુક્તવત્યપિ સહૈવ સુતેન રાજા નૈવૈચ્છદત્ર ભગવાનગમચ્ચ કૃષ્ણઃ ॥ ૧૯.૧૫૨॥

વ્યાસં તમીક્ષ્ય ભગવન્તમગણ્યપૂર્ણનિત્યાવ્યયાત્મગુણમાશુ સમસ્ત એવ ।
નત્વાઽભિપૂજ્ય વરપીઠગતસ્ય ચાઽજ્ઞામાદાય ચોપવિવિશુઃ સહિતાસ્તદન્તે ॥ ૧૯.૧૫૩॥

કૃષ્ણસ્તદાઽહ નૃપતિં પ્રતિ દેહિ કન્યાં સર્વેભ્ય એવ વૃષવાયુપુરન્દરા હિ ।

નાસત્યદસ્રસહિતા ઇમ એવ ઇન્દ્રાઃ પૂર્વે ચ સમ્પ્રતિતનશ્ચ હરેર્હિ પશ્ચાત્ ॥ ૧૯.૧૫૪॥

એષાં શ્રિયશ્ચ નિખિલા અપિચૈકદેહાઃ પુત્રી તવૈવ ન તતોઽત્ર વિરુદ્ધતા હિ ।
ઇત્યુક્તવત્યપિ યદા દ્રુપદશ્ચકાર સં વાદિનીં ન ધિયમેનમથાઽહ કૃષ્ણઃ ॥ ૧૯.૧૫૫॥

દિવ્યં હિ દર્શનમિદં તવ દત્તમથ પશ્યાઽશુ પાણ્ડુતનયાન્ દિવિ સં સ્થિતાં સ્ત્વમ્ ।
એતાં ચ તે દુહિતરં સહ તૈઃ પૃથક્સ્થાં તલ્લક્ષણૈઃ સહ તતઃ કુરુ તે યથેષ્ટમ્ ॥ ૧૯.૧૫૬॥

ઇત્યુક્તવાક્યમનુ તાન્ સ દદર્શ રાજા કૃષ્ણપ્રસાદબલતો દિવિ તાદૃશાંશ્ચ ।
એતાન્નિશામ્ય ચરણૌ જગદીશિતુશ્ચ ભીતો જગામ શરણં તદનાદરેણ ॥ ૧૯.૧૫૭॥

દત્વાઽભયં સ ભગવાન્ દ્રુપદસ્ય કાર્યે તેનોમિતિ સ્મ કથિતે સ્વયમેવ સર્વામ્ ।
વૈવાહિકીં કૃતિમથ વ્યદધાચ્ચ ધૌમ્યયુક્તઃ ક્રમેણ જગૃહુર્નિખિલાશ્ચ પાણિમ્ ॥ ૧૯.૧૫૮॥

પાઞ્ચાલકેષુ ચ મહોત્સવ આસ રાજા તુષ્ટોઽભવત્સહ સુતૈઃ સ્વજનૈશ્ચ સર્વૈઃ ।
પૌરૈશ્ચ જાનપદિકૈશ્ચ યથૈવ રામે દત્વા સુતાં જનક આપ મુદં તતોઽનુ ॥ ૧૯.૧૫૯॥

ઉદ્વાહ્ય તત્ર નિવસત્સુ ચ પાણ્ડવેષુ શ્રુત્વૈવ રામસહિતઃ સહ યાદવૈશ્ચ ।
આદાય પારિબર્હં બહુલં સ કૃષ્ણ આયાન્મુદૈવ પૃથયા સહિતાંશ્ચ પાર્થાન્ ॥ ૧૯.૧૬૦॥

દૃષ્ટ્વૈવ તં મુમુદુરાશુ કુરુપ્રવીરા આશ્લિષ્ય કૃષ્ણમથ નેમુરસૌ ચ કૃષ્ણામ્ ।
દૃષ્ટ્વા પ્રદાય ગૃહયોગ્યસમસ્તભાણ્ડં સૌવર્ણમેભ્ય ઉરુ ભૂષણમચ્યુતોઽદાત્ ॥ ૧૯.૧૬૧॥

દેવાઙ્ગયોગ્યશુભકુણ્ડલહારમૌલિકેયૂરવસ્ત્રસહિતાન્યુરુભૂષણાનિ ।
ષણ્ણાં પૃથક્પૃથગદાત્પૃથગેવ યોગ્યાન્યન્યદ્દદાવથ પિતૃષ્વસુરાત્મયોગ્યમ્ ॥ ૧૯.૧૬૨॥

રત્નાનિ ગા ગજતુરઙ્ગરથાન્ સુવર્ણભારાન્ બહૂનપિ દદાવથ ચાઽશિષોઽગ્ર્યાઃ ।
અ્ક્ક્ક્ક્।વ્યાસોઽપ્યદાદિહ પરત્ર ચ પાર્ષતોઽપિ ભૂષારથાશ્વગજરત્નસુકાઞ્ચનાનિ ॥ ૧૯.૧૬૩॥

દાસીશ્ચ દાસસહિતાઃ શુભરૂપવેષાઃ સહસ્રશો દદતુરત્ર હરિર્નૃપશ્ચ ।
તાસાં વિચિત્રવસનાન્યુરુરત્નમાલાઃ પ્રત્યેકશો દદતુરપ્યુરુભૂષણાનામ્ ॥ ૧૯.૧૬૪॥

માસાન્ બહૂનપિ વિહૃત્ય સહૈવ પાર્થૈઃ કૃષ્ણો યયૌ યદુપુરીં સહિતોઽગ્રજેન ।
અન્તર્હિતે ભગવતિ પ્રતતોરુશક્તૌ વ્યાસે ચ વત્સરમિહોષુરિમે તુ પાર્થાઃ ॥ ૧૯.૧૬૫॥

વૈચિત્રવીર્યતનયાઃ સહ સૌબલેન કર્ણેન સિન્ધુપતિના રથહસ્તિયૌધૈઃ ।
ભૂરિશ્રવઃ પ્રભૃતિભિશ્ચ સહૈવ હન્તું પાઞ્ચાલરાજમગુરેત્ય પુરીં પુનસ્તે ॥ ૧૯.૧૬૬॥

તૈરર્દિતે સ્વપુર આશુ સ સોમકાનાં રાજા સુતૈઃ સહ સસૈનિક ઉદ્ગતોઽભૂત્ ।
તેષાં ચ તસ્ય ચ બભૂવ મહાન્ વિમર્દઃ પુત્રૌ ચ તસ્ય નિહતૌ વિધુતાશ્ચ સેનાઃ ॥ ૧૯.૧૬૭॥

ચિત્રે હતે સમર આશુ સચિત્રકેતૌ ધાવત્સુ સૈનિકવરેષુ ચ પાર્ષતસ્ય ।
પાર્થા રથૈરભિયયુર્ધૃતચાપબાણા વૈચિત્રવીર્યતનયાન્ રવિસૂનુયુક્તાન્ ॥ ૧૯.૧૬૮॥

તૈસ્તેષુ પઞ્ચસુ સમં પ્રતિયોધયત્સુ ભૂરિશ્રવાઃ સરવિજો વિરથં ચકાર ।
શક્રાત્મજં તદનુ પર્વતસન્નિકાશં દોર્ભ્યાં તુ મારુતિરુરું તરુમુદ્બબર્હ ॥ ૧૯.૧૬૯॥

આયાન્તમીક્ષ્ય તરુહસ્તમિમં સમીરસૂનું સુયોધનમુખા નિખિલાઃ સકર્ણાઃ ।
ભૂરિશ્રવાઃ શકુનિભૂરિજયદ્રથાશ્ચ સર્વેઽપિ દુદ્રુવુરથો વિવિશુઃ પુરં સ્વમ્ ॥ ૧૯.૧૭૦॥

જ્ઞાત્વા સમસ્તમપિ તદ્વિદુરોઽગ્રજં સ્વં વર્દ્ધન્ત એવ તનયા ભવતો નરેન્દ્ર ।
ઇત્યાહ સોઽપિ મુદિતઃ સ્વસુતેન કૃષ્ણા પ્રાપ્તેતિ ભૂષણવરાણ્યદિશચ્ચ વાસઃ ॥ ૧૯.૧૭૧॥

પાર્થા ઇતિ સ્મ વિદુરોઽવદદાશુ સોઽપિ સ્વાકારગૂહનપરો યદિ તર્હ્યતીવ ।
ભદ્રં મૃતા નહિ પૃથાસહિતાઃ સ્મ પાર્થાસ્તેષાં પ્રવૃત્તિમપિ મે વદ સર્વશસ્ત્વમ્ ॥ ૧૯.૧૭૨॥

ઇત્યુક્ત આહ વિદુરઃ સ હિડિમ્બવધ્યાપૂર્વાં પ્રવૃત્તિમખિલામપિ લક્ષવેધમ્ ।
ઉદ્વાહમપ્યથ નદીજમુખાશ્ચ સર્વે તુષ્ટા બભૂવુરપિ વત્સરમૂષુરેવમ્ ॥ ૧૯.૧૭૩॥

શ્રુત્વાઽથ કૃષ્ણમુપયાતમુરુ પ્રદાય રત્નં ચ પાણ્ડુતનયેષુ ગતં પુનશ્ચ ।
તાતપ્યમાનહૃદયાસ્તુ સુયોધનાદ્યા મન્ત્રં પ્રચક્રુરથ કર્ણમુખા યયુશ્ચ ॥ ૧૯.૧૭૪॥

ઋક્ષક્ષક્ષ।યુદ્ધાય તેષુ પુનરેવ રથૈઃ પ્રયાતેષ્વાહાગ્રજં સ વિદુરોઽપિ નદીજમુખ્યાન્ ।
એતે હિ પાપતમચેતસ એત્ય પાર્થાન્ યુદ્ધાય મૃત્યુમુપયાન્તિ ન સં શયોઽત્ર ॥ ૧૯.૧૭૫॥

ભીમાર્જુનૌ વિષહિતું નહિ કશ્ચનાસ્તિ સામર્થ્યયુક્સુરવરેષ્વપિ વર્દ્ધિતાસ્તે ।
જ્ઞાત્વૈવ વત્સરત એવ મહાનધર્મસ્તેષામુપેક્ષણકૃતસ્તદલં નિયુઙ્ક્ષ્વ ॥ ૧૯.૧૭૬॥

આનીતયે ચ વિનિયુજ્ય સુસાન્ત્વપૂર્વમાનીય યોજય નૃપૈષુ તથાઽર્દ્ધરાજ્યમ્ ।
એવં કૃતં તવ ભવેત્કુલવૃદ્ધયે હિ ધર્માય ચોભયવિનાશકરોઽન્યથા સ્યાઃ ॥ ૧૯.૧૭૭॥

ઇત્યુક્તવત્યનુ તથેત્યવદન્નદીજો દ્રોણઃ કૃપશ્ચ વિદુરં સ નૃપોઽપ્યુવાચ ।
યાહ્યાનયેતિ સ ચ વેગવતા રથેન તત્રાગમત્તદનુ તૈરભિપૂજિતશ્ચ ॥ ૧૯.૧૭૮॥

તત્કાલ એવ વસુદેવસુતશ્ચ કૃષ્ણો વ્યાસશ્ચ તાનુપસમેત્ય દુરન્તશક્તી ।
આદાય કુન્તિસહિતાન્ વિદુરેણ યુક્તૌ નાગાહ્વયં પુરમિતાં સહ ભાર્યયૈવ ॥ ૧૯.૧૭૯॥

તેષ્વાગતેષુ સુમહાનભવત્પ્રહર્ષઃ પૌરસ્ય જાનપદિકસ્ય જનસ્ય ચોચ્ચૈઃ ।
ભીષ્માદિકાશ્ચ મુદિતાઃ પ્રતિપૂજ્ય ગેહમાવેશયન્ સહ નૃપેણ મહોત્સવેન ॥ ૧૯.૧૮૦॥

કૃષ્ણામપૂજયદતીવ ચ સૌબલી સા દુર્યોધનસ્ય દયિતાસહિતાઽત્ર તેઽપિ ।
ઊષુસ્તતશ્ચ નિજપુત્રકદુર્વિનીત્યા કૃષ્ણાનિમિત્તમુરુભીતિતિ આહ ભીમાત્ ॥ ૧૯.૧૮૧॥

કુન્તિ પ્રયાહિ સહિતા સ્નુષયા ગૃહં સ્વં ભીમાદ્ધિભેમિ નિજપુત્રકદુર્વિનીત્યા ।
કૃષ્ણા ત્રિલોકવનિતાધિકરૂપસારા યસ્માદિતિ સ્મ સસુતા પ્રયયૌ ગૃહં સા ॥ ૧૯.૧૮૨॥

ઊષુસ્તથૈવ પરિવત્સરપઞ્ચકં તે પાણ્ડોર્ગૃહે સુસુખિનોઽખિલભોગયુક્તાઃ ।
કૃષ્ણા ચ તેષુ પૃથગેવ ચતુઃ સ્વરૂપા રેમે તથૈકતનુરપ્યભિમાનિભેદાત્ ॥ ૧૯.૧૮૩॥

કન્યૈવ સાઽભવદતઃ પ્રતિવાસરં ચ જન્માભવદ્ધ્યભિમતેઃ પૃથગેવ નાશાત્ ।
પ્રાયો હિ નાભિમતિનાશમવાપ વાણી તસ્માન્મરુચ્ચ સકલેષ્વભિવિષ્ટ આસીત્ ॥ ૧૯.૧૮૪॥

ધર્માત્મજાદિષુ મરુત્પ્રતિવિષ્ટ એષાં બુદ્ધિં વિમોહ્ય રમતે સતતં તયા યત્ ।
શુદ્ધૈવ સા હિ તત એવ દિનેદિને ચ સમ્મોહતો મરણવદ્ભવતીહ કન્યા ॥ ૧૯.૧૮૫॥

નો સુપ્તિવત્ત્વિદમતોઽન્યવશત્વતો હિ દેહસ્ય સં સ્મૃતિત એવ હરેર્ન મોહઃ ।
નાઽવેશવચ્ચ તત એવ મૃતેઃ સ્વરૂપમેતત્ત્વતઃ પ્રતિદિનં જનનાદ્ધિ કન્યા ॥ ૧૯.૧૮૬॥

ઋક્ષક્ષક્ષી।એવં સ વાયુરનુવિષ્ટયુધિષ્ઠિરાદિભીમાત્મનૈવ રમતે સતતં તયૈકઃ ।
અન્યાદૃશા હિ સુરભુક્તિરતોઽન્યરૂપા માનુષ્યભુક્તિરિતિ નાત્ર વિચાર્યમસ્તિ ॥ ૧૯.૧૮૭॥

વાસિષ્ઠયાદવવૃષાવપિ કેશવૌ તૌ તત્રોષતુઃ પરમસૌહૃદતો હિ તેષુ ।
તાભ્યામનન્તગુણપૂર્ણસુખાત્મકાભ્યાં પાર્થાશ્ચ તે મુમુદિરે યુતસત્કથાભિઃ ॥ ૧૯.૧૮૮॥

પૂર્વં હિ તેષુ વનગેષુ બભૂવ કાશિરાજઃ સુતાકૃત ઉરુક્ષિતિપાલયોગઃ ।
તત્ર સ્વયમ્બરગતાં ધૃતરાષ્ટ્રપુત્રઃ કન્યાં બલાજ્જગૃહ આત્મબલાતિદૃપ્તઃ ॥ ૧૯.૧૮૯॥

પૂર્વં હિ રાજગણને મગધાધિરાજઃ સઙ્ખ્યાત ઇત્યતિરુષા પ્રગૃહીતકન્યે ।
દુર્યોધને નૃપતયો યુયુધુઃ સ્મ તેન ભગ્નાશ્ચ કર્ણસહિતેન સહાનુજેન ॥ ૧૯.૧૯૦॥

ભગ્નેષુ તેષુ પુનરાત્તશરાસનેષુ કર્ણો જગાદ ધૃતરાષ્ટ્રસુતં પ્રયાહિ ।
યુક્તઃ સહોદરજનૈર્ગુરુભીષ્મમુખ્યયુક્તસ્ય તે ન પુરમેત્ય હિ ધર્ષણેશાઃ ॥ ૧૯.૧૯૧॥

એકાન્તતો જયમવીક્ષ્ય ચ નાનુયાતિ બાર્હદ્રથઃ પુરગતસ્ય જયે ન નિષ્ઠા ।
દ્રૌણિં ચ રુદ્રતનુમેષ સદા વિજાનન્નો તેન યુદ્ધમભિવાઞ્છતિ રુદ્રભક્તઃ ॥ ૧૯.૧૯૨॥

એકોઽહમેવ નૃપતીન્ પ્રતિયોધયિષ્યે એતૈર્મયિ પ્રતિજિતેઽપિ ન તેઽસ્ત્યકીર્તિઃ ।
એકં ચ તેઽનુજમિમે યદિ પૌરુષેણ ગૃહ્ણીયુરત્ર તવ કીર્તિરુપૈતિ નાશમ્ ॥ ૧૯.૧૯૩॥

ભીષ્માદયોઽપિ નહિ યોધયિતું સમર્થા રાજ્ઞા હ્યનેન તત એવ હિ બાહ્લિકોઽસ્ય ।
ભૃત્યો બભૂવ નતુ ભીષ્મમયં યુધેઽગાદ્રાજા નહીતિ નચ તેન વિરોધ આસીત્ ॥ ૧૯.૧૯૪॥

ઇત્યુક્ત આશુ સ વિમૃશ્ય યયૌ પુરં સ્વં કર્ણોઽપિ તૈઃ પ્રતિયુયોધ જિગાય ચૈનાન્ ।

કર્ણસ્ય વીર્યમગણય્ય જરાસુતોઽપિ હ્યેકૈકમેવ નૃપતિં સ દિદેશ યોદ્ધુમ્ ॥ ૧૯.૧૯૫॥

સર્વેષુ તેષુ વિજિતેષ્વભિજગ્મિવાન્ સ યોદ્ધું બૃહદ્રથસુતોઽપ્યમુના રથેન ।
તં ચૈવ રામવરતો વિરથં વિશસ્ત્રં ચક્રે સ ચૈનમથ મુષ્ટિભિરભ્યુપેતૌ ॥ ૧૯.૧૯૬॥

સન્ધૌ યદૈવ જરયા પ્રતિસન્ધિતસ્ય કર્ણો જઘાન ન પરત્ર તુતોષ રાજા ।
ન જ્ઞાતમેતદપિ હો હલિના તદેતજ્જ્ઞાતં ત્વયા ભવ તતો મમ ભૃત્ય એવ ॥ ૧૯.૧૯૭॥

એવં વિધં સુકુશલં બહુયુદ્ધશૌણ્ડં ન ત્વાં હનિષ્ય ઉત તે પિતુરેવ પૂર્વમ્ ।
અ્ક્ષ્ક્ષ્ક્ષીઇ।બાહ્વોર્બલાદભિહૃતં હિ મયાઽઙ્ગરાજ્યં તત્ત્વં ગૃહાણ યુધિ કર્મકરશ્ચ મે સ્યાઃ ॥ ૧૯.૧૯૮॥

ઇત્યુક્ત આશુ સ તથૈવ ચકાર કર્ણઃ પૂર્વં હિ તસ્ય નિજરાજ્યપદૈકદેશઃ ।
દુર્યોધનેન વિહિતો મગધાધિરાજં જિત્વા વૃકોદરહૃતઃ પિતુરેવ દત્તઃ ॥ ૧૯.૧૯૯॥

અઙ્ગાધિરાજ્યમુપલભ્ય જરાસુતસ્ય સ્નેહં ચ સૂર્યસુત આશુ કુરૂન્ જગામ ।
દૃષ્ટ્વૈવ તં મુમુદિરે ધૃતરાષ્ટ્રપુત્રા નાનેન તુલ્યમધિજગ્મુરતો હરિં ચ ॥ ૧૯.૨૦૦॥

ઉદ્વાહ્ય કાશિતનયાં ગિરિજાધિવિષ્ટાં સાક્ષાન્નરેષુ જનિતાં પ્રથમામલક્ષ્મીમ્ ।
તસ્યાં સુતં ત્વજનયત્પુર આસ યોઽક્ષઃ કન્યાં પુરા પ્રિયતમાં ચ ષડાનનસ્ય ॥ ૧૯.૨૦૧॥

પુત્રો બભૂવ સ તુ લક્ષણનામધેયઃ સા લક્ષણેત્યધિકરૂપગુણાઽસ કન્યા ।
તસ્યાનુજાશ્ચ નિજયોગ્યગુણા અવાપુર્ભાર્યાઃ પુનશ્ચ સ સુયોધન આપ ભાર્યાઃ ॥ ૧૯.૨૦૨॥

પૂર્વં સુરાન્તક ઇતિ પ્રથિતઃ સુતોઽભૂદ્દુઃ શાસનસ્ય તદનુ પ્રતિતપ્યમાનાઃ ।
દૃષ્ટ્વૈવ પાર્થબલવીર્યગુણાન્ સમૃદ્ધિં તાં ચૈવ તે પ્રતિયયુઃ સ્મ કલિઙ્ગદેશમ્ ॥ ૧૯.૨૦૩॥

આસીત્સ્વયમ્બર ઉતાત્ર કલિઙ્ગરાજપુત્ર્યાઃ સુવજ ઇતિ યં પ્રવદન્તિ ભૂપાઃ ।
રૌદ્રાદ્વરાદવિજિતસ્ય ચ તસ્ય કન્યાં દૃપ્તો બલાત્સ જગૃહે ધૃતરાષ્ટ્રસૂનુઃ ॥ ૧૯.૨૦૪॥

તત્રાથ રુદ્રવરતઃ સ જરાસુતેન યુક્તો બબન્ધ ચ સુયોધનમાશુ જિત્વા ।
કર્ણઃ પરાદ્રવદિહ સ્મ સુતેષુ પાણ્ડોર્યસ્માત્સ્પૃધાઽગમદતઃ સ પરાજિતોઽભૂત્ ॥ ૧૯.૨૦૫॥

દુર્યોધનેઽનુજજનૈઃ સહ તૈર્ગૃહીતે ભીષ્મામ્બિકેયવિદુરાગ્રજવાક્યનુન્નઃ ।
ભીમો વિજિત્ય નૃપતીન્ સજરાસુતાં સ્તાન્ હત્વા સુવજમમુચદ્ધૃતરાષ્ટ્રપુત્રાન્ ॥ ૧૯.૨૦૬॥

તેઽપિ સ્મ કર્ણસહિતા મૃતકપ્રતીકા ૭૧ નાગાહ્વયં પુરમથાઽયયુરપ્યમીષામ્ ।
દૃષ્ટ્વા વિરોધમવદન્નૃપતિશ્ચ ધર્મપુત્રં પુરન્દરકૃતસ્થલમાશુ યાહિ ॥ ૧૯.૨૦૭॥

તત્રાર્દ્ધરાજ્યમનુભુઙ્ક્ષ્વ સહાનુજૈસ્ત્વં કોશાર્દ્ધમેવ ચ ગૃહાણ પુરા હિશઙ્કઃ ।
તત્રાભિષિક્ત ઉત કઞ્જભવાદિદેવૈસ્તત્રસ્થ એવ સ ચકાર ચિરં ચ રાજ્યમ્ ॥ ૧૯.૨૦૮॥

ત્વં વીર શક્રસમ એવ તતસ્તવૈવ યોગ્યં પુરં તદત આશ્વભિષેચયામિ ।
(૭૧) પ્રાચીનકોશે “મૃતકપ્રતીપાઃ “ઇતિ પઠ્યતે । અર્થસ્તુ ન સ્ફુટઃ । યતઃ પ્રતીપશબ્દઃ સાદૃશ્યવાચી ન પ્રસિદ્ધઃ બન્નન્જે ગોવિન્દાચાર્યઃ
ઐક્ષ્ક્ષ્ક્ષ્વ્। ઇત્યુક્ત આહ સ યુધિષ્ઠિર ઓમિતિ સ્મ ચક્રેઽભિષેકમપિ તસ્ય સ આમ્બિકેયઃ ॥ ૧૯.૨૦૯॥

તસ્યાભિષેકમકરોત્પ્રથમં હિ કૃષ્ણો વાસિષ્ઠનન્દન ઉરુર્ભવ ચક્રવર્તી ।
યષ્ટાઽશ્વમેધનિખિલાત્મકરાજસૂયપૂર્વૈર્મખૈઃ સતતમેવ ચ ધર્મશીલઃ ॥ ૧૯.૨૧૦॥

ઇત્યેવ પાર્ષતસુતાસહિતેઽભિષિક્તે કૃષ્ણોઽપિ વૃષ્ણિવૃષભઃ સ તથાઽભ્યષિ ઞ્ચત્ ।
એવં ચ મારુતિશિરસ્યભિષેકમેતૌ સઞ્ચક્રતુઃ સ્મ યુવરાજપદે સભાર્યમ્ ॥ ૧૯.૨૧૧॥

ભીમે ચ પાર્ષતસુતાસહિતેઽભિષિક્તે તાભ્યામનન્તસુખશક્તિચિદાત્મકાભ્યામ્ ।
અન્યૈશ્ચ વિપ્રવૃષભૈઃ સુકૃતેઽભિષેકે ધર્માત્મજાનુ મુમુદુર્નિખિલાશ્ચ સન્તઃ ॥ ૧૯.૨૧૨॥

તસ્મિન્મહોત્સવવરે દિનસપ્તકાનુવૃત્તે વસિષ્ઠવૃષભેણ ચવૃષ્ણિપેન ।
કૃષ્ણેન તે યયુરમા પૃથયા તયા ચપાઞ્ચાલરાજસુતયા સ્થલમિન્દ્રવાસમ્ ॥ ૧૯.૨૧૩॥

કોશસ્ય ચાર્દ્ધસહિતાસ્તુ યદૈવ પાર્થા ગચ્છન્તિ તાનનુયયુર્નિખિલાશ્ચ પૌરાઃ ।
ઊચુશ્ચ હા બત સુયોધન એષ પાપો દૂરે ચકાર નનુ પાણ્ડુસુતાન્ ગુણાઢ્યાન્ ॥ ૧૯.૨૧૪॥

ભીમપ્રતાપમવલમ્બ્ય કલિઙ્ગબન્ધાન્મુક્તઃ સુતામપિ હિ તસ્ય પુરં નિનાય ।
દ્વેષ્ટ્યેવમપ્યતિબલાન્ હિ સદૈવ પાર્થાન્ યામો વયં ગુણિભિરદ્ય સહૈવ પાર્થૈઃ ॥ ૧૯.૨૧૫॥

આજ્ઞાપયત્યપિ સ ભેરિરવેણ પાર્થાન્નૈવાનુગચ્છત યદિ વ્રજથાનુ વોઽદ્ય ।
વિત્તં હરિષ્ય ઇહ સર્વમપીતિ તચ્ચ પાપઃ કરોતુ ન વયં વિજહામ પાર્થાન્ ॥ ૧૯.૨૧૬॥

સદ્ભિર્હિ સઙ્ગતિરિહૈવ સુખસ્ય હેતુર્મોક્ષૈકહેતુરથ તદ્વિપરીતમન્યત્ ।
તસ્માદ્વ્રજેમ સહ પાણ્ડુસુતૈર્હિ શક્રપ્રસ્થં ત્વિતિ સ્મ ધૃતચેતસ આહ ધાર્મઃ ॥ ૧૯.૨૧૭॥

પ્રીતિર્યદિ સ્મ ભવતાં મયિ સાનુજેઽસ્તિ તિષ્ઠધ્વમત્ર પિતુરેવ હિ શાસને મે ।
કીર્તિર્હિ વોઽનુગમનાત્પિતુરત્યયેન નશ્યેન્ન ઇત્યનુસરધ્વમિહાઽમ્બિકેયમ્ ॥ ૧૯.૨૧૮॥

ઇત્યેવ તૈઃ પુરજના નિખિલૈર્નિષિદ્ધાઃ કૃચ્છ્રેણ તસ્થુરપિ તાન્મનસાઽન્વગચ્છન્ ।
પ્રાપ્યાથ શક્રપુરમસ્મરતાં ચ કૃષ્ણૌ દેવેશવર્ધકિમથાઽગમદત્ર સોઽપિ ॥ ૧૯.૨૧૯॥

વાસિષ્ઠપેન યદુપેન ચ પાણ્ડવાનાં રત્નોત્કરં કુરુ પુરં પુરુહૂતપુર્યાઃ ।
સાદૃશ્યતસ્ત્વિતિ નિયુક્ત ઉભૌ પ્રણમ્ય સર્વેશ્વરૌ સ કૃતવાંશ્ચ પુરં તથૈવ ॥ ૧૯.૨૨૦॥

અક્ષ્ક્ષ્ક્ષ્વ્। દેશં ચ નાતિજનસં વૃતમન્યદેશસં સ્થૈર્જનૈરભિપુપૂરિર આશુ પાર્થાઃ ।
તેષાં ગુણૈર્હરિપદાનતિહેતુતશ્ચ રાષ્ટ્રાન્તરા ઇહ શુભા વસતિં સ્મ ચક્રુઃ ॥ ૧૯.૨૨૧॥

પ્રસ્થાપ્ય દૂરમનુજસ્ય સુતાન્ સ રાજા ચક્રેઽભિષેકમપિ તત્ર સુયોધનસ્ય ।
દુઃ શાસનં ચ યુવરાજમસૌ વિધાય મેને કૃતાર્થમિવ ચ સ્વમશાન્તકામઃ ॥ ૧૯.૨૨૨॥

પાર્થાશ્ચ તે મુમુદુરત્ર વસિષ્ઠવૃષ્ણિવર્યોદિતાનખિલતત્ત્વવિનિર્ણયાં સ્તુ ।
શ ૃણ્વન્ત એવ હિ સદા પૃથિવીં ચ ધર્માદ્ભુઞ્જન્ત આશ્રિતરમાપતિપાદયુગ્માઃ ॥ ૧૯.૨૨૩॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
પાણ્ડવરાજ્યલાભો નામ એકોનવિંશોઽધ્યાયઃ ॥

## અથ વિંશોઽધ્યાયઃ ।

(ખાણ્ડવદાહઃ )
ૐ । યજ્ઞોરુદાનનરદેવવન્દ્યતાપ્રશ્નર્ષિપૂજાસુ યુધિષ્ઠિરોઽભૂત્ ।
ધર્માનુશાસ્તિહરિતત્ત્વશં સનસ્વરાષ્ટ્રરક્ષાદિષુ ભીમ આસીત્ ॥ ૨૦.૧॥

સ્ત્રીધર્મસં શાસનભૃત્યકોશરક્ષાવ્યયાદૌ ગુણદોષચિન્તને ।
અન્તઃ પુરસ્થસ્ય જનસ્ય કૃષ્ણા ત્વાસીદ્ધરેર્ધર્મનિદર્શની ચ ॥ ૨૦.૨॥

બીભત્સુરાસીત્પરરાષ્ટ્રમર્દ્ને તેનાનિયમ્યાં સ્તુ જરાસુતાદીન્ ।
સ કીચકાદીંશ્ચ મમર્દ ભીમસ્તસ્યૈવ તે બલતો નિત્યભીતાઃ ॥ ૨૦.૩॥

રાષ્ટ્રેષુ ભીમેન વિમર્દ્દિતેષુ જિતાશ્ચ યુદ્ધેષુ નિરુધ્યમાસ્તે ।
બભૂવુરાસીદ્ધરિધર્મનિષ્ઠઃ પ્રાયેણ લોકશ્ચ તદીયશાસનાત્ ॥ ૨૦.૪॥

આજીવિનાં વેતનદસ્તદાઽસીન્માદ્રીસુતઃ પ્રથમોઽથ દ્વિતીયઃ ।
સન્ધાનભેદાદિષુ ધર્મરાજપશ્ચાચ્ચ ખડ્ગી સ બભૂવ રક્ષન્ ॥ ૨૦.૫॥

ધૃષ્ટદ્યુમ્નસ્તત્ર સેનાપ્રણેતા શક્રપ્રસ્થે નિત્યમાસ્તેઽતિહાર્દાત્ ।
વિશેષતો ભીમસખા સાસીદ્રાષ્ટ્રં ચૈષાં સર્વકામૈઃ સુપૂર્ણમ્ ॥ ૨૦.૬॥

નાવૈષ્ણવો ન દરિદ્રો બભૂવ ન ધર્મહાનિશ્ચ બભૂવ કસ્યચિત્ ।
તેષાં રાષ્ટ્રે શાસતિ ભીમસેને ન વ્યાધિતો નાપિ વિપર્યયાન્મૃતિઃ ॥ ૨૦.૭॥

યુધિષ્ઠિરં યાન્તિ હિ દર્શનોત્સુકાઃ પ્રતિગ્રહાયાપ્યથ યાજનાય ।
કાર્યાર્થતો નૈવ વૃકોદરેણ કાર્યાણિ સિદ્ધાનિ યતોઽખિલાનિ ॥ ૨૦.૮॥

ગન્ધર્વવિદ્યાધરચારણાશ્ચ સેવન્ત એતાન્ત્સતતં સમસ્તાઃ ।
યથા સુરેન્દ્રં મુનયશ્ચ સર્વ આયાન્તિ દેવા અપિ કૃષ્ણમર્ચિતુમ્ ॥ ૨૦.૯॥

તેષાં રાષ્ટ્રે કાર્તયુગા હિ ધર્માઃ પ્રવર્તિતા એવ તતોઽધિકાશ્ચ ।

ઋદ્ધિશ્ચ તસ્માદધિકા સુવર્ણરત્નામ્બરાદેરપિ સસ્યસમ્પદામ્ ॥ ૨૦.૧૦॥

અથોપયેમે શિશુપાલપુત્રીં યુધિષ્ઠિરો દેવકીં નામ પૂર્વમ્ ।
સ્વીયાં ભાર્યાં યત્સહજો ધૃષ્ટકેતુરનુહ્લાદઃ સવિતુશ્ચાં શયુક્તઃ ॥ ૨૦.૧૧॥

અ્ક્ષક્ષ્વી। તસ્યાં સુહોત્રો નામતઃ પુત્ર આસીદ્યશ્ચિત્રગુપ્તો નામ પૂર્વં સુલેખઃ ।
કૃષ્ણા સૈવાઽપ્યન્યરૂપેણ જાતા કાશીશપુત્રી યાં પ્રવદન્તિ કાલ્. ઈમ્ ॥ ૨૦.૧૨॥

સા કેવલા ભારતી નાન્યદેવ્યસ્તત્રાઽવિષ્ટાસ્તત્કૃતે કાશિરાજઃ ।
સ્વયમ્બરાર્થં નૃપતીનાજુહાવ સર્વાં સ્તેઽપિ હ્યત્ર હર્ષાત્સમેતાઃ ॥ ૨૦.૧૩॥

તેષાં મધ્યે ભીમસેનાં સ એષા માલામાધાત્તત્ર જરાસુતાદ્યાઃ ।
ક્રુદ્ધા વિષ્ણોરાશ્રિતાનાક્ષિપન્ત આસેદુરુચ્ચૈઃ શિવમાસ્તુવન્તઃ ॥ ૨૦.૧૪॥

પૂર્વં વાક્યૈર્વૈદિકૈસ્તાન્સ ભીમો જિગ્યે તર્કૈઃ સાધુભિઃ સમ્પ્રયુક્તૈઃ ।
વેદા હ્યદોષા ઇતિ પૂર્વમેવ સં સાધયિત્વૈવ સદાગમૈશ્ચ ॥ ૨૦.૧૫॥

વેદાધિક્યં શૈવશાસ્ત્રાણિ ચાઽહુર્વેદોજ્ઝિતાનાં બહુલાં ચ નિન્દામ્ ।
તથા શાક્તેયસ્કાન્દસૌરાદિકાનાં તત્રૈવોક્તં છન્દસાં વૈષ્ણવત્વમ્ ॥ ૨૦.૧૬॥

વિષ્ણોરાધિક્યં તાનિ શાસ્ત્રાણિ ચાઽહુઃ શિવાદિભ્યઃ કુત્રચિન્નૈવ વેદે ।
વિષ્ણૂત્કૃષ્ટઃ કથિતો બૌદ્ધપૂર્વાશ્ચાઽહુર્વિષ્ણું પરમં સર્વતોઽપિ ॥ ૨૦.૧૭॥

લોકાયતાશ્ચ ક્વચિદાહુરગ્ર્યં વિષ્ણું ગુરું સર્વવરં બૃહસ્પતેઃ ।
સર્વાગમેષુ પ્રથિતોઽત એવ વિષ્ણુઃ સમસ્તાધિક એવ મુક્તિદઃ ॥ ૨૦.૧૮॥

તેષ્વાગમેષ્વેવ પરસ્પરં ચ વિરુદ્ધતા હ્યન્યપક્ષેષુ ભૂપાઃ ।
પ્રત્યક્ષતશ્ચાત્ર પશ્યધ્વમાશુ બલં બાહ્વોર્મે વિષ્ણુપદાશ્રયસ્ય ॥ ૨૦.૧૯॥

પુર્વં હિ ગઙ્ગા મમ વિષ્ણુપૂજાવિઘ્નાર્થમાયાદ્ધામકરેણ સા મે ।
નુન્ના પરસ્તાદ્બહુયોજનં ગતા પુરે કુરૂણાં શિવ આગતસ્તદા ॥ ૨૦.૨૦॥

સ વ્યાઘ્રરૂપી કપિલાત્મકામુમાં પરીક્ષયન્માં હન્તુમિવાઽદ્રવદ્દ્રુતમ્ ।
સ મે યુદ્ધે વિજિતો મૂર્ચ્છિતશ્ચ ગદાપ્રહારાદાસ લિઙ્ગાન્તરસ્થઃ ॥ ૨૦.૨૧॥

વ્યાઘ્રેશ્વરં નામ લિઙ્ગં પૃથિવ્યાં ખ્યાતં તદાસ્તે તદ્વદન્યત્ર યુદ્ધે ।
તીરે ગોમત્યા હૈમવતે ગિરૌ હિ જિતસ્તત્રાપ્યાસ શાર્દૂલલિઙ્ગમ્ ॥ ૨૦.૨૨॥

એવં પ્રત્યક્ષે વિષ્ણુપદાશ્રયસ્ય બલાધિક્યે કિમુ વક્તવ્યમત્ર ।
અ્ક્ષક્ષ્વીઇ। વિષ્ણોરાધિક્યે ક્ષત્રિયાણાં પ્રમાણં બલં વિપ્રે જ્ઞાનમેવેતિ ચાઽહુઃ ॥ ૨૦.૨૩॥

મયા કેદારે વિપ્રરૂપી જિતશ્ચ રુદ્રોઽવિશલ્લિઙ્ગમેવાઽશુ ભીતઃ ।
તતઃ પરં વેદવિદામગમ્યતાશાપં પ્રાદાચ્છઙ્કરો બ્રીલ્. ઇતોઽત્ર ॥ ૨૦.૨૪॥

એવં પ્રત્યક્ષે વિષ્ણુબલે પ્રતીપં મનો યસ્ય હ્યુત્તરં સ બ્રવીતુ ।
ક્રોધોઽધિકશ્ચેત્ક્ષિપ્રમાયાતુ યોદ્ધુમિત્યુક્તાસ્તેઽભ્યાયયુરાત્તશસ્ત્રાઃ ॥ ૨૦.૨૫॥

વિદ્રાપ્ય તાન્ બાણસઙ્ઘૈઃ સમસ્તાન્ જરાસુતં ગદયા યોધયિત્વા ।
બાહુભ્યાં ચૈનં પરિગૃહ્યાઽશુ વિષ્ણોઃ પાદોત્થાયાં પ્રાક્ષિપદ્દેવનદ્યામ્ ॥ ૨૦.૨૬॥

સ બ્રીલ્। ઇતઃ પ્રયયૌ માગધાંશ્ચ ભૂપૈઃ સમેતો ભીમસેનો રથં સ્વમ્ ।
આરુહ્ય કાશીશ્વરપૂજિતશ્ચ યયૌ કાલ્. યા શક્રસનામકં પુરમ્ ॥ ૨૦.૨૭॥

તસ્યાં ત્રિલોકાધિકરૂપસદ્ગુણૈરાસમ્મતાયાં રમમાણઃ સુતં ચ ।
શર્વત્રાતં નામાજનયત્પુરા યઃ સમાનવાયુર્બલવીર્યયુક્તઃ ॥ ૨૦.૨૮॥

કૃષ્ણોઽપિ ગત્વા દ્વારવતીં સરામઃ સત્યાપિતુર્વધકર્તારમેવ ।
શતધન્વાનં હન્તુમૈચ્છત્સ ચૈવ યયાચેઽક્રૂરં કૃતવર્માનુયુક્તમ્ ॥ ૨૦.૨૯॥

તાવબ્રૂતાં સર્વલોકૈકકર્તુર્નાઽવાં વિરોધં મનસાઽપિ કુર્વઃ ।
કૃષ્ણસ્ય સર્વેશિતુરિત્યનૂક્ત આરુહ્ય ચાશ્વીં ભયતઃ પરાદ્રવત્ ॥ ૨૦.૩૦॥

અન્વેવ તં કૃષ્ણરામૌ રથેન યાતૌ શતં યોજનાનાં દિનેન ।
ગત્વા મૃતાયાં બડબાયાં પદૈવ સ પ્રાદ્રવત્કૃષ્ણ એનં પદાઽગાત્ ॥ ૨૦.૩૧॥

છિત્વા શિરસ્તસ્ય ચક્રેણ કૃષ્ણો જાનન્નક્રૂરે મણિમેનેન દત્તમ્ ।
અપ્યજ્ઞવલ્લોકવિડમ્બનાય પરીક્ષ્ય વાસોઽત્ર નેત્યાહ રામમ્ ॥ ૨૦.૩૨॥

અવિશ્વાસાત્સતુ સક્રોધ એવ યયૌ વિદેહાનવસત્પઞ્ચ ચાબ્દાન્ ।
જાનન્ પાર્થેભ્યોઽહાર્યતાં કેશવસ્ય વશીકર્તું ધાર્તરાષ્ટ્રો બલં ગાત્ ॥ ૨૦.૩૩॥

બભૂવ શિષ્યોઽસ્ય તથા ગદાયામસન્નિધાનં કેશવસ્ય પ્રતીક્ષન્ ।
તદા યયાચે ભગિનીં ચ તસ્ય સ ચ પ્રતિજ્ઞામકરોત્પ્રદાને ॥ ૨૦.૩૪॥

ઞ્ક્ષ્ક્ષ્ક્ષ્।જ્યેષ્ઠં હ્યેનં કેશવો નાતિવર્તેદિત્યેવ મેને ધાર્તરાષ્ટ્રઃ સ તસ્માત્ ।
જગ્રાહ હસ્તં દક્ષિણં સત્યહેતોર્દદૌ ચ રામઃ કરમસ્મૈ હલાઙ્કમ્ ॥ ૨૦.૩૫॥

રૂપેણ તસ્યા મોહિતો ધાર્તરાષ્ટ્રો વિશેષતઃ કૃષ્ણરામૌ ભગિન્યાઃ ।
સ્નેહાદ્વશં યાસ્યત ઇત્યગૃહ્ણાદ્ધસ્તં હલાઙ્કં હલિનો રિપુઘ્નમ્ ॥ ૨૦.૩૬॥

જાતા દેવક્યાં સા સુભદ્રેતિ નામ્ના ભદ્રા રૂપેણાઽનકદુન્દુભેસ્તામ્ ।
કૃત્વા પુત્રીં રોહિણી સ્વામરક્ષત્પૂર્વં તુ યાઽસીત્ત્રિજટૈવ નામ્ના ॥ ૨૦.૩૭॥

સીતાયાઃ પ્રાઙ્નિત્યશુશ્રૂષણાત્સા બભૂવ વિષ્ણોર્ભગિની પ્રિયા ચ ।
ઉમાવેશાદ્રૂપગુણોપપન્ના પદ્મેક્ષણા ચમ્પકદામગૌરી ॥ ૨૦.૩૮॥

એતત્કૃત્વા ધૃતરાષ્ટ્રાત્મજઃ સ યયૌ કુરૂન્નિવસત્યત્ર રામે ।
કૃષ્ણોઽક્રૂરં વિવસન્તં ભયેન સહાર્દિક્યં ચાઽનયિત્વા જગાદ ॥ ૨૦.૩૯॥

આનીય રામં ચ સમસ્તસાત્ત્વતાં યદાઽવાદીત્કેશવઃ સન્નિધાને ।
મણિસ્ત્વય્યાસ્તે દર્શયેત્યેવ ભીતસ્તદાઽક્રૂરોઽદર્શયદ્રત્નમસ્મૈ ॥ ૨૦.૪૦॥

અવ્યાજતામાત્મનો દર્શયિત્વા હલાયુધે કેશવસ્તસ્ય જાનન્ ।
રત્નાકાઙ્ક્ષામુગ્રસેનસ્ય ચૈવ માતુશ્ચ સામ્બસ્ય પુનર્બભાષે ॥ ૨૦.૪૧॥

આસ્તામક્રૂરે મણિરન્યૈરધાર્યઃ સદા યજ્ઞાદ્દાનપતેઃ સ ધાર્યઃ ।
ન સત્યા કૃષ્ણાવાઞ્છિતં કિઞ્ચિદિચ્છેત્તથાઽપિ તસ્યા યોગ્ય ઇત્યાહ કૃષ્ણઃ ॥ ૨૦.૪૨॥

લબ્ધ્વા રત્નં દાનપતિઃ સદૈવ સન્દીક્ષિતોઽભૂદ્યજ્ઞકર્મણ્યતન્દ્રઃ ।
પ્રદર્શ્ય કૃષ્ણો હલિને રત્નમેતચ્છક્રપ્રસ્થં પાણ્ડવસ્નેહતોઽગાત્ ॥ ૨૦.૪૩॥

વસન્નજસ્તત્ર બહૂંશ્ચ માસાન્ સફલ્ગુનોઽયાન્મૃગયાં કદાચિત્ ।
હત્વા મૃગાન્ યમુનાતીરસં સ્થઃ સોઽન્યાં કાલ્. ઇન્દીં દદૃશે તત્સ્વસારમ્ ॥ ૨૦.૪૪॥

સા સૂર્યપુત્રી યમુનાનુજાતા તપશ્ચરન્તી કૃષ્ણપત્નીત્વકામા ।
પૃષ્ટાઽર્જુનેનાઽહ સમસ્તમેતત્પત્નીં ચ તાં જગૃહે વાસુદેવઃ ॥ ૨૦.૪૫॥

તતો ગત્વા નગ્નજિતો ગૃહં ચ સ્વયમ્બરે સપ્ત વૃષાનગૃહ્ણાત્ ।
સર્વૈરગ્રાહ્યાનસુરાન્ વરેણ શિવસ્ય યૈર્નિર્જિતા ભૂમિપાલાઃ ॥ ૨૦.૪૬॥

અક્ષ્લ્ । તતો નીલાં તસ્ય સુતાં ચ લેભે પૂર્વં નીલા ગોપકન્યાઽપિ યાઽસીત્ ।
સા દેહેઽસ્યાઃ પ્રાવિશત્પૂર્વમેષા યસ્માદેકા દ્વિવિધા સમ્પ્રજાતા ॥ ૨૦.૪૭॥

પિતૃષ્વસુર્મિત્રવિન્દા સુતા ચકૃષ્ણે માલામાસજદ્રાજમધ્યે ।
વિન્દાનુવિન્દૌ ભ્રાતરાવેવ તસ્યા ન્યષેધતાં ધાર્તરાષ્ટ્રાર્થમુગ્રૌ ॥ ૨૦.૪૮॥

જિત્વાઽવન્ત્યૌ તૌ નૃપતીંશ્ચૈવ સર્વાનાદાય તાં પ્રયયૌ વાસુદેવઃ ।
પિતૃષ્વસુસ્તનયાં ચ દ્વિતીયાં ભદ્રાં દત્તામગ્રહીદ્ભ્રાતૃભિઃ સઃ ॥ ૨૦.૪૯॥

વિશ્વેષાં દેવાનામવતારા હિપઞ્ચ તે કૈકેયા ભ્રાતરોઽસ્યા હરેશ્ચ ।
ભક્તા નિત્યં પાણ્ડવાનાં ચ તાતોઽપ્યેષાં વશે શૈવ્યનામર્ભુરગ્રે ॥ ૨૦.૫૦॥

સ્વયમ્બરો લક્ષણાયાસ્તથાઽસીદ્યથા દ્રૌપદ્યા લક્ષવેધાત્મકઃ સઃ ।

મદ્રેષુ તસ્યાશ્ચ પિતા પિનાકં સ્વયમ્બરાર્થં જગૃહે ગિરીશાત્ ॥ ૨૦.૫૧॥

લક્ષં ચ તત્સર્વતશ્છન્નમેવ દ્વારં શરસ્યાપ્યુપરિ સ્મ લક્ષાત્ ।
છિન્નેષુણા પાતનીયં હ તદ્ધિ દ્રૌપદ્યર્થાત્તદશક્યં તતોઽલમ્ ॥ ૨૦.૫૨॥

તત્રાઽજગ્મુર્માગધાદ્યાશ્ચ સર્વે પાર્થા અપિ દ્રષ્ટુમિહાભ્યુપાયયુઃ ।
દુર્યોધનાદ્યાશ્ચ સસૂતપુત્રા સજ્યીકર્તું ધનુરપ્યુત્સહન્તે ॥ ૨૦.૫૩॥

કેચિન્નિપેતુર્ધનુષૈવ તાડિતા ન વૈ કેચિચ્ચાલયિતું ચ શેકુઃ ।
દુર્યોધનો માગધઃ સૂતપુત્રઃ સજ્યં કૃત્વા લક્ષવીક્ષાં ન શેકુઃ ॥ ૨૦.૫૪॥

ધનઞ્જયઃ સ્વાત્મબલં પ્રકાશયન્ સજ્યં કૃત્વા ધનુરૈક્ષચ્ચ લક્ષમ્ ।
નૈવાઽદદે બાણમનિચ્છયૈવ તત્પ્રાપ્યાં જાનન્ કેશવેનૈવ તાં ચ ॥ ૨૦.૫૫॥

ભીમશ્ચાપં લક્ષમપ્યેતદત્ર દ્રષ્ટું ચ નૈવૈચ્છદરીન્દ્રધારિણઃ ।
યોગ્યે કર્મણ્યાયતંશ્ચાપરાધી સ્યાદિત્યજઃ પશ્યમાનો મહાત્મા ॥ ૨૦.૫૬॥

કૃષ્ણસ્તતશ્ચાપમધિજ્યમાશુ કૃત્વાઽચિન્ત્યશ્છિન્નબાણેન લક્ષમ્ ।
અપાતયદ્દુન્દુભયશ્ચ દિવ્યા નેદુઃ પ્રસૂનં વવૃષુઃ સુરાશ્ચ ॥ ૨૦.૫૭॥

કૃષ્ણે બ્રહ્માદ્યૈઃ સ્તૂયમાને નરેન્દ્રકન્યા માલાં કેશવાં સે નિધાય ।
ચિક્ષ્લ।તસ્થાવુપાસ્યાથ સર્વે નરેન્દ્રા યુદ્ધાયાગુઃ કેશવં સ્વાત્તશસ્ત્રાઃ ॥ ૨૦.૫૮॥

વિદ્રાપ્ય તન્માગધાદીન્ સ કૃષ્ણો ભીમાર્જુનાભ્યાં સહિતઃ પુરીં સ્વામ્ ।
યયાવેતા અષ્ટ મહામહિષ્યઃ કૃષ્ણસ્ય દિવ્યા લોકસુન્દર્ય ઇષ્ટાઃ ॥ ૨૦.૫૯॥

ભૈષ્મી સત્યા ચૈકતનુર્દ્વિધૈવ જાતા ભૂમૌ પ્રકૃતિર્મૂલભૂતા ।
તથૈવાન્યાઃ સર્વદાઽનુપ્રવિષ્ટાસ્તાસાં મધ્યે જામ્બવતી પ્રધાના ॥ ૨૦.૬૦॥

રામેણ તુલ્યા જામ્બવતી પ્રિયત્વે કૃષ્ણસ્યાન્યાઃ કિઞ્ચિદૂનાશ્ચ તસ્યાઃ ।
યદાઽવેશો બહુલઃ સ્યાદ્રમાયાસ્તદા તાસુ પ્રીયતે કેશવોઽલમ્ ॥ ૨૦.૬૧॥

યદાઽવેશો હ્રાસમુપૈતિ તત્ર પ્રદ્યુમ્નતો વિં શગુણાધિકાઃ સ્યુઃ ।
અનાદિતસ્તાઃ કેશવાન્નાન્યસં સ્થા રેમે તાભિઃ કેશવો દ્વારવત્યામ્ ॥ ૨૦.૬૨॥

એવં કૃષ્ણે દ્વારકામધ્યસં સ્થે ગિરિં ભૂપા રૈવતકં સમાયયુઃ ।
દુર્યોધનાદ્યાઃ પાણ્ડવાશ્ચૈવ સર્વે નાનાદેશ્યા યેચભૂપાલસઙ્ઘાઃ ॥ ૨૦.૬૩॥

આત્માનં તાન્ દ્રષ્ટુમભ્યાગતાન્ સ કૃષ્ણો ગિરૌ રૈવતકે દદર્શ ।
નમસ્કૃતે સર્વનરેન્દ્રમુખ્યૈઃ કૃષ્ણે વૈદર્ભ્યા સહ દિવ્યાસનસ્થે ॥ ૨૦.૬૪॥

એત્યાઽઽકાશાન્નારદઃ કૃષ્ણમાહ સર્વોત્તમસ્ત્વં ત્વાદૃશો નાસ્તિ કશ્ચિત્ ।
ઇત્યાશ્ચર્યો ધન્ય ઇત્યેવ શબ્દદ્વયે તૂક્તે વાસુદેવસ્તમાહ ॥ ૨૦.૬૫॥

દક્ષિણાભિઃ સાકમિત્યેવ કૃષ્ણં પપ્રચ્છુરેતત્કિમિતિ સ્મ ભૂપાઃ ।
નારાયણો મુનિમૂચે વદેતિ શ‍ૃણુધ્વમિત્યાહ સ નારદોઽપિ ॥ ૨૦.૬૬॥

કૂર્મો દૃષ્ટો વિષ્ણુપદ્યાં મયોક્તસ્ત્વમુત્તમો નાસ્તિ સમસ્તવેતિ ।
ઊચે ગઙ્ગામુત્તમાં સા જલેશમુમામૂચે પૃથિવીનામિકાં સઃ ॥ ૨૦.૬૭॥

યા માદૃશા દેવતાઃ સર્વશસ્તા ધૃતાસ્તયા પ્રથિતત્વાત્પૃથિવ્યા ।
શિવં શેષં ગરુડં ચાઽહ સાઽપિ પરવાનાત્પર્વતનામધેયાન્ ॥ ૨૦.૬૮॥

તૈરેવાહં મત્સમાશ્ચૈવ દેવ્યો ધ્રિયન્ત ઇત્યેવ ત ઊચિરેઽથ ।
બ્રહ્માણમેવોત્તમમાહ સોઽપિ વેદાત્મિકાં પ્રકૃતિં વિષ્ણુપત્નીમ્ ॥ ૨૦.૬૯॥

અઋક્ષ્લી। સૈકા દેવી બહુરૂપા બભાષે યુક્તા યદાઽહં કૢેન નારાયણેન ।
યજ્ઞક્રિયામાનિની યજ્ઞનામ્ની તદોત્તમા તત્પ્રવેશાત્તદાખ્યા ॥ ૨૦.૭૦॥

વિષ્ણ્વાવિષ્ટા યજ્ઞનામ્ની તદઙ્કસ્થિતા સોચે કેશવો હ્યુત્તમોઽલમ્ ।
ન તત્સમશ્ચાધિકોઽતઃ કુતઃ સ્યાદૃષે સત્યં નાન્યથેતિ સ્મ ભૂયઃ ॥ ૨૦.૭૧॥

તયોક્તોઽહં નાવતારેષુ કશ્ચિદ્વિશેષ ઇત્યેવ યદુપ્રવીરમ્ ।
સર્વોત્તમોઽસીત્યવદં સ ચાઽહ ન કેવલં મેઽઙ્કગાયાઃ શ્રિયોઽહમ્ ॥ ૨૦.૭૨॥

સદોત્તમઃ કિન્તુ યદા તુ સા મે વામાર્દ્ધરૂપા દક્ષિણાનામધેયા ।
યસ્માત્તસ્યા દક્ષિણતઃ સ્થિતોઽહં તસ્માન્નામ્ના દક્ષિણેત્યેવ સા સ્યાત્ ॥ ૨૦.૭૩॥

સા દક્ષિણામાનિની દેવતા ચસા ચ સ્થિતા બહુરૂપા મદર્દ્ધા ।
વામાર્દ્ધો મે તત્પ્રવિષ્ટો યતો હિ તતોઽહં સ્યામર્દ્ધનારાયણાખ્યઃ ॥ ૨૦.૭૪॥

તદાઽપ્યસ્યા ઉત્તમોઽહં સુપૂર્ણો નમાદૃશઃ કશ્ચિદસ્ત્યુત્તમો વા ।
ઇત્યેવાવાદીદ્દક્ષિણાભિઃ સહેતિ સર્વોત્તમત્વં દક્ષિણાનાં સ્મરન્ત્સઃ ॥ ૨૦.૭૫॥

તાભિશ્ચૈતાભિર્દક્ષિણાભિઃ સમેતાદ્ધરિષ્ઠોઽહં જગતઃ સર્વદૈવ ।
મત્સામર્થ્યાન્નૈવ ચાનન્તભાગો દક્ષિણાનાં વિદ્યતે નારદેતિ ॥ ૨૦.૭૬॥

ઉક્તં કૃષ્ણેનાપ્રતિમેન ભૂપા અન્યોત્તમત્વં દક્ષિણાનાં ચ શશ્વત્ ।
સેયં ભૈષ્મી દક્ષિણા કેશવોઽયં તસ્યાઃ શ્રેષ્ઠઃ પશ્યત રાજસઙ્ઘાઃ ॥ ૨૦.૭૭॥

પ્રત્યક્ષં વો વીર્યમસ્યાપિ કુન્ત્યા યુધેઽર્થિતઃ કેશવો વીર્યમસ્યૈ ।
અદર્શયત્પાણ્ડવાન્ ધાર્તરાષ્ટ્રાન્ ભીષ્મદ્રોણદ્રૌણિકૃપાન્ સકર્ણાન્ ।

નિરાયુધાંશ્ચક્ર એકઃ ક્ષણેન લોકશ્રેષ્ઠાન્ દૈવતૈરપ્યજેયાન્ ॥ ૨૦.૭૮॥

વ્રતં ભીમસ્યાસ્તિ નૈવાભિ કૃષ્ણમિયામિતિ સ્માઽઽજ્ઞયા તસ્ય વિષ્ણોઃ ।
ચક્રં રથસ્યાગ્રહીત્સ પ્રણમ્ય કૃષ્ણં સ તં કેશવોઽપાહરચ્ચ ॥ ૨૦.૭૯॥

એવં ક્રીડન્તોઽપ્યાત્મશક્ત્યા પ્રયત્નં કુર્વન્તસ્તે વિજિતાઃ કેશવેન ।
તતઃ સર્વે નેમુરસ્મૈ પૃથા ચ સવિસ્મયા વાસુદેવં નનામ ॥ ૨૦.૮૦॥

એવં વિધાન્યદ્ભુતાનીહ કૃષ્ણે દૃષ્ટાનિ વઃ શતસાહસ્રશશ્ચ ।
અક્ષ્લીઇ।તસ્માદેષ હ્યદ્ભુતોઽત્યુત્તમશ્ચેત્યુક્તા નેમુસ્તેઽખિલા વાસુદેવમ્ ॥ ૨૦.૮૧॥

વાય્વાજ્ઞયા વાયુશિષ્યઃ સ સત્યમિત્યાદ્યુક્ત્વા નારદો રુગ્મિણીં ચ ।
સ્તુત્વા પુષ્પં પારિજાતસ્ય દત્વા યયૌ લોકં ક્ષિપ્રમબ્જોદ્ભવસ્ય ॥ ૨૦.૮૨॥

સાક્ષાત્સત્યા રુગ્મિણીત્યેકસં વિદ્વિધાભૂતા નાત્ર ભેદોઽસ્તિ કશ્ચિત્ ।
તથાઽપિ સા પ્રમદાનાં સ્વભાવપ્રકાશનાર્થં કુપિતેવાઽસ સત્યા ॥ ૨૦.૮૩॥

સાકં રુગ્મિણ્યા રાજમધ્યે પ્રવેશાત્સ્તવાદૃષેઃ પુષ્પદાનાચ્ચ દેવીમ્ ।
કોપાનનં દર્શયન્તીમુવાચ વિડમ્બાર્થં કામિજનસ્ય કૃષ્ણઃ ॥ ૨૦.૮૪॥

દાતાસ્મ્યહં પારિજાતં તરું ત ઇત્યેવ તત્રાથાઽગમદ્વાસવોઽપિ ।
સર્વૈર્દેવૈર્ભૌમજિતોઽપ્યદિત્યાસ્તેનૈવાથો કુણ્ડલાભ્યાં હૃતાભ્યામ્ ॥ ૨૦.૮૫॥

તદૈવાઽગુર્મુનયસ્તેન તુન્ના બદર્યાસ્તે સર્વ એવાઽશુ કૃષ્ણમ્ ।
યયાચિરે ભૌમવધાય નત્વા સ્તુત્વા સ્તોત્રૈર્વૈદિકૈસ્તાન્ત્રિકૈશ્ચ ॥ ૨૦.૮૬॥

ઇન્દ્રેણ દેવૈઃ સહિતેન યાચિતો વિપ્રૈશ્ચ સસ્માર વિહઙ્ગરાજમ્ ।
આગમ્ય નત્વા પુરતઃ સ્થિતં તમારુહ્ય સત્યાસહિતો યયૌ હરિઃ ॥ ૨૦.૮૭॥

નિત્યૈવ યા પ્રકૃતિઃ સ્વેચ્છયૈવ જગચ્છિક્ષાર્થં દ્વાદશીં ભીમસંજ્ઞામ્ ।
ઉપોષ્ય બભ્રે કોટિધારાજલસ્ય વિષ્ણોઃ પ્રીત્યર્થં સૈવ હિ સત્યભામા ॥ ૨૦.૮૮॥

તયા યુક્તો ગરુડસ્કન્ધસં સ્થો દૂરાનુયાતો વજ્રભૃતાઽપ્યનુજ્ઞામ્ ।
દત્વાઽમુષ્મૈ પ્રયયૌ વાયુજુષ્ટામાશાં કૃષ્ણો ભૌમવધે ધૃતાત્મા ॥ ૨૦.૮૯॥

ભૌમો હ્યાસીદ્બ્રહ્મવરાદવધ્યો ન શસ્ત્રભૃજ્જીયસ ઇત્યમુષ્મૈ ।
દત્તો વરો બ્રહ્મણા તદ્વદેવ તસ્યામાત્યાનાં તદ્વદવધ્યતા ચ ॥ ૨૦.૯૦॥

ભૌમેન જય્યત્વમપિ હ્યમીષાં દત્તં ભૌમાય બ્રહ્મણા ક્રોડરૂપાત્ ।
વિષ્ણોર્જાતાયાસ્ય દુર્ગં ચ દત્તં પ્રાગ્જ્યોતિષં નામ પુરં સમસ્તૈઃ ॥ ૨૦.૯૧॥

આસીદ્બાહ્યે ગિરિદુર્ગં તદન્તઃ પાનીયદુર્ગં મૌરવં પાશદુર્ગમ્ ।
તસ્યાપ્યન્તઃ ક્ષુરધારોપમં તત્પાશાશ્ચ તે ષટ્સહસ્રાશ્ચ ઘોરાઃ ।
અભેદ્યત્વમરિભિરતાર્યતા ચ દત્તા દુર્ગાણાં બ્રહ્મણાઽરાધિતેન ॥ ૨૦.૯૨॥

ચ્ક્ષ્લવ્। તસ્યામાત્યાઃ પીઠમુરૌ નિસુમ્ભહયગ્રીવૌ પઞ્ચજનશ્ચ શૂરાઃ ।
સઙ્કુલ્ય તાન્ લોકપાલાનહં ચ બ્રહ્મેત્યદ્ધા ભાષમાણઃ સ આસ્તે ॥ ૨૦.૯૩॥

હન્તું કૃષ્ણો નરકં તત્ર ગત્વા ગિરિદુર્ગં ગદયા નિર્બિભેદ ।
વાયવ્યાસ્ત્રેણોદકં શોષયિત્વા ચકર્ત ખડ્ગેન મુરસ્ય પાશાન્ ॥ ૨૦.૯૪॥

અથાભિપેતુર્મુરપીઠૌ નિસુમ્ભહયગ્રીવૌ પઞ્ચજનશ્ચ દૈત્યાઃ ।
તાઞ્છૈલશસ્ત્રાસ્ત્રશિલાભિવર્ષિણશ્ચક્રે વ્યસૂંશ્ચક્રનિકૃત્તકન્ધરાન્ ॥ ૨૦.૯૫॥

તેષાં સુતાઃ સપ્તસપ્તોરુવીર્યા વરાદવધ્યા ગિરિશસ્યાભિપેતુઃ ।
તાનસ્ત્રશસ્ત્રાભિમુચઃ શરોત્તમૈઃ સમર્પયામાસ સ મૃત્યવેઽચ્યુતઃ ॥ ૨૦.૯૬॥

હત્વા પઞ્ચત્રિં શતો મન્ત્રિપુત્રાન્ જગામ ભૌમસ્ય સકાશમાશુ ।
શ્રુત્વા ભૌમઃ કૃષ્ણમાયાતમારાદક્ષોહિણીત્રિં શકેનાભ્યયાત્તમ્ ॥ ૨૦.૯૭॥

જઘ્ને સેનાં ગરુડઃ પક્ષપાતૈઃ પાદં શેષાં કેશવઃ સાયકૌઘૈઃ ।
અથાઽસસાદાઽશુ ભૌમોઽચ્યુતં તં મુઞ્ચઞ્છરાનસ્ત્રસમ્મન્ત્રિતાન્ દ્રાક્ ।
વિવ્યાધ તં કેશવઃ સાયકૌઘૈર્ભૌમઃ શતઘ્નીં બ્રહ્મદત્તામમુઞ્ચત્ ॥ ૨૦.૯૮॥

અચ્છેદ્યોઽભેદ્યો નિત્યસં વિત્સુખાત્મા નિત્યાવ્યયઃ પૂર્ણશક્તિઃ સ કૃષ્ણઃ ।
નિગીર્ય તાં દેવવરઃ શતઘ્નીં નિત્યાશ્રાન્તોઽદર્શયચ્છ્રાન્તવચ્ચ ॥ ૨૦.૯૯॥

બહૂન્ વરાન્ બ્રહ્મણોઽન્યેષ્વમોઘાન્મોઘીકૃતાન્ વીક્ષ્ય પરાત્પરેશઃ ।
ભવેત્કથઞ્ચિદ્બહુમાનેન યુક્ત ઇત્યેવ કૃષ્ણોઽદર્શયચ્છ્રાન્તવત્સ્વમ્ ॥ ૨૦.૧૦૦॥

તદા દૃપ્તં નરકં વીક્ષ્ય દેવી સત્યાઽદદે કાર્મુકં શાર્ઙ્ગસંજ્ઞમ્ ।
ચકાર તં યતમાનં ચ ભૌમં નિરાયુધં વિરથં ચ ક્ષણેન ॥ ૨૦.૧૦૧॥

આલિઙ્ગ્ય કૃષ્ણઃ સત્યભામાં પુનશ્ચ રથાન્તરે સં સ્થિતં ભૌમમુગ્રમ્ ।
સૃજન્તમસ્ત્રાણ્યરિણા નિકૃત્તકન્ધં મૃત્યોરર્પયામાસ શીઘ્રમ્ ॥ ૨૦.૧૦૨॥

સ મન્ત્રિભિર્મન્ત્રિપુત્રૈઃ સમેતો જગામ કૃષ્ણાવજ્ઞયાઽન્ધં તમશ્ચ ।
તદાવિષ્ટો વાયુરગાચ્ચ કૃષ્ણમન્તઃ પુરં પ્રાવિશત્સત્યયેશઃ ॥ ૨૦.૧૦૩॥

ચ્ક્ષ્લ્વ્। તદા ભૂમિઃ પઞ્ચભૂતાવરા યા યસ્યાં જજ્ઞે નરકઃ શ્રીવરાહાત્ ।
મૂલપ્રકૃત્યૈવ ભૂમ્યા નિતાન્તમાવિષ્ટા યા સાઽગમત્કૃષ્ણપાદૌ ॥ ૨૦.૧૦૪॥

સાઽદિત્યાસ્તે કુણ્ડલે પાદયોશ્ચ નિધાય પૌત્રં ભગદત્તસંજ્ઞમ્ ।
સમર્પયામાસ તસ્યાભિષેકં પ્રાગ્જ્યોતિષે કારયામાસ કૃષ્ણઃ ॥ ૨૦.૧૦૫॥

સં સ્થાપ્ય તં સર્વકિરાતરાજ્યે ભૌમાહૃતં વૈશ્રવણાદ્બલેન ।
શિવેન દત્તં ધનદાયાતિસત્ત્વં ભગદત્તે ન્યદધાત્સુપ્રતીકમ્ ॥ ૨૦.૧૦૬॥

કરીન્દ્રમેકં તં નિધાયૈવ તસ્મિન્ કૃત્વા પ્રસાદં ચ વસુન્ધરાયાઃ ।
ચતુર્દન્તાન્ ષટ્સહસ્રાન્ કરીન્દ્રાન્ પયોબ્ધિજાન્ પ્રાહિણોદ્દ્વારવત્યૈ ॥ ૨૦.૧૦૭॥

નરાધિપાન્ દેવગન્ધર્વનાગાન્ જિત્વાઽનીતં હેમરત્નોચ્ચરાશિમ્ ।
શતદ્વયં યોજનાનાં સમૃદ્ધં સમન્તતઃ પ્રાહિણોત્સ્વાં પુરીં સઃ ॥ ૨૦.૧૦૮॥

મહાવીર્યૈર્નૈરૃતૈ રાક્ષસેન્દ્રૈર્ભૌમાનીતૈર્નિરૃતિં યોધયિત્વા ।
સ પ્રાહિણોત્સર્વરત્નોચ્ચરાશિં ગજાંશ્ચ નારાયણ આદિદેવઃ ॥ ૨૦.૧૦૯॥

તત્રાપશ્યત્કન્યકા ભૂમિપાનાં ભૌમાનીતાઃ સમરે તાન્ વિજિત્ય ।
દ્વ્યષ્ટૌ સહસ્રાણિ શતં ચ રૂપશીલોદારા અક્ષતાઃ સદ્વ્રતસ્થાઃ ॥ ૨૦.૧૧૦॥

કાશ્ચિત્તત્રાઽસન્ દેવગન્ધર્વકન્યાસ્તાસાં પ્રધાના ત્વષ્ટૃપુત્રી કશેરુઃ ।
પુત્રા અગ્નેઃ પૂર્વમાસંશ્ચ તેઽથ સ્ત્રીત્વપ્રાપ્ત્યૈ ચક્રુરુગ્રં તપશ્ચ ॥ ૨૦.૧૧૧॥

ભાર્યાત્વાર્થે વાસુદેવસ્ય યોષિત્તનું તાસામિચ્છતીનાં સમીરઃ ।
અદાદ્વરં તપસાઽરાધિતઃ સન્ સ્ત્રીભૂતાસ્તે બદરીં સ પ્રજગ્મુઃ ॥ ૨૦.૧૧૨॥

નારાયણં તત્ર શુશ્રૂષમાણાઃ પ્રાપ્યાપ્સરસ્ત્વં રાજકુલેષુ જાતાઃ ।
કાશ્ચિત્સ્વર્ગે તા નિશામ્યૈવ કૃષ્ણં વવ્રુઃ પતિં સર્વગુણાભિરામમ્ ॥ ૨૦.૧૧૩॥

આજાનદેવૈઃ સર્વગુણૈઃ સમાસ્તાઃ સ્વભાવતોઽથેન્દિરાવેશતોઽતઃ ।
ગુણાધિકાસ્તાઃ શિબિકાસુ કૃષ્ણ આરોપયિત્વા પ્રાહિણોદ્દ્વારવત્યૈ ॥ ૨૦.૧૧૪॥

સમન્તતો યોજનાનાં શતે દ્વે પ્રવૃદ્ધમિન્દ્રસ્ય સ રત્નપર્વતમ્ ।
નિત્યામૃતસ્રાવિ જલેશ્વરસ્ય છત્રં ચ દોર્ભ્યાં ગરુડે ન્યધાદ્ધરિઃ ॥ ૨૦.૧૧૫॥

ચિક્ષલ્વ।સ્વયં ચ સત્યાસહિતઃ સમારુહત્સ ચાશ્રમેણૈવ યયૌ ત્રિવિષ્ટપમ્ ।
અભિપ્રયાતોઽખિલલોકપાલૈર્જનાર્દનઃ શક્રગૃહં વિવેશ ॥ ૨૦.૧૧૬॥

સમ્પૂજિતઃ સત્યભામાસહાયઃ શક્રેણ શચ્યા સહિતેન સાદરમ્ ।
દદાવદિત્યા અપિ કુણ્ડલે શુભે સમસ્તદેવૈર્મુનિભિશ્ચ વન્દિતઃ ॥ ૨૦.૧૧૭॥

તમાસુરાવેશવશાદજાનતી સત્યાં ચ સર્વપ્રભવૌ જગત્પ્રભૂ ।
નિર્દોષસૌખ્યૈકતનૂ શુભાશિષસ્તાભ્યાં દદૌ સાઽદિતિરાત્મપુત્રવત્ ॥ ૨૦.૧૧૮॥

અથો સદાનન્દચિદાત્મદેહઃ ન નન્દનોદ્યાનમજોઽનુરૂપયા ।
અનન્તશક્તિઃ સહ સત્યભામયા વિવેશ રન્તું પ્રિયયાઽખિલેશ્વરઃ ॥ ૨૦.૧૧૯॥

તયાઽચ્યુતોઽસૌ કનકાવદાતયા સુકુઙ્કુમાદિગ્ધપિશઙ્ગવાસસા ।
પૂર્ણેન્દુકોટ્યોઘજયન્મુખાબ્જયા રેમેઽમિતાત્મા જગદેકસુન્દરઃ ॥ ૨૦.૧૨૦॥

સર્વર્તુનિત્યોદિતસર્વવૈભવે સુરત્નચામીકરવૃક્ષસદ્મને ।
સદૈવ પૂર્ણેન્દુવિરાજિતે હરિશ્ચચાર દેવ્યા પવનાનુસેવિતે ॥ ૨૦.૧૨૧॥

વિદોષસં વિત્તનુરત્ર સત્તરું દદર્શ સત્યાઽમૃતમન્થનોદ્ભવમ્ ।
સા પારિજાતં મણિકાઞ્ચનાત્મકં સમસ્તકામપ્રદમાર્તિહારિણમ્ ॥ ૨૦.૧૨૨॥

દૃષ્ટ્વૈવ તં સુસ્મિતચન્દ્રિકાસ્ફુરન્મુખારવિન્દાઽસિતલોલલોચના ।
કપોલનિર્ભાતચલત્સુકુણ્ડલા જગાદ દેવાધિપતિં પતિં સતી ॥ ૨૦.૧૨૩॥

તરુર્જગજ્જીવદ મે ગૃહાઙ્ગણે સં સ્થાપનીયોઽયમચિન્ત્યપૌરુષ ।
ઇતીરિતસ્તાં કલશોપમસ્તનીમાલિઙ્ગ્ય દેવસ્તરુમુદ્બબર્હ ॥ ૨૦.૧૨૪॥

સ તેન વૃક્ષેણ સહૈવ કેશવસ્તયા ચદેવ્યાઽરુહદગ્ર્યપૌરુષમ્ ।
ખગેશ્વરં તચ્ચ નિશમ્ય શચ્યા પ્રચોદિતો વાસવ આગમત્સુરૈઃ ॥ ૨૦.૧૨૫॥

તાનાસુરાવેશયુતાન્ હરેશ્ચ બલપ્રકાશાય સમુદ્યતાન્ સુરાન્ ।
ન્યવારયચ્છાર્ઙ્ગશરાસનચ્યુતૈર્હરિપ્રિયા બાણવરૈઃ સમસ્તશઃ ॥ ૨૦.૧૨૬॥

નિરાયુધં વૈશ્રવણં ચકાર ચિક્ષેપ ચાબ્ધૌ ગરુડો જલેશ્વરમ્ ।
અક્ષ્લ્વી.પ્રધાનવાયોસ્તનયં તુ વાયું કોણાધિપં વહ્નિયમાદિકાનપિ ॥ ૨૦.૧૨૭॥

વિબોધ્ય શાર્ઙ્ગાત્થરવૈઃ સ્વકાં તનુમાવેશિતાનામસુરૈરગાદ્ધરિઃ ।
તે બોધિતાસ્તેન રણં વિસૃજ્ય યયુર્વિદિત્વા તમનાદિપૂરુષમ્ ॥ ૨૦.૧૨૮॥

શિવં ચ શક્રાર્થમુપાગતં હરિર્વ્યદ્રાવયચ્છાર્ઙ્ગવિનિઃ સૃતૈઃ શરૈઃ ।
સવાહનો દૂરતરે નિપાતિતો ગુરુત્મતા શમ્ભુરગાચ્છરાહતઃ ॥ ૨૦.૧૨૯॥

વિદ્રાવિતે બાણગણૈશ્ચ શૌરિણા હરે હરૌ વજ્રમવાસૃજદ્દ્રુતમ્ ।
શક્રોઽગ્રહીત્તં પ્રહસન્ જનાર્દનઃ કરેણ વામેન ચ ચાપજગ્મિવાન્ ॥ ૨૦.૧૩૦॥

અપાહસત્તં જગદેકસુન્દરી હરિપ્રિયાઽથો જગદેકમાતરમ્ ।
ઉવાચ શક્રો જગતાં જનિત્રે પ્રદર્શયામો વયમાત્મશૈશવમ્ ॥ ૨૦.૧૩૧॥

જગામ ચાથો શરણં જનાર્દનં સુરૈર્વૃતો દેવપતિઃ ક્ષમાપયન્ ।

શ્ૃઙ્ગં ચ દત્વા મણિપર્વતસ્ય પ્રણમ્ય દેવ્યા સહિતં જગદ્ગુરુમ્ ॥ ૨૦.૧૩૨॥

યયાચ એનં પરિરક્ષણાય શચીપતિઃ કેશવમર્જુનસ્ય ।
જગાદ કૃષ્ણોઽપિ ધરાતલ્. અસ્થિતે ન મય્યમું કશ્ચન જેષ્યતીતિ ॥ ૨૦.૧૩૩॥

તમર્જુનાર્થં વરમાપ્ય વાસવઃ પુનઃ પુનશ્ચક્રધરં પ્રણમ્ય ।
પ્રસન્નદૃષ્ટ્યા હરિણાઽભિવીક્ષિતો યયૌ મહાભાગવતઃ સ્વમાલયમ્ ॥ ૨૦.૧૩૪॥

કૃષ્ણોઽપ્યનુજ્ઞાપ્ય પુરન્દરં પુરીં નિજાં વ્રજન્નભ્યધિકં વ્યરોચત ।
કિરીટધારી વરકુણ્ડલોલ્લસન્મુખામ્બુજઃ પીતપટઃ સુકૌસ્તુભઃ ॥ ૨૦.૧૩૫॥

વિરોચમાનસ્ય સદા જગત્પ્રભોર્નવૈ વિશેષઃ ક્વચિદચ્યુતસ્ય ।
તથાઽપિ તત્સ્મારયિતું વચો ભવેદપેક્ષ્ય ચાલ્પજ્ઞમતિં પુરાણગમ્ ॥ ૨૦.૧૩૬॥

પ્રવિશ્ય ચેશઃ સ્વપુરીં સ યાદવૈઃ સુપૂજિતોઽન્તઃ પુરમેત્ય ચાઙ્ગણે ।
તરું પ્રિયાયા ન્યદધાદ્ગૃહસ્ય સહૈવ શ્ૃઙ્ગેણ ચ રત્નસદ્ગિરેઃ ॥ ૨૦.૧૩૭॥

પ્રદાય રત્નાનિ ચ સર્વસાત્ત્વતાં યથેષ્ટતસ્તા અપિ કન્યકાઃ પ્રભુઃ ।
ઉદ્વાહ્ય રેમે પૃથગેવ રત્નપ્રાસાદસંસ્થાભિરનન્તરૂપઃ ॥ ૨૦.૧૩૮॥

અક્ષ્લ્વીઇ।પૃથક્પૃથક્તાસુ દશૈવ પુત્રકાનધત્ત કન્યામપિ સર્વશઃ પ્રભુઃ ।
પ્રદ્યુમ્નસામ્બાવપિ ભાનુચારુદેષ્ણૌ ચ તેષાં નિતરાં ગુણાધિકાઃ ॥ ૨૦.૧૩૯॥

વિવસ્વતો યોઽવરજોઽદિતેઃ સુતઃ ખ્યાતશ્ચ નામ્ના સવિતેતિ કૃષ્ણાત્ ।
જાતઃ સ સત્યાજઠરેઽત્ર નામ્ના ભાનુસ્તુ ભૈષ્મ્યા અપિ ચારુદેષ્ણઃ ॥ ૨૦.૧૪૦॥

સ ચારુદેષ્ણોઽપિ હિ વિઘ્નરાજો યેઽન્યે ચ કૃષ્ણસ્ય સુતાઃ સમસ્તાઃ ।
તે ચૈવ ગીર્વાણગણાસ્તથાઽન્યે યે દ્વારકાયાં નિવસન્તિ સર્વે ॥ ૨૦.૧૪૧॥

તસ્યાં સમસ્તૈરભિપૂજ્યમાને દેવે સ્વપુર્યાં નિવસત્યનન્તે ।
યયૌ કદાચિત્સ તુ રૌગ્મિણેયઃ સામ્બેન સાર્ધં ભુજગેન્દ્રલોકમ્ ॥ ૨૦.૧૪૨॥

અજ્ઞાનતસ્તૈરભિયોધિતઃ સ જિગાય સર્વાનપિ વાસુકિં ચ ।
વિદ્રાપ્ય બાણૈરથ રત્નસઞ્ચયાન્ સમાદદે નેમુરમું તતસ્તે ॥ ૨૦.૧૪૩॥

તૈઃ પૂજિતઃ સામ્બસહાય આશુ મયં ચ માયાવિનમસ્ત્રવર્ષૈઃ ।
વિજિત્ય રુન્ધાનમનેન પૂજિતો યયૌ રથેનામ્બરગેન નાકમ્ ॥ ૨૦.૧૪૪॥

તત્રૈવ કૃષ્ણેન તુ પારિજાતે હૃતે જયન્તં પ્રજિગાય ચાઽજૌ ।
સં સ્પર્ધયાઽયાતમમુષ્ય ચાનુજં સામ્બોઽજયદ્વૃષભં નામ શસ્ત્રૈઃ ॥ ૨૦.૧૪૫॥

અસ્ત્રાણિ તાવસ્ત્રવરૈર્નિહત્ય તયોશ્ચ તાભ્યાં પ્રતિદગ્ધયાનૌ ।
વિદ્રાપ્ય તૌ બાણવરૈઃ સુરેન્દ્રસમ્પૂજિતૌ યયતુર્વિધયા ખે ॥ ૨૦.૧૪૬॥

સ વિધયા સામ્બમુદૂહ્ય રત્યા પ્રદત્તયા રુગ્મિણિનન્દનઃ પુરીમ્ ।
યયૌ તતો નારદ આગમદ્દ્રુતં જ્ઞાતું હરેર્બહુભાર્યાસુ વૃત્તિમ્ ॥ ૨૦.૧૪૭॥

તં દ્વ્યષ્ટસાહસ્રગૃહેષુ દૃષ્ટ્વા તાવત્સ્વરૂપૈર્વિહરન્તમેકમ્ ।
સુવિસ્મિતઃ પ્રયયૌ તં પ્રણમ્ય શક્રપ્રસ્થં પૂજિતશ્ચાત્ર પાર્થૈઃ ॥ ૨૦.૧૪૮॥

સ આજ્ઞયા બ્રહ્મણ આહ કૃષ્ણાં ક્રમાત્કર્તું ભીમ એવૈકસં સ્થામ્ ।
અન્યા દેવીઃ સ્વાપયિત્વા શરીરે તસ્યા ભારત્યાઃ પૂર્ણભોગાર્થમેવ ॥ ૨૦.૧૪૯॥

સુન્દોપસુન્દૌ ભ્રાતરૌ બ્રહ્મવાક્યાત્પરસ્પરાદન્યતો નૈવ વધ્યૌ ।
તિલોત્તમાર્થે નિહતૌ પરસ્પરં તયોર્વધાર્થે સૃષ્ટયા તેન દૈત્યૌ ॥ ૨૦.૧૫૦॥

ઋક્ષલક્ષ્ડતઃ પૃથગ્વત્સરતો ભવત્સુ ક્રમાત્કૃષ્ણા તિષ્ઠતાં યોઽન્યયુક્તામ્ ।
પશ્યેદ્વોઽસૌ વત્સરં તીર્થયાત્રાં કુર્યાદિતિ સ્માથ ચક્રુસ્તથા તે ॥ ૨૦.૧૫૧॥

તતઃ કદાચિદ્ધર્મરાજેન યુક્તાં શસ્ત્રાગારે વિપ્રગોરક્ષણાર્થમ્ ।
શસ્ત્રાદિત્સુઃ ફલ્ગુનોઽદ્રાક્સ શસ્ત્રૈર્દસ્યૂન્ હત્વા તીર્થયાત્રોન્મુખોઽભૂત્ ॥ ૨૦.૧૫૨॥

યુધિષ્ઠિરાદ્યૈઃ સૌહૃદાદ્વારિતોઽપિ યયૌ સત્યાર્થં સ કદાચિદ્યુનધામ્ ।
કુર્વન્ સ્નાનં માયયા નાગવધ્વા હૃતો લોકં ભુજગાનાં ક્ષણેન ॥ ૨૦.૧૫૩॥

તસ્યાઃ પિતા ગરુડેનાઽત્તપત્યુઃ પુત્રાકાઙ્ક્ષી ચોદયામાસ પાર્થમ્ ।
સં વત્સરબ્રહ્મચર્યે તુ પાર્થૈઃ કૃષ્ણાહેતોઃ સમયે સાધુ બદ્ધમ્ ॥ ૨૦.૧૫૪॥

પુનઃ પુનર્યાચ્યમાનઃ સ પાર્થઃ પુત્રાર્થમસ્યા ભુજગેન તસ્યામ્ ।
ઉત્પાદયામાસ સુતં કુજાં શં નામ્નૈરાવન્તં વરુણાવેશયુક્તમ્ ॥ ૨૦.૧૫૫॥

ગુણાઃ પિતુર્માતૃજાતિઃ સુતાનાં યસ્માત્સતાં પ્રાયશસ્તેન નાગઃ ।
બલી ચ પાર્થપ્રથમોદ્ભવત્વાન્માયાવિદસ્ત્રી ચ સુધાર્મિકશ્ચ ॥ ૨૦.૧૫૬॥

તતો યયાવર્જુનસ્તીર્થયાત્રાક્રમેણ પાણ્ડ્યાં સ્તનયોઽસ્ય માત્રા ।
સહ ત્યક્તો ભુજગૈર્દેવલોકે સમ્પૂજિતો ન્યવસદ્દૈવતૈશ્ચ ॥ ૨૦.૧૫૭॥

સત્યાત્યયાન્નૈવ દોષોઽર્જુનસ્ય તેજીયસશ્ચિન્તનીયઃ કથઞ્ચિત્ ।
શ્રેષ્ઠાપરાધાન્નાન્યદોષસ્ય લેપસ્તેજીયસાં નિર્ણયોઽયં હિ શાસ્ત્રે ॥ ૨૦.૧૫૮॥

અતિસ્નેહાચ્ચાગ્રજાભ્યાં તદસ્ય ક્ષાન્તં સુતા પાણ્ડ્યરાજેન દત્તા ।
સં વત્સરાન્તે ફલ્ગુનસ્યાભિરૂપા ચિત્રાઙ્ગદા વીરસેનેન તોષાત્ ॥ ૨૦.૧૫૯॥

સ વીરસેનસ્ત્વષ્ટુરં શો યમસ્યાપ્યાવેશયુક્સા ચ કન્યા શચી હિ ।
તારાદેહે સૂર્યજસ્યાઙ્ગસઙ્ગાત્સ્વર્ગં નાગાદન્તરિક્ષાદિહાઽસીત્ ॥ ૨૦.૧૬૦ ॥

તેનૈવ હેતોર્નાતિસામીપ્યમાસીત્તસ્યાઃ પાર્થે પુત્રિકાપુત્રધર્મા ।
તસ્યાં જાતો બભ્રુવાહોઽર્જુનેન પૂર્વં જયન્તઃ કામદેવાં શયુક્તઃ ॥ ૨૦.૧૬૧ ॥

પુત્રં વીરં જનયિત્વાઽર્જુનોઽતો ગચ્છન્ પ્રભાસં શાપતો ગ્રાહદેહાઃ ।
અલ્‌ઽમૂમુચચ્ચાપ્સરસઃ સ પઞ્ચ તાભિર્ગૃહીતઃ પ્રવિકૃષ્ય તીરમ્ ॥ ૨૦.૧૬૨ ॥

એવં હિ તાસાં શાપમોક્ષઃ પ્રદત્તો યદાઽખિલા વો યુગપત્સમ્પ્રકર્ષેત્ ।
એકસ્તદા નિજરૂપાપ્તિરેવેત્યલં તુષ્ટેન બ્રાહ્મણેનાઽનતાનામ્ ॥ ૨૦.૧૬૩ ॥

વિપ્રાપહાસાત્કુત્સિતયોનિતસ્તાઃ કન્યાતીર્થે પાણ્ડવઃ સમ્પ્રમુચ્ય ।
પ્રાપ્તઃ પ્રભાસં વાસુદેવાનુજાતાં શુશ્રાવ રામેણ સુયોધનોદ્યતામ્ ॥ ૨૦.૧૬૪ ॥

વિચિન્ત્ય કાર્યં યતિરૂપં ગૃહીત્વા કુશસ્થલીં પ્રયયૌ તં સમીપે ।
પ્રાપ્તં કૃષ્ણઃ પ્રાહસત્સં વિજાનન્ સત્યાસહાયઃ શયનીયાધિરૂઢઃ ॥ ૨૦.૧૬૫ ॥

સર્વજ્ઞા સા લીલયા હાસહેતુમપૃચ્છત્તં સોઽપિ તસ્યૈ બભાષે ।
લીલાભાજૌ દર્શનાર્થં પુનસ્તાવગચ્છતાં રૈવતં શૈલરાજમ્ ॥ ૨૦.૧૬૬ ॥

આક્રીડોઽસૌ વૃષ્ણિભોજાન્ધકાનાં તત્રાપશ્યત્કેશવઃ ફલ્ગુનં તમ્ ।
સ્વસુર્દાને સ પ્રતિજ્ઞાં રહોઽસ્મૈ ચક્રે કૃષ્ણોઽથાઽસદત્સર્વવૃષ્ણીન્ ॥ ૨૦.૧૬૭ ॥

દૃષ્ટ્વા ગિરૌ રૌહિણેયો યતીન્દ્રવેષં પાર્થં જ્ઞાતિયુક્તઃ પ્રણમ્ય ।
ચક્રે પૂજાં ફલ્ગુનોઽપિ પ્રણામં ગુણજ્યેષ્ઠોઽસીતિ ચક્રે બલાય ॥ ૨૦.૧૬૮ ॥

સર્વજ્ઞં તં વાગ્મિનં વીક્ષ્ય રામઃ કન્યાગારે વર્ષકાલે નિવાસમ્ ।
સત્કારપૂર્વં કારયેત્યાહ કૃષ્ણં નૈવેત્યૂચે કેશવો દોષવાદી ॥ ૨૦.૧૬૯ ॥

યુવા બલી દર્શનીયોઽતિવાગ્મી નાયં યોગ્યઃ કન્યકાગારવાસમ્ ।
ઇત્યુક્તવન્તં રામ આહાઽપ્રવિદ્યે નાસ્મિઞ્છઙ્કેત્યેવ લોકાધિનાથમ્ ॥ ૨૦.૧૭૦ ॥

નાસ્મન્મતે રોચતે ત્વન્મતં તુ સર્વેષાં નઃ પૂજ્યમેવાસ્તુ તેન ।
ઇત્યુક્ત્વા તં કેશવઃ સોદરાયૈ શુશ્રૂષસ્વેત્યાહ સન્તં યતીન્દ્રમ્ ॥ ૨૦.૧૭૧ ॥

નિત્યાપ્રમત્તા સાધુ સન્તોષયેતિ પ્રોક્તા તથા સાઽકરોત્સોઽપિ તત્ર ।
ચક્રે માસાન્ વાર્ષિકાન્ સત્કથાભિર્વાસં વાક્યં શ્રદ્દધાનો હરેસ્તત્ ॥ ૨૦.૧૭૨ ॥

સં યાચિતઃ ફલ્ગુનેનાઽહ વાક્યં યદ્વાસુદેવસ્તન્ન જાનાતિ કશ્ચિત્ ।

ઋતે પિત્રોર્વિપૃથોઃ સાત્યકેર્વા સુભદ્રાં તે પ્રદદાનીતિ સત્યમ્ ॥ ૨૦.૧૭૩॥

ચ્છિલડસ્ત્રે શસ્ત્રે તત્ત્વવિદ્યાસુ ચૈવ શિષ્યઃ શૈનેયો વાસુદેવેન્દ્રસૂન્વોઃ ।
તસ્માદસ્મૈ કથયામાસ કૃષ્ણઃ સ્વશિષ્યત્વાદ્વિપૃથોશ્ચાપિ સર્વમ્ ॥ ૨૦.૧૭૪॥

અન્યે સર્વે વાસુદેવસ્ય પાર્થાન્ પ્રિયાન્નિત્યં જાનમાના અપિ સ્મ ।
રામેણાડદિષ્ટા ઉદ્ધવોડથાડહુકાદ્યા હાર્દિક્યાદ્યા નૈવ દિત્સન્તિ જિષ્ણોઃ ॥ ૨૦.૧૭૫॥

દુર્યોધને દાતુમિચ્છન્તિ સર્વે રામપ્રિયાર્થં જાનમાના હરેસ્તત્ ।
અપ્યપ્રિયં રાક્ષસાવેશયુક્તાસ્તસ્માત્સર્વાન્ વઞ્ચયામાસ કૃષ્ણઃ ॥ ૨૦.૧૭૬॥

પ્રદ્યુમ્નસામ્બપ્રમુખાશ્ચ વઞ્ચિતા યયુસ્તીર્થાર્થં રામયુક્તાઃ સમગ્રાઃ ।
પિણ્ડોદ્ધારં તત્ર મહોત્સવેષ્વાવર્તત્સુ ક્વચિદૂચે સુભદ્રા ॥ ૨૦.૧૭૭॥

યતે તીર્થાનાચરન્ બાન્ધવાં સ્ત્વમદ્રાક્ષીર્નઃ કચ્ચિદિષ્ટાન્ સ્મ પાર્થાન્ ।
કુન્તીં કૃષ્ણાં ચેત્યાહ પૃષ્ટઃ સ પાર્થ ઓમિત્યેતેષામાહ ચાનામયં સઃ ॥ ૨૦.૧૭૮॥

ભૂયઃ સાડવાદીદ્ભગવન્નિન્દ્રસૂનુર્ગતસ્તીર્થાર્થં બ્રાહ્મણેભ્યઃ શ્રુતો મે ।
કચ્ચિદ્દૃષ્ટો ભવતેત્યોમિતિ સ્મ પાર્થોડપ્યૂચે ક્વેતિ સાડપૃચ્છદેનમ્ ॥ ૨૦.૧૭૯॥

અત્રૈવેતિ સ્મયમાનં ચ પાર્થં પુનઃ પુનઃ પર્યપૃચ્છચ્છુભાઙ્ગી ।
સોડપ્યાહોન્મત્તે સોડસ્મિ હીતિ સ્મયં સ્તાં ફુલ્લાક્ષી તં સા દદર્શાતિહૃષ્ટા ॥ ૨૦.૧૮૦॥

તતો હર્ષાલ્લજ્જયા ચોત્પલાક્ષી કિઞ્ચિન્નોચે પાર્થ એનામુવાચ ।
કામાવિષ્ટો મુખ્યકાલો હ્યયં નાવુદ્વાહાર્થોક્તસ્ત્વિતિ સા ચૈનમાહ ॥ ૨૦.૧૮૧॥

નાતિક્રમો વાસુદેવસ્ય યુક્તસ્તસ્માત્તેન સ્વપિતૃભ્યાં ચ દત્તામ્ ।
યુક્તો નિજૈર્બન્ધુભિશ્ચોત્સવે માં સમુદ્વહેત્યથ કૃષ્ણં સ દધ્યૌ ॥ ૨૦.૧૮૨॥

માતાપિતૃભ્યાં સહિતોડથ કૃષ્ણસ્તત્રૈવાડયાદ્વાસવશ્ચાથ શચ્યા ।
સમં મુનીન્દ્રૈઃ ફલ્ગુનેન સ્મૃતઃ સં સ્તત્રૈવાડગાત્પ્રીતિયુક્તો નિશાયામ્ ॥ ૨૦.૧૮૩॥

કૃષ્ણસ્તતઃ પુરુહૂતેન સાકં તયોર્વિવાહં કારયામાસ સમ્યક્ ।
માતાપિતૃભ્યાં સત્યકિનાડપિ યુક્તો મહોત્સવેડન્યાવિદિતો મુનીન્દ્રૈઃ ॥ ૨૦.૧૮૪॥

તતઃ કૃષ્ણઃ સ્યન્દનં ફલ્ગુનાર્થે નિધાય સ્વં પ્રયયૌ તદ્વ્રજન્યામ્ ।
ગતે ચ શક્રે રથમારુરોહ પ્રાતઃ પાર્થઃ સહિતો ભાર્યયૈવ ॥ ૨૦.૧૮૫॥

ચ્લી। સર્વાયુધૈર્યુક્તરથં સમાસ્થિતે ગૃહીતચાપે ફલ્ગુને દ્વારવત્યામ્ ।
આસીદ્રાવઃ કિઙ્ન્વિમેતત્ત્રિદણ્ડી કન્યાં હરત્યેષ કોદણ્ડપાણિઃ ॥ ૨૦.૧૮૬॥

તતસ્તુ તં સતનુત્રં મહેન્દ્રદત્તે દિવ્યે કુણ્ડલે વાસસી ચ ।
દિવ્યાનિ રત્નાનિ ચ ભૂષણાનિ દૃષ્ટ્વા બિભ્રાણં રક્ષિણોઽવારયન્ સ્મ ॥ ૨૦.૧૮૭ ॥

તતઃ સ આબદ્ધતલ્। આઙ્ગુલિત્રઃ સતૂણીરશ્ચાપમાયમ્ય બાણૈઃ ।
ચક્રેઽન્તરિક્ષં પ્રદિશો દિશશ્ચ નિરન્તરં શિક્ષયા વિદ્યયા ચ ॥ ૨૦.૧૮૮ ॥

ચક્રે સારથ્યં કેશવેનૈતદર્થે સુશિક્ષિતા તસ્ય સમ્યક્સુભદ્રા ।
તયા પાર્થો વારિતો નૈવ કશ્ચિત્ભિન્નત્વચં કૃતવાન્ ક્રીડમાનઃ ॥ ૨૦.૧૮૯ ॥

સ શિક્ષયા ત્વદ્ભુતયા શરૌઘૈર્વિદ્રાપ્ય તાન્ ભીષયિત્વૈવ સર્વાન્ ।
નિર્ગત્ય પુર્યા વિપૃથું દદર્શ રામેણ પુર્યા રક્ષણે સન્નિયુક્તમ્ ॥ ૨૦.૧૯૦ ॥

પ્રિયં કુર્વન્નિવ રામસ્ય સોઽપિ વ્યાજેન પાર્થં સેનયૈવાઽવૃણોત્તમ્ ।
કૃષ્ણાદેશાન્નૈવ પાર્થસ્ય ચક્રે સમ્યગ્રોધં યુયુધે ચ ચ્છલેન ॥ ૨૦.૧૯૧ ॥

એકો હ્યસૌ મરુતાં સૌમ્યનામા શુશ્રૂષાર્થં વાસુદેવસ્ય જાતઃ ।
તં યાદવં શરવર્ષૈર્વવર્ષ યથા ક્ષતં ન ભવેત્સવ્યસાચી ॥ ૨૦.૧૯૨ ॥

નિરાયુધં વિરથં ચૈવ ચક્રે પાર્થઃ સેનાં તસ્ય નૈવાહનચ્ચ ।
દૃષ્ટ્વા શરાં સ્તસ્ય તીક્ષ્ણાં સ્ત્વચોઽપિ નચ્છેદકાન્ વિપૃથુઃ સન્તુતોષ ॥ ૨૦.૧૯૩ ॥

શિક્ષાં પાર્થસ્યાધિકં માનયાન ઉપેત્ય પાર્થં ચ શશં સ સર્વમ્ ।
આજ્ઞાં વિષ્ણોઃ સન્નિયુદ્ધ્યન્નિવાસ્મૈ કૃત્તાયુધઃ ફલ્ગુનેનૈવ પૂર્વમ્ ॥ ૨૦.૧૯૪ ॥

તતઃ પરાજિતવચ્છીઘ્રમેત્ય શશં સ સર્વં હલિનેઽથ સોઽપિ ।
પ્રદ્યુમ્નસામ્બાદિયુતોઽથ કોપાદાયાત્પુરીં હન્તુકામોઽર્જુનં ચ ॥ ૨૦.૧૯૫ ॥

કૃષ્ણોઽપિ સર્વં વિપૃથોર્નિશમ્ય પ્રાપ્તઃ સુધર્માં વિમના ઇવાઽસીત્ ।
અવાઙ્મુખસ્તત્ર યદુપ્રવીરાઃ પ્રદ્યુમ્નાદ્યા આહુરુચ્ચૈર્નદન્તઃ ॥ ૨૦.૧૯૬ ॥

માયાવ્રતં તં વિનિહત્ય શીઘ્રં વયં સુભદ્રામાનયામઃ ક્ષણેન ।
ચ્લીઇ। ઇત્યુક્તવાક્યાનવદદ્બલસ્તાન્ કૃષ્ણાજ્ઞયા યાન્તુ ન સ્વેચ્છયૈવ ॥ ૨૦.૧૯૭ ॥

જ્ઞાતવ્યમેતસ્ય મતં પુરસ્તાદ્ધરેર્વિરોધે ન જયો ભવેદ્ધઃ ।
ઇત્યુક્તવાક્યે હલિનિ સ્મ સર્વે પપ્રચ્છુરાનમ્ય જનાર્દનં તમ્ ॥ ૨૦.૧૯૮ ॥

અથાબ્રવીદ્વાસુદેવોઽમિતૌજાઃ શ૿ૃણ્વન્તુ સર્વે વચનં મદીયમ્ ।
પુરૈવોક્તં તન્મયા કન્યકાયા માયાવ્રતો નાર્હતિ સન્નિધિસ્થિતિમ્ ॥ ૨૦.૧૯૯ ॥

તાં મે વાચં નાગ્રહીદગ્રજોઽયં બહૂન્ દોષાન્ વ્યાહરતોઽપ્યતો મયા ।
અનુલ્લઙ્ઘ્યત્વાદગ્રજોઽનુપ્રવૃત્તઃ કન્યાગૃહે વાસને કૂટબુદ્ધેઃ ॥ ૨૦.૨૦૦ ॥

અતીતશ્ચાયં કાર્યયોગોઽસમક્ષં હૃતા કન્યાઽતો નોઽત્ર કા માનહાનિઃ ।
ભૂયસ્તરાં માનિનસ્તસ્ય સા સ્યાજ્ જ્ઞાતા ચ વો વિપૃથોઃ પાર્થતાઽસ્ય ॥ ૨૦.૨૦૧॥

દેયા ચ કન્યા નાસ્તિ પાર્થેન તુલ્યો વરોઽસ્માકં કૌરવેયશ્ચ પાર્થઃ ।
પૌત્રશ્ચ કૃષ્ણસ્ય સુપૂર્ણશક્તેઃ પૈતૃષ્વસેયો વીરતમો ગુણાઢ્યઃ ॥ ૨૦.૨૦૨॥

અર્થ્યોઽસ્માભિઃ સ્વયમેવાહરત્સ શક્રાત્મજો નાત્ર નઃ કાર્યહાનિઃ ।
અનુદ્રુત્યૈનં યદિ ચ સ્યાત્પરાજયો હાનિર્દૃઢં યશસો વો ભવેત ॥ ૨૦.૨૦૩॥

જિત્વા યથૈનં કન્યકા ચાઽહૃતા ચેત્પરામૃષ્ટાં નૈવ કશ્ચિદ્ધિ લિપ્સેત્ ।
અતો ન મે રોચતે વોઽનુયાનમિત્યૂચિવાનાસ તૂષ્ણીં પરેશઃ ॥ ૨૦.૨૦૪॥

શ્રુત્વા હલી કૃષ્ણવાક્યં બભાષે મા યાત ચિત્તં વિદિતં મમાસ્ય ।
અસ્યાનુવૃત્તિર્વિજયાય નઃ સ્યાચ્છુભાય શાન્ત્યૈ પરતશ્ચ મુક્ત્યૈ ॥ ૨૦.૨૦૫॥

તતોઽર્જુનો યત્ર તિષ્ઠન્ન કશ્ચિત્પરાજયં યાતિ કૃષ્ણાજ્ઞયૈવ ।
રથેન તેનૈવ યયૌ સભાર્યઃ શક્રપ્રસ્થં ચાવિશદ્ભ્રાતૃગુપ્તમ્ ॥ ૨૦.૨૦૬॥

સમ્ભાવિતો ભ્રાતૃભિશ્ચાતિતુષ્ટૈરૂચેઽથ સર્વં તેષુ યચ્ચાઽઽત્મવૃત્તમ્ ।
શાન્તેષુ વાક્યાદાત્મનો યાદવેષુ કૃષ્ણો યુક્તો હલિનાઽઽગાચ્ચ પાર્થાન્ ॥ ૨૦.૨૦૭॥

સાર્દ્ધં યયૌ શકટૈ રત્નપૂર્ણૈઃ શક્રપ્રસ્થં પૂજિતસ્તત્ર પાર્થૈઃ ।
દદૌ તેષાં તાનિ રામેણ યુક્તસ્તથા કૃષ્ણાયૈ ભૂષણાનિ સ્વસુશ્ચ ॥ ૨૦.૨૦૮॥

ઋિલવ્ંઆસાનુષિત્વા કતિચિદ્રૌહિણેયો યયૌ પુરીં સ્વાં કેશવોઽત્રાવસચ્ચ ।
બહૂન્ વર્ષાન્ પાણ્ડવૈઃ પૂજ્યમાનઃ પ્રીતિં તેષામાદધાનોઽધિકાં ચ ॥ ૨૦.૨૦૯॥

આસન્ કૃષ્ણાયાઃ પઞ્ચ સુતા ગુણાઢ્યા વિશ્વેદેવાઃ પઞ્ચગન્ધર્વમુખ્યૈઃ ।
આવિષ્ટાસ્તે ચિત્રરથાભિતામ્રકિશોરગોપાલબલૈઃ ક્રમેણ ॥ ૨૦.૨૧૦॥

પ્રતિવિન્ધ્યઃ સુતસોમઃ શ્રુતાખ્યકીર્તિઃ શતાનીક ઉત શ્રુતક્રિયઃ ।
યુધિષ્ઠિરાદ્યૈઃ ક્રમશઃ પ્રજાતાસ્તેષાં દ્વયોશ્ચાવરજોઽભિમન્યુઃ ॥ ૨૦.૨૧૧॥

ચન્દ્રાં શયુક્તોઽતિતરાં બુધોઽસૌ જાતઃ સુભદ્રાજઠરેઽર્જુનેન ।
ધર્મેરશક્રાં શયુતોઽશ્વિનોશ્ચ તથૈવ કૃષ્ણસ્ય સ સન્નિધાનયુક્ ॥ ૨૦.૨૧૨॥

સર્વેઽપિ તે વીર્યવન્તઃ સુરૂપા ભક્તા વિષ્ણોઃ સર્વશાસ્ત્રેષ્વભિજ્ઞાઃ ।
મોદં યયુઃ પાણ્ડવાસ્તૈઃ સુતૈશ્ચ વિશેષતઃ સાત્ત્વતીનન્દનેન ॥ ૨૦.૨૧૩॥

તતઃ કદાચિત્ખાણ્ડવં કૃષ્ણપાર્થૌ ચિક્રીડિષૂ સત્યભામાસુભદ્રે ।

આદાય યાતૌ પરિચારકૈશ્ચ રથેન ગન્ધર્વરાનુગીતૌ ॥ ૨૦.૨૧૪॥

સ્વૈરં તયોસ્તત્ર વિક્રીડતોશ્ચ સ્ત્રીરત્નાભ્યાં મન્દવાતાનુજુષ્ટે ।
વને પ્રસૂનસ્તબકોરુરાજિતે જલે ચ તિગ્મદ્યુતિકન્યકાયાઃ ॥ ૨૦.૨૧૫॥

ભૂત્વા વિપ્રસ્તૌ યયાચેઽન્નમેત્ય કુશાનુરુચે ચ મતે રમેશિતુઃ ।
પાર્થઃ કીદૃક્તેઽન્નમિષ્ટં વદેતિ સ ચાવાદીદ્વહ્નિરહં વનાર્થી ॥ ૨૦.૨૧૬॥

પ્રયાજાન્ દેવાનનુયાજાંશ્ચ શુલ્કં હવિર્દાને દેવતાનામયાચિષમ્ ।
બલહ્રાસસ્તવ ભૂયાદિતિ સ્મ શપ્ત્વૈવ તે તાંશ્ચ દદુઃ પુરા મમ ॥ ૨૦.૨૧૭॥

પુનઃ પૂર્તિઃ કેન મે સ્યાદ્બલસ્યેત્યબ્જોદ્ભવં પૃષ્ટવાનસ્મિ નત્વા ।
યદા વનં ખાણ્ડવં હિ ત્વમત્સિ તદા બલં તે ભવતીતિ સોઽબ્રવીત્ ॥ ૨૦.૨૧૮॥

શક્રસ્યેદં ખાણ્ડવં તેન વિઘ્નં કરોત્યસૌ તેન વાં પ્રાર્થયામિ ।
ઇત્યુક્તે તં પાર્થ ઊચે યદિ સ્યાદ્રથો ધનુશ્ચાથ શક્રં નિરોત્સ્યે ॥ ૨૦.૨૧૯॥

નરાવેશાદન્નદાનપ્રતિશ્રવાત્સ્વસ્યાપિ શક્રસ્ય વિરોધમૈચ્છત્ ।
પાર્થઃ કૃષ્ણસ્ય પ્રેરણાચ્ચૈવ વહ્નિઃ પાર્થં યયાચે શક્રવિરોધશાન્ત્યૈ ॥ ૨૦.૨૨૦॥

અલ્પ્વંઅહિ સ્વદત્તસ્ય પુનઃ સ વૈરં શક્રઃ કુર્યાત્સ્વયમિન્દ્રો હિ પાર્થઃ ।
નાપ્રેરિતો વિષ્ણુના તસ્ય રોધં પાર્થઃ કુર્યાદિતિ કૃષ્ણં યયાચે ॥ ૨૦.૨૨૧॥

નચાયુક્તઃ કેશવેનૈષ શક્ત ઇતિ કૃષ્ણાદાપ ભૂયોઽપ્યનુજ્ઞામ્ ।
યયૌ સમીપં ચ હરેર્બદર્યામાદાય ચક્રં ચામુતઃ કેશવેઽદાત્ ॥ ૨૦.૨૨૨॥

ચક્રં ગોમન્તે કૃષ્ણમાપાપિ પૂર્વં ભક્ત્યા વહ્નિઃ કેશવેઽદાત્પુનસ્તત્ ।
ચક્રં ચ વિષ્ણોર્બહુધા વ્યવસ્થિતં તદગ્નિદત્તં પ્રાક્તનં ચૈકધાઽસીત્ ॥ ૨૦.૨૨૩॥

ધનુશ્ચ ગાણ્ડીવમથાબ્જજસ્ય કરોતિ યેનાખિલસં હૃતિં સઃ ।
અં શેન દત્તં તદુમાપતેશ્ચ શક્રસ્ય સોમસ્ય જલેશિતુશ્ચ ॥ ૨૦.૨૨૪॥

તેનૈવ તે જિગ્યુરથો જગત્ત્રયં પ્રસાદતસ્તે ક્રમશોઽબ્જયોનેઃ ।
અનન્યધાર્યં વિજયાવહં ચ ભારેણ લક્ષસ્ય સમં શુભાવહમ્ ॥ ૨૦.૨૨૫॥

રથં ચ શુભ્રાશ્વયુતં જયાવહં તૂણૌ તથાચાક્ષયસાયકૌ શુભૌ ।
ધ્વજં ચ રામસ્ય હનૂમદઙ્કમાદાય સર્વં વરુણાદર્જુનેઽદાત્ ॥ ૨૦.૨૨૬॥

વિશેષતો ધ્વજસં સ્થે હનૂમત્યજેયતા સ્યાજ્જયરૂપો યતોઽસૌ ।
સર્વં ચ તદ્દિવ્યમભેદ્યમેવ વિદ્યુત્પ્રભા જ્યા ચગાણ્ડીવસં સ્થા ॥ ૨૦.૨૨૭॥

ગાણ્ડીવમપ્યાસ કૃષ્ણપ્રસાદાચ્છક્યં ધર્તું પાણ્ડવસ્યાપ્યધાર્યમ્ ।
દેવૈશ્ચ તૈર્બ્રહ્મવરાદ્ધૃતં તદ્બ્રહ્મૈવ સાક્ષાત્પ્રભુરસ્ય ધારણે ॥ ૨૦.૨૨૮॥

ઇન્દ્રસ્ય દત્તશ્ચ વરઃ સ્વયમ્ભુવા તેનાપિ પાર્થસ્ય બભૂવ ધાર્યમ્ ।
ઇન્દ્રો હ્યસૌ ફલ્ગુનત્વેન જાતસ્તતઃ સોઽસ્ત્રૈઃ શરશાલાં ચકાર ॥ ૨૦.૨૨૯॥

સ યોજનદ્વાદશકાભિવિસ્તૃતં પુરં ચકારાઽશુ પુરન્દરાત્મજઃ ।
હુતાશનોઽપ્યાશુ વનં પ્રગૃહ્ય પ્રભક્ષયામાસ સમુદ્ધતાર્ચિઃ ॥ ૨૦.૨૩૦॥

પ્રભક્ષ્યમાણં નિજકક્ષમીક્ષ્ય સન્ધુક્ષયામાસ તદાઽશુશુક્ષણિમ્ ।
અક્ષોપમાભિર્બહુલેક્ષણોઽમ્ભસાં ધારાભિરાક્ષુબ્ધમનાઃ ક્ષયાય ॥ ૨૦.૨૩૧॥

અસ્ત્રૈસ્તુ વૃષ્ટિં વિનિવાર્ય કૃષ્ણઃ પાર્થશ્ચ શક્રં સુરપૂગયુક્તમ્ ।
ચ્ચિલ્વઽયુદ્ધ્યતાં સોઽપિ પરાજિતોઽભૂત્પ્રીતશ્ચ દૃષ્ટ્વા બલમાત્મનસ્તત્ ॥ ૨૦.૨૩૨॥

સ્નેહં ચ કૃષ્ણસ્ય તદર્જુને ધૃતં વિલોક્ય પાર્થસ્ય બલં ચ તાદૃશમ્ ।
નિવર્ત્ય મેઘાનતિતુષ્ટચિત્તઃ પ્રણમ્ય કૃષ્ણં તનયં સમાશ્લિષત્ ॥ ૨૦.૨૩૩॥

વિષ્ણુશ્ચ શક્રેણ સહેત્ય કેશવં સમાશ્લિષન્નિર્વિશેષોઽપ્યનન્તમ્ ।
સ કેવલં ક્રીડમાનઃ સશક્રઃ સ્થિતો હિ પૂર્વં યુયુધે ન કિઞ્ચિત્ ॥ ૨૦.૨૩૪॥

બ્રહ્મા ચશર્વશ્ચ સમેત્ય કૃષ્ણં પ્રણમ્ય પાર્થસ્ય ચ કૃષ્ણનામ ।
સઞ્ચક્રતુશ્ચાપિ શિક્ષાપ્રકર્ષાઞ્ચક્રુશ્ચ સર્વે સ્વાસ્ત્રદાને પ્રતિજ્ઞામ્ ॥ ૨૦.૨૩૫॥

અનુજ્ઞાતાસ્તે પ્રયયુઃ કેશવેન ક્રીડાર્થમિન્દ્રો યુયુધે હિ તત્ર ।
પ્રીત્યા કીર્તિં દાતુમપ્યર્જુનસ્ય તતસ્તુષ્ટઃ સહ દેવૈસ્તયોઃ સઃ ॥ ૨૦.૨૩૬॥

દૈત્યાશ્ચ નાગાશ્ચ પિશાચયક્ષા હતાઃ સર્વે તદ્વનસ્થા હિતાભ્યામ્ ।
ઋતે ચતુષ્પક્ષિણશ્ચાશ્વસેનં મયં ચ નાન્યત્કિઞ્ચિદાસાત્ર મુક્તમ્ ॥ ૨૦.૨૩૭॥

અયમગ્ને જરિતેત્યાદિમન્ત્રૈઃ સ્તુત્વા વહ્નિં પક્ષિણો નોપદગ્ધાઃ ।
અશ્વસેનઃ પુત્રકસ્તક્ષકસ્ય માત્રા ગ્રસ્તઃ પ્રાતિલોમ્યેન કણ્ઠે ॥ ૨૦.૨૩૮॥

છિન્નેઽર્જુનેનાન્તરિક્ષે પતન્ત્યાસ્તસ્યાઃ શક્રેણાવિતશ્છિન્નપુચ્છઃ ।
વધાન્માતુઃ પુચ્છભઙ્ગાચ્ચ રોષાદ્ધન્તું પાર્થં કર્ણતૂણીરગોઽભૂત્ ॥ ૨૦.૨૩૯॥

મયઃ કૃષ્ણેનાઽત્તચક્રેણ દૃષ્ટો યયૌ પાર્થં શરણં જીવનાર્થી ।
પાર્થાર્થમેનં ન જઘાન કૃષ્ણઃ સ્વભક્તશ્ચેત્યતિમાયં પરેશઃ ॥ ૨૦.૨૪૦॥

દેવારિરિત્યેવ મયિ પ્રકોપઃ કૃષ્ણસ્ય તેનાહમિમં પુરન્દરમ્ ।
પાર્થાત્મકં શરણં યામિ તેન કૃષ્ણપ્રિયઃ સ્યામિતિ તસ્ય બુદ્ધિઃ ॥ ૨૦.૨૪૧॥

પ્રાણોપકૃત્પ્રત્યુપકારમાશુ કિં તે કરોમીતિ સ પાર્થમાહ ।
કૃષ્ણપ્રસાદાદ્ધિ ભવાન્ વિમુક્તસ્તસ્મૈ કરોત્વિત્યવદત્સ પાર્થઃ ॥ ૨૦.૨૪૨॥

કૃષ્ણોઽપિ રાજ્ઞોઽતિવિચિત્રરૂપસભાકૃતાવદિશત્તાં સ ચક્રે ।
અનિર્ગમં પ્રાણિનામર્થિતૌ તૌ હુતાશનેનાથ વિધાય જગ્મતુઃ ॥ ૨૦.૨૪૩॥

અલ્વી। દૃષ્ટ્વા ચ તૌ પાણ્ડવાઃ સર્વ એવ મહામુદં પ્રાપુરેતન્નિશમ્ય ।
કૃષ્ણોઽપિ પાર્થૈર્મુમુદેઽનન્તશક્તિસુખજ્ઞાનપ્રાભવૌદાર્યવીર્યઃ ॥ ૨૦.૨૪૪॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
ખાણ્ડવદાહો નામ વિંશોઽધ્યાયઃ ॥

## અથ એકવિંશોઽધ્યાયઃ ।

(પાણ્ડવવનપ્રવેશઃ)

ॐ । જનાર્દનાજ્ઞયા મયઃ સમસ્તકૌતુકોત્તરામ્ ।
સભાં વિધાય ભૂભૃતે દદૌ ગદાં વૃકોદરે ॥ ૨૧.૧॥

સ વાયુધારિતાં ગદાં હિ યૌવનાશ્વભૂભૃતા ।
પ્રસાદતોઽસ્ય લમ્ભિતામવાપ્ય મોદમાપ હ ॥ ૨૧.૨॥

પુનશ્ચ વત્સરદ્વયં સમુષ્ય કેશવો યયૌ ।
સમર્ચિતશ્ચ પાણ્ડવૈર્વિયોજનેઽસ્ય ચાક્ષમૈઃ ॥ ૨૧.૩॥

તતો વસન્ સ્વપુર્યજઃ ક્વચિદ્રવિગ્રહે હરિઃ ।
સદારપુત્રબાન્ધવઃ સમન્તપઞ્ચકં યયૌ ॥ ૨૧.૪॥

પૃથાસુતાશ્ચ સર્વશઃ સદારપુત્રમાતૃકાઃ ।
ક્ષિતીશ્વરાશ્ચ સર્વશઃ પ્રિયાપ્રિયા હરેશ્ચ યે ॥ ૨૧.૫॥

તથૈવ નન્દગોપકઃ સદારગોપગોપિકઃ ।
મુનીશ્વરાશ્ચ સર્વતઃ સમીયુરત્ર ચ પ્રજાઃ ॥ ૨૧.૬॥

પ્રિયાશ્ચ યે રમેશિતુર્હરિં ત્રિરૂપમેત્ય તે ।
વસિષ્ઠવૃષ્ણિનન્દનં ભૃગૂત્તમં તથાઽર્ચયન્ ॥ ૨૧.૭॥

કૃતાર્થતાં ચ તે યયૂ રમેશપાદદર્શનાત્ ।
રવિગ્રહે સમાપ્લુતા ભૃગૂદ્વહોત્થતીર્થકે ॥ ૨૧.૮॥

અનુગ્રહં વિધાય સ સ્વકેષુ કેશવસ્ત્રિવૃત્ ।
અયાજયચ્ચ શૂરજં મખૈઃ સમાપ્તદક્ષિણૈઃ ॥ ૨૧.૯॥

સમસ્તલોકસં સ્થિતાત્મભક્તિમજ્જનસ્ય સઃ ।
સુકાલદર્શનાત્પરં વ્યધાદનુગ્રહં હરિઃ ॥ ૨૧.૧૦॥

તતો યયૌ સ્વકાં પુરીં પૃથાસુતૈઃ સહાચ્યુતઃ ।
ચકાર તત્ર ચાઽહ્નિકં ક્રતું મહાશ્વમેધકમ્ ॥ ૨૧.૧૧॥

ત્રિલક્ષયં સભીમફલ્ગુના હરે રથં સમાસ્થિતાઃ ।
વ્યચારયન્ હરેઃ સુતા દિનસ્ય પાદમાત્રતઃ ॥ ૨૧.૧૨॥

જિતાઃ સમસ્તભૂભૃતો જરાસુતાદયઃ ક્ષણાત્ ।
વૃકોદરાદિભિસ્તુ તૈર્હયશ્ચ દિવ્ય આયયૌ ॥ ૨૧.૧૩॥

હયઃ સ કૃષ્ણનિર્મિતો દિનેન લક્ષયોજનમ્ ।
ક્ષમો હિ ગન્તુમઞ્જસા દિનાશ્વમેધસિદ્ધયે ॥ ૨૧.૧૪॥

પરાશરાત્મજો હરિર્હરિં યદા ત્વદીક્ષયત્ ।
તદાઽસસાદ હ દ્વિજસ્તૃણાવહો રુરાવ ચ ॥ ૨૧.૧૫॥

બ્રજન્તિ જન્મનોઽનુ મે સદા સુતા અદૃશ્યતામ્ ।
ઇતીરિતેઽર્જુનોઽબ્રવીદહં હિ પામિ તે સુતાન્ ॥ ૨૧.૧૬॥

ન કૃષ્ણરામકાર્ષ્ણિભિઃ સુતા નુ મેઽત્ર પાલિતાઃ ।
ક્વ તેઽત્ર શક્તિરિત્યમું જગાદ સોઽર્જુનં દ્વિજઃ ॥ ૨૧.૧૭॥

તદા જગાદ ફલ્ગુનોઽસુરૈર્વિદૂષિતાત્મના ।
ન વિપ્ર તાદૃશોઽસ્મ્યહં યથૈવ કેશવાદયઃ ॥ ૨૧.૧૮॥

મયા જિતા હિખાણ્ડવે સુરાસ્તથાઽસુરાનહમ્ ।
નિવાતવર્મનામકાન્ વિજેષ્ય ઉત્તરત્ર હિ ॥ ૨૧.૧૯॥

ઉદીર્ય ચેતિ કેશવં સ ઊચિવાન્ વ્રજામ્યહમ્ ।
ઇતીરિતોઽવદદ્ધરિસ્તવાત્ર શક્યતે નુ કિમ્ ॥ ૨૧.૨૦॥

વિલજ્જમાનમીક્ષ્ય તં જગાદ કેશવોઽરિહા ।
વ્રજેતિ સ પ્રતિશ્રવં ચકાર હાપ્યરક્ષણે ॥ ૨૧.૨૧॥

વહ્નિં પ્રવેક્ષ્યેઽશક્તશ્ચેદિત્યુક્ત્વા સર્વયાદવૈઃ ।
યયૌ ન રામપ્રદ્યુમ્નાવનિરુદ્ધં ચ કેશવઃ ।

ન્યયોજયત્તત્સહાયે યશસ્તેષ્વભિરક્ષિતુમ્ ॥ ૨૧.૨૨॥

અ્લક્ષ્.પ્રિયો હિ નિતરાં રામઃ કૃષ્ણસ્યાનુ ચ તં સુતઃ ।
અનિરુદ્ધઃ કાર્ષ્ણિમનુ પ્રદ્યુમ્નાદ્યોઽજનિષ્ટ હિ ।
રુગ્મિપુત્ર્યાં રુગ્મવત્યામાહૃતાયાં સ્વયમ્બરે ॥ ૨૧.૨૩॥

રતિરેવ હિ યા તસ્યાં જાતોઽસૌ કામનન્દનઃ ।
પૂર્વમપ્યનિરુદ્ધાખ્યો વિષ્ણોસ્તન્નામ્ન એવ ચ ।
આવેશયુક્તો બલવાન્ રૂપવાન્ સર્વશાસ્ત્રવિત્ ॥ ૨૧.૨૪॥

તસ્માત્તાં સ્ત્રીનૃતે કૃષ્ણઃ પાર્થસાહાય્યકારણાત્ ।
ન્યયોજયત્સૂતિકાલે બ્રાહ્મણ્યાઃ સ ચ ફલ્ગુનઃ ॥ ૨૧.૨૫॥

અસ્ત્રૈશ્ચકાર દિગ્બન્ધં કુમારોઽથાપિતુ ક્ષણાત્ ।
અદર્શનં યયૌ પાર્થો વિષણ્ણઃ સહ યાદવૈઃ ।
અધિક્ષિપ્તો બ્રાહ્મણેન યયૌ યત્ર શ્રિયઃ પતિઃ ॥ ૨૧.૨૬॥

વહ્નિં વિવિક્ષન્તમમું નિવાર્ય યયૌ સવિપ્રઃ સહફલ્ગુનો હરિઃ ।
આશામુદીચીં બૃહતા રથેન ક્ષણેન તીર્ત્વૈવ ચ સપ્તવારિધીન્ ॥ ૨૧.૨૭॥

દદુશ્ચ માર્ગં ગિરયોઽબ્ધયસ્તથા વિદાર્ય ચક્રેણ તમોઽન્ધમીશઃ ।
ઘનોદકં ચાપ્યતિતીર્ય તત્ર દદર્શ ધામ સ્વમનન્તવીર્યઃ ॥ ૨૧.૨૮॥

સં સ્થાપ્ય દૂરે સરથં સવિપ્રં પાર્થં સ્વરૂપે દ્વિચતુષ્કબાહૌ ।
સમસ્તરત્નોજ્જ્વલદિવ્યભૂષણે વિવેશ નિત્યોરુગુણાર્ણવે પ્રભુઃ ॥ ૨૧.૨૯॥

સહસ્રમૂર્ધન્યુરુશેષભોગ આસીનરૂપેઽમિતસૂર્યદીધિતૌ ।
રમાસહાયે તટિદુજ્જ્વલામ્બરે મુક્તૈર્વિરિઞ્ચાદિભિરર્ચિતે સદા ॥ ૨૧.૩૦॥

સ્થિત્વૈકરૂપેણ મુહૂર્તમીશ્વરો વિનિર્યયૌ વિપ્રસુતાન્ પ્રગૃહ્ય ।
સુનન્દનન્દાદય એવ પાર્ષદાસ્તે વૈષ્ણવા ભૂમિતલ્. એ પ્રજાતાઃ ॥ ૨૧.૩૧॥

દર્પં નિહન્તું હરિરર્જુનસ્ય સમાનયદ્વિપ્રસુતાન્ પરેશઃ ।
પ્રીતિર્મહત્યેવ યતોઽર્જુને હરેઃ સં શિક્ષયામાસ તતઃ સ એનમ્ ॥ ૨૧.૩૨॥

અપ્રાકૃતાત્સદનાદ્વાસુદેવો વિસ્સૃત્ય સૂર્યાધિકલક્ષદીધિતેઃ ।
રથં સમારુહ્ય સપાર્થવિપ્ર આગાત્સુતાંશ્ચૈવ દદૌ દ્વિજાય ॥ ૨૧.૩૩॥

અ્લિક્ષ।લોકશિક્ષાર્થમેવાસૌ પ્રાયશ્ચિત્તં ચ ચાલને ।
ચક્રે સાર્દ્ધમુહૂર્તેન સમાગમ્ય પુનર્મખમ્ ॥ ૨૧.૩૪॥

બ્રહ્માદીનાગતાંશ્ચૈવ સદા સ્વપરિચારકાન્ ।
પૂજયિત્વાઽભ્યનુજ્ઞાય બ્રાહ્મણાનપ્યપૂજયત્ ॥ ૨૧.૩૫॥

સસ્નાવવભૃથં કૃષ્ણઃ સદારઃ સસુહૃજ્જનઃ ।
આયાન્તં દ્વારકાં કૃષ્ણં દન્તવક્રો રુરોધ હ ॥ ૨૧.૩૬॥

જઘાન ગદયા કૃષ્ણસ્તં ક્ષણાત્સવિડૂરથમ્ ।
વિડૂરથસ્તમોઽગચ્છદ્દન્તવક્રે ચ યોઽસુરઃ ॥ ૨૧.૩૭॥

હરેઃ પાર્ષદઃ ક્ષિપ્રં હરિમેવ સમાશ્રિતઃ ।
કૃષ્ણે પ્રાપ્તે સ્વલોકં ચ નિસ્સૃત્યાસ્માત્સ્વરૂપતઃ ।
એકીભાવં સ્વરૂપેણ દ્વારપેણ ગમિષ્યતિ ॥ ૨૧.૩૮॥

તતઃ કૃષ્ણઃ પુરીમેત્ય બોધયામાસ ફલ્ગુનમ્ ।
કિમેતદ્દૃષ્ટમિત્યેવ તેન પૃષ્ટો રમાપતિઃ ॥ ૨૧.૩૯॥

અયં દ્વીપઃ સાગરશ્ચ લક્ષયોજનવિસ્તૃતૌ ।
તદન્યે તુ ક્રમેણૈવ દ્વિગુણેનોત્તરોત્તરાઃ ॥ ૨૧.૪૦॥

અન્ત્યાધ્યર્દ્ધસ્થલં હૈમં બાહ્યતો વાજ્લેપિકમ્ ।
એતત્સર્વં લોકનામ હ્યેતસ્માદ્દ્વિગુણં તમઃ ।
અન્ધં યત્ર પતન્ત્યુગ્રા મિથ્યાજ્ઞાનપરાયણાઃ ॥ ૨૧.૪૧॥

ઘનોદકં તદ્દ્વિગુણં તદન્તે ધામ મામકમ્ ।
યત્તદ્દૃષ્ટં ત્વયા પાર્થ તત્ર મુક્તૈરજાદિભિઃ ।
સેવ્યમાનઃ સ્થિતો નિત્યં સર્વૈઃ પરમપૂરુષઃ ॥ ૨૧.૪૨॥

લોકાલોકપ્રદેશસ્તુ પઞ્ચાશલ્લક્ષવિસ્તૃતઃ ।
સપઞ્ચાશત્સહસ્રશ્ચ તસ્યાપિ ગણનં તથા ॥ ૨૧.૪૩॥

યોજનાનાં પઞ્ચવિં શત્કોટયો મેરુપર્વતાત્ ।
અબ્લક્ષીહતસૃષ્વપિ દિક્ષૂર્ધ્વમધશ્ચાણ્ડં પ્રકીર્તિતમ્ ॥ ૨૧.૪૪॥

અબગ્નીરનભોહઽ ન્કૃન્મહત્તત્ત્વગુણત્રયૈઃ ।
ક્રમાદ્દશોત્તરૈરેતદાવૃતં પરતસ્તતઃ ॥ ૨૧.૪૫॥

વ્યાપ્તોઽહં સર્વગોઽનન્તોઽનન્તરૂપો નિરન્તરઃ ।
અનન્તશીર્ષોઽનન્તાક્ષોઽનન્તપાદકરોરુકઃ ।
અનન્તગુણમાહાત્મ્યશ્ચિદાનન્દશરીરકઃ ॥ ૨૧.૪૬॥

મદ્વશા એવ સર્વેઽપિ ત્વં ચાન્યે ચ ધનઞ્જય ।
મત્પ્રસાદાદ્બલં ચૈવ વિજયશ્ચાખિલા ગુણાઃ ।
તસ્માન્ન વિસ્મયઃ કાર્યો ન દર્પશ્ચ ત્વયાઽનઘ ॥ ૨૧.૪૭ ॥

“મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ।
મામેવૈષ્યસિ સત્યં તે પ્રતિજાને પ્રિયોઽસિ મે” (૭૨) ।
ઇત્યુક્તઃ પ્રણિપત્યૈનં ક્ષમસ્વેત્યાહ ફલ્ગુનઃ ॥ ૨૧.૪૮ ॥

ઉષિત્વા કતિચિન્માસાન્ યયુઃ સર્વેઽપિ પાણ્ડવાઃ ।
અનુજ્ઞાતાઃ કેશવેન ભક્તિનમ્રધિયોઽચ્યુતે ।
સમ્ભાવિતાઃ કેશવેન સૌહાર્દેનાધિકેન ચ ॥ ૨૧.૪૯ ॥

તતઃ કદાચિત્પ્રવરે સભાતલ્। એ ધર્માત્મજો રાજભિર્ભ્રાતૃભિશ્ચ ।
વૃતો નિશમ્યૈવ સભાઃ સુરાણાં યથા સ્થિતા નારદમન્વપૃચ્છત્ ॥ ૨૧.૫૦ ॥

અન્તરિક્ષં ત્વયા પ્રોક્તં લક્ષયોજનમુચ્છ્રિતમ્ ।
અર્દ્ધકોટ્યુચ્છ્રિતઃ સ્વર્ગો વિમાનાવલિસઙ્કુલઃ ॥ ૨૧.૫૧ ॥

ભુવઃ સ્વર્ગશ્ચ કોટ્યૈવ યોજનાનાં પ્રવિસ્તૃતૌ ।
મહર્જનસ્તપશ્ચૈવ ક્રમાદધ્યર્દ્ધયોજનાઃ ।
પઞ્ચાશત્કોટિવિસ્તારા યોજનાનાં સમસ્તશઃ ॥ ૨૧.૫૨ ॥

યાવન્ત એતે મિલ્। ઇતાસ્તત્પ્રમાણ ઉદીરિતઃ ।
સત્યાખ્યો બ્રહ્મલોકસ્તુ યત્ર બ્રહ્મા વિરાજતે ॥ ૨૧.૫૩ ॥

(૭૨) ભગવદ્ગીતા ૧૮.૬૫

ઞ્લ્ક્ષીઇ। તતશ્ચ દ્વિગુણઃ પ્રોક્તો વિષ્ણુલોકઃ સનાતનઃ ।
ઉત્તરોત્તરતઃ સર્વે સુખે શતગુણોત્તરાઃ ॥ ૨૧.૫૪ ॥

અનન્તજનસમ્પૂર્ણા અપિ તે હીચ્છયા હરેઃ ।
અવકાશવન્તો દિવ્યત્વાત્પૂર્યન્તે ન કદાચન ।
સર્વકામસુખૈઃ પૂર્ણા દિવ્યસ્ત્રીપુરુષોજ્જ્વલાઃ ॥ ૨૧.૫૫ ॥

દિવ્યરત્નસમાકીર્ણં તથા પાતાલ્। અસપ્તકમ્ ।
અધસ્તાચ્છેષદેવેન બલિના સમધિષ્ઠિતમ્ ॥ ૨૧.૫૬ ॥

કામભોગસમાયુક્તા બહુવર્ષસહસ્રિણઃ ।
સપ્તદ્વીપેષુ પુરુષા નાર્યશ્ચોક્તાઃ સુરૂપિણઃ ॥ ૨૧.૫૭ ॥

એષાં ચ સર્વલોકાનાં ધાતા નારાયણઃ પરઃ ।
વિષ્ણુલોકસ્થિતો મુક્તૈઃ સદા સર્વૈરુપાસ્યતે ॥ ૨૧.૫૮॥

સેવકા બ્રહ્મણશ્ચૈવ દેવા વેદાશ્ચ સર્વશઃ ।
શક્રશ્ચ મુનયઃ સર્વે હરિશ્ચન્દ્રશ્ચ ભૂમિપઃ ॥ ૨૧.૫૯॥

અખિલા અપિ રાજાનઃ પાણ્ડુશ્ચાસ્મત્પિતા મુને ।
યમસ્યૈવાનુગાઃ પ્રોક્તા રાજભિસ્તૈર્યમેન ચ ॥ ૨૧.૬૦॥

ઉપાસ્યમાનો ભગવાન્ રામો યમસભાતલ્। એ ।
ઉક્ત ઇન્દ્રેણ ચોપાસ્યો વામનાત્મા જનાર્દનઃ ॥ ૨૧.૬૧॥

પ્રાદુર્ભાવાશ્ચ નિખિલા બ્રહ્મણોપાસિતાઃ સદા ।
વરુણસ્યાનુગા નાગાસ્તત્ર મત્સ્યાકૃતિર્હરિઃ ।
ગન્ધર્વા ધનદસ્યાપિ તત્ર કલ્કી હરિઃ પ્રભુઃ ॥ ૨૧.૬૨॥

રુદ્રસ્યોગ્રાણિ ભૂતાનિ નૃસિં હાત્મા શિવેન ચ ।
ઉપાસ્યતે સદા વિષ્ણુરિત્યાદ્યુક્તં ત્વયાઽનઘ ।
સર્વરત્નસ્થલાન્ દિવ્યાન્ દેવલોકાન્ પ્રભાષતા ॥ ૨૧.૬૩॥

તત્ર મે સં શયો ભૂયાન્ હરિશ્ચન્દ્રઃ કથં નૃપઃ ।
ઋિલ્ક્ષવ્ઽઇન્દ્રં સભાતલ્. અં પ્રાપ્તઃ પાણ્ડુર્નાસ્મત્પિતા મુને ॥ ૨૧.૬૪॥

ઇત્યુક્તો નારદઃ પ્રાહ રાજસૂયકૃતોન્નતિમ્ ।
હરિશ્ચન્દ્રસ્ય તાં દૃષ્ટ્વા પિતા યમસભાતલ્। એ ।
સ્થિતસ્ત્વામવદત્પાણ્ડૂ રામદ્વયસુદૈવતે ॥ ૨૧.૬૫॥

કરોતુ રાજસૂયં મે પુત્રોઽજેયાનુજાર્ચિતઃ ।
પાલિતો વાસુદેવેન કિં તસ્યાસાધ્યમત્ર હિ ॥ ૨૧.૬૬॥

એતચ્છ્રુત્વા ધર્મસુતો ભ્રાતૃભિઃ સહિતો વશી ।
અવાપ્તિં રાજસૂયસ્ય મન્ત્રયામાસ ધર્મવિત્ ॥ ૨૧.૬૭॥

સુકાર્યમેતદિત્યલં નિશમ્ય સોદરોદિતમ્ ।
અયાતયત્સ્વસારથિં સ કેશવાય ભૂપતિઃ ॥ ૨૧.૬૮॥

તદૈવ કેશવસ્ય યાઃ સ્ત્રિયસ્તદીયતાતકૈઃ ।
સહોદરૈશ્ચ યાપિતઃ સુદૂત આપ માધવમ્ ॥ ૨૧.૬૯॥

પ્રણમ્ય કેશવં વચઃ સ આહ માગધેન તે ।

વિવાહબાન્ધવા રણે વિજિત્ય રોધિતા ગિરૌ ॥ ૨૧.૭૦॥

નૃપાયુતદ્વયેન સોઽષ્ટવિં શકૈઃ શતૈરપિ ।
ચિયક્ષુરુગ્રરૂપિણં ત્રિલોચનં ત્વયિ સ્થિતે ॥ ૨૧.૭૧॥

વિમોચયસ્વ તાન્ પ્રભો નિહત્ય માગધેશ્વરમ્ ।
અવૈદિકં મુખં ચ તં વિલુમ્પ ધર્મગુપ્તયે ॥ ૨૧.૭૨॥

ઇતીરિતોઽથ સારથિં નિશામ્ય ધર્મજસ્ય ચ ।
નિશમ્ય તદ્વચસ્તદા જગામ પાણ્ડવાલયમ્ ॥ ૨૧.૭૩॥

સ પાણ્ડવૈઃ સમર્ચિતો મખાય ધર્મજેન ચ ।
પ્રપૃષ્ટ આહ માધવો વચો જગત્સુખાવહમ્ ॥ ૨૧.૭૪॥

ક્રતુર્યથાવિધાનતઃ કૃતો હિ પારમેષ્ઠ્યકમ્ ।
પદં નયેત તત્પદે સુયોગ્યમેષ નાન્યથા ॥ ૨૧.૭૫॥

અલ્ક્ષ્વ્ડયોગ્યકાન્મહાપદે વિધાતુરેષ હિ ક્રતુઃ ।
સમાનયોગ્યતાગણાત્કરોતિ મુક્તિગં વરમ્ ॥ ૨૧.૭૬॥

પુરા તુ મુક્તિતોઽધિકં સ્વજાતિતઃ કરોતિ ચ ।
અતસ્ત્રિશઙ્કુપુત્રકો નૃપાનતીત્ય વર્તતે ॥ ૨૧.૭૭॥

સુરાં શકોઽપિ તે પિતા વિના હિરાજસૂયતઃ ।
ન શક્ષ્યતિ ત્રિશઙ્કુજાદ્વરત્વમાપ્તુમદ્ય તુ ॥ ૨૧.૭૮॥

તપશ્ચરન્ સમાગતે શચીપતૌ પિતા તવ ।
મરુદ્ગણોત્તમઃ પુરા નતૂત્થિતઃ શશાપ સઃ ॥ ૨૧.૭૯॥

વ્રજસ્વ માનુષીં તનું તતો મૃતઃ પુનર્દિવમ્ ।
ગતોઽપિ નઃ સ્વકાં તનું પ્રવેષ્ટુમત્ર નેશસે ॥ ૨૧.૮૦॥

તદાઽધિકસ્ત્રિશઙ્કુજો ભવિષ્યતુ ત્વદિત્યથ ।
ક્ષમાપિતશ્ચ વાસવો જગાદ રાજસૂયતઃ ।
ત્રિશઙ્કુજાધિકો ભવાનવાપ્સ્યતિ સ્વકાં તનુમ્ ॥ ૨૧.૮૧॥

અતઃ સુકાર્ય એવ તે યુધિષ્ઠિર ક્રતૂત્તમઃ ।
ભવદ્ભિરપ્યવાપ્યતે સ્વયોગ્યતાઽમુનાઽખિલા ॥ ૨૧.૮૨॥

ઉદીર્ય ચૈવમીશ્વરઃ ક્રતોરમુષ્ય યોગ્યતા ।
વૃકોદરે યતોઽખિલા ચતુર્મુખત્વયોગ્યતા ॥ ૨૧.૮૩॥

તતઃ સુપૂર્ણમસ્ય તત્ફલં વિધાતુમઞ્જસા ।
જગાદ વાયુવાહનો વચો યુધિષ્ઠિરં ત્વિદમ્ ॥ ૨૧.૮૪॥

ક્વ રાજસૂયમધ્વ તે જરાસુતે તુ જીવતિ ।
જયેત્ક એવ તં યુધા મૃતો ન યોઽપિ સીરિણા ॥ ૨૧.૮૫॥

વિરિઞ્ચશર્વવાક્યતઃ સમસ્તલોકજાયિનિ ।
સ્થિતે તુ તે જરાસુતે ન સેત્સ્યતિ ક્રતૂત્તમઃ ॥ ૨૧.૮૬॥

ઞ્લ્ક્ષ્વ। ઇતીરિતે રથાઙ્ગિના જગાદ ધર્મનન્દનઃ ।
નિવર્તિતં મનઃ ક્રતોરલં મમામુના પ્રભો ॥ ૨૧.૮૭॥

બભૂવુરેવ ભૂભૃતો નચાઽધિરાજ્યમાપિરે ।
યદા ચ ચક્રવર્તિનસ્તદેદૃશા નશત્રવઃ ॥ ૨૧.૮૮॥

ઇતીરિતેઽમુનાઽવદત્પ્રધાનમારુતાત્મજઃ ।
પદં ચતુર્મુખસ્ય વા સુસાધ્યમેવ યત્નતઃ ॥ ૨૧.૮૯॥

નિજાનુભાવવર્જિતા હરેરનુગ્રહોજ્ઝિતાઃ ।
મહાપ્રયત્નવર્જિતા જના ન જગ્મુરુન્નતિમ્ ॥ ૨૧.૯૦॥

સ્થિરોઽનુભાવ એવ મે મહાનનુગ્રહો હરેઃ ।
પ્રયત્નમેકમગ્રતો નિધાય ભૂતિમાપ્નુમઃ ॥ ૨૧.૯૧॥

ઇતીરિતેઽમુના હરિઃ સમુદ્યમાત્પ્રધાનતઃ ।
સ્થિતે હિ યજ્ઞકારણે વૃકોદરે જગાદ હ ॥ ૨૧.૯૨॥

સ એક એવ પૂરુષો જરાસુતોઽદ્ય વર્તતે ।
સમસ્તસદ્વિરોધિનાં બલં કલેરનન્તરઃ ॥ ૨૧.૯૩॥

તથા સતાં સમાશ્રયો યદુદ્ભવાઃ સતાં ગુણાઃ ।
સ એક એવ તાદૃશસ્ત્વયા વિચિન્ત્ય યાત્યતામ્ ॥ ૨૧.૯૪॥

યદિ સ્મ તેન માગધો નિહન્યતે સતાં જયઃ ।
વિપર્યયેણ ચાસતામિતિ સ્મ વિદ્ધિ નાન્યથા ॥ ૨૧.૯૫॥

સ પારમેષ્ઠ્યસત્પદં પ્રયાત્યસં શયં યુધિ ।
ય એવ હન્તિ માગધં સ વેદધર્મપાલકઃ ॥ ૨૧.૯૬॥

નિહન્તિ માગધેશ્વરં ય એષ વૈષ્ણવં જગત્ ।

કરોતિ શર્વપાલિતો યતઃ સ બાર્હદ્રથઃ ॥ ૨૧.૯૭॥

નિહન્તિ શૈવનાયકં ચ એષ વૈષ્ણવાગ્રણીઃ ।
ઇતિ સ્મ ભાવસં યુતે વદત્યજેઽબિભેન્નૃપઃ ॥ ૨૧.૯૮॥

અ્લ્ક્ષ્વી।યુધિષ્ઠિરે બ્રુવત્યજં મખેન મે ત્વલં ત્વિતિ ।
તમાહ મારુતાત્મજો નિહન્મિ માગધં રણે ॥ ૨૧.૯૯॥

ઇતીરિતેઽવદદ્ધરિર્વ્રજામહે વયં ત્રયઃ ।
અહં ચ ભીમફલ્ગુનૌ નિહન્તુમેવ માગધમ્ ॥ ૨૧.૧૦૦॥

વૃકોદરેણ હન્યતે યદિ સ્મ માગધાધિપઃ ।
મખશ્ચ સેત્સ્યતે ધ્રુવં જગચ્ચ તે વશે ભવેત્ ॥ ૨૧.૧૦૧॥

ઇતીરિતે તુ શૌરિણા જગાદ ધર્મનન્દનઃ ।
સ શૂરસેનમણ્ડલપ્રહાણતો હરેસ્ત્રસન્ ॥ ૨૧.૧૦૨॥

ભયાદ્ધિ યસ્ય માધુરં વિહાય મણ્ડલં ગતાઃ ।
ભવન્ત એવ સાગરં તતો બિભેમ્યહં રિપોઃ ॥ ૨૧.૧૦૩॥

ઇમૌ હિ ભીમફલ્ગુનૌ મમાક્ષિણી સદા પ્રભો ।
મનોનિભો ભવાન્ સદા ન વો વિનાઽસ્મ્યતઃ પુમાન્ ॥ ૨૧.૧૦૪॥

અતો ન જીવિતાત્પ્રિયાનહં રિપોર્બલીયસઃ ।
સકાશમાત્મહેતુતઃ પ્રયાતયામિ વો વિભો ॥ ૨૧.૧૦૫॥

ઇતીરિતેઽવદત્પુનર્વૃકોદરોઽરિકક્ષભુક્ ।
યદીયનેતૃકા રમાવિરિઞ્ચશર્વપૂર્વકાઃ ॥ ૨૧.૧૦૬॥

વશે ચ યસ્ય તદ્બલં સુરાસુરોરગાદિનામ્ ।
સ એષ કેશવઃ પ્રભુઃ ક્વ ચાસ્ય બાર્હદ્રથઃ ॥ ૨૧.૧૦૭॥

અધૃષ્યમસ્તિ મે બલં હરિઃ પ્રણાયકોઽસ્ય ચ ।
સમસ્તલોકનેતરિ પ્રભૌ હિ સર્વશક્તિતા ॥ ૨૧.૧૦૮॥

અજેયતા તથાઽર્જુને હરેર્વરોદ્ભવાઽસ્તિ હિ ।
અતો વયં ત્રયોઽદ્ય તં પ્રયામ માગધં રિપુમ્ ॥ ૨૧.૧૦૯॥

હનિષ્ય એવ માગધં હરેઃ પુરો ન સં શયઃ ।
અ્લ્ક્ષ્વીઇ।ઇતીરિતેઽમુના હરિર્જગાદ ધર્મનન્દનમ્ ॥ ૨૧.૧૧૦॥

વયં ત્રયઃ સમેત્ય તં પ્રયાતયામ મૃત્યવે ।
હનિષ્યતિ સ્ફુટં રણે વૃકોદરો જરાસુતમ્ ॥ ૨૧.૧૧૧॥

ભયં ન કાર્યમેવ તે મયા હતઃ સ નેતિ હ ।
મયા હિનીતિહેતુતઃ સ્વયં ન હન્યતે રિપુઃ ॥ ૨૧.૧૧૨॥

સ શર્વસં શ્રયાગ્રણીર્મદાશ્રયોત્તમેન તુ ।
નિહન્યતે યદા તદા પ્રકાશિતં હિ મે બલમ્ ॥ ૨૧.૧૧૩॥

અતો ન શઙ્કિતં મનઃ કુરુષ્વ ભૂપતે ક્વચિત્ ।
પ્રદર્શયામિ તેઽનુજૌ નિહત્ય માગધેશ્વરમ્ ॥ ૨૧.૧૧૪॥

ઇતીરિતઃ સ વિષ્ણુના વિચાર્ય તદ્ગુણાન્ પરાન્ ।
તથેતિ ચાઽહ તે ત્રયઃ પ્રતસ્થુરાશુ માગધાન્ ॥ ૨૧.૧૧૫॥

સમેત્ય માગધાં સ્તુ તે શિવોરુલિઙ્ગમિત્યલમ્ ।
સુમાલ્યવસ્ત્રભૂષણૈઃ સમર્ચિતં ગિરિં યયુઃ ॥ ૨૧.૧૧૬॥

સ્વશીર્ષતોઽપિ ચાઽદૃતં જરાસુતેન તે ગિરિમ્ ।
ન્યપાતયન્ત બાહુભિસ્તમસ્ય ચોત્તમાઙ્ગવત્ ॥ ૨૧.૧૧૭॥

અદ્વારતસ્તે નગરં પ્રવિશ્ય માષસ્ય નાલ્। એન કૃતાસ્ત્રિભેરીઃ ।
પુષ્ટિપ્રદા બિભિદુસ્તસ્ય કીર્તિશાસ્ત્રોપમા ન્યક્કૃતમાગધેશાઃ ॥ ૨૧.૧૧૮॥

તથાઽપણેભ્યો બહુમાલ્યગન્ધાન્ પ્રસહ્ય સઙ્ગૃહ્ય શુભાંશ્ચ દધ્રુઃ ।
અદ્વારતસ્તસ્ય ગૃહં ચ સસ્રુર્ભોશબ્દતસ્તં ચ નૃપઃ પ્રસસ્રુઃ ॥ ૨૧.૧૧૯॥

તાન્ વિપ્રવેષાન્ સ નિશામ્ય રાજા મહાભુજાન્ સ્નાતકવેષયુક્તાન્ ।
દ્વિતીયવર્ણાન્ પ્રવિચિન્ત્ય બાહૂન્ જ્યાકર્કશાન્ વીક્ષ્ય બભાષ એતાન્ ॥ ૨૧.૧૨૦॥

કે શ્રાથ કિં હેતુત આગતાશ્ચ કૃતશ્ચ મે પર્વતલિઙ્ગભેદનમ્ ।
કૃતં ભવદ્ભિઃ કુત એવ દુર્નયાઃ કૃતાસ્તથાઽન્યે દ્વિજવર્યવેષૈઃ ॥ ૨૧.૧૨૧॥

ઞ્લ્ક્ષક્ષ્। ઇતિ બ્રુવાણં ભગવાનુવાચ કાર્યં હિ શત્રોરખિલં પ્રતીપમ્ ।
ઇત્યુક્ત ઊચે નહિ વિપ્રશત્રુરહં કુતો વો મમ શત્રુતા ભવેત્ ॥ ૨૧.૧૨૨॥

ઇત્યુક્તવાક્યં નૃપતિં જગાદ જનાર્દનો નૈવ હિ તાદૃશા દ્વિજાઃ ।
વયં રિપુસ્તેઽસ્મિ હિ વાસુદેવ ઇમૌ ચ ભીમાર્જુનનામધેયૌ ॥ ૨૧.૧૨૩॥

યદ્બાન્ધવાન્નઃ પિશિતાશિધર્મતો રૌદ્રે મખે કલ્પયિતું પશુત્વે ।
ઇચ્છસ્યરે વેદપથં વિહાય તં ત્વાં બલાચ્છાસ્તુમિહાઽગતા વયમ્ ॥ ૨૧.૧૨૪॥

વિમોક્ષયામઃ સ્વજનાન્ યદિ ત્વં ન મોચયસ્યદ્ય નિગૃહ્ય ચ ત્વામ્ ।
મુઞ્ચાથવા તાનભિયાહિ વાઽસ્માન્ રણાય મર્તું કૃતનિશ્ચયોઽત્ર ॥ ૨૧.૧૨૫॥

ઇતીરિતોઽસૌ મગધાધિપો રુષા જગાદ નાહં શિવ યાગયુક્તાન્ ।
મોક્ષ્યે પશૂન્ યુગપદ્વા ક્રમેણ યોત્સ્યે ચ વોઽથાપિ ચમૂસહાયાન્ ॥ ૨૧.૧૨૬॥

નિરાયુધઃ સાયુધો વા યુષ્મદિષ્ટાયુધેન વા ।
એકોઽપિ સકલૈર્યોત્સ્યે સસેનો વા સસૈનિકાન્ ॥ ૨૧.૧૨૭॥

ઇત્યુક્તવન્તમવદદજિતોરુબલો હરિઃ ।
એહ્યેકમેકો વાઽસ્માસુ સસૈન્યો વા રણે નૃપ ॥ ૨૧.૧૨૮॥

યેન કામયસે યોદ્ધું તં ન આસાદય દ્રુતમ્ ।
નિરાયુધઃ સાયુધો વા ત્વદભીષ્ટાયુધેન વા ।
ઇત્યાઽહ ભગવાઞ્છત્રું યશો ભીમે વિવર્દ્ધયન્ ॥ ૨૧.૧૨૯॥

ઘાતયિત્વા સ્વશત્રું ચ ભીમસેનાનુગ્રહં પરમ્ ।
ભીમસ્ય કર્તુમિચ્છંશ્ચ ભક્તિજ્ઞાનાદિવર્દ્ધનમ્ ॥ ૨૧.૧૩૦॥

તૃણીકર્તું રિપું ચૈવ નિરાયુધતયાઽગમન્ ।
કૃષ્ણભીમાર્જુનાસ્તેન વિપ્રવેષાશ્ચ તેઽભવન્ ॥ ૨૧.૧૩૧॥

નિરાયુધઃ ક્ષત્રવેષો નૈવ યોગ્યઃ કથઞ્ચન ।
તતો જગ્મુર્વિપ્રવેષાસ્તૃણીકર્તું હિ માગધમ્ ॥ ૨૧.૧૩૨॥

માગધસ્ય સસૈન્યસ્ય સ્વગૃહે સં સ્થિતસ્ય ચ ।
અ્લક્ષ્ક્ષ્ંઇરાયુધેન ભીમેન સમાહ્વાને કૃતેઽમિતમ્ ।
ધર્મં યશશ્ચ ભીમસ્ય વર્દ્ધયામાસ કેશવઃ ॥ ૨૧.૧૩૩॥

તૃતીયમર્જુનં ચૈવ સમાદાય યયૌ રિપુમ્ ।
હરિસ્તસ્માચ્ચ ભીમસ્ય મહાધિક્યં પ્રકાશયન્ ।
મુખેન માગધસ્યૈવ વૃણ્વેકં ન ઇતિ બ્રુવન્ ॥ ૨૧.૧૩૪॥

વૃણ્વેકમસ્માસ્વિતિ સ પ્રોક્ત આહ જરાસુતઃ ।
કુર્યાં નૈવાર્જુનેનાહમબલેનૈવ સઙ્ગરમ્ ॥ ૨૧.૧૩૫॥

પઞ્ચપઞ્ચાશદબ્દોઽદ્ય હ્યયમેવં ચ બાલવત્ ।
અબલત્વાદ્યુવાઽપ્યેષ બાલ એવ મતો મમ ॥ ૨૧.૧૩૬॥

ઇત્યુક્તોઽપ્યર્જુનો નાઽહ કુરુ તર્હિ પરીક્ષણમ્ ।
બાહુભ્યાં ધનુષા વેતિ શઙ્કમાનઃ પરાજયમ્ ॥ ૨૧.૧૩૭॥

અતો ભીમે બલાધિક્યં સુપ્રસિદ્ધમભૂન્મહત્ ।
એતદર્થં હિ કૃષ્ણેન સહાઽનીતઃ સ ફલ્ગુનઃ ॥ ૨૧.૧૩૮॥

જાનન્ કૃષ્ણે બલં ઘોરમવિષહ્યં સ માગધઃ ।
કુત્સયન્ ગોપ ઇતિ તં ભયાન્નૈવાઽહ્વયત્પ્રભુમ્ ॥ ૨૧.૧૩૯॥

આહ્વયામાસ ભીમં તુ સ્યાદ્વા મે જીવનં ત્વિતિ ।
હનિષ્યત્યેવ માં કૃષ્ણ ઇત્યાસીન્નૃપતેર્ભયમ્ ।
તસ્માત્તં નાહ્વયામાસ વાસુદેવં સ માગધઃ ॥ ૨૧.૧૪૦॥

અર્જુને તુ જિતે કૃષ્ણભીમૌ માં નિહનિષ્યતઃ ।
ત્રયાણાં દુર્બલાહ્વાનાન્નશ્યેત્કીર્તિશ્ચ મે ધ્રુવા ॥ ૨૧.૧૪૧॥

ઇતિ મત્વાઽહ્વયામાસ ભીમસેનં સ માગધઃ ।
કથઞ્ચિજ્જીવિતં વા સ્યાન્નતુ નશ્યતિ મે યશઃ ॥ ૨૧.૧૪૨॥

ઇતિ સ્મ ભીમં પ્રતિયોધનાય સઙ્ગૃહ્ય રાજા સ જરાસુતો બલી ।
રાજ્યે નિજં ચાઽત્મજમભ્યષિઞ્ચત્પુરા ખ્યાતં પત્રતાપાખ્યરુદ્રમ્ ॥ ૨૧.૧૪૩॥

ચ્છિલ્ક્ષ।બલં ભીમે મન્યમાનોઽધિકં તુ ગદાશિક્ષામાત્મનિ ચાધિકાં નૃપઃ ।
ભીતો નિયુદ્ધેઽસ્ય દદૌ ગદાં સ ભીમાય ચાન્યાં સ્વયમગ્રહીદ્બલી ॥ ૨૧.૧૪૪॥

તદર્થમેવાઽશુ ગદાં પ્રગૃહ્ય ભીમો યયૌ માગધસં યુતો બહિઃ ।
પુરાત્સકૃષ્ણાર્જુન એવ તત્ર ત્વયુદ્ધ્યતાં કેશવપાર્થયોઃ પુરઃ ॥ ૨૧.૧૪૫॥

વાચાઽજયત્તં પ્રથમં વૃકોદરઃ શિવાશ્રયં વિષ્ણુગુણપ્રકાશયા ।
તતો ગદાભ્યામભિપેતતુસ્તૌ વિચિત્રમાર્ગાનપિ દર્શયન્તૌ ॥ ૨૧.૧૪૬॥

તયોર્ગદે તેઽશનિસન્નિકાશે ચૂર્ણીકૃતે દેહમહાદૃઢિમ્ના ।
અન્યોન્યયોર્વક્ષસિ પાતિતે રુષા યથાઽશ્મનોઃ પાં સુપિણ્ડૌ સુમુક્તૌ ॥ ૨૧.૧૪૭॥

સઞ્ચૂર્ણિતગદૌ વીરૌ જઘ્નતુર્મુષ્ટિભિર્મિથઃ ।
બ્રહ્મણ્ડસ્ફોટસઙ્કાશૈર્યથા કેશવકૈટભૌ ॥ ૨૧.૧૪૮॥

ચચાલ પૃથ્વી ગિરયશ્ચ ચૂર્ણિતાઃ કુલાચલાશ્ચેલુરલં વિચક્ષુભુઃ ।
સમસ્તવારામ્પતયઃ સુરાસુરા વિરિઞ્ચશર્વાદય આસદન્નભઃ ॥ ૨૧.૧૪૯॥

સુરાસ્તુ ભીમસ્ય જયાભિકાઙ્ક્ષિણસ્તથાઽસુરાદ્યા મગધાધિપસ્ય ।

પશ્યન્તિ સર્વે ક્રમશો બલં સ્વં સમાદદે મારુતનન્દનોઽપિ ॥ ૨૧.૧૫૦॥

માનયિત્વા વરં ધાતુર્દિવસાન્ દશ પઞ્ચ ચ ।
વાસુદેવાજ્ઞયા ભીમઃ શત્રું હન્તું નઓ દધે ॥ ૨૧.૧૫૧॥

સ પ્રણમ્ય હૃષીકેશં હર્ષાદાશ્લિષ્ય ફલ્ગુનમ્ ।
રિપું જગ્રાહ મકુટે વારણં મૃગરાડિવ ॥ ૨૧.૧૫૨॥

પૃષ્ઠેઽસ્ય જાનુમાધાય કૂર્મદેશં બભઞ્જ હ ।
મૃતિકાલે પુનર્દેહં વિદદાર યથા પુરા ॥ ૨૧.૧૫૩॥

મર્મણ્યેવ ન હન્તવ્યો મયાઽયમિતિ મારુતિઃ ।
સ્વપુરુષપ્રકાશાય બભઞ્જૈનમમર્મણિ ॥ ૨૧.૧૫૪॥

ભજ્યમાને શરીરેઽસ્ય બ્રહ્માણ્ડસ્ફોટસન્નિભઃ ।
બભૂવ રાવો યેનૈવ ત્રસ્તમેતજ્જગત્ત્રયમ્ ॥ ૨૧.૧૫૫॥

અ્લ્ક્ષ્ક્ષીંઇહત્ય કૃષ્ણસ્ય રિપું સ ભીમઃ સમર્પયામાસ તદર્ચનં હરેઃ ।
કૃતાં હિ ભીમેન સમર્ચનાં તાં સમક્ષમાદાતુમિહાઽગતો હ્યજઃ ॥ ૨૧.૧૫૬॥

સ્વીકૃત્ય પૂજાં ચ વૃકોદરસ્ય દૃઢં સમાશ્લિષ્ય ચ તં જનાર્દનઃ ।
પ્રીતો નિતાન્તં પુનરેવ કૃષ્ણં નનામ ભીમઃ પ્રણતોઽર્જુનેન ॥ ૨૧.૧૫૭॥

જગ્મુઃ સુરાશ્ચાતિતરાં પ્રહૃષ્ટા બ્રહ્માદયો દીનતરાશ્ચ દૈત્યાઃ ।
બલાદુમેશસ્ય વરે પ્રભગ્ને વૃકોદરેણાચ્યુતસં શ્રયેણ ॥ ૨૧.૧૫૮॥

સુતો યયૌ શરણં તાન્ રમેશભીમાર્જુનાન્ સહદેવોઽસ્ય ધીમાન્ ।
રથં સ્વસારં ચ દદૌ સ મારુતેર્નનામ કૃષ્ણં પરયા ચ ભક્ત્યા ॥ ૨૧.૧૫૯॥

રથો હ્યસૌ વસુના વાસુદેવાચ્છક્રાન્તરાઽપ્તો વસુવં શજત્વાત્ ।
જરાસુતસ્યાઽસ વૃકોદરસ્તં હરે રથં પ્રાર્પયામાસ તસ્મૈ ॥ ૨૧.૧૬૦॥

કૃષ્ણોઽસ્મરદ્ગરુડં સ ધ્વજેઽભૂદ્રથં કૃષ્ણોઽથાઽરુહત્પાણ્ડવાભ્યામ્ ।
ભીમઃ કન્યાં સહદેવસ્ય હેતોઃ સમગ્રહીદનુજસ્યાઽત્મનઃ સઃ ॥ ૨૧.૧૬૧॥

નકુલસ્યાઽદાન્મદ્રરાજો હિ પૂર્વં સ્વીયાં કન્યાં સા તથૈષાઽપ્યુષા હિ ।
એકા પૂર્વં તે અશ્વિનોશ્ચૈવ ભાર્યા યમૌ રેમાતે યદુષા અશ્વિભાર્યા ।
તતઃ કૃષ્ણાયામગ્રજભ્રાતૃભાર્યાવૃત્તિં હિ તૌ ચક્રતુર્માદ્રિપુત્રૌ ॥ ૨૧.૧૬૨॥

જરાસુતસ્યાઽત્મજઃ કેશવાદીન્ રત્નૈઃ સમભ્યર્ચ્ય યયાવનુજ્ઞયા ।
તદાજ્ઞયા પિતૃકાર્યાણિ કૃત્વા તદાજ્ઞયૈવામુચત્તાન્નૃપાંશ્ચ ।

તૈઃ સં સ્તુતઃ કેશવો ભીમપાર્થયુક્તો યયૌ ભક્તિનમ્રૈર્યથાવત્ ॥ ૨૧.૧૬૩॥

સમ્ભાવિતાસ્તે સહદેવેન સમ્યક્પ્રશસ્ય કૃષ્ણં ભીમસેનં ચ સર્વે ।
યયુર્ગૃહાન્ સ્વાનપતત્કેશવદ્વિડ્જરાસુતોઽન્ધે તમસિ ક્રમેણ ॥ ૨૧.૧૬૪॥

કૃષ્ણશ્ચ પાર્થૌ ચ તથૈકયાનં સમાસ્થિતા ધર્મજમભ્યગચ્છન્ ।
તેષાં શઙ્ખધ્વનિસમ્બોધિતાત્મા રાજા પ્રીતશ્ચાતિતરાં બભૂવ ॥ ૨૧.૧૬૫॥

દ્વૈપાયનોઽથ ભગવાનભિગમ્ય પાર્થાનાજ્ઞાપયત્સકલસમ્ભૃતિસાધનાય ।
તં રાજસૂયસહિતં પરમાશ્વમેધયજ્ઞં સમાદિશદનન્યકૃતં વિરિઞ્ચાત્ ॥ ૨૧.૧૬૬॥

અ્લ્ક્ષ્ક્ષીઇ। કર્તા હિ તસ્યપરમેષ્ઠિપદં પ્રયાતિ યદ્યન્યસદ્ગુણવરૈઃ પરમેષ્ઠિતુલ્યઃ ।
ભીમે મખસ્ય ફલમત્યધિકં નિધાતું વ્યાસઃ ક્રતું તમદિશદ્ગુરુરબ્જજસ્ય ॥ ૨૧.૧૬૭॥

અસાધારણહેતુર્યઃ કર્મણો યસ્ય ચેતનઃ ।
સ એવ તત્ફલં પૂર્ણં ભુઙ્ક્તેઽન્યોઽલ્પમિતિ સ્થિતિઃ ।
વિના વિષ્ણું નિર્ણયોઽયં સ હિ કર્મફલોજ્ઝિતઃ ॥ ૨૧.૧૬૮॥

હેતવોઽપિ હિ પાપસ્ય ન પ્રાયઃ ફલભાગિનઃ ।
દેવાઃ પુણ્યસ્ય દૈત્યાશ્ચ માનુષાસ્તદ્વિભાગિનઃ ॥ ૨૧.૧૬૯॥

અસાધારણહેતુશ્ચ ભીમ એવ પ્રકીર્તિતઃ ।
યજ્ઞસ્યાસ્ય જરાસન્ધવધાત્કર્ણજયાદપિ ॥ ૨૧.૧૭૦॥

જયાચ્ચ કીચાકાદીનામન્યૈર્જેતુમશક્યતઃ ।
દ્વિતીયઃ ફલ્ગુનશ્ચૈવ તૃતીયસ્તુ યુધિષ્ઠિરઃ ॥ ૨૧.૧૭૧॥

તસ્માદ્બ્રહ્મપદાવાપ્ત્યૈ વ્યાસો ભીમસ્ય તં ક્રતુમ્ ।
અનન્યકૃતમાદિશ્ય દિશાં વિજયમાદિશત્ ॥ ૨૧.૧૭૨॥

અથાબ્રવીદ્ધનઞ્જયો ધનુર્ધ્વજો રથો વરઃ ।
મમાસ્તિ તદ્દિશાં જયો મમૈવ વાઞ્છિતઃ પ્રભો ॥ ૨૧.૧૭૩॥

ઇતીરિતોઽખિલપ્રભુર્જગાદ સત્યમસ્તિ તે ।
સમસ્તસાધનોન્નતિર્મહચ્ચ વીર્યમસ્તિ તે ॥ ૨૧.૧૭૪॥

તથાઽપિ કીચકાદયો વૃકોદરાદૃતે વશમ્ ।
ન યાન્તિ નાપિ તે વશં પ્રયાતિ કર્ણ એવ ચ ॥ ૨૧.૧૭૫॥

બલાધિકોઽસિ કર્ણતસ્તથાઽપિ નામૃતઃ કરમ્ ।
દદાતિ તે હ્યતિસ્પૃધા ન વધ્ય એષ તેઽદ્ય ચ ॥ ૨૧.૧૭૬॥

સવર્મકુણ્ડલત્વતો ન વધ્ય એષ યત્ત્વયા ।
તતો વૃકોદરો દિશં પ્રયાતુ તે પિતુઃ પ્રિયામ્ ॥ ૨૧.૧૭૭॥

શ્ચિલ્ક્ષવ્।જીવગ્રાહભયાત્કર્ણો દદાતિ કરમઞ્જસા ।
ભીમાય નાત્ર સન્દેહો જિતોઽનેન ચ સં યુગે ॥ ૨૧.૧૭૮॥

અજેયૌ શર્વવચનાદ્રણે કીચકપૌણ્ડ્રકૌ ।
વશં પ્રયાતો ભીમસ્ય તથાઽવધ્યોઽપિ ચેદિપઃ ॥ ૨૧.૧૭૯॥

જીવગ્રાહભયં હ્યેષાં ભીમાન્માગધપાતનાત્ ।
તસ્માત્કરં પ્રયચ્છન્તિ જિતા વા પૂર્વમેવ વા ॥ ૨૧.૧૮૦॥

પ્રયાહિ ચ ત્વં ધનદપ્રપાલિતાં દિશં દ્વીપાન્ સપ્ત ચાશેષદિક્ષુ ।
નાગાંશ્ચ દૈત્યાંશ્ચ તથાઽધરસ્થાન્ વિજિત્ય શીઘ્રં પુનરેહિ ચાત્ર ॥ ૨૧.૧૮૧॥

રથો હિ દિવ્યોઽમ્બરગસ્તવાસ્તિ દિવ્યાનિ ચાસ્ત્રાણિ ધનુશ્ચ દિવ્યમ્ ।
યેઽન્યે ચ બાણપ્રમુખા અજેયાઃ શર્વાશ્રયાસ્તાનપિ ભીમ એતુ ॥ ૨૧.૧૮૨॥

તથા સુરાશ્ચાપિ સમસ્તશોઽસ્ય બલિં પ્રયચ્છન્તિ મદજ્ઞયેતરે ।
દિશં પ્રતીચીમથ દક્ષિણાં ચ યાતાં યમૌ ક્રમશો હ્યધ્વરાર્થે ॥ ૨૧.૧૮૩॥

યશશ્ચ ધર્મશ્ચ તયોરપિ સ્યાદિતિ સ્યદિતિ સ્મ કૃષ્ણેન સુતેન કાલ્। યાઃ ।
ઉક્તે યયુસ્તે તમભિપ્રણમ્ય દિશો યથોક્તાઃ પરમોરુસદ્ગુણાઃ ॥ ૨૧.૧૮૪॥

વૃકોદરોઽજયન્નૃપાન્ વિરાટમાસસાદ હ ।
જિતેઽત્ર કીચકે રણે સમાદદે કરં તતઃ ॥ ૨૧.૧૮૫॥

તતઃ ક્રમાન્નૃપાન્ જિત્વા ચેદીનાં વિષયં ગતઃ ।
માતૃવાક્યાદ્ભયાચ્ચૈવ શિશુપાલેન પૂજિતઃ ॥ ૨૧.૧૮૬॥

માતૃષ્વસુર્ગૃહે ચોષ્ય દિવસાન્ કતિચિત્સુખમ્ ।
કરં સુમહદાદાય તતઃ પૂર્વાં દિશં યયૌ ॥ ૨૧.૧૮૭॥

ક્રમેણ સર્વાન્નિર્જિત્ય પૌણ્ડ્રકં ચ મહાબલમ્ ।
વિરથીકૃત્ય કર્ણં ચ કરમાદાય સર્વતઃ ॥ ૨૧.૧૮૮॥

હિમવચ્છિખરે દેવાન્ જિત્વા શક્રપુરોગમાન્ ।
ક્રીડાર્થં યુદ્ધ્યતસ્તેભ્યસ્તુષ્ટેભ્યો રત્નસઞ્ચયમ્ ॥ ૨૧.૧૮૯॥

અલ્ક્ષ્વ્।બાહુયુદ્ધેન શેષં ચ ગરુડં ચ મહાબલમ્ ।

ક્રીડમાનૌ વિનિર્જિત્ય ભૂષણાન્યાપ તોષતઃ ।
તાભ્યાં ચ દૃઢમાશ્લિષ્ટઃ સ્નેહવિક્લિન્નયા ધિયા ॥ ૨૧.૧૯૦॥

પોપ્લૂયમાનઃ સ તતોઽમ્બુધૌ બલી જગામ બાણસ્ય પુરં હરં ચ ।
રણેઽજયદ્દ્વારણરૂપમાસ્થિતં ક્રીડન્તમેતેન ચ તોષિતો હરઃ ॥ ૨૧.૧૯૧॥

પૃષ્ટશ્ચ ગિરિશેનાસૌ વિસ્તરં દિગ્જયસ્ય ચ ।
સિં હવ્યાઘ્રાદિરૂપાશ્ચ આત્મના વિજિતા યથા ।
ગરુત્મચ્છેષશક્રાદ્યા દેવાઃ સર્વે તદબ્રવીત્ ॥ ૨૧.૧૯૨॥

નિશમ્ય શઙ્કરોઽખિલં મખસ્ય ચ પ્રસાધકમ્ ।
હરિં તતો બલેઃ સુતાદ્દદૌ ચ રત્નસઞ્ચયમ્ ॥ ૨૧.૧૯૩॥

સ બાણદૈત્યતો મહચ્છિવેન દત્તમુત્તમમ્ ।
પ્રગૃહ્ય રત્નસઞ્ચયં સ્વકં પુરં સમાયયૌ ॥ ૨૧.૧૯૪॥

સ વિપ્રયાદવેશ્વરં દ્વિધાસ્થિતં જનાર્દનમ્ ।
પુરો નિધાય તદ્વસુ પ્રભૂતમાનમત્તદા ॥ ૨૧.૧૯૫॥

સોઽભિવાદ્યાગ્રજં ચૈવ યથાવૃત્તં ન્યવેદયત્ ।
આત્મનઃ કૃષ્ણયોઃ સર્વં ધર્મરાજાગ્રતો મુદા ॥ ૨૧.૧૯૬॥

યથા જિતાઃ કીચકાદ્યા એકલવ્યસહાયવાન્ ।
યથા જિતઃ પૌણ્ડ્રકશ્ચ કર્ણાદ્યાશ્ચ તથાઽપરે ॥ ૨૧.૧૯૭॥

યથા સિં હાદિતનવઃ શેષવીન્દ્રેન્દ્રપૂર્વકાઃ ।
યથા ગજતનુઃ શર્વસ્તચ્ચ સર્વમવર્ણયત્ ॥ ૨૧.૧૯૮॥

સમ્ભાવિતશ્ચ કૃષ્ણાભ્યાં રાજ્ઞા ચ સુમહાબલઃ ।
આજ્ઞયા વ્યાસદેવસ્ય યજ્ઞાઙ્ગાનિ સમાર્જયત્ ॥ ૨૧.૧૯૯॥

ઊચે તં ભગવાન્ વ્યાસો જિતં સર્વં ત્વયાઽરિહન્ ।
જયે સર્વસ્ય યજ્ઞોઽયં પૂર્ણો ભવતિ નાન્યથા ॥ ૨૧.૨૦૦॥

ઝિલ્લક્ષ્વ। વિરિઞ્ચઃ સર્વજિત્પૂર્વં દ્વિતીયસ્ત્વમિહાભવઃ ।
ઇત્યુક્ત્વૈનં સમાશ્લિષ્ય યજ્ઞાઙ્ગાનિ સમાદિશત્ ॥ ૨૧.૨૦૧॥

તદૈવાન્યે દિશો જિત્વા સમીયુસ્તસ્ય યેઽનુજાઃ ।
સહદેવો દક્ષિણાશાં જિત્વા રત્નાન્યુપાહરત્ ॥ ૨૧.૨૦૨॥

તત્ર રુગ્મી ન યુયુધે સહદેવેન વીર્યવાન્ ।

જિતઃ કૃષ્ણેન પૂર્વં યઃ શર્વાદાપ ધનુર્વરમ્ ॥ ૨૧.૨૦૩॥

તપસા તોષિતાત્કૃષ્ણાદન્યાનેવામુનાઽખિલાન્ ।
વિજેષ્યસિ યદા કૃષ્ણવિરોધસ્તે તદા ધનુઃ ।
મામેષ્યતીતિ તેનોક્તો ન વ્યરુદ્ધ્યત કેશવે ॥ ૨૧.૨૦૪॥

સ્વસુઃ સ્નેહાચ્ચ કૃષ્ણસ્ય યજ્ઞકારયિતૃત્વતઃ ।
ભીમાર્જુનબલાચ્ચૈવ માદ્રેયાય દદૌ કરમ્ ।
જિગ્યે બલેનાન્યનૃપાન્ સહદેવઃ પ્રતાપવાન્ ॥ ૨૧.૨૦૫॥

તથા સ્મૃતં સમાગતં ઘટોત્કચં વિભીષણે ।
સમાદિશદ્યયૌ ચ સોઽપિ સોઽદદાન્મહાકરમ્ ॥ ૨૧.૨૦૬॥

પુરા હિરાઘવોદિતં તદસ્ય સોઽખિલં તદા ।
વિચાર્ય કેશવં ચ તં બલં ચ ભીમપાર્થયોઃ ।
દિવૌકસશ્ચ પાણ્ડવાનવેત્ય સોઽદદાત્કરમ્ ॥ ૨૧.૨૦૭॥

મહૌઘરત્નસઞ્ચયં સ આપ્ય ભીમસેનજઃ ।
યયૌ ચ માદ્રિનન્દનં સ ચાઽયયૌ સ્વકં પુરમ્ ॥ ૨૧.૨૦૮॥

નકુલઃ પશ્ચિમાશાયાં વિજિગ્યેઽખિલભૂભૃતઃ ।
કરમાપ ચ વીરોઽસૌ સૌહાર્દાદેવ માતુલાત્ ।
આયયૌ ચ મહારત્નસઞ્ચયેન સ્વકં પુરમ્ ॥ ૨૧.૨૦૯॥

અર્જુનઃ કપિવરોચ્છ્રિતધ્વજં સ્યન્દનં સમધિરુહ્ય ગાણ્ડિવી ।
યાત એવ દિશમુત્તરાં યદા પાર્વતીયકનૃપાઃ સમાયયુઃ ॥ ૨૧.૨૧૦॥

અભ્યક્ષ્વી।ત્રૈગર્તાઃ પાર્વતેયાશ્ચ સહિતાઃ પાણ્ડુનન્દનમ્ ।
અભ્યેત્ય યોધયામાસુર્જાનન્તસ્તચ્ચિકીર્ષિતમ્ ॥ ૨૧.૨૧૧॥

તાન્ વિજિત્ય યુગપત્સ પાણ્ડવઃ સઞ્જયન્ ક્રમશ એવ તાં દિશમ્ ।
પ્રાવ્રજચ્ચ ભગદત્તમૂર્જિતં તેન ચાસ્ય સમભૂન્મહારણઃ ॥ ૨૧.૨૧૨॥

સોઽભિયુદ્ધ્ય સગજો દિનાષ્ટકં શ્રાન્ત આહ પુરુહૂતનન્દનમ્ ।
બ્રૂહિ તે સમરકારણં ત્વિતિ પ્રાહ દેહિ કરમિત્યથાર્જુનઃ ॥ ૨૧.૨૧૩॥

સોઽપ્યદાત્કરમમુષ્ય વાસવો મદ્ગુરુસ્તવ પિતેતિ સાદરમ્ ।
નૈવ જેતુમિહ શક્ષ્યસિ ત્વમિત્યાવદદ્ધરિવરાસ્ત્રતેજસા ॥ ૨૧.૨૧૪॥

સ્નેહપૂર્વં પ્રદત્તે તુ કરે નૈવાઽહ ચોત્તરમ્ ।

અર્જુનો વ્યર્થકલહમનિચ્છન્ સ્નેહયન્ત્રિતઃ ॥ ૨૧.૨૧૫॥

પાર્થો જિત્વાઽષ્ટવર્ષાણિ ષડ્દ્વીપાનપરાનપિ ।
અજયચ્ચતુર્દિશમપિ સર્વશઃ શસ્ત્રતેજસા ॥ ૨૧.૨૧૬॥

પાતાલ્। અસપ્તકં ગત્વા જિત્વા દૈતેયદાનવાન્ ।
બલેશ્ચ વિષ્ણુવચનાત્કરં જગ્રાહ સામતઃ ॥ ૨૧.૨૧૭॥

જિત્વા ચવાસુકિં ભૂરિ રત્નમાદાય સત્વરઃ ।
આજગામ પુરં સ્વીયં વીરો વત્સરમાત્રતઃ ॥ ૨૧.૨૧૮॥

સુવર્ણરત્નગિરયશ્ચતુર્ભિસ્તૈઃ સમાર્જિતાઃ ।
ચત્વારો યોજનાનાં હિ દશ ત્રિં શચ્છતં તથા ॥ ૨૧.૨૧૯॥

ચતુઃ શતં ચ ક્રમશ ઉચ્છ્રિતા દિગ્જયાર્જિતાઃ ।
પ્રતીચ્યાદ્યપસવ્યેન ક્રમાદ્દિગ્ભ્યઃ સમાર્જિતાઃ ॥ ૨૧.૨૨૦॥

વિશ્વકર્મકૃતત્વાત્તુ પુરસ્યાલ્પેઽપિ ચ સ્થલ્। એ ।
અન્તર્ગતાસ્તે ગિરયસ્તદદ્ભુતમિવાભવત્ ॥ ૨૧.૨૨૧॥

તતો યજ્ઞઃ પ્રવવૃતે કૃષ્ણદ્વૈપાયનેરિતઃ ।
ઋત્વિજો મુનયોઽત્રાસન્ સર્વવિદ્યાસુ નિષ્ઠિતાઃ ।
ઞ્લ્ક્ષ્વીઇ। દ્વૈપાયનોક્તવિધિના દીક્ષયાઞ્ચક્રિરે નૃપમ્ ॥ ૨૧.૨૨૨॥

જ્યેષ્ઠત્વાદ્યાજમાનં તુ પ્રણિધાય યુધિષ્ઠિરે ।
ભીમાર્જુનાદયઃ સર્વે સહ તેન સમાસિરે ॥ ૨૧.૨૨૩॥

બ્રહ્માણીપદયોગ્યત્વાત્કૃષ્ણૈકા યજ્ઞપત્ન્યભૂત્ ।
પદાયોગ્યતયા નાન્યાઃ પત્ન્યસ્તેષાં સહાઽસિરે ॥ ૨૧.૨૨૪॥

આજ્ઞયૈવ જગદ્ધાતુર્વ્યાસસ્યાનન્તતેજસઃ ।
સ્થલમપ્યત્ર સર્વં હિ રત્નહેમમયં ત્વભૂત્ ।
કિમુ પાત્રાદિકં સર્વં શિબિરાણિ ચ સર્વશઃ ॥ ૨૧.૨૨૫॥

આહૂતં દિગ્જયે પાર્થૈસ્તદા લોકદ્વિસપ્તકમ્ ।
સર્વમત્રાઽગમદ્બ્રહ્મશર્વશક્રાદિપૂર્વકમ્ ॥ ૨૧.૨૨૬॥

ભીષ્મો દ્રોણશ્ચ વિદુરો ધૃતરાષ્ટ્રઃ સહાત્મજઃ ।
સસ્ત્રીકા આયયુસ્તત્ર બાહ્લીકશ્ચ સહાત્મજઃ ॥ ૨૧.૨૨૭॥

તથૈવ યાદવાઃ સર્વે બલભદ્રપુરોગમાઃ ।

રુગ્મિણીસત્યભામાદ્યા મહિષ્યઃ કેશવસ્ય ચ ॥ ૨૧.૨૨૮॥

તત્ર સર્વજગદેકસઙ્ગમે તત્ત્વનિર્ણયકથા બભૂવિરે ।
પ્રાશ્નિકોઽત્ર પરિપૂર્ણચિદ્ઘનો વ્યાસ એવ ભગવાન્ બભૂવ હ ॥ ૨૧.૨૨૯॥

તત્ત્વનિર્ણયકથાસુ નિર્ણયો વાસુદેવગુણવિસ્તરોઽભવત્ ।
નાસ્તિ તત્સદૃશ ઉત્તમઃ કુતઃ પાર એષ ન તતોઽન્ય ઇત્યપિ ॥ ૨૧.૨૩૦॥

બાદરાયણભૃગૂત્થરામયોઃ શૃણ્વતોઃ પરમનિર્ણયે કૃતે ।
મોદમાનજનતાસમાગમેઽપૃચ્છદત્ર નૃપતિર્યતવ્રતમ્ ॥ ૨૧.૨૩૧॥

જાનમાનોઽપિ નૃપતિઃ સર્વપૂજ્યતમં હરિમ્ ।
સં શયં ભૂભૃતાં ભેત્તું ભીષ્મં પપ્રચ્છ ધર્મવિત્ ॥ ૨૧.૨૩૨॥

નાસ્તિ નારાયણસમમિતિ વાદેન નિર્ણયે ।
કૃતે બ્રહ્માદિભિરપિ કૃષ્ણં મર્ત્યં હિ મેનિરે ॥ ૨૧.૨૩૩॥

ચ્ચિલ્ક્ષક્ષક્ષંઋપાસ્તસ્માદયં કૃષ્ણો નારાયણ ઇતિ સ્મ હ ।
સમ્યગ્જ્ઞાપયિતું ધર્મસૂનુર્ભીષ્મમપૃચ્છત ॥ ૨૧.૨૩૪॥

બ્રહ્માદયઃ સુરા યસ્માદ્દૃશ્યન્તે મર્ત્યવન્નૃભિઃ ।
નચૈવાતિતરાભ્યાસો નૃણામસ્તિ મુનિષ્વપિ ॥ ૨૧.૨૩૫॥

સર્વશાસ્ત્રવિદં ભીષ્મં જાનન્ત્યેતે નૃપા અપિ ।
તસ્માદ્ભીષ્મમપૃચ્છત્સ કુલવૃદ્ધત્વતસ્તથા ॥ ૨૧.૨૩૬॥

પિતામહાગ્ર્યપૂજાર્હઃ કોઽત્ર લોકસમાગમે ।
બ્રહ્મશર્વાદયશ્ચાત્ર સન્તિ રાજાન એવ ચ ।
ઇતિ પૃષ્ટોઽબ્રવીદ્ભીષ્મઃ કૃષ્ણં પૂજ્યતમં પ્રભુમ્ ॥ ૨૧.૨૩૭॥

યદ્યપ્યેકસ્ત્રિધા વિષ્ણુર્વસિષ્ઠભૃગુવૃષ્ણિષુ ।
પ્રાદુર્ભૂતસ્તથાઽપ્યેતે નૃપા હિવ્યાસરામયોઃ ॥ ૨૧.૨૩૮॥

વિપ્રત્વાન્ન વિરુદ્ધ્યન્તે તત એવ ચ યુક્તતામ્ ।
મન્યન્તે ન વિરોધશ્ચ તેષાં તત્ર હિ તાદૃશઃ ॥ ૨૧.૨૩૯॥

અવિવાદે પ્રસિદ્ધિશ્ચ નૈવાસ્ય ભવિતા ક્વચિત્ ।
તસ્માત્કૃષ્ણાય દાતવ્યમિતિ ભીષ્મેણ ચિન્તિતમ્ ॥ ૨૧.૨૪૦॥

કૃષ્ણાય દત્તે રાજાનો વિવાદં કુર્યુરઞ્જસા ।
વિવાદેન ચ કીર્તિઃ સ્યાદ્વાસુદેવસ્ય વિસ્તૃતા ।

તતઃ કૃષ્ણાયાગ્રપૂજા દત્તા પાર્થૈર્જગત્પુરઃ ॥ ૨૧.૨૪૧॥

વ્યાસભાર્ગવયોઃ સાક્ષાત્તદૈક્યાત્તદનન્તરમ્ ।
અગ્ર્યાં પૂજાં દુદુશ્ચાન્યાન્ યથાયોગ્યમપૂજયન્ ॥ ૨૧.૨૪૨॥

અગ્ર્યોપહારમુપયાપિત એવ કૃષ્ણે કોપાદનિન્દદમુમાશુ ચ ચેદિરાજઃ ।
શ્રુત્વૈવ તત્પવનજોઽભિયયૌ નૃપં તં હન્તું જગદ્ગુરુવિનિન્દકમૃદ્ધમન્યુઃ ॥ ૨૧.૨૪૩॥

દૂરેઽપિ કેશવવિનિન્દનકારિજિહ્વાં મુચ્છેત્સ્ય ઇત્યુરુતરાઽસ્ય સદા પ્રતિજ્ઞા ।
ભીમસ્ય તં તુ જગૃહે સરિદાત્મજોઽથ સમ્પ્રોચ્ય કેશવવચો નિજયોર્વધાય ॥ ૨૧.૨૪૪॥

અ્લ્ક્ષ્ક્ષ્ં્અયૈવ વધ્યાવિતિ તાવાહ યત્કેશવઃ પુરા ।
તચ્છ્રુત્વા ભીમસેનોઽપિ સ્થિતો ભીષ્મકરગ્રહાત્ ॥ ૨૧.૨૪૫॥

જાનન્નપિ હરેરિષ્ટં સ્વકર્તવ્યતયોત્થિતઃ ।
ભીમ એતાવદુચિતમિતિ મત્વા સ્થિતઃ પુનઃ ॥ ૨૧.૨૪૬॥

દેવસઙ્ઘભવિનાં મહાનભૂદીક્ષ્ય તોષ ઇહ કેશવેઽધિકામ્ ।
અર્ચનાં ચ ઇહ માનુષો જનો મધ્ય એવ સ તુ સં સ્થિતોઽભવત્ ॥ ૨૧.૨૪૭॥

આસુરા ઇહ સુયોધનાદયસ્તત્ર તે વિમનસો બભૂવિરે ।
દુર્વચોભિરધિકં ચ ચેદિપઃ કૃષ્ણમાર્ચ્છદુરુસદ્ગુણાર્ણવમ્ ॥ ૨૧.૨૪૮॥

સમાહ્વયચ્ચ કેશવં યુધે તમાશુ કેશવઃ ।
નિવાર્ય તસ્ય સાયકાઞ્જઘાન ચારિણા પ્રભુઃ ॥ ૨૧.૨૪૯॥

નિકૃત્યમાનકન્ધરઃ સ ભક્તિમાનભૂદ્ધરૌ ।
તમાશ્રિતશ્ચ યોઽસુરો મહાતમઃ પ્રપેદિવાન્ ॥ ૨૧.૨૫૦॥

જયઃ પ્રવિશ્ય કેશવં પુનશ્ચ પાર્ષદોઽભવત્ ।
અસૌ ચ પાણ્ડવક્રતુઃ પ્રવર્તિતો યથોદિતઃ ॥ ૨૧.૨૫૧॥

સુવર્ણરત્નભારકાન્ બહૂન્નૃપા ઉપાનયન્ ।
ઉપાયનં સુયોધનં નૃપોઽદિશદ્ગ્રહેઽસ્ય ચ ॥ ૨૧.૨૫૨॥

અભોજયં સ્તથા દ્વિજાન્ યથેષ્ટભક્ષ્યબોજ્યકૈઃ ।
સુવર્ણરત્નભારકાન્ બહૂંશ્ચ દક્ષિણા દદુઃ ॥ ૨૧.૨૫૩॥

યદિષ્ટમાસ યસ્ય ચ પ્રદત્તમેવ પાણ્ડવૈઃ ।
સમસ્તમત્ર સર્વશોઽથ સસ્નુરુદ્ભૃતા મુદા ॥ ૨૧.૨૫૪॥

નદત્સુરોરુદુન્દુભિપ્રગીતદેવગાયકાઃ ।
પ્રનૃત્તદિવ્યયોષિતઃ સુરાપગાં વ્યગાહયન્ ॥ ૨૧.૨૫૫॥

સમસ્તરાજસં યુતા વિગાહ્ય જાહ્નવીજલે ।
ઋ્લ્ક્ષ્ક્ષ।પુરં યયુઃ પુનશ્ચ તે સુસદ્મ ચાગમન્ સુરાઃ ॥ ૨૧.૨૫૬॥

ગતેષુ સર્વરાજસુ સ્વકાં પુરં સ્વકેષુ ચ ।
સભીષ્મકેષુ સર્વશઃ સહાઽમ્બિકેયકેષુ ચ ॥ ૨૧.૨૫૭॥

વિચિત્રરત્નનિર્મિતે રવિપ્રભે સભાતલ્। એ ।
સકેશવો વરાસને વિવેશ ધર્મનન્દનઃ ॥ ૨૧.૨૫૮॥

તથૈવ રુગ્મિણીમુખાઃ પરિગ્રહા રમેશિતુઃ ।
તથૈવ ભીમફલ્ગુનાવુપાવિશન્ હરેરુપ ॥ ૨૧.૨૫૯॥

સહૈવ વાયુસૂનુના તથૈવ પાર્ષતાત્મજા ।
ઉપૈવ રુગ્મિણીં શુભા તથૈવ સત્યભામિનીમ્ ॥ ૨૧.૨૬૦॥

યમૌ ચ પાર્ષતાદયો ધનઞ્જયાન્તિકેઽવિશન્ ।
તથૈવ રામસાત્યકી સમીપ એવ ભૂભૃતઃ ॥ ૨૧.૨૬૧॥

સમાસતાં તુ સા સભા વ્યરોચતાધિકં તદા ।
યથા સભા સ્વયમ્ભુવઃ સમાસ્થિતા ચ વિષ્ણુના ॥ ૨૧.૨૬૨॥

વિચિત્રહેમમાલિનઃ શુભામ્બરાશ્ચ તેઽધિકમ્ ।
સ્ફુરત્કિરીટકુણ્ડલા વિરેજુરત્ર તે નૃપાઃ ॥ ૨૧.૨૬૩॥

વિશેષતો જનાર્દનઃ સભાર્યકો જગત્પ્રભુઃ ।
યથા દિવૌકસાં સદસ્યનન્તસદ્ગુણાર્ણવઃ ॥ ૨૧.૨૬૪॥

ઉપાસિરે ચ તાન્નૃપાઃ સમસ્તશઃ સુહૃદ્ગણાઃ ।
તદાઽજગામ ખડ્ગભૃત્સહાનુજઃ સુયોધનઃ ॥ ૨૧.૨૬૫॥

દ્વારં સભાયા હરિનીલરશ્મિવ્યૂઢં ન જાનન્ સ વિહાય ભિત્તિમ્ ।
અભ્યન્તરાણાં દૃશિ નો વિઘાતિનીં સં સ્ફાટિકામાશુ દૃઢં ચુચુમ્બે ॥ ૨૧.૨૬૬॥

પ્રવેશયેતાં ચ યમૌ તમાશુ સભાં ભુજૌ ગૃહ્ય નૃપોપદિષ્ટૌ ।
તત્રોપવિશ્ય ક્ષણમન્યતોઽગાદમૃષ્યમાણઃ શ્રિયમેષુ દિવ્યામ્ ॥ ૨૧.૨૬૭॥

અ્લ્ક્ષ્ક્ષી।તત્રેન્દ્રનીલભુવિ રત્નમયાનિ દૃષ્ટ્વા પદ્માનિ નીરમનસા જગૃહે સ્વવસ્ત્રમ્ ।
રત્નોરુદીધિતિનિગૂઢજલં સ્થલં ચ મત્વા પપાત સહિતોઽવરજૈર્જલૌઘે ॥ ૨૧.૨૬૮॥

તં પ્રાહસદ્ભગવતા ક્ષિતિભારનાશહેતોઃ સુસૂચિત ઉરુસ્વરતોઽત્ર ભીમઃ ।
પાઞ્ચાલરાજસુતયા ચ સમં તથાઽન્યૈઃ સ્વીયૈસ્તથાઽનુ જહસુર્ભગવન્મહિષ્યઃ ॥ ૨૧.૨૬૯ ॥

મન્દસ્મિતેન વિલસદ્વદનેન્દુબિમ્બો નારાયણસ્તુ મુખમીક્ષ્ય મરુત્સુતસ્ય ।
નોવાચ કિઞ્ચિદથ ધર્મસુતો નિવાર્ય પ્રાસ્થાપયદ્વસનમાલ્યવિલેપનાનિ ॥ ૨૧.૨૭૦ ॥

કૃષ્ણાવૃકોદરગતં બહલ્। અં નિધાય ક્રોધં યયૌ સશકુનિર્ધૃતરાષ્ટ્રપુત્રઃ ।
સમ્બ્રીલ્. ઇતો નૃપતિં દત્તવરામ્બરાદીન્ચક્રૃત્ય માર્ગગત આહ સ માતુલં સ્વમ્ ॥ ૨૧.૨૭૧ ॥

યૌ મામહસતાં કૃષ્ણાભીમૌ કૃષ્ણસ્ય સન્નિધૌ ।
તયોરકૃત્વા સન્તાપં નાહં જીવિતુમુત્સહે ॥ ૨૧.૨૭૨ ॥

યદિ મે શક્તિરત્ર સ્યાદ્ઘાતયેયં વૃકોદરમ્ ।
અગ્રપૂજાં ચ કૃષ્ણસ્ય વિલુમ્પેયં ન સં શયઃ ॥ ૨૧.૨૭૩ ॥

ઈદૃશં પાણ્ડવૈશ્વર્યં દૃષ્ટ્વા કોનામ જીવિતમ્ ।
ઇચ્છેત કરદા યેષાં વૈશ્યવત્સર્વભૂમિપાઃ ॥ ૨૧.૨૭૪ ॥

ઇત્યુક્તઃ શકુનિર્વૈરં દૃઢીકર્તું વચોઽબ્રવીત્ ।
કિં તે વૈરેણ રાજેન્દ્ર બલિભિર્ભ્રાતૃભિઃ પુનઃ ॥ ૨૧.૨૭૫ ॥

અનુજીવસ્વ તાન્ વીરાન્ ગુણજ્યેષ્ઠાન્ બલાધિકાન્ ।
ઇતીરિતોઽતિસં વૃદ્ધકોપ આહ સુયોધનઃ ॥ ૨૧.૨૭૬ ॥

યદિ તેષાં તદૈશ્વર્યં ન માં ગચ્છેદશેષતઃ ।
સર્વથા નૈવ જીવેયમિતિ સત્યં બ્રવીમિ તે ॥ ૨૧.૨૭૭ ॥

નચ બાહુબલાચ્છક્ષ્ય આદાતું તાં શ્રિયં ક્વચિત્ ।
નેન્દ્રોઽપિ સમરે શક્તસ્તાન્ જેતું કિમુ માનુષાઃ ॥ ૨૧.૨૭૮ ॥

ઇતીરિતઃ પાપતમ આહ ગાન્ધારકો નૃપઃ ।
પાપાનામખિલાનાં ચ પ્રધાનં ચક્રવર્તિનમ્ ॥ ૨૧.૨૭૯ ॥

અ્લ્ક્ષ્ક્ષીઇ।યાન્તાં શ્રિયં પ્રદીપ્તાં ત્વં પાણ્ડવેષુ પ્રપશ્યસિ ।
તામક્લેશત આદાસ્યે ક્રીડન્નક્ષૈસ્ત્વદન્તિકે ॥ ૨૧.૨૮૦ ॥

ઇતીરિતઃ પ્રસન્નધીઃ સુયોધનો બભૂવ હ ।
પ્રજગ્મતુશ્ચ તાવુભૌ વિચિત્રવીર્યજં નૃપમ્ ॥ ૨૧.૨૮૧ ॥

ધૃતરાષ્ટ્રમથોવાચ દ્વાપરાં શોઽતિપાપકૃત્ ।

નાસ્તિક્યરૂપઃ શકુનિર્વિવર્ણં હરિણં કૃશમ્ ॥ ૨૧.૨૮૨ ॥

દુર્યોધનં તુ તચ્છ્રુત્વા કુત ઇત્યાહ દુર્મનાઃ ।
અબ્રૂતાં તૌ નૃપાયાઽશુ દ્વાભ્યાં યન્મન્ત્રિતં પથિ ॥ ૨૧.૨૮૩ ॥

શ્રુત્વૈવ તન્નેત્યવદત્સ ભૂપતિર્વિરોધિ ધર્મસ્ય વિનાશકારણમ્ ।
કુમન્ત્રિતં વો ન મમૈતદિષ્ટં સ્વબાહુવીર્યાપ્તમહાશ્રિયો હિ તે ॥ ૨૧.૨૮૪ ॥

ત્વયાઽપિ નિર્જિત્ય દિશો મખાગ્ર્યાઃ કાર્યાઃ સ્પૃધો મા ગુણવત્તમૈસ્તૈઃ ।
વિશેષતો ભ્રાતૃભિરગ્ર્યપૌરુષૈરિત્યુક્ત આહાઽશુ સુયોધનસ્તમ્ ॥ ૨૧.૨૮૫ ॥

યદિ શ્રિયં પાણ્ડવાનાં નાક્ષૈરાચ્છેત્તુમિચ્છસિ ।
મૃતમેવાદ્ય માં વિદ્ધિ પાણ્ડવૈસ્ત્વં સુખી ભવ ॥ ૨૧.૨૮૬ ॥

યદિ મજ્જીવિતાર્થી ત્વમાનયાઽશ્વિહ પાણ્ડવાન્ ।
સભાર્યાન્ દેવનાયૈવ નચાધર્મોઽત્ર કશ્ચન ॥ ૨૧.૨૮૭ ॥

વેદાનુજીવિનો વિપ્રાઃ ક્ષત્રિયાઃ શસ્ત્રજીવિનઃ ।
ત્રુટ્યતે યેન શત્રુશ્ચ તચ્છસ્ત્રં નૈવ ચેતરત્ ॥ ૨૧.૨૮૮ ॥

અતઃ સ્વધર્મ એવાયં તવાપિ સ્યાત્ફલં મહત્ ।
ઇત્યુક્તો મા ફલં મેઽસ્તુ તવૈવાસ્ત્વિતિ સોઽબ્રવીત્ ॥ ૨૧.૨૮૯ ॥

એવં બ્રુવન્નપિ નૃપ આવિષ્ટઃ કલિના સ્વયમ્ ।
પુત્રસ્નેહાચ્ચ વિદુરમાદિશત્પાણ્ડવાન્ પ્રતિ ॥ ૨૧.૨૯૦ ॥

આવિવેશ કલિસ્તં હિ યદા પુત્રત્વસિદ્ધયે ।
ચ્ચિલ્લક્ષક્ષવ્ઽં શેન તત આરભ્ય નૈવાસ્માદપજગ્મિવાન્ ॥ ૨૧.૨૯૧ ॥

યાવત્પુરં પરિત્યજ્ય વનમેવ વિવેશ હ ।
તદન્તરા તતસ્તસ્ય પાપયુક્તં મનોઽભવત્ ॥ ૨૧.૨૯૨ ॥

ન્યવારયત્તં વિદુરો મહત્તે પાપં કુલસ્યાપિ વિનાશકોઽયમ્ ।
સમુદ્યમો નાત્ર વિચાર્યમસ્તિ કૃથા ન તસ્માદયશશ્ચ તે સ્યાત્ ॥ ૨૧.૨૯૩ ॥

ઇતિ બ્રુવાણં કલહોઽત્ર ન સ્યાન્નિવારયામો વયમેવ યસ્માત્ ।
દ્રષ્ટું સુતાન્ ક્રીડત એકસં સ્થાનિચ્છામિ પાર્થાંશ્ચ સુયોધનાદીન્ ॥ ૨૧.૨૯૪ ॥

અતઃ ક્ષિપ્રમુપાનેયાઃ પાર્થા ઇતિ બલોદિતઃ ।
યયૌ સ વિદુરઃ પાર્થાન્ દ્વારકાં કેશવે ગતે ॥ ૨૧.૨૯૫ ॥

ગતે હિ પાર્થસન્નિધેઃ સુયોધને તુ નારદઃ ।
શશં સ ધર્મસૂનુના પ્રચોદિતોઽરિમાગતમ્ ॥ ૨૧.૨૯૬॥

ક ઉદ્યમી નૃપેષ્વિતિ પ્રપૃષ્ટ આહ નારદઃ ।
સ સૌભરાડ્વરં શિવાદવાપ વૃષ્ણિનિર્જયમ્ ॥ ૨૧.૨૯૭॥

પાં સુમુષ્ટિં સકૃદ્ગ્રાસી બહૂનબ્દાં સ્તપશ્ચરન્ ।
આજગામ હરાદાપ્ય વરં કૃષ્ણજયે પુનઃ ॥ ૨૧.૨૯૮॥

સ શ્રુત્વા માગધવધં દિશાં વિજયમેવ ચ ।
રાજસૂયં ક્રતું ચૈવ શિશુપાલવધં તથા ॥ ૨૧.૨૯૯॥

યદૂન્ પ્રત્યુદ્યમં તૂર્ણં કરોતીતિ નિશમ્ય તત્ ।
સમૈક્ષદ્ધર્મજઃ કૃષ્ણમુખશીતાં શુમણ્ડલમ્ ॥ ૨૧.૩૦૦॥

અસ્ત્વિત્યુક્ત્વા સ ગોવિન્દઃ પ્રેષયામાસ યાદવાન્ ।
પ્રદ્યુમ્નાદીન્ દિનૈઃ કૈશ્ચિત્સ્વયં ચાગાત્સહાગ્રજઃ ॥ ૨૧.૩૦૧॥

વિદુરસ્તુ તતો ગત્વા ધર્મરાજમથાઽહ્વયત્ ।
ભ્રાતૃભિર્વાર્યમાણોઽપિ કૃષ્ણયા ચ સ ધર્મરાટ્ ।
સાર્દ્ધં માત્રા ભ્રાતૃભિશ્ચ કૃષ્ણયા ચ યયૌ દ્રુતમ્ ॥ ૨૧.૩૦૨॥

ઞ્લ્ક્ષ્ક્ષ્વ્।જ્યેષ્ઠાજ્ઞયૈવ વિદુર આહ્વયન્નપિ ધર્મજમ્ ।
નાઽગન્તવ્યમિતિ પ્રાહ દોષાનુક્ત્વાઽક્ષજાન્ બહૂન્ ॥ ૨૧.૩૦૩॥

ઇતીહ દોષસઞ્ચયસ્તથાચ તે પિતુર્વચઃ ।
સમીક્ષ્ય તદ્દ્વયં સ્વયં કુરુષ્વ કાર્યમાત્મનઃ ॥ ૨૧.૩૦૪॥

ઇતીરિતોઽપિ પાણ્ડવો યયૌ કલિપ્રવેશિતઃ ।
વિચિત્રવીર્યજં ચ તં સમાસદત્સસૈનિકઃ ॥ ૨૧.૩૦૫॥

કલ્યાવેશાન્નૃપતિઃ પ્રતિજજ્ઞે પૂર્વમેવ ધર્માત્મા ।
આહૂતો દ્યૂતરણાન્નિવર્તેયં નૈવ વારિતોઽપીતિ ॥ ૨૧.૩૦૬॥

તેનાઽયાત્સ્વસુહૃદ્ભિર્નિવાર્યમાણોઽપિ નાગપુરમાશુ ।
નહિ ધર્મો દ્યૂતકૃતો વિશેષતઃ ક્ષત્રિયસ્ય લોકગુરોઃ ॥ ૨૧.૩૦૭॥

વૈચિત્રવીર્યતનયેન તુ પાણ્ડુપુત્રાઃ સમ્ભાવિતાસ્તમુપ ચ ન્યવિશન્નિશાં તામ્ ।
પ્રાતશ્ચ ભીષ્મમુખરાઃ સકલાશ્ચ ભૂપા આસેદુરાશુ ચ સભાં સહ પાણ્ડુપુત્રૈઃ ॥ ૨૧.૩૦૮॥

વૈચિત્રવીર્યનૃપતિર્વિદુરાન્વિતોઽસ્ય ગાન્ધારરાજસહિતાસ્તનયાઃ સકર્ણાઃ ।

પ્રાપ્તાઃ સભાતલ્. અમથાઽહ્વયદત્ર ધર્મરાજં સુતઃ સુબલકસ્ય સ દેવનાય ॥ ૨૧.૩૦૯॥

સર્વાંશ્ચ તત્ર કલિરાવિશદેવ ભીમપૂર્વાન્ વિનૈવ ચતુરઃ સપૃથાં ચ કૃષ્ણામ્ ।
ક્ષત્તારમેવ ચ તતો નહિ ભીષ્મમુખ્યૈસ્તે વારિતાઃ કુલવિનાશનકર્મવૃત્તાઃ ॥ ૨૧.૩૧૦॥

ભીમાદિભિઃ સ વિદુરેણ ચવાર્યમાણો દ્યૂતે નિધાય પણમપ્યખિલં સ્વવિત્તમ્ ।
ગાન્ધારકેણ વિદિતાક્ષહૃદા જિતો દ્રાક્પાણ્ડોઃ સુતોઽથ નકુલં ન્યદધાત્પણાય ॥ ૨૧.૩૧૧॥

તસ્મિન્ જિતેઽથ સહદેવમથાર્જુનં ચ ભીમં ચ સોમકસુતાં સ્વમપિ ક્રમેણ ।
રાજા નિધાય વિજિતોઽથ સુયોધનઃ સ્વં સૂતં દિદેશ પૃષતાત્મજપુત્રિકાયાઃ ॥ ૨૧.૩૧૨॥

સૂતો ગત્વા તદન્તં સમકથયદિમાં દ્યૂતમધ્યે જિતાઽસિ
ક્ષિપ્રં ચાઽયાહિ રાજ્ઞાં સમિતિમુરુતરામિત્યથો સાઽપ્યવાદીત્ ।
નાહં યાસ્યે ગુરૂણાં સમિતિમિતિ યયૌ સોઽપ્યમું ભીમભીતં
જ્ઞાત્વા દુઃ શાસનં સોઽપ્યદિશદથ નૃપો ધાર્તરાષ્ટ્રોઽનુજં સ્વમ્ ॥ ૨૧.૩૧૩॥

ઋ્વ્લ્ક્ક્ષ્ક્ષ્વ। સ પાપપૂરુષોત્તમઃ પ્રગૃહ્ય કેશપક્ષકે ।
પુરઃ સ્વમાતુરાનયત્સભામયુગ્મવાસસીમ્ ॥ ૨૧.૩૧૪॥

સમાહૃતા રજસ્વલા જગાદ ભીષ્મપૂર્વકાન્ ।
અધર્મ એષ વાર્યતે ન ધર્મિભિર્ભવદ્વિધૈઃ ॥ ૨૧.૩૧૫॥

કથં છલાત્મકે દ્યૂતે જિતે ધર્મજયો ભવેત્ ।
નહિ દ્યૂતં ધર્મ્યમાહુર્વિશેષેણ તુભૂભુજામ્ ॥ ૨૧.૩૧૬॥

યે ધર્મં ન વદન્તીહ ન તે વૃદ્ધા ઇતીરિતાઃ ।
અવૃદ્ધમણ્ડિતાં નૈવ સભેત્યાહુર્મનીષિણઃ ॥ ૨૧.૩૧૭॥

કથં દ્યૂતે જિતા ચાહમજિતે સ્વપતૌ સ્થિતે ।
સમાનધર્મિણીમાહુર્ભાર્યાં યસ્માદ્દ્વિપશ્ચિતઃ ॥ ૨૧.૩૧૮॥

સહૈવ કર્મ કર્તવ્યં પતૌ દાસે હિ ભાર્યયા ।
દાસીત્વં ન પૃથઙ્મેસ્યાજ્જિતેઽપિ હિ પતૌ તતઃ ॥ ૨૧.૩૧૯॥

ઇત્યુક્તા અપિ ભીષ્માદ્યાઃ કલ્યાવેશેન મોહિતાઃ ।
પૃચ્છ ધર્મજમિત્યુક્ત્વા તૂષ્ણીમેવ બભૂવિરે ॥ ૨૧.૩૨૦॥

દુર્યોધનપ્રતીપં હિ ન કશ્ચિદશકત્તદા ।
ઉવાચ વિદુરસ્તત્ર ન ધર્મોઽયમિતિ સ્ફુટમ્ ॥ ૨૧.૩૨૧॥

ન તસ્ય વાચં જગ્રાહ ધૃતરાષ્ટ્રઃ સહાત્મજઃ ।

ઊર્ધ્વબાહુઃ સ ચુક્રોશ દેવાનાં ખ્યાપયં સ્તદા ॥ ૨૧.૩૨૨॥

સ્વાશક્તિં દ્રૌપદીં ચાઽહ જિતા નૈવાસિ ધર્મતઃ ।
અધર્મો હિ મહાનેતાં સભામાક્રમ્ય તિષ્ઠતિ ॥ ૨૧.૩૨૩॥

એવં તુ વિદુરેણોક્તે વિકર્ણઃ પાપકોઽપિ સન્ ।
આહ ડમ્ભાર્થમેવાત્ર ધર્મવિત્ત્વં પ્રકાશયન્ ।
અધર્મ એવાયમિતિ કર્ણોઽથૈનમભર્ત્સયત્ ॥ ૨૧.૩૨૪॥

અ્લ્ક્ષ્ક્ષ્ક્ષ્વી। દૃષ્ટ્વા ભીમઃ ક્લિશ્યમાનાં તુ કૃષ્ણાં ધર્માત્યયં ધર્મરાજે ચ દૃષ્ટ્વા ।
રાજા શાસ્યો યુવરાજેન ધર્માચ્ચલન્ યસ્માદ્વાક્યમિદં બભાષે ॥ ૨૧.૩૨૫॥

ઇમાં ન્યસ્તવતો દ્યૂતે ધક્ષાણીયૌ હિ તે ભુજૌ ।
નૈવમિત્યર્જુનોઽવાદીત્તમાહાથ વૃકોદરઃ ॥ ૨૧.૩૨૬॥

વક્તવ્યં નતુ કર્તવ્યં તસ્માન્નહિ મયા કૃતમ્ ।
ઉત્તમે વચસા શિક્ષા મધ્યમેઽર્થાપહારણમ્ ।
અધમે દેહદણ્ડશ્ચ તસ્માદ્વાચ્યો યુધિષ્ઠિરઃ ॥ ૨૧.૩૨૭॥

અથ કર્ણોઽબ્રવીત્કૃષ્ણામપતિર્હ્યસિ શોભને ।
ધાર્તરાષ્ટ્રગૃહં યાહીત્યથ દુર્યોધનોઽવદત્ ।
પરસ્પરવિરોધાર્થં પાણ્ડવાનામિદં વચઃ ॥ ૨૧.૩૨૮॥

યુધિષ્ઠિરો દુઃખહેતુસ્તવૈકો યદ્યેનમન્યે ન ગુરુર્ન એષઃ ।
ઇતિ બ્રૂયુરથવા ભીમપાર્થાવેકોઽપિવા ભીમ ઇહોત્સૃજે ત્વામ્ ॥ ૨૧.૩૨૯॥

ઇત્યુક્ત ઊચે પવમાનસૂનુઃ પૂજ્યોઽસ્માકં ધર્મજોઽસં શયેન ।
ગુરુશ્ચાહં વોઽખિલાનાં યતો હિ બલજ્યેષ્ઠં ક્ષત્રમાહુર્મહાન્તઃ ॥ ૨૧.૩૩૦॥

બલજ્યૈષ્ઠ્યે યદિ વઃ સં શયઃ સ્યાદુત્તિષ્ઠધ્વં સર્વ એવાદ્ય વીરાઃ ।
મૃદ્નામિ વઃ પાદતલ્. એન સર્વાન્ સહાનુબન્ધાન્ યશ્ચ માં યોદ્ધુકામઃ ॥ ૨૧.૩૩૧॥

ઇતિ બ્રુવન્ સમુત્થિતો નદન્ વૃકોદરો યદા ।
વિઘૂર્ણિતા સભાઽખિલા ભયાન્નચાઽહ કિઞ્ચન ॥ ૨૧.૩૩૨॥

ભીષ્મો દ્રોણો વિદુરાદ્યાઃ ક્ષમસ્વ સર્વં ત્વયોક્તં સત્યમિત્યેવ હસ્તૌ ।
ગૃહીત્વૈનં સ્થાપયામાસુરસ્મિન્ સ્થિતે શાન્તિં ચાઽપિરે ધાર્તરાષ્ટ્રાઃ ॥ ૨૧.૩૩૩॥

નિવારિતો ધર્મજેન ગુરુભિશ્ચાપરૈસ્તદા ।
માનનાર્થં ગુરૂણાં તુ ન ભીમસ્તાન્ જઘાન હ ॥ ૨૧.૩૩૪॥

નચાત્યવર્તત જ્યેષ્ઠં ધર્માત્માનં યુધિષ્ઠિરમ્ ।
તેષાં પાપાભિવૃદ્ધ્યર્થં જ્યેષ્ઠવૃત્તિં ચ દર્શયન્ ॥ ૨૧.૩૩૫॥

અલ્ક્ષ્ક્ષ્વીઇઽથ દુર્યોધનઃ પાપો ભીમસેનસ્ય પશ્યતઃ ।
ઊરું સન્દર્શયામાસ કૃષ્ણાયૈ ભીમ આહ તમ્ ॥ ૨૧.૩૩૬॥

તવોરુમેનં ગદયોરુવેગયા બિભેત્સ્ય ઇત્યેવ પુનઃ સુયોધનઃ ।
ઊચે નાન્યદ્ભવતામસ્તિ વિત્તં દ્યૂતે કૃષ્ણં સ્થાપયધ્વં પણાય ॥ ૨૧.૩૩૭॥

અથાબ્રવીદ્વૃકોદરઃ કૃતેઽવમાનને હરેઃ ।
નિપાત્ય ભૂતલ્. એ હિતેશિરો મૃદિષ્ય ઇત્યલમ્ ॥ ૨૧.૩૩૮॥

સ વધ્ય એવ મે સદા પરોક્ષતોઽપિ યો હરિમ્ ।
વિનિન્દયેદિતિ ધ્રુવં પ્રતિશ્રુતં હિ મારુતેઃ ॥ ૨૧.૩૩૯॥

પુનશ્ચ પાપવૃદ્ધયે તદૈવ નો જઘાન તમ્ ।
વિકર્તનાત્મજઃ પુનર્જગાદ સોમકાત્મજામ્ ॥ ૨૧.૩૪૦॥

પ્રયાહિ ભૂભૃતો હિ નો ગૃહં ન સન્તિ પાણ્ડવાઃ ।
ઇતીરિતે સમુત્થિતૌ વૃકોદરોઽનુ ચાર્જુનઃ ॥ ૨૧.૩૪૧॥

ઉભૌ ચ તૌ યુધિષ્ઠિરો ન્યવારયત્તથાઽપરે ।
તતો વિષણ્ણયોસ્તયોઃ સુયોધનો વચોઽબ્રવીત્ ॥ ૨૧.૩૪૨॥

દુઃ શાસનૈષાં વાસાં સિ દાસાનાં નો વ્યપાકુરુ ।
ઇત્યુક્તોઽભ્યગમત્પાર્થાન્ સ્વવાસાં સ્યથ તે દદુઃ ॥ ૨૧.૩૪૩॥

તે ચર્મવસના ભૂત્વાતાનશિષ્ટાન્ પ્રકાશ્ય ચ ।
નિષેદુશ્ચ ક્ષમાયાન્તે ક્ષમામાલમ્બ્ય વિસ્તૃતામ્ ॥ ૨૧.૩૪૪॥

પુનર્દુર્યોધનેનોક્તઃ પાર્થાનામથ પશ્યતામ્ ।
ચકર્ષ વાસો દ્રૌપદ્યાસ્તદાઽવાદીદ્વૃકોદરઃ ॥ ૨૧.૩૪૫॥

પાપેષુ પૂર્વસ્ય તથાઽધમસ્ય વં શે કુરૂણામુરુધર્મશીલિનામ્ ।
દુઃ શાસનસ્યાસ્ય વિદાર્ય વક્ષઃ પિબામિ રક્તં જગતઃ સમક્ષમ્ ॥ ૨૧.૩૪૬॥

વિકૃષ્યમાણે વસને તુ કૃષ્ણા સસ્માર કૃષ્ણં સુવિશેષતોઽપિ ।
તદાઽન્યદાસીદ્વસનં ચ તસ્યા દિવ્યં સુસૂક્ષ્મં કનકાવદાતમ્ ॥ ૨૧.૩૪૭॥

ચ્લ્ક્ષ્ક્ષક્ષ્।પુનઃ પુનશ્ચૈવ વિકર્ષમાણે દુઃ શાસનેઽન્યાનિ ચ તાદૃશાનિ ।
બભૂવુરન્તં ન જગામ પાપઃ શ્રાન્તો ન્યષીદત્સ્વિન્નગાત્રઃ સભાયામ્ ॥ ૨૧.૩૪૮॥

વસ્ત્રોચ્ચયે શૈલનિભે પ્રજાતે દુર્યોધનઃ પ્રાહ સઞ્જાતકોપઃ ।
પ્રવેશયેમાં ગૃહમેવ શીઘ્રં કિં નશ્ચિરેણેતિ સુમન્દબુદ્ધિઃ ॥ ૨૧.૩૪૯॥

તચ્છ્રુત્વા વચનં કૃષ્ણા પ્રતિજ્ઞામકરોત્તદા ।
ભીમો દુર્યોધનં હન્તા કર્ણં હન્તા ધનઞ્જયઃ ।
શકુનિં ત્વક્ષકિતવં સહદેવો વધિષ્યતિ ॥ ૨૧.૩૫૦॥

ઇત્યુક્તે તત્તથેત્યાહ ભીમસેનઃ સભાતલ્। એ ।
પ્રતિજ્ઞામાદદે પાર્થસ્તાં માદ્રીનન્દનસ્તથા ।
નકુલઃ પ્રતિજજ્ઞેઽથ શાકુનેયવધં પ્રતિ ॥ ૨૧.૩૫૧॥

તતઃ સુયોધનાનુજશ્ચકર્ષ પાર્ષતાત્મજામ્ ।
ગૃહાય તન્નિશામ્ય તુ ક્રુધાઽહ મારુતાત્મજઃ ॥ ૨૧.૩૫૨॥

અર્જુનાર્જુન નૈવાત્ર ક્ષમા મે તાત રોચતે ।
પતિતસ્યાસ્ય દેહસ્ય કાષ્ઠવિષ્ઠાસમસ્ય ચ ।
ફલાનિ ત્રીણિ શિષ્યન્તે વિદ્યા કર્મ સુતા ઇતિ ॥ ૨૧.૩૫૩॥

ઇતિ વેદોદિતં વાક્યં ન સુતો દારદૂષણે ।
દુષ્ટદારો નચાઽપ્નોતિ લોકાનર્દ્ધો હિ દૂષિતઃ ।
અરક્ષણાદ્દૂષિતાયા ન ત્યાગાચ્ચ શુભં ભવેત્ ॥ ૨૧.૩૫૪॥

અતોઽદ્ય સાનુબન્ધકાન્નિહન્મિ ધાર્તરાષ્ટ્રકાન્ ।
ઇતિ બ્રુવન્ વ્યલોકયદ્રિપૂન્ દહન્નિવૌજસા ॥ ૨૧.૩૫૫॥

દદર્શ ચ મહાઘોરમાદાતું પરિઘં રુષા ।
કર્તું વ્યવસિતો બુદ્ધ્યા નિશ્શેષાન્ ધૃતરાષ્ટ્રજાન્ ॥ ૨૧.૩૫૬॥

તદા શિવા વવાશિરે સુયોધનાગ્નિગેહતઃ ।
તથૈવ તત્પિતુર્ગૃહેઽપ્યભૂદ્ભયાનકં બહુ ॥ ૨૧.૩૫૭॥

અક્ષ્ચ્યં્ઇમિત્તાન્યતિઘોરાણિ કુપિતે મારુતાત્મજે ।
દૃષ્ટ્વાઽમ્બિકેયો વિદુરં પપ્રચ્છૈષાં ફલં દ્રુતમ્ ॥ ૨૧.૩૫૮॥

આહ તં વિદુરો જ્યેષ્ઠં ક્ષણેઽસ્મિં સ્તવ પુત્રકાઃ ।
સાનુબન્ધા નશિષ્યન્તિ વૃકોદરબલાહતાઃ ॥ ૨૧.૩૫૯॥

ક્રીડસેઽર્ભકવત્ત્વં હિ કિં જિતં કિં જિતં ત્વિતિ ।

અધર્મેણ જિતાનત્ર જિતાન્ પશ્યસિ પાણ્ડવાન્ ॥ ૨૧.૩૬૦॥

સ્ત્રીષુ દ્યૂતેષુ વા દત્તં મદાન્ધેન નરેણ વા ।
ન દત્તમાહુર્વિદ્વાંસસ્તસ્ય બન્ધુભિરેવ ચ ॥ ૨૧.૩૬૧॥

આહાર્યં પુનરાહુશ્ચ તથાઽપિ નતુ પાણ્ડવૈઃ ।
તત્કૃતં તવ પુત્રાણાં ખ્યાપયદ્ભિરશિષ્ટતામ્ ॥ ૨૧.૩૬૨॥

ઇત્યુક્ત આહાઽમ્બિકેયો નિમિત્તાનાં ફલં કથમ્ ।
ન ભવેદિતિ સ પ્રાહ દ્રુતં કૃષ્ણા વિમુચ્યતામ્ ॥ ૨૧.૩૬૩॥

તોષયસ્વ વરૈશ્ચૈનામન્યથા તે સુતાન્મૃતાન્ ।
વિદ્ધિ ભીમેન નિષ્પિષ્ટાન્માઽત્ર તે સં શયો ભવેત્ ॥ ૨૧.૩૬૪॥

કૃષ્ણા ચ પાણ્ડવાશ્ચૈવ તપોવૃદ્ધિમભીપ્સવઃ ।
તપસા નૈવ દક્ષ્યન્તિ તેન જીવન્તિ તે સુતાઃ ॥ ૨૧.૩૬૫॥

તથાઽપિ યદિ કૃષ્ણાં ત્વં ન મોચયસિ તે સુતાન્ ।
હનિષ્યતિ ન સન્દેહો બલેનૈવ વૃકોદરઃ ॥ ૨૧.૩૬૬॥

ઇતીરિતો વિનિર્ભર્ત્સ્ય પુત્રં દુઃ શાસનં નૃપઃ ।
અમોચયદ્વરૈશ્ચૈનાં છન્દયામાસ પાર્ષતીમ્ ॥ ૨૧.૩૬૭॥

છન્દિતા સા વરૈસ્તેન ધર્મે ભાગવતે સ્થિતા ।
નૈવાઽત્મનો વરાન્ વવ્રે વવ્રે તેષાં વિમોક્ષણમ્ ॥ ૨૧.૩૬૮॥

યુધિષ્ઠિરસ્ય સભ્રાતુઃ સરાષ્ટ્રસ્ય વિમોક્ષણમ્ ।
દદૌ નૃપોઽસ્યા ન પુનશ્છન્દ્યમાનાઽપિ સાઽવૃણોત્ ॥ ૨૧.૩૬૯॥

સ્વિક્ષ્ય।ભર્તુર્વિષ્ણોશ્ચ નાન્યસ્માદ્વરસ્વીકાર ઇષ્યતે ।
એવં હિ ભગવદ્ધર્મસ્તસ્માત્સા નાવૃણોત્પરમ્ ॥ ૨૧.૩૭૦॥

અધર્મતો હૃતત્વાત્તુ તદ્દાનં ન વરો ભવેત્ ।
ઇતિ મત્વા પાણ્ડવાનાં વવ્રે કૃષ્ણા વિમોક્ષણમ્ ॥ ૨૧.૩૭૧॥

શ્વશુરાદૈહિકવરાઃ ક્ષત્રિયાયાસ્ત્રયો યતઃ ।
ઉક્તાઃ શતં ચ વિપ્રાયા ધર્મે ભાગવતે તતઃ ।
હેતુનાઽનેન વવ્રે સા નાન્યત્કિઞ્ચિદતઃ પરમ્ ॥ ૨૧.૩૭૨॥

તતો વિમુક્તાઃ પ્રયયુશ્ચ પાર્થા ગુરૂન્ પ્રણમ્ય સ્વપુરં સકૃષ્ણાઃ ।
દુર્યોધનાનન્તરજો જગાદ તાતં નિજં પાપકૃતાં પ્રધાનઃ ॥ ૨૧.૩૭૩॥

સમસ્તપાણ્ડવશ્રિયં સમાગતામહો પુનઃ ।
વ્યમોચયો વૃકોદરાદ્વધશ્ચ નો ધ્રુવો ભવેત્ ॥ ૨૧.૩૭૪॥

અતઃ પુનશ્ચ પાણ્ડવાન્ સમાહ્વયસ્વ નઃ કૃતે ।
પુનશ્ચ દેવનં ભવેજ્જિતો વનં પ્રયાતુ ચ ॥ ૨૧.૩૭૫॥

તેનોક્તઃ સ તદા રાજા પાણ્ડવાન્ પુનરાહ્વયત્ ।
પુનઃ પિત્રા સમાહૂતો દેવનાય યુધિષ્ઠિરઃ ।
ભ્રાતૃભિર્વાર્યમાણોઽપિ કૃષ્ણયા ચાઽગમત્સભામ્ ॥ ૨૧.૩૭૬॥

દ્વાદશાબ્દં વને વાસમજ્ઞાતત્વેન વત્સરમ્ ।
વાસં પ્રસિદ્ધનૃપતેઃ પુરે નૈવાતિદૂરતઃ ॥ ૨૧.૩૭૭॥

કૃષ્ણાયાઃ પાણ્ડવાનાં વા દર્શનેઽજ્ઞાતવાસિનામ્ ।
એકસ્યાપિ સમસ્તાનાં દ્વાદશાબ્દં પુનર્વનમ્ ॥ ૨૧.૩૭૮॥

વત્સરાજ્ઞાતવાસં ચ ત્યાગેઽપ્યુક્તવિધેસ્તથા ।
દુર્યોધનઃ પણં ચક્રે બુદ્ધ્યા દુઃ શાસનોક્તયા ॥ ૨૧.૩૭૯॥

ગાન્ધારેણ પુનશ્ચાક્ષહૃદયજ્ઞેન ધર્મજઃ ।
પરાજિતો વનં યાતુમૈચ્છત્સભ્રાતૃકો યદા ॥ ૨૧.૩૮૦॥

અક્ષ્ચી। તદા નનર્ત પાપકૃત્સુયોધનાનુજો હસન્ ।
વદંશ્ચ મારુતાત્મજં પુનઃ પુનશ્ચ ગૌરિતિ ॥ ૨૧.૩૮૧॥

ઉવાચ ચ પુનઃ કૃષ્ણાં નૃત્યન્નેવ સભાતલ્। એ ।
અપતિર્હ્યસિ કલ્યાણિ ગચ્છ દુર્યોધનાલયમ્ ॥ ૨૧.૩૮૨॥

એતેઽખિલાઃ ષણ્ઢતિલાસ્તમોઽન્ધમાપ્તા નચૈષાં પુનરુત્થિતિઃ સ્યાત્ ।
ઇતિ બ્રુવાણોઽનુચકાર ભીમં તદાઽહસન્ ધાર્તરાષ્ટ્રાશ્ચ સર્વે ॥ ૨૧.૩૮૩॥

તદાઽકરોદ્ભીમસેનઃ પ્રતિજ્ઞાં હન્તાઽસ્મિ વો નિખિલાન્ સઙ્ગરેઽહમ્ ।
ઇતીરિતે શરણં દ્રોણમેવ જગ્મુઃ સમસ્તા ધૃતરાષ્ટ્રપુત્રાઃ ॥ ૨૧.૩૮૪॥

યત્ર દ્રોણસ્તત્ર પુત્રસ્તત્ર ભીષ્મઃ કૃપસ્તથા ।
નચાત્યેતિ ગુરૂન્ ભીમ ઇતિ તં શરણં યયુઃ ॥ ૨૧.૩૮૫॥

અબ્રવીદ્ધાર્તરાષ્ટ્રાંશ્ચ દ્રોણો વિપ્રોઽપિ સન્નહમ્ ।
સપુત્રઃ સકૃપઃ શસ્ત્રં ગ્રહીષ્યે ભવતાં કૃતે ॥ ૨૧.૩૮૬॥

રક્ષણે ભવતાં ચૈવ કુર્યાં યત્નં સ્વશક્તિતઃ ।
નતુ ભીમાદ્રક્ષિતું વઃ શક્તઃ સત્યં બ્રવીમ્યહમ્ ॥ ૨૧.૩૮૭॥

તતો યયુઃ પાણ્ડવાસ્તે સભાયા વનાય કૃષ્ણાસહિતાઃ સુશૂરાઃ ।
ગત્યાઽનુચક્રે યુવસિં હખેલગતિં ભીમં ધાર્તરાષ્ટ્રોઽપહસ્ય ॥ ૨૧.૩૮૮॥

દૃષ્ટ્વા સભાયા અર્દ્ધનિષ્ક્રાન્તદેહો વ્યાવૃત્ય ભીમઃ પ્રાહ સં રક્તનેત્રઃ ।
ઊરું તવાન્યં ચ રણે વિભેત્સ્ય ઇત્યુક્ત્વાઽસૌ નિર્ગતોઽસત્સભાયાઃ ॥ ૨૧.૩૮૯॥

પ્રયાતાનનુ તાન્ કુન્તી પ્રયયૌ પુત્રગૃદ્ધિની ।
રોરુધ્યમાનાં વિદુરઃ સ્થાપયામાસ તાં ગૃહે ।
પ્રણમ્ય તાં યયુઃ પાર્થાઃ સકૃષ્ણાઃ શીઘ્રગામિનઃ ॥ ૨૧.૩૯૦॥

યુધિષ્ઠિરોઽવાગ્વદનો યયૌ ન ક્રોધચક્ષુષા ।
દહેયં કૌરવાન્ સર્વાનિતિ કારુણિકો નૃપઃ ॥ ૨૧.૩૯૧॥

અક્ષ્યીઇ।ઉદ્ધૃત્ય બાહૂ પ્રયયૌ બાહુષાલ્। ઈ વૃકોદરઃ ।
આભ્યામેવાખિલાઞ્છત્રૂઞ્છક્તો હન્તુમહં ત્વિતિ ॥ ૨૧.૩૯૨॥

અબદ્ધકેશા પ્રયયૌ દ્રૌપદી સા સભાતલ્। આત્ ।
મુક્તકેશા ભવિષ્યન્તિ ધાર્તરાષ્ટ્રસ્ત્રિયસ્ત્વિતિ ॥ ૨૧.૩૯૩॥

વર્ષન્ પાં સૂન્ યયૌ પાર્થ ઇત્થં શત્રુષુ સાયકાન્ ।
વર્ષયાનીત્યભિપ્રાયઃ પરમાસ્ત્રવિદાં વરઃ ॥ ૨૧.૩૯૪॥

યમાવવાઙ્મુખૌ યાતૌ નાવયોઃ શત્રવો મુખમ્ ।
પશ્યન્ત્વસ્યામવસ્થાયામિત્યેવ ધૃતચેતસૌ ॥ ૨૧.૩૯૫॥

પ્રેતસં સ્કારસૂક્તાનિ પઠન્ ધૌમ્યોઽગ્રતો યયૌ ।
હતેષુ ધાર્તરાષ્ટ્રેષુ મયા કાર્યાઃ ક્રિયા ઇતિ ॥ ૨૧.૩૯૬॥

તાનથાનુયયુઃ સૂતા રથૈઃ પરિચતુર્દશૈઃ ।
સૂદાઃ પૌરોગવાશ્ચૈવ ભૃત્યા યે ત્વાપ્તકારિણઃ ॥ ૨૧.૩૯૭॥

તતસ્તે જાહ્નવીતીરે વને વટમુપાશ્રિતાઃ ।
ન્યષીદન્નાગતાન્ દૃષ્ટ્વા સમસ્તાન્ પુરવાસિનઃ ॥ ૨૧.૩૯૮॥

તતસ્તુ તે સર્વજગન્નિવાસં નારાયણં નિત્યસમસ્તસદ્ગુણમ્ ।
સ્વયમ્ભુશર્વાદિભિરર્ચિતં સદા ભક્ત્યાઽસ્મરન્ ભક્તભવાપહં પ્રભુમ્ ॥ ૨૧.૩૯૯॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે

પાણ્ડવવનપ્રવેશો નામ એકવિંશોઽધ્યાયઃ ॥

## અથ દ્વાવિંશોઽધ્યાયઃ ।

(અરણીપ્રાપ્તિઃ )

ૐ । આગન્તુકામાન્ પુરવાસિનસ્તે સં સ્થાપ્ય કૃચ્છ્રેણ કુરુપ્રવીરાઃ ।
રાત્રૌ પ્રવિષ્ટા ગહનં વનં ચ કિર્મીરમાસેદુરથો નરાશમ્ ॥ ૨૨.૧॥

બકાનુજોઽસૌ નિખિલૈરજેયો વરાદ્ગિરીશસ્ય નિહન્તુકામઃ ।
સદારસોદર્યમભિપ્રસસ્રે ભીમં મહાવૃક્ષગિરીન્ પ્રમુઞ્ચન્ ॥ ૨૨.૨॥

સ સમ્પ્રહારં સહ તેન કૃત્વા ભીમો નિપાત્યાઽશુ ધરાતલ્। એ તમ્ ।
ચક્રે મખે સઙ્ગરનામધેયે પ્રસં હ્ય નારાયણદૈવતે પશુમ્ ॥ ૨૨.૩॥

નિહત્ય રક્ષો વનમધ્યસં સ્થાસ્તદા યતીનામયુતૈઃ સમેતાઃ ।
અશીતિસાહસ્રમુનિપ્રવીરૈર્દશાં શયુક્તૈઃ સહિતા વ્યચિન્તયન્ ॥ ૨૨.૪॥

વિચિન્ત્ય તેષાં ભરણાય ધર્મજઃ સમ્પૂજ્ય સૂર્યસ્થિતમચ્યુતં પ્રભુમ્ ।
દિનેઽક્ષયાન્નં પિઠરં તદાપ રત્નાદિદં કામવરાન્નદં ચ ॥ ૨૨.૫॥

બભાર તેનૈવ યુધિષ્ઠિરસ્તાન્ પ્રત્યેકશસ્ત્રિં શતદાસિદાસકાન્ ।
સુવર્ણપાત્રેષુ હિ ભુઞ્જતે યે ગૃહે તદીયે બહુકોટિદાસિકે ॥ ૨૨.૬॥

સત્સઙ્ગમાકાઙ્ક્ષિણ એવ તેઽવસન્ પાર્થૈઃ સહાન્યે ચ મુનીન્દ્રવૃન્દાઃ ।
શ ૃણ્વન્ત એભ્યઃ પરમાર્થસારાઃ કથા વદન્તશ્ચ પુરાતનાસ્તથા ॥ ૨૨.૭॥

એવં ગજાનાં બહુકોટિવૃન્દાં સ્તથા રથાનાં ચ હયાંશ્ચ વૃન્દશઃ ।
વિસૃજ્ય રત્નાનિ નરાંશ્ચ વૃન્દશો વને વિજહ્રુર્દિવિ દેવવત્સુખમ્ ॥ ૨૨.૮॥

ગવાં ચ લક્ષં પ્રદદાતિ નિત્યશઃ સુવર્ણભારાંશ્ચ શતં યુધિષ્ઠિરઃ ।
સભ્રાતૃકોઽસૌ વનમાપ્ય શક્રવન્મુમોદ વિપ્રૈઃ સહિતો યથાસુખમ્ ॥ ૨૨.૯॥

પાર્થેષુ યાતેષુ કિમત્ર કાર્યમિતિ સ્મ પૃષ્ટો વિદુરોઽગ્રજેન ।
આહૂય રાજ્યં પ્રતિપાદયેતિ પ્રાહૈનમાહાથ રુષાઽમ્બિકેયઃ ॥ ૨૨.૧૦॥

જ્ઞાતં પ્રતીપોઽસિ મમાઽત્મજાનાં ન મે ત્વયા કાર્યમિહાસ્તિ કિઞ્ચિત્ ।
યથેષ્ટસ્તિષ્ઠ વા ગચ્છ વેતિ પ્રોક્તો યયૌ વિદુરઃ પાણ્ડુપુત્રાન્ ॥ ૨૨.૧૧॥

અક્ષ્વ્।તસ્મિન્ ગતે ભ્રાતૃવિયોગકર્શિતઃ પપાત ભૂમૌ સહસૈવ રાજા ।
સંજ્ઞામવાપ્યાઽદિશદાશુ સઞ્જયં જીવામિ ચેદાશુ મમાઽનયાનુજમ્ ॥ ૨૨.૧૨॥

ઇતીરિતઃ સઞ્જયઃ પાણ્ડવેયાન્ પ્રાપ્યાઽનયદ્વિદુરં શીઘ્રમેવ ।
સોઽપ્યાગતઃ ક્ષિપ્રમપાસ્તદોષો જ્યેષ્ઠં વવન્દેઽથ સ ચૈનમાશ્લિષત્ ॥ ૨૨.૧૩॥

અઙ્કં સમારોપ્ય સ મૂર્ધ્નિ ચૈનમાઘ્રાય લેભે પરમાં મુદં તદા ।
ક્ષત્તારમાયાન્તમુદીક્ષ્ય સર્વે સસૌબલા ધાર્તરાષ્ટ્રા અમર્ષાત્ ।
સમ્મન્ત્ર્ય હન્તું પાણ્ડવાનામુતૈકં છન્નોપધેનૈવ સસૂતજા યયુઃ ॥ ૨૨.૧૪॥

વિજ્ઞાય તેષાં ગમનં સમસ્તલોકાન્તરાત્મા પરમેશ્વરેશ્વરઃ ।
વ્યાસોઽભિગમ્યાવદદામ્બિકેયં નિવારયાઽશ્વેવ સુતં તવેતિ ॥ ૨૨.૧૫॥

અવાપ્ય પાર્થાનયમદ્ય મૃત્યું સહાનુબન્ધો ગમિતા હ્યસં શયમ્ ।
ઇતીરિતે તેન નિવારયેતિ પ્રોક્તો હરિઃ પ્રાહ ન સં વદે તૈઃ ॥ ૨૨.૧૬॥

મૈત્રેય આયાસ્યતિ સોઽપિ વાચં શિક્ષાર્થમેતેષ્વભિધાસ્યતીહ ।
તાં ચેત્કરોત્યેષ સુતસ્તવાસ્ય ભદ્રં તદા સ્યાચ્છપ્સ્યતિ ત્વન્યથા સઃ ॥ ૨૨.૧૭॥

ઉક્ત્વેતિ રાજાનમનન્તશક્તિર્વ્યાસો યયૌ તત્ર ગતેષુ તેષુ ।
સુયોધનાદ્યેષુ હતેષુ પાર્થૈર્ભૂભારહાનિર્ન ભવેદિતિ પ્રભુઃ ॥ ૨૨.૧૮॥

સર્વાશ્ચ ચેષ્ટા ભગવન્નિયુક્તાઃ સદા સમસ્તસ્ય ચિતોઽચિતશ્ચ ।
તથાઽપિ વિષ્ણુર્વિનિવારયેત્ક્વચિદ્વાચા વિધત્તે ચ જનાન્ વિડમ્બયન્ ॥ ૨૨.૧૯॥

મૈત્રેય આગાદથ ભૂપતિશ્ચ પુત્રાન્ સમાહૂય સકર્ણસૌબલાન્ ।
સમ્પૂજયામાસ મુનિં સ ચાઽહ દાતું રાજ્યં પાણ્ડવાન્ સમ્પ્રશં સન્ ॥ ૨૨.૨૦॥

વિશેષતો ભીમબલં શશં સ કિર્મીરનાશાદિ વદન્મુનીન્દ્રઃ ।
શ્રુત્વાઽસહં સ્તદ્ધૃતરાષ્ટ્રપુત્ર આસ્ફાલયામાસ નિજોરુમુગ્રઃ ॥ ૨૨.૨૧॥

શશાપ ચૈનં મુનિરુગ્રતેજાસ્તવોરુભેદાય ભવેત્સુયુદ્ધમ્ ।
ઇત્યૂચિવાન્ ધૃતરાષ્ટ્રાનતોઽપિ યયૌ ન ચેદ્રાજ્યદસ્ત્વં તથેતિ ।
શ્રુત્વા તુ કિર્મીરવધં સ્વપિત્રા પૃષ્ટક્ષત્રોક્તં સોઽત્રસદ્ધાર્તરાષ્ટ્રઃ ॥ ૨૨.૨૨॥

ચ્ક્ષ્ચ્વ।વને વસન્તોઽથ પૃથાસુતાસ્તે વાર્તાં સ્વકીયાં પ્રાપયામાસુરાશુ ।
કૃષ્ણે સોઽપિ દ્રુતમાયાત્સસત્યઃ સમ્બન્ધિનો યે ચ પાઞ્ચાલમુખ્યાઃ ॥ ૨૨.૨૩॥

ક્રુદ્ધં કૃષ્ણં ધાર્તરાષ્ટ્રાય પાર્થાઃ ક્ષમાપયામાસુરુચ્ચૈર્ગૃણન્તઃ ।
ગુણાં સ્તદીયાનમિતાન્ પ્રણમ્ય તદા રુદન્તી દ્રૌપદી ચાઽપ પાદૌ ।
સા પાદયોઃ પતિતા વાસુદેવમસ્તૌત્સમસ્તપ્રભુમાત્મતન્ત્રમ્ ॥ ૨૨.૨૪॥

અચિન્ત્ય નિત્યાવ્યય પૂર્ણસદ્ગુણાર્ણવૈકદેહાખિલદોષદૂર ।
રમાબ્જજેશેરસુરેન્દ્રપૂર્વવૃન્દારકાણાં સતતાભિવન્દ્ય ।
સમસ્તચેષ્ટાપ્રદ સર્વજીવપ્રભો વિમુક્તાશ્રય સર્વસાર ॥ ૨૨.૨૫॥

ઇતિ બ્રુવન્તી સકલાનુભૂતં જગાદ સર્વેશિતુરચ્યુતસ્ય ।
યસ્યાધિકાનુગ્રહપાત્રભૂતા સ્વયં હિ શેષેશવિપાદિકેભ્યઃ ॥ ૨૨.૨૬॥

શ્રુત્વા સમસ્તં ભગવાન્ પ્રતિજ્ઞાં ચકાર તેષામખિલાશ્ચ યોષાઃ ।
પતીન્ સમાલિઙ્ગ્ય વિમુક્તકેશ્યાન્ ભીમાહતાન્ દર્શયે નાન્યથેતિ ।
તાં સાન્ત્વયિત્વા મધુરૈઃ સુવાક્યૈર્નારાયણો વાચમિમાં જગાદ ॥ ૨૨.૨૭॥

યદીહાહં સ્થિતો નૈવં ભવિતાઽહં ત્વયોધયમ્ ।
સાલ્વરાજં દુરાત્માનં હતશ્ચાસૌ સુપાપકૃત્ ॥ ૨૨.૨૮॥

સન્નિધાનેઽથ દૂરે વા કાલવ્યવહિતેઽપિ વા ।
સ્વભાવાદ્વા વ્યવહિતે વસ્તુવ્યવહિતેઽપિ વા ।
નાશક્તિર્વિદ્યતે વિષ્ણોર્નિત્યાવ્યવહિતત્વતઃ ॥ ૨૨.૨૯॥

તથાઽપિ નરલોકસ્ય કરોત્યનુકૃતિં પ્રભુઃ ।
દુષ્ટાનાં દોષવૃદ્ધ્યર્થં ભીમાદીનાં ગુણોન્નતેઃ ॥ ૨૨.૩૦॥

યુધિષ્ઠિરેઽતિવૃદ્ધં તુ રાજસૂયાદિસમ્ભવમ્ ।
ધર્મં ચ સઙ્ક્રામયિતું કૃષ્ણાયામનુજેષુ ચ ॥ ૨૨.૩૧॥

યોગ્યતાક્રમતો વિષ્ણુરિચ્છયેત્થમચીક્લૃપત્ ।
એધમાનદ્વિલ્. ઇત્યેવ વિષ્ણોર્નામ હિ વૈદિકમ્ ॥ ૨૨.૩૨॥

અક્ષ્ચ્વી।સ્વયોગ્યતાયા અધિકધર્મજ્ઞાનાદિજં ફલમ્ ।
ભીષ્મદ્રોણામ્બિકેયાદેઃ પાર્થેષ્વેવ નિધાપિતુમ્ ॥ ૨૨.૩૩॥

પુનશ્ચ પાપવૃદ્ધ્યર્થમજો દુર્યોધનાદિષુ ।
વ્યાસોઽમ્બિકાસુતં પ્રાહ પાર્થા મેઽભ્યધિકં પ્રિયાઃ ।
તેષાં પ્રવાસનં ચૈવ પ્રિયં ન મમ સર્વથા ॥ ૨૨.૩૪॥

ઇતિ દુર્યોધનાદીનાં પાપવૃદ્ધ્યર્થમેવ સઃ ।
પ્રિયા ઇત્યેવ કથનાત્પાણ્ડવાનાં શુભોન્નતેઃ ॥ ૨૨.૩૫॥

ગુરુત્વાદ્ભીમસેનસ્ય ક્ષમા દ્યૂતેઽર્જુનાદિનામ્ ।
નાતિધર્મસ્વરૂપોઽત્ર ધર્મો ભીમે નિરૌપધઃ ॥ ૨૨.૩૬॥

દ્રૌપદ્યા અપ્યતિક્લેશાત્ક્ષમા ધર્મો મહાનભૂત્ ।
સા હિભીમમનો વેદ ન કાર્યઃ શાપ ઇત્યલમ્ ॥ ૨૨.૩૭॥

તસ્માદ્યથાયોગ્યતયા હરિણા ધર્મવર્દ્ધનમ્ ।
કૃતં તત્રાસન્નિધાનકારણં કેશવોઽબ્રવીત્ ॥ ૨૨.૩૮॥

સાલ્વં શ્રુત્વા સમાયાતં રૌગ્મિણેયાદયો મયા ।
પ્રસ્થાપિતા હિ ભવતાં સકાશાત્તે યયુઃ પુરીમ્ ।
તદા સાલ્વોઽપિ સૌભેન દ્વારકામર્દયદ્ભૃશમ્ ॥ ૨૨.૩૯॥

પ્રદ્યુમ્ન આશુ નિરગાદથ સર્વસૈન્યૈરન્યૈશ્ચ યાદવગણૈઃ સહિતોઽનુજૈશ્ચ ।
સાલ્વોઽવગમ્ય તનયં મમ તદ્વિમાનાત્પાપોઽવરુહ્ય રથમારુહદત્ર યોદ્ધુમ્ ॥ ૨૨.૪૦॥

કૃત્વા સુયુદ્ધમમુના મમ પુત્રકોઽસાવસ્ત્રાણિ તસ્ય વિનિવાર્ય મહાસ્ત્રજાલૈઃ ।
દત્તં મયા શરમમોઘમથાઽદદે તં હન્તું નૃપં કૃતમતિસ્ત્વશ◌ૃણોદ્વચઃ ખે ॥ ૨૨.૪૧॥

નારાયણેન હિ પુરા મનસાઽભિક્લૃપ્તં કૃષ્ણાવતારમુપગમ્ય નિહન્મિ સાલ્વમ્ ।
ઇત્યેવ તેન હરિણાઽપિ સ ભાર્ગવેણ વિદ્રાવિતો ન નિહતઃ સ્વમનોનુસારાત્ ॥ ૨૨.૪૨॥

વધ્યસ્ત્વયા નહિ તતોઽયમયં ચ બાણશ્ચક્રાયુધસ્ય દયિતો નિતરામમોઘઃ ।
મા મુઞ્ચ તેન તમિમં વિનિવર્તયેઽહં સાલ્વં હૃદિ સ્થિત ઇતીરિતમીરણેન ॥ ૨૨.૪૩॥

અક્ષ્વ્વીઇ।શ્રુત્વા વચઃ સ પવનસ્ય શરં ત્વમોઘં સઞ્જહ્ર આશુ સ ચ સાલ્વપતિઃ સ્વસૌભમ્ ।
આરુહ્ય બાલકલહેન કિમત્ર કાર્યં કૃષ્ણેન સઙ્ગર ઇતિ પ્રયયૌ સ્વદેશમ્ ॥ ૨૨.૪૪॥

પ્રદ્યુમ્નસામ્બગદસારણચારુદેષ્ણાઃ સેનાં નિહત્ય સહ મન્ત્રિગણૈસ્તદીયામ્ ।
આહ્લાદિનઃ સ્વપુરમાયયુરપ્યહં ચ તત્રાગમં સપદિ તૈઃ શ્રુતવાનશેષમ્ ॥ ૨૨.૪૫॥

યસ્મિઞ્છરે કરગતે વિજયો ધ્રુવઃ સ્યાન્મત્તેજસા તદનુસઙ્ગ્રહણાત્સુતાન્મે ।
યાતં નિશમ્ય રિપુમાત્મપુરીં ચ ભગ્નાં દૃષ્ટ્વૈવ તેન તદનુવ્રજનં કૃતં મે ॥ ૨૨.૪૬॥

તં સાગરોપરિગસૌભગતં નિશામ્ય મુક્તે ચ તેન મયિ શસ્ત્રમહાસ્ત્રવર્ષે ।
તં સન્નિવાર્ય તુ મયા શરપૂગવિદ્ધો માયા યુયોજ મયિ પાપતમઃ સ સાલ્વઃ ॥ ૨૨.૪૭॥

તાઃ ક્રીડયા ક્ષણમહં સમરે નિશામ્ય જ્ઞાનાસ્ત્રતઃ પ્રતિવિધૂય બહૂંશ્ચ દૈત્યાન્ ।
હત્વાઽશુ તં ચ ગિરિવર્ષિણમાશુ સૌભં વાર્ધૌ ન્યપાતયમરીન્દ્રવિભિન્નબન્ધમ્ ॥ ૨૨.૪૮॥

તં સ્યન્દનસ્થિતમથો વિભુજં વિધાય બાણેન તદ્રથવરં ગદયા વિભિદ્ય ।
ચક્રેણ તસ્ય ચ શિરો વિનિકૃત્ય ધાતૃશર્વાદિભિઃ પ્રતિનુતઃ સ્વપુરીમગાં ચ ॥ ૨૨.૪૯॥

તસ્માદિદં વ્યસનમાસ હિ વિપ્રકર્ષાન્મે કાર્યતસ્ત્વિતિ નિગદ્ય પુનશ્ચ પાર્થાન્ ।

કૃષ્ણાં ચ સાન્ત્વયિતુમત્ર દિનાન્યુવાસ સત્યા ચ સોમકસુતામનુસાન્ત્વયન્તી ॥ ૨૨.૫૦॥

પાણ્ડવાનાં ચ યા ભાર્યાઃ પુત્રા અપિ હિ સર્વશઃ ।
અન્વેવ પાણ્ડવાન્ યાતા વનમત્રૈવ ચ સ્થિતાઃ ॥ ૨૨.૫૧॥

ધૃષ્ટદ્યુમ્નસ્તતઃ કૃષ્ણાં સાન્ત્વયિત્વૈવ કેશવમ્ ।
પ્રણમ્ય સમનુજ્ઞાતો ભાગિનેયૈઃ પુરં યયૌ ॥ ૨૨.૫૨॥

ધૃષ્ટકેતુશ્ચ ભાગિનીં કાશિરાજઃ સુતામપિ ।
પુરં યયતુરાદાય કુન્ત્યૈવાન્યાઃ સહ સ્થિતાઃ ॥ ૨૨.૫૩॥

પાર્વતી નકુલસ્યાઽસીદ્ભાર્યા પૂર્વં તિલોત્તમા ।
પૂર્વોક્તે ચૈવ યમયોર્ભાર્યે કુન્ત્યા હિવારિતાઃ ॥ ૨૨.૫૪॥

સુભદ્રામભિમન્યું ચ રથમારોપ્ય કેશવઃ ।
પાણ્ડવાનભ્યનુજ્ઞાય સભાર્યઃ સ્વપુરીં યયૌ ॥ ૨૨.૫૫॥

ચ્ક્ષ્ક્ષ્ચ્ક્ષ્।કઞ્ચિત્કાલં દ્રૌપદેયા ઉષ્ય પાઞ્ચાલકે પુરે ।
યયુર્દ્વારવતીમેવ તત્રોષુઃ કૃષ્ણલાલ્. ઇતાઃ ॥ ૨૨.૫૬॥

તતઃ પરં ધર્મરાજો નિર્વિણ્ણઃ સ્વકૃતેન હ ।
ભ્રાતૃભાર્યાપદે કૃષ્ણાં સ્થાપયામાસ સર્વદા ॥ ૨૨.૫૭॥

ઊષુર્વને ચ તે પાર્થા મુનિશેષાન્નભોજિનઃ ।
ભુક્તવત્સ્વેવાનુજેષુ ભુઙ્ક્તે રાજા યુધિષ્ઠિરઃ ॥ ૨૨.૫૮॥

અલઙ્ઘ્યત્વાત્તદાજ્ઞાયા અનુજાઃ પૂર્વભોજિનઃ ।
તસ્યાનન્તરમેવૈકા ભુઙ્ક્તે સા પાર્ષતાત્મજા ॥ ૨૨.૫૯॥

એવં સદા વિષ્ણુપરાયણાનાં તત્પ્રાપણાન્નૈકભુજાં પ્રયાતઃ ।
સં વત્સરસ્તત્ર જગાદ કૃષ્ણા ભીમાજ્ઞયા ધર્મરાજં સુવેત્રી ॥ ૨૨.૬૦॥

અતિમાર્દવયુક્તત્વાદ્ધર્મરાજશ્ચતુર્દશે ।
અપિ વર્ષે ગુરુભયાદ્રાજ્યં નેચ્છેદિતિ પ્રભુઃ ।
મારુતિઃ પ્રેષયામાસ કૃષ્ણાં પ્રસ્તાવહેતવે ॥ ૨૨.૬૧॥

ક્ષમા સર્વત્ર ધર્મો ન પાપહેતુશ્ચ દુર્જને ।
રાજ્ઞાં સામર્થ્યયુક્તાનામિતિ સં સ્થાપ્ય શાસ્ત્રતઃ ॥ ૨૨.૬૨॥

હત્વા ચતુર્દશે વર્ષે ધાર્તરાષ્ટ્રાનરાજ્યદાન્ ।
કર્તું રાજ્યં પુરો ગન્તા ભવાનીત્યગ્રજેન હ ॥ ૨૨.૬૩॥

કારયન્ સત્યશપથં વિવાદસ્ય ક્રમેચ્છયા ।
આદિશત્પ્રથમં કૃષ્ણાં ભીમઃ સા નૃપમબ્રવીત્ ॥ ૨૨.૬૪॥

નૈવ ક્ષમા કુજનતાસુ નૃપસ્ય ધર્મસ્તાં ત્વં વૃથૈવ ધૃતવાનસિ સર્વકાલમ્ ।
ઇત્યુક્ત આહ નૃપતિઃ પરમા ક્ષમૈવ સર્વત્ર તદ્વિધૃતમેવ જગત્સમસ્તમ્ ॥ ૨૨.૬૫॥

કર્તા ચ સર્વજગતઃ સુખદુઃખયોર્હિ નારાયણસ્તદનુદત્તમિહાસ્ય સર્વમ્ ।
તસ્માન્ન કોપવિષયોઽસ્તિ કુતશ્ચ કશ્ચિત્તસ્માત્ક્ષમૈવ સકલેષુ પરોઽસ્ય ધર્મઃ ॥ ૨૨.૬૬॥

ઋચ્ ।ઇત્યુક્તવન્તં નૃપમાહ પાર્ષતી યદિ ક્ષમા સર્વનરેષુ ધર્મઃ ।
રાજ્ઞા નકૃત્યં નચ લોકયાત્રા ભવેજ્જગત્કાપુરુષૈર્વિનશ્યેત્ ॥ ૨૨.૬૭॥

સત્યં ચ વિષ્ણુઃ સકલપ્રવર્તકો રમાવિરિઞ્ચેશપુરસ્સરાશ્ચ ।
કાષ્ઠાદિવત્તદ્વશગાઃ સમસ્તાસ્તથાઽપિ ન વ્યર્થતા પૌરુષસ્ય ॥ ૨૨.૬૮॥

તદાજ્ઞયા પુરુષશ્રેષ્ટમાનશ્રેષ્ટાનુસારેણ શુભાશુભસ્ય ।
ભોક્તા ન તચ્ચેષ્ટિતમન્યથા ભવેત્કર્તા તસ્માત્પુરુષોઽપ્યસ્ય વશ્યઃ ॥ ૨૨.૬૯॥

વૃથા યદિ સ્યાત્પૌરુષં કસ્ય હેતોર્વિધિર્નિષેધશ્ચ સમસ્તવેદગઃ ।
વિધેર્નિષેધસ્ય ચ નૈવ ગોચરઃ પુમાન્ યદિ સ્યાદ્ભવતો હિ તૌ હરેઃ ॥ ૨૨.૭૦॥

તેનૈવ લેપશ્ચ ભવેદમુષ્ય પુણ્યેન પાપેન ચ નૈવ ચાસૌ ।
લિપ્યેત તાભ્યાં પરમસ્વતન્ત્રઃ કર્તા તતઃ પુરુષોઽપ્યસ્ય વશ્યઃ ॥ ૨૨.૭૧॥

ઇતીરિતો ધર્મજઃ કૃષ્ણયૈવ નિરુત્તરત્વં ગમિતસ્ત્વભર્ત્સયત્ ।
કુતર્કમાશ્રિત્ય હરેરપિ ત્વમસ્વાતન્ત્ર્યં સાધયસીતિ ચોક્ત્વા ॥ ૨૨.૭૨॥

છલેન તેન પ્રતિભર્ત્સિતા સા ક્ષમાપયામાસ નૃપં યતઃ સ્ત્રી ।
વાચાલ્. અતા નાતિતરાં હિ શોભતે સ્ત્રીણાં તતઃ પ્રાહ વૃકોદરસ્તમ્ ॥ ૨૨.૭૩॥

રાજન્ વિષ્ણુઃ સર્વકર્તા નચાન્યસ્તત્તન્ત્રમેવાન્યદસૌ સ્વતન્ત્રઃ ।
તથાઽપિ પું સા વિહિતં સ્વકર્મ કાર્યં ત્યાજ્યં ચાન્યદત્યન્તયત્નાત્ ॥ ૨૨.૭૪॥

પ્રત્યક્ષમેતત્પુરુષસ્ય કર્મ તેનાનુમેયા પ્રેરણા કેશવસ્ય ।
સ્વકર્મ કૃત્વા વિહિતં હિ વિષ્ણુના તત્પ્રેરણેત્યેવ બુધોઽનુમન્યતે ॥ ૨૨.૭૫॥

તેનૈતિ સમ્યગ્ગતિમસ્ય વિષ્ણોર્જનોઽશુભો દૈવમિત્યેવ મત્વા ।
હિત્વા સ્વકં કર્મ ગતિં ચ તામસીં પ્રયાતિ તસ્માત્કાર્યમેવ સ્વકર્મ ॥ ૨૨.૭૬॥

જ્ઞાતવ્યં ચૈવાસ્ય વિષ્ણોર્વશત્વં કર્તવ્યં ચૈવાઽત્મનઃ કાર્યકર્મ ।

પ્રત્યક્ષૈષા કર્તૃતા જીવસં સ્થા તથાऽऽગમાદનુમાનાચ્ચ સર્વમ્ ॥ ૨૨.૭૭॥

વિષ્ણોર્વશે તન્ન હેયં દ્વયં ચ જાનન્ વિદ્વાન્ કુરુતે કાર્યકર્મ ।
તત્પ્રેરકં વિષ્ણુમેવાભિજાનન્ ભવેત્પ્રમાણત્રિતયાનુગામી ॥ ૨૨.૭૮॥

ચ્ચિ।પૂર્ણં પ્રમાણં તત્ત્રયં ચાવિરોધેનૈકત્રસ્થં તત્ત્રયં ચાવિરોધિ ।
પૃથઙ્મધ્યં ચાપ્રમાણં વિરોધિ સ્યાત્તત્તસ્માત્ત્રયમેકત્ર કાર્યમ્ ॥ ૨૨.૭૯॥

અજ્ઞઃ પ્રત્યક્ષં ત્વપહાયૈવ દૈવં મત્વા કર્તૃસ્વાત્મકર્મ પ્રજહ્યાત્ ।
વિદ્વાન્ જીવં વિષ્ણુવશં વિદિત્વા કરોતિ કર્તવ્યમજસ્રમેવ ॥ ૨૨.૮૦॥

સ્વભાવાખ્યા યોગ્યતા યા હઠાખ્યા યાऽનાદિસિદ્ધા સર્વજીવેષુ નિત્યા ।
સા કારણં તત્પ્રથમં તુ દ્વિતીયમનાદિ કર્મૈવ તથા તૃતીયઃ ।
જીવપ્રયત્નઃ પૌરુષાખ્યસ્તદેતત્ત્રયં વિષ્ણોર્વશગં સર્વદૈવ ॥ ૨૨.૮૧॥

સ કસ્યચિન્ન વશે વાસુદેવઃ પરાત્પરઃ પરમોऽસૌ સ્વતન્ત્રઃ ।
હઠશ્ચાસૌ તારતમ્યસ્થિતો હિ બ્રહ્માણમારભ્ય કલિશ્ચ યાવત્ ।
હઠાચ્ચ કર્માણિ ભવન્તિ કર્મજો યત્નો યત્નો હઠકર્મપ્રયોક્તા ॥ ૨૨.૮૨॥

વિના યત્નં ન હઠો નાપિ કર્મ ફલપ્રદૌ વાસુદેવોऽખિલસ્ય ।
સ્વાતન્ત્ર્યશક્તેર્વિનિયામકો હિ તથાऽપ્યેતાન્ સોऽપ્યપેક્ષ્યૈવ યુઞ્જેત્ ॥ ૨૨.૮૩॥

એતાનપેક્ષ્યૈવ ફલં દદાનીત્યસ્યૈવ સઙ્કલ્પ ઇતિ સ્વતન્ત્રતા ।
નાસ્યાપગચ્છેત્સ હિ સર્વશક્તિર્નાશક્તતા ક્વચિદસ્ય પ્રભુત્વાત્ ॥ ૨૨.૮૪॥

તસ્માત્કાર્યં તેન ક્લૃપ્તં સ્વકર્મ તત્પૂજાર્થં તેન તત્પ્રાપ્તિરેવ ।
અતોऽન્યથા નિરયઃ સર્વથા સ્યાત્સ્વકર્મ વિપ્રસ્ય જપોપદેશૌ ।
વિષ્ણોર્મુખાદ્વિપ્રજાતિઃ પ્રવૃત્તા મુખોત્થિતં કર્મ તેનાસ્ય સોऽદાત્ ॥ ૨૨.૮૫॥

બાહ્વોર્જાતઃ ક્ષત્રિયસ્તેન બાહ્વોઃ કર્માસ્ય પાપપ્રતિવારણં હિ ।
પ્રવર્તનં સાધુધર્મસ્ય ચૈવ મુખસ્ય બાહ્વોશ્ચાતિસામીપ્યતોऽસ્ય ।
જપોપદેશૌ ક્ષત્રિયસ્યાપિ વિષ્ણુશ્ચક્રે ધર્મૌ યજ્ઞકર્માપિ વિપ્રે ॥ ૨૨.૮૬॥

વૈશ્યો યસ્માદૂરુજસ્તેન તસ્ય પ્રજાવૃદ્ધિસ્તજ્જકર્મૈવ ધર્મઃ ।
તત્સાદૃશ્યાત્સ્થાવરાણાં ચ વૃદ્ધિઃ કરોરૂર્વોઃ સન્નિકૃષ્ટત્વહેતોઃ ।
વાર્તાત્મકં કર્મ ધર્મં ચકાર વિષ્ણુસ્તસ્યૈવાઙ્ઘ્રિજઃ શૂદ્ર ઉક્તઃ ॥ ૨૨.૮૭॥

ગતિપ્રધાનં કર્મ શુશ્રૂષણાખ્યં સાદૃશ્યતો હસ્તપદોસ્તથૈવ ।
હસ્તોદ્ભવં કર્મ તસ્યાપિ ધર્મઃ સન્તાનવૃદ્ધિશ્ચ સમીપગત્વાત્ ॥ ૨૨.૮૮॥

ઋચી।ભુજાવુરો હૃદયં યદ્બલસ્ય જ્ઞાનસ્ય ચ સ્થાનમતો નૃપાણામ્ ।
બલં જ્ઞાનં ચોભયં ધર્મ ઉક્તઃ પાણૌ કૃતીનાં કૌશલં કેવલં હિ ।
તસ્માત્પાણ્યોરુરુપદોરુપસ્થિતેર્વિટ્છૂદ્રકૌ કર્મણાં કૌશલેતૌ ॥ ૨૨.૮૯॥

પ્રાધાન્યતો ધર્મવિશેષ એષ સામાન્યતઃ સર્વમેવાખિલાનામ્ ।
વયં હિ દેવાસ્તેન સર્વં હિ કર્મ પ્રાયેણ નો ધર્મતામેતિ શશ્વત્ ॥ ૨૨.૯૦॥

એતૈર્ધર્મૈર્વિષ્ણુના પૂર્વક્લૃપ્તૈઃ સર્વૈર્વર્ણૈર્વિષ્ણુરેવાભિપૂજ્યઃ ।
તદ્ભક્તિરેવાખિલાનાં ચ ધર્મો યથાયોગ્યં જ્ઞાનમસ્યાપિ પૂજા ॥ ૨૨.૯૧॥

પિતા ગુરુઃ પરમં દૈવતં ચ વિષ્ણુઃ સર્વેષાં તેન પૂજ્યઃ સ એવ ।
તદ્ભક્તત્વાદ્દેવતાશ્ચાભિપૂજ્યા વિશેષતસ્તેષુ યેઽત્યન્તભક્તાઃ ॥ ૨૨.૯૨॥

સમ્પૂજિતો વાસુદેવઃ સ મુક્તિં દદ્યાદેવાપૂજિતો દુઃખમેવ ।
સ્વતન્ત્રત્વાત્સુખદુઃખપ્રદોઽસૌ નાન્યઃ સ્વતસ્તદ્વશા યત્સમસ્તાઃ ॥ ૨૨.૯૩॥

સ્વતન્ત્રત્વાત્સુખસજ્જ્ઞાનશક્તિપૂર્વૈર્ગુણૈઃ પૂર્ણ એષોઽખિલૈશ્ચ ।
સ્વતન્ત્રત્વાત્સર્વદોષોજ્ઝિતશ્ચ નિસ્સીમશક્તિર્હિ યતઃ સ્વતન્ત્રઃ ॥ ૨૨.૯૪॥

દોષાસ્પૃષ્ટૌ ગુણપૂર્તૌ ચ શક્તિર્નિસ્સીમત્વાદ્વિદ્યતે તસ્ય યસ્માત્ ।
એવં ગુણૈરખિલૈશ્ચાપિ પૂર્ણો નારાયણઃ પૂજ્યતમઃ સ્વધર્મૈઃ ।
અસ્માકં યત્તેન નાતિક્ષમૈવ ધર્મો દુષ્ટાનાં વારણં હ્યેવ કાર્યમ્ ॥ ૨૨.૯૫॥

હન્યાદ્દુષ્ટાન્ યઃ ક્ષત્રિયઃ ક્ષત્રિયાંશ્ચ વિશેષતો યુદ્ધગતાન્ સ્મરન્ હરિમ્ ।
સ્વબાહુવીર્યેણ ચ તસ્ય બાહૂ ચૈતન્યમાત્રૌ ભવતઃ સદેહૌ ॥ ૨૨.૯૬॥

પાપાધિકાંશ્ચૈવ બલાધિકાંશ્ચ હત્વા મુક્તાવધિકાનન્દવૃદ્ધિઃ ।
પ્રીતિશ્ચ વિષ્ણોઃ પરમૈવ તત્ર તસ્માદ્ધન્તવ્યાઃ પાપિનઃ સર્વથૈવ ॥ ૨૨.૯૭॥

યે ત્વક્ષધૂર્તા ગ્રહણં ગતા વા પાપાસ્તેઽન્યૈર્ઘાતનીયાઃ સ્વદોર્ભ્યામ્ ।
રાજાનં વા રાજપુત્રં તથૈવ રાજાનુજં વાઽભિયાતં નિહન્યાત્ ॥ ૨૨.૯૮॥

રાજ્ઞઃ પુત્રોઽપ્યકૃતોદ્વાહકો યઃ સ ઘાતનીયો ન સ્વયં વધ્ય એવ ।
ક્રૂરં ચાન્યદ્ધર્મયુક્તં પરૈસ્તત્પ્રસાધનીયં ક્ષત્રિયૈર્ન સ્વકાર્યમ્ ।
ઋચીઇ।એવં ધર્મો વિહિતો વેદ એવ વાક્યં વિષ્ણોઃ પઞ્ચરાત્રેષુ તાદૃક્ ॥ ૨૨.૯૯॥

અક્ષદ્યૂતં નિકૃતિઃ પાપમેવ કૃતં ત્વયા ગર્હિતં સૌબલેન ।
ન કુત્રચિદ્વિધિરસ્યાસ્તિ તેન ન તદ્દત્તં દ્યૂતહૃતં વદન્તિ ॥ ૨૨.૧૦૦॥

ભીતેન દત્તં દ્યૂતદત્તં તથૈવ દત્તં કામિન્યૈ પુનરાહાર્યમેવ ।

એવં ધર્મઃ શાશ્વતો વૈદિકો હિ દ્યૂતે સ્ત્રિયાં નાલ્પમાહાર્યમાહુઃ ॥ ૨૨.૧૦૧॥

યદ્યેષાં વૈ ભોગ્યમલ્પં તદીયં ભોગેન તદ્બન્ધુભિસ્તચ્ચ હાર્યમ્ ।
નિવારણે પુરુષસ્ય ત્વશક્તૈસ્તદ્રાજ્યં ન પુનરાહાર્યમેવ ॥ ૨૨.૧૦૨॥

ત્વં ધર્મનિત્યશ્ચાગ્રજશ્ચેતિ રાજનૃતેઽનુજ્ઞાં ન મયા તત્કૃતં ચ ।
દાતાસ્યનુજ્ઞાં યદિ તાન્નિહત્ય ત્વય્યેવ રાજ્યં સ્થાપયામ્યદ્ય સમ્યક્ ॥ ૨૨.૧૦૩॥

સત્યં પાપેષ્વપિ કર્તું યદીચ્છા તથાઽપિ માસા દ્વાદશઃ નઃ પ્રયાતાઃ ।
વેદપ્રામાણ્યાદ્વત્સરાસ્તે હિ માસૈઃ સહસ્રાબ્દં સત્રમુક્તં નરાણામ્ ।
અજ્ઞાતમેકં માસમુષ્યાઽથ શત્રૂન્નિહત્ય રાજ્યં પ્રતિપાલયામઃ ॥ ૨૨.૧૦૪॥

મા મિત્રાણાં તાપકસ્ત્વં ભવેથાસ્તથાઽમિત્રાણાં નન્દકશ્ચૈવ રાજન્ ।
જ્વલસ્વારીણાં મૂર્ધ્નિ મિત્રાણિ નિત્યમાહ્લાદયન્ વાસુદેવં ભજસ્વ ॥ ૨૨.૧૦૫॥

સ્વતન્ત્રત્વં વાસુદેવસ્ય સમ્યક્પ્રત્યક્ષતો દૃશ્યતે હ્યદ્ય રાજન્ ।
યસ્માત્કૃષ્ણો વ્યજયચ્છઙ્કરાદીન્ જરાસુતાદીન્ કાદિવરૈરજેયાન્ ॥ ૨૨.૧૦૬॥

બ્રહ્માદીનાં પ્રકૃતેસ્તદ્વશત્વં દૃષ્ટં હિ નો બહુશો વ્યાસદેહે ।
પારાશર્યો દિવ્યદૃષ્ટિં પ્રદાય સ્વાતન્ત્ર્યં નોઽદર્શયત્સર્વલોકે ॥ ૨૨.૧૦૭॥

તસ્માદ્રાજન્નભિનિર્યાહિ શત્રૂન્ હન્તું સર્વાન્ ભોક્તુમેવાધિરાજ્યમ્ ।
એવઞ્ચ તે કીર્તિધર્મૌ મહાન્તૌ પ્રાપ્યૌ રાજન્ વાસુદેવપ્રસાદાત્ ॥ ૨૨.૧૦૮॥

એવમુક્તોઽબ્રવીદ્ભીમં ધર્મપુત્રો યુધિષ્ઠિરઃ ।
ત્રયોદશાબ્દસ્યાન્તેઽહં કુર્યામેવ ત્વદીરિતમ્ ॥ ૨૨.૧૦૯॥

સત્યમેતન્ન સન્દેહઃ સત્યેનાઽત્માનમાલભે ।
લોકાપવાદભીરું માં નાતોઽન્યદ્વક્તુમર્હસિ ॥ ૨૨.૧૧૦॥

ઋચ્ચવ્।તુદસે ચાતિવાચા માં યદ્યેવં ભીમ માં વદેઃ ।
તદૈવ મેઽત્યયઃ કાર્યો હન્તવ્યાશ્ચૈવ શત્રવઃ ।
નૈતાદૃશૈરિદાનીં તુ વાક્યૈર્બાધિતુમર્હસિ ॥ ૨૨.૧૧૧॥

ભીષ્મદ્રોણાદયોઽસ્ત્રજ્ઞા નિવાર્યાશ્ચ કથં યુધિ ।
પૂજ્યાસ્તે બાહુયુદ્ધેન ન નિવાર્યાઃ કથઞ્ચન ॥ ૨૨.૧૧૨॥

અસ્ત્રાણિ જાનન્નપિ હિ ન પ્રયોજયસિ ક્વચિત્ ।
તસ્માદ્તદૈવ ગન્તવ્યં વિજ્ઞાતાસ્ત્રે ધનઞ્જયે ॥ ૨૨.૧૧૩॥

ઇત્યુક્તો ભીમસેનસ્તુ સ્નેહભઙ્ગભયાત્તતઃ ।

નોવાચ કિઞ્ચિદ્વચનં સ્વાભિપ્રેતમવાપ્ય ચ ॥ ૨૨.૧૧૪॥

અભિપ્રાયો હિ ભીમસ્ય નિશ્ચયેન ત્રયોદશે ।
યુધિષ્ઠિરસ્ય રાજ્યાર્થં ગમનાર્થે પ્રતિશ્રવઃ ।
અન્યથાઽતિમૃદુત્વાત્સ ન ગચ્છેદ્ભિન્નધીઃ પરૈઃ ॥ ૨૨.૧૧૫॥

કૃતકૃત્યે તથા ભીમે સ્થિતે ધર્માત્મજો હિ સઃ ।
ભીષ્મદ્રોણાદિવિજયઃ કથં સ્યાદિત્યચિન્તયત્ ॥ ૨૨.૧૧૬॥

નિવારણં ગુરૂણાં હિ ભીમ ઇચ્છતિ ન ક્વચિત્ ।
તસ્માત્તે હ્યર્જુનેનૈવ નિવાર્યા ઇત્યચિન્તયત્ ॥ ૨૨.૧૧૭॥

આપદ્યેવ હિ ભીમસ્તાન્નિવારયતિ નાન્યથા ।
એવં ચિન્તાસમાવિષ્ટં વિજ્ઞાયૈવ યુધિષ્ઠિરમ્ ॥ ૨૨.૧૧૮॥

સર્વજ્ઞઃ સર્વશક્તિશ્ચ કૃષ્ણદ્વૈપાયનોઽગમત્ ।
નૃપતિં બોધયામાસ ચિન્તાવ્યાકુલમાનસમ્ ॥ ૨૨.૧૧૯॥

ઇમં મન્ત્રં વદિષ્યામિ યેન જેષ્યતિ ફલ્ગુનઃ ।
ભીષ્મદ્રોણાદિકાન્ સર્વાન્ તં ત્વં વદ ધનઞ્જયે ॥ ૨૨.૧૨૦॥

ઇત્યુક્ત્વૈવાવદન્મન્ત્રં સર્વદૈવતદૃષ્ટિદમ્ ।
ન સ્વયં હ્યવદત્પાર્થે ફલાધિક્યં યતો ભવેત્ ॥ ૨૨.૧૨૧॥

ઋચ્વ્।ભીષ્મદ્રોણાદિવિજય એતાવદ્વીર્યમેવ હિ ।
અલં નાતોઽધિકં કાર્યમેતાવદ્યોગ્યમસ્ય ચ ।
ફલ્ગુનસ્યેતિ ભગવાન્ન સ્વયં હ્યવદન્મનુમ્ ॥ ૨૨.૧૨૨॥

ગતે વ્યાસે ભગવતિ સર્વજ્ઞે સર્વકર્તરિ ।
ધર્મરાજોઽદિશન્મન્ત્રં ફલ્ગુનાય રહસ્યમુમ્ ॥ ૨૨.૧૨૩॥

તમાપ્ય ફલ્ગુનો મન્ત્રં યયૌ જ્યેષ્ઠૌ પ્રણમ્ય ચ ।
યમજૌ ચ સમાશ્લિષ્ય ગિરિમેવેન્દ્રકીલકમ્ ।
તપશ્ચચાર તત્રસ્થઃ શઙ્કરસ્થં હરિં સ્મરન્ ॥ ૨૨.૧૨૪॥

ષણ્માસેઽતિગતેઽપશ્યન્મૂકં નામાસુરં ગિરૌ ।
વરાહરૂપમાયાતં વધાર્થં ફલ્ગુનસ્ય ચ ॥ ૨૨.૧૨૫॥

તં જ્ઞાત્વા ફલ્ગુનો વીરઃ સજ્યં કૃત્વા તુગાણ્ડિવમ્ ।
ચિક્ષેપ વજ્રસમિતાં સ્તત્કાયે સાયકાન્ બહૂન્ ॥ ૨૨.૧૨૬॥

કિરાતરૂપસ્તમનુ સભાર્યશ્ચ ત્રિયમ્બકઃ ।
સ મમાર હતસ્તાભ્યાં દાનવઃ પાપચેતનઃ ॥ ૨૨.૧૨૭॥

તેનોક્તોઽસૌ મયૈવાયં વરાહોઽનુગતોઽદ્ય હિ ।
તમવિધ્યો યતસ્ત્વં હિ તદ્યુદ્ધ્યસ્વ મયા સહ ॥ ૨૨.૧૨૮॥

ઇત્યુક્તઃ ફલ્ગુનઃ પ્રાહ તિષ્ઠ તિષ્ઠ ન મોક્ષ્યસે ।
ઇત્યુક્ત્વા તાવુભૌ યુદ્ધં ચક્રતુઃ પુરુષર્ષભૌ ॥ ૨૨.૧૨૯॥

તત્રાખિલાનિ ચાસ્ત્રાણિ ફલ્ગુનસ્યાગ્રસચ્છિવઃ ।
તતોઽર્જુનસ્તુ ગાણ્ડીવં સમાદાયાભ્યતાડયત્ ॥ ૨૨.૧૩૦॥

તદપ્યગ્રસદેવાસૌ પ્રહસન્ ગિરિશસ્તદા ।
બાહુયુદ્ધં તતસ્ત્વાસીત્તયોઃ પુરુષસિં હયોઃ ॥ ૨૨.૧૩૧॥

પિણ્ડીકૃત્ય તતો રુદ્રશ્ચિક્ષેપાથ ધનઞ્જયમ્ ।
મૂર્ચ્છામવાપ મહતીં ફલ્ગુનો રુદ્રપીડિતઃ ॥ ૨૨.૧૩૨॥

ચ્ચ્ચિવ।પૂર્વં સમ્પ્રાર્થયામાસ શઙ્કરો ગરુડધ્વજમ્ ।
અવરાણાં વરં મત્તો યેષાં ત્વં સમ્પ્રયચ્છસિ ।
અજેયત્વં પ્રસાદાત્તે વિજેયાઃ સ્યુર્મયાઽપિ તે ॥ ૨૨.૧૩૩॥

ઇત્યુક્તઃ પ્રદદૌ વિષ્ણુરુમાધીશાય તં વરમ્ ।
તેનાજયચ્છ્વેતવાહં ગિરિશો રણમધ્યગમ્ ॥ ૨૨.૧૩૪॥

કેવલાન્ વૈષ્ણવાન્મન્ત્રાન્ વ્યાસઃ પાર્થાય નો દદૌ ।
એતાવતાઽલં ભીષ્માદેર્જયાર્થમિતિ ચિદ્ધનઃ ॥ ૨૨.૧૩૫॥

કેવલૈર્વૈષ્ણવૈર્મન્ત્રૈઃ સ્વદત્તૈર્વિજયાવહૈઃ ।
અતિવૃદ્ધસ્ય પાર્થસ્ય દર્પઃ સ્યાદિત્યચિન્તયત્ ॥ ૨૨.૧૩૬॥

પાર્થઃ સંજ્ઞામવાપ્યાથ જયાર્થ્યારાધયચ્છિવમ્ ।
વ્યાસોદિતેન મન્ત્રેણ તાનિ પુષ્પાણિ તચ્છિરઃ ॥ ૨૨.૧૩૭॥

આરુહન્ સ તુ તં જ્ઞાત્વા રુદ્ર ઇત્યેવ ફલ્ગુનઃ ।
નમશ્ચક્રે તતઃ પ્રાદાદસ્ત્રં પાશુપતં શિવઃ ॥ ૨૨.૧૩૮॥

અસ્ત્રં તદ્વિષ્ણુદૈવત્યં સાધિતં શઙ્કરેણ યત્ ।
તસ્માત્પાશુપતં નામ સ્વાન્યસ્ત્રાણ્યપરે સુરાઃ ।
દદુસ્તદૈવ પાર્થાય સર્વે પ્રત્યક્ષગોચરાઃ ॥ ૨૨.૧૩૯॥

ઇન્દ્રોઽર્જુનં સમાગમ્ય પ્રાહ પ્રીતોઽસ્મિ તેઽનઘ ।
રુદ્રદેહસ્થિતં બ્રહ્મ વિષ્ણ્વાખ્યં તોષિતં ત્વયા ।
તેન લોકં મમાઽગચ્છ પ્રેષયામિ રથં તવ ॥ ૨૨.૧૪૦॥

ઇત્યુક્ત્વા પ્રયયાવિન્દ્રસ્તદ્રથેન ચ માતલિઃ ।
આયાત્પાર્થસ્તમારું હ્ય યયૌ તાતનિવેશનમ્ ॥ ૨૨.૧૪૧॥

પૂજિતો દૈવતૈઃ સર્વૈરિન્દ્રેણૈવ નિવેશિતઃ ।
તેન સાર્દ્ધમુપાસીદત્તસ્મિન્નૈન્દ્રે વરાસને ॥ ૨૨.૧૪૨॥

પ્રીત્યા સમાશ્લિષ્ય કુરુપ્રવીરં શક્રો દ્વિતીયાં તનુમાત્મનઃ સઃ ।
અ્ચ્વી। ઈક્ષન્મુખં તસ્ય મુમોદ સોઽપિ હ્યુવાસ તસ્મિન્ વત્સરાન્ પઞ્ચ લોકે ॥ ૨૨.૧૪૩॥

અસ્ત્રાણિ તસ્મા અદિશત્સ વાસવો મહાન્તિ દિવ્યાનિ તદોર્વશી તમ્ ।
સમ્પ્રાપ્ય ભાવેન તુ માનુષેણ માતા કુલસ્યેતિ નિરાકૃતાઽભૂત્ ॥ ૨૨.૧૪૪॥

ષણ્ઢો ભવેત્યેવ તયાઽભિશપ્તે પાર્થે શક્રોઽનુગ્રહં તસ્ય ચાદાત્ ।
સં વત્સરં ષણ્ઢરૂપી ચરસ્વ ન ષણ્ઢતા તે ભવતીતિ ધૃષ્ણુઃ ॥ ૨૨.૧૪૫॥

તતોઽવસત્પાણ્ડવેયો ગાન્ધર્વં વેદમભ્યસન્ ।
ગન્ધર્વાચ્ચિત્રસેનાત્તુ તથાઽસ્ત્રાણિ સુરેશ્વરાત્ ॥ ૨૨.૧૪૬॥

સુભદ્રયાઽભિમન્યુના સહ સ્વકાં પુરં ગતઃ ।
જનાર્દનોઽત્ર સં વસન્ કદાચિદિત્થમૈક્ષત ॥ ૨૨.૧૪૭॥

મયા વરો હિ શમ્ભવે પ્રદત્ત આસ પૂર્વતઃ ।
વરં ગ્રહીષ્ય એવ તે સકાશતો વિમોહયન્ ॥ ૨૨.૧૪૮॥

“ત્વામારાધ્ય તથા શમ્ભો ગ્રહીષ્યામિ વરં સદા ।
દ્વાપરાદૌ યુગે ભૂત્વા કલયા માનુષાદિષુ” (૭૩) ॥ ૨૨.૧૪૯॥

ઇતિ વાક્યમૃતં કર્તુમભિપ્રાયં વિજજ્ઞુષી ।
પ્રીત્યર્થં વાસુદેવસ્ય રુગ્મિણી વાક્યમબ્રવીત્ ॥ ૨૨.૧૫૦॥

“જાતેઽપિ પુત્રે પુત્રાર્થં સા હિ વેદ મનોગતમ્ ।
પુત્રો મે બલવાન્ દેવ સ્યાત્સર્વાસ્ત્રવિદુત્તમઃ” ॥ ૨૨.૧૫૧॥

ઇત્યુક્તો ભગવાન્ દેવ્યા સમ્મોહાય સુરદ્વિષામ્ ।
યયૌ સુપર્ણમારુહ્ય સ્વીયં બદરિકાશ્રમમ્ ॥ ૨૨.૧૫૨॥

“એષ મોહં સૃજામ્યાશુ યો જનાન્મોહયિષ્યતિ ।

ત્વં ચ રુદ્ર મહાબાહો મોહશાસ્ત્રાણિ કારય ॥ ૨૨.૧૫૩॥

અતત્થ્યાનિ વિતત્થ્યાનિ દર્શયસ્વ મહાભુજ ।
(૭૩) પદ્મપુરાણ ૬.૭૧.૧૦૬
ઋચ્વીઇ.પ્રકાશં કુરુ ચાઽત્માનમપ્રકાશં ચ માં કુરુ ॥ ૨૨.૧૫૪॥

અહં ત્વાં પૂજયિષ્યામિ લોકસમ્મોહનોત્સુકઃ ।
તમોઽસુરા નાન્યથા હિયાન્તીત્યેતન્મતં મમ" ॥ ૨૨.૧૫૫॥

ઇત્યુક્તવચનં પૂર્વં કેશવેન શિવાય યત્ ।
તત્સત્યં કર્તુમાયાતં કૃષ્ણં બદરિકાશ્રમમ્ ।
સર્વજ્ઞા મુનયઃ સર્વે પૂજયાઞ્ચક્રિરે પ્રભુમ્ ॥ ૨૨.૧૫૬॥

રાત્રૌ કૃષ્ણે મુનિમધ્યે નિવિષ્ટે ઘણ્ટાકર્ણઃ કર્ણનામા પિશાચૌ ।
સમાયાતાં ગિરિશેન પ્રદિષ્ટૌ કૃષ્ણં દ્રષ્ટું દ્વારકાં ગન્તુકામૌ ॥ ૨૨.૧૫૭॥

તૌ દૃષ્ટ્વા મુનિમધ્યસ્થં કેશવં તદબોધતઃ ।
કૃત્વા સ્વજાતિચેષ્ટાશ્ચ ધ્યાનેનૈનમપશ્યતામ્ ॥ ૨૨.૧૫૮॥

દૃષ્ટ્વા હૃદિ સ્થિતં તં તુ કૌતૂહલસમન્વિતૌ ।
સ્તુત્વા ભક્ત્યા પ્રણામં ચ બહુશશ્ચક્રતુઃ શુભૌ ॥ ૨૨.૧૫૯॥

તયોઃ પ્રસન્નો ભગવાન્ સ્પૃષ્ટ્વા ગન્ધર્વસત્તમૌ ।
ચકાર ક્ષણમાત્રેણ દિવ્યરૂપસ્વરાન્વિતૌ ॥ ૨૨.૧૬૦॥

તાભ્યાં પુનર્નૃત્તગીતસં સ્તવૈઃ પૂજિતઃ પ્રભુઃ ।
યયૌ કૈલાસમદ્રીશં ચકારેવ તપોઽત્ર ચ ॥ ૨૨.૧૬૧॥

સ્વીયાનેવ ગુણાન્ વિષ્ણુર્ભુઞ્જન્ (યુઞ્જન્)નિત્યેન શોચિષા ।
શાર્વં તપઃ કરોતીવ મોહયામાસ દુર્જનાન્ (૭૪) ॥ ૨૨.૧૬૨॥

પૂર્વં તેનોદિતં યત્તલ્લોકાન્મોહયતાઽઞ્જસા ।
શર્વં પ્રતિ તવાહં તુ કુર્યાં દ્વાદશવત્સરમ્ ॥ ૨૨.૧૬૩॥

તપોઽસુરાણાં મોહાય સુરાઃ સન્તુ ગતજ્વરાઃ ।
(૭૪) ગુણાન્વિષ્ણોર્યુઞ્જન્નિત્યત્ર નિત્યેન શોચિષા પ્રકાશરૂપા
સાક્ષિણા યુઞ્જન્મનસા ધ્યાયન્ । ભુઞ્જન્નિતિ પાઠેઽભુજિ
પાલનાભ્યવહારાયોઃઽ ઇતિ ધાતોઃ મનસા પાલયન્ ધ્યાત્વા
સ્થિરીકુર્વન્ ઇતિ ભાવઃ । ભા.પ્ર ।

ચ્ચ્યક્ષ્। ઇતિ તસ્માત્તદા કૃષ્ણ એકાહેન બૃહસ્પતિમ્ ॥ ૨૨.૧૬૪॥

આજ્ઞયા ચારયામાસ ક્ષિપ્રં દ્વાદશરાશિષુ ।
દ્વાદશાબ્દમભૂત્તેન તદહઃ કેશવેચ્છયા ॥ ૨૨.૧૬૫॥

એકસ્મિન્નહ્નિ ભગવાન્ રાશિં રાશિં ચ વત્સરમ્ ।
કલ્પયિત્વોપવાસાદીન્મનસા નિયમાનપિ ॥ ૨૨.૧૬૬॥

માસવ્રતં સાર્દ્ધશતશ્વાસકાલૈરકલ્પયત્ ।
મનસૈવ સ્વભક્તાનાં દ્વાદશાબ્દવ્રતાપ્તયે ॥ ૨૨.૧૬૭॥

તત્રાસ્ય ગરુડાદ્યાશ્ચ પરિચર્યાં સ્વપાર્ષદાઃ ।
ચક્રુર્હોમાદિકાશ્ચૈવ ક્રિયાશ્ચક્રે જનાર્દનઃ ।
સ્વાત્માનં પ્રતિ પાપાનાં શિવાયેતિ પ્રકાશયન્ ॥ ૨૨.૧૬૮॥

એવં સ્થિતં તમરવિન્દદલાયતાક્ષં બ્રહ્મેન્દ્રપૂર્વસુરયોગિવરપ્રજેશાઃ ।
અભ્યાયયુઃ પિતૃમુનીન્દ્રગણૈઃ સમેતા ગન્ધર્વસિદ્ધવરયક્ષવિહઙ્ગમાદ્યાઃ ॥ ૨૨.૧૬૯॥

શર્વોઽપિ સર્વસુરદૈવતમાત્મદૈવમાયાતમાત્મગૃહસન્નિધિમાશ્વવેત્ય ।
અભ્યાયયૌ નિજગણૈઃ સહિતઃ સભાર્યો ભક્ત્યાઽતિસમ્ભ્રમગૃહીતસમર્હણાગ્ર્યઃ ॥ ૨૨.૧૭૦॥

અભ્યેત્ય પાદયુગલ્। અં જગદેકભર્તુઃ કૃષ્ણસ્ય ભક્તિભરિતઃ શિરસા નનામ ।
ચક્રે સ્તુતિં ચ પરમાં પરમસ્ય પૂર્ણષાડ્ગુણ્યવિગ્રહવિદોષમહાવિભૂતેઃ ॥ ૨૨.૧૭૧॥

કૃષ્ણોઽપ્યયોગ્યજનમોહનમેવ વાઞ્છં સ્તુષ્ટાવ રુદ્રહૃદિગં નિજમેવ રૂપમ્ ।
રુદ્રો નિશમ્ય તદુવાચ સુરાન્ સમસ્તાન્ સત્યં વદામિ શ‌ૃણુતાદ્ય વચો મદીયમ્ ।
વિષ્ણુઃ સમસ્તસુજનૈઃ પરમો હ્યુપેયસ્તત્પ્રાપ્તયેઽહમનિલોઽથ રમાઽભ્યુપાયાઃ ॥ ૨૨.૧૭૨॥

એષ હ્યશેષનિગમાર્થવિનિર્ણયોત્થો યદ્વિષ્ણુરેવ પરમો મમ ચાબ્જયોનેઃ ।
અવ્યક્તતઃ સકલજીવગણાચ્ચ નિત્ય ઇત્યેવ નિશ્ચય ઉતૈતદનુસ્મરધ્વમ્ ।
ઇત્યુક્તવત્યખિલદેવગણા ગિરીશે કૃષ્ણં પ્રણેમુરતિવૃદ્ધરમેશભક્ત્યા ॥ ૨૨.૧૭૩॥

ઉક્તૈરન્યૈશ્ચ ગિરિશવાક્યૈસ્તત્ત્વવિનિર્ણયૈઃ ।
કૃષ્ણસ્યૈવ ગુણાખ્યાનૈઃ પુનરિન્દ્રાદિદેવતાઃ ।
જ્ઞાનાભિવૃદ્ધિમગમન્ પુરાઽપિ જ્ઞાનિનોઽધિકમ્ ॥ ૨૨.૧૭૪॥

ચ્ચ્ક્ષ્। સર્વદેવોત્તમં તં હિ જાનન્ત્યેવ સુરાઃ સદા ।
તથાઽપિ તત્પ્રમાણાનાં બહુત્વાદ્યેઽત્ર સં શયાઃ ।
યુક્તિમાત્રે તેઽપિ રુદ્રવાક્યાદપગતાસ્તદા ॥ ૨૨.૧૭૫॥

તતઃ કૃષ્ણઃ સુતવરં ત્વત્ત આદાસ્ય ઇત્યજઃ ।
યદુક્તવાઞ્છિવં પૂર્વં સત્યં કર્તું તદબ્રવીત્ ॥ ૨૨.૧૭૬॥

પુત્રં દેહીતિ સોઽપ્યાહ પૂર્વમેવ સુતસ્તવ ।
જાતઃ પ્રદ્યુમ્નનામા યઃ સ મદ્દત્તઃ પ્રવાદતઃ ॥ ૨૨.૧૭૭॥

પુરા દગ્ધો મયા કામસ્તદાઽયાચત માં રતિઃ ।
દેહિ કાન્તં મમેત્યેવ તદા તામહમબ્રુવમ્ ॥ ૨૨.૧૭૮॥

ઉત્પત્સ્યતે વાસુદેવાદ્યદા તં પતિમાપ્સ્યસિ ।
ઇત્યતોઽસૌ મયા દત્ત ઇવ દેવ ત્વદાજ્ઞયા ॥ ૨૨.૧૭૯॥

દાસોઽસ્મિ તવ દેવેશ પાહિ માં શરણાગતમ્ ।
ઇત્યુક્ત્વાઽભિપ્રણમ્યૈનં પુનરાહ સુરાન્ હરઃ ॥ ૨૨.૧૮૦॥

યદર્થમેષ આયાતઃ કેશવઃ શ‍ૃણુતામરાઃ ।
યોઽસુરો વક્રનામાઽસીદવધ્યો બ્રહ્મણો વરાત્ ।
તદાજાતાદ્વાસુદેવપુત્રાત્કામાદૃતે ક્વચિત્ ॥ ૨૨.૧૮૧॥

તં હન્તુમેવ પુત્રં સ્વં પ્રદ્યુમ્નમુદરેઽર્પ્ય ચ ।
આયાત ઇહ તં ચાપિ દદાહ સ્વોદરાત્સુતમ્ ।
નિસ્સારયિત્વા કક્ષં ચ દગ્ધં પશ્યત દેવતાઃ ॥ ૨૨.૧૮૨॥

જ્વાલામાલાકરાલ્। એન સ્વતેજોવર્દ્ધિતેન ચ ।
પ્રદ્યુમ્નેનૈવ તં દૈત્યં દગ્ધ્વા વનસમન્વિતમ્ ।
પુનશ્ચ સ્વોદરે પુત્રં સ્થાપયામાસ કેશવઃ ॥ ૨૨.૧૮૩॥

સદ્યોગર્ભં પુનસ્તં ચ રુગ્મિણ્યાં જનયિષ્યતિ ।
પૂર્વવત્ક્ષણમાત્રેણ યુવા ચ સ ભવિષ્યતિ ॥ ૨૨.૧૮૪॥

ઞ્ચ્ક્ષ। દૃષ્ટમેતન્નારદાદ્યૈર્મુનિભિઃ સર્વમેવ ચ ।
એવં ક્રીડત્યયં દેવઃ પૂર્ણૈશ્વર્યેણ કેવલમ્ ।
ઇત્યુક્તે કેશવં નેમુર્દેવાઃ શક્રપુરોગમાઃ ॥ ૨૨.૧૮૫॥

તતો હરિર્બ્રહ્મસુરેન્દ્રમુખ્યૈઃ સુરૈઃ સ્તુતો ગરુડસ્કન્ધસંસ્થઃ ।
પુનઃ પુનઃ પ્રણતઃ શઙ્કરેણ સ્તુતસ્તૃતીયેઽહ્નિ નિજાં પુરીમગાત્ ॥ ૨૨.૧૮૬॥

કૃષ્ણે પ્રયાતે નિલયં પુરદ્વિષો રાત્રૌ પૌણ્ડ્રૌ વાસુદેવઃ સમાગાત્ ।
સહૈકલવ્યેન નિજેન માતુઃ પિત્રા તથાઽક્ષોહિણિકત્રયેણ ॥ ૨૨.૧૮૭॥

પુરીં પ્રભઞ્જન્તમમું વિદિત્વા સરામશૈનેયયદુપ્રવીરાઃ ।
સં યોધયામાસુરથાભ્યવર્ષચ્છરૈર્નિષાદાધિપ એકલવ્યઃ ॥ ૨૨.૧૮૮॥

તદસ્ત્રશસ્ત્રૈઃ સહસા વિષણ્ણા યદુપ્રવીરા વિહતપ્રદીપાઃ ।
સહૈવ રામેણ શિનેશ્ચ નપ્ત્રા સમાવિશન્ સ્વાં પુરમેવ સર્વે ॥ ૨૨.૧૮૯॥

પુનઃ સમાદાય તથોરુદીપિકા અગ્રે સમાધાય ચ રૌહિણેયમ્ ।
વિનિસ્સૃતા આત્તશસ્ત્રાઃ સ્વપુર્યાઃ સિં હા યથા ધર્ષિતાઃ સદ્ગુહાયાઃ ॥ ૨૨.૧૯૦॥

“અથાઽસસાદૈકલવ્યં રથેન રામઃ શૈનેયઃ પૌણ્ડ્રકં વાસુદેવમ્ ।
અયુદ્ધ્યતાં તૌ સાત્યકિઃ પૌણ્ડ્રકશ્ચ તથાઽન્યોન્યં વિરથં ચક્રતુશ્ચ” (૭૫) ॥ ૨૨.૧૯૧॥

તતો ગદાયુદ્ધમભૂત્તયોર્દ્વયોસ્તથા રામશ્ચૈકલવ્યશ્ચ વીરૌ ।
કૃત્વાઽન્યોન્યં વિરથં ગદાભ્યામયુદ્ધ્યતાં જાતદર્પૌ બલાગ્ર્યૌ ॥ ૨૨.૧૯૨॥

તસ્મિન્ કાલે કેશવો વૈનતેયમારું હ્યાઽયાદ્યત્ર તે યુદ્ધં સ્થાઃ ।
દૃષ્ટ્વા કૃષ્ણં હર્ષસમ્પૂરિતાત્મા રામો હન્તું ચૈકલવ્યં સમૈચ્છત્ ॥ ૨૨.૧૯૩॥

ઉદ્યમ્ય દોર્ભ્યાં સ ગદાં જવેનૈવાભ્યાપતદ્રૌહિણેયો નિષાદમ્ ।
બલં કોપં ચાસ્ય દૃષ્ટ્વૈકલવ્યઃ પરાદ્રવજ્જીવિતેચ્છુઃ સુદૂરમ્ ॥ ૨૨.૧૯૪॥

વિદ્રાવયન્ રૌહિણેયોઽન્વયાત્તં ભીતોઽપતચ્ચૈકલવ્યોઽમ્બુધૌ સઃ ।
વેલાન્તં તં દ્રાવયિત્વાઽત્ર તસ્થૌ રામો ગદાપાણિરદીનસત્ત્વઃ ॥ ૨૨.૧૯૫॥

(૭૫) હરિવંશે ભવિષ્યત્પર્વણિ આ. ૧૦૨
ચ્ચક્ષી।સુપાપોઽસાવેકલવ્યઃ સુભીતો રામં મત્વૈવાનુયાતં પુનશ્ચ ।
સમુદ્રેઽશીતિં યોજનાનામતીત્ય પશ્ચાદૈક્ષદ્દ્વીપમેવાધિરું હ્ય ॥ ૨૨.૧૯૬॥

રામો વિજિત્યાતિબલં રણે રિપું મુદૈવ દામોદરમાસસાદ ।
પૌણ્ડ્રસ્ત્વવજ્ઞાય શિનિપ્રવીરં નિવાર્યમાણોઽપિ યયૌ જનાર્દનમ્ ॥ ૨૨.૧૯૭॥

તં કેશવો વિરથં વ્યાયુધં ચ ક્ષણેન ચક્રે સ યયૌ નિજાં પુરીમ્ ।
પ્રસ્થાપયામાસ પુનશ્ચ દૂતં કૃષ્ણાયૈકો વાસુદેવોઽહમસ્મિ ॥ ૨૨.૧૯૮॥

મદીયલિઙ ્ગાનિ વિસૃજ્ય ચાઽશુ સમાગચ્છેથાઃ શરણં મામનન્તમ્ ।
તદ્દૂતોક્તં વાક્યમેતન્નિશમ્ય યદુપ્રવીરા ઉચ્ચકૈઃ પ્રાહસન્ સ્મ ॥ ૨૨.૧૯૯॥

કૃષ્ણઃ પ્રહસ્યાઽહ તવાઽયુધાનિ દાસ્યામ્યહં લિ ઙ્ગભૂતાનિ ચાઽજૌ ।
ઇત્યુક્તોઽસૌ દૂત એત્યાઽહ તસ્મૈ સ ચાભ્યાગાદ્યોદ્ધુકામો હરિશ્ચ ॥ ૨૨.૨૦૦॥

તં શાતકૌમ્ભે ગરુડે રથસ્થે સ્થિતં ચક્રાદીન્ કૃત્રિમાન્ સન્દધાનમ્ ।

શ્રીવત્સાર્થે દગ્ધવક્ષસ્થલં ચ દૃષ્ટ્વા કૃષ્ણઃ પ્રાહસત્પાપબુદ્ધિમ્ ॥ ૨૨.૨૦૧॥

તતોઽસ્ત્રશસ્ત્રાણ્યભિવર્ષમાણં વિજિત્ય તં વાસુદેવોઽરિણૈવ ।
ચકર્ત તત્કન્ધરં તસ્ય ચાનુ માતામહસ્યાચ્છિનત્સાયકેન ॥ ૨૨.૨૦૨॥

અપાતયચ્ચાઽશુ શિરઃ સ તેન કાશીશ્વરસ્યેશ્વરો વારણાસ્યામ્ ।
સ ચ બ્રહ્માહં વાસુદેવોઽસ્મિ નિત્યમિતિ જ્ઞાનાદગમત્તત્તમોઽન્ધમ્ ॥ ૨૨.૨૦૩॥

સાહાય્યકૃચ્ચાસ્ય ચ કાશિરાજો યથૈવ કિર્મીરહિડિમ્બસાલ્વાઃ ।
અન્યે ચ દૈત્યા અપતં સ્તમોઽન્ધે તથૈવ સોઽપ્યપતત્પાપબુદ્ધિઃ ॥ ૨૨.૨૦૪॥

નિહત્ય તૌ કેશવો રૌગ્મિણેયં પુનર્વૈદર્ભ્યાં જનયામાસ સદ્યઃ ।
સ ચૈકલવ્યો રામજિતઃ શિવાય ચક્રે તપોઽજેયતાં ચાઽપ તસ્માત્ ॥ ૨૨.૨૦૫॥

સ શર્વદત્તેન વરેણ દૃપ્તઃ પુનર્યોદ્ધું કૃષ્ણમેવાઽસસાદ ।
તસ્યાસ્ત્રશસ્ત્રાણિ નિવાર્ય કેશવશ્ચક્રેણ ચક્રે તમપાસ્તકન્ધરમ્ ।
સ ચાઽપ પાપસ્તમ એવ ઘોરં કૃષ્ણદ્વેષાન્નિત્યદુઃખાત્મકં તત્ ॥ ૨૨.૨૦૬॥

અ્ક્ષીઇ।એવં યદૂનામૃષભેણ સૂદિતે પૌણ્ડ્રે તથા કાશિનૃપે ચ પાપે ।
કાશીશપુત્રસ્તુ સુદક્ષિણાખ્યસ્તપોઽચરચ્છઙ્કરાયોરુભક્ત્યા ॥ ૨૨.૨૦૭॥

પ્રત્યક્ષગં તં શિવં પાપબુદ્ધિઃ કૃષ્ણાભાવં યાચતે દુષ્ટચેતાઃ ।
કૃત્યામસ્મૈ દક્ષિણાગ્નૌ શિવોઽપિ દૈત્યાવેશાદદદાદાવૃતાત્મા ॥ ૨૨.૨૦૮॥

સ દક્ષિણાગ્નિશ્ચાસુરાવેશયુક્તઃ સમ્પૂજિતઃ કાશિરાજાત્મજેન ।
વરાદુમેશસ્ય વિવૃદ્ધશક્તિર્યયૌ કૃષ્ણો યત્ર સમ્પૂર્ણશક્તિઃ ॥ ૨૨.૨૦૯॥

કૃષ્ણસ્તસ્ય પ્રતિઘાતાર્થમુગ્રં સમાદિશચ્ચક્રમનન્તવીર્યઃ ।
જાજ્વલ્યમાનં તદમોઘવીર્યં વ્યદ્રાવયદ્વહ્નિમિમં સુદૂરમ્ ॥ ૨૨.૨૧૦॥

કૃત્યાત્મકો વહ્નિરસૌ પ્રધાનવહ્નેઃ પુત્રશ્ચક્રવિદ્રાવિતોઽથ ।
સહાનુબન્ધં ચ સુદક્ષિણં તં ભસ્મીચકારાઽશુ સપુત્રભાર્યામ્ ॥ ૨૨.૨૧૧॥

દગ્ધ્વા પુરીં વારણસીં સુદર્શનઃ પુનઃ પાર્શ્વં વાસુદેવસ્ય ચાઽગાત્ ।
સુદક્ષિણોઽસૌ તમ એવ જગ્મિવાન્ કૃષ્ણદ્વેષાત્સાનુબન્ધઃ સુપાપઃ ॥ ૨૨.૨૧૨॥

કૃષ્ણઃ ક્રીડન્ દ્વારવત્યાં સુપૂર્ણનિત્યાનન્દઃ ક્વચિદાહ સ્મ ભૈષ્મીમ્ ।
વિડમ્બયન્ ગૃહિણામેવ ચેષ્ટા નિત્યાવિરોધોઽપિ તયા વિદોષયા ॥ ૨૨.૨૧૩॥

ત્વયા નકાર્યં મમ કિઞ્ચ ભદ્રે મયાઽરીણાં માનભઙ્ગાર્થમેવ ।
સમાહૃતાઽસીતિ સા ચાવિયોગં સદા કૃષ્ણેનાઽત્મનોઽપ્યેવ વેત્ત્રી ॥ ૨૨.૨૧૪॥

સ્ત્રિયા ભેતવ્યં ભર્તુરિત્યેવ ધર્મં વિજ્ઞાપયન્તી દુઃખિતેવાઽસ દેવી ।
તાં સાન્ત્વયામાસ ગૃહસ્થધર્મં વિજ્ઞાપયન્ દેવદેવોઽપ્યદુઃખામ્ ॥ ૨૨.૨૧૫॥

એવં ક્રીડત્યબ્જનાભે રમાયાં કૃષ્ણાદિષ્ટો ગોકુલં રૌહિણેયઃ ।
પ્રાયાદ્દૃષ્ટ્વા તત્ર નન્દં યશોદાં તત્પૂજિતઃ કૃષ્ણવાર્તાં ચ પૃષ્ટઃ ॥ ૨૨.૨૧૬॥

માસૌ તત્ર ન્યવસદ્ગોપિકાભી રેમે ક્ષીબો યમુનામાહ્વયચ્ચ ।
મત્તોઽયમિત્યેવ નદીમનાગતાં ચકર્ષ રામો લાઙ્ગલેનાગ્ર્યવીર્યઃ ॥ ૨૨.૨૧૭॥

પુનસ્તયા પ્રણતઃ સં સ્તુતશ્ચ વ્યસર્જયત્તામથ નન્દગોપમ્ ।
આપૃચ્છ્ય જગાદ દ્વારકાં કેશવાય ન્યવેદયન્નન્દગોપાદિભક્તિમ્ ॥ ૨૨.૨૧૮॥

ચ્ચિક્ષવ્।તદૈવ મૈન્દો વિવિદશ્ચ ભૌમે હતે સખાયૌ દાનવાવેશયુક્તૌ ।
આનર્તરાષ્ટ્રં વાસુદેવપ્રતીપૌ વ્યનાશયેતાં વાસુદેવોઽથ ચોચે ॥ ૨૨.૨૧૯॥

રામાય સોઽદાદ્વરમબ્જનાભો વધ્યાવેતૌ ભવતાં તેઽપ્યવધ્યૌ ।
વરાદ્વિરિઞ્ચસ્ય તથાઽમૃતાશનાદુભૌ ચ મૈન્દો વિવિદો વ્રજેતિ ॥ ૨૨.૨૨૦॥

ગત્વા સ મૈન્દં પ્રથમં જઘાન ક્રોધાત્યુદ્ધાયાઽગતં રૈવતાગ્રે ।
દિને પરસ્મિન્ વિવિદં જઘાન શિલા વર્ષન્તં મુસલેનાગ્ર્યકર્મા ।
તયોરાવિષ્ટૌ તાવસુરૌ તમોઽન્ધં પ્રાપ્તૌ ચ તાવશ્વિનૌ સ્વં ચ લોકમ્ ॥ ૨૨.૨૨૧॥

દુર્યોધનસ્યાઽસ પુત્રી રતિર્યા પૂર્વં નામ્ના લક્ષણા કાન્તરૂપા ।
સ્વયમ્બરસ્થાં તાં બલાદેવ સામ્બો જગ્રાહ સા ચૈનમાસાનુરક્તા ॥ ૨૨.૨૨૨॥

બલાદ્ગૃહીતાં વીક્ષ્ય તાં કર્ણમુખ્યા દુર્યોધનાદ્યા યુયુધુઃ ક્રોધદીપ્તાઃ ।
કૃચ્છ્રેણ તં વિરથીકૃત્ય ચૈકં સર્વે સમેતા જગૃહુર્ધાર્તરાષ્ટ્રાઃ ।
કર્ણેન ભૂરિશ્રવસા ચસાર્દ્ધં બાહ્નોર્બલાદેવ દુર્યોધનસ્ય ॥ ૨૨.૨૨૩॥

શ્રુત્વૈવ તદ્વૃષ્ણયઃ સર્વ એવ સમુદ્યમં ચક્રિરે કૌરવેષુ ।
નિવાર્ય તાન્ બલભદ્રઃ સ્વયં યયૌ સહોદ્ધવઃ કૌરવેયાઞ્છમાર્થી ॥ ૨૨.૨૨૪॥

પુરસ્ય બાહ્યોપવને સ્થિતઃ સ પ્રાસ્થાપયચ્ચોદ્ધવં કૌરવાર્થે ।
આગત્ય સર્વે કુરવોઽસ્ય પૂજાં ચક્રુઃ સ ચાઽહોગ્રસેનસ્ય ચાઽજ્ઞામ્ ॥ ૨૨.૨૨૫॥

આજ્ઞાપયદ્વો નૃપતિઃ સ્મ યન્નઃ કુમારકઃ પ્રગૃહીતો ભવદ્ભિઃ ।
એકઃ સમેતૈર્બહુભિર્બાન્ધવાર્થં ક્ષાન્તં તન્નો મુઞ્ચતાઽશ્વેવ સામ્બમ્ ॥ ૨૨.૨૨૬॥

આજ્ઞાપયામાસ વ ઉગ્રસેન ઇત્યુક્તમેવ તુ નિશમ્ય કુરુપ્રવીરાઃ ।

સં શ્રાવ્ય દુષ્ટવચનાનિ બલં પુરં સ્વં ક્રોધાત્સમાવિવિશુરત્ર ચુકોપ રામઃ ॥ ૨૨.૨૨૭॥

સ લાઙ્ગલેન તત્પુરં વિકૃષ્ય જાહ્નવીજલે ।
નિપાતયન્નિવારિતઃ પ્રણમ્ય સર્વકૌરવૈઃ ॥ ૨૨.૨૨૮॥

સભાર્યમાશુ પુત્રકં સુયોધનાભિપૂજિતમ્ ।
સપારિબર્હમાપ્ય ચ પ્રજગ્મિવાન્ સ્વકાં પુરમ્ ॥ ૨૨.૨૨૯॥

અ્ક્ષ્વ્। ઇત્યાદિકર્માણિ મહાન્તિ રામસ્યાઽસઞ્છેષસ્યાચ્યુતાવેશિનોઽલમ્ ।
યસ્યાચ્યુતાવેશવિશેષકાલં જ્ઞાત્વા ભીમોઽપ્યસ્ય નોદેતિ યુદ્ધે ॥ ૨૨.૨૩૦॥

ક્રીડાયુદ્ધે બહુશો રૌહિણેયે વ્યક્તિં વિષ્ણોર્ભીમસેનો વિદિત્વા ।
તાત્કાલિકીં ક્રીડમાનોઽપિ તેન નૈવોદ્યમં કુરુતે વિષ્ણુભક્ત્યા ॥ ૨૨.૨૩૧॥

તદા જયી પ્રભવત્યેષ રામો નાતિવ્યક્તસ્તત્ર યદા જનાર્દનઃ ।
તદા ભીમો વિજયી સ્યાત્સદૈવ વિષ્ણોઃ કેશાવેશવાન્ યત્સ રામઃ ॥ ૨૨.૨૩૨॥

એતાદૃશેનૈવ રામેણ યુક્તે કૃષ્ણે દ્વાર્વત્યાં નિવસત્યબ્જનાભે ।
સ્વપ્નેઽનિરુદ્ધેન રતા કદાચિદ્બાણાત્મજોષા ચિત્રલેખામુવાચ ॥ ૨૨.૨૩૩॥

તમાનયેત્યથ સા ચિત્રવસ્ત્રે પ્રદર્શ્ય લોકાન્ સમદર્શયત્તમ્ ।
પૌત્રં વિદિત્વા વચનાચ્ચ તસ્યાઃ કૃષ્ણસ્ય તં ચાઽનયત્તત્ર રાત્રૌ ॥ ૨૨.૨૩૪॥

અનિરુદ્ધં ગુણોદારમાનીતં ચિત્રલેખયા ।
પ્રાપ્ય રેમે બાણસુતા દિવસાન્ સુબહૂનપિ ॥ ૨૨.૨૩૫॥

ગૂઢં કન્યાગૃહે તં તુ જ્ઞાત્વા કન્યાભિરક્ષિણઃ ।
ઊચુર્બાણાયાદિશચ્ચ કિઙ્કરાન્ ગ્રહણેઽસ્ય સઃ ॥ ૨૨.૨૩૬॥

આગતાનનિરુદ્ધસ્તાન્ પરિઘેણ મહાબલઃ ।
નિહત્ય દ્રાવયામાસ સ્વયમાયાત્તતોઽસુરઃ ।
સ તુ યુદ્ધ્વાઽતિકૃચ્છ્રેણ નાગાસ્ત્રેણ બબન્ધ તમ્ ॥ ૨૨.૨૩૭॥

અથ કૃષ્ણઃ સમારુહ્ય ગરુડં રામસંયુતઃ ।
પ્રદ્યુમ્નેન ચ તત્રાગાત્પ્રથમં તત્ર વહ્નિભિઃ ॥ ૨૨.૨૩૮॥

યુદ્ધ્વૈવાઙ્ગિરસા ચૈવ ક્ષણાદ્વિદ્રાપ્ય તાન્ હરિઃ ।
વિદ્રાપ્ય સર્વપ્રમથાનાસસાદ જ્વરં તતઃ ॥ ૨૨.૨૩૯॥

તેન ભસ્મપ્રહારેણ જ્વરિતં રોહિણીસુતમ્ ।
આશ્લિષ્ય વિજ્વરં ચક્રે વાસુદેવો જગત્પ્રભુઃ ॥ ૨૨.૨૪૦॥

ચ્ચિક્ષ્વ। સ્વયં વિક્રીડ્ય તેનાથ કઞ્ચિત્કાલં જનાર્દનઃ ।
નિષ્પિષ્ય મુષ્ટિભિશ્ચાન્યં સસર્જ જ્વરમચ્યુતઃ ॥ ૨૨.૨૪૧॥

સ્વયં જિત્વાઽપિ ગિરિશભૃત્યં નાલમિતિ પ્રભુઃ ।
સ્વભૃત્યેનૈવ જેતવ્ય ઇત્યન્યં સસૃજે તદા ॥ ૨૨.૨૪૨॥

જ્વરેણ વૈષ્ણવેનાસૌ સુભૃશં પીડિતસ્તદા ।
ગ્રાસાર્થમુપનીતશ્ચ જગામ શરણં હરિમ્ ।
તેન સ્તુતઃ સ ભગવાન્મોચયામાસ તં વિભુઃ ॥ ૨૨.૨૪૩॥

ક્રીડાર્થમત્યલ્પજનેષ્વપિ પ્રભુઃ કથઞ્ચિદેવ વ્યજયદ્વ્યથાં વિના ।
ઇત્યાદિ મોહાય સ દર્શયત્યજો નિત્યસ્વતન્ત્રસ્ય કુતો વ્યથાદયઃ ॥ ૨૨.૨૪૪॥

યદા જ્વરાદ્યા અખિલાઃ પ્રવિદ્રુતાસ્તદા સ્વયં પ્રાપ હરિં ગિરીશઃ ।
તયોરભૂદ્યુદ્ધમથૈનમચ્યુતો વિજૃમ્ભયામાસ હ જૃમ્ભણાસ્ત્રતઃ ॥ ૨૨.૨૪૫॥

વિજૃમ્ભિતે શઙ્કરે નિષ્પ્રયત્ને સ્થાણૂપમે સં સ્થિતે કઞ્જજાતઃ ।
દૈત્યાવેશાદ્વાસુદેવાનભિજ્ઞં સમ્બોધયામાસ સદુક્તિભિર્વિભુઃ ॥ ૨૨.૨૪૬॥

પ્રગૃહ્ય શર્વં ચ વિવેશ વિષ્ણોઃ સ તૂદરં દર્શયામાસ તત્ર ।
શિવસ્ય રૂપં સ્તમ્ભિતં બિલ્વનામ્નિ વને ગિરીશેન ચ યત્તપઃ કૃતમ્ ॥ ૨૨.૨૪૭॥

શૈવં પદં પ્રાપ્નુમેવાચ્યુતાચ્ચ તચ્ચાવદત્કઞ્જજઃ શઙ્કરસ્ય ।
અપેતમોહોઽથ વૃષધ્વજો હરિં તુષ્ટાવ બાણોઽભિસસાર કેશવમ્ ।
તસ્યાચ્યુતો બાહુસહસ્રમચ્છિનત્પુનશ્ચારિં જગૃહે તચ્છિરોઽર્થે ॥ ૨૨.૨૪૮॥

તદા શિવેન પ્રણતો બાણરક્ષણકામ્યયા ।
કૃત્વા સ્વભક્તં બાણં તં રરક્ષ દ્વિભુજીકૃતમ્ ।
મોચયિત્વાઽનિરુદ્ધં ચ યયૌ બાણેન પૂજિતઃ ॥ ૨૨.૨૪૯॥

એવમગ્નીનઽ ઙ્ગિરસં જ્વરં સ્કન્દમુમાપતિમ્ ।
બાણં ચાયત્નતો જિત્વા પ્રાયાદ્દ્વારવતીં પુનઃ ॥ ૨૨.૨૫૦॥

યેનાયત્નેન વિજિતઃ સર્વલોકહરો હરઃ ।
કિં જ્વરાદિજયો વિષ્ણોસ્તસ્યાનન્તસ્ય કથ્યતે ॥ ૨૨.૨૫૧॥

ચ્ચક્ષ્વી। ઈદૃશાનન્તસઙ્ખ્યાનાં શિવાનાં બ્રહ્મણામપિ ।
રમાયા અપિ યદ્વીક્ષાં વિના ન ચલિતું બલમ્ ॥ ૨૨.૨૫૨॥

નચ જ્ઞાનાદયો ભાવા નચાસ્તિત્વમપિ ક્વચિત્ ।
અનન્તશક્તેઃ કૃષ્ણસ્ય ન ચિત્રઃ શૂલિનો જયઃ ॥ ૨૨.૨૫૩॥

ચિત્રલેખાસમેતોષાન્વિતપૌત્રસમન્વિતઃ ।
સરામઃ સસુતો વીન્દ્રમારુહ્ય દ્વારકાં ગતઃ ।
રેમે તત્ર ચિરં કૃષ્ણો નિત્યાનન્દો નિજેચ્છયા ॥ ૨૨.૨૫૪॥

એવં વિધાન્યગણિતાનિ યદૂત્તમસ્ય કર્માણ્યગણ્યમહિમસ્ય મહોત્સવસ્ય ।
નિત્યં રમાકમલજન્મગિરીશશક્રસૂર્યાદિભિઃ પરિનુતાનિ વિમુક્તિદાનિ ॥ ૨૨.૨૫૫॥

એવં વસત્યમિતપૌરુષવીર્યસારે નારાયણે સ્વપુરિ શક્રધનઞ્જયોક્તઃ ।
સમ્પ્રાપ્ય લોમશમુનિઃ સકલાનિ તીર્થાન્યામું સ પાણ્ડુતનયેષુ સહાય આસીત્ ॥ ૨૨.૨૫૬॥

પૃથ્વીં પ્રદક્ષિણત એત્ય સમસ્તતીર્થસ્નાનં યથાક્રમત એવ વિધાય પાર્થાઃ ।
સમ્પૂજ્ય તેષુ નિખિલેષુ હરિં સુભક્ત્યા કૃષ્ણે સમર્પયિતુમાપુરથ પ્રભાસમ્ ।
સમ્ભાવનાય સકલૈર્યદુભિઃ સમેતસ્તેષાં ચ રામસહિતો હરિરાજગામ ॥ ૨૨.૨૫૭॥

પાર્થૈઃ સમ્પૂજિતસ્તત્ર કૃષ્ણો યદુગણૈઃ સહ ।
પાર્થાન્ સમ્પૂજયામાસુર્વૃષ્ણયશ્ચાऽઽજ્ઞયા હરેઃ ॥ ૨૨.૨૫૮॥

તત્ર ભીમં તપોવેષં દૃષ્ટ્વાऽતિસ્નેહકારણાત્ ।
દુર્યોધનં નિન્દયતિ રામે સાત્યકિરબ્રવીત્ ॥ ૨૨.૨૫૯॥

સર્વે વયં નિહત્યાદ્ય સકર્ણાન્ ધૃતરાષ્ટ્રજાન્ ।
અભિમન્યું સ્થાપયામો રાજ્યે યાવત્ત્રયોદશમ્ ॥ ૨૨.૨૬૦॥

સં વત્સરં સમાપ્યૈવ પુરં યાસ્યન્તિ પાણ્ડવાઃ ।
તતો યુધિષ્ઠિરો રાજા રાજ્યં શાસતુ પૂર્વવત્ ॥ ૨૨.૨૬૧॥

એવં વદત્યેવ શિનિપ્રવીરે જનાર્દનઃ પાર્થમુખાન્યુદીક્ષ્ય ।
ઉવાચ શૈનેય ન પાણ્ડુપુત્રાઃ પરેણ સં સાધિતરાજ્યકામાઃ ॥ ૨૨.૨૬૨॥

અ્ક્ષ્વીઇ।સ્વબાહુવીર્યેણ નિહત્ય શત્રૂનાપ્સ્યન્તિ રાજ્યં ત ઇતીરિતેऽમુના ।
તથેતિ પાર્થા અવદં સ્તતસ્તે કૃષ્ણં પુરસ્કૃત્ય યયુર્દશાર્હાઃ ॥ ૨૨.૨૬૩॥

ક્રમેણ પાર્થા અપિ શૈશિરં ગિરિં સમાસદં સ્તત્ર કૃષ્ણાં સુદુર્ગે ।
વિષજજન્તીમીક્ષ્ય તૈઃ સંસ્મૃતોऽથ હૈડિમ્બ આયાત્સહિતો નિશાચરૈઃ ॥ ૨૨.૨૬૪॥

ઉવાહ કૃષ્ણાં સ તુ તસ્ય ભૃત્યા ઊહુઃ પાર્થાં સ્તે બદર્યાશ્રમં ચ ।
પ્રાપ્યાત્ર નારાયણપૂજયા કૃતસ્વકીયકાર્યા યયુરુત્તરાં દિશમ્ ॥ ૨૨.૨૬૫॥

અતીત્ય શર્વશ્વશુરં ગિરિં તે સુવર્ણકૂટં નિષધં ગિરિં ચ ।
મેરોઃ પ્રાચ્યાં ગન્ધમાદે ગિરૌ ચ પ્રાપુર્બદર્યાશ્રમમુત્તમં ભુવિ ॥ ૨૨.૨૬૬॥

તસ્મિન્મુનીન્દ્રૈરભિપૂજ્યમાના નારાયણં પૂજયન્તઃ સદૈવ ।
ચક્રુસ્તપો જ્ઞાનસમાધિયુક્તં સત્તત્ત્વવિદ્યાં પ્રતિપાદયન્તઃ ॥ ૨૨.૨૬૭॥

એવં બદર્યાં વિહરત્સુ તેષુ ક્વચિદ્રહઃ કૃષ્ણયા વાયુસૂનૌ ।
સ્થિતે ગરુત્માનુરગં જહાર મહાહ્રદાદ્વાસુદેવાસનાગ્ર્યઃ ॥ ૨૨.૨૬૮॥

તત્પક્ષવાતેન વિચાલિતે તુ તસ્મિન્ ગિરૌ કમલં હૈમમગ્ર્યમ્ ।
પપાત કૃષ્ણાભીમયોઃ સન્નિધાને ઉદ્યદ્ભાનોર્મણ્ડલાભં સુગન્ધમ્ ॥ ૨૨.૨૬૯॥

દૃષ્ટ્વાઽતિગન્ધં વરહેમકઞ્જં કુતૂહલાદ્દ્રૌપદી ભીમસેનમ્ ।
બહૂન્યયાચત્તાદૃશાન્યાનુભાવમવિષહ્યં જાનતી દેવદૈત્યૈઃ ॥ ૨૨.૨૭૦॥

તયાઽર્થિતઃ સગદસ્તુઙ્ગમેનં ગિરિં વેગાદારુહદ્વાયુસૂનુઃ ।
પ્રશસ્યમાનઃ સુરસિદ્ધસઙ્ઘૈઃ મૃત્નન્ દૈત્યાન્ સિં હશાર્દૂલરૂપાન્ ॥ ૨૨.૨૭૧॥

આસેદિવાં સ્તત્ર હનૂમદાખ્યં નિજં રૂપં પ્રોદ્યદાદિત્યભાસમ્ ।
જાનન્નપ્યેનં સ્વીયરૂપં સ ભીમશ્ચિક્રીડ એતેન યથા પરેણ ॥ ૨૨.૨૭૨॥

ધર્મો દેવાનાં પરમો માનુષત્વે સ્વીયે રૂપેઽપ્યન્યવદેવ વૃત્તિઃ ।
અનાદાનં દિવ્યશક્તેર્વિશેષાન્નરસ્વભાવે સર્વદા ચૈવ વૃત્તિઃ ।
તસ્માદ્ભીમો હનુમાંશ્ચૈક એવ જ્યાયઃ કનીયોવૃત્તિમત્રાભિપેદે ॥ ૨૨.૨૭૩॥

ચ્ચ્ક્ષક્ષ્।સર્વે ગુણા આવૃતા માનુષત્વે યુગાનુસારાન્મૂલરૂપાનુસારાત્ ।
ક્રમાત્સુરાણાં ભાગતોઽવ્યક્તરૂપા આદાનતો વ્યક્તિમાયાન્ત્યુરૂણામ્ ॥ ૨૨.૨૭૪॥

નૈવાવ્યક્તિઃ કાચિદસ્તીહ વિષ્ણોઃ પ્રાદુર્ભાવેઽપ્યતિસુવ્યક્તશક્તેઃ ।
ઇચ્છાવ્યક્તિઃ પ્રાયશો મારુતસ્ય તદન્યેષાં વ્યક્તતા કારણેન ॥ ૨૨.૨૭૫॥

તસ્માદ્ભીમો ધર્મવૃદ્ધ્યર્થમેવ સ્વીયે રૂપેઽપ્યન્યવદ્વૃત્તિમેવ ।
પ્રદર્શયામાસ તથાઽસુરાણાં મોહાયૈવાશક્તવચ્છક્તિરૂપઃ ॥ ૨૨.૨૭૬॥

તદ્રૂપવૃદ્ધિં ભીમસેનોઽથ દૃષ્ટ્વા શ્રુત્વા હનૂમન્મુખતઃ કથાશ્ચ ।
રામસ્ય તચ્ચાતુરાત્મ્યં ચ દિવ્યં ચાતુર્યુગં ધર્મમપ્યગ્ર્યમેવ ॥ ૨૨.૨૭૭॥

ધ્વજાદ્બીભત્સોર્ગર્જનેનૈવ શત્રુપરાભવે તેન દત્તેઽર્જુનસ્ય ।
યયૌ પ્રણમ્યૈનમાશ્વેવ ભીમઃ સૌગન્ધિકં વનમત્યગ્ર્યરૂપમ્ ॥ ૨૨.૨૭૮॥

નરાગમ્યાં નલ્। ઇનીમેત્ય તત્ર દૃષ્ટ્વા પદ્માન્યદ્ભુતાકારવન્તિ ।

હૈમાનિ દિવ્યાન્યતિગન્ધવન્તિ સામાસદદ્વાર્યમાણો નરાશૈઃ ॥ ૨૨.૨૭૯॥

તે ભીમમાત્તાયુધમુગ્રરૂપં મહાબલં રૂપનવાવતારમ્ ।
ન્યવારયન્ ક્રોધવશા સમેતાઃ શતં સહસ્રાણ્યજિતાનિ સઙ્ખે ॥ ૨૨.૨૮૦॥

વરાચ્છિવસ્યૈવ પરૈરજેયાઃ શસ્ત્રાસ્ત્રવૃષ્ટિં મુમુચુઃ સુભીમામ્ ।
ભીમેઽખિલજ્ઞે તપસાં નિધાને બલોદધૌ શૈવશાસ્ત્રં વદન્તઃ ॥ ૨૨.૨૮૧॥

તાન્ વૈષ્ણવૈરેવ શાસ્ત્રૈઃ સ ભીમો વિજિત્ય પૂર્વં વાઙ્મયે સઙ્ગરે તુ ।
શાસ્ત્રાસ્ત્રવર્ષસ્ય કુર્વન્ પ્રતીપં જઘ્નેઽખિલાન્ ગદયા તેષુ વીરાન્ ॥ ૨૨.૨૮૨॥

વાતેન કુન્ત્યાં બલવાન્ સ જાતઃ શૂરસ્તપસ્વી દ્વિષતાં નિહન્તા ।
સત્યે ચ ધર્મે ચ રતઃ સદૈવ પરાક્રમે શત્રુભિરપ્રધૃષ્યઃ ॥ ૨૨.૨૮૩॥

તત્રાપરાંશ્ચૈવ બહૂનસત્યં નિરીશ્વરં ચાપ્રતિષ્ઠં ચ લોકમ્ ।
સિદ્ધોઽહમીશોઽહમિતિ બ્રુવાણાન્ ગુણાન્ વિષ્ણોઃ ખ્યાપયન્ વાદતોઽજૈત્ ॥ ૨૨.૨૮૪॥

ભિન્નં વિષ્ણુમધિકં સર્વતશ્ચ બ્રુવન્ પ્રવીરાન્ લક્ષ્મેષાં નિજઘ્ને ।
તે તસ્ય વીર્યં ચ બલં ચ દૃષ્ટ્વા વિદ્યાબલં બાહુબલં તથૈવ ।
અ્યક્ષ્ણ્ઽશક્નુવન્તઃ સહિતાઃ સમસ્તા હતપ્રવીરાઃ સહસા નિવૃત્તાઃ ॥ ૨૨.૨૮૫॥

વિક્રમ્ય તાન્ ગદયાઽસૌ નિહત્ય વિદ્રાપ્ય સર્વાન્નલ્। ઇનીં પ્રવિશ્ય ।
પીત્વાઽમૃતામ્ભશ્ચ તતોઽમ્બુજાનિ દિવ્યાનિ જગ્રાહ કુરુપ્રવીરઃ ॥ ૨૨.૨૮૬॥

અથો કલહશં સીનિ નિમિત્તાનિ યુધિષ્ઠિરઃ ।
દૃષ્ટ્વા કૃષ્ણામપૃચ્છચ્ચ ક્વ ભીમ ઇતિ દીનધીઃ ॥ ૨૨.૨૮૭॥

સૌગન્ધિકાર્થં યાતં તં શ્રુત્વા કૃષ્ણામુખાન્નૃપઃ ।
આરુહ્ય રાક્ષસશ્રેષ્ઠાન્ કૃષ્ણયા ભ્રાતૃભિઃ સહ ॥ ૨૨.૨૮૮॥

યયૌ વૃકોદરો યત્ર દૃષ્ટ્વા ચૈનમવસ્થિતમ્ ।
ઉવાચ મૈવમિત્યેનં ભીતો ગિરિશકોપતઃ ॥ ૨૨.૨૮૯॥

દેવેભ્યો મરણાદ્ભીતા રાક્ષસા વિત્તપાજ્ઞયા ।
તદીયાં નલ્। ઇનીં તે હિ રક્ષન્ત્યસ્યાઽશ્રયો હરઃ ।
જાનન્ વિત્તેશ્વરો ભીમમાહાત્મ્યં ન ચુકોપ હ ॥ ૨૨.૨૯૦॥

વસત્સુ તત્ર પાર્થેષુ પુનઃ કતિપયૈર્દિનૈઃ ।
ઉવાચ ભીમસેનસ્ય યશોધર્માદિભિવૃદ્ધયે ॥ ૨૨.૨૯૧॥

પઞ્ચવર્ણાનિ પુષ્પાનિ કૃષ્ણા વીક્ષ્યાઽહૃતાનિ તુ ।

મારુતેન કુબેરસ્ય ગૃહાન્નૃભિરગમ્યતઃ ॥ ૨૨.૨૯૨॥

અગમ્યોઽયં ગિરિઃ સર્વૈઃ કુબેરેણાભિપાલિતઃ ।
અદ્ય ત્વયૈવ ગન્તવ્યો વિધૂયાખિલરાક્ષસાન્ ॥ ૨૨.૨૯૩॥

ઇત્યુક્ત આશુ સગદઃ સધનુઃ સબાણો ભીમો ગિરીન્દ્રમજિતોરુબલો વિગાહે ।
પ્રાપ્તં નિશામ્ય બલદૈવતસૂનુમત્ર પદ્મત્રયં ન્યરુણદુધ્દતરાક્ષસાનામ્ ॥ ૨૨.૨૯૪॥

અગ્રે નિધાય મણિમન્તમજેયમુગ્રં શમ્ભોર્વરાદ્વિવિધશસ્ત્રમહાભિવૃષ્ટ્યા ।
તાન્ સર્વરાક્ષસગણાન્મણિમત્સમેતાન્ ભીમો જઘાન સપદિ પ્રવરૈઃ શરૌઘૈઃ ॥ ૨૨.૨૯૫॥

અવધ્યાં સ્તાન્ ક્ષણેનૈવ હત્વા ભીમો મહાબલઃ ।
રણે ક્રોધવશાન્ સર્વાનતિષ્ઠદ્ગિરિમૂર્દ્ધનિ ॥ ૨૨.૨૯૬॥

ચ્ચ્ક્ષ્ક્ષ। તે હતા ભીમસેનેન પ્રાપુરન્ધન્ધન્તમોઽખિલાઃ ।
હતાઃ સૌગન્ધિકવને મણિમાંશ્ચ પુનઃ કલૌ ।
જાતો મિથ્યામતિં સમ્યગાસ્તીર્યાઽપુસ્તમોઽધિકમ્ ॥ ૨૨.૨૯૭॥

તતો વૈશ્રવણો રાજા મહાપદ્મત્રયે હતે ।
રાક્ષસાનામવધ્યાનાં સખાયે મણિમત્યપિ ।
આરુરોહ રથં દિવ્યં યોદ્ધુકામો વૃકોદરમ્ ॥ ૨૨.૨૯૮॥

અસુરાવેશતસ્તસ્ય ભીમે ક્રોધો મહાનભૂત્ ।
સ આજગામ ભીમેન યોદ્ધું વિત્તપતિઃ સ્વયમ્ ॥ ૨૨.૨૯૯॥

તસ્મિન્ કાલે ભીમસેનસ્ય ઘોષં શ્રુત્વા રાજાઽપૃચ્છદાશુ સ્મ કૃષ્ણામ્ ।
ક્વ ભીમ ઇત્યેવ તયોદિતં ચ શ્રુત્વા જગામઽશુ રક્ષોઽં સસં સ્થઃ ॥ ૨૨.૩૦૦॥

સભ્રાતૃકે મુનિભિઃ કૃષ્ણયા ચ ગતે રાજન્યત્ર ભીમં કુબેરઃ ।
દૃષ્ટ્વાઽસુરાવેશતો ધર્મજં ચ કિઞ્ચિન્મુક્તઃ સ્નેહયુક્તસ્તથાઽસ ॥ ૨૨.૩૦૧॥

ધૃતાયુધં ભીમમીક્ષ્યાપિ કિઞ્ચિદ્દૈત્યાવેશાદ્બહુ મેને ન ભીમમ્ ।
અગસ્ત્યશાપં ચાવદત્સ્વસ્ય પૂર્વં સખાયનાશે કારણં રાજરાજઃ ॥ ૨૨.૩૦૨॥

દૈત્યાવેશાદુજ્ઝિતઃ શાન્તભાવો દદૌ નિજં સ્થાનમેષાં સુતુષ્ટઃ ।
આવાસાર્થં તેઽવસં સ્તત્ર પાર્થાસ્તથાઽન્યેષાં દૈવતાનાં ગૃહેષુ ॥ ૨૨.૩૦૩॥

તત્રૈવ તેષાં વસતાં મહાત્મનામાનન્દિનામબ્દચતુષ્ટયે ગતે ।
પઞ્ચાબ્દમધ્યાપ્ય મહાન્તિ ચાસ્ત્રાણીન્દ્રો ગુર્વર્થં ફલ્ગુનેનાર્થિતોઽભૂત્ ॥ ૨૨.૩૦૪॥

વધં વવ્રે સ્વશત્રૂણામિન્દ્રઃ પાર્થાત્સ્વરૂપતઃ ।

નિવાતકવચાખ્યાનાં યેષાં બ્રહ્મા દદૌ વરમ્ ।
અવધ્યત્વં સુરૈર્દૈત્યૈર્ગન્ધર્વૈઃ પક્ષિરાક્ષસૈઃ ॥ ૨૨.૩૦૫॥

પુનરિન્દ્રેણાર્થિતોઽદાજ્જહીમાન્નરદેહવાન્ ।
ઇતિ તેનાર્જુનં શક્રઃ સ્વાત્માનં નરદેહગમ્ ।
જગાદ તાન્ જહીત્યેવ કિરીટં સ્વં નિબદ્ધ્ય ચ ॥ ૨૨.૩૦૬॥

અક્ષક્ષીડઇન્દ્રં સ્યન્દનમારુહ્ય પાર્થો માતલિસં યુતઃ ।
ગાણ્ડીવં ધનુરાદાય યયૌ હન્તું મહાસુરાન્ ॥ ૨૨.૩૦૭॥

શઙ્ખં દદુસ્તસ્ય દેવા દેવદત્તઃ સ શઙ્ખરાટ્ ।
નાદયન્ શઙ્ખઘોષેણ ધનુર્વિષ્ફુરયન્મહત્ ॥ ૨૨.૩૦૮॥

દધાનઃ કુણ્ડલે દિવ્યે શક્રદત્તે સુભાસ્વરે ।
આસસાદ પુરં દિવ્યં દૈત્યાનામિન્દ્રનન્દનઃ ॥ ૨૨.૩૦૯॥

તસ્ય શઙ્ખધ્વનિં શ્રુત્વા ગાણ્ડીવસ્ય ચ નિસ્સ્વનમ્ ।
અભિસસ્રુર્મહાવીર્યા નિવાતકવચાસુરાઃ ॥ ૨૨.૩૧૦॥

તિસ્રઃ કોટ્યો દાનવાનાં સ્વયમ્ભુવરગર્વિતાઃ ।
નાનાયુધૈ રણે પાર્થમભ્યવર્ષન્ સુસં હતાઃ ॥ ૨૨.૩૧૧॥

તેષાં સ શસ્ત્રાણિ કિરીટમાલી નિવાર્ય ગાણ્ડીવધનુઃ પ્રમુક્તૈઃ ।
શરૈઃ શિરાં સિ પ્રચકર્ત વીરો મહાસ્ત્રશિક્ષાબલસમ્પ્રયુક્તૈઃ ॥ ૨૨.૩૧૨॥

સર્વે હતાસ્તેન મહારથેન તે દાનવાઃ સોઽપિ યયૌ તથાઽન્યાન્ ।
પૌલોમકાલેયગણાભિધાનાન્ ષષ્ટિં સહસ્રાણિ મહારથાનામ્ ॥ ૨૨.૩૧૩॥

તાનસ્ત્રશસ્ત્રાણ્યભિવર્ષમાણાન્ ધનઞ્જયઃ પાશુપતાસ્ત્રતો દ્રાક્ ।
દગ્ધ્વા યયૌ પુનરેવેન્દ્રસદ્મ તં સસ્વજે પ્રીતિયુક્તશ્ચ શક્રઃ ॥ ૨૨.૩૧૪॥

યયુરન્ધં તમસ્તેઽપિ સર્વદેવદ્વિષોઽસુરાઃ ।
અથાનુજ્ઞાપ્ય પિતરં રથેનૈન્દ્રેણ ભાસ્વતા ।
સોદર્યાણાં સકાશં સ યયૌ વજ્રધરાત્મજઃ ॥ ૨૨.૩૧૫॥

આયાન્તમીક્ષ્ય બીભત્સું મુમુદુર્ભ્રાતરોઽધિકમ્ ।
ઊષુશ્ચ ચતુરોઽબ્દાં સ્તે પુનર્મેરૌ પ્રમોદિનઃ ॥ ૨૨.૩૧૬॥

કથાભિર્વાસુદેવસ્ય ધ્યાનેનાભ્યર્ચનેન ચ ।
યયૌ કાલઃ સુખેનૈવ તેષાં વિષ્ણુરતાત્મનામ્ ॥ ૨૨.૩૧૭॥

નૈવ શત્રૂનનુત્સાદ્ય નાનાદાય મહદ્ધશઃ ।
અ્ક્ષ્ક્ષીંઇંઆકૃત્વા વાસુદેવાજ્ઞાં રાજ્ઞાં મુખ્યગતિર્ભવેત્ ॥ ૨૨.૩૧૮॥

તદન્યેષાં તુ વર્ણાનાં ક્ષમા બાહ્યેષુ શત્રુષુ ।
પ્રાયો ધર્મ ઇતિ પ્રોક્તો હરેરાજ્ઞાઽખિલસ્ય ચ ॥ ૨૨.૩૧૯॥

ઇતિ ભીમવચઃ શ્રુત્વા સસોદર્યો યુધિષ્ઠિરઃ ।
રાક્ષસસ્કન્ધમારૂઢઃ કૃષ્ણયા ચાઽયયૌ પુનઃ ॥ ૨૨.૩૨૦॥

પાદેષુ તેષુ નિવસત્સુ હિમાચલસ્ય યામ્યાશ્રિતેષુ પવમાનસુતઃ કદાચિત્ ।
ધન્વી મૃગાનનુચરન્ સહસાઽસસાદ હાઽયોઃ સુતં નહુષમાજગરોરુરૂપમ્ ॥ ૨૨.૩૨૧॥

પૂર્વં હિ વૃત્રવધતોઽમ્બુજનાલ્। અતન્તુસં સ્થે શચીપ્રણયિનિ પ્રવિચિન્ત્ય દેવાઃ ।
ચક્રુસ્ત્રિલોકપતિમાયુસુતં વરં ચ દત્વાઽક્ષિગોચરતપોઽસ્ય બલં ચ સર્વમ્ ॥ ૨૨.૩૨૨॥

સ સર્વસુરવિપ્રેન્દ્રતપશ્ચ બલમક્ષયમ્ ।
અવાપ્ય વવૃધે નિત્યં દર્પાદૈચ્છચ્છચીમપિ ॥ ૨૨.૩૨૩॥

સ ઇન્દ્રવચનાચ્છચ્યા મહર્ષિગણવાહને ।
નિયુક્તો વઞ્ચનાયૈવ વાહયામાસ તાનૃષીન્ ॥ ૨૨.૩૨૪॥

સ શચીપ્રતિષેધાર્થમગસ્ત્યેન મહાત્મના ।
વેદપ્રામાણ્યવિષયે પૃષ્ટો નેત્યાહ મૂઢધીઃ ।
પ્રમાણમિતિ તેનોક્તઃ શિરસ્યેનં પદાઽહનત્ ॥ ૨૨.૩૨૫॥

તદા ભૃગું તસ્ય જટાસુ લીનં કદાઽપિ તસ્યાક્ષિપથં ન યાતમ્ ।
આવિશ્ય કઞ્જપ્રભવઃ શશાપ વ્રજાઽશુ પાપાજગરત્વમેવ ॥ ૨૨.૩૨૬॥

ષષ્ઠે કાલે યસ્ત્વયાઽસાદિતઃ સ્યાત્સ તે વશં યાતુ બલાધિકોઽપિ ।
યદા ગૃહીતં પુરુષં નિહન્તું ન શક્ષ્યસે યદિ સ ત્વદ્ગૃહીતઃ ।
શક્તોઽપિ નાઽત્માનમભિપ્રમોચયેત્તદાઽસ્ય સ્યાત્ત્વત્તપોઽગ્ર્યં બલં ચ ॥ ૨૨.૩૨૭॥

સર્વદેવમુનીનાં યત્તપસ્ત્વાં સમુપાશ્રિતમ્ ।
તચ્ચ સર્વં તમેવૈતિ નાત્ર કાર્યા વિચારણા ॥ ૨૨.૩૨૮॥

યદા પ્રશ્નાં સ્ત્વદીયાંશ્ચ કશ્ચિત્પરિહરિષ્યતિ ।
ઈ્ક્ષ્ક્ષવ્। તદા ગન્તાઽસિ ચ દિવં વિસૃજ્યાઽજગરં તનુમ્ ।
સ્મૃતિશ્ચ મત્પ્રસાદેન સર્વદા તે ભવિષ્યતિ ॥ ૨૨.૩૨૯॥

ભૃગુદેહગતેનૈવં શપ્તઃ કમલયોનિના ।

પપાતાજગરો ભૂત્વા નહુષઃ ક્ષણમાત્રતઃ ॥ ૨૨.૩૩૦॥

ઇન્દ્રોઽપ્યવાપ સ્વં સ્થાનમિષ્ટ્વા વિષ્ણું વિપાપકઃ ।
ધર્મવૃદ્ધ્યર્થમેવૈતત્પાપમાસીચ્છચીપતેઃ ॥ ૨૨.૩૩૧॥

નહિ લોકાવનં પાપં ત્રૈલોક્યેશસ્ય વજ્રિણઃ ।
વૃત્રં હત્વા મહાનાસેત્યાદિ વેદપદં ચ યત્ ॥ ૨૨.૩૩૨॥

ક્વચિત્પાપં ચ પુણ્યાનાં વૃદ્ધયે ભવતિ સ્ફુટમ્ ।
વૃત્રહત્યા યથેન્દ્રસ્ય જાતા ધર્મસ્ય વૃદ્ધયે ॥ ૨૨.૩૩૩॥

દેવાનાં વા મુનીનાં વા ભવેદેવં નવૈ નૃણામ્ ।
પાપં યત્પુણ્યમેવૈતદસુરાણાં વિલોમતઃ ।
એવં સ્કાન્દે હિ વચનં ન પાપં તચ્છચીપતેઃ ॥ ૨૨.૩૩૪॥

નાન્યસ્ય પદમાપ્સ્યન્તિ તદ્દેવાનાં વ્રતં પરમ્ ।
તસ્માત્તે નહુષં શક્રપદે નિદધુરીશ્વરાઃ ॥ ૨૨.૩૩૫॥

તસ્મિન્નેવં નિપતિતે બ્રહ્મણઃ શાપકારણાત્ ।
અષ્ટાવિં શતિમે પ્રાપ યુગે ભીમસ્તમુલ્બણમ્ ।
જાનન્નેવ તદીયં તત્તપ આદાતુમીપ્સયા ॥ ૨૨.૩૩૬॥

યત્તત્સુરાણાં સર્વેષાં મુનીનાં ચ તપઃ સ્થિતમ્ ।
તદ્ગૃહીતું વશગવદિચ્છયૈવાઽસ મારુતિઃ ॥ ૨૨.૩૩૭॥

દેવાનાં હિ નૃજાતાનામલ્પં વ્યક્તં ભવેદ્બલમ્ ।
ઇચ્છયા વ્યક્તતાં યાતિ વાયોરન્યેષુ તચ્ચ ન ॥ ૨૨.૩૩૮॥

નિત્યવ્યક્તા ગુણા વિષ્ણોરિતિ શાસ્ત્રસ્ય નિર્ણયઃ ।
એવમન્યેઽપિ હિ ગુણા માનુષાદિષુ જન્મસુ ॥ ૨૨.૩૩૯॥

અ્ક્ષ્ક્ષ્વ્।દેવાનાં માનુષાદૌ તુ શક્યેઽપ્યવ્યક્તતાકૃતેઃ ।
ધર્મવૃદ્ધિર્ભવેત્તેષાં પ્રીતો ભવતિ કેશવઃ ॥ ૨૨.૩૪૦॥

તન્માનુષે બલે તસ્ય વરાદ્ધારિતવત્સ્થિતે ।
દૈવં બલં ન શક્તોઽપિ વ્યક્તં ચક્રે ન મારુતિઃ ॥ ૨૨.૩૪૧॥

આત્મમોક્ષાય ન પ્રશ્નાન્ વ્યાજહાર સ ચાભિભૂઃ ।
વિદ્યોપજીવનં ધર્મો વિપ્રાણામપિ નો યતઃ ॥ ૨૨.૩૪૨॥

કિમુત ક્ષત્રિયસ્યેતિ જાનન્નપિ વૃકોદરઃ ।

તત્પ્રશ્નપરિહારેણ નાઽત્મમોક્ષં સમૈચ્છત ॥ ૨૨.૩૪૩॥

અયતન્તમપિ હ્યેનં ચાલનાયાપિ નાશકત્ ।
પૂર્ણોઽપિ સર્વલોકાનાં બલેન નહુષસ્તદા ।
વેષ્ટયિત્વૈવ તં ભીમં સ્થિતોઽસૌ નાશકત્પરમ્ ॥ ૨૨.૩૪૪॥

ભ્રાતૃમાત્રાદિષુ સ્નેહાત્ક્ષિપ્રમાત્મવિમોક્ષણમ્ ।
ઇચ્છન્નપિ ન મોક્ષાય યત્નં ચક્રે વૃકોદરઃ ।
સર્વદેવમુનીન્દ્રાણાં તપ આદાતુમત્રગમ્ ॥ ૨૨.૩૪૫॥

ભ્રાત્રાદિષુ સ્નેહવશાન્ન સ્થાતવ્યમિહેત્યપિ ।
મન્વાનઃ કાલતો ભઙ્ગં સ્વયમેવૈષ યાસ્યતિ ।
આજ્ઞયા વાસુદેવસ્ય દાર્ઢ્યાદ્દેહસ્ય મે તથા ॥ ૨૨.૩૪૬॥

સ્રસ્તાઙ્ગે પતિતે સર્પે યાસ્યામીતિ વિચિન્તયન્ ।
તસ્થૌ ભીમો હરિં ધ્યાયન્ સ્વભાવાન્ન તદિચ્છયા ॥ ૨૨.૩૪૭॥

તદૈવ બ્રહ્મવચનાત્પૂર્વોક્તાત્કેશવાજ્ઞયા ।
બલં તપશ્ચ સર્વસ્ય તત્સ્થમાયાદ્વૃકોદરમ્ ॥ ૨૨.૩૪૮॥

પૂરિતે નહુષસ્થેન તપસા ચ બલેન ચ ।
ભીમે સ નહુષોઽથાઽસીત્સ્રસ્તભોગઃ શનૈઃ શનૈઃ ॥ ૨૨.૩૪૯॥

ગતે ભીમે નિમિત્તાનિ દૃષ્ટ્વા રાજા યુધિષ્ઠિરઃ ।
પપ્રચ્છ ક્વ ગતો ભીમ ઇતિ કૃષ્ણાં ચલન્મનાઃ ॥ ૨૨.૩૫૦॥

ચ્ચિક્ષ્વ।યાતં મૃગાર્થં સ નિશમ્ય તસ્યાસ્તદૂરુવેગાત્પતિતાન્નગેન્દ્રાન્ ।
દૃષ્ટ્વા પથા તેન યયૌ સ તત્ર દૃષ્ટ્વા ચ સર્પાવૃતમન્વપૃચ્છત્ ॥ ૨૨.૩૫૧॥

સ કારણં નહુષાત્સર્વમેવ શુશ્રાવ તત્પ્રશ્નમશેષતશ્ચ ।
ભ્રાતૃસ્નેહાદ્વ્યાકરોદ્ધર્મસૂનુસ્તદૈવ સોઽપ્યારુહત્સ્વર્ગલોકમ્ ॥ ૨૨.૩૫૨॥

દિવ્યામ્બરે કુણ્ડલિનિ સ્વપૂર્વે ગતે વિમાનેન સ ધર્મરાજઃ ।
ભીમશ્ચાઽયાત્સ્વાશ્રમાયૈવ સર્વં યુધિષ્ઠિરઃ કથયામાસ તત્ર ॥ ૨૨.૩૫૩॥

શ્રુત્વા કૃષ્ણા ભ્રાતરશ્ચાસ્ય સર્વે સર્વે મુનીન્દ્રા ભીમસેનેઽતિભક્તાઃ ।
વ્રીલ્. આં યયુર્ભીમસેનગ્રહેણ તથાઽબ્રુવન્ સ્નેહતો ભીમસેનમ્ ॥ ૨૨.૩૫૪॥

નૈતાદૃશં સાહસં તેઽનુરૂપં શક્તોઽપિ યત્સ્વાત્મનો મોક્ષણાય ।
નૈવાઽચરો યત્નમતો નિજાનાં મહદ્દુઃખં હૃદયે પ્રાર્પયસ્ત્વમ્ ॥ ૨૨.૩૫૫॥

મૈવં પુનઃ કાર્યમિતિ બ્રુવન્તઃ સમાશ્લિષન્ સર્વ એવૈત્ય ભીમમ્ ।
તતોઽહોભિઃ કૈશ્ચિદાપુઃ કુરૂણાં રાષ્ટ્રં પાર્થા મુનિમુખ્યૈઃ સમેતાઃ ॥ ૨૨.૩૫૬॥

તતોઽમિતૌજાભગવાનુપાગમન્નારાયણઃ સત્યભામાસહાયઃ ।
સમ્પૂજિતઃ પાણ્ડવૈસ્તૈઃ સમેતશ્ચક્રેઽથ સૌહાર્દનિમિત્તસત્કથાઃ ॥ ૨૨.૩૫૭॥

કૃષ્ણા ચ સત્યા ચ પરસ્પરં મુદા સમ્ભાષણં ચક્રતુર્યોષિદગ્ર્યે ।
પરીક્ષન્ત્યા સત્યયા સર્વવેત્ર્યા નિર્દોષયા ચોદિતા પ્રાહ કૃષ્ણા ॥ ૨૨.૩૫૮॥

સ્ત્રીધર્માનખિલાં સ્તત્ર સત્યાં નિર્દોષસં વિદમ્ ।
જ્ઞાત્વાઽપિ કૃષ્ણા પ્રોવાચ લોકશિક્ષાર્થમેવ તુ ॥ ૨૨.૩૫૯॥

ક્રીડાર્થમેવ વચનં જ્ઞાત્વા સત્યાસમીરિતમ્ ।
તસ્યાનુસારવાક્યાનિ તત્પ્રીત્યા એવ સાઽબ્રવીત્ ॥ ૨૨.૩૬૦॥

તતઃ કતિપયાહાનિ નિરુષ્યાત્ર જનાર્દનઃ ।
યયૌ સભાર્યઃ સ્વપુરીં પાણ્ડવાનનુમાન્ય ચ ॥ ૨૨.૩૬૧॥

અચ્ક્ક્ષ્વી । તતઃ કદાચિન્મૃગયાં ગતેષુ પાર્થેષુ રાજા સૈન્ધવ આસસાદ ।
સકોટિકાશ્યઃ સબલશ્ચ તેષાં વરાશ્રમં સોઽત્ર દદર્શ કૃષ્ણામ્ ॥ ૨૨.૩૬૨॥

બ્રજન્ વિવાહાર્થમસૌ નિશામ્ય કૃષ્ણાં કોટિં પ્રેષયિત્વૈવ કાશ્યમ્ ।
આયાહિ મામિત્યવદત્સુપાપસ્તયા નિરસ્તો જગૃહે કરે ચ ॥ ૨૨.૩૬૩॥

તયા ધુતો નિપપાતાઽશુ ભૂમૌ પુનશ્ચ સજ્જોઽભ્યપતદ્વિલજ્જઃ ।
તતોઽસહાયત્વત એવ કૃષ્ણા ધૌમ્યાયોક્ત્વા સાગ્નિરન્વેહિ મેતિ ।
સમારુહત્સૈન્ધવસ્યૈવ યાનં સુખં ન યાસીતિ તમીરયિત્વા ॥ ૨૨.૩૬૪॥

તદા નિમિત્તાનિ નિશામ્ય પાર્થાઃ સમાયયુસ્ત્વરયૈવાઽશ્રમાય ।
શ્રુત્વા દાસીવચનાત્સર્વમેવ ચક્રુઃ ક્ષિપ્રં સૈન્ધવસ્યાનુયાનમ્ ॥ ૨૨.૩૬૫॥

આક્રોશમાનં ભીમસેનેતિ ધૌમ્યં દૃષ્ટ્વા તસ્યાગ્રે સૈન્ધવં ચાતિપાપમ્ ।
ચક્રુર્નાદાન્ સિં હવત્પાણ્ડુપુત્રા દૃષ્ટ્વા કૃષ્ણા ચાવતરદ્રથાત્તદા ।
ધૌમ્યેન સાર્દ્ધં સા યયૌ ચાઽશ્રમાય સૈન્યં પાર્થાસ્તત્ર નિજઘ્નુરોજસા ॥ ૨૨.૩૬૬॥

અગ્રે કૃષ્ણાં યોઽવદત્સિન્ધુરાજં યાહીતિ તં કોટિકાશ્યં સુપાપમ્ ।
છિત્વા શિરો મૃત્યવે ભીમસેનો નિવેદયામાસ તમઃ સ ચાગાત્ ॥ ૨૨.૩૬૭॥

હત્વા સેનામખિલાં સૈન્ધવસ્ય ભીમાર્જુનૌ સયમં ધર્મરાજમ્ ।
વિસૃજ્ય ધાવન્તમથાનુજગ્મતુર્જયદ્રથં વિરથં ફલ્ગુનોઽકઃ ॥ ૨૨.૩૬૮॥

પદ્ભ્યાં ધાવન્તં ભીમસેનો નિગૃહ્ય દત્વા પ્રહારાંશ્ચ ભૃશં તમાર્તમ્ ।
આદાયાધાદ્દ્રૌપદીપાદયોશ્ચ તં મોચયામાસ ચ ધર્મસૂનુઃ ॥ ૨૨.૩૬૯॥

દાસો દ્રૌપદ્યા અહમિત્યેવ વાક્યે તેનૈવોક્તે ભીમસેનોઽપ્યમુઞ્ચત્ ।
સ બ્રીલ્. ઇતોઽવાગ્વદનો યયૌ વનં પાર્થાશ્ચ તત્રોષુરતિપ્રમોદિનઃ ॥ ૨૨.૩૭૦॥

માર્કણ્ડેયસ્તદાઽગત્ય તેષામકથયત્કથાઃ ।
બહ્વ્યશ્ચૈવ વિચિત્રાશ્ચ ભાષાત્રયસમન્વિતાઃ ॥ ૨૨.૩૭૧॥

લોકદર્શનમાશ્રિત્ય દેવાશ્ચ મુનયસ્તથા ।
બ્રૂયુઃ કથાસ્તત્ર શિક્ષા ગ્રાહ્યા નાર્થાઃ કથઞ્ચન ॥ ૨૨.૩૭૨॥

અક્ષ્ક્ષ્વીઇઽર્થઃ સમાધિભાષાસુ ગ્રાહ્યઃ સર્વોઽપ્યસં શયમ્ ।
પરદર્શનભાષાસુ જ્ઞેયં તદ્દર્શનં તથા ॥ ૨૨.૩૭૩॥

ગ્રાહ્યો નાર્થો વૈદિકં તુ દર્શનં ગ્રાહ્યમેવ ચ ।
અન્યાર્થો ગુહ્યભાષાસુ ગ્રાહ્ય એવં વિનિર્ણયઃ ॥ ૨૨.૩૭૪॥

જયદ્રથસ્તુ ભીમેન તદા પઞ્ચશિખીકૃતઃ ।
તપસા શિવમારધ્ય વવ્રે પાણ્ડવરોધનમ્ ।
ઋતેઽર્જુનાદર્જુનસ્ય તુષ્ટો હિ તપસા શિવઃ ॥ ૨૨.૩૭૫॥

વને વસત્સ્વેવ ચ પાણ્ડવેષુ ચક્રે યજ્ઞં પૌણ્ડરીકાખ્યમેવ ।
સં સ્પર્ધયા રાજસૂયસ્ય રાજા દુર્યોધનો નાપ્યસૌ તત્કલાર્હઃ ॥ ૨૨.૩૭૬॥

દુર્યોધનસ્યાઽજ્ઞયા પાણ્ડવાનાં દુઃ શાસનઃ પ્રેષયામાસ તત્રઃ ।
આગચ્છતેત્યવમાનાય તં તુ ભીમોઽવાદીદ્રણયજ્ઞં સ્વગમ્યમ્ ॥ ૨૨.૩૭૭॥

તતો દિનૈઃ કૈશ્ચન ધાર્તરાષ્ટ્રાઃ સકર્ણગાન્ધારનૃપાઃ કુમન્ત્રતઃ ।
સભાર્યકાઃ પાણ્ડવાન્ દ્રૌપદીં ચ મહૈશ્વર્યં દર્શયિત્વાઽવમન્તુમ્ ॥ ૨૨.૩૭૮॥

તે સ્યન્દનૈઃ કાઞ્ચનરત્નચિત્રૈર્મહાગજૈસ્તુરગૈઃ પત્તિભિશ્ચ ।
સ્વલઙ્કૃતાશ્ચિત્રમાલ્યામ્બરાશ્ચ વિનિર્યયુર્દ્વૈતવનાય શીઘ્રમ્ ॥ ૨૨.૩૭૯॥

ગવાં દૃષ્ટિચ્છદ્મના નિર્ગતાં સ્તાન્ જ્ઞાત્વા શક્રસ્તેજસો ભઙ્ગકામઃ ।
તત્સામર્થ્યં વરમસ્મૈ પ્રદાય તદ્બન્ધનાયાદિશચ્ચિત્રસેનમ્ ॥ ૨૨.૩૮૦॥

સ ષષ્ટિસાહસ્રકકોટિયૂથપૈર્ગન્ધર્વમુખ્યૈઃ સં વૃતોઽગાત્સરસ્તત્ ।
યસ્મિન્ સ્નાતું વાઞ્છતિ ધાર્તરાષ્ટ્રસ્તદાજ્ઞયા પુરુષાસ્તાનથોચુઃ ॥ ૨૨.૩૮૧॥

સ્નાતું સમાયાસ્યતિ ધાર્તરાષ્ટ્રો રાજેશ્વરો નિસ્સરધ્વં તદસ્માત્ ।

તીર્થાદાજ્ઞાં ધારયન્તશ્ચ તસ્યેત્યુક્તા ગન્ધર્વા જહસુસ્તાનથોચ્ચૈઃ ॥ ૨૨.૩૮૨॥

ઊચુર્વયં માનયામસ્તદાજ્ઞાં ત્રિલોકાનાં યઃ પતિઃ શક્રદેવઃ ।
ન માનુષાણામપિ ચક્રવર્તિનાં કિમ્વલ્પસારસ્ય સુયોધનસ્ય ॥ ૨૨.૩૮૩॥

ઇતીરિતે કુપિતો ધાર્તરાષ્ટ્રો જઘાન ગન્ધર્વવરાઞ્છરૌઘૈઃ ।
ચિચ્ક્ષક્ષક્ષ્।જઘ્નુઃ સકર્ણા અપિ તસ્ય સોદરા જઘ્નુશ્ચ તે ધાર્તરાષ્ટ્રસ્ય સેનામ્ ॥ ૨૨.૩૮૪॥

મુહૂર્તમાસીત્સમમેવ યુદ્ધં તેષાં તદા ધાર્તરાષ્ટ્રસ્ય ચૈવ ।
પુરાં ભિન્દોર્વરતો માયયા ચ ગન્ધર્વવીરા વવૃધુસ્તતઃ સ્મ ॥ ૨૨.૩૮૫॥

તેજોભઙ્ગં તત્ર સુયોધનસ્ય પાર્થાર્થમત્ર પ્રવિધાતુમેવ ચ ।
બલં દદાવબ્જજઃ કેશવશ્ચ ગન્ધર્વાણાં તેઽભ્યયુર્ધાર્તરાષ્ટ્રાન્ ॥ ૨૨.૩૮૬॥

સ ચિત્રસેનઃ પ્રથમં કર્ણમેવ યુયોધ પાર્થસ્પર્ધયા તેન યુદ્ધ્યન્ ।
કર્ણો નાશક્નોદ્વચનાદ્ભાર્ગવસ્ય રામસ્ય નિત્યામિતષડ્ગુણસ્ય ॥ ૨૨.૩૮૭॥

સ ભગ્નયાનશ્ચ વિકર્ણયાનમાસ્થાય તસ્યૈવ નિયમ્ય વાજિનઃ ।
પરાદ્રવત્તેન સહૈવ શીઘ્રં દુર્યોધનશ્ચિત્રસેનં યુયોધ ॥ ૨૨.૩૮૮॥

મુહૂર્તમેનેન સમં સ યુદ્ધ્યન્નન્યૈર્ગન્ધર્વૈર્બહુભિર્માયયૈવ ।
ભગ્ને રથે ભૂમિતલ્. એ સ્થિતઃ સન્ ગૃહીત આસીચ્ચિત્રસેનેન સઙ્ખે ॥ ૨૨.૩૮૯॥

મહાબલો ધાર્તરાષ્ટ્રોઽપિ શક્રવરાદ્વિષ્ણોરાજ્ઞયા ચાભિવૃદ્ધે ।
સ ચિત્રસેનેન ધૃતસ્તદાઽસીદ્બદ્ધઃ પાશૈર્વૈધુતૈરિન્દ્રદત્તૈઃ ॥ ૨૨.૩૯૦॥

તસ્યાનુજાઃ શકુની રાજભાર્યાઃ સર્વે બદ્ધાઃ શક્રભૃત્યૈઃ પ્રણીતાઃ ।
આદાય તાનમ્બરં સમ્પ્રયાતેષ્વરૂરુવન્ પાણ્ડવાન્મન્ત્રિણોઽસ્ય ॥ ૨૨.૩૯૧॥

સમીપમાગત્ય પૃથાસુતાનાં પરિભૂતં વઃ કુલં શક્રભૃત્યૈઃ ।
ધૃતઃ સભાર્યઃ સાનુજો ધાર્તરાષ્ટ્રસ્તં મોચયધ્વં ભ્રાતરં ભારતાગ્ર્યાઃ ॥ ૨૨.૩૯૨॥

ઇત્યુક્ત ઊચે ભીમસેનોઽગ્રજં સ્વં જાને રાજન્ યાદૃશોઽયં વિમર્દઃ ।
ઐશ્વર્યં સ્વં દર્શયન્ન સમાગાદ્દુર્યોધનસ્તેજસો ભઙ્ગમિચ્છન્ ॥ ૨૨.૩૯૩॥

વિજ્ઞાય તેષાં મન્ત્રિતં વજ્રબાહુરેતચ્ચક્રે નાત્ર નઃ કાર્યહાનિઃ ।
દિવ્યં જ્ઞાનં સ્વાત્મનો દર્શયન્ સ એતાવદુક્ત્વા વિરરામ ભીમઃ ॥ ૨૨.૩૯૪॥

એકાહયજ્ઞે દીક્ષિતેનૈવ રાજ્ઞા સમ્પ્રેષિતો ભીમસેનોઽર્જુનશ્ચ ।
સમાદ્રેયો ચિત્રસેનં રણે તૌ વિજિત્ય દુર્યોધનમાશ્વમુઞ્ચતામ્ ॥ ૨૨.૩૯૫॥

ઋઋક્ષક્ષ્।સ ચિત્રસેનો વાસવોક્તં ચ સર્વં કુમન્ત્રિતં ધાર્તરાષ્ટ્રસ્ય ચાઽહ ।
પાર્થસ્ય ભીમસ્ય ચ તન્નિશમ્ય સુબ્રીલ્. ઇતો ધૃતરાષ્ટ્રાત્મજોઽભૂત્ ॥ ૨૨.૩૯૬॥

સમાપ્ય યજ્ઞં ચ તતોઽભિયાતં સર્વે પ્રાપુર્ધર્મરાજં સ ચાઽશુ ।
સમ્પૂજ્ય તૂત્સૃજ્ય ચ ચિત્રસેનમૂચે ગાન્ધારે ન પુનઃ કાર્યમીદૃક્ ॥ ૨૨.૩૯૭॥

સ પાણ્ડવૈર્મોચિતઃ સાનુજશ્ચ સભાર્યકઃ કિઞ્ચિદતોઽપગમ્ય ।
સમ્મેલ્. અનાયોપવિષ્ટશ્ચ તત્ર સુબ્રીલ્. ઇતઃ સૂતપુત્રં દદર્શ ॥ ૨૨.૩૯૮॥

સ ચાઽહ દિષ્ટ્યા જયસિ રાજન્નિતિ સુયોધનમ્ ।
બ્રીલ્। ઇતો નેતિ તં ચોક્ત્વા યથાવૃત્તં સુયોધનઃ ।
ઉક્ત્વા પ્રાયોપવેશં ચ ચક્રે તત્ર સુદુઃખિતઃ ॥ ૨૨.૩૯૯॥

કર્ણદુઃ શાસનાભ્યાં ચ સૌબલેન ચ દેવિના ।
અન્યૈશ્ચ યાચ્યમાનોઽપિ નૈવોત્તસ્થૌ સુયોધનઃ ॥ ૨૨.૪૦૦॥

તતો નિશાયાં પ્રાપ્તાયાં સ્વપક્ષે પ્રવિષીદતિ ।
મન્ત્રયિત્વાઽસુરૈઃ કૃત્યા નિર્મિતા હોમકર્મણા ॥ ૨૨.૪૦૧॥

શુક્રેણોત્પાદિતા કૃત્યા સા પ્રસુપ્તેષુ મન્ત્રિષુ ।
ધાર્તરાષ્ટ્રં સમાદાય યયૌ પાતાલ્। અમાશુ ચ ।
અથ સમ્બોધયામાસુર્દૈત્યા દુર્યોધનં નૃપમ્ ॥ ૨૨.૪૦૨॥

ત્વં દિવ્યઃ પુરુષો વીરઃ સૃષ્ટોઽસ્માભિઃ પ્રતોષિતાત્ ।
તપસા શઙ્કરાદ્વજ્રકાયોઽવધ્યશ્ચ સર્વદા ।
અસ્માકં પક્ષભૂતસ્ત્વં દેવાનાં ચૈવ પાણ્ડવાઃ ॥ ૨૨.૪૦૩॥

ઇદાનીં સર્વદેવાનાં વરાત્ત્વં વિજિતો રણે ।
વયં તથા કરિષ્યામો યથા જેષ્યસિ પાણ્ડવાન્ ॥ ૨૨.૪૦૪॥

કૃષ્ણેન નિહતશ્ચૈવ નરકઃ કર્ણ આસ્થિતઃ ।
સ ચ કૃષ્ણાર્જુનાભાવં કરિષ્યતિ ન સં શયઃ ॥ ૨૨.૪૦૫॥

ભીષ્માદીંશ્ચ વયં સર્વાનાવિશામ જયાય તે ।
તપસા વર્દ્ધયિષ્યામસ્ત્વાં કર્ણાદીંશ્ચ સર્વશઃ ॥ ૨૨.૪૦૬॥

ઋઋક્ષક્ષ।તસ્માદ્ગત્વા પાલયસ્વ રાજ્યં રાજન્નપેતભીઃ ।
ઇદં કસ્યાપિ નાઽખ્યેયં સુગુપ્તં ભૂતિવર્દ્ધનમ્ ॥ ૨૨.૪૦૭॥

ઇત્યુક્ત્વા કૃત્યયા ભૂયઃ સ્વસ્થાને સ્થાપિતો નૃપઃ ।

ઉમયા નિર્મિતાત્માર્દ્ધમુત્તરં હરનિર્મિતમ્ ।
જ્ઞાત્વૈવાવધ્યતાં ચૈવ રાજ્યે બુદ્ધિં ચકાર સઃ ॥ ૨૨.૪૦૮॥

નોવાચ કસ્યચિત્તેષુ સ્વાનુભૂતં સુયોધનઃ ।
પ્રભાતાયાં તુ શર્વર્યાં પુનઃ કર્ણો વચોઽબ્રવીત્ ॥ ૨૨.૪૦૯॥

ભૃત્યૈસ્તવૈવ પાર્થૈર્યન્મોચિતોઽસિ પરન્તપ ।
તેન માન્યોઽધિકં લોકે યદ્ભૃત્યા એવ તાદૃશાઃ ।
કિમુ ત્વં રાજશાર્દૂલ તદુત્તિષ્ઠ સ્થિરો ભવ ॥ ૨૨.૪૧૦॥

યા ચ તેઽર્જુનમાહાત્મ્યે શઙ્કા સા વ્યૈતુ મે શ◌ૃણુ ।
યાવન્નૈવાર્જુનં હન્યાં પાદૌ પ્રક્ષાલ્. અયે સ્વયમ્ ॥ ૨૨.૪૧૧॥

ઇત્યુક્તોઽવરજૈશ્ચૈવ સર્વૈઃ શકુનિના તથા ।
યાચિતો રથમારુહ્ય યયૌ નાગપુરં દ્રુતમ્ ॥ ૨૨.૪૧૨॥

સકુણ્ડલં સકવચમવધ્યં સૂર્યનન્દનમ્ ।
જ્ઞાત્વેન્દ્ર ઉભયં તસ્માદૈચ્છદાદાતુમુત્તમમ્ ॥ ૨૨.૪૧૩॥

તદ્વિજ્ઞાય રવિઃ કર્ણં સ્વપ્ન ઉક્ત્વા ન્યવારયત્ ।
સર્વથા દાસ્ય ઇત્યુક્તે પ્રાહાઽદેયં વરાયુધમ્ ॥ ૨૨.૪૧૪॥

દદૌ ચોત્કૃત્ય કવચં કુણ્ડલે ચ શચીપતેઃ ।
અમોઘાં શક્તિમાદાય જ્ઞાત્વૈવ દ્વિજરૂપિણમ્ ॥ ૨૨.૪૧૫॥

ઋતેઽર્જુનાદેકમેવ વધિષ્યસ્યનયેતિ સઃ ।
દત્વા શક્તિં યયૌ શક્રઃ સાર્દ્ધં કવચકુણ્ડલૈઃ ॥ ૨૨.૪૧૬॥

પાર્થા વિમુચ્યૈવ સુયોધનં તં વને વસન્તો મુદિતાઃ સદૈવ ।
સહારણીભાણ્ડમથો મૃગેણ હૃતં દ્વિજસ્યાઽશુ નિશમ્ય ચાન્વયુઃ ॥ ૨૨.૪૧૭॥

અ્ઋક્ષ્ક્ષી।તસ્મિન્નદૃશ્યે તૃષિતા એકૈક ઉદકાર્થિનઃ ।
યયુર્યુધિષ્ઠિરમૃતે સુપ્તાસ્તે ધર્મમાયયા ॥ ૨૨.૪૧૮॥

અદૃશ્યેનૈવ ધર્મેણ વારિતા વારિપાયિનઃ ।
ક્ષત્રધર્મસ્ય રક્ષાર્થં ન તત્પ્રશ્નાન્ વિદાં વરાઃ ।
વ્યાચક્રુઃ શક્તિમન્તોઽપિ પાનીયાર્થમરિન્દમાઃ ॥ ૨૨.૪૧૯॥

ન વિપ્રાણાં ચ ધર્મોઽયં વિદ્યાયા ઉપજીવનમ્ ।
ક્ષત્રિયાણાં તુ કિમુત પ્રસભં તેન તે પપુઃ ॥ ૨૨.૪૨૦॥

દેવા અપિ મનુષ્યેષુ જાતાઃ સુબલિનોઽપિ હિ ।
માનુષેણૈવ ભાવેન યુક્તાઃ સ્યુઃ કેશવાદૃતે ।
કાર્યેષ્વેષાં ક્રમેણૈવ વ્યક્તિમાયાન્તિ સદ્ગુણાઃ ॥ ૨૨.૪૨૧॥

અતો ભીમાર્જુનૌ ધર્માદત્યુત્તમબલાવપિ ।
દેવમાયાં સમાશ્રિત્ય ધર્મેણ સ્વાપિતૌ ક્ષણાત્ ॥ ૨૨.૪૨૨॥

મુહૂર્તમેવ સા માયા તયોરાચ્છાદનક્ષમા ।
તતઃ પ્રબુદ્ધયોર્ધર્મો નૈવ શક્તિશતાં શભાક્ ॥ ૨૨.૪૨૩॥

ઉક્તં પાદ્મપુરાણે ચ તદેતત્સર્વમઞ્જસા ।
તસ્માન્નાશક્તિરનયોઃ સમ્ભાવ્યા ભીમપાર્થયોઃ ॥ ૨૨.૪૨૪॥

ધર્માત્મજોઽથાઽજગામોદકાન્તં દૃષ્ટ્વા ભ્રાતૄં સ્તત્ર દુઃખાભિતપ્તઃ ।
ઇચ્છન્ પાતું વારિ સં વારિતશ્ચ પિત્રા બકાકારમિતેન નાપાત્ ॥ ૨૨.૪૨૫॥

અર્થે ભ્રાતૄણામૈચ્છદસૌ તદીયપ્રશ્નપ્રતિવ્યાહરણં દયાલ્। ઉઃ ।
તતો ધર્મો યક્ષતનુઃ સ ભૂત્વા પ્રશ્નાંશ્ચક્રે વ્યાકરોત્તાન્ સ પાર્થઃ ॥ ૨૨.૪૨૬॥

તતસ્તુષ્ટો વરમસ્મૈ દદૌ સ એકોત્થાનં ભ્રાતૃમધ્યે સ વવ્રે ।
યથૈકઃ સ્યાન્નકુલોઽસ્ત્વિત્યથાઽહ તુષ્ટો ધર્મઃ કથમેતત્કૃતં તે ।
અતિપ્રીતિર્ભીમસેને તવાસ્તિ બલી ચાસૌ રાજ્યહેતુસ્તવ સ્યાત્ ॥ ૨૨.૪૨૭॥

ઇત્યુક્ત ઊચે માદ્રિપુત્રં વિહાય કુન્તીપુત્રો ન મયોત્થાપનીયઃ ।
ઋક્ષ્ક્ષક્ષીઇ। સ એવમુક્તો નિતરાં પ્રીયમાણ ઉત્થાપયામાસ ચ તાન્ સમસ્તાન્ ॥ ૨૨.૪૨૮॥

યથેષ્ટરૂપપ્રાપ્તિમેષાં પુનશ્ચ સ્વકામતોનિજરૂપાપ્તિમાદાત્ ।
અજ્ઞાતવાસેઽજ્ઞાતતાં સર્વદૈવ દદૌ તેષાં પ્રીત ઇવાઽનૃશં સ્યાત્ ।
એવં ક્રીડન્ પુત્ર ઇત્યાત્મનૈવ યશોધર્માવાત્મનો વર્દ્ધયન્ સઃ ॥ ૨૨.૪૨૯॥

યુધિષ્ઠિરાત્મનસ્તસ્ય યશોધર્મવિવૃદ્ધયે ।
કૃત્વાઽરણ્યપહારાદિ પુનર્દત્વા ચ તત્સ્વયમ્ ।
દાતું વિપ્રાય તદ્ધસ્તે યયૌ ધર્મો દિવં પુનઃ ॥ ૨૨.૪૩૦॥

તતો રાજા ભીમસેનાર્જુનૌ ચ સાર્દ્ધં યમાભ્યામરણીં પ્રદાય ।
મુદા યુતાઃ કૃષ્ણયા સાર્દ્ધમેવ સન્તુષ્ટુવુઃ કૃષ્ણમનન્તમચ્યુતમ્ ॥ ૨૨.૪૩૧॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
અરણીપ્રાપ્તિર્નામ દ્વાવિંશોઽધ્યાયઃ ॥

## અથ ત્રયોવિંશોઽધ્યાયઃ ।

(અજ્ઞાતવાસસમાપ્તિઃ )

ૐ । નારાયણાનુગ્રહતો યથાવન્નિસ્તીર્ય તાન્ દ્વાદશાબ્દાન્ વને તે ।
વિસૃજ્ય ચ બ્રાહ્મણાદીન્ સધૌમ્યાનજ્ઞાતવાસાય તતો મનો દધુઃ ॥ ૨૩.૧॥

ગત્વા વિરાટસ્ય પુરીં નિધાય હેતીઃ શમ્યાં છન્નરૂપા બભૂવુઃ ।
યતિઃ સૂદઃ ષણ્ઢવેષોઽશ્વસૂતવેષો ગોપો ગન્ધકર્ત્રી ચજાતાઃ ॥ ૨૩.૨॥

સર્વે વિરાટં યયુરત્ર દેવવત્સમ્ભાવિતાસ્તેન શુભોરુલક્ષણાઃ ।
યુધિષ્ઠિરસ્યૈવ શુશ્રૂષણં તે ચક્રુર્હૃદા વાસુદેવસ્ય નાન્યત્ ॥ ૨૩.૩॥

પરપાકો ગૃહસ્થસ્ય ક્ષત્રિયસ્ય વિશેષતઃ ।
ન યોગ્ય ઇતિ સૂદસ્ય બભ્રે વેષં વૃકોદરઃ ॥ ૨૩.૪॥

વૈદિકવ્યવહારેષુ જ્ઞાનાધિક્યપ્રસિદ્ધિતઃ ।
જાનીયુર્ભીમ ઇત્યેવ શૂદ્રવેષસ્તતોઽભવત્ ॥ ૨૩.૫॥

સ્વીયં વેદવિદાં સર્વં દેવેશાનાં ચ કિં પુનઃ ।
અતસ્તેઽન્યાશ્રયં નૈવ ચક્રુઃ સ્વબલસં શ્રયાત્ ॥ ૨૩.૬॥

શાપાદેવાર્જુનઃ ષણ્ઢવેષોઽભૂન્નકુલસ્તથા ।
ક્ષત્રિયાનન્તરત્વાત્તુ સૂતજાતેસ્તથાઽભવત્ ॥ ૨૩.૭॥

સૂતસ્યાનન્તરત્વાત્તુ વૈશ્યજાતેસ્તથાઽભવત્ ।
સહદેવો વૈશ્યજાતિર્ગોપાલસ્તેષુ ચોત્તમઃ ।
તતો ગોપાલતામાપ યતિઃ પૂજ્યોઽખિલૈર્યતઃ ॥ ૨૩.૮॥

યતિરાસીદ્ધર્મજોઽતઃ સોઽભ્યાસાર્થં સદૈવ ચ ।
અક્ષાસક્તોઽભવત્પશ્ચાદ્દર્શયિષ્યન્ સ્વશિષ્ટતામ્ ॥ ૨૩.૯॥

ભીમસેનસધર્માર્થં શૂદ્રા સૈરન્ધ્રિકાઽભવત્ ।
દ્રૌપદી ભર્તૃસાધર્મ્યં સ્ત્રીણાં ધર્મો યતઃ સદા ॥ ૨૩.૧૦॥

અથાઽજગામ મલ્લકઃ સમસ્તભૂમિમણ્ડલે ।
અ્ક્ષ્ક્ક્ષ્વ્।વરેણ યોઽજિતો જયી શિવસ્ય સઞ્જગર્જ ચ ॥ ૨૩.૧૧॥

તમીક્ષ્ય સર્વમલ્લકા વિરાટરાજસં શ્રયાઃ ।
પ્રદુદ્રુવુર્ભયાર્દિતાસ્તદાઽવદદ્યુધિષ્ઠિરઃ ॥ ૨૩.૧૨॥

ય એષ સૂદ આશુ તં નિહત્ય મલ્લમોજસા ।
યશસ્તવાભિવર્દ્ધયેત્સમાહ્વયાદ્ય તં નૃપ ॥ ૨૩.૧૩॥

ઇતીરિતે સમાહુતો જગાદ મારુતિર્વચઃ ।
પ્રસાદતો હરેરહં નિસૂદયેઽદ્ય મલ્લકમ્ ॥ ૨૩.૧૪॥

સમસ્તદેવવન્દતો મહાન્ ય એવ કેશવઃ ।
સમસ્તદેવનામવાં સ્તદીયભક્તિતો બલમ્ ॥ ૨૩.૧૫॥

ય એવ દેવનામધા ઇતિ શ્રુતિર્જગાદ હિ ।
મહાંશ્ચ દેવ એષ તત્સ મે જયં વિધાસ્યતિ ॥ ૨૩.૧૬॥

યુધિષ્ઠિરાભિધશ્ચ યો યુધિષ્ઠિરે સ્થિતઃ સદા ।
ત્વયિ સ્થિતસ્ત્વમિત્યસૌ સદાઽભિધીયતે હરિઃ ॥ ૨૩.૧૭॥

ઇતિ બ્રુવાણો મલ્લં તમભિયાતો વૃકોદરઃ ।
અનયન્મૃત્યુલોકાય બલાઢ્યૈરપિ દુર્જયમ્ ॥ ૨૩.૧૮॥

એવં નિવસતાં તત્ર પાણ્ડવાનાં મહાત્મનામ્ ।
સં વત્સરે દ્વિમાસોને વિજિત્ય દિશ આગતઃ ।
કીચકો મત્સ્યનૃપતેઃ સ્યાલો બલવતાં વરઃ ॥ ૨૩.૧૯॥

સ દ્રૌપદીમીક્ષ્ય મનોભવાર્તઃ સમ્પ્રાર્થયામાસ તયા નિરસ્તઃ ।
માસે ગતે ભગિનીં સ્વાં સુદેષ્ણાં સમ્પ્રાર્થયામાસ તદર્થમેવ ॥ ૨૩.૨૦॥

તયા નિષિદ્ધોઽપિ પુનઃ પુનસ્તાં યદા યયાચેઽથ ચ સાઽહ કૃષ્ણામ્ ।
સમાનયાઽશ્વેવ સુરાં મદર્થમિતીરિતા નેતિ ભીતાઽવદત્સા ॥ ૨૩.૨૧॥

બલાત્તયા પ્રેષિતા તદ્ગૃહાય યદાઽગમત્તેન હસ્તે ગૃહીતા ।
વિધૂય તં પ્રાદ્રવત્સા સભાયૈ સ્મૃત્વાઽદિત્યસ્થં વાસુદેવં પરેશમ્ ॥ ૨૩.૨૨॥

ચ્ચિક્ષક્ષ્વઽનુદ્રુત્યૈતાં પાતયિત્વા પદા સ સન્તાડયામાસ તદા રવિસ્થિતઃ ।
નારાયણો હેતિનામૈવ રક્ષો ન્યયોજયત્તદદૃશ્યં સમાગાત્ ॥ ૨૩.૨૩॥

વાયુસ્તમાવિશ્ય તુ કીચકં તં ન્યપાતયત્તાં સમીક્ષ્યૈવ ભીમઃ ।
ચુકોપ વૃક્ષં ચ સમીક્ષમાણં તં વારયામાસ યુધિષ્ઠિરોઽગ્રજઃ ॥ ૨૩.૨૪॥

કૃષ્ણા રાત્રૌ ભીમસકાશમેત્ય હન્તું પાપં કીચકં પ્રૈરયત્તમ્ ।
ભીમસ્ય બુદ્ધ્યા નિશિ સા કીચકં ચ જગાદ ગન્તું શૂન્યગૃહં સ ચાગાત્ ॥ ૨૩.૨૫॥

તત્રૈનમાસાદ્ય તુ ભીમસેનો વિજિત્ય તં બાહુયુદ્ધે નિહત્ય ।

શિરો ગુદે પાણિપાદૌ ચ તસ્ય પ્રવેશયામાસ વિમૃદ્ય વીરઃ ॥ ૨૩.૨૬॥

અવધ્યં તં નિહતં વીક્ષ્ય તસ્ય પઞ્ચોત્તરં શતમેવાનુજાનામ્ ।
સર્વં વરાચ્છઙ્કરસ્ય હ્યવધ્યં સહૈવ કૃષ્ણાં તેન દગ્ધું બબન્ધ ॥ ૨૩.૨૭॥

સા નીયમાના કીચકૈઃ સં રુરાવ શ્રુત્વૈવ તં ભીમસેનો મહાન્તમ્ ।
ઉદ્ધૃત્ય વૃક્ષં તેન જઘાન સર્વાનાદાય કૃષ્ણાં પુનરાગાત્પુરં ચ ॥ ૨૩.૨૮॥

એવં યત્નાત્તપસા તૈરવાપ્તો વરઃ શિવાદજયત્વં રણેષુ ।
અવધ્યતા ચૈવ ષડુત્તરાસ્તે શતં હતા ભીમસેનેન સઙ્ખે ॥ ૨૩.૨૯॥

ગન્ધર્વ ઇત્યેવ નિહત્ય સર્વાન્મુમોદ ભીમો દ્રૌપદી ચાઽથ કૃષ્ણામ્ ।
યાહીત્યૂચે તાં સુદેષ્ણા ભયેન ત્રયોદશાહં પાલયેત્યાહ તાં સા ।
અસ્ત્વિત્યેનામાહ ભયાત્સુદેષ્ણા તથાઽવસન્ પૂર્ણમબ્દં ચ તેઽત્ર ॥ ૨૩.૩૦॥

તદા પાર્થાન્ પ્રવિચિન્ત્યાખિલાયાં પૃથ્વ્યાં છન્નાન્ ધાર્તરાષ્ટ્રસ્ય દૂતાઃ ।
અવિજ્ઞાય પ્રયયુર્ધાર્તરાષ્ટ્રમૂચુર્હતં કીચકં યોષિદર્થે ॥ ૨૩.૩૧॥

તેનાવદદ્દ્રૌપદીકારણેન દુર્યોધનો નિહતં કીચકં તમ્ ।
ભીમેનાગુસ્તત્ર દુર્યોધનાદ્યા ભીષ્માદિભિઃ સહ કર્ણેન ચૈવ ॥ ૨૩.૩૨॥

અગ્રે યયૌ તત્ર યોદ્ધું સુશર્મા સગા વિરાટસ્ય સમાજહાર ।
શ્રુત્વા વિરાટોઽનુયયૌ સસેનસ્તં પાણ્ડવાશ્ચાનુયયુર્વિનાઽર્જુનમ્ ॥ ૨૩.૩૩॥

ઋક્ષક્ષક્ષ્વી। વિજિત્ય સઙ્ખે જગૃહે વિરાટં તદા સુશર્મા તમયાદ્વૃકોદરઃ ।
સ તસ્ય સેનાં વિનિહત્ય માત્સ્યં વિમોચ્ય જગ્રાહ સુશર્મરાજમ્ ।
યુધિષ્ઠિરો મોચયામાસ તં ચ તતો રાત્રૌ ન્યવસન્ બાહ્યતસ્તે ॥ ૨૩.૩૪॥

તતોઽપરદિને સર્વે ભીષ્મદ્રોણપુરસ્સરાઃ ।
રહિતં કીચકૈર્માત્સ્યં શક્યં મત્વાઽભિનિર્યયુઃ ॥ ૨૩.૩૫॥

કીચકસ્ય હિડિમ્બસ્ય બકકિર્મીરયોરપિ ।
જરાસન્ધસ્ય નૃપતેઃ કં સાદીનાં ચ સર્વશઃ ॥ ૨૩.૩૬॥

ન બાધનાય ભીષ્માદ્યા અપિ શેકુઃ કથઞ્ચન ।
તસ્માત્તે કીચકં શાન્તં શ્રુત્વા માત્સ્યં યયુર્યુધે ॥ ૨૩.૩૭॥

યતિષ્યે રક્ષિતું ભીમાદ્ધાર્તરાષ્ટ્રાનિતિ સ્વકામ્ ।
સત્યાં કર્તું પ્રતિજ્ઞાં તુ યયૌ દ્રોણઃ સપુત્રકઃ ॥ ૨૩.૩૮॥

યદિ યુદ્ધાય નિર્યાન્તિ જ્ઞાતાઃ સ્યુઃ પાણ્ડવાસ્તદા ।

ન ચેદ્વિરાટમનતં નમયિષ્યામહે વયમ્ ।
ઇતિ મત્વા વિરાટસ્ય જગૃહુર્ગાઃ સમન્તતઃ ॥ ૨૩.૩૯॥

તદોત્તરઃ સારથિત્વે પ્રકલ્પ્ય પાર્થં યયૌ તાન્નિશામ્યૈવ ભીતઃ ।
તતોઽર્જુનઃ સારથિં તં વિધાય કૃચ્છ્રેણ સં સ્થાપ્ય ચ તં યયૌ કુરૂન્ ॥ ૨૩.૪૦॥

આદાય ગાણ્ડીવમથ ધ્વજં ચ હનૂમદઙ્કં સદરોઽગ્રતો ગાઃ ।
નિવર્ત્ય યુદ્ધાય યયૌ કુરૂં સ્તાન્ જિગ્યે સર્વાન્ દ્વૈરથેનૈવ સક્તાન્ ॥ ૨૩.૪૧॥

એકીભૂતાન્ પુનરેવાનુયાતાન્ સમ્મોહનાસ્ત્રેણ વિમોહયિત્વા ।
જગ્રાહ તેષામુત્તરીયાણ્યૃતે તુ ભીષ્મસ્ય વેદાસ્ત્રઘાતં સ એવ ॥ ૨૩.૪૨॥

વિધાય ભીષ્મં વિરથં જગામ તદા શ્રુત્વા મત્સ્યપતિર્જિતાન્ કુરૂન્ ।
મુમોદ પુત્રેણ જિતા ઇતિ સ્મ તદાઽહ ષણ્ઢેન જિતાન્ યુધિષ્ઠિરઃ ॥ ૨૩.૪૩॥

તદા ક્રુદ્ધઃ પ્રાહરત્તં વિરાટઃ સોઽક્ષેણ તદ્ભીમધનઞ્જયાભ્યામ્ ।
શ્રુતં તદા કુપિતૌ તૌ નિશામ્ય ન્યવારયત્તાવપિ ધર્મસૂનુઃ ॥ ૨૩.૪૪॥

ઞ્ચ્ક્ષ્ક્ષ્વીંઇજસ્વરૂપેણ સમાસ્થિતાન્નો યદિ સ્મ નાસૌ પ્રણિપાતપૂર્વકમ્ ।
ક્ષમાપયેદ્વધ્ય ઇત્યાત્મરૂપં સમાસ્થિતાસ્તસ્થુરથાપરે દિને ॥ ૨૩.૪૫॥

તદા વિરાટાસનમાસ્થિતં નૃપં યુધિષ્ઠિરં વીક્ષ્ય વિરાટ આહ ।
કિમેતદિત્યૂચિવાનુત્તરોઽસ્મૈ તાન્ પાણ્ડવાન્ ગોગ્રહણે ચવૃત્તમ્ ॥ ૨૩.૪૬॥

તતો વિરાટો ભયકમ્પિતાઙ્ગઃ પ્રણમ્ય પાર્થાઞ્છરણં જગામ ।
દદૌ ચ કન્યામુત્તરાં ફલ્ગુનાય પુત્રાર્થમેવ પ્રતિજગ્રાહ સોઽપિ ॥ ૨૩.૪૭॥

એવં વિરાટં મોચયિત્વૈવ ગાશ્ચ તમસ્યન્ધે કીચકાન્ પાતયિત્વા ।
પ્રાપ્તો ધર્મઃ સુમહાન્ વાયુજેન તસ્યાનુ પાર્થેન ચ ગોવિમોક્ષણાત્ ॥ ૨૩.૪૮॥

અયાતયન્ કેશવાયાથ દૂતાન્ સહાભિમન્યુઃ સોઽપિ રામેણ સાર્દ્ધમ્ ।
આગાદનન્તાનન્દચિદ્વાસુદેવો વિવાહયામાસુરથાભિમન્યુમ્ ॥ ૨૩.૪૯॥

આસીન્મહાનુત્સવસ્તત્ર તેષાં દશાર્હવીરૈઃ સહ પાણ્ડવાનામ્ ।
સ પાઞ્ચાલાનાં વાસુદેવેન સાર્દ્ધમજ્ઞાતવાસં સમતીત્ય મોદતામ્ ॥ ૨૩.૫૦॥

દુર્યોધનાદ્યાઃ સૂતપુત્રેણ સાર્દ્ધં સસૌબલેયા યુધિ પાર્થપીડિતાઃ ।
ભીષ્માદિભિઃ સાર્દ્ધમુપેત્ય નાગપુરં મન્ત્રં મન્ત્રયામાસુરત્ર ॥ ૨૩.૫૧॥

અજ્ઞાતવાસે ફલ્ગુનો નોઽદ્ય દૃષ્ટસ્તસ્માત્પુનર્યાન્તુ પાર્થા વનાય ।
ઇતિ બ્રુવાણાનાહ ભીષ્મોઽભ્યતીતમજ્ઞાતવાસં દ્રોણ આહૈવમેવ ॥ ૨૩.૫૨॥

તયોર્વાક્યં તે ત્વનાદૃત્ય પાપા વનં પાર્થાઃ પુનરેવ પ્રયાન્તુ ।
ઇતિ દૂતં પ્રેષયામાસુરત્ર જાનન્તિ વિપ્રા ઇતિ ધર્મજોઽવદત્ ॥ ૨૩.૫૩ ॥

સૌરમાસાનુસારેણ ધાર્તરાષ્ટ્રા અપૂર્ણતામ્ ।
આહુશ્ચાન્દ્રેણ માસેન પૂર્ણઃ કાલોઽખિલોઽપ્યસૌ ॥ ૨૩.૫૪ ॥

દિનાનામધિપઃ સૂર્યઃ પક્ષમાસાબ્દપઃ શશી ।
તસ્માત્સૌમ્યાબ્દમેવાત્ર મુખ્યમાહુર્મનીષિણઃ ।
સૌમ્યં કાલં તતો યજ્ઞે ગૃહ્ણન્તિ નતુ સૂર્યજમ્ ॥ ૨૩.૫૫ ॥

તદેતદવિચાર્યૈવ લોભાચ્ચ ધૃતરાષ્ટ્રજૈઃ ।
ઋિચ્છ્ક્ષ્ક્ષ્ક્ષ્।રાજ્યં ન દત્તં પાર્થેભ્યઃ પાર્થાઃ કાલસ્ય પૂર્ણતામ્ ।
ખ્યાપયન્તો વિપ્રવરૈરુપપ્લાવ્યમુપાયયુઃ ॥ ૨૩.૫૬ ॥

સુવાસુદેવા અખિલૈશ્ચ યાદવૈઃ પાઞ્ચાલમત્સ્યૈશ્ચ યુતાઃ સભાર્યાઃ ।
ઉપપ્લાવ્યે તે કતિચિદ્દિનાનિ વાસં ચક્રુઃ કૃષ્ણસં શિક્ષિતાર્થાઃ ॥ ૨૩.૫૭ ॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
અજ્ઞાતવાસસમાપ્તિર્નામ ત્રયોવિંશોઽધ્યાયઃ ॥

## અથ ચતુર્વિંશોઽધ્યાયઃ ।

(યુદ્ધોદ્યોગઃ )
ૐ । તતઃ સમ્મન્ત્ર્યાનુમતે કૃષ્ણસ્ય સ્વપુરોહિતમ્ ।
દ્રુપદઃ પ્રેષયામાસ ધૃતરાષ્ટ્રાય શાન્તયે ॥ ૨૪.૧ ॥

સ ગત્વા ધૃતરાષ્ટ્રં તં ભીષ્મદ્રોણાદિભિર્યુતમ્ ।
ઉવાચ ન વિરોધસ્ત ઉત્પાદ્યો ધર્મસૂનુના ।
યસ્ય ભીમાર્જુનૌ યૌધૌ નેતા યસ્ય જનાર્દનઃ ॥ ૨૪.૨ ॥

શ્રુતાસ્તે ભીમનિહતા જરાસન્ધાદયોઽખિલાઃ ।
યથા ચ રુદ્રવચનાદવધ્યા રાક્ષસાધિપાઃ ॥ ૨૪.૩ ॥

તીર્થવિઘ્નકરાઃ સર્વતીર્થાન્યાચ્છાદ્ય સં સ્થિતાઃ ।
તિસ્રઃ કોટ્યો મહાવીર્યા ભીમેનૈવ નિસૂદિતાઃ ॥ ૨૪.૪ ॥

ભ્રાતૃણાં બ્રાહ્મણાનાં ચ લોકાનાં ચ હિતૈષિણા ।

તતો હિ સર્વતીર્થાનિ ગમ્યાન્યાસન્નૃણાં ક્ષિતૌ ॥ ૨૪.૫॥

યથા જટાસુરઃ પાપઃ શર્વાણીવરસં શ્રયાત્ ।
અવધ્યો વિપ્રરૂપેણ વઞ્ચયન્નેવ પાણ્ડવાન્ ॥ ૨૪.૬॥

જ્ઞાત્વાઽપિ ભીમસેનેન વિપ્રરૂપસ્ય નો વધઃ ।
યોગ્ય ઇત્યહતો ભીમે મૃગયાર્થં ગતે ક્વચિત્ ॥ ૨૪.૭॥

યમૌ યુધિષ્ઠિરં કૃષ્ણાં ચાઽદાયૈવ પરાદ્રવત્ ।
દૃષ્ટો ભીમેન તાં સ્ત્યક્ત્વા સં સક્તસ્તેન સઙ્ગરે ॥ ૨૪.૮॥

નિપાત્ય ભૂમૌ પાદેન સઞ્ચૂર્ણિતશિરાસ્તમઃ ।
જગામ કિમુ તે પુત્રાઃ શક્યા હન્તુમિતિ સ્મ હ ॥ ૨૪.૯॥

નિવાતકવચાશ્ચૈવ હતાઃ પાર્થેન તે શ્રુતાઃ ।
જાનાસિ ચ હરેર્વીર્યં યસ્યેદમખિલં વશે ।
સબ્રહ્મરુદ્રશક્રાદ્યં ચેતનાચેતનાત્મકમ્ ॥ ૨૪.૧૦॥

ઃ્ઝ્લ્ઝ્ઝ્ઝ્ઝ્॥ તસ્માદેતૈઃ પાલિતસ્ય ધર્મજસ્ય સ્વકં વસુ ।
દીયતામિતિ તેનોક્તો ધૃતરાષ્ટ્રો નચાકરોત્ ॥ ૨૪.૧૧॥

તતઃ સહૈવ યદુભિઃ કૃષ્ણં દ્વારવતીં ગતમ્ ।
યુદ્ધસાહાય્યમિચ્છન્તૌ ધાર્તરાષ્ટ્રધનઞ્જયૌ ॥ ૨૪.૧૨॥

યુગપદ્યયતુસ્તત્ર વેગેનાજયદર્જુનમ્ ।
દુર્યોધનઃ શિરસ્થાન આસીનોઽભૂદ્ધરેસ્તદા ॥ ૨૪.૧૩॥

દર્પાન્નાહં રાજરાજ ઉપાસ્યે પાદયોરિતિ ।
તયોરાગમનં પૂર્વં જ્ઞાત્વૈવ હિ હરિઃ પ્રભુઃ ॥ ૨૪.૧૪॥

અસુપ્તઃ સુપ્તવચ્છિશ્યે તત્રાતિષ્ઠદ્ધનઞ્જયઃ ।
પ્રણમ્ય પાદયોઃ પ્રહ્વો ભક્ત્યુદ્રેકાત્કૃતાઞ્જલિઃ ॥ ૨૪.૧૫॥

તમૈક્ષત્પ્રથમં દેવો જાનન્નપિ સુયોધનમ્ ।
સ્વાગતં ફલ્ગુનેત્યુક્તે પૂર્વમાગામહં ત્વિતિ ।
આહ દુર્યોધનસ્તં ચ સ્વાગતેનાભ્યપૂજયત્ ॥ ૨૪.૧૬॥

તયોરાગમને હેતું શ્રુત્વા પ્રાહ જનાર્દનઃ ।
એકઃ પૂર્વાગતોઽત્રાન્યઃ પૂર્વદૃષ્ટો મયા યતઃ ॥ ૨૪.૧૭॥

સમં કરિષ્યે યુવયોરેકત્રાહં નિરાયુધઃ ।

અન્યત્ર દશલક્ષં મે પુત્રાઃ શૂરાઃ પદાતયઃ ॥ ૨૪.૧૮॥

ઇત્યુક્તે ફલ્ગુનઃ કૃષ્ણં વવ્રે તદ્ભક્તિમાન્ યતઃ ।
અન્યસ્તત્રાભક્તિમત્ત્વાદ્વવ્રે ગોપાન્ પ્રયુદ્ધ્યતઃ ॥ ૨૪.૧૯॥

પાર્થાનામેવ સાહાય્યં કરિષ્યન્નપિ કેશવઃ ।
તસ્યાભક્તિં દર્શયિતું ચક્રે સમવદીશ્વરઃ ॥ ૨૪.૨૦॥

તતઃ પાર્થેન સહિતઃ પાણ્ડવાન્ કેશવો યયૌ ।
દુર્યોધનો યયૌ રામં સ ભયાત્કેશવસ્ય ચ ।
ન સાહાય્યં કરોમીતિ પ્રાહ તત્સ્નેહવાનપિ ॥ ૨૪.૨૧॥

ઞ્ક્ષ્લી। ઉપપ્લાવ્યે સભાયાં હિ તત્પક્ષીયં વચો બ્રુવન્ ।
નિરાકૃતઃ સાત્યકિના સમક્ષં કેશવસ્ય ચ ॥ ૨૪.૨૨॥

તતો દુર્યોધનં નાયાત્સ ચ હાર્દિક્યસં યુતઃ ।
જગામ હસ્તિનપુરમક્ષોહિણ્યો દશાભવન્ ।
એકા ચ ધાર્તરાષ્ટ્રસ્ય નાનાદેશ્યૈર્નૃપૈર્યુતાઃ ॥ ૨૪.૨૩॥

સપ્ત પાણ્ડુસુતાનાં ચ માત્સ્યદ્રુપદકેકયૈઃ ।
ધૃષ્ટકેતુજરાસન્ધસુતકાશીનૃપૈર્યુતાઃ ॥ ૨૪.૨૪॥

પુરુજિત્કુન્તિભોજશ્ચ ચેકિતાનશ્ચ સાત્યકિઃ ।
પાણ્ડવાન્ સેનયા યુક્તાઃ સમીયુર્દેવપક્ષિણઃ ॥ ૨૪.૨૫॥

વિન્દાનુવિન્દાવાવન્ત્યૌ જયત્સેનોઽન્યકેકયાઃ ।
ક્ષેમધૂર્તિર્દણ્ડધારઃ કલિઙ્ગોઽમ્બષ્ઠ એવ ચ ॥ ૨૪.૨૬॥

શ્રુતાયુરચ્યુતાયુશ્ચ બૃહદ્બલસુદક્ષિણૌ ।
શ્રુતાયુધઃ સૈન્ધવશ્ચ રાક્ષસોઽલમ્બુસસ્તથા ॥ ૨૪.૨૭॥

અલાયુધોઽલમ્બલશ્ચ દૈત્યા દુર્યોધનં યયુઃ ।
ગત્વા દુર્યોધનાહૂતો ભગદત્તોઽપિ તં યયૌ ॥ ૨૪.૨૮॥

સપુત્રપૌત્રો બાહ્લીકો ભીષ્મદ્રોણકૃપા અપિ ।
પ્રીત્યર્થં ધૃતરાષ્ટ્રસ્ય બભૂવુસ્તત્સુતાનુગાઃ ॥ ૨૪.૨૯॥

પાણ્ડ્યશ્ચ વીરસેનાખ્યઃ પાણ્ડવાનેવ સં શ્રિતઃ ।
શલ્યં ચ પાણ્ડવાનેવ યાન્તં જ્ઞાત્વા સુયોધનઃ ।
સુસભાઃ કારયામાસ સર્વભોગસમન્વિતાઃ ॥ ૨૪.૩૦॥

તા યુધિષ્ઠિરક્લૃપ્તાઃ સ મત્વા શલ્યોઽબ્રવીદિદમ્ ।
ય એતાઃ કારયામાસ તદભીષ્ટં કરોમ્યહમ્ ॥ ૨૪.૩૧॥

લીનઃ શ્રુત્વા ધાર્તરાષ્ટ્રઃ સત્યં કુર્વિત્યભાષત ।
દેહિ મે યુદ્ધસાહાય્યમિતિ સોઽપિ યશોઽર્થયન્ ।
રક્ષાર્થમાત્મવાક્યસ્ય તથેત્યેવાભ્યભાષત ॥ ૨૪.૩૨॥

અક્ષ્લીઇ।સ પાણ્ડવાં સ્તતો ગત્વા તૈરનુજ્ઞાત એવ ચ ।
તેજોવધાર્થં કર્ણસ્ય ધનઞ્જયકૃતેઽર્થિતઃ ।
તથેત્યુક્ત્વા યયૌ ધર્મનન્દનં કૌરવાન્ પ્રતિ ॥ ૨૪.૩૩॥

સઞ્જયં પ્રેષયામાસ ધૃતરાષ્ટ્રોઽથ શાન્તયે ।
પાણ્ડવાન્ પ્રત્યધર્મં ચ યુદ્ધં સ પ્રત્યપાદયત્ ॥ ૨૪.૩૪॥

હઠવાદેઽવદદ્ભીમો યં ધર્મં દ્રૌપદી તથા ।
તમેવોક્ત્વા ધર્મજસ્તુ ચકાર ચ નિરુત્તરમ્ ।
કૃષ્ણોઽપિ તસ્ય ધર્મસ્ય પ્રામાણ્યં પ્રત્યપાદયત્ ॥ ૨૪.૩૫॥

તતો નિરુત્તરઃ કૃષ્ણં પાણ્ડવાંશ્ચ પ્રણમ્ય સઃ ।
ધૃતરાષ્ટ્રં યયૌ તં ચ વિનિન્દ્ય પ્રયયૌ ગૃહમ્ ॥ ૨૪.૩૬॥

નિન્દિતઃ સઞ્જયેનાસાવાહૂય વિદુરં નિશિ ।
પપ્રચ્છ સોઽવદદ્ધર્મં પાર્થાનાં રાજ્યદાપનમ્ ॥ ૨૪.૩૭॥

ઐહિકસ્ય સુખસ્યાપિ કારણં તદનિન્દિતમ્ ।
અન્યથા સર્વપુત્રાણાં નાશં ધર્માતિલઙ્ઘનમ્ ॥ ૨૪.૩૮॥

તત્ર ભાવમકૃત્વા સ જ્ઞાનાદિચ્છન્નઘક્ષયમ્ ।
વિષ્ણોઃ સ્વરૂપં પપ્રચ્છ સોઽસ્મરચ્ચ સનાતનમ્ ॥ ૨૪.૩૯॥

સ આગત્યાવદત્તત્ત્વં વિષ્ણોર્માયાવિનઃ શુભા ।
ન ગતિશ્ચેત્યથ પ્રાતઃ સઞ્જયઃ પાણ્ડવોદિતમ્ ।
અવદદ્ધૃતરાષ્ટ્રાય સભાયાં કુરુસન્નિધૌ ॥ ૨૪.૪૦॥

તચ્છ્રુત્વા સતુભીતોઽપિ પુત્રસ્નેહાનુગો નૃપઃ ।
રાજ્યં નાદાત્પાણ્ડવાનાં તતો ધર્મસુતો નૃપઃ ॥ ૨૪.૪૧॥

યદુક્તવાન્ સઞ્જયાય યદિ દિત્સતિઃ નઃ પિતા ।
રાજ્યં તદા ત્વમાગચ્છ વિદુરો વા ન ચેન્નચ ।

તાવથાનાગતૌ જ્ઞાત્વા મન્ત્રયામાસ શૌરિણા ॥ ૨૪.૪૨॥

ઋિચ્છલવ્। સોઽપ્યાહાહં ગમિષ્યામિ સભાયામૃષિસન્નિધૌ ।
વક્ષ્યે પથ્યાનિ યુક્તાનિ યદિ નાસૌ ગ્રહીષ્યતિ ।
વધ્યઃ સર્વસ્ય લોકસ્ય સ ભવેત્સર્વધર્મહા ॥ ૨૪.૪૩॥

ઇત્યુક્તે વૈરમાત્મોત્થં લોકમધ્યે પ્રહાપયન્ ।
લોકસઙ્ગ્રહણાર્થાય ભીમસેનોઽબ્રવીદ્વચઃ ॥ ૨૪.૪૪॥

નાસ્મન્નિમિત્તનાશઃ સ્યાત્કુલસ્યાપિ વયં કુલમ્ ।
રક્ષિતું ધાર્તરાષ્ટ્રસ્ય ભવેમાધશ્ચરા ઇતિ ॥ ૨૪.૪૫॥

ઇચ્છતાઽપ્યખિલાન્ હન્તું ધાર્તરાષ્ટ્રાન્ દૃઢાત્મના ।
ભીમેનોક્તો વાસુદેવો લોકસઙ્ગ્રહણેચ્છયા ॥ ૨૪.૪૬॥

વધં તેષાં ધર્મમેવ લોકે જ્ઞાપયિતું હરિઃ ।
આક્ષિપન્નિવ ભીમં તં યુદ્ધાય પ્રેરયદ્દૃઢમ્ ॥ ૨૪.૪૭॥

અભિપ્રાયં કેશવસ્ય જાનન્ ભીમો નિજં બલમ્ ।
રાજ્ઞાં મધ્યેઽવદત્તચ્ચ કૃષ્ણોઽભ્યધિકમેવ હિ ॥ ૨૪.૪૮॥

શશં સ સત્યૈઃ સદ્વાક્યૈ રાજ્ઞાં મધ્યે પ્રકાશયન્ ।
વધં કુરૂણાં સદ્ધર્મં ગુણાન્ ભીમસ્ય ચામિતાન્ ॥ ૨૪.૪૯॥

નિત્યમેકમનસ્કૌ તાવપિ કેશવમારુતી ।
એવં લોકસ્ય સં વાદહેતોઃ સં વાદમક્રતામ્ ॥ ૨૪.૫૦॥

તતઃ કૃષ્ણોઽર્જુનં ચૈવ કૃપાલું સન્ધિકામુકમ્ ।
હેતુમદ્ભિઃ શુભૈર્વાક્યૈરનુનીય જગત્પતિઃ ।
ઉક્તો માનુષયા બુદ્ધ્યા નકુલેન સુનીતિવત્ ॥ ૨૪.૫૧॥

શૌર્યપ્રકાશનાયૈવ યુદ્ધં યોજયતાં ભવાન્ ।
ઇત્યુક્તઃ સહદેવેન યુયુધાનેન ચાચ્યુતઃ ॥ ૨૪.૫૨॥

દસ્યૂનાં નિગ્રહો ધર્મઃ ક્ષત્રિયાણાં યતઃ પરઃ ।
અતો ન ધાર્તરાષ્ટ્રૈર્નઃ સન્ધિઃ સ્યાદિતિ પાર્ષતી ।
જગાદ કૃષ્ણં સોઽપ્યેનાં ઓમિત્યુક્ત્વા વિનિર્યયૌ ॥ ૨૪.૫૩॥

ઋચ્છલ્વ્। સસાત્યકિઃ સ્યન્દનવર્યસં સ્થિતઃ પૃથાતનૂજૈરખિલૈઃ સ ભૂમિપૈઃ ।
અન્વાગતો દૂરતરં ગિરા તાન્ સં સ્થાપ્ય વિપ્રપ્રવરૈઃ કુરૂન્ યયૌ ॥ ૨૪.૫૪॥

એકોઽપિ વિષ્ણુઃ સ તુ ભાર્ગવાત્મા વ્યાસઃ સશિષ્યસ્તદનન્યદૃશ્યઃ ।
યયૌ તદુક્તેર્હિ ગુણાન્ પ્રવેત્તું નાન્યો હિ શક્તસ્તમૃતે યતઃ પ્રભુમ્ ॥ ૨૪.૫૫॥

સ વન્દ્યમાનોઽખિલરાષ્ટ્રવાસિભિઃ પ્રસૂનવર્ષૈરભિવર્ષિતઃ સુરૈઃ ।
સં સ્તૂયમાનઃ પ્રણતોઽબ્જજાદિભિર્ગજાહ્વયં પ્રાપ પરોઽપ્રમેયઃ ॥ ૨૪.૫૬॥

સ ભીષ્મમુખ્યૈઃ સરસાભિયાતઃ સહૈવ તૈઃ પ્રયયૌ રાજમાર્ગે ।
દિદૃક્ષવસ્તં જગદેકસુન્દરં ગુણાર્ણવં પ્રાયયુરત્ર સર્વે ॥ ૨૪.૫૭॥

સભાજિતસ્તૈઃ પરમાદરેણ વિવેશ ગેહં નૃપતેરનન્તઃ ।
સ ભીષ્મમુખ્યાન્ પુરતો નિધાય વૈચિત્રવીર્યેણ સમર્ચિતોઽજઃ ।
રૌગ્મે નિષણ્ણઃ પરમાસને પ્રભુર્બભૌ સ્વભાસા કકુભોઽવભાસયન્ ॥ ૨૪.૫૮॥

યથોચિતં તેષુ વિધાય કેશવો દૌર્યોધનં પ્રાપ્ય ગૃહં ચ પૂજિતઃ ।
પૂજાં તદીયાં ગુણવદ્વિડિત્યસૌ જગ્રાહ નો વિદુરં ચાઽજગામ ॥ ૨૪.૫૯॥

સ ભીષ્મપૂર્વૈરભિયાચિતોઽપિ જગામ નૈષાં ગૃહમાદિદેવઃ ।
ઉપેક્ષિતા દ્રૌપદીયપ્રમેયો જગામ ગેહં વિદુરસ્ય શીઘ્રમ્ ॥ ૨૪.૬૦॥

સ તેન ભક્ત્યાઽભિગતઃ પ્રસન્નઃ પ્રવિશ્ય ચાન્તર્ગૃહમીશ્વરોઽજઃ ।
ભક્ત્યાઽભિપૂર્ણેન સસમ્ભ્રમેણ સમ્પૂજિતઃ સર્વસમર્પણેન ॥ ૨૪.૬૧॥

પરે દિનેઽસૌ ધૃતરાષ્ટ્રસૂનુના સમાનીતઃ સં સદિ કૌરવાણામ્ ।
વિવેશ દિવ્યે મણિકાઞ્ચનાસને સાર્દ્ધં મુનીન્દ્રૈઃ પરમાર્થવેદિભિઃ ॥ ૨૪.૬૨॥

સમ્પૂજિતો ભીષ્મમુખ્યૈઃ સમસ્તૈ રરાજ રાજીવસમાનનેત્રઃ ।
યથોચિતાસ્તત્ર વિધાય વાર્તા જગાદ કાલે કલિકલ્મષાપહઃ ॥ ૨૪.૬૩॥

વૈચિત્રવીર્ય સ્વકુલસ્ય વૃદ્ધ્યૈ પ્રદેહિ રાજ્યં તવ સત્સુતાય ।
યશશ્ચ ધર્મં પરમં પ્રસાદં મમ ત્વમાપ્નોષિ તદૈવ રાજન્ ।
અતોઽન્યથા યશસો ધર્મતશ્ચ હીનઃ પ્રતીપત્વમુપૈષિ મેઽતઃ ॥ ૨૪.૬૪॥

ઞ્ચ્અક્ષ્લ્વ। ઇતીરિતઃ પ્રાહ મમાતિવર્તિનઃ સુતં સ્વયં મે પ્રતિબોધયેતિ ।
સ વાસુદેવેન વિબોધિતોઽપિ પાપાભિસન્ધિર્ધૃતરાષ્ટ્રસૂનુઃ ।
ઉત્થાય તસ્માદનુજૈરમાત્યૈર્નિયન્તુમીશં કુમતિર્વ્યધાન્મતિમ્ ॥ ૨૪.૬૫॥

યેયે તદા કેશવસં યમાય ન્યમન્ત્રયં સ્તે વિબુધપ્રતીપાઃ ।
અતો વિકર્ણપ્રમુખા અપિ સ્મ વધ્યત્વમાયન્નશુભાં ગતિં ચ ॥ ૨૪.૬૬॥

કર્ણઃ સુરાગ્ર્યોઽપિ સુયોધનાર્થે ન્યમન્ત્રયદ્ભાવતો નૈવ દુષ્ટઃ ।

અતો ગતિશ્ચાસ્ય સુશોભનાઽભૂદ્યેઽત્રાનુકૂલાઃ પરમસ્ય તે શુભાઃ ॥ ૨૪.૬૭॥

ઋષિભિર્જામદગ્ન્યેન વ્યાસેનાપ્યમિતૌજસા ।
વાસુદેવાત્મના ચૈવ ત્રિરૂપેણૈવ વિષ્ણુના ॥ ૨૪.૬૮॥

માતાપિતૃભ્યાં ભીષ્માદ્યૈરનુશિષ્ટોઽપિ દુર્મતિઃ ।
દુર્યોધનો મન્ત્રયતે મુકુન્દસ્યાઽશુ બન્ધનમ્ ॥ ૨૪.૬૯॥

સાત્યકિઃ કૃતવર્મા ચ તચ્છુશ્રુવતુરઞ્જસા ।
સં સ્થાપ્ય કૃતવર્માણં રહઃ સાત્યકિરત્ર ચ ।
અભ્યેત્ય કેશવં પ્રાહ દુર્યોધનવિનિશ્ચયમ્ ॥ ૨૪.૭૦॥

જાનન્નપ્યખિલં કૃષ્ણસ્તચ્છ્રુત્વા સાત્યકેર્મુખાત્ ।
વૈચિત્રવીર્યમવદત્પશ્ય મામિતિ સર્વગમ્ ॥ ૨૪.૭૧॥

અથ તેનાઽહુતે પુત્રે સામાત્યે પુરુષોત્તમઃ ।
સ્વં રૂપં દર્શયામાસ સર્વગં પૂર્ણસદ્ગુણમ્ ॥ ૨૪.૭૨॥

તત્કાલસૂર્યામિતદીપ્તિ સર્વજગદ્ભરં શાશ્વતમપ્રમેયમ્ ।
દૃષ્ટ્વૈવ ચક્ષૂં ષિ સુયોધનાદ્યા ન્યમીલયન્ દીધિતિવારિતાનિ ॥ ૨૪.૭૩॥

પિધાય રૂપં પુનરેવ તદ્ધરિર્વૈચિત્રવીર્યેણ સમર્થિતઃ પુનઃ ।
કૃત્વાઽન્ધમેવ પ્રયયૌ સુયોધનં સહાનુગં પાપતમં પ્રકાશ્ય ॥ ૨૪.૭૪॥

અનન્તશક્તિઃ પુરુષોત્તમોઽસૌ શક્તોઽપિ દુર્યોધનચિત્તનિગ્રહે ।
નૈવ વ્યધાદેનમથોક્તકારિણં નિપાતયન્નન્ધતમસ્યનન્તઃ ॥ ૨૪.૭૫॥

અ્ક્ષ્લ્વી।પુનશ્ચ કુન્તીગૃહમેત્ય કૃષ્ણસ્તયોર્દ્યોગં ધર્મસુતસ્ય શિષ્ટમ્ ।
શ્રુત્વા યયૌ સૂર્યજમાત્મયાને નિધાય તસ્યાવદદાત્મજન્મ ॥ ૨૪.૭૬॥

આયાહિ પાણ્ડૂનિતિ તદ્વચઃ સ નૈવાકરોન્માનિતો ધાર્તરાષ્ટ્રૈઃ ।
સં સ્થાપ્ય તં ભગવાન્ દ્રૌણયે ચ રહોઽવદન્મિત્રભાવં પૃથાજૈઃ ॥ ૨૪.૭૭॥

યાવત્પિતુર્મરણં સોઽપિ મૈત્રીં વવ્રે પાર્થૈસ્તં ચ વિસૃજ્ય કૃષ્ણઃ ।
યયૌ કુરૂન્ પૂર્વમેવોદ્વિસૃજ્ય પૃથાસુતાનાં સ સકાશમીશઃ ॥ ૨૪.૭૮॥

સમ્પ્રાર્થિતઃ પૃથયા ચૈવ કર્ણઃ પાર્થૈર્યોગં યાહિ સૂનુર્મમાસિ ।
તેનાપ્યુક્તા વાસવિના વિનાઽહં હન્યાં સુતાં સ્તે ન કથઞ્ચનેતિ ॥ ૨૪.૭૯॥

તતો યયુઃ કૌરવાઃ પાણ્ડવાશ્ચ કુરુક્ષેત્રં યોદ્ધુકામાઃ સકૃષ્ણાઃ ।
ચક્રુશ્ચ તે શિબિરાણ્યત્ર સર્વે શુભે દેશે પાણ્ડવાઃ કૃષ્ણબુદ્ધ્યા ॥ ૨૪.૮૦॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
યુદ્ધોદ્યોગો નામ ચતુર્વિંશોઽધ્યાયઃ ॥

## અથ પઞ્ચવિંશોઽધ્યાયઃ ।

(ભીષ્મપાતઃ )
ૐ । તે સેને સમરારમ્ભે સમેતે સાગરોપમે ।
ભીમભીષ્મમુખે વીક્ષ્ય પ્રાહ વાસવિરચ્યુતમ્ ॥ ૨૫.૧॥

“સેનયોરુભયોર્મધ્યે રથં સ્થાપય મેઽચ્યુત” (૭૭) ।
ઇત્યુક્તઃ સ તથા ચક્રે પાર્થઃ પશ્યંશ્ચ બાન્ધવાન્ ।
વિસસર્જ ધનુઃ પાપાશઙ્કી તત્રાઽહ માધવઃ ॥ ૨૫.૨॥

સ્વધર્મો દુષ્ટદમનં ધર્મજ્ઞાનાનુપાલનમ્ ।
ક્ષત્રિયસ્ય તમુત્સૃજ્ય નિન્દિતો યાત્યધો ધ્રુવમ્ ॥ ૨૫.૩॥

“યતઃ પ્રવૃત્તિર્ભૂતાનાં યેન સર્વમિદં તતમ્ ।
સ્વકર્મણા તમભ્યર્ચ્ય સિદ્ધિં વિન્દતિ માનવઃ” (૭૮) ॥ ૨૫.૪॥

નચ શોકસ્ત્વયા કાર્યો બન્ધૂનાં નિધનેક્ષયા ।
દેહસ્ય સર્વથા નાશાદનાશાચ્ચેતનસ્ય ચ ॥ ૨૫.૫॥

સૃષ્ટિસ્થિત્યપ્યયાજ્ઞાનબન્ધમોક્ષપ્રવૃત્તયઃ ।
પ્રકાશનિયમૌ ચૈવ બ્રહ્મેશાદિક્ષરસ્ય ચ ।
અક્ષરપ્રકૃતેઃ સન્તો મત્ત એવ નચાન્યતઃ ॥ ૨૫.૬॥

ન મે કુતશ્ચિત્સર્ગાદ્યાઃ સ્વાતન્ત્ર્યાદ્ગુણપૂર્તિતઃ ।
અતઃ સમાધિકાભાવાન્મમ મદ્વશમેવ ચ ॥ ૨૫.૭॥

જ્ઞાત્વૈષાં નિધનાદ્યં ચ જીવાદેરસ્વતન્ત્રતામ્ ।
અસ્વાતન્ત્ર્યાન્નિવૃત્તૌ ચ મામનુસ્મર યુદ્ધ્ય ચ ॥ ૨૫.૮॥

“યે તુ સર્વાણિ કર્માણિ મયિ સં ન્યસ્ય મત્પરાઃ ।
અનન્યેનૈવ યોગેન માં ધ્યાયન્ત ઉપાસતે ॥ ૨૫.૯॥

તેષામહં સમુદ્ધર્તા મૃત્યુસં સારસાગરાત્ ।
(૭૭) ભગવદ્ગીતા ૧.૨૧

(૭૮) ભગવદ્ગીતા ૧૮.૪૬

ઋ્ક્ષ્લક્ષ્। ભવામિ નચિરાત્પાર્થ મય્યાવેશિતચેતસામ્” (૭૯) ॥ ૨૫.૧૦॥

“મયા તતમિદં સર્વં જગદવ્યક્તમૂર્તિના ।
મત્સ્થાનિ સર્વભૂતાનિ નચાહં તેષ્વવસ્થિતઃ” (૮૦) ॥ ૨૫.૧૧॥

સુપૂર્ણસત્સર્વગુણદેહોઽહં સર્વદા પ્રભુઃ ।
અસ્પૃષ્ટાખિલદોષૈકનિત્યસત્તનુરવ્યયઃ ।
ઇત્યુક્તો વાસવિઃ પ્રાહ વ્યાપ્તં તે દર્શયેશ મે ॥ ૨૫.૧૨॥

અથ દિવ્યદૃશં તસ્ય દત્વા વ્યાપ્તં નિજં વપુઃ ।
દેશતઃ કાલતશ્ચૈવ પૂર્ણં સર્વગુણૈઃ સદા ।
દર્શયામાસ ભગવાન્ યાવત્યર્જુનયોગ્યતા ॥ ૨૫.૧૩॥

તત્પ્રાર્થિતઃ પુનઃ કૃષ્ણસ્તદ્રૂપં લોકમાનતઃ ।
પૂર્વવદ્દર્શયામાસ પુનશ્ચૈનમશિક્ષયત્ ॥ ૨૫.૧૪॥

જ્ઞાનજ્ઞેયપ્રકૃત્યાદિ જ્ઞાપયન્ પુરુષોત્તમઃ ।
તેનાનુશિષ્ટઃ પાર્થસ્તુ સશરં ધનુરાદદે ॥ ૨૫.૧૫॥

અથ વ્યૂઢેષ્વનીકેષુ નદન્ વાયુસુતોઽભ્યયાત્ ।
સમિતિં ધાર્તરાષ્ટ્રાણાં તે તં સર્વેઽભ્યવારયન્ ।
સસૃજુઃ શરવૃષ્ટિં ચ ભીમસેનસ્ય મૂર્દ્ધનિ ॥ ૨૫.૧૬॥

ક્ષિપ્રં નૈવ પ્રહર્તવ્યં જ્ઞાતિષુ પ્રહરત્સ્વપિ ।
ઇત્યેવાપ્રહરત્યસ્મિન્ શત્રુભિઃ શરવિક્ષતે ॥ ૨૫.૧૭॥

અમુચન્ ધાર્તરાષ્ટ્રેષુ શસ્ત્રવૃષ્ટિં દુરાસદામ્ ।
સૌભદ્રપ્રમુખા વીરાઃ સર્વે પાણ્ડુસુતાત્મજાઃ ॥ ૨૫.૧૮॥

અપીડયં સ્તાઞ્છસ્ત્રૌઘૈર્ધાર્તરાષ્ટ્રાઃ સમન્તતઃ ।
રરક્ષ તાન્ વાયુસુતો વિસૃજઞ્છરસઞ્ચયાન્ ॥ ૨૫.૧૯॥

તત્ર ભીમશરૈર્નુન્ના ધાર્તરાષ્ટ્રાઃ સમન્તતઃ ।

(૭૯) ભગવદ્ગીતા ૧૨.૬૭

(૮૦) ભગવદ્ગીતા ૯.૪

ઋ્લ્। ભગ્નાસ્તાનથ ગાઙ્ગેયો દિવ્યાસ્ત્રવિદધારયત્ ॥ ૨૫.૨૦॥

અથ દ્વન્દ્વાનિ યુદ્ધાનિ બભૂવુર્વિજિગીષતામ્ ।

દ્રોણપાર્ષતયોશ્ચૈવ શૈનેયકૃતવર્મણોઃ ॥ ૨૫.૨૧॥

દુઃ શાસનેન વીરસ્ય માદ્રેયસ્ય યવીયસઃ ।
નકુલસ્ય વિકર્ણસ્ય કાર્ષ્ણેયૈર્દુર્મુખાદિનામ્ ॥ ૨૫.૨૨॥

વૃત્તે દ્વન્દ્વમહાયુદ્ધે તત્ર ધર્મજપક્ષગાઃ ।
જિતા વિનૈવ શૈનેયં સોઽજયદ્ધૃદિકાત્મજમ્ ॥ ૨૫.૨૩॥

અથ ભીષ્મદ્રોણમુખૈર્ભગદત્તાદિભિસ્તથા ।
વિદ્રાપ્યમાણં સ્વબલં સ્થાપયામાસ મારુતિઃ ॥ ૨૫.૨૪॥

દ્રોણં ચ ભગદત્તં ચ કૃપં દુર્યોધનં તથા ।
કેવલં બાહુવીર્યેણ વ્યજયદ્ભીમવિક્રમઃ ।
હત્વોત્તરં મદ્રરાજો વ્યદ્રાવયદનીકિનીમ્ ॥ ૨૫.૨૫॥

અથ ભીષ્મમુદીર્ણાસ્ત્રં દ્રાવયન્તં વરૂથિનીમ્ ।
સસૌમદત્તિં સૌભદ્રસહાયોઽર્જુન આસદત્ ॥ ૨૫.૨૬॥

સૌભદ્રં તત્ર વિક્રાન્તમતીત્ય દ્યુસરિત્સુતઃ ।
દ્રાવયામાસ પાઞ્ચાલાન્ પશ્યતઃ સવ્યસાચિનઃ ॥ ૨૫.૨૭॥

તસ્ય વિક્રમમાલક્ષ્ય પાર્થં તદ્ગૌરવાનુગમ્ ।
દૃષ્ટ્વા યુધિષ્ઠિરો રાજા ક્રુદ્ધઃ સેનામપાહરત્ ॥ ૨૫.૨૮॥

રાત્રૌ યુધિષ્ઠિરશ્ચિન્તામાપ્ય પાર્થં વ્યગર્હયત્ ।
સ કૃષ્ણાદ્યૈઃ સાન્ત્વિતશ્ચ પુનર્યુદ્ધાય નિર્યયૌ ॥ ૨૫.૨૯॥

એવં ભીષ્મો દશાહાનિ સેનાપત્યં ચકાર હ ।
કૃત્વાઽપિ પાણ્ડવૈર્યુદ્ધં તત્કર્તુમકૃતોપમમ્ ॥ ૨૫.૩૦॥

કર્ણોઽર્દ્ધરથ ઇત્યુક્ત્વા તાવદ્યુદ્ધાત્પ્રયાપિતઃ ।
યાવત્ત્વં યોત્સ્યસે તાવન્ન યોત્સ્યામીતિ નિર્ગતે ॥ ૨૫.૩૧॥

ચ્ચ્ચ્લ। કર્ણેઽયુતરથાનાં સ નિત્યશો વધમાહવે ।
પ્રતિજજ્ઞેઽકરોત્તચ્ચ પુનશ્ચાસ્ત્રવિદાં વરઃ ॥ ૨૫.૩૨॥

સુસમર્થાવપિ વધે તસ્ય ભીમધનઞ્જયૌ ।
સ્નેહેન યન્ત્રિતૌ તસ્ય ગૌરવાચ્ચાન્વવર્તતામ્ ॥ ૨૫.૩૩॥

બભૂવુસ્તત્ર યુદ્ધાનિ ચિત્રાણિ સુબહૂનિ ચ ।
તાન્યમ્બરે વિમાનસ્થા બ્રહ્મરુદ્રપુરસ્સરાઃ ।

અપશ્યન્ દેવતાઃ સર્વા ગન્ધર્વાપ્સરસોઽસુરાઃ ॥ ૨૫.૩૪॥

ધૃષ્ટદ્યુમ્નો મહેષ્વાસઃ પ્રતિવ્યૂહ્યાઽપગાસુતમ્ ।
ચક્રે યુદ્ધાનિ સુબહૂન્યજેયઃ શત્રુભી રણે ॥ ૨૫.૩૫॥

તત્રોદ્ધાર કૃષ્ણોઽપિ ફલ્ગુનં મૃદુયોધિનમ્ ।
દૃષ્ટ્વા ચક્રં તથોદ્યમ્ય બાહું ભીષ્માય જગ્મિવાન્ ॥ ૨૫.૩૬॥

તેન સ્તુતો ગૃહીતશ્ચ ફલ્ગુનેન પ્રણમ્ય ચ ।
પ્રાર્થિતો રથમારૂઢઃ પુનઃ શઙ્ખમપૂરયત્ ॥ ૨૫.૩૭॥

તતો ભીષ્મોઽર્જુનશ્ચૈવ શસ્ત્રાસ્ત્રૈરભ્યવર્ષતામ્ ।
અયત્નેન જિતશ્ચૈવ ફલ્ગુનેનાઽપગાસુતઃ ॥ ૨૫.૩૮॥

અયુતાનિ બહૂન્યાજૌ રથાનાં નિજઘાન ચ ।
જિતાઃ સેનાપહારં ચ ચક્રુર્ભીષ્મમુખાસ્તતઃ ॥ ૨૫.૩૯॥

કદાચિદગ્રગો ભીમો ભીષ્મદ્રોણૌ વિસારથી ।
કૃત્વા વિદ્રાપ્ય તાનશ્વાન્ ભિત્વા વ્યૂહં વિવેશ હ ॥ ૨૫.૪૦॥

પુનઃ સં સ્થાપિતરથૌ વિજિત્યાયત્નતો બલી ।
યતમાનૌ મહેષ્વાસૌ ધાર્તરાષ્ટ્રાન્ જઘાન હ ।
પઞ્ચવિં શદ્ધતાસ્તત્ર ધાર્તરાષ્ટ્રા મહાબલાઃ ॥ ૨૫.૪૧॥

ભગદત્તદ્રૌણિકૃપશલ્યદુર્યોધનાદયઃ ।
સર્વે જિતા દ્રાવિતાશ્ચ સેના ચ બહુલા હતા ॥ ૨૫.૪૨॥

અઞ્લી। વિરથો વ્યાયુધશ્ચૈવ દૃઢવેધવિમૂર્ચ્છિતઃ ।
કૃતો દુર્યોધનઃ સર્વરાજ્ઞાં ભીમેન પશ્યતામ્ ॥ ૨૫.૪૩॥

તતોઽપહારં સૈન્યસ્ય જિતાશ્ચક્રુશ્ચ કૌરવાઃ ।
દુર્યોધનો નિશાયાં ચ યયૌ યત્ર નદીસુતઃ ।
પીડિતો ભીમબાણૈશ્ચ ક્ષરદ્ગાત્રો નનામ તમ્ ॥ ૨૫.૪૪॥

ઉવાચ હેતુના કેન વયં ક્ષીયામ સર્વદા ।
પાણ્ડવાશ્ચ જયં નિત્યં લબ્ધ્વા હર્ષમવાપ્નુવન્ ॥ ૨૫.૪૫॥

તમાહ ભીષ્મસ્તેઽજેયા દેવાસ્તે ધરણીં ગતાઃ ।
વિશેષતઃ કેશવેન પાલિતાસ્તત્પ્રિયાઃ સદા ॥ ૨૫.૪૬॥

માનસોત્તરશૈલે હિ પુરા બ્રહ્મપુરસ્સરાઃ ।

સ્થિતા દેવાસ્તદાઽપશ્યદ્બ્રહ્મૈકો હરિમમ્બરે ॥ ૨૫.૪૭॥

સ્તુત્વા સમ્પૂજ્ય ભૂમેઃ સ ભારાવતરણાય તમ્ ।
પ્રાર્થયામાસ તેનોક્તં દેવાનામવદદ્વિભુઃ ॥ ૨૫.૪૮॥

અયં નારાયણો દેવઃ પુર્ણાનન્તગુણાર્ણવઃ ।
આજ્ઞાપયતિ વઃ સર્વાન્ પ્રાદુર્ભાવાય ભૂતલ્। એ ।
સ્વયં ચ દેવકીપુત્રો ભવિષ્યતિ જગત્પતિઃ ॥ ૨૫.૪૯॥

એવં તેન સમાદિષ્ટા ધર્મવાય્વાદયોઽખિલાઃ ।
અભવન્ પાણ્ડવાદ્યાસ્તે સેન્દ્રાઃ સહમરુદ્ગણાઃ ॥ ૨૫.૫૦॥

સ ચ નારાયણો દેવો દેવકીનન્દનોઽભવત્ ।
તેનૈતે પાલિતાઃ પાર્થા અજેયા દેવસર્ગિણઃ ।
તસ્માત્તૈઃ સન્ધિમન્વિચ્છ યદીચ્છસ્યપરાભવમ્ ॥ ૨૫.૫૧॥

ઇત્યુક્તો ડમ્ભબુદ્ધ્યૈવ નત્વા વિષ્ણું તતો યયૌ ।
પ્રાતર્નિર્યાતયામાસ સેનાં યુદ્ધાય દુર્મતિઃ ॥ ૨૫.૫૨॥

દિવ્યૌષધેન ભીષ્મસ્ય ભૂત્વા ચ નિરુજસ્તતઃ ।
ઋલીઇ।ભીષ્મમગ્રે નિધાયૈવ યયૌ યુદ્ધાય દં સિતઃ ॥ ૨૫.૫૩॥

તત્રાઽસીદ્યુદ્ધમતુલં ભીમભીષ્માનુયાયિનામ્ ।
પાણ્ડવાનાં કુરૂણાં ચ શૂરાણામનિવર્તિનામ્ ॥ ૨૫.૫૪॥

ધૃષ્ટદ્યુમ્નસ્તત્ર ભીમાનુયાયી દુર્યોધનસ્યાવરજૈઃ પ્રયુદ્ધ્યન્ ।
સમ્મોહનાસ્ત્રેણ વિમોહયિત્વા વિકર્ણપૂર્વાનહનચ્ચ સેનામ્ ॥ ૨૫.૫૫॥

તતો દ્રોણસ્તાન્ સમુત્થાપ્ય સર્વાન્ વિજ્ઞાનાસ્ત્રેણાઽસદત્પાર્ષતં ચ ।
તં ભીમસેનઃ સૂતહીનં વિધાય વ્યદ્રાવયચ્છત્રુગણાઞ્છરૌઘૈઃ ॥ ૨૫.૫૬॥

અથાઽસદત્કૃતવર્મા રથેન ધૃષ્ટદ્યુમ્નં સોઽભ્યયાત્તાવુભૌ ચ ।
વવર્ષતુઃ શરવર્ષૈરથોગ્રૈસ્તત્રાકરોદ્વિરથં દ્રૌપદિસ્તમ્ ॥ ૨૫.૫૭॥

તસ્મિન્ જિતે રથવીરે સ્વયં તં દુર્યોધનઃ પાર્ષતમાસસાદ ।
તં ભીમસેનો વિરથાયુધં ચ કૃત્વા બાણેનાહનજ્જત્રુદેશે ॥ ૨૫.૫૮॥

વિમૂર્ચ્છિતં તં રુધિરૌઘમુચ્ચૈર્વમન્તમાશુ સ્વરથે નિધાય ।
કૃપો યયૌ મારુતિર્ધાર્તરાષ્ટ્રીં વ્યદ્રાવયત્પૃતનાં બાણપૂગૈઃ ॥ ૨૫.૫૯॥

અથેન્દ્રસૂનુઃ કેશવપ્રેરિતેન રથેન શત્રૂન્ વિધમઞ્છરૌઘૈઃ ।

રથાન્ રણે પઞ્ચવિં શત્સહસ્રાન્નિનાય વૈવસ્વતસાદનાય ॥ ૨૫.૬૦ ॥

તમન્વયાદ્યુયુધાનઃ સુધન્વા વિદ્રાવયન્ ધાર્તરાષ્ટ્રસ્ય સેનામ્ ।
તમભ્યયાત્સૌમદત્તિસ્તયોશ્ચ સુયુદ્ધમાસીદતિભૈરવાસ્ત્રમ્ ॥ ૨૫.૬૧ ॥

પુત્રાન્ દશાસ્યાઽશુ નિહત્ય વીરઃ સ સાત્યકેઃ સૌમદત્તિઃ સકાશે ।
સમર્પયામાસ શરીરદારણૈઃ શરૈરુભૌ તૌ વિરથૌ ચ ચક્રતુઃ ॥ ૨૫.૬૨ ॥

અથાસિપાણિં યુયુધાનમાશુ મહાસિહસ્તેન ચ સૌમદત્તિના ।
આસાદિતં વીક્ષ્ય રથં સ્વકીયમારોપયામાસ સુતોઽનિલસ્ય ॥ ૨૫.૬૩ ॥

સુયોધનઃ સૌમદત્તિં સ્વકીયરથે વ્યવસ્થાપ્ય ચ ભીમસેનાત્ ।
અપાદ્રવદ્ભાસવિર્ભીષ્મમાજૌ સમાસસાદાઽશુ મહેન્દ્રકલ્પઃ ॥ ૨૫.૬૪ ॥

ઞ્ચ્લ્વ્। ઉભૌ ચ તાવસ્ત્રવિદાં પ્રબર્હૌ શરૈર્મહાશીવિષસન્નિકાશૈઃ ।
તતક્ષતુર્નાકસદાં સમક્ષં મહાબલૌ સં યતિ જાતદર્પૌ ॥ ૨૫.૬૫ ॥

સ્વબાહુવીર્યેણ જિતઃ સ ભીષ્મઃ કિરીટિના લોકમહારથેન ।
સેનામપાહૃત્ય યયૌ નિશાયામાસાદિતાયામથ પાણ્ડવાશ્ચ ॥ ૨૫.૬૬ ॥

તતઃ પરેદ્યુઃ પુનરેવ ભીમભીષ્મૌ પુરસ્કૃત્ય સમીયતુસ્તે ।
સેને તદા સારથિહીનમાશુ ભીષ્મં કૃત્વા મારુતિરભ્યગાત્પરાન્ ।
નિપાતિતાસ્તેન રથેભવાજિનઃ પ્રદુદ્રુવુશ્ચાવશિષ્ટાઃ સમસ્તાઃ ॥ ૨૫.૬૭ ॥

દુર્યોધનાદ્યેષુ પરાજિતેષુ ભીષ્મદ્રોણદ્રૌણિપુરસ્સરેષુ ।
મહાગજસ્થો ભગદત્ત આગાદાયન્ બાણં ભીમસેનેઽમુચચ્ચ ॥ ૨૫.૬૮ ॥

તેનાતિવિદ્ધે ભીમસેનેઽસ્ય પુત્ર ઉદ્યચ્છમાનં પિતરં નિવાર્ય ।
ઘટોત્કચોઽભ્યદ્રવદાશુ વીરઃ સ્વમાયયા હસ્તિચતુષ્ટયસ્થઃ ॥ ૨૫.૬૯ ॥

સ વૈષ્ણવાસ્ત્રં ભગદત્તસં સ્થં વિજ્ઞાય વિષ્ણોર્વરતો વિશેષતઃ ।
અમોઘમન્યત્ર હરેર્મરુત્સુતઃ પુત્રે યાતે ન સ્વયમભ્યધાવત્ ॥ ૨૫.૭૦ ॥

અનુગ્રહાદભ્યધિકાદવધ્યં જાનન્નપિ સ્વં વાસુદેવસ્ય નિત્યમ્ ।
તદ્ભક્તિવૈશેષ્યત એવ તસ્ય સત્યં વાક્યં કર્તુમરિં નયાયાત્ ।
યદા સ્વપુત્રેણ જિતો ભવેત્સ કિમ્વાત્મનેત્યેવ તદા પ્રવેત્તુમ્ ॥ ૨૫.૭૧ ॥

સ વિસ્મૃતાસ્ત્રસ્તુ યદા ભવેત્તદા ભીમો ભગદત્તં પ્રયાતિ ।
ઋતે ભીમં વાઽર્જુનં નાસ્ત્રમેષ પ્રમુઞ્ચતીત્યેવ હિ વેદ ભીમઃ ॥ ૨૫.૭૨ ॥

ચતુર્ગજાત્મોપરિગાત્મકશ્ચ ઘટોત્કચઃ સુપ્રતીકં ચ તં ચ ।

નાનાપ્રહારૈર્વિતુદંશ્ચકાર સન્દિગ્ધજીવૌ જગતાં સમક્ષમ્ ॥ ૨૫.૭૩॥

ગજાર્તનાદં તુ નિશમ્ય ભીષ્મમુખાઃ સમાપેતુરમું ચ દૃષ્ટ્વા ।
મહાકાયં ભીમમમુષ્ય પૃષ્ઠગોપં ચ વાય્વાત્મજમત્રસન્ ભૃશમ્ ।
તે ભીતભીતાઃ પૃતનાપહારં કૃત્વાઽપજગ્મુઃ શિબિરાય શીઘ્રમ્ ॥ ૨૫.૭૪॥

દિને પરે ચૈવ પુનઃ સમેતાઃ પરસ્પરં પાણ્ડવકૌરવાસ્તે ।
તત્રાઽસદન્નાગસુતાસમુદ્ભવઃ પાર્થાત્મજઃ શાકુનેયાન્ ષલ્. એકઃ ॥ ૨૫.૭૫॥

અ્અલ્વ્।તૈઃ પ્રાસહસ્તૈઃ ક્ષતકાયોઽતિરૂઢકોપઃ સ ખડ્ગેન ચકર્ત તેષામ્ ।
શિરાં સિ વીરો બલવાનિરાવાન્ ભયં દધદ્ધાર્તરાષ્ટ્રેષુ ચોગ્રમ્ ॥ ૨૫.૭૬॥

દૃષ્ટ્વા તમુગ્રં ધૃતરાષ્ટ્રપુત્રો દિદેશ રક્ષોઽલમ્બુસનામધેયમ્ ।
જહ્યાર્જુનિં ક્ષિપ્રમિતિ સ્મ તચ્ચ સમાસદન્નાગસુતાતનૂજમ્ ॥ ૨૫.૭૭॥

તયોરભૂદ્યુદ્ધમતીવ દારુણં માયાયુજોર્વીર્યવતોર્મહાદ્ભુતમ્ ।
સસાદિનોઽશ્વાન્ સ તુ રાક્ષસોઽસૃજત્તે પાર્થપુત્રસ્ય ચ સાદિનોઽહનન્ ।
તતસ્ત્વનન્તાકૃતિમાપ્તમાર્જુનિં સુપર્ણરૂપોઽહનદાશુ રાક્ષસઃ ॥ ૨૫.૭૮॥

હતં નિશમ્યાઽર્જુનિમુગ્રપૌરુષો નનાદ કોપેન વૃકોદરાત્મજઃ ।
ચચાલ ભૂર્નાનદતોઽસ્ય રાવતઃ સસાગરાગેન્દ્રનગા ભૃશં તદા ॥ ૨૫.૭૯॥

અલમ્બુસસ્તં પ્રસમીક્ષ્ય મારુતેઃ સુતં બલાઢ્યં ભયતઃ પરાદ્રવત્ ।
પરાદ્રવન્ ધાર્તરાષ્ટ્રસ્ય સેનાઃ સર્વાસ્તમારાથ સુયોધનો નૃપઃ ॥ ૨૫.૮૦॥

સ ભીમપુત્રસ્ય જઘાન મન્ત્રિણો મહાબલાંશ્ચતુરોઽન્યાં સ્તથૈવ ।
હતાવશેષેષુ ચ વિદ્રવત્સુ ઘટોત્કચોઽભ્યાહનદાશુ તં નૃપમ્ ॥ ૨૫.૮૧॥

સ પીડ્યમાનો યુધિ તેન રક્ષસા પ્રવેશયામાસ શરં ઘટોત્કચે ।
દૃઢાહતસ્તેન તદા વલીયસા ઘટોત્કચઃ પ્રવ્યથિતેન્દ્રિયો ભૃશમ્ ।
તસ્થૌ કથઞ્ચિદ્ભુવિ પાત્યમાનઃ પુનઃ શરાનપ્યસૃજત્સુયોધને ॥ ૨૫.૮૨॥

ચિરપ્રયુદ્ધૌ નૃપરાક્ષસાધિપૌ પરસ્પરાજેયતમૌ રણાજિરે ।
દ્રોણાદયો વીક્ષ્ય રિરક્ષિષન્તઃ સુયોધનં પ્રાપુરમિત્રસાહાઃ ॥ ૨૫.૮૩॥

સ દ્રોણશલ્યૌ ગુરુપુત્રગૌતમૌ ભૂરિશ્રવઃ કૃતવર્માદિકાંશ્ચ ।
વવર્ષ બાણૈર્ગગનં સમાશ્રિતો ઘટોત્કચઃ સ્થૂલતમૈ સુવેગૈઃ ॥ ૨૫.૮૪॥

તમેકગ્ર્યૈ રથિભિઃ પરિષ્કૃતં નિરીક્ષ્ય ભીમોઽભ્યગમત્સમસ્તાન્ ।
દ્રોણોઽત્ર ભીમપ્રહિતૈઃ શરોત્તમૈઃ સુપીડિતઃ પ્રાપ્તમૂર્ચ્છઃ પપાત ॥ ૨૫.૮૫॥

દ્રૌણિં કૃપાદ્યાન્ સસુયોધનાંશ્ચ ચકાર ભીમો વિરથાન્ ક્ષણેન ।
નિવાર્યમાણાં સ્તુ વૃકોદરેણ ઘટોત્કચસ્તાન્ પ્રવવર્ષ સાયકૈઃ ॥ ૨૫.૮૬॥

ચ્છિલ્વ। તેનામ્બરસ્થેન તરુપ્રમાણૈરભ્યર્દિતાઃ કુરવઃ સાયકૌઘૈઃ ।
ભૂમૌ ચ ભીમેન શરૌઘપીડિતાઃ પેતુર્નેદુઃ પ્રાદ્રવંશ્ચાતિભીતાઃ ॥ ૨૫.૮૭॥

સર્વાંશ્ચ તાઞ્છિબિરં પ્રાપયિત્વા વિના ભીષ્મં કૌરવાન્ ભીમસેનઃ ।
ઘટોત્કચશ્ચાનદતાં મહાસ્વનૌ નાદેન લોકાનભિપૂરયન્તૌ ॥ ૨૫.૮૮॥

દુર્યોધનોઽથ સ્વજનૈઃ સમેતઃ પુનઃ પ્રાયાદ્રણભૂમિં સ ભીષ્મમ્ ।
જયોપાયં ભૈમસેનેરપૃચ્છત્સ્વસ્યૈવ સ પ્રાહ ન તં વ્રજેતિ ॥ ૨૫.૮૯॥

પ્રાગ્જ્યોતિષં ચૈવ ઘટોત્કચાય સમ્પ્રેષયામાસ સુરાપગાસુતઃ ।
સ પ્રાપ્ય હૈડિમ્બમયોધયદ્બલી સચાર્દયામાસ સકુઞ્જરં તમ્ ॥ ૨૫.૯૦॥

તેનાર્દિતઃ પ્રાહિણોચ્છૂલમસ્મૈ વિયત્યભિપ્લુત્ય તદા ઘટોત્કચઃ ।
પ્રગૃહ્ય શૂલં પ્રબભઞ્જ જાનુમારોપ્ય દેવા જહૃષુસ્તદીક્ષ્ય ॥ ૨૫.૯૧॥

તદા સ તસ્યૈવ પદાનુગાન્નૃપો જઘાન તં મારુતિરભ્યયાદ્રણે ।
સ પ્રાહિણોદ્ભીમસેનાય વીરો ગજં તમસ્તમ્ભયદાશુ સાયકૈઃ ॥ ૨૫.૯૨॥

સં સ્તમ્ભિતે બાણવરૈસ્તુ નાગે ભીમસ્યાશ્વાન્ સાયકૈરાર્દયત્સઃ ।
સોઽભ્યર્દિતાશ્વોઽથ ગદાં પ્રગૃહ્ય હન્તું નૃપં તં સગજં સમાસદત્ ॥ ૨૫.૯૩॥

સ હન્તુકામેન રુષાઽભિપન્નો ભીમેન રાજા પુરતઃ પૃષ્ઠતશ્ચ ।
કૃષ્ણેનાસ્ત્રં વૈષ્ણવં તદ્ગૃહીતું સહાર્જુનેનાપયયૌ સુભીતઃ ॥ ૨૫.૯૪॥

તસ્મિન્ ગતે ભીમસેનાર્જુનાભ્યાં વિદ્રાવિતે રાજસઙ્ઘે સમસ્તે ।
ભીષ્મઃ સેનામપહૃત્યાપયાતો દુર્યોધનસ્તં નિશિ ચોપજગ્મિવાન્ ॥ ૨૫.૯૫॥

સં શ્રાવિતઃ ક્રૂરવચઃ સ તેન ચક્રે સત્યં મૃત્યુભયં વિહાય ।
શક્ત્યા હનિષ્યામિ પરાનિતિ સ્મ ચક્રે ચ તત્કર્મ તથા પરેદ્યુઃ ॥ ૨૫.૯૬॥

તં શક્તિતો જુગુપુર્ધાર્તરાષ્ટ્રાસ્તેનાર્દિતાશ્ચેદિપાઞ્ચાલમત્સ્યાઃ ।
પરાદ્રવન્ ભીષ્મબાણોરુભીતાઃ સિં હાર્દિતાઃ ક્ષુદ્રમૃગા ઇવાઽર્તાઃ ॥ ૨૫.૯૭॥

સં સ્થાપ્ય તાન્ ભીષ્મમભિપ્રયાન્તમલમ્બુસોઽવારયત્પાર્થસૂનુમ્ ।
અચ્લ્વી। વિજિત્ય તં કેશવભાગિનેયો યયૌ ભીષ્મં ધાર્તરાષ્ટ્રોઽમુમાર ॥ ૨૫.૯૮॥

તદ્યુદ્ધમાસીન્નૃપપાર્થપુત્રયોર્વિચિત્રમત્યદ્ભુતમુગ્રરૂપમ્ ।
સમં ચિરં તત્ર ધનુશ્ચકર્ત ધ્વજં ચ રાજા સહસાઽભિમન્યોઃ ॥ ૨૫.૯૯॥

અથૈનમુગ્રૈશ્ચ શરૈર્વવર્ષ સૂતં ચ તસ્યાઽશુ જઘાન વીરઃ ।
તદાઽસદદ્ભીમસેનો નૃપં તં જઘાન ચાશ્વાન્ ધૃતરાષ્ટ્રજસ્ય ॥ ૨૫.૧૦૦॥

દ્રોણો દ્રૌણિર્ભગદત્તઃ કૃપશ્ચ સચિત્રસેના અભ્યયુર્ભીમસેનમ્ ।
સર્વાંશ્ચ તાન્ વિમુખીકૃત્ય ભીમઃ સ ચિત્રસેનાય ગદાં સમાદદે ॥ ૨૫.૧૦૧॥

તામુદ્યતાં વીક્ષ્ય પરાદ્રવં સ્તે સ ચિત્રસેનશ્ચ રથાદવપ્લુતઃ ।
સઞ્ચૂર્ણિતો ગદયા તદ્રથશ્ચ તજ્જીવનેનોધ્દૃષિતાશ્ચ કૌરવાઃ ॥ ૨૫.૧૦૨॥

ભીષ્મસ્તુ પાઞ્ચાલકરૂશચેદિષ્વહન્ સહસ્રાણિ ચતુર્દશોગ્રઃ ।
રથપ્રબર્હાનતિતિગ્મતેજા વિદ્રાવયામાસ પરાનવીનિવ ॥ ૨૫.૧૦૩॥

વિદ્રાપ્ય સર્વામપિ પાણ્ડુસેનાં વિશ્રાવ્ય લોકેષુ ચ કીર્તિમાત્મનઃ ।
સેનાં સમાહૃત્ય યયૌ નિશાગમે સમ્પૂજ્યમાનો ધૃતરાષ્ટ્રપુત્રૈઃ ॥ ૨૫.૧૦૪॥

દ્રોણો વિરાટસ્ય પુરો નિહત્ય શઙ્ખં સુતં તસ્ય વિજિત્ય તં ચ ।
વિદ્રાપ્ય સેનામપિ પાણ્ડવાનાં યયૌ નદીજેન સહૈવ હૃષ્ટઃ ॥ ૨૫.૧૦૫॥

ભીમાર્જુનાવપિ શત્રૂન્નિહત્ય વિદ્રાપ્ય સર્વાંશ્ચ યુધિ પ્રવીરાન્ ।
યુધિષ્ઠિરેણાપહૃતે સ્વસૈન્યે ભીતેન ભીષ્માચ્છિબિરં પ્રજગ્મતુઃ ॥ ૨૫.૧૦૬॥

યુધિષ્ઠિરો ભીષ્મપરાક્રમેણ ભીતો ભીષ્મં સ્વવધોપાયમેવ ।
પ્રષ્ટું યયૌ નિશિ કૃષ્ણોઽનુજાશ્ચ તસ્યાન્વયુસ્તં સ પિતામહો યત્ ॥ ૨૫.૧૦૭॥

ભીમાર્જુનૌ શક્નુવન્તાવપિ સ્મ નર્તેઽનુજ્ઞાં હન્તુમિમં તદૈચ્છતામ્ ।
પૂજ્યો યતો ભીષ્મ ઉદારકર્મા કૃષ્ણોઽપ્યયાત્તેન હિ પાણ્ડવાર્થે ॥ ૨૫.૧૦૮॥

પ્રાપ્યાનુજ્ઞાં ભીષ્મતસ્તે વધાય શિખણ્ડિનં તદ્વચસાઽગ્રયાયિનમ્ ।
કૃત્વા પરેદ્યુર્યુધયે વિનિર્ગતા ભિષ્મં પુરસ્કૃત્ય તથા પરેઽપિ ॥ ૨૫.૧૦૯॥

અઅલ્વીઇ। શિખણ્ડિનો રક્ષકઃ ફલ્ગુનોઽભૂદ્ભીષ્મસ્ય દુઃ શાસન આસ ચાગ્રે ।
અન્યે ચ સર્વે જુગુપુર્ભીષ્મમેવ ન્યવારયન્ ભીમસેનાદયસ્તાન્ ॥ ૨૫.૧૧૦॥

ભીષ્માય યાન્તં યુયુધાનમાજૌ ન્યવારયદ્રાક્ષસોઽલમ્બુસોઽથ ।
તં વજ્રકલ્પૈરતુદદ્વૃષ્ણિવીરઃ શરૈઃ સ માયામસૃજત્તદોગ્રામ્ ॥ ૨૫.૧૧૧॥

અસ્ત્રેણ માયામપનુદ્ય વીરો વ્યદ્રાવયદ્રાક્ષસં સાત્યકિસ્તમ્ ।
તસ્મિન્ ગતે યુયુધાનો રથેન યયૌ ભીષ્મં પાર્થમન્વેવ ધન્વી ॥ ૨૫.૧૧૨॥

દ્રોણો દ્રૌણિર્ધાર્તરાષ્ટ્રશ્ચ રાજા ભૂરિશ્રવા ભગદત્તઃ કૃપશ્ચ ।

શલ્યો બાહ્લીકઃ કૃતવર્મા સુશર્મા સર્વાશ્ચ સેના વારિતા વાયુજેન ॥ ૨૫.૧૧૩॥

સ તાન્મુહુર્વિરથીકૃત્ય વીરઃ પ્રાગ્જ્યોતિષં સગજં દ્રાવયિત્વા ।
ન્યવારયત્ફલ્ગુનં રોદ્ધુકામં પાર્થશ્ચ દેવવ્રતમાસસાદ ॥ ૨૫.૧૧૪॥

યુધિષ્ઠિરં ભીષ્મમભિપ્રયાન્તં માદ્રીસુતાભ્યાં સહિતં નૃવીરમ્ ।
ન્યવારયચ્છકુનિઃ સાદિનાં ચ યુતોઽયુતેનૈવ વરાશ્વગેન ॥ ૨૫.૧૧૫॥

તાન્ સાદિનોઽશ્વાંશ્ચ નિહત્ય સર્વાન્ વિજિત્ય તં શકુનિં પાણ્ડવાસ્તે ।
પ્રાપુર્ભીષ્મં દ્રૌપદેયાશ્ચ સર્વે તથા વિરાટદ્રુપદૌ કુન્તિભોજઃ ॥ ૨૫.૧૧૬॥

ધૃષ્ટદ્યુમ્નં ભીષ્મમભિપ્રયાન્તં ન્યવારયત્સૈન્ધવસ્તં સ બાણૈઃ ।
હતાશ્વસૂતં સગણં દ્રાવયિત્વા સમાસદદ્ભીષ્મમેવાઽશુ વીરઃ ॥ ૨૫.૧૧૭॥

ગુપ્તોઽથ પાર્થેન રણે શિખણ્ડી ભીષ્મં સમાસાદ્ય શરૈરતાડયત્ ।
ભીષ્મઃ સ્ત્રીત્વં તસ્ય જાનન્ન તસ્મૈ મુમોચ બાણાન્ સ તુ તં તુતોદ ॥ ૨૫.૧૧૮॥

શિખણ્ડિનં વારયામાસ બાણૈર્દુર્મર્ષણોઽમર્ષણવિહ્વલેક્ષણઃ ।
નાત્યેતુમેનમશકચ્છિખણ્ડી દુઃ શાસનઃ પાર્થમવારયત્તદા ॥ ૨૫.૧૧૯॥

સ લોકવીરોઽપિ દુરાત્મનાઽમુના રુદ્ધોઽશકન્નૈનમતીત્ય યાતુમ્ ।
ભીષ્મં પાર્થઃ સાયકાશ્ચાસ્ય તસ્મિન્ સસજ્જિરે પર્વતેષ્વપ્યસક્તાઃ ॥ ૨૫.૧૨૦॥

અમર્ષયુક્તૌ ચિરમેવ વીરાવયુદ્ધ્યતામર્જુનધાર્તરાષ્ટ્રૌ ।
સમં તદાસીન્મહદદ્ભુતં ચ દિવૌકસાં પશ્યતાં ભૂભૃતાં ચ ॥ ૨૫.૧૨૧॥

ચ્ચિલક્ષ્ં।તદા વિરાટદ્રુપદૌ કુન્તિભોજં કૃષ્ણાસુતાન્ કેકયાંશ્ચેકિતાનમ્ ।
ભૂરિઃ શલઃ સોમદત્તો વિકર્ણઃ સકેકયા વારયામાસુરુચ્ચૈઃ ॥ ૨૫.૧૨૨॥

જિત્વૈવ તાં સ્તેઽભિયયુશ્ચ ભીષ્મં તતોઽર્જુનોઽતીત્ય દુઃ શાસનં ચ ।
ભીષ્મં શરૈરાચ્છદરિપ્રમાથિભિઃ શિખણ્ડિનં ધાર્તરાષ્ટ્રાદ્વિમુચ્ય ॥ ૨૫.૧૨૩॥

સ તૈઃ સમસ્તૈર્બહુશસ્ત્રપૂગૈર્ભૃશં મર્મસ્વર્દિતશ્ચાપમુક્તૈઃ ।
શરૈઃ સમસ્તાન્ વિરથાંશ્ચકાર શૈનેયપાઞ્ચાલ્યયુધિષ્ઠિરાદ્યાન્ ॥ ૨૫.૧૨૪॥

સ ચેદિપાઞ્ચાલકરૂશમુખ્યાન્ રથોત્તમાન્ પઞ્ચવિં શત્સહસ્રાન્ ।
સમ્પ્રેષયામાસ યમાય બાણૈર્યુગાન્તકાલેઽગ્નિરિવ પ્રવૃદ્ધઃ ॥ ૨૫.૧૨૫॥

નિરીક્ષ્ય તં સૂર્યમિવાઽતપન્તં સઞ્ચોદિતો વાસુદેવેન પાર્થઃ ।
ચિચ્છેદ તત્કાર્મુકં લોકવીરો રણેઽર્દ્ધચન્દ્રેણ સચાન્યદાદદે ॥ ૨૫.૧૨૬॥

ચિચ્છેદ તચ્ચૈવમષ્ટૌ ધનૂંષિ શક્તિં ચ ચર્માસિવરં પરાણિ ચ ।
ધનૂંષિ દત્તાનિ નૃભિર્નૃપસ્ય સર્વાણિ ચિચ્છેદ સ પાકશાસનિઃ ॥ ૨૫.૧૨૭॥

તતઃ શરૈઃ સૂર્યકરપ્રકાશૈર્વિવ્યાધ સર્વે ચ યુધિષ્ઠિરાદ્યાઃ ।
તૈરર્દિતો ન્યપતદ્ભૂતેલ્. એ સપ્રાણાન્ દધારાપિ તથોત્તરાયણાત્ ॥ ૨૫.૧૨૮॥

નિપાતિતેઽસ્મિન્મારુતિદ્રોણમુખ્યાન્ વિદ્રાપ્ય તત્રાઽગમદાશુ તેઽપિ ।
તદાયુધાનિ પ્રણિધાય વીરાઃ પાર્થાઃ પરે ચૈનમુપાસદન્ સ્મ ॥ ૨૫.૧૨૯॥

પ્રણમ્યતં તદ્વચનાત્સમીયુસ્તસ્મિન્ દિને શિબિરાણ્યેવ સર્વે ।
પરે દિને સર્વ એવોપતસ્થુર્ભીષ્મં યદૂનામ્પતિના સહૈવ ॥ ૨૫.૧૩૦॥

સ પૂર્વદિવસે પાર્થદત્તબાણોપબર્હણઃ ।
તદાઽપિ તૃટ્પરીતાત્મા યોગ્યં પેયમયાચત ॥ ૨૫.૧૩૧॥

ધાર્તરાષ્ટ્રૈરવિજ્ઞાતં તદભિજ્ઞાય વાસવિઃ ।
વારુણાસ્ત્રેણ ભિત્ત્વા સભૂમિં વારિ સુગન્ધિ ચ ।
ઊર્ધ્વધારમદાદાસ્યે તર્પિતોઽનેન સોઽવદત્ ॥ ૨૫.૧૩૨॥

ઋલ્ક્ષ્।યાદૃશ્યસ્ત્રજ્ઞતા પાર્થે દૃષ્ટાઽત્ર કુરુનન્દનાઃ ।
યાદૃગ્બાહ્વોર્બલં ભીમે સં યુગેષુ પુનઃ પુનઃ ॥ ૨૫.૧૩૩॥

યાદૃશં ચૈવ માહાત્મ્યમનન્તમજરં હરેઃ ।
વિજ્ઞાતં સર્વલોકસ્ય સભાયાં દૃષ્ટમેવ ચ ॥ ૨૫.૧૩૪॥

ઉપારમત તદ્યુદ્ધં સુખિનઃ સન્તુ ભૂમિપાઃ ।
યથોચિતવિભક્તાં ચ ભુઙ્ગ્ધ્વં ભૂપાઃ સદા ભુવમ્ ।
ઇત્યુક્તઃ પ્રયયૌ તૂષ્ણીં ધાર્તરાષ્ટ્રઃ સ્વકં ગૃહમ્ ॥ ૨૫.૧૩૫॥

વ્યાસદત્તોરુવિજ્ઞાનાત્સઞ્જયાદખિલં પિતા ।
શ્રુત્વા તદા પર્યતપ્યત્પાણ્ડવાઃ કૃષ્ણદેવતાઃ ।
મુમુદુઃ શિબિરં પ્રાપ્ય સર્વે કૃષ્ણાનુમોદિતાઃ ॥ ૨૫.૧૩૬॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
ભીષ્મપાતો નામ પઞ્ચવિંશોઽધ્યાયઃ ॥

# અથ ષડ્ત્રિંશોઽધ્યાયઃ ।

(નારાયણાસ્ત્રોપશમનમ્)

ૐ । અથાખિલાનાં પૃથિવીપતીનામાચાર્યમગ્ર્યં રથિનાં સુવિદ્યમ્ ।
રામસ્ય વિશ્વાધિપતેઃ સુશિષ્યં ચક્રે ચમૂપં ધૃતરાષ્ટ્રપુત્રઃ ॥ ૨૬.૧॥

કર્ણોઽપિ ભીષ્માનુમતો ધનુષ્માન્ યુદ્ધોદ્યતોઽભૂત્તદસત્કૃતઃ પુરા ।
તસ્મિન્ સ્થિતેઽનાત્તધનુસ્તદૈવ રથં સમાસ્થાય ગુરું સમન્વયાત્ ॥ ૨૬.૨॥

દ્રોણો વૃતો ધાર્તરાષ્ટ્રેણ ધર્મસુતગ્રહે તેન કૃતે પ્રતિશ્રવે ।
જ્ઞાત્વા યત્તાઃ પાણ્ડવાસ્તં સમીયુર્યુદ્ધાય તત્રાભવદુગ્રયુદ્ધમ્ ॥ ૨૬.૩॥

પતત્રિભિસ્તત્ર દુધાવ શાત્રવાન્ દ્રોણો ધનુર્મણ્ડલમન્ત્રનિસ્સૃતૈઃ ।
તમાસસાદાઽશુ વૃકોદરો નદં સ્તમાસદન્ દ્રૌણિકૃપૌ ચ મદ્રરાટ્ ॥ ૨૬.૪॥

સ તાન્ વિધૂયાભ્યપતદ્રણેઽગ્રણીર્દ્રોણં તમન્વાર્જુનિરભ્યયાત્પરાન્ ।
વવાર તં મદ્રપતિસ્તયોરભૂદ્રણો મહાં સ્તત્ર ગદાં સમાદદે ।
શલ્યોઽથ ભીમોઽભિયયૌ ગદાધરસ્તમેતયોરત્ર બભૂવ સઙ્ગરઃ ॥ ૨૬.૫॥

ઉભાવજેયૌ ગદિનામનુત્તમાવતુલ્યવીર્યૌ પ્રવરૌ બલીયસામ્ ।
વિચેરતુશ્ચિત્રતમં પ્રપશ્યતાં મનોહરં તાવભિનર્દમાનૌ ।
ગદાપ્રપાતાઙ્કિતવજ્રગાત્રૌ દદર્શ લોકોઽખિલ એવ તૌ રણે ॥ ૨૬.૬॥

ગદાભિઘાતેન વૃકોદરસ્ય વિચેતનઃ પ્રાપતદત્ર મદ્રરાટ્ ।
ભીમોઽપિ કોપાત્પ્રચલત્પદઃ ક્ષિતૌ નિધાય જાનું સહસોત્થિતઃ ક્ષણાત્ ॥ ૨૬.૭॥

વિચેતનં પતિતં મદ્રરાજં વિલોક્ય ભીમં ચ તમાહ્વયન્તમ્ ।
રથં સમારોપ્ય જનસ્ય પશ્યતઃ પુરશ્ચ ભીમસ્ય કૃપોઽપજગ્મિવાન્ ॥ ૨૬.૮॥

વિજિત્ય મદ્રાધિપમોજસાઽરિહા નદન્ રથં પ્રાપ્ય નિજં સ મારુતિઃ ।
વ્યદ્રાવયદ્બાણગણૈઃ પરેષામનીકિનીં દ્રોણસમક્ષમેવ ॥ ૨૬.૯॥

વિદ્રાવયત્યાશુ કુરૂન્ વૃકોદરે વિધૂય સૌભદ્રમુખાન્ સસાત્યકીન્ ।
દ્રોણોઽભિપેદે નૃપતિં ગૃહીતું તમાસસાદાઽશુ ધનઞ્જયો રથી ॥ ૨૬.૧૦॥

અચ્લક્ષી । સ વાસુદેવપ્રયતે રથે સ્થિતઃ શરૈઃ શરીરાન્તકરૈઃ સમન્તતઃ ।
નિહત્ય નાગાશ્વનરાન્ પ્રવર્તયન્નદૃશ્યતાઽશ્વેવ ચ શોણિતાપગાઃ ॥ ૨૬.૧૧॥

નિહન્યમાનાસુ કિરીટિના ચમૂષ્વારક્ષિતે ધર્મસુતે તથાઽપદઃ ।
ચમૂં ચ ભીમાર્જુનબાણભગ્નાં દ્રોણોઽપહૃત્યાપયયૌ નિશાગમે ॥ ૨૬.૧૨॥

સ ધાર્તરાષ્ટ્રેણ યુધિષ્ઠિરાગ્રહાત્સં શ્રાવિતઃ ક્રૂરવચો નિશાયામ્ ।
જગાદ દૂરં સમરાદ્વિનીયતાં પાર્થસ્તતો ધર્મસુતં ગ્રહીષ્યે ॥ ૨૬.૧૩॥

તતઃ સુશર્મા સહિતો મહારથૈઃ સં શપ્તકૈર્દૂરતરં પ્રણેતુમ્ ।
યુદ્ધાય ભીમાનુજમાશુ ક્લૃપ્તો દુર્યોધનેનોમિતિ સોઽપ્યવાદીત્ ॥ ૨૬.૧૪॥

સમાહ્વયામાસુરથાર્જુનં તે પ્રાતર્હુતાશસ્ય દિશં રણાય ।
અયોધયત્તાન્ સ ચ તત્ર ગત્વા ભીમો ગજાનીકમથાત્ર ચાવધીત્ ॥ ૨૬.૧૫॥

નિહન્યમાનેષુ ગજેષુ સર્વશો વિદ્રાપ્યમાણેષ્વખિલેષુ રાજસુ ।
પ્રાગ્જ્યોતિષો ધાર્તરાષ્ટ્રાર્થિતસ્તં સમાસદત્સુપ્રતીકેન ધન્વી ॥ ૨૬.૧૬॥

વિભીષિતાઃ સુપ્રતીકેન ભીમહયા ન તસ્થુસ્તદનુ સ્મ સાત્યકિઃ ।
સૌભદ્રમુખ્યાશ્ચ ગજં તમભ્યયુશ્ચિક્ષેપ તેષાં સ રથાનથામ્બરે ॥ ૨૬.૧૭॥

શૈનેયપૂર્વેષુ રથોજ્ઝિતેષુ ભૂમાવવપ્લુત્ય કથઞ્ચિદેવ ।
સ્થિતેષુ ભીમે ચ વિભીષિતાશ્વાન્ સં યમ્ય યુદ્ધ્યત્યપિ કૃષ્ણ ઐક્ષત્ ॥ ૨૬.૧૮॥

સઙ્ક્લેશિતો વૈષ્ણવાસ્ત્રં પ્રમુઞ્ચેત્પ્રાગ્જ્યોતિષો ભીમસેને તતોઽહમ્ ।
યામ્યાર્જુનેનૈવ તદસ્ત્રમાત્મનઃ સ્વીકર્તુમન્યેન વરાદધાર્યમ્ ॥ ૨૬.૧૯॥

ઇતિ સ્મ સઞ્ચિન્ત્ય સહાર્જુનેન તત્રાઽયયાવથ પાર્થં ત્રિગર્તાઃ ।
ન્યવારયં સ્ત્વાષ્ટ્રમસ્ત્રં સ તેષુ વ્યવાસૃજન્મોહનાયાઽશુ વીરઃ ॥ ૨૬.૨૦॥

તદસ્ત્રવીર્યેણ વિમોહિતાસ્તે પરસ્પરં કૃષ્ણપાર્થાવિતિ સ્મ ।
જઘ્નુસ્તદા વાસવિસ્તાન્ વિસૃજ્ય પ્રાગ્જ્યોતિષં હન્તુમિહાભ્યગાદ્દ્રુતમ્ ॥ ૨૬.૨૧॥

વિસૃજ્ય ભીમં સ ચ પાર્થમેવ યયૌ ગજસ્કન્ધગતો ગજં તમ્ ।
પ્રચોદયામાસ રથાય તસ્ય ચક્રેઽપસવ્યં હરિરેનમાશુ ॥ ૨૬.૨૨॥

અ્અલ્ક્ષીઇંઅનોજવેનૈવ રથે પરેણ સમ્ભ્રામ્યમાણે નતુ તં ગજઃ સઃ ।
પ્રાપ્તું શશાકાથ શરૈઃ સુતીક્ષ્ણૈરભ્યર્દયામાસ નૃપં સ વાસવિઃ ॥ ૨૬.૨૩॥

અસ્ત્રૈશ્ચ શસ્ત્રૈઃ સુચિરં નૃવીરાવયુદ્ધ્યતાં તૌ બલિનાં પ્રબર્હૌ ।
અથો ચકર્તાસ્ય ધનુઃ સ પાર્થઃ સ વૈષ્ણવાસ્ત્રં ચ તદાઽઙ્કુશેઽકરોત્ ॥ ૨૬.૨૪॥

તસ્મિન્નસ્ત્રે તેન તદા પ્રમુક્તે દધાર તદ્વાસુદેવોઽમિતૌજાઃ ।
તદં સદેશસ્ય તુ વૈજયન્તી બભૂવ માલાઽખિલલોકભર્તુઃ ॥ ૨૬.૨૫॥

દૃષ્ટ્વૈવ તદ્ધારિતમચ્યુતેન પાર્થઃ કિમર્થં વિધૃતં ત્વયેતિ ।
ઊચે તમાહાઽશુ જગન્નિવાસો મયાઽખિલં ધાર્યતે સર્વદૈવ ॥ ૨૬.૨૬॥

ન માદૃશોઽન્યોઽસ્તિ કુતઃ પરો મત્સોઽહં ચતુર્ધા જગતો હિતાય ।
સ્થિતોઽસ્મિ મોક્ષપ્રલ્। અયસ્થિતીનાં સૃષ્ટેશ્ચ કર્તા ક્રમશઃ સ્વમૂર્તિભિઃ ।
સ વાસુદેવાદિચતુઃ સ્વરૂપઃ સ્થિતોઽનિરુદ્ધો હૃદિ ચાખિલસ્ય ॥ ૨૬.૨૭॥

સ એવ ચ ક્રોઽતનુઃ પરાઽહં ભૂમિપ્રિયાર્થં નરકાય ચાદામ્ ।
અસ્ત્રં મદીયં વરમસ્ય ચાદામવધ્યતાં યાવદસ્ત્રં સસૂનોઃ ॥ ૨૬.૨૮॥

અસ્ત્રસ્ય ચાન્યો નતુ કશ્ચિદસ્તિ યોઽવધ્ય એતસ્ય કુતશ્ચ મત્તઃ ।
ઇતિ સ્મ તેનૈવ મયા ધૃતં તદસ્ત્રં તદેનં જહિ ચાસ્ત્રહીનમ્ ॥ ૨૬.૨૯॥

ઇત્યુક્તમાકર્ણ્ય સ કેશવેન સમ્મન્ત્ર્ય બાણં હૃદયે મુમોચ ।
પ્રાગ્જ્યોતિષસ્યાપરમુત્તમં શરં ગજેન્દ્રકુમ્ભસ્થલ આશ્વમજ્જયત્ ॥ ૨૬.૩૦॥

ઉભૌ ચ તૌ પેતતુરદ્રિસન્નિભૌ મહેન્દ્રવજ્રાભિહતાવિવાઽશુ ।
નિહત્ય તૌ વાસવિરુગ્રપૌરુષો મુમોદ સાધુ સ્વજનાભિપૂજિતઃ ॥ ૨૬.૩૧॥

અથાચલં વૃષકં ચૈવ હત્વા કનીયસૌ શકુનેસ્તં ચ બાણૈઃ ।
વિવ્યાધ માયામસૃજત્સ તાં ચ વિજ્ઞાનાસ્ત્રેણાઽશુ નાશાય ચક્રે ॥ ૨૬.૩૨॥

સ નષ્ટમાયઃ પ્રાદ્રવત્પાપકર્મા તતઃ પાર્થઃ શરપૂગૈશ્ચમૂં તામ્ ।
વિદ્રાવયામાસ તદા ગુરોઃ સુતો માહિષ્મતીપતિમાજૌ જઘાન ॥ ૨૬.૩૩॥

ચ્ઋઅલ્ક્ષવ્। તદા ભીમસ્તસ્ય નિહત્ય વાહાન્ વ્યદ્રાવયદ્ધાર્તરાષ્ટ્રીં ચમૂં ચ ।
ભીમાર્જુનાભ્યાં હન્યમાનાં ચમૂં તાં દૃષ્ટ્વા દ્રોણઃ ક્ષિપ્રમપાજહાર ॥ ૨૬.૩૪॥

પ્રાગ્જ્યોતિષે નિહતેઽથાગ્રહાચ્ચ યુધિષ્ઠિરસ્યાતિવિષણ્ણરૂપઃ ।
દુર્યોધનોઽશ્રાવયદ્દીનવાક્યાન્યત્ર દ્રોણં સોઽપિ નૃપં જગાદ ॥ ૨૬.૩૫॥

પાર્થે ગતે શ્વો નૃપતિં ગ્રહીષ્યે નિહન્મિ વા તત્સદૃશં તદીયમ્ ।
ઇતિ પ્રતિજ્ઞાં સ વિધાય ભૂયઃ પ્રાતર્યયૌ યુદ્ધમાકાઙ્ક્ષમાણઃ ॥ ૨૬.૩૬॥

પદ્મવ્યૂહં વ્યૂહ્ય પરૈરભેદ્યં વરાદ્ગિરિશાત્ તસ્ય મન્ત્રં હ્યજપ્ત્વા ।
પાર્થાશ્ચ તં પ્રાપુરૃતેઽર્જુનેન સં શમ્કૈર્યુયુધે સોઽપિ વીરઃ ॥ ૨૬.૩૭॥

પાર્થા વ્યૂહં તુ તં પ્રાપ્ય નાશકન્ ભેત્તુમુદ્યતાઃ ।
જાનંશ્ચ પ્રતિભાયોગાત્કામ્યં નૈવાજપન્મનુમ્ ॥ ૨૬.૩૮॥

ભીમો યુધિષ્ઠિરસ્તત્ર તજ્જ્ઞં સૌભદ્રમબ્રવીત્ ।
ભિન્ધિ વ્યૂહમિમં તાત વયં ત્વામનુયામહે ॥ ૨૬.૩૯॥

સ એવમુક્તો રથિનાં પ્રબર્હો વિવેશ ભિત્ત્વા દ્વિષતાં ચમૂં તામ્ ।
અન્વેવ તં વાયુસુતાદયશ્ચ વિવિક્ષવઃ સૈન્ધવેનૈવ રુદ્ધાઃ ॥ ૨૬.૪૦॥

વરેણ રુદ્રસ્ય નિરુદ્ધ્યમાનો જયદ્રથેનાત્ર વૃકોદરસ્તુ ।
વિષ્ણોરભીષ્ટં વધમાર્જુનેસ્તદા વિજ્ઞાય શક્તોઽપિ નચાત્યવર્તત ॥ ૨૬.૪૧॥

જયદ્રથસ્થેન વૃષધ્વજેન પ્રયુદ્ધ્યમાનેષુ વૃકોદરાદિષુ ।
પ્રવિશ્ય વીરઃ સ ધનઞ્જયાત્મજો વિલોલ્. અયામાસ પરોરુસેનામ્ ॥ ૨૬.૪૨॥

સ દ્રોણદુર્યોધનકર્ણશલ્યૈર્દ્રૌણ્યગ્રણીભિઃ કૃતવર્મયુક્તૈઃ ।
રુદ્ધશ્ચચારારિબલેષ્વભીતઃ શિરાં સિ કૃન્તં સ્તદનુભ્રાતાનામ્ ॥ ૨૬.૪૩॥

સ લક્ષણં રાજસુતં પ્રસહ્ય પિતુઃ સમીપેઽનયદાશુ મૃત્યવે ।
બૃહદ્બલં ચોત્તમવીર્યકર્મા વરં રથાનામયુતં ચ પત્રિભિઃ ॥ ૨૬.૪૪॥

દ્રોણાદયસ્તં હરિકોપભીતાઃ પ્રત્યક્ષતો હન્તુમશક્નુવન્તઃ ।
સમ્મન્ત્ર્ય કર્ણં પુરતો નિધાય ચક્રુર્વિચાપાશ્વરથં ક્ષણેન ॥ ૨૬.૪૫॥

ચ્છ્લક્ષ્વ્ । કર્ણો ધનુસ્તસ્ય કૃપશ્ચ સારથી દ્રોણો હયાનાશુ વિધમ્ય સાયકૈઃ ।
સચર્મખડ્ગં રથચક્રમસ્ય પ્રણુદ્ય હસ્તસ્થિતમેવ તસ્થુઃ ॥ ૨૬.૪૬॥

ભીતેષુ કૃષ્ણાદથ તદ્વધાય તેષ્વાસસાદાઽશુ ગદાયુધં ગદી ।
દૌઃ શાસનિસ્તૌ યુગપચ્ચ મમ્રતુર્ગદાભિઘાતેન મિથોઽતિપૌરુષૌ ॥ ૨૬.૪૭॥

તસ્મિન્ હતે શત્રુરવં નિશમ્ય હર્ષોદ્ભવં મારુતિરુગ્રવિક્રમઃ ।
વિજિત્ય સર્વાનપિ સૈન્ધવાદીન્ યુધિષ્ઠિરસ્યાનુમતે ન્યષીદત્ ॥ ૨૬.૪૮॥

વ્યાસસ્તદા તાનમિતાત્મવૈભવો યુધિષ્ઠિરાદીન્ ગ્લપિતાનબોધયત્ ।
વિજિત્ય સં શપ્તકપૂગમુગ્રો નિશાગમે વાસવિરાપ સાચ્યુતઃ ॥ ૨૬.૪૯॥

નિશમ્ય પુત્રસ્ય વધં ભૃશાર્તઃ પ્રતિશ્રવં સોઽથ ચકાર વીરઃ ।
જયદ્રથસ્યૈવ વધે નિશાયાં સ્વપ્નેઽનયત્તં ગિરિશાન્તિકં હરિઃ ॥ ૨૬.૫૦॥

સ્વયમેવાખિલજગદ્રક્ષાદ્યમિતશક્તિમાન્ ।
અપ્યચ્યુતો ગુરુદ્વારા પ્રસાદકૃદહં ત્વિતિ ॥ ૨૬.૫૧॥

જ્ઞાપયન્ ફલ્ગુનસ્યાસ્ત્રગુરું ગિરિશમઞ્જસા ।
પ્રાપયિત્વૈનમેવૈતત્પ્રસાદાદસ્ત્રમુદ્ધ્રણમ્ ।
ચક્રે તદર્થમેવાસ્ય રક્ષાં ચક્રે તદાત્મિકામ્ ॥ ૨૬.૫૨॥

સાન્ત્વયિત્વા સુભદ્રાં ચ ગત્વોપપ્લાવ્યમચ્યુતઃ ।

યોજયિત્વા રથં પ્રાતઃ સાર્જુનો યુદ્ધમભ્યયાત્ ॥ ૨૬.૫૩॥

શ્રુત્વા પ્રતિજ્ઞાં પુરુહૂતસૂનોર્દુર્યોધનેનાર્થિતઃ સિન્ધુરાજમ્ ।
ત્રાતાસ્મ્યહં સર્વથેતિ પ્રતિજ્ઞાં કૃત્વા દ્રોણો વ્યૂહમભેદ્યમાતનોત્ ॥ ૨૬.૫૪॥

સ દિવ્યમગ્ર્યં શકટાબ્જચક્રં કૃત્વા સ્વયં વ્યૂહમુખે વ્યવસ્થિતઃ ।
પૃષ્ઠે કર્ણદ્રૌણિકૃપૈઃ સશલ્યૈર્જયદ્રથં ગુપ્તમધાત્પરૈશ્ચ ॥ ૨૬.૫૫॥

અથાર્જુનો દિવ્યરથોપરિસ્થિતઃ સુરક્ષિતઃ કેશવેનાવ્યયેન ।
વિજિત્ય દુર્મર્ષણમગ્રતોઽભ્યયાદ્દ્રોણં સુધન્વા ગુરુમુગ્રપૌરુષઃ ॥ ૨૬.૫૬॥

ચ્ઋલ્ક્ષ્વ.પ્રદક્ષિણીકૃત્ય તમાશ્વગાત્તતઃ કાલાત્યયં ત્વેવ વિશઙ્કમાનઃ ।
રથં મનોવેગમથાનયદ્ધરિર્યથા શરાઃ પેતુરમુષ્ય પૃષ્ઠતઃ ॥ ૨૬.૫૭॥

વિજિત્ય હાર્દિક્યમથાપ્રયત્નઃ સ ઇન્દ્રસૂનુઃ પ્રવિવેશ તદ્બલમ્ ।
વિલોલ્. અયામાસ ચ સાયકોત્તમૈર્યથા ગજેન્દ્રો નલ્. ઇનીં બલોદ્ધતઃ ॥ ૨૬.૫૮॥

સ ઉચ્ચકાશેઽતિરથો રથોત્તમે સવાસુદેવો હરિણા યથેન્દ્રઃ ।
ચકર્ત ચોગ્રો દ્વિષતાં શિરાં સિ શરૈઃ શરીરાન્તકરૈઃ સમન્તતઃ ॥ ૨૬.૫૯॥

દૃઢાયુમચ્યુતાયું ચ હત્વા વિન્દાનુવિન્દકૌ ।
શરાભ્યાં પ્રેષયામાસ યમાય વિજયો યુધિ ॥ ૨૬.૬૦॥

સુદક્ષિણં ચ કામ્બોજં નિહત્યામ્બષ્ઠમેવ ચ ।
શ્રુતાયુધં નદીજાતં વરુણાદાસસાદ હ ।
યસ્યાદાદ્વરુણો દિવ્યામમોઘાં મહતીં ગદામ્ ॥ ૨૬.૬૧॥

સ તુ તેન શરૈસ્તીક્ષ્ણૈરર્પિતો વિરથં ક્ષણાત્ ।
ચકાર પાર્થસ્ય રથમારુહ્યારિધરાય તામ્ ॥ ૨૬.૬૨॥

ગદાં ચિક્ષેપ સા તસ્ય વારુણેઃ શિર એવ તુ ।
બિભેદ શતધા શીર્ણમસ્તિષ્કઃ સોઽપતદ્ભુવિ ॥ ૨૬.૬૩॥

અયુદ્ધ્યન્તં સ્વગદયા યદિ તાડયસિ સ્વયમ્ ।
તયા વિશીર્ણમસ્તિષ્કો મરિષ્યસિ ન સં શયઃ ।
અમોઘા ચાન્યથા સેયં ગદા તવ ભવિષ્યતિ ॥ ૨૬.૬૪॥

ઇત્યબ્રવીત્તં વરુણઃ પુરા તેન સ કેશવે ।
અયુદ્ધ્યતિ ગદાક્ષેપાત્તયા શીર્ણશિરા અભૂત્ ॥ ૨૬.૬૫॥

હતેષુ વીરેષુ નિજેષુ સઙ્ઘશો વિદ્રાવિતેષ્વાલુલ્। ઇતે ચ સૈન્યે ।

દુર્યોધનો દ્રોણમુપેત્ય દીનમુવાચ હા પાર્થ ઉપેક્ષિતસ્ત્વયા ॥ ૨૬.૬૬॥

ઇતીરિતેઽભેદ્યમમુષ્ય વર્મ બદ્ધ્વા મહામન્ત્રબલાત્સ વિપ્રઃ ।
જગાદ યેનૈવ બલેન પાર્થૈર્વિરુદ્ધ્યસે તેન હિ યાહિ ફલ્ગુનમ્ ॥ ૨૬.૬૭॥

અચ્લ્ક્ષ્વી। ઇતીરિતો ધાર્તરાષ્ટ્રઃ સ ચાપમાદાય સૌવર્ણરથોપરિસ્થઃ ।
જગામ પાર્થં તમવારયચ્ચ શરૈરનેકૈરનલપ્રકાશૈઃ ॥ ૨૬.૬૮॥

વિવ્યાધ પાર્થોઽપિ તમુગ્રવેગૈઃ શરૈર્ન તે તસ્ય ચ વર્મભેદમ્ ।
ચક્રુસ્તતો વાસવિર્દિવ્યમસ્ત્રં તદ્વર્મભેદાય સમાદદે રુષા ॥ ૨૬.૬૯॥

સન્ધીયમાનં તુ ગુરોઃ સુતસ્તચ્ચિચ્છેદ પાર્થોઽથ સુયોધનાશ્વાન્ ।
હત્વા તલ્. એઽવિદ્ધ્યદથૈનમુગ્રૈર્દ્રૌણિઃ શરૈઃ પાર્થમવારયદ્યુધિ ॥ ૨૬.૭૦॥

સ દ્રૌણિકર્ણપ્રમુખૈર્ધનઞ્જયો યુયોધ તે ચૈનમવારયઞ્છરૈઃ ।
બભૂવ યુદ્ધં તદતુલ્યમદ્ભુતં જયદ્રથાર્થેઽદ્ભુતવીર્યકર્મણામ્ ॥ ૨૬.૭૧॥

પાર્થે પ્રવિષ્ટે કુરુસૈન્યમધ્યં દ્રોણોઽવિશત્પાણ્ડવસૈન્યમાશુ ।
સ તદ્રથાનીકમુદગ્રવેગૈઃ શરૈર્વિધૂય ન્યહનચ્ચ વીરાન્ ॥ ૨૬.૭૨॥

સ વીરવર્યઃ સ્થવિરોઽપિ યૂનાં યુવેવ મધ્યે પ્રચચાર ધન્વિનામ્ ।
પ્રપાતયન્ વીરશિરાં સિ બાણૈર્યુધિષ્ઠિરં ચાઽસદદુગ્રવીર્યઃ ॥ ૨૬.૭૩॥

નૃપગ્રહેચ્છું તમવેત્ય સત્યજિન્ન્યવારયદ્દ્રૌપદિરાશુ વીર્યવાન્ ।
નિવારિતસ્તેન શિરઃ શરેણ ચકર્ત પાઞ્ચાલસુતસ્ય વિપ્રઃ ॥ ૨૬.૭૪॥

નિહત્ય તં વીરતમં રણોત્કટં યુધિષ્ઠિરં બાણગણૈઃ સમાર્દયત્ ।
સ શક્તિસ્તેન વિધાય સઙ્ગરં નિરાયુધો વ્યશ્વરથઃ કૃતઃ ક્ષણાત્ ॥ ૨૬.૭૫॥

સ ઊર્ધ્વબાહુર્ભુવિ સં સ્થિતોઽપિ ગૃહીતુમાજૌ ગુરુણાઽભિપન્નઃ ।
માદ્રીસુતસ્યાવરજસ્ય યાનમારુહ્ય વેગાદપજગ્મિવાં સ્તતઃ ॥ ૨૬.૭૬॥

દ્રોણં તતઃ શૈશુપાલિઃ સપુત્રો જારાસન્ધિઃ કાશિરાજઃ સશૈવ્યઃ ।
સમાસદન્ કેકયાશ્ચૈવ પઞ્ચ સમાર્દયન્ બાણગણૈશ્ચ સર્વશઃ ॥ ૨૬.૭૭॥

સ તાન્ ક્રમેણૈવ નિકૃત્તકન્ધરાઞ્છરોત્તમૈરત્ર વિધાય વિપ્રઃ ।
નિનાય લોકં પરમર્કમણ્ડલં વ્રજન્તિ નિર્ભિદ્ય યમૂર્ધ્વરેતસઃ ॥ ૨૬.૭૮॥

વિધૂયમાને ગુરુણોરુસૈન્યે પૃથાસુતાનાં પૃતનાઃ પરેષામ્ ।
પ્રાયો રણે મારુતસૂનુનૈવ હતપ્રવીરા મૃદિતાઃ પરાદ્રવન્ ॥ ૨૬.૭૯॥

અ્લ્ક્ષ્વીઇડલમ્બુસો નામ તદૈવ રાક્ષસઃ સમાસદન્મારુતિમુગ્રપૌરુષમ્ ।
સ પીડિતસ્તેન શરૈઃ સુતેજનૈઃ ક્ષણાદદૃશ્યત્વમવાપ માયયા ॥ ૨૬.૮૦॥

સોઽદૃશ્યરૂપોઽનુચરાનપીડયદ્ભીમસ્ય તદ્વીક્ષ્ય ચુકોપ મારુતિઃ ।
અસ્ત્રજ્ઞતામાત્મનિકેશવાજ્ઞયા સન્દર્શયન્નાગતધર્મસઙ્કટઃ ॥ ૨૬.૮૧॥

ત્વાષ્ટ્રાસ્ત્રમાદત્ત સ કામ્યકર્મહીનોઽપિ ભીમસ્તત ઉત્થિતાઃ શરાઃ ।
તે બાણવર્યાસ્તદદૃશ્યવેધિનો રક્ષો વિદાર્યાઽવિવિશુર્ધરાતલ્. અમ્ ॥ ૨૬.૮૨॥

તદ્ધન્યમાનં પ્રવિહાય ભીમમપાદ્રવદ્દૂરતરં સુભીતમ્ ।
તતસ્તુ ભીમો દ્વિષતાં વરૂથિનીં વિદ્રાવયામાસ શરૈઃ સુમુક્તૈઃ ॥ ૨૬.૮૩॥

તદૈવ કૃષ્ણાતનયાઃ સમેતા જઘ્નુઃ શલં સં યતિ સૌમદત્તિમ્ ।
અલમ્બુસં પ્રાપ તદા ઘટોત્કચઃ પરસ્પરં તૌ રથિનાવયુદ્ધ્યતામ્ ॥ ૨૬.૮૪॥

ઘટોત્કચસ્તં વિરથં વિધાય ખસ્થં ખ એવાભિયુયોધ સં સ્થિતઃ ।
તતસ્તુ તં ભીમસુતો નિગૃહ્ય નિપાત્ય ભૂમૌ પ્રદદૌ પ્રહારમ્ ॥ ૨૬.૮૫॥

પદા શિરસ્યેવ સ પિષ્ટમસ્તકો મમાર મધ્યે પૃથિવીપતીનામ્ ।
તસ્મિન્ હતે ભૈમસેનિઃ કુરૂણાં વ્યદ્રાવયદ્રથવૃન્દં સમન્તાત્ ॥ ૨૬.૮૬॥

તદાઽસદત્કૃતવર્મા રથેન સેનાં પાણ્ડૂનાં શરવર્ષં પ્રમુઞ્ચન્ ।
દદૌ વરં તસ્ય હિ પૂર્વમચ્યુતઃ પ્રીતઃ સ્તુત્યા સર્વજયં મુહૂર્તે ॥ ૨૬.૮૭॥

સ તેન પાઞ્ચાલગણાન્ વિજિગ્યે યમૌ ચ ભીમસ્ય પુરોઽથ તં ચ ।
વિવ્યાધ બાણેન સ વાસુદેવવરં વિજાનન્ન તદા સમભ્યયાત્ ॥ ૨૬.૮૮॥

વિનૈવ વૃષ્ણીન્ વિજયે વરો યદમુષ્ય તેનાસ્ય હયાન્ સ સાત્યકિઃ ।
નિહત્ય બાણૈરતુદત્સ યાનમન્યત્સમાસ્થાય તતોઽપજગ્મિવાન્ ॥ ૨૬.૮૯॥

તદા હરિઃ પાઞ્ચજન્યં સુઘોષમાપૂરયામાસ જયેઽભિયુદ્ધ્યતિ ।
કર્ણાદિભિર્દ્રૌણિમુખૈ રિપૂણાં બલપ્રહાણાય પરઃ પરેભ્યઃ ॥ ૨૬.૯૦॥

સ પાઞ્ચજન્યોઽચ્યુતવક્ત્રવાયુના ભૃશં સુપૂર્ણોદરનિસ્સૃતધ્વનિઃ ।
ચ્ય્લ્ક્ષક્ષ્।જગદ્ભિરિઞ્ચેશસુરેન્દ્રપૂર્વકં પ્રકમ્પયામાસ યુગાત્યયે યથા ॥ ૨૬.૯૧॥

ગાણ્ડીવઘોષે ચ તદાઽભિભૂતે યુધિષ્ઠિરો ભીતભીતસ્તદેત્ય ।
શૈનેયમૂચે પરસૈન્યમગ્રે પાર્થે સ્વયં યુદ્ધ્યતિ કેશવઃ સ્મ ॥ ૨૬.૯૨॥

ન શ્રૂયતે ગાણ્ડીવસ્યાદ્ય ઘોષઃ સં શ્રૂયતે પાઞ્ચજન્યસ્ય ઘોષઃ ।
તદ્યાહિ જાનીહિ તમદ્ય પાર્થં યદિ સ્મ જીવત્યસહાય એષઃ ॥ ૨૬.૯૩॥

ઇતીરિતઃ સાત્યકિરત્ર વિપ્રાન્ સમ્પૂજ્ય વિત્તૈઃ પરમાશિષશ્ચ ।
જયાય તેભ્યઃ પ્રતિગૃહ્ય સેનામુખં યયૌ ભીમસેનાનુયાતઃ ॥ ૨૬.૯૪॥

ભીમસ્તુ સેનામુખમાશુ ભિત્ત્વા પ્રાવેશયદ્યુયુધાનં ચમૂં તામ્ ।
સ યુદ્ધ્યમાનો ગુરુણાઽભ્યુપેક્ષિતઃ સૂતં નિહત્ય દ્રાવયામાસ ચાશ્વાન્ ॥ ૨૬.૯૫॥

બલં વિવૃદ્ધં ચ તદાઽસ્ય સાત્યકેર્વિપ્રાશીર્ભિઃ કૃષ્ણવરાદપિ સ્મ ।
બલસ્ય વૃદ્ધિર્હિ પુરાઽસ્ય દત્તા કૃષ્ણેન તુષ્ટેન દિને હિ તસ્મિન્ ॥ ૨૬.૯૬॥

તતો વિવૃદ્ધોરુબલાત્સ સાત્યકિઃ સં સ્થાપ્ય ભીમં પ્રયયૌ રથેન ।
તં બાણવર્ષૈઃ પૃતનાં સમન્તાન્નિઘ્નન્તમાજૌ હૃદિકાત્મજોઽભ્યયાત્ ॥ ૨૬.૯૭॥

તયોરભૂદ્યુદ્ધમતીવ દારુણં તત્રાકરોત્તં વિરથં સ સાત્યકિઃ ।
વિજિત્ય તં સાત્યકિરુગ્રધન્વા યયાવતીત્યૈવ શિરાં સિ યૂનામ્ ।
કૃન્તન્ શરૈસ્તં જલસન્ધ આગમદ્રણે ગજસ્કન્ધગતોઽભિયોદ્ધુમ્ ॥ ૨૬.૯૮॥

નિવારયન્તં તમસં હ્યવિક્રમં નિહત્ય બાણૈઃ સમરે સ સાત્યકિઃ ।
વિલોલ્. અયામાસ બલં કુરૂણાં નિઘ્નન્ ગજસ્યન્દનવાજિપત્તિનઃ ॥ ૨૬.૯૯॥

સ પાર્વતીયાંશ્ચ શિલાપ્રવર્ષિણો નિહત્ય વિદ્રાપ્ય ચ સર્વસૈનિકાન્ ।
સમાસદત્કેશવફલ્ગુનૌ ચ બલી તમારાઽશુ ચ યૂપકેતુઃ ॥ ૨૬.૧૦૦॥

તયોરભૂદ્યુદ્ધમતીવ ઘોરં ચિરં વિચિત્રં ચ મહદ્વિભીષણમ્ ।
પરસ્પરં તૌ તુરગાન્નિહત્ય નિપાત્ય સૂતૌ ધનુષી નિકૃત્ય ।
સમીયતુશ્ચર્મમહાસિધારિણૌ વિચિત્રમાર્ગાન્ યુધિ સઞ્ચરન્તૌ ॥ ૨૬.૧૦૧॥

સ સૌમદત્તિર્ભુવિ સાત્યકિં રણે નિપાત્ય કેશેષુ ચ સમ્પ્રગૃહ્ય ।
અ્ચ્લ્ક્ક્ષ્।પદાઽસ્ય વક્ષસ્યધિરુહ્ય ખડ્ગમુદગ્રહીદાશુ શિરોઽપહર્તુમ્ ॥ ૨૬.૧૦૨॥

તદ્વાસુદેવસ્તુ નિરીક્ષ્ય વિશ્વતશ્ચક્ષુર્જગાદાઽશુ ધનઞ્જયં રણે ।
ત્રાયસ્વ શૈનેયમિતિ સ્મ સોઽપિ ભલ્લેન ચિચ્છેદ ભુજં પરસ્ય ॥ ૨૬.૧૦૩॥

સ તેન ચોત્કૃત્તસખડ્ગબાહુર્વિનિન્દ્ય પાર્થં નિષસાદ ભૂમૌ ।
પ્રાયોપવિષ્ટઃ શરસં સ્તરે હરિં દૃધ્યાયન્ વિનિન્દન્નસુરપ્રવેશાત્ ॥ ૨૬.૧૦૪॥

ગતેઽસુરાવેશ ઉતાતિભક્ત્યા ધ્યાયત્યમુષ્મિન્ ગરુડધ્વજં તમ્ ।
શૈનેય ઉત્થાય નિવાર્યમાણઃ કૃષ્ણાર્જુનાદ્યૈરહરચ્છિરોઽસ્ય ॥ ૨૬.૧૦૫॥

તદા સ્વકીયં રથમેતદર્થં ક્લૃપ્તં દદૌ સાત્યકયે સસૂતમ્ ।

કૃષ્ણોઽથ પાર્થસ્ય હયાસ્તૃષાઽર્દિતાસ્તદાઽસૃજદ્વારુણાસ્ત્રં સ પાર્થઃ ॥ ૨૬.૧૦૬॥

તેનૈવ તીર્થં પરમં ચકાર તથાઽશ્વશાલામપિ બાણરૂપામ્ ।
તતો વિમુચ્યાત્ર હયાનપાયયદ્ધરિસ્તદા વાસવિરાર્દયત્પરાન્ ॥ ૨૬.૧૦૭॥

યુયોજ કૃષ્ણસ્તુરગાન્ રથે પુનર્ગતશ્રમાનુદ્ધૃતસાયકાન્ પ્રભુઃ ।
પ્રચોદિતે તેન રથે સ્થિતઃ પુનસ્તથૈવ બીભત્સુરરીનયોધયત્ ॥ ૨૬.૧૦૮॥

શિનિપ્રવીરે તુ ગતે યુધિષ્ઠિરઃ પુનશ્ચ ચિન્તાકુલિતો બભૂવ હ ।
જગાદ ભીમં ચ ન ગાણ્ડિવધ્વનિઃ સં શ્રૂયતે પાઞ્ચજન્યસ્ય રાવઃ ॥ ૨૬.૧૦૯॥

મયા નિયુક્તશ્ચ ગતઃ સ સાત્યકિર્ભારં ચ તસ્યાધિકમેવ મન્યે ।
તત્પાહિ પાર્થં યુયુધાનમેવ ચ ત્વં ભીમ ગત્વા યદિ જીવતસ્તૌ ॥ ૨૬.૧૧૦॥

ઇતીરિતઃ પ્રાહ વૃકોદરસ્તં ન રક્ષિતં વાસુદેવેન પાર્થમ્ ।
બ્રહ્મેશાનાવપિ જેતું સમર્થૌ કિં દ્રૌણિકર્ણાદિધનુર્ભૃતોઽત્ર ॥ ૨૬.૧૧૧॥

અતો ભયં નાસ્તિ ધનઞ્જયસ્ય ન સાત્યકેશ્ચૈવ હરેઃ પ્રસાદાત્ ।
રક્ષ્યસ્ત્વમેવાત્ર મતો મમાદ્ય દ્રોણો હ્યયં યતતે ત્વાં ગૃહીતુમ્ ॥ ૨૬.૧૧૨॥

ઇતીરિતઃ પ્રાહ યુધિષ્ઠિરસ્તં ન જીવમાને યુધિ માં ઘટોત્કચે ।
ધૃષ્ટદ્યુમ્ને ચાસ્ત્રવિદાં વરિષ્ઠે દ્રોણો વશં નેતુમિહ પ્રભુઃ ક્વચિત્ ॥ ૨૬.૧૧૩॥

ગ્ચ્ચ્લ્ક્ષ્ક્ષ।યદિ પ્રિયં કર્તુમિહેચ્છસિ ત્વં મમ પ્રયાહ્યાશુ ચ પાર્થસાત્યકી ।
રક્ષસ્વ સંજ્ઞામપિ સિં હનાદાત્કુરુષ્વ મે પાર્થશૈનેયદૃષ્ટૌ ॥ ૨૬.૧૧૪॥

તથા હતે ચૈવ જયદ્રથે મે કુરુષ્વ સંજ્ઞામિતિ તેન ભીમઃ ।
ઉક્તસ્તુ હૈડિમ્બમમુષ્ય રક્ષણે વ્યધાચ્ચ સેનાપતિમેવ સમ્યક્ ॥ ૨૬.૧૧૫॥

સ ચાઽહ સેનાપતિરત્ર ભીમં પ્રયાહિ તૌ યત્ર ચ કેશવાર્જુનૌ ।
ન જીવમાને મયિ ધર્ષિતું ક્ષમો દ્રોણો નૃપં મૃત્યુરહં ચ તસ્ય ॥ ૨૬.૧૧૬॥

ઇતિ બ્રુવાણે પ્રણિધાય ભીમઃ પુનઃ પુનસ્તં નૃપતિં ગદાધરઃ ।
યયૌ પરાનીકમધિજ્યધન્વા નિરન્તરં પ્રવપન્ બાણપૂગાન્ ॥ ૨૬.૧૧૭॥

ન્યવારયત્તં શરવર્ષધારો દ્રોણો વચશ્ચેદમુવાચ ભીમમ્ ।
શિષ્યસ્નેહાદ્વાસવિઃ સાત્યકિશ્ચ મયા પ્રમુક્તો ભૃશમાનતૌ મયિ ॥ ૨૬.૧૧૮॥

સ્વીયા પ્રતિજ્ઞાઽપિ હિ સૈન્ધવસ્ય ગુપ્તૌ મયા પાર્થકૃતે વિસૃષ્ટા ।
દાસ્યે ન તે માર્ગમહં કથઞ્ચિત્પશ્યાસ્ત્રવીર્યં મમ દિવ્યમદ્ભુતમ્ ॥ ૨૬.૧૧૯॥

ઇત્યુક્તવાક્યઃ સ ગદાં સમાદદે ચિક્ષેપ તાં દ્રોણરથાય ભીમઃ ।
ઉવાચ ચાહં પિતૃવન્માનયે ત્વાં સદા મૃદુસ્ત્વાં પ્રતિ નાન્યથા ક્વચિત્ ॥ ૨૬.૧૨૦॥

અમાર્દવે પશ્ય ચ યાદૃશં બલં મમેતિ તસ્યાઽશુ વિચૂર્ણિતો રથઃ ।
ગદાભિપાતેન વૃકોદરસ્ય સસૂતવાજિધ્વજયન્ત્રકૂબરઃ ॥ ૨૬.૧૨૧॥

દ્રોણો ગદામાપતતીં નિરીક્ષ્ય ત્વવપ્લુતો લાઘવતો ધરાતલ્। એ ।
તદૈવ દુર્યોધનયાપિતં રથં પરં સમાસ્થાય શરાન્ વવર્ષ હ ॥ ૨૬.૧૨૨॥

શરૈસ્તદીયૈઃ પરમાસ્ત્રમન્ત્રિતૈઃ પ્રવૃષ્યમાણો જગદીરણાત્મજઃ ।
શિરો નિધાયાઽશુ પુરો વૃષો યથા તમભ્યયાદેવ રથાદવપ્લુતઃ ॥ ૨૬.૧૨૩॥

મનોજવાદેવ તમાપ્ય ભીમો રથં ગૃહીત્વાઽમ્બર આક્ષિપત્ક્ષણાત્ ।
શક્તોઽપ્યહં ત્વાં ન નિહન્મિ ગૌરવાદિત્યેવ સુજ્ઞાપયિતું તદસ્ય ॥ ૨૬.૧૨૪॥

સુવાજિસૂતઃ સ રથઃ ક્ષિતૌ પતન્ વિચૂર્ણિતોઽસ્માદ્ગુરુરપ્યવપ્લુતઃ ।
તદા વિશોકોઽસ્ય રથં સમાનયત્તમારુહદ્ભીમ ઉદારવિક્રમઃ ॥ ૨૬.૧૨૫॥

ઞ્લ્ક્ષ્ક્ષી। દ્રોણોઽપિ દુર્યોધનદત્તમન્યં રથં સમાસ્થાય યુધિષ્ઠિરં યયૌ ।
ગૃહીતુકામં નૃપતિં પ્રયાન્તં ન્યવારયત્સં યતિ વાહિનીપતિઃ ॥ ૨૬.૧૨૬॥

વિદારિતાં દ્રોણશરૈઃ સ્વસેનાં સં સ્થાપ્ય ભૂયો દ્રુપદાત્મજઃ શરૈઃ ।
દ્રોણં નિવાર્યૈવ ચમૂં પરેષાં વિદ્રાવયામાસ ચ તસ્ય પશ્યતઃ ॥ ૨૬.૧૨૭॥

તયોરભૂદ્યુદ્ધમતીવ રૌદ્રં જયૈષિણોઃ પાણ્ડવધાર્તરાષ્ટ્રયોઃ ।
અત્યદ્ભુતં સન્તતબાણવર્ષમનારતં સુચિરં નિર્વિશેષમ્ ॥ ૨૬.૧૨૮॥

તતઃ પ્રાયાદ્ભીમસેનોઽમિતૌજા મૃદ્નઞ્છરૈઃ કૌરવરાજસેનામ્ ।
વિન્દાનુવિન્દપ્રમુખા ધાર્તરાષ્ટ્રાસ્તમાસેદુર્દ્વાદશ વીરમુખ્યાઃ ।
વિદ્ધઃ શરૈસ્તૈર્બહુભિર્વૃકોદરઃ શિરાં સિ તેષાં યુગપચ્ચકર્ત ॥ ૨૬.૧૨૯॥

હતેષુ તેષુ પ્રવરેષુ ધન્વિનાં સત્યવ્રતઃ પુરમિત્રો જયશ્ચ ।
વૃન્દારકઃ પૌરવશ્ચેત્યમાત્યાઃ સમાસેદુર્ધાર્તરાષ્ટ્રસ્ય ભીમમ્ ॥ ૨૬.૧૩૦॥

સ તૈઃ પૃષત્કૈરવકીર્યમાણઃ શિતાન્ વિપાઠાન્ યુગપત્સમાદદે ।
જહાર તૈરેવ શિરાં સિ તેષાં હતેષુ તેષ્વેવ પરે પ્રદુદ્રુવુઃ ॥ ૨૬.૧૩૧॥

સ સિં હવત્ક્ષુદ્રમૃગાન્ સમન્તતો વિદ્રાપ્ય શત્રૂન્ હૃદિકાત્મજં રણે ।
અભ્યાગમત્તેન નિવારિતઃ શરૈઃ ક્ષણેન ચક્રે વિરથાશ્વસૂતમ્ ।
સ ગાઢવિદ્ધસ્તુ વૃકોદરેણ રણં વિસૃજ્યાપયયૌ ક્ષણેન ॥ ૨૬.૧૩૨॥

વિજિત્ય હાર્દિક્યમથાઽશુ ભીમો વિદ્રાવયામાસ વરૂથિનીં તામ્ ।
સમ્પ્રેષયન્ સર્વનરાશ્વકુઞ્જરાન્ યમાય યાતો હરિપાર્થપાર્શ્વમ્ ॥ ૨૬.૧૩૩ ॥

દૃષ્ટ્વૈવ કૃષ્ણવિજયૌ પરમપ્રહૃષ્ટસ્તાભ્યાં નિરીક્ષિત ઉત પ્રતિભાષિતશ્ચ ।
સંજ્ઞાં નૃપસ્ય સ દદાવપિ સિં હનાદાન્ શ્રુત્વા પરાં મુદમવાપ સ ચાગ્ર્યબુદ્ધિઃ ॥ ૨૬.૧૩૪ ॥

ભીમસ્ય નાનદત એવ મહાસ્વનેન વિણ્મૂત્રશોણિતમથો મૃતિમાપુરેકે ।
ભીતેષુ સર્વનૃપતિષ્વમુમાપ તૂર્ણં કર્ણો વિકર્ણમુખરા અપિ ધાર્તરાષ્ટ્રાઃ ॥ ૨૬.૧૩૫ ॥

હત્વા વિકર્ણમુત તત્ર ચ ચિત્રસેનં સઞ્ચૂર્ણિતં ચ વિદધે રથમર્કસૂનોઃ ।
ઘોરૈઃ શરૈઃ પુનરપિ સ્મ સમર્દ્યમાનઃ કર્ણોઽપયાનમકરોદ્દ્રુતમેવ ભીમાત્ ॥ ૨૬.૧૩૬ ॥

ઞ્ચ્લ્ક્ષ્ક્ષીઇ।આશ્વાસ્ય ચૈવ સુચિરં પુનરેવ ભીમં યુદ્ધાય યાતિ ધૃતરાષ્ટ્રસુતૈસ્તથાઽન્યૈઃ ।
તાંશ્ચૈવ તત્ર વિનિહત્ય તથૈવ કર્ણો વ્યશ્વાયુધઃ કૃત ઉતાપયયૌ ક્ષણેન ॥ ૨૬.૧૩૭ ॥

વિકર્ણચિત્રસેનાદ્યા એવં વીરતમાઃ સુતાઃ ।
કર્ણસ્ય પશ્યતો ભીમબાણકૃત્તશિરોધરાઃ ॥ ૨૬.૧૩૮ ॥

નિપેતુર્ધૃતરાષ્ટ્રસ્ય રથેભ્યઃ પૃથિવીતલ્। એ ।
ત્રયોવિં શતિરેવાત્ર કર્ણસાહાય્યકાઙ્ક્ષિણઃ ॥ ૨૬.૧૩૯ ॥

એકવીં શતિવારં ચ વ્યશ્વસૂતરથધ્વજઃ ।
ગાઢમભ્યર્દિતસ્તીક્ષ્ણૈઃ શરૈર્ભીમેન સં યુગે ॥ ૨૬.૧૪૦ ॥

પ્રાણસં શયમાપન્નઃ સર્વલોકસ્ય પશ્યતઃ ।
રણં ત્યક્ત્વા પ્રદુદ્રાવ રુદન્ દુઃખાત્પુનઃ પુનઃ ॥ ૨૬.૧૪૧ ॥

દ્વાવિં શતિમયુદ્ધે તુ રામદત્તં સુભાસ્વરમ્ ।
અભેદ્યં રથમારુહ્ય વિજયં ધનુરેવ ચ ॥ ૨૬.૧૪૨ ॥

તદ્દત્તમેવ સઙ્ગૃહ્ય તૂણી ચાક્ષયસાયકૌ ।
આસસાદ રણે ભીમં કર્ણો વૈકર્તનો વૃષા ॥ ૨૬.૧૪૩ ॥

સુઘોર આસીત્સ તયોર્વિમર્દો ભીમસ્ય કર્ણસ્ય ચ દીર્ઘકાલમ્ ।
આકાશમાચ્છાદયતોઃ શરૌઘૈઃ પરસ્પરં ચૈવ સુરક્તનેત્રયોઃ ॥ ૨૬.૧૪૪ ॥

તતો ભીમો મહાબાહુઃ સહજાભ્યાં ચ સં યુતમ્ ।
ત્વાં તુ કુણ્ડલવર્મભ્યાં શક્નુયાં હન્તુમઞ્જસા ॥ ૨૬.૧૪૫ ॥

ઇતિ જ્ઞાપયિતું તસ્ય કુણ્ડલે કવચં તથા ।
શરૈરુત્કૃત્ય સમરે પાતયામાસ ભૂતલ્. એ ॥ ૨૬.૧૪૬ ॥

એવં તાન્યપકૃષ્યાહં હન્યાં ત્વામિતિ વેદયન્ ।
પુનશ્ચ બહુભિસ્તીક્ષ્ણૈઃ શરૈરેનં સમાર્દયત્ ॥ ૨૬.૧૪૭ ॥

તતસ્તુ ભીમસ્ય બભૂવ બુદ્ધિરસ્પર્ધિનઃ સર્વજયો હિ દત્તઃ ।
ચ્ચિહ્નક્ષ્ક્ષ્વ્ઽમુષ્ય રામેણ નચ સ્પૃધાઽયં કર્ણો મયા યુદ્ધ્યતિ કૃચ્છ્રગો હ્યયમ્ ॥ ૨૬.૧૪૮ ॥

તથાઽપિ મે ભગવાનત્યનુગ્રહાજ્જયં દદાત્યાત્મવચોઽપહાય ।
મયા તુમાન્યં વચનં હરેઃ સદા તસ્માદ્દાસ્યે વિવરં ત્વદ્ય શત્રોઃ ॥ ૨૬.૧૪૯ ॥

એવં સ્મૃત્વા તેન રન્ધ્રે પ્રદત્તે કર્ણોઽસ્ત્રવીર્યેણ ધનુર્ન્યકૃન્તત્ ।
રશ્મીન્ હયાનાં ચ તતો રથં સ તત્યાજ નૈજં બલમેવ વેદયન્ ॥ ૨૬.૧૫૦ ॥

ન મે રથાદ્યૈર્ધનુષાઽપિ કાર્યમિત્યેવ સ ખ્યાપયિતું વૃકોદરઃ ।
ખમુત્પપાતોત્તમવીર્યતેજા રથં ચ કર્ણસ્ય સમાસ્થિતઃ ક્ષણાત્ ॥ ૨૬.૧૫૧ ॥

ભીતસ્તુ કર્ણો રથકૂબરે તદા વ્યલીયતાતઃ સ વૃકોદરો રથાત્ ।
અવપ્લુતો જ્ઞાપયિતું સ્વશક્તિં નિરાયુધત્વેઽપ્યરિનિગ્રહાદૌ ॥ ૨૬.૧૫૨ ॥

નૈચ્છદ્ગૃહીતું વિનિહન્તુમેવ વા રથં ધનુર્વાઽસ્ય રણેઽપહર્તુમ્ ।
દ્રોણસ્ય યદ્વત્પૂર્વમતીવ શક્તોઽપ્યમાનયદ્રામવચોઽસ્ય ભક્ત્યા ॥ ૨૬.૧૫૩ ॥

સત્યાં કર્તું વાસવેશ્ચ પ્રતિજ્ઞાં સમ્માનયન્ વૈષ્ણવત્વાચ્ચ કર્ણમ્ ।
દાતું રન્ધ્રં સૂર્યજસ્ય પ્રયાતઃ શરક્ષેપાર્થં દુરમતિષ્ઠદત્ર ॥ ૨૬.૧૫૪ ॥

તતઃ કર્ણો દૂરગતં વૃકોદરં સમ્માનયન્તં રામવાક્યં વિજાનન્ ।
શરૈરવિધ્યત્સ ચ તાનવારયદ્ગજૈર્મૃતૈસ્તાંશ્ચ ચકર્ત કર્ણઃ ॥ ૨૬.૧૫૫ ॥

વ્યસૂન્ ગજાન્ પ્રક્ષિપન્તં સમેત્ય સં સ્પૃશ્ય ચાપેન વચશ્ચ દુષ્ટમ્ ।
સં શ્રાવયામાસ સુયોધનસ્ય પ્રીત્યૈ પ્રજાનન્નપિ તસ્ય વીર્યમ્ ॥ ૨૬.૧૫૬ ॥

સં શ્રાવયન્તં વચનાનિ રૂક્ષાણ્યપાહનદ્બાણવરૈસ્તદાઽર્જુનઃ ।
સ વર્મહીનઃ પાર્થબાણાભિતપ્તો વ્યપાગમદ્ભીમ આપાઽત્મયાનમ્ ॥ ૨૬.૧૫૭ ॥

કર્ણો ભીમે વાસવીં નૈવ શક્તિં વિમોક્તુમૈચ્છન્નૈવ બીભત્સુતોઽન્યાન્ ।
હન્યામિતિ પ્રાહ યતઃ સ કુન્ત્યૈ યદ્યપ્યવધ્યઃ સ તયાઽપિ ભીમઃ ॥ ૨૬.૧૫૮ ॥

નારાયણાસ્ત્રં શિરસિ પ્રપાતિતં ન યસ્ય લોમાપ્યદહચ્ચિરસ્થિતમ્ ।
કિં તસ્ય શક્તિઃ પ્રકરોતિ વાસવી તથાઽન્યદપ્યસ્ત્રશસ્ત્રં મહચ્ચ ॥ ૨૬.૧૫૯ ॥

ચ્ચહ્નક્ષ્ક્ષ્વ્।ભીમઃ કર્ણરથં પ્રાપ્તઃ શક્તિં નાઽદાતુમૈચ્છત ।

અભિપ્રાયં કેશવસ્ય જાનન્ હૈડિમ્બમૃત્યવે ।
તતઃ કર્ણોઽન્યમાસ્થાય રથમર્જુનમભ્યયાત્ ॥ ૨૬.૧૬૦॥

દિવ્યં રથં ધનુશ્ચૈવ કૃષ્ણબુદ્ધ્યોઽર્જુનો હરેત્ ।
ઇતિ ભીતસ્તુ તાં શક્તિમાદાયાર્જુનમૃત્યવે ।
યુદ્ધાયાયાદ્રથં ચાપં શક્તિં ચૈકત્ર નાકરોત્ ॥ ૨૬.૧૬૧॥

એકં હૃતં ચેદન્યત્સ્યાદિતિ મત્વા ભયાકુલઃ ।
બિભેતિ સર્વદા નીતેઃ કૃષ્ણસ્યામિતતેજસઃ ॥ ૨૬.૧૬૨॥

નિશ્ચિતો મરણાયૈવ મૃતિકાલે તુ તં રથમ્ ।
આરુહ્યાગાદ્ધિ પૂર્વં તુ ન કાલં મન્યતે મૃતેઃ ॥ ૨૬.૧૬૩॥

શક્તિં તુ તદ્રથગતાં પ્રસમીક્ષ્ય કૃષ્ણઃ સં સ્થાપ્ય પાર્થમપિ સાત્યકિમેવ યોદ્ધુમ્ ।
દત્ત્વા સ્વકીયરથમેવ વિરોચનસ્ય પુત્રેણ સોઽદિશદમુષ્ય બલં પ્રદાય ॥ ૨૬.૧૬૪॥

શિષ્યં ત્વશક્તમિહ મે પ્રતિયોધનાય પાર્થો હ્યવદાદિતિ સ સાત્યકિમીક્ષમાણઃ ।
સં સ્પર્ધયૈવ યુયુધે વિરથં ચકાર તેનૈવ સાત્યકિરમું હરિયાનસં સ્થઃ ॥ ૨૬.૧૬૫॥

ન કેશવરથે કશ્ચિત્સ્થિતો યાતિ પરાજયમ્ ।
અતશ્ચ સાત્યકિર્નાપ કર્ણેનાત્ર પરાજયમ્ ॥ ૨૬.૧૬૬॥

શસ્ત્રસઙ્ગ્રહકાલે તુ કુમારાણાં વ્રતં ભવેત્ ।
ઇત્યુક્તં જામદગ્ન્યેન ધનુર્વિદ્યાપુરાકૃતા ॥ ૨૬.૧૬૭॥

તચ્છત્રુવધરૂપં ચ પૂર્વાસિદ્ધં ચ ગૂહિતમ્ ।
અવિરુદ્ધં ચ ધર્મસ્ય કાર્યં રામસ્ય તુષ્ટિદમ્ ॥ ૨૬.૧૬૮॥

અનુપદ્રવં ચ લોકસ્યેત્યતો ભીમો વ્રતં ત્વિદમ્ ।
ચકાર તૂબરેત્યુક્તે હન્યામિતિ રહઃ પ્રભુઃ ॥ ૨૬.૧૬૯॥

અનુપદ્રવાય લોકસ્ય સુવ્યઞ્જચ્છ્મશ્રુમણ્ડલઃ ।
સુશ્મશ્રું માં ન કશ્ચિદ્ધિ તથા બ્રૂયાદિતિ સ્ફુટમ્ ।
તદર્જુનો વિજાનાતિ સ્નેહાદ્ભીમોદિતં રહઃ ॥ ૨૬.૧૭૦॥

શ્ચિચ્લક્ષ્વઽર્જુનસ્યાપિ ગાણ્ડીવં દેહીત્યુક્તો નિહન્મ્યહમ્ ।
ઇતિ તચ્ચ વિજાનાતિ ભીમ એકો નચાપરઃ ।
ગાણ્ડીવસ્યાઽગમં પૂર્વં જાનાત્યેવ હિ નારદાત્ ॥ ૨૬.૧૭૧॥

પ્રતિજ્ઞાં ભીમસેનસ્ય બ્રુવતઃ ફલ્ગુને રહઃ ।

દુર્યોધનસ્તુ શુશ્રાવ તાં ચ કર્ણાય સોઽબ્રવીત્ ॥ ૨૬.૧૭૨॥

અતૂબરોઽપિ તેનાસૌ તસ્માત્તૂબર ઇત્યલમ્ ।
ઉક્તઃ પ્રકોપનાયૈવ તસ્માદર્જુનમબ્રવીત્ ॥ ૨૬.૧૭૩॥

જાનાસિ મત્પ્રતિજ્ઞાં ત્વં ત્વત્પ્રતિજ્ઞામહં તથા ।
તત્ર હન્તવ્યતાં પ્રાપ્તો મમ વૈકર્તનોઽત્રહિ ॥ ૨૬.૧૭૪॥

પ્રતિજ્ઞાતો વધશ્ચાસ્ય ત્વયાઽપિ મદનુજ્ઞયા ।
અતસ્ત્વયા મયા વાઽયં હન્તવ્યઃ સૂતનન્દનઃ ॥ ૨૬.૧૭૫॥

ઇત્યુક્તો વાસવિઃ પ્રાહ હન્તવ્યોઽયં મયૈવ હિ ।
ત્વદીયોઽહં યતસ્તેન મત્કૃતં ત્વત્કૃતં ભવેત્ ॥ ૨૬.૧૭૬॥

ન ત્વત્કૃતં મત્કૃતં સ્યાદ્ગુરુર્મમ યતો ભવાન્ ।
અતો મયૈવ હન્તવ્ય ઇત્યુક્ત્વા કર્ણમબ્રવીત્ ॥ ૨૬.૧૭૭॥

રૂક્ષા વાચઃ શ્રાવિતોઽયં ભીમઃ કૃષ્ણસ્ય શ ૃણ્વતઃ ।
યચ્ચાભિમન્યુર્યુષ્માભિરેકઃ સમ્ભૂય પાતિતઃ ॥ ૨૬.૧૭૮॥

અતસ્ત્વાં નિહનિષ્યામિ ત્વત્પુત્રં ચ તવાગ્રતઃ ।
ઇત્યુક્તોઽન્યરથં પ્રાપ્ય કર્ણ આવીજ્જયદ્રથમ્ ॥ ૨૬.૧૭૯॥

દ્રૌણિકર્ણાભિગુપ્તં તં નાશકદ્ધન્તુમર્જુનઃ ।
તત્ર વેગં પરં ચક્રે દ્રૌણિઃ પાર્થનિવારણે ॥ ૨૬.૧૮૦॥

નચૈનમશકત્તર્તું યત્નવાનપિ ફલ્ગુનઃ ।
તયોરાસીચ્ચિરં યુદ્ધં ચિત્રં લઘુ ચ સુષ્ઠુ ચ ॥ ૨૬.૧૮૧॥

ઞ્ચ્લ્ક્ષ્વી।તદ્દૃષ્ટ્વા ભગવાન્ કૃષ્ણો લોહિતાયતિ ભાસ્કરે ।
અજિતે દ્રોણતનયે ત્વહતે ચ જયદ્રથે ।
અર્જુનસ્ય જયાકાઙ્ક્ષી સસર્જ તમ ઊર્જિતમ્ ॥ ૨૬.૧૮૨॥

તમોવ્યાપ્તે ગગને સૂર્યમસ્તં ગતં મત્વા દ્રૌણિપૂર્વાઃ સમસ્તાઃ ।
વિશશ્રમુઃ સૈન્ધવશ્ચાર્જુનસ્ય હતપ્રતિજ્ઞસ્ય મુખં સમૈક્ષત ॥ ૨૬.૧૮૩॥

તદા હરેરાજ્ઞયા શક્રસૂનુશ્ચકર્ત બાણેન જયદ્રથસ્ય ।
અગ્નિં વિવિક્ષન્નિવ દર્શિતઃ શિરસ્તદા વચઃ પ્રાહ જનાર્દનસ્તમ્ ॥ ૨૬.૧૮૪॥

નૈતચ્છિરઃ પાતય ભૂતલ્। એ ત્વમિતીરિતઃ પાશુપતાસ્ત્રતેજસા ।
દધાર બાણૈરનુપુઙ્ખપુઙ્ખૈઃ પુનસ્તમૂચે ગરુડધ્વજો વચઃ ॥ ૨૬.૧૮૫॥

ઇદં પિતુસ્તસ્ય કરે નિપાત્યતાં વરોઽસ્ય દત્તો હિ પુરાઽમુનાઽયમ્ ।
શિરો નિકૃત્તં ભુવિ પાતયેદ્યસ્તવાસ્ય ભૂયાચ્ચ શિરઃ સહસ્રધા ॥ ૨૬.૧૮૬॥

ઇતિ સ્મ વધ્યઃ સ પિતાઽપિ તેનેત્યુદીરિતે તસ્ય સન્ધ્યાક્રિયસ્ય ।
અઙ્કે વ્યધાત્તચ્છિર આશુ વાસવિઃ સ સમ્ભ્રમાત્તદ્ભુવિ ચ ન્યપાતયત્ ॥ ૨૬.૧૮૭॥

તતોઽભવત્તસ્ય શિરઃ સહસ્રધા હરિશ્ચ ચક્રે તમસો લયં પુનઃ ।
તદૈવ સૂર્યે સકલૈશ્ચ દૃષ્ટે હાહેતિ વાદઃ સુમહાનથાઽસીત્ ॥ ૨૬.૧૮૮॥

ભીમસ્તદા શલ્યસુયોધનાદીન્ કૃપં ચ જિત્વા વ્યનદત્સુભૈરવમ્ ।
કુર્વન્ સાહાય્યં ફલ્ગુનસ્યૈવ તુષ્ટો બભૂવ શૈનેય ઉતો હતે રિપૌ ॥ ૨૬.૧૮૯॥

અપૂરયત્પાઞ્ચજન્યં ચ કૃષ્ણો મુદા તદા દેવદત્તં ચ પાર્થઃ ।
ભીમસ્ય નાદં સહપાઞ્ચજન્યઘોષં શ્રુત્વા નિહતં સિન્ધુરાજમ્ ।
જ્ઞાત્વા રાજા ધર્મસુતો મુમોદ દુર્યોધનશ્ચાઽસ સુદુઃખિતસ્તદા ॥ ૨૬.૧૯૦॥

તતો દ્રૌણિમુખાં સેનાં સર્વાં ભીમોઽભ્યવર્તત ।
પાર્થઃ કર્ણમુખાઞ્છિષ્ટાન્ તતોઽભજ્યત તદ્બલમ્ ॥ ૨૬.૧૯૧॥

શીર્ણાં સેનાં પ્રવિવિશુર્ધૃષ્ટદ્યુમ્નપુરોગમાઃ ।
તતસ્તં દેશમાપુસ્તે યત્ર ભીમધનઞ્જયૌ ॥ ૨૬.૧૯૨॥

ઋલ્ક્ક્વીઇ।તત એકીકૃતાઃ સર્વે પાણ્ડવાઃ સહસોમકાઃ ।
પરાન્ વિદ્રાવયામાસુસ્તે ભીતાઃ પ્રાદ્રવન્ દિશઃ ॥ ૨૬.૧૯૩॥

વિદ્રાપ્યમાણં સૈન્યં તં દૃષ્ટ્વા દુર્યોધનો નૃપઃ ।
જયદ્રથવધાચ્ચૈવ કુપિતોઽભ્યદ્રવત્પરાન્ ॥ ૨૬.૧૯૪॥

સ ભીમસેનં ચ ધનઞ્જયં ચ યુધિષ્ઠિરં માદ્રવતીસુતૌ ચ ।
ધૃષ્ટદ્યુમ્નં સાત્યકિં દ્રૌપદેયાન્ સર્વાનેકઃ શરવર્ષૈર્વવર્ષ ॥ ૨૬.૧૯૫॥

તે વિવ્યધુસ્તં બહુભિઃ શિલીમુખૈઃ સ તાનનાદૃત્ય ચકર્ત બાણૈઃ ।
ધનૂંષિ ચિત્રાણિ મહારથાનાં ચકાર સઙ્ખે વિરથૌ યમૌ ચ ॥ ૨૬.૧૯૬॥

આદાય ચાપાનિ પરાણિ તેઽપિ દુર્યોધનં વવૃષુઃ સાયકૌઘૈઃ ।
અચિન્તયિત્વૈવ શરાન્સ એકો ન્યવારયત્તાનખિલાંશ્ચ બાણૈઃ ॥ ૨૬.૧૯૭॥

તં ગાહમાનં દ્વિષતાં બહૂનાં મધ્યે દ્રોણદ્રૌણિકૃપપ્રધાનાઃ ।
દૃષ્ટ્વા સર્વે જુગુપુઃ સ્વાત્તચાપા અનારતં બાણગણાન્ સૃજન્તઃ ॥ ૨૬.૧૯૮॥

સુયોધનઃ કર્ણમાહ જહિ ભીમમિમં યુધિ ।
સ આહ નૈષ શક્યો હિ જેતું દેવૈઃ સવાસવૈઃ ॥ ૨૬.૧૯૯॥

દૈવાજ્જીવામ્યહં રાજન્ યુદ્ધ્યનેનાતિપીડિતઃ ।
અતો ઘટામહે શક્ત્યા જયો દૈવે સમાહિતઃ ॥ ૨૬.૨૦૦॥

દુર્યોધનો દ્રોણમાહ સૈન્ધવસ્ત્વદુપેક્ષયા ।
પાર્થેન નિહતો ભીમસાત્યકિભ્યાં ચ મે બલમ્ ॥ ૨૬.૨૦૧॥

પ્રતિજ્ઞા ચ પરિત્યક્તા પાણ્ડવસ્નેહતસ્ત્વયા ।
ઇત્યુક્તઃ કુપિતો દ્રોણઃ પ્રતિજ્ઞામકરોત્તતઃ ॥ ૨૬.૨૦૨॥

ઇતઃ પરં નૈવ રણાદ્રાત્રાવહનિ વા ક્વચિત્ ।
ગચ્છેયં નચ મોક્ષ્યામિ વર્મ બદ્ધં કથઞ્ચન ॥ ૨૬.૨૦૩॥

મત્પુત્રશ્ચ ત્વયા વાચ્યઃ પાઞ્ચાલાન્નૈવ શેષયેઃ ।
સદૌહિત્રાનિતીત્યુક્ત્વા વિજગાહે નિશાગમે ॥ ૨૬.૨૦૪॥

ચ્ચિલ્લક્ષક્ષ્ેહમૂ પરેષામભ્યાગાદ્ધૃષ્ટદ્યુમ્નસ્તમાશુ ચ ।
દ્રૌણિદુર્યોધનૌ તત્ર વિરથીકૃત્ય મારુતિઃ ।
દ્રાવયામાસ તત્સૈન્યં પશ્યતાં સર્વભૂભૃતામ્ ॥ ૨૬.૨૦૫॥

અક્ષોહિણ્યસ્તુ સપ્તૈવ સેનયોરુભયોરપિ ।
હતાસ્તાસાં ચ ભીમેન તિસ્રો દ્વે ફલ્ગુનેન ચ ॥ ૨૬.૨૦૬॥

સૌભદ્રસાત્યકિમુખૈસ્તન્મધ્યે ષોડશાં શકઃ ।
હૈડિમ્બપાર્ષતમુખૈસ્ત્રયાચ્ચ દશમાં શકઃ ॥ ૨૬.૨૦૭॥

ભીષ્મદ્રોણદ્રૌણિભિશ્ચ દ્વે સમં નિહતે તદા ।
તદન્યૈર્મિલ્. ઇતૈઃ સર્વૈસ્તચ્ચતુર્થાં શ એવ ચ ॥ ૨૬.૨૦૮॥

તતો રાત્રૌ પઞ્ચભિશ્ચ પાર્થાઃ ષડ્ભિશ્ચ કૌરવાઃ ।
અક્ષોહિણીભિઃ સં વ્યૂહ્ય યુદ્ધં ચક્રુઃ સુદારુણમ્ ।
ભીમં સેનાં દ્રાવયન્તં પુનઃ કર્ણઃ સમાસદત્ ॥ ૨૬.૨૦૯॥

સ કર્ણપુરતો ભીમો દુષ્કર્ણં કર્ણમેવ ચ ।
દુર્યોધનસ્યાવરજૌ નિષ્પિપેષ પદા ક્ષણાત્ ।
રથાશ્વધ્વજસૂતૈશ્ચ સહ તૌ ન વ્યદૃશ્યતામ્ ॥ ૨૬.૨૧૦॥

નિરાયુધોઽહમિતિ માં ત્વમાત્થ પુરુષં વચઃ ।

નિરાયુધઃ પદૈવાહં ત્વાં હન્તુમશકં તદા ॥ ૨૬.૨૧૧॥

ઇતિ કર્ણસ્ય તૌ ભીમઃ સંજ્ઞયા જ્ઞાપયન્ ભુવિ ।
પદા પિપેષ કાલિઙ્ગં મુષ્ટિનૈવ જઘાન હ ॥ ૨૬.૨૧૨॥

મુષ્ટિના ત્વદ્વધાયાહં સમર્થ ઇતિ કિં વદે ।
તસ્માન્મયા રક્ષિતસ્ત્વમિતિ જ્ઞાપયિતું પ્રભુઃ ।
સાશ્વસૂતધ્વજરથઃ કાલિઙ્ગો મુષ્ટિચૂર્ણિતઃ ॥ ૨૬.૨૧૩॥

કેતુમાંશ્ચ પિતા તસ્ય શક્રદેવઃ શ્રુતાયુધઃ ।
અક્ષોહિણ્યા સેનયા ચ સહ ભીમેન પાતિતાઃ ।
ખડ્ગયુદ્ધે પુરા ભીષ્મે સેનાપત્યં પ્રકુર્વતિ ॥ ૨૬.૨૧૪॥

ઋ્ય્લ્ક્ષ્ક્ષ્।કર્ણાનુજાન્ ધ્રુવાદ્યાંશ્ચ બહૂન્ જઘ્ને સ વૈ નિશિ ।
સંજ્ઞાં ભીમકૃતાં જ્ઞાત્વા શક્તિં ચિક્ષેપ ચાપરામ્ ।
કર્ણઃ શક્તિર્મયા દિવ્યા ન મુક્તા તેન જીવસિ ॥ ૨૬.૨૧૫॥

ઇતિ જ્ઞાપયિતું તાં તુ જ્ઞાત્વા ભીમઃ ક્ષણાત્તદા ।
ખમુત્પત્ય ગૃહીત્વા ચ કર્ણે ચિક્ષેપ સત્વરઃ ॥ ૨૬.૨૧૬॥

યદિ ત્વયા તદા મુક્તા શક્તિસ્ત્વાં સા હનિષ્યતિ ।
ઇતિ જ્ઞાપયિતું સા ચ કર્ણરક્ષણકાઙ્ક્ષિણા ॥ ૨૬.૨૧૭॥

મુક્તા દક્ષભુજે સાઽથ વિદાર્ય ધરણીં તથા ।
ભિત્ત્વા વિવેશ કર્ણસ્ય દર્શયન્તી નિદર્શનમ્ ॥ ૨૬.૨૧૮॥

તતો ભીમઃ પુનઃ સ્વં તુ રથમાસ્થાય ચાપભૃત્ ।
કર્ણસ્ય પુરતઃ શત્રૂન્ દ્રાવયામાસ સર્વતઃ ॥ ૨૬.૨૧૯॥

તં કર્ણો વારયામાસ શરૈઃ સન્નતપર્વભિઃ ।
ભીમઃ કર્ણરથાયૈવ ગદાં ચિક્ષેપ વેગતઃ ॥ ૨૬.૨૨૦॥

સ તદ્ગદાવિઘાતાય સ્થૂણાકર્ણાસ્ત્રમાસૃજત્ ।
તેનાસ્ત્રેણ પ્રતિહતા સા ગદા ભીમમાવ્રજત્ ॥ ૨૬.૨૨૧॥

ભીમો ગદાં સમાદાય કર્ણસ્ય રથમારુહત્ ।
તયા સઞ્ચૂર્ણયામાસ કર્ણસ્ય રથકૂબરમ્ ॥ ૨૬.૨૨૨॥

એવં ત્વચ્ચૂર્ણને શક્તો મત્કામાત્ત્વં હિ જીવસિ ।
એવં નિદર્શયિત્વૈવ પુનઃ સ્વં રથમાવ્રજત્ ॥ ૨૬.૨૨૩॥

પુનઃ કર્ણપુરઃ સેનાં જઘાન બહુશો રણે ।
કર્ણસ્તુ તં પરિત્યજ્ય સહદેવમુપાદ્રવત્ ॥ ૨૬.૨૨૪॥

સ તુ તં વિરથીકૃત્ય ધનુઃ કણ્ઠેઽવસજ્ય ચ ।
કુત્સયામાસ બહુશઃ સ તુ નિર્વેદમાગમત્ ॥ ૨૬.૨૨૫॥

ચ્ચ્ઇલ્ક્ષ્ક્ષંઅ હન્તુમૈચ્છત્તં કર્ણઃ પૃથાયૈ સ્વં વચઃ સ્મરન્ ।
તં વિજિત્ય રણે કર્ણો જઘ્ને પાર્થવરૂથિનીમ્ ॥ ૨૬.૨૨૬॥

તતો દ્રૌણિર્વિવિધૈર્બાણસઙ્ઘૈર્જઘાન પાર્થસ્ય ચમૂં સમન્તતઃ ।
સા હન્યમાના રણકોવિદેન ન શં લેભે મૃત્યુનાઽર્તા પ્રજેવ ॥ ૨૬.૨૨૭॥

દૃષ્ટ્વા સેનાં દ્રૌણિબલાભિભૂતાં તમાહ્વયામાસ ઘટોત્કચો યુધે ।
દ્રૌણિસ્તમાહાઽલમલં ન વત્સ પુત્રસ્તાતં યોધયસ્વાદ્ય માં ત્વમ્ ॥ ૨૬.૨૨૮॥

ઇત્યુક્ત ઊચે ન પિતા મમ ત્વં સખા પિતુર્યદ્યપિ શત્રુસં શ્રયાત્ ।
અરિશ્ચ મેઽસીતિ તમાહ યદ્યરિં માં મન્યસે તદ્વદહં કરોમિ તે ॥ ૨૬.૨૨૯॥

ઇત્યૂચિવાઞ્છક્રધનુઃ પ્રકાશં વિષ્ફાર્ય ચાપં પ્રકિરઞ્છરૌઘાન્ ।
અભ્યાગમદ્રાક્ષસમુગ્રવેગઃ સ્વસેનયા સોઽપિ તમભ્યવર્તત ॥ ૨૬.૨૩૦॥

સ રક્ષસાં લક્ષસમાવૃતો બલી નૃભિશ્ચ વીરૈર્બહુભિઃ સુશિક્ષિતૈઃ ।
અક્ષોહિણીમાત્રબલેન રાક્ષસઃ સઙ્ક્ષોભયામાસ ગુરોઃ સુતં શરૈઃ ॥ ૨૬.૨૩૧॥

સ તેન બાણૈર્બહુભિઃ પ્રપીડિતો વિભિન્નગાત્રઃ ક્ષતજાપ્લુતાઙ્ગઃ ।
વ્યાવૃત્ય નેત્રે કુપિતો મહદ્ધનુર્વિષ્ફાર્ય બાણૈ રજનીં ચકાર ॥ ૨૬.૨૩૨॥

સોઽક્ષોહિણીં તાં ક્ષણમાત્રતઃ ક્ષરન્મહાશરાં સ્તાનપિ રાક્ષસાન્ ક્ષયમ્ ।
નિનાય પુત્રં ચ ઘટોત્કચસ્ય નિષ્ટ્યં પુરા યોઽઞ્જનવર્મનામકઃ ॥ ૨૬.૨૩૩॥

નિરીક્ષ્ય સેનાં સ્વસુતં ચ પાતિતં ઘટોત્કચો દ્રોણસુતં શરેણ ।
વિવ્યાધ ગાઢં સ તુ વિહ્વલો ધ્વજં સમાશ્રિતશ્ચાઽશુ સસંજ્ઞકોઽભવત્ ॥ ૨૬.૨૩૪॥

ઉત્થાય બાણં યમદણ્ડકલ્પં સન્ધાય ચાપે પ્રવિકૃષ્ય રાક્ષસે ।
મુમોચ તેનાભિહતઃ પપાત વિનષ્ટસંજ્ઞઃ સ્વરથે ઘટોત્કચઃ ॥ ૨૬.૨૩૫॥

વિમૂર્ચ્છિતં સારથિરસ્ય દૂરં નિનાય યુદ્ધાજ્જગતો વિપશ્યતઃ ।
દ્રૌણિશ્ચ સેનાં નિશિ તૈઃ શરોત્તમૈર્વ્યદ્રાવયત્પાણ્ડવસોમકાનામ્ ॥ ૨૬.૨૩૬॥

સંજ્ઞામવાપ્યાથ ઘટોત્કચોઽપિ ક્રુદ્ધોઽવિશત્કૌરવસૈન્યમાશુ ।
વિદ્રાવયામાસ સ બાણવર્ષૈઃ પ્રકમ્પયામાસ મહારથાં સ્તથા ॥ ૨૬.૨૩૭॥

અ્અ્લ્ક્ષ્ક્ષ્ક્ષી। તદૈવ પાર્થં પ્રતિ યોદ્ધુમાગતં વૈકર્તનં વીક્ષ્ય જગત્પતિર્હરિઃ ।
ઘટોત્કચં પ્રાહિણોચ્છક્તિમુગ્રાં તસ્મિન્મોક્તું પાર્થરક્ષાર્થમેવ ॥ ૨૬.૨૩૮॥

સ કર્ણમાહૂય યુયોધ તેન તસ્યાનુ દુર્યોધનપૂર્વકાશ્ચ યે ।
દ્રોણેન ચૈતાન્ સમરે સ એકો નિવારયામાસ મમર્દ ચાધિકમ્ ॥ ૨૬.૨૩૯॥

તે બાધ્યમાના બહુશો બલીયસા કર્ણં પુરોધાય તમભ્યયોધયન્ ।
ન વિવ્યથે તત્ર રણે સ કર્ણઃ સ્વવીર્યમાસ્થાય મહાસ્ત્રવેત્તા ॥ ૨૬.૨૪૦॥

નિવારયામાસ ગુરોઃ સુતં તદા ભીમસ્ત્રિગર્તાગ્છતમન્યુનન્દનઃ ।
અલમ્બલો નામ તદૈવ રાક્ષસઃ સમાગમદ્ભીમસુતં નિહન્તુમ્ ॥ ૨૬.૨૪૧॥

યુદ્ધ્વા પ્રગૃહ્યૈનમથો નિપાત્ય ઘટોત્કચો ભૂમિતલ્। એઽસિનાઽસ્ય ।
ઉત્કૃત્ય શીર્ષં તુ સુયોધનેઽક્ષિપદ્વિષેદુરત્રાખિલભૂમિપાલાઃ ॥ ૨૬.૨૪૨॥

અલાયુધોઽથાઽગમદુગ્રવીર્યો નરાશનસ્તં સ ઘટોત્કચોઽભ્યયાત્ ।
યુદ્ધ્વા મુહૂર્તં સ તુ તેન ભૂમૌ નિપાત્ય તં યજ્ઞપશું ચકાર ॥ ૨૬.૨૪૩॥

અથાસ્ય શિર ઉદ્ધૃત્ય ક્રોધાદ્દુર્યોધનોરસિ ।
ચિક્ષેપ તેન સમ્ભ્રાન્તાઃ સર્વે દુર્યોધનાદયઃ ॥ ૨૬.૨૪૪॥

ઘટોત્કચબલખ્યાત્યૈ સમર્થેનાપિ યો રણે ।
ન હતો ભીમસેનેન હતોઽસ્મિન્ ભૈમસેનિના ॥ ૨૬.૨૪૫॥

સર્વે સઞ્ચોદયામાસુઃ કર્ણં શક્તિવિમોક્ષણે ।
અસ્મિન્ હતે હતં સર્વં કિં નઃ પાર્થઃ કરિષ્યતિ ॥ ૨૬.૨૪૬॥

એવં સઞ્ચોદ્યમાનઃ સ ધાર્તરાષ્ટ્રૈઃ પુનઃ પુનઃ ।
હૈડિમ્બેનાર્દ્યમાનૈસ્તુ સ્વયં ચ ભૃશપીડિતઃ ।
આદત્ત શક્તિં વિપુલાં પાકશાસનસમ્મતામ્ ॥ ૨૬.૨૪૭॥

તામમ્બરસ્થાય ઘટોત્કચાય શૈલોપમાયાતુલવિક્રમાય ।
ચિક્ષેપ મૃત્યો રસનોપમામલં પ્રકાશયન્તીં પ્રદિશો દિશશ્ચ ॥ ૨૬.૨૪૮॥

અ્અ્લ્ક્ષ્ક્ષ્ક્ષીઇંઇર્ભિણવક્ષાઃ સ તયા પપાત વિચૂર્ણયચ્છત્રુબલં હતોઽપિ ।
તસ્મિન્ હતે જહૃષુર્ધાર્તરાષ્ટ્રા ઉચ્ચુક્રુશુર્દુધુવુશ્ચામ્બરાણિ ॥ ૨૬.૨૪૯॥

તદા નનર્ત કેશવઃ સમાશ્લિષ્ય ફલ્ગુનમ્ ।
નનાદ શઙ્ખમાધમજ્જહાસ ચોરુનિસ્વનઃ ॥ ૨૬.૨૫૦॥

તમપૃચ્છદ્ગુડાકેશઃ કિમેતદિતિ દુર્મનાઃ ।
હતે સુતેઽગ્રજેઽસ્માકં વીરે કિં નન્દસિ પ્રભો ॥ ૨૬.૨૫૧॥

તમાહ ભગવાન્ કૃષ્ણો દિષ્ટ્યા જીવસિ ફલ્ગુન ।
ત્વદર્થં નિહિતા શક્તિર્વિમુક્તાઽસ્મિન્ હિ રાક્ષસે ॥ ૨૬.૨૫૨॥

તતો યુધિષ્ઠિરો દુઃખાદમર્ષાચ્ચાભ્યવર્તત ।
કર્ણં પ્રતિ તમાહાથ કૃષ્ણદ્વૈપાયનઃ પ્રભુઃ ॥ ૨૬.૨૫૩॥

યયાઽર્જુનો નિહન્તવ્યસ્તયાઽસૌ રાક્ષસો હતઃ ।
તન્મા શુચસ્ત્વં રાજેન્દ્ર દિષ્ટ્યા જીવતિ ફલ્ગુનઃ ।
ઇત્યુક્ત્વા પ્રયયૌ વ્યાસસ્તતો યુદ્ધમવર્તત ॥ ૨૬.૨૫૪॥

ભીમાર્જુનાભ્યામિહ હન્યમાને બલે કુરૂણામિતરૈશ્ચ પાણ્ડવે ।
પ્રદીપહસ્તા અથ યોધકાશ્ચ સર્વેઽપિ નિદ્રાવશગા બભૂવુઃ ॥ ૨૬.૨૫૫॥

દૃષ્ટ્વૈવ તાનાહ ધનઞ્જયસ્તદા સ્વપસ્યન્તુ યાવચ્છશિનઃ પ્રકાશઃ ।
ઇતીરિતા આશિષઃ ફલ્ગુનાય પ્રયુજ્ય સર્વે સુષુપુર્યથાસ્થિતાઃ ॥ ૨૬.૨૫૬॥

પુનશ્ચ ચન્દ્રેઽભ્યુદિતે યુધે તે સમાયયુઃ શસ્ત્રમહાસ્ત્રવર્ષાઃ ।
તત્રાઽયાતઃ સાત્યકિં સોમદત્તો ભૂરિશ્ચ તાભ્યાં યુયુધે સ એકઃ ॥ ૨૬.૨૫૭॥

હતૌ ચ તૌ પેતતુસ્તેન ભૂમૌ બાહ્લીક એનં સમરે ત્વયોધયત્ ।
સ સાત્યકિં વિરથીકૃત્ય બાણં વધાય તસ્યાઽશુ મુમોચ વીરઃ ॥ ૨૬.૨૫૮॥

ચિચ્છેદ તં ભીમસેનસ્ત્રિધૈવ તસ્મૈ શતઘ્નીં પ્રજહાર બાહ્લિકઃ ।
તયા હતો વિહ્વલિતો વૃકોદરો જઘાન તં ગદયા સોઽપતચ્ચ ॥ ૨૬.૨૫૯॥

બાહ્લીકઃ પ્રાર્થયામાસ પૂર્વં સ્નેહપુરસ્સરમ્ ।
ચ્ચ્લ્ક્ષ્ક્ષ્વ્।ભીમં ત્વયૈવ હન્તવ્યો રણેઽહં પ્રીતિમિચ્છતા ।
તદા યશશ્ચ ધર્મં ચ લોકં ચ પ્રાપ્નુયામહમ્ ॥ ૨૬.૨૬૦॥

ઇત્યુક્ત આહ તં ભીમો નિતરાં વ્યથિતસ્તદા ।
હન્યાં નૈવાન્યથા યુદ્ધે તત્તે શુશ્રૂષણં ભવેત્ ।
ઇતિ તેન હતસ્તત્ર ભીમસેનેન બાહ્લિકઃ ॥ ૨૬.૨૬૧॥

હતે બાહ્લીકે કૌરવા ભીમસેનમભ્યાજગ્મુઃ કર્ણદુર્યોધનાદ્યાઃ ।
દ્રૌણિં પુરસ્કૃત્ય ગુરું ચ પાર્ષતઃ સભ્રાતૃકઃ સાત્યકિના સમભ્યયાત્ ॥ ૨૬.૨૬૨॥

સં શમ્રકૈરેવ પાર્થો યુયોધ તદ્યુદ્ધમાસીદતિ રૌદ્રમદ્ભુતમ્ ।

અક્ષોહિણી તત્ર ભીમાર્જુનાભ્યાં નિસૂદિતા રાત્રિયુદ્ધે સમસ્તા ॥ ૨૬.૨૬૩॥

તતઃ સૂર્યશ્ચાભ્યુદિતસ્તદાઽતિઘોરં દ્રોણઃ કર્મ યુદ્ધે ચકાર ।
સ પાઞ્ચાલાનાં રથવૃન્દં પ્રવિશ્ય જઘાન હસ્ત્યશ્વરથાન્નરાંશ્ચ ॥ ૨૬.૨૬૪॥

વિદ્રાવિતાસ્તેન મહારથાશ્ચ નૈવાવિન્દઞ્છર્મ બાણાન્ધકારે ।
યુવેવ વૃદ્ધોઽપિ ચચાર યુદ્ધે સ ઉગ્રધન્વા પરમાસ્ત્રવેત્તા ॥ ૨૬.૨૬૫॥

રથાર્બુદં તેન હતં ચ તત્ર તતઃ સહસ્રં ગુણિતં નરાણામ્ ।
તતો દશાં શો નિહતો હયાનાં ગજાર્બુદં ચૈવ રણોત્કટેન ॥ ૨૬.૨૬૬॥

તથા વિરાટદ્રુપદૌ શરાભ્યાં નિનાય લોકં પરમાજિમધ્યે ।
તતો વિજિત્યૈવ ગુરોઃ સુતાદીન્ ધૃષ્ટદ્યુમ્નં ભીમસેનો જુગોપ ॥ ૨૬.૨૬૭॥

ધૃષ્ટદ્યુમ્નો ભીમસેનાભિગુપ્તો દ્રોણં હન્તું યત્નમુચ્ચૈશ્ચકાર ।
નિવારયામાસ ગુરુઃ શરૌઘૈર્ધૃષ્ટદ્યુમ્નં સોઽપિ તં સાયકેન ।
વિવ્યાધ તેનાભિહતઃ સ મૂર્ચ્છામવાપ વિપ્રો નિષસાદ ચાઽશુ ॥ ૨૬.૨૬૮॥

ધૃષ્ટદ્યુમ્નઃ સત્વરં ખડ્ગચર્મણી આદાય તસ્યાઽરુરુહે રથોત્તમમ્ ।
સંગ્રામવાપ્યાથ ગુરુઃ શરૌઘૈઃ પ્રાદેશમાત્રૈર્વ્યથયામાસ તં ચ ॥ ૨૬.૨૬૯॥

સ તૈરતિવ્યથિતસ્તદ્રથાચ્ચ પરાવૃત્તઃ સ્વં રથમારુરોહ ।
સુસં રબ્ધૌ તૌ પુનરેવ યુદ્ધં સઞ્ચક્રતુર્વૃષ્ટશરામ્બુધારૌ ॥ ૨૬.૨૭૦॥

ઞ્ચ્લ્ક્ષ્ક્ષ્વ્ંઇવાર્ય શત્રું સ શરૈર્બ્રહ્માસ્ત્રમસૃજદ્દ્વિજઃ ।
તેન સન્દાહયામાસ પાઞ્ચાલાન્ સુબહૂન્ રણે ।
પુરુજિત્કુન્તિભોજશ્ચ તેનાન્યે ચ હતાસ્તદા ॥ ૨૬.૨૭૧॥

ભીમોઽર્જુનઃ સાત્યકિશ્ચ પર્યાયેણ ગુરોઃ સુતમ્ ।
દૂરતો વારયામાસુર્મહત્યા સેનયા સહ ॥ ૨૬.૨૭૨॥

કર્ણદુર્યોધનાદીંશ્ચ શલ્યં ભોજં કૃપં તથા ।
ભીમાર્જુનૌ શરૌઘેણ વારયામાસતૂ રણે ॥ ૨૬.૨૭૩॥

તત્ર ભીમો ગજાનીકં જયત્સેનં ચ માગધમ્ ।
જઘાન સુબહૂંશ્ચૈવ માગધાનાં રથવ્રજાન્ ॥ ૨૬.૨૭૪॥

અથ માલ્। અવરાજસ્ય ત્વશ્વત્થામાભિધં ગજમ્ ।
ભીમસેનહતં દૃષ્ટ્વા વાસુદેવપ્રચોદિતઃ ।
અશ્વત્થામા હત ઇતિ પ્રાહ રાજા યુધિષ્ઠિરઃ ॥ ૨૬.૨૭૫॥

અશ્વત્થામવધં શ્રુત્વા નાહં યોત્સ્ય ઇતિ સ્વયમ્ ।
પુરોક્તં ધર્મજાયૈવ તેન દ્રોણો યુધિષ્ઠિરમ્ ॥ ૨૬.૨૭૬॥

બ્રૂહિ સત્યમિતિ પ્રાહ સત્યમિત્યેવ સોઽબ્રવીત્ ।
ઉપાં શુ કુઞ્જરશ્ચેતિ દ્રોણોઽતો વ્યથિતોઽભવત્ ॥ ૨૬.૨૭૭॥

તસ્ય ભીમો રથેષાં ચ ગૃહીત્વા ન તવેદૃશમ્ ।
યોગ્યં ગુણવતો નિત્યં પરધર્મોપજીવનમ્ ॥ ૨૬.૨૭૮॥

ઇત્યાહ ખસ્થા મુનયશ્ચાલમેહીતિ તં તદા ।
ઊચુસ્તદખિલં જ્ઞાત્વા દ્રોણઃ શસ્ત્રમવાસૃજત્ ॥ ૨૬.૨૭૯॥

સ ન્યસ્ય કર્માણિ તદાઽખિલાનિ યોગારૂઢઃ પરમં વાસુદેવમ્ ।
સર્વેશ્વરં નિત્યનિરસ્તદોષં ધ્યાયન્મુક્ત્વા દેહમગાત્સ્વધામ ।
તં કેશવઃ પાણ્ડવા ગૌતમશ્ચ યાન્તં સ્વલોકં દદૃશુર્વિહાયસા ॥ ૨૬.૨૮૦॥

ધૃષ્ટદ્યુમ્નઃ પાણ્ડવૈર્વાર્યમાણોઽપ્યગાત્ખડ્ગં ચર્મ ચાઽદાય તત્ર ।
છિત્વાઽસિના તસ્ય શિરઃ પુનશ્ચ રથં સ્વકીયં ત્વરયા સમાસ્થિતઃ ।
ચ્ઋલ્ક્ષક્ષ્વ।દૃષ્ટ્વા કૃપસ્તં સુભૃશં ભયાર્દિતઃ સમ્પ્રાદ્રવદ્ધાજિનમેકમાસ્થિતઃ ॥ ૨૬.૨૮૧॥

સઞ્છિન્ને દ્રોણશિરસિ ગર્હયામાસ વાસવિઃ ।
યુધિષ્ઠિરં ચ પાઞ્ચાલ્યં સાત્યકિશ્ચાપિ કોપિતઃ ॥ ૨૬.૨૮૨॥

ધૃષ્ટદ્યુમ્નસ્તુ તાવાહ કથં ભૂરિશ્રવા હતઃ ।
ઇતિ તં સાત્યકિઃ ક્રુધ્દ્વો ગદાપાણિઃ સમભ્યયાત્ ।
આહ્વયામાસ પાઞ્ચાલ્યસ્તં ધૃતાસિરવિસ્મયઃ ॥ ૨૬.૨૮૩॥

તદા જગ્રાહ શૈનેયં ભીમઃ કૃષ્ણપ્રચોદિતઃ ।
શમયામાસ પાર્થં ચ પાઞ્ચાલ્યસ્નેહયન્ત્રિતઃ ॥ ૨૬.૨૮૪॥

તે વાસુદેવેન તદાઽનુશિક્ષિતાઃ સ્નેહં પુનઃ પૂર્વવદાપુરુત્તમમ્ ।
યત્તાશ્ચ યુદ્ધાય સમુદ્યતાશ્ચ તદાઽગમદ્દ્રૌણિરપ્યાત્તધન્વા ॥ ૨૬.૨૮૫॥

આશ્રુત્ય તાતં નિહતં પ્રતિજ્ઞાં ચકાર નિઃ શેષરિપુપ્રમાથને ।
નારાયણાસ્ત્રં વિસસર્જ કોપાત્તદા ભીતા ભીમમૃતે સમસ્તાઃ ॥ ૨૬.૨૮૬॥

યુધિષ્ઠિરઃ પ્રાહ વિષણ્ણચેતનઃ શૈનેયપૂર્વાઃ પ્રતિયાન્તુ સર્વે ।
સભ્રાતૃકોઽહં દ્રૌણિવરાસ્ત્રમગ્નો ભવેયમિત્યત્ર જગાદ કેશવઃ ॥ ૨૬.૨૮૭॥

નમધ્વમસ્ત્રસ્ય તતો વિમોક્ષ્યથેત્યથ પ્રણેમુશ્ચ ધનઞ્જયાદિકાઃ ।

સર્વે ન ભીમસ્તદમુષ્ય મૂર્ધ્નિ પપાત સોઽગ્નાવિવ સં સ્થિતોઽગ્નિઃ ॥ ૨૬.૨૮૮॥

અદહ્યમાને ભીમેઽપિ વહ્નૌ વહ્નિરિવ સ્થિતે ।
અવેષ્ટયદ્વારુણેન પાર્થોઽત્રાઽત્મપ્રપત્તયે ॥ ૨૬.૨૮૯॥

ન દેહે પતિતાસ્ત્રસ્ય બહિર્વેષ્ટનતઃ ફલમ્ ।
તથાઽપિ સ્નેહવશગો વેષ્ટયામાસ ફલ્ગુનઃ ॥ ૨૬.૨૯૦॥

અમોઘત્વં નિજાસ્ત્રસ્ય ભીમસ્યાવધ્યતામપિ ।
સાધયન્ સાર્જુનઃ કૃષ્ણો ભીમસ્ય રથમારુહત્ ॥ ૨૬.૨૯૧॥

વેષ્ટિતં વારુણાસ્ત્રેણ પ્રવિષ્ટં બાહ્યતસ્તદા ।
સહિતત્વાત્કેશવેન નરત્વાદથ ફલ્ગુનમ્ ॥ ૨૬.૨૯૨॥

ઋચ્લ્ક્ષ્ક્ષ્વી। તદસ્ત્રં નાદહત્તાભ્યાં સ્વરથાદવરોપિતે ।
ભીમ આચ્છિન્નહેતૌ ચ તદસ્ત્રં શાન્તિમાગમત્ ॥ ૨૬.૨૯૩॥

શુદ્ધક્ષત્રિયધર્મેષુ નિરતત્વાદ્વૃકોદરઃ ।
વાહનાદવતીર્ણાન્યૈઃ પ્રણતેઽપિ નિરાયુધૈઃ ।
સાયુધઃ સરથોઽયુદ્ધ્યદવિષહ્યમપીશ્વરૈઃ ॥ ૨૬.૨૯૪॥

સ્વધર્મહાનૌ મિત્રાણાં કર્તવ્યં યન્નિષેધનમ્ ।
અતઃ સોઽન્યાનપિ પ્રાહ મા ગમધ્વમિતિ સ્વયમ્ ॥ ૨૬.૨૯૫॥

નમસ્કાર્યમપિ હ્યસ્ત્રં ન નમ્યં જીવનેચ્છયા ।
સમરે શત્રુણા મુક્તં તસ્માત્તન્ન ચકાર સઃ ॥ ૨૬.૨૯૬॥

અસ્ત્રાભિમાની વાયુર્હિ દેવતાઽસ્ય હરિઃ સ્વયમ્ ।
તસ્માદ્ભીમં સ્વરૂપત્વાન્નાદહચ્ચાગ્નિમગ્નિવત્ ॥ ૨૬.૨૯૭॥

મનસૈવાઽદરં ચક્રે ભીમોઽસ્ત્રે ચ હરૌ તદા ।
ક્ષત્રધર્માનુસારેણ ન નનામ ચ બાહ્યતઃ ॥ ૨૬.૨૯૮॥

વાસુદેવઃ સ્વકીયાસ્ત્રં ભીમં ચામોઘમેવ તુ ।
સાધયિત્વાઽનન્તશક્તિઃ પુનરશ્વાનચોદયત્ ॥ ૨૬.૨૯૯॥

પુનઃ પ્રયોક્તુમસ્ત્રં તં ધાર્તરાષ્ટ્રોઽભ્યચોદયત્ ।
દ્રૌણિર્ન શક્યમિત્યુક્ત્વા ધૃષ્ટદ્યુમ્નં સમભ્યયાત્ ॥ ૨૬.૩૦૦॥

આયાન્તમીક્ષ્યૈવ ગુરોઃ સુતં તં ધૃષ્ટદ્યુમ્નં સાત્યકિરન્વયાદ્રણે ।
ઉભૌ ચ તૌ સાયકાભ્યામવિધ્યન્નિપેતતુસ્તૌ ચ વિમૂર્ચ્છિતૌ રણે ॥ ૨૬.૩૦૧॥

ભીમસ્યાભ્યાગતસ્યાશ્વાન્ દ્રૌણિર્વ્યદ્રાવયદ્રણે ।
સં સ્થાપયતિ તાન્ ભીમે દદર્શ દ્રૌણિમર્જુનઃ ॥ ૨૬.૩૦૨॥

તતોઽર્જુનસ્તં પ્રતિયોદ્ધુમાગમદ્રૂક્ષા વાચઃ શ્રાવયન્ ક્રુદ્ધરૂપઃ ।
તત્રાઽગ્નેયં દ્રૌણિરમુઞ્ચદસ્ત્રં તેન વ્યાપ્તા પૃતના પાણ્ડવાનામ્ ॥ ૨૬.૩૦૩॥

અ્અ્લ્ક્ષ્ક્ષ્વીઇઽક્ષોહિણી નિહતા ચાત્ર સેના પાર્થં સયાનં હરિરુજ્જહાર ।
જીવન્તમાલોક્ય સુરેન્દ્રનન્દનં દ્રૌણિઃ કોપાત્કાર્મુકં ચાપહાય ।
યયૌ તમાગત્ય જગાદ કૃષ્ણો વેદાન્તકૃત્પૂર્ણષાડ્ગુણ્યદેહઃ ॥ ૨૬.૩૦૪॥

મા યાહિ સાક્ષાદ્ગિરિશઃ સુરાણાં કાર્યાય ભૂમૌ બલવાનજાયથાઃ ।
મહચ્ચ કાર્યં પુનરસ્તિ દૃષ્ટં તવાઽશુ તચ્ચ પ્રતિપાદયેતિ ॥ ૨૬.૩૦૫॥

તથોદિતઃ પ્રાતરિતિ બ્રુવાણો યયૌ પ્રણમ્યાખિલવેદયોનિમ્ ।
યયુસ્તમન્વેવ સુયોધનાદયો દુઃખાનતાસ્તે શિબિરાય ભીતાઃ ॥ ૨૬.૩૦૬॥

પાર્થાશ્ચ સર્વે મુદિતા જનાર્દનં પરં સ્તુવન્તઃ શિબિરાય જગ્મુઃ ।
તત્રાપિ રાત્રાવમિતાન્ હરેર્ગુણાનનુસ્મરન્તો મુમુદુઃ સમેતાઃ ॥ ૨૬.૩૦૭॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
નારાયણાસ્ત્રોપશમનં નામ ષડ્વિંશોઽધ્યાયઃ ॥

## અથ સપ્તવિંશોઽધ્યાયઃ ।

(કર્ણવધઃ )
ૐ । અથાનુજ્ઞામુપાદાય દ્રૌણેર્દુર્યોધનો નૃપઃ ।
કર્ણં સેનાપતિં ચક્રે સોઽગાદ્યુદ્ધાય દંસિતઃ ॥ ૨૭.૧॥

તત્રાભવદ્યુદ્ધમતીવ દારુણં પાણ્ડોઃ સુતાનાં ધૃતરાષ્ટ્રજૈર્ગજે ।
તત્રોદયાદ્રિપ્રતિમે પ્રદૃશ્યતે ભીમો યથોદ્યન્ સવિતાઽતિનિર્મલઃ ॥ ૨૭.૨॥

તં કાલયન્તં નૃપતીન્ ક્ષેમધૂર્તિરભ્યાગમત્તસ્ય ગજં જઘાન ચ ।
તં વીર્યમત્તં પ્રતિલભ્ય ભીમો નિનાય મૃત્યોઃ સદનાય શીઘ્રમ્ ॥ ૨૭.૩॥

નિહત્ય તં મારુતિરભ્યકૃન્તચ્છિરાંસિ યૂનાં પરપક્ષપાતિનામ્ ।
વિક્ષોભયામાસ ચ શત્રુસૈન્યં સિંહો યથૈવ શ્વસૃગાલયૂથમ્ ॥ ૨૭.૪॥

સઙ્ક્ષોભ્યમાણં તદનીકમીક્ષ્ય દ્રૌણી રથેન પ્રતિજગ્મિવાંસ્તમ્ ।

તદ્યુદ્ધમાસીદતિઘોરમદ્ભુતં પુરા યથા નાઽસ ચ કસ્યચિત્ક્વચિત્ ॥ ૨૭.૫॥

દૃષ્ટ્વૈવ તદ્દેવગન્ધર્વવિપ્રા ઊચુર્નેદૃગ્દૃષ્ટપૂર્વં સુયુદ્ધમ્ ।
નચોત્તરં વાઽપિ ભવિષ્યતીદૃક્કલાં ચ સર્વાણિ ન ષોડશીમિયુઃ ॥ ૨૭.૬॥

નૈતાદૃશી જ્ઞાનસમ્પદ્બલં વા દ્વયં કુતો વાયુમૃતે શિવં તથા ।
દ્વયોઃ સમાહાર ઇહ દ્વયોરપિ જ્ઞાનસ્ય બાહ્વોશ્ચ બલસ્ય સૂર્જિતઃ ॥ ૨૭.૭॥

ઇતીર્યમાણે વિબુધૈર્નરોત્તમૌ દિશઃ સમસ્તા ગગનં ચ પત્રિભિઃ ।
નિરન્તરં ચક્રતુરુત્તમોજસૌ દૃષ્ટ્વૈવ તદ્ભીતિમગુર્મહારથાઃ ॥ ૨૭.૮॥

શરાસને મારુતિના નિરાકૃતો દ્રૌણિર્મહાસ્ત્રાણિ મુમોચ તસ્મિન્ ।
તાન્યસ્ત્રવર્યૈર્બલવાનવિસ્મયઃ સં શામયામાસ સુતોઽનિલસ્ય ॥ ૨૭.૯॥

પુનઃ શરૈરેવ પરસ્પરં તાવયુદ્ધ્યતાં ચિત્રમલં ચ સુષ્ઠુ ।
તદા તુભીમસ્ય શરૈર્ભૃશાર્તો દ્રૌણિઃ પપાતાઽશુ દૃઢં વિચેતનઃ ॥ ૨૭.૧૦॥

ભીમશ્ચ વિહ્વલતનુઃ સ તુ કિઞ્ચિદેવ પૂર્વં ગતે ગુરુસુતે પ્રયયૌ ક્ષણેન ।
નિર્ધૂતયુદ્ધશ્રમ આત્તધન્વા યોદ્ધું ગજૌઘં પ્રતિનાદિતાશઃ ॥ ૨૭.૧૧॥

અ્ક્ષ્ચ્।તસ્મિન્ ગજાન્મર્દયતિ ધાર્તરાષ્ટ્રો યુધિષ્ઠિરમ્ ।
અગાદ્યુદ્ધાય તૌ યુદ્ધં રાજાનૌ ચક્રતુશ્ચિરમ્ ॥ ૨૭.૧૨॥

તત્ર તં વિરથં ચક્રે સહસૈવ યુધિષ્ઠિરઃ ।
સ ગદામાદદે ગુર્વીં તં ભીમોઽભ્યપતદ્ગદી ॥ ૨૭.૧૩॥

દૃષ્ટ્વા કૃપસ્તં સ્વરથમારોપ્યાપયયૌ તતઃ ।
તદૈવ કર્ણનકુલૌ ભૃશં બાણૈરયુદ્ધ્યતામ્ ॥ ૨૭.૧૪॥

નકુલં વિરથં કૃત્વા કર્ણોઽથ પ્રપલાયિતમ્ ।
અનુદ્રુત્ય ચ વેગેન કણ્ઠે ધનુરવાસૃજત્ ॥ ૨૭.૧૫॥

ઉક્ત્વા ચ પુરુષા વાચઃ કુન્ત્યા વચનગૌરવાત્ ।
ન જઘાનૈવ નકુલં વિસૃજ્ય ચ યયૌ પરાન્ ॥ ૨૭.૧૬॥

વિન્દાનુવિન્દાવથ કૈકયૌ રણે સમાસદત્સાત્યકિરુગ્રવિક્રમઃ ।
તયોરમુષ્યાભવદુગ્રવૈશસં પ્રવર્ષતોરુત્તમસાયકાન્ બહૂન્ ॥ ૨૭.૧૭॥

તાભ્યાં નિરુદ્ધઃ સહસા જહાર તત્રાનુવિન્દસ્ય શિરોઽથ વિન્દઃ ।
યુયોધ શૈનેયમથારથાવુભૌ પરસ્પરં ચક્રતુરુત્તમાહવે ॥ ૨૭.૧૮॥

તતશ્ચ ચર્માસિધરૌ પ્રચેરતુઃ શ્યેનૌ યથાઽકાશતલ્। એ કૃતશ્રમૌ ।
નિકૃત્ય ચાન્યોન્યમુભૌ ચ ચર્મણી વરાસિપાણી યુગપત્સમીયતુઃ ॥ ૨૭.૧૯॥

તત્રાપહસ્તેન શિરઃ સકુણ્ડલં જહાર વિન્દસ્ય મૃધે સ સાત્યકિઃ ।
નિહત્ય તં બન્ધુજનૈઃ સુપૂજિતો જગામ શત્રૂનપરાન્ પ્રકમ્પયન્ ॥ ૨૭.૨૦॥

કૃપમાયાન્તમીક્ષ્યૈવ તપસાં માં પ્રપીડયેત્ ।
ઇતિ મત્વા પાર્ષતસ્તુ ભીમં શરણમેયિવાન્ ॥ ૨૭.૨૧॥

કર્ણં સમન્તાત્પ્રતિકાલયન્તં વરૂથિનીમિન્દ્રસુતઃ સમભ્યયાત્ ।
ક્ષણાત્તમાજૌ વિરથં ચ ચક્રે તતોઽપહારં સ ચકાર ચમ્વાઃ ॥ ૨૭.૨૨॥

પરાજિતઃ સં યતિ સૂર્યસૂનુઃ સુતેન શક્રસ્ય સ ધાર્તરાષ્ટ્રમ્ ।
ચ્ચ્ક્ષ્ય।જગાદ બાહું પ્રતિગૃહ્ય પાર્થો જિગાય મામન્યમનસ્કમાજૌ ॥ ૨૭.૨૩॥

કામં રથો મે ધનુરપ્યભેદ્યં દત્તં ભૃગૂણામધિપેન દિવ્યમ્ ।
યન્તા નતાદૃઙ્મમ યાદૃશો હરિઃ શલ્યો યદિ સ્યાત્ત્વદરિં નિહન્યામ્ ॥ ૨૭.૨૪॥

ઇતીરિતે સૌત્યકૃતે સ શલ્યં પ્રોવાચ સ ક્રુદ્ધ ઇવાભવત્તદા ।
દુર્યોધનો રથિનઃ સારથેસ્તુ વ્યાવર્ણયન્નુત્તમતામશામયત્ ॥ ૨૭.૨૫॥

બુદ્ધ્યા બલેન જ્ઞાનેન ધૈર્યાદ્યૈરપિ યોઽધિકઃ ।
રથિનઃ સારથિઃ સ સ્યાદર્જુનસ્ય યથા હરિઃ ।
યથા શિવસ્ય બ્રહ્માઽભૂદ્દહતસ્ત્રિપુરં પુરા ॥ ૨૭.૨૬॥

ઇત્યાદિવાક્યૈઃ સં શાન્ત ઇવ શલ્યોઽસ્ય સારથિઃ ।
બભૂવ તેન સહિતઃ સેનાં વ્યૂહ્ય રવેઃ સુતઃ ॥ ૨૭.૨૭॥

ગચ્છન્ યુદ્ધાય દર્પેણ પ્રાહ યો મેઽર્જુનં પુમાન્ ।
દર્શયેત્તસ્ય દાસ્યામિ પ્રીતો વિત્તમનર્ગલ્. અમ્ ॥ ૨૭.૨૮॥

ઇતિ બ્રુવન્તં બહુશઃ પ્રાહ શલ્યઃ પ્રહસ્ય ચ ।
નિવાતકવચા યેન હતા દગ્ધં ચ ખાણ્ડવમ્ ।
કો નામ તં જયેન્મર્ત્યો દૃષ્ટો વોઽપિ સ ગોગ્રહે ॥ ૨૭.૨૯॥

કાકગોમાયુધર્મા ત્વં હં સસિં હોપમં રણે ।
મા યાહિ પાર્થં મા યાહિ હતોઽનેન યમક્ષયમ્ ॥ ૨૭.૩૦॥

ઇત્યુક્તે રવિજો મદ્રાન્નિતરાં પર્યકુત્સયત્ ।
શલ્યોઽપિ સર્વદેશેષુ નીચમધ્યોત્તમા નરાઃ ।

સન્તીત્યુક્ત્વાઽસ્ય સારથ્યં ચક્રે પાર્થહિતેપ્સયા ॥ ૨૭.૩૧॥

કર્ણોઽથ શલ્યનિયતેન રથેન પાર્થસેનામવાપ્ય વિદુધાવ શરૈઃ સમન્તાત્ ।
સં રક્ષિતો યુધિ સુયોધનગૌતમાદ્યૈરાચાર્યજેન ચ મહાસ્ત્રવિદાં વરેણ ॥ ૨૭.૩૨॥

તં ભીમપાર્ષતશિનિપ્રવરાભિગુપ્તા સા પાણ્ડવેયપૃતનાઽભિવવર્ષ બાણૈઃ ।
તાં સૂર્યસૂનુરથ બાણવરૈર્વિદાર્ય સમ્પ્રાર્દયચ્છિતશરૈરપિ ધર્મસૂનુમ્ ॥ ૨૭.૩૩॥

અચ્ક્ષ્યી। કૃત્વા તમાશુ વિરથં ધનુરસ્ય કણ્ઠે સજ્યં નિધાય પરુષા ગિર આહ ચોચ્ચૈઃ ।
દૃષ્ટ્વૈવ મારુતિરમું ભૃશમાતુતોદ દુર્યોધનં વિરથકાર્મુકમત્ર કૃત્વા ॥ ૨૭.૩૪॥

તં પ્રાણસં શયગતં નૃપતિં નિરીક્ષ્ય કર્ણં જગાદ યુધિ મદ્રપતિઃ પ્રદર્શ્ય ।
યસ્યાર્થ એવ સમરસ્ત્વમિયં ચ સેનાં તં ત્વં યમસ્ય સદનં પ્રયિયાસુમદ્ય ।
ભીમેન પીડિતમમું પરિપાહિ શીઘ્રં કિં તે યુધિષ્ઠિરમિમં હિ મુધાઽભિપીડ્ય ॥ ૨૭.૩૫॥

શ્રુત્વાઽસ્ય વાક્યમતિહાય યુધિષ્ઠિરં તં કર્ણો યયૌ નૃપતિરક્ષણતત્પરોઽલમ્ ।
દૃષ્ટ્વૈવ તં પવનસૂનુરભિ ત્વિયાય ક્રોધાદ્દિધક્ષુરિવ કર્ણમમેયધામા ॥ ૨૭.૩૬॥

રાજાવનાય શિનિપુઙ્ગવપાર્ષતૌ ચ સન્દિશ્ય કર્ણમભિગચ્છત આસ રૂપમ્ ।
અન્તે કૃતાન્તનરસિં હતનોર્યથૈવ વિષ્ણોર્હરં ગ્રસત આત્તસમસ્તવિશ્વમ્ ।
તદ્વેગતઃ પ્રતિચચાલ ધરા સમસ્તા વિદ્રાવિતા ચ સકલા પ્રતિવીરસેના ॥ ૨૭.૩૭॥

વૈકર્તનેન શરસઞ્ચયતાડિતઃ સ બાણં ચ વજ્રસદૃશં પ્રમુમોચ તસ્મિન્ ।
તેનાઽહતો મૃતકવત્સ પપાત કર્ણો ભીમઃ ક્ષુરં ચ જગૃહેઽભિયયૌ ચ પદ્ભ્યામ્ ॥ ૨૭.૩૮॥

નિન્દાં હરેસ્તુ વિદધાતિ પરોક્ષગોઽપિ યસ્તં પ્રગૃહ્ય કરવાણિ વિજિં હ્વમેવ ।
એવં હિ વાયુતનયસ્ય મહાપ્રતિજ્ઞા છેત્તું સ તેન રવિજસ્ય સસાર જિં હ્વામ્ ॥ ૨૭.૩૯॥

આયાન્તમન્તિકમમું પ્રસમીક્ષ્ય શલ્યો નેત્યાહ હેતુભિરહો ન મૃષા પ્રતિજ્ઞા ।
કાર્યા ત્વયૈવ પુરુહૂતસુતસ્ય જિં હ્વાં મા તેન પાતય મરુત્સુત સૂતસૂનોઃ ॥ ૨૭.૪૦॥

ઇત્યુક્ત્વા પ્રમુખાત્તસ્ય રથેનૈવ તુ મદ્રરાટ્ ।
વૈકર્તનમપોવાહ સર્વલોકસ્ય પશ્યતઃ ॥ ૨૭.૪૧॥

જિત્વા સૂર્યસુતં ભીમઃ કૌરવાણામનીકિનીમ્ ।
સર્વાં વિદ્રાવયામાસ દ્રૌણિદુર્યોધનાવૃતામ્ ॥ ૨૭.૪૨॥

અક્ષોહિણીત્રયં તેન તદા વિલુલ્। ઇતં ક્ષણાત્ ।
તદૈવ ગુરુપુત્રોઽયાત્પાણ્ડવાનામનીકિનીમ્ ॥ ૨૭.૪૩॥

વિમૃદ્ય સકલાં સેનાં કૃત્વા ચ વિરથં નૃપમ્ ।

ધૃષ્ટદ્યુમ્નં યમૌ ચૈવ સાત્યકિં દ્રૌપદીસુતાન્ ।
ક્ષણેન વિરથીકૃત્ય સર્વાંશ્ચક્રે નિરાયુધાન્ ॥ ૨૭.૪૪॥

અઋક્ષ્યીઇ।તાન્ ભગ્નદર્પાન્ રણતોઽપયાતાનન્વેવ બાણાવૃતમન્તરિક્ષમ્ ।
કુર્વન્ યયૌ ધર્મરાજસ્તમાહ કિં નઃ સ્વધર્મે નિરતાન્ વિહં સિ ॥ ૨૭.૪૫॥

ક્ષત્રિયાન્ પરધર્મસ્થો મા હિં સીરિતિ ચોદિતઃ ।
પ્રહસ્ય તાન્ વિહાયૈવ યયૌ યત્રાચ્યુતાર્જુનૌ ॥ ૨૭.૪૬॥

સં શપ્તકૈસ્તત્ર સં યુદ્ધ્યમાનં સમાહ્વયામાસ સુરેશસૂનુમ્ ।
સ બાણયુક્તં ભુજગેન્દ્રકલ્પમુન્નમ્ય બાહું યુધયે સુશૂરમ્ ॥ ૨૭.૪૭॥

પાર્થઃ સં શપ્તકગણૈઃ સં સૃષ્ટઃ સમરાર્થિભિઃ ।
આહૂતો દ્રૌણિના ચૈવ કાર્યં કૃષ્ણમપૃચ્છત ।
ચોદયામાસ ચ હયાન્ કૃષ્ણો દ્રૌણિરથં પ્રતિ ॥ ૨૭.૪૮॥

ઉભૌ ચ તાવસ્ત્રવિદાં પ્રધાનૌ મહાબલૌ સં યતિ જાતદર્પૌ ।
શરૈઃ સમસ્તાઃ પ્રદિશો દિશશ્ચ દ્રોણેન્દ્રસૂનૂ તિમિરાઃ પ્રચક્રતુઃ ॥ ૨૭.૪૯॥

દ્રૌણિસ્તદા સ્યન્દનવાજિરોમસ્વરોમકૂપધ્વજકાર્મુકેભ્યઃ ।
શરાનમોઘાન્ સતતં સૃજાનો બબન્ધ પાર્થં શરપઞ્જરેણ ॥ ૨૭.૫૦॥

તસ્મિન્નિબદ્ધે હરિરપ્રમેયો વિબોધયામાસ સુરેન્દ્રસૂનુમ્ ।
આલિઙ્ગનેનાસ્ય દદૌ બલં ચ સ ઉત્થિતોઽસ્ત્રાણ્યમુચન્મહાન્તિ ॥ ૨૭.૫૧॥

નિવાર્ય તાન્યસ્ત્રવરૈર્ગુરોઃ સુતશ્ચિચ્છેદ ચ જ્યાં યુધિ ગાણ્ડિવસ્ય ।
વવર્ષ પાર્થં ચ શરૈરથાઽન્યા જ્યાઽસીત્તયા ગાણ્ડિવં સોઽપ્યયુઙ્ક્ત ॥ ૨૭.૫૨॥

તતઃ શરેણ કુપિતઃ શિતેન દ્રૌણિસારથેઃ ।
શિરો જહાર કૌન્તેયઃ સારથ્યં સોઽકરોત્સ્વયમ્ ॥ ૨૭.૫૩॥

શરાન્ વિસૃજતા તેન સારથ્યમપિ કુર્વતા ।
શરકૂટેન પાર્થઃ સ પુનર્બદ્ધો દ્વિજન્મના ॥ ૨૭.૫૪॥

પુનરાલિઙ્ગ્ય કૃષ્ણસ્તમધાચ્છત્રુવિઘાતકમ્ ।
બલમસ્મિં સ્તતઃ પાર્થઃ ઉત્તસ્થૌ શરચાપભૃત્ ।
વવર્ષ ચશરાન્ ભૂયો દ્રોણપુત્રેઽરિમર્દનઃ ॥ ૨૭.૫૫॥

છિઋક્ષ્યવ્।પુનસ્તસ્ય નુનોદ જ્યાં દ્રૌણિઃ સન્ધાય તાં પુનઃ ।
પાર્થો દ્રોણસુતસ્યાશ્વરશ્મીંશ્ચિચ્છેદ સાયકૈઃ ॥ ૨૭.૫૬॥

વિરશ્મયો હયા દ્રૌણેઃ પુનઃ પાર્થશરાહતાઃ ।
અપોહુર્દૂરમેતસ્માત્સોઽપિ સં સ્થાપ્ય તાન્ પુનઃ ।
ચિન્તયામાસ નૈતસ્માદધિકં શક્યતેઽર્જુને ॥ ૨૭.૫૭॥

સારથિત્વાત્કેશવસ્ય ધ્વજસ્થત્વાદ્ધનૂમતઃ ।
ગાણ્ડિવત્વાત્કાર્મુકસ્ય ચેષુધ્યોરક્ષયત્વતઃ ॥ ૨૭.૫૮॥

અવધ્યત્વાત્તથાઽશ્વાનામભેદ્યત્વાદ્રથસ્ય ચ ।
અતો યોદ્ધું સમર્થોઽપિ નાદ્ય યામિ ધનઞ્જયમ્ ॥ ૨૭.૫૯॥

એવં સ મત્વા પ્રવિવેશ સેનાં પાણ્ડોઃ સુતાનામથ તં સમભ્યયાત્ ।
પાણ્ડ્યસ્તયોરાસ સુયુદ્ધમદ્ભુતં પ્રવર્ષતોઃ સાયકપૂગમુગ્રમ્ ॥ ૨૭.૬૦॥

અષ્ટાવષ્ટશતાન્યૂહુઃ શકટાનિ યદાયુધમ્ ।
અહ્નસ્તદષ્ટભાગેન દ્રૌણિશ્ચિક્ષેપ તત્ર હ ॥ ૨૭.૬૧॥

અથ તં વિરથં કૃત્વા છિત્વા કાર્મુકમાહવે ।
સકુણ્ડલં શિરો દ્રૌણિર્જહાર મકુટોજ્જ્વલમ્ ॥ ૨૭.૬૨॥

અથ વિદ્રાવયામાસ પૃતનાં પાણ્ડવીં શરૈઃ ।
તદા જઘાન પાર્થોઽપિ દણ્ડધારાખ્યમાગધમ્ ॥ ૨૭.૬૩॥

વિદ્રાપ્યમાણાં પૃતનાં નિરીક્ષ્ય ગુરોઃ સુતેનાભ્યગમત્ત્વરાવાન્ ।
ધૃષ્ટદ્યુમ્નસ્તં સ ઊચે સુપાપં હનિષ્યે ત્વામદ્ય યુદ્ધે ગુરુઘ્નમ્ ॥ ૨૭.૬૪॥

ઇત્યુક્તો દર્શયામાસ પાર્ષતઃ ખડ્ગમુત્તમમ્ ।
અયં તવ પિતુર્હન્તા વદિષ્યતિ તવોત્તરમ્ ॥ ૨૭.૬૫॥

ઇત્યુક્ત્વા ધનુરાદાય વવર્ષ ચશરાન્ બહૂન્ ।
તયોઃ સમભવદ્યુદ્ધં તુમુલં રોમહર્ષણમ્ ॥ ૨૭.૬૬॥

અચ્ક્ષ્ચ્વ્।તત્ર પાર્ષતં દ્રૌણિઃ ક્ષણેન વિરથાયુધમ્ ।
કૃત્વાઽન્તાય શરાં સ્તીક્ષ્ણાન્મુમોચ નચ તસ્ય તે ।
ત્વચં ચ ચિચ્છિદુર્દ્રૌણિઃ ખડ્ગહસ્તોઽભિજગ્મિવાન્ ॥ ૨૭.૬૭॥

ખડ્ગેન સાસ્ત્રૈઃ શસ્ત્રૈરપ્યનિર્ભિણ્ણત્વચં તદા ।
મૌર્વ્યા મમન્થ ધનુષઃ પાતયિત્વા ધરાતલ્. એ ॥ ૨૭.૬૮॥

આકૃષ્યમાણં પાર્ષતં દૃષ્ટ્વા કૃષ્ણપ્રચોદિતઃ ।
પાર્થો ભીમશ્ચોભયતઃ શરૈરભિનિજઘ્નતુઃ ॥ ૨૭.૬૯॥

સ તાભ્યાં વજ્રસદૃશૈઃ શરૈરભિહતો ભૃશમ્ ।
વિસૃજ્ય પાર્ષતં સ્વીયમારુરોહ રથં પુનઃ ॥ ૨૭.૭૦॥

જગામ ચ તતોઽન્યત્ર પાઞ્ચાલ્યોઽપિ રથં પુનઃ ।
આરુહ્યાન્યં સ્વાત્તધન્વા કૃતવર્માણમભ્યયાત્ ॥ ૨૭.૭૧॥

તયોરાસીત્સુતુમુલં યુદ્ધમદ્ભુતદર્શનમ્ ।
તત્ર નાતિપ્રયત્નેન પાઞ્ચાલ્યો વિરથાયુધમ્ ।
ચકાર કૃતવર્માણં તમપોવાહ ગૌતમઃ ॥ ૨૭.૭૨॥

અથ દુર્યોધનો રાજા માદ્રેયાવભ્યયાદ્રથી ।
તાભ્યાં તસ્યાભવદ્ઘોરં યુદ્ધમદ્ભુતદર્શનમ્ ।
તત્ર નાતિપ્રયત્નેન તેન તૌ વિરથીકૃતૌ ॥ ૨૭.૭૩॥

સ્વયં યુધિષ્ઠિરો રાજા તદા તં સમવારયત્ ।
વ્યશ્વસૂતધ્વજં ચક્રે તં ચ દુર્યોધનો રણે ॥ ૨૭.૭૪॥

અથાઽગતં સૂર્યસુતં પુનશ્ચ જગામ ભીમો રભસો રથેન ।
દુર્યોધનં ચાસ્ય સમક્ષમેવ ચકાર વીરો વિરથં ક્ષણેન ॥ ૨૭.૭૫॥

નિવાર્ય કર્ણં ચ શરૈરમુષ્ય સૂનોઃ સુષેણસ્ય શિરશ્ચકર્ત ।
પપાત ભૂમૌ સ પિતુઃ સમીપે યથા હતઃ સત્યસેનોઽમુનૈવ ।
યથૈવ કર્ણાવરજૌ પુરૈવ નિશાયુદ્ધે કર્ણપુરઃ પ્રપાતિતૌ ॥ ૨૭.૭૬॥

હતં તમીક્ષ્યૈવ વિકર્તનાત્મજઃ ક્રોધાન્વિતો ભીમસેનં વિહાય ।
ચ્ચ્ચ્ક્ષ્ચ્વ।યયૌ પ્રમૃદ્યૈવ ચમૂં યુધિષ્ઠિરં રથેઽપરે સ્વશ્વયુતે વ્યવસ્થિતમ્ ॥ ૨૭.૭૭॥

ન્યવારયેતાં શિનિપૌત્રપાર્ષતૌ કૃષ્ણાસુતાઃ સોમકસઙ્ઘયુક્તાઃ ।
સ તાન્ સમસ્તાન્ વિરથાન્ વિધાય યુધિષ્ઠિરં પ્રાપ યુતં યમાભ્યામ્ ॥ ૨૭.૭૮॥

નિહત્ય સોઽશ્વાન્ યુધિ ધર્મસૂનોર્નિરાયુધૌ તૌ ચ યમૌ ચકાર ।
તાનેકયાનોપગતાન્ પુનશ્ચ મમર્દ બાણૈશ્ચ વચોભિરુગ્રૈઃ ॥ ૨૭.૭૯॥

તદૈવ મોક્ષાય નૃપસ્ય ભીમો દુર્યોધનં વિરથં સં વિધાય ।
વિવ્યાધ મર્મસ્વતિતીક્ષ્ણસાયકૈસ્તં દર્શયામાસ રવેઃ સુતાય ॥ ૨૭.૮૦॥

શલ્યસ્તદા ધર્મસુતં વિહાય કર્ણો યયૌ તત્ર યુધિષ્ઠિરોઽપિ ।
ગત્વા શનૈઃ શિબિરં તત્ર શિશ્યે કર્ણો યદા રાજગૃદ્ધી જગામ ॥ ૨૭.૮૧॥

દ્રૌણિઃ કૃપશ્ચાત્ર તદૈવ જગ્મતુસ્તદા ભીમો દ્રૌણિકર્ણૌ જગામ ।

યદા ભીમો દ્રૌણિકર્ણૌ જગામ કૃપો નૃપં રથમારોપયચ્ચ ॥ ૨૭.૮૨॥

નૃપં સમાદાય કૃપેઽપયાતે ભીમાર્દિતૌ દ્રૌણિકર્ણૌ શરૌઘૈઃ ।
વિહાય તં જગ્મતુઃ સોમકાનાં ચમૂં શરૌઘૈરભિપાતયન્તૌ ॥ ૨૭.૮૩॥

અથાત્ર રાજાનમચક્ષમાણો ધનઞ્જયો વાસુદેવપ્રણુન્નઃ ।
અભ્યાયયૌ પાર્ષતઃ સ્વાં તુ સેનાં કર્ણાહતાં વીક્ષ્ય કુરૂનપીડયત્ ॥ ૨૭.૮૪॥

ન્યવારયત્સમાયાન્તં કપિપ્રવરકેતનમ્ ।
દ્રૌણિર્દુઃ શાસનશ્ચૈવ ધૃષ્ટદ્યુમ્નમવારયત્ ॥ ૨૭.૮૫॥

ઉભાવતિરથૌ તૌ તુ શસ્ત્રાસ્ત્રૈરભ્યવર્ષતામ્ ।
દુઃ શાસનઃ પાર્ષતશ્ચ કુર્વન્તૌ બાણજં તમઃ ॥ ૨૭.૮૬॥

તત્ર દુઃ શાસનેનાઽજૌ સ્તમ્ભિતો દ્રુપદાત્મજઃ ।
યતમાનોઽપિ નિર્યત્નઃ કૃતો યુદ્ધે નિરાયુધઃ ॥ ૨૭.૮૭॥

તદાઽભવદ્યુદ્ધમતીવ દારુણં દ્રૌણેસ્તનૂજેન તુ વજ્રપાણેઃ ।
તત્રાપિ બદ્ધઃ શરપઞ્જરેણ પાર્થોઽપનુત્તાઽપિ હિ ગાણ્ડિવજ્યા ॥ ૨૭.૮૮॥

અક્ષ્વી।પાર્થોઽથ કૃષ્ણેધિતબાહુવીર્યો નિહત્ય સૂતં ગુરુપુત્રકસ્ય ।
છિત્વા ચરશ્મીં સ્તુરગાનમુષ્ય વિદ્રાવયામાસ શરૈઃ સુદૂરમ્ ॥ ૨૭.૮૯॥

અતીત્ય પુત્રં તુ ગુરોઃ સમાગતે પાર્થે કર્ણો દ્રાવયામાસ સેનામ્ ।
પાણ્ડોઃ સુતાનાં શરવર્ષધારો દુર્યોધનશ્ચાનુ યયૌ તમેવ ॥ ૨૭.૯૦॥

કર્ણમાયાન્તમાલોક્ય દ્રાવયન્તં નિજાં ચમૂમ્ ।
ધનુરન્યત્સમાદાય ધૃષ્ટદ્યુમ્નો ન્યવારયત્ ॥ ૨૭.૯૧॥

તયોરાસીન્મહદ્યુદ્ધં ચિરં સમમવિશ્રમમ્ ।
તદૈવ સાત્યકિર્વીરો દુર્યોધનમવારયત્ ॥ ૨૭.૯૨॥

નિવારિતઃ સાત્યકિના રણે દુર્યોધનો નૃપઃ ।
નિહત્ય સાત્યકેરશ્વાન્ દ્રૌપદેશ્ચાપમચ્છિનત્ ॥ ૨૭.૯૩॥

તદન્તરૈવ કર્ણોઽપિ પાર્ષતાશ્વાનપાતયત્ ।
તયોર્વિરથયોરેવ ભગ્નં તત્પાણ્ડવં બલમ્ ॥ ૨૭.૯૪॥

બલં સ્વકીયં બહુધા વિભિન્નં સમીક્ષ્ય ભીમો મૃગરાજકેતુઃ ।
કૃત્વા ધરાકમ્પકમુગ્રનાદં રણેઽભ્યયાત્કૌરવરાજસૈન્યમ્ ॥ ૨૭.૯૫॥

નાદેન બાણૈશ્ચ વૃકોદરેણ ભગ્નં તદા કૌરવસૈન્યમાશુ ।
દિશો વિદુદ્રાવ સુયોધનોઽપિ કૃતો રણે તેન વિવાહનનાયુધઃ ॥ ૨૭.૯૬॥

દૃષ્ટ્વૈવ તત્પાણ્ડવાનાં ચ સેના સમાવૃત્તા ક્ષિપ્રમવાર્યવેગા ।
તયા પુનઃ કૌરવાણાં બલં તદ્ભગ્નં દૂરાદ્દૂરતરં પ્રદુદ્રુવે ॥ ૨૭.૯૭॥

હન્યમાનં દિશો યાતં પાઞ્ચાલૈર્ભીમસંશ્રયાત્ ।
સુયોધનબલં દૃષ્ટ્વા જજ્વાલાઽધિરથિઃ ક્રુધા ॥ ૨૭.૯૮॥

સોઽમોઘં રામદેવત્યમસ્ત્રં ભાર્ગવસંજ્ઞિતમ્ ।
સર્વાસ્ત્રનાશકં દિવ્યમપ્રતિદ્વન્દ્વમાદદે ॥ ૨૭.૯૯॥

તચ્ચ ભીમપુરોગેષુ સૈન્યેષ્વમુચદુદ્બલણમ્ ।
તદસ્ત્રં વર્જયામાસ ભીમં રામપ્રસાદતઃ ।
અક્ષ્વીઇઽન્યે તુ દુદ્રુવુઃ કેચિચ્છિષ્ટાઃ પ્રાપુર્યમક્ષયમ્ ॥ ૨૭.૧૦૦॥

નહ્યસ્ત્રં દ્રવમાણાં સ્તદ્ધન્તિ તેન સપાર્ષતાઃ ।
પાઞ્ચાલા દ્રૌપદેયાશ્ચ શૈનેયાદ્યાશ્ચ સર્વશઃ ॥ ૨૭.૧૦૧॥

પલાયનેનોર્વરિતા અર્જુનોઽપ્યસ્ત્રમુદ્યતમ્ ।
વીક્ષ્ય પ્રત્યસ્ત્રહીનં તદપ્રાપ્યૈવ રવેઃ સુતમ્ ॥ ૨૭.૧૦૨॥

વાસુદેવમિદં પ્રાહ વર્જયિત્વૈવ સૂતજમ્ ।
અન્યત્ર યામિ નૈવાસ્માદસ્ત્રાજ્જીવનમન્યથા ॥ ૨૭.૧૦૩॥

ઇત્યૂચિવાં સં પાર્થં તં કૃષ્ણોઽપ્રાપ્યૈવ સૂતજમ્ ।
અન્યેનૈવ પથા ભીમં પ્રાપયામાસ વિશ્વકૃત્ ॥ ૨૭.૧૦૪॥

તત્રાર્જુનોઽવદદ્ભીમં યાહિ દ્રષ્ટું યુધિષ્ઠિરમ્ ।
પ્રવૃત્તિં વિદ્ધિ ભૂપસ્ય માં તુ સં શપ્તકા યુધે ।
આહ્વયન્તિ હતોચ્છેષાસ્તાનહં યામિ તદ્યુધે ॥ ૨૭.૧૦૫॥

ઇત્યૂચિવાં સં તમુવાચ ભીમો જાનન્ સ્વબાહ્વોર્બલમપ્રમેયમ્ ।
સં શપ્તકાન્ સૂતજં કૌરવાંશ્ચ યોત્સ્યેઽહમેકસ્ત્વમુપૈહિ ભૂપમ્ ॥ ૨૭.૧૦૬॥

ત્યક્ત્વા રણં નાહમિતો વ્રજેયં ન માં વદેત્કશ્ચન યુદ્ધભીતમ્ ।
ઇતિ બ્રુવાણં તમનન્તશક્તિઃ પ્રીતઃ કૃષ્ણઃ પ્રશશં સાધિકેષ્ટમ્ ॥ ૨૭.૧૦૭॥

યયૌ યુધિષ્ઠિરં દ્રષ્ટું શિબિરં સાર્જુનો હરિઃ ।
દૃષ્ટ્વા તૌ નૃપતિઃ કર્ણં હતં મત્વા શશં સ હ ॥ ૨૭.૧૦૮॥

અભિવાદ્ય હનિષ્યામીત્યુક્તઃ પાર્થેન સા ક્રુધા ।
ભૃશં વિનિન્દ્ય બીભત્સુમાહ કૃષ્ણાય ગાણ્ડિવમ્ ।
દેહિ પુત્રં સ રાધાયા હનિષ્યતિ ન સં શયઃ ॥ ૨૭.૧૦૯ ॥

અથવા ભીમ એવૈનં નિવૃત્તે ત્વયિ પાતયેત્ ।
ત્વં તુ કુન્ત્યા વૃથા સૂતઃ ક્લીબો મિથ્યાપ્રતિશ્રુતઃ ॥ ૨૭.૧૧૦ ॥

અહં હિ સૂતપુત્રેણ ક્લિષ્ટો મારુતિતેજસા ।
ચ્ચ્છિક્ષ્યક્ષ્।જીવામીત્યગ્રજેનોક્ત ઉદ્બબર્હાસિમુત્તમમ્ ।
વાસુદેવસ્તદાઽહેદં કિમેતદિતિ સર્વવિત્ ॥ ૨૭.૧૧૧ ॥

તમાહ ગાણ્ડિવં દાતું યો વદેત્તદ્વધો મયા ।
પ્રતિજ્ઞાતસ્તતો હન્મિ નૃપમિત્યાહ તં હરિઃ ॥ ૨૭.૧૧૨ ॥

સત્યસ્ય વચનં શ્રેયઃ સત્યજ્ઞાનં તુ દુષ્કરમ્ ।
યત્સતાં હિતમત્યન્તં તત્સત્યમિતિ નિશ્ચયઃ ॥ ૨૭.૧૧૩ ॥

ધર્મસ્ય ચરણં શ્રેયો ધર્મજ્ઞાનં તુ દુષ્કરમ્ ।
યઃ સતાં ધારકો નિત્યં સ ધર્મ ઇતિ નિશ્ચયઃ ॥ ૨૭.૧૧૪ ॥

કૌશિકાખ્યો બ્રાહ્મણો હિ લીનં ગ્રામજનં ક્વચિત્ ।
તસ્કરેષ્વભિધાયૈવ નિરયં પ્રત્યપદ્યત ॥ ૨૭.૧૧૫ ॥

કશ્ચિદ્વ્યાધો મૃગં હત્વા માતાપિતૃનિમિત્તતઃ ।
ભક્ષાર્થમભ્યગાત્સ્વર્ગમસુરોઽસૌ મૃગો યતઃ ।
ઉપદ્રવાય લોકસ્ય તપશ્ચરતિ દુર્મતિઃ ॥ ૨૭.૧૧૬ ॥

તસ્માત્સદ્ધારકો ધર્મ ઇતિ કૃત્વા વિનિશ્ચયમ્ ।
મા નૃપં જહિ સત્યાં ત્વઙ્કુરુ વાચં તતઃ કુરુ ।
ઇત્યુક્તો બહુધાઽનિન્દત્ક્રોધાદેવાર્જુનો ભૃશમ્ ॥ ૨૭.૧૧૭ ॥

ત્વં નૃશંસોઽકૃતજ્ઞશ્ચ નિર્વીર્યઃ પરુષં વદઃ ।
ત્વત્તઃ સુખં નાસ્તિ કિઞ્ચિન્ન માં ગર્હિતુમર્હસિ ॥ ૨૭.૧૧૮ ॥

ભીમો માં ગર્હિતું યોગ્યો યો હ્યસ્માકં સદા ગતિઃ ।
યો યુદ્ધ્યતે સર્વવીરૈરદ્યાપિ ત્વં તુ નિન્દકઃ ॥ ૨૭.૧૧૯ ॥

ઇત્યાદ્યુક્ત્વાઽત્મનાશાય વિકોશં ચકૃવાનસિમ્ ।
પુનઃ કૃષ્ણેન પુષ્ટઃ સન્ સ્વાભિપ્રાયમુવાચ સઃ ।

તચ્છ્રુત્વા ગર્હયિત્વૈનં પુનરાહ જનાર્દનઃ ॥ ૨૭.૧૨૦॥

મતિપૂર્વં દેહહાનાત્પાપં મહદવાપ્યતે ।
ધર્માર્થકામમોક્ષાણાં સાધનં દેહતોઽસ્તિ યત્ ॥ ૨૭.૧૨૧॥

અ્ઽતો મા ત્યજ દેહં તુ કુરુ ચાઽત્મપ્રશં સનમ્ ।
વધો ગુરૂણાં ત્વઙ્કારઃ સ્વપ્રશં સૈવ ચાત્મનઃ ।
ઇત્યુક્તઃ સ ત્વહઙ્કારાચ્છશં સ સ્વગુણાનલમ્ ॥ ૨૭.૧૨૨॥

ગુરુનિન્દાઽત્મપૂજા ચ ન ધર્માય ભવેત્ક્વચિત્ ।
તથાઽપ્યર્જુનહાર્દં તત્સમ્પ્રકાશ્ય જનાર્દનઃ ॥ ૨૭.૧૨૩॥

તસ્ય લજ્જાં સમુત્પાદ્ય નાશયિત્વા ચ તં મદમ્ ।
નાહં વેદ પરં ધર્મં કૃષ્ણ એવ ગતિર્મમ ॥ ૨૭.૧૨૪॥

ઇતિ ભાવં સમુત્પાદ્ય દોષાન્નાશયિતું હરિઃ ।
કારયામાસ તત્સર્વમર્જુનેન જગત્પતિઃ ॥ ૨૭.૧૨૫॥

તત એવદવિજ્ઞાનાત્કુપિતો નૃપતિર્ભૃશમ્ ।
આહાસ્તુ રાજા ભીમસ્ત્વં યુવા માં જહિ ચ સ્વયમ્ ।
વનં વા વિફલો યામીત્યુક્ત્વોત્તસ્થૌ સ્વતલ્પતઃ ॥ ૨૭.૧૨૬॥

તં વાસુદેવઃ પ્રતિગૃહ્ય હેતુમુક્ત્વા સર્વં શમયામાસ નેતા ।
પાર્થશ્ચ ભૂપસ્ય પપાત પાદયોઃ ક્ષમાપયન્ સોઽપિ સુપ્રીતિમાપ ॥ ૨૭.૧૨૭॥

તૌ ભ્રાતરૌ વાસુદેવપ્રસાદાન્મહાપદો મુક્તિમાપ્યાતિહૃષ્ટૌ ।
ભક્ત્યા સમસ્તાધિપતિં શશં સતુસ્ત્વયા સમઃ કો નુ હરે હિતો નઃ ॥ ૨૭.૧૨૮॥

તતઃ પ્રણમ્ય બીભત્સુરગ્રજં પરિરમ્ભિતઃ ।
તેનાભિનન્દિતઃ પ્રીત્યા ચાઽશીર્ભિઃ પ્રયયૌ યુધે ॥ ૨૭.૧૨૯॥

તં શઙ્કિતં કર્ણજયે સ્વિન્નગાત્રં હરિસ્તદા ।
સઙ્કીર્ત્ય પૂર્વકર્માણિ નરાવેશં વિશેષતઃ ।
વ્યઞ્જયામાસ ધૈર્યં ચ તસ્યાઽસીત્તેન સુસ્થિરમ્ ॥ ૨૭.૧૩૦॥

ભીમસ્તદા શત્રુબલં સમસ્તં વિદ્રાવયામાસ જઘાન ચાઽજૌ ।
વીરાન્ રણાયાભિમુખાન્ સ્વયન્ત્રા કુર્વંશ્ચ વાર્તા રમમાણ એવ ॥ ૨૭.૧૩૧॥

તદાઽસદત્તં શકુનિઃ સસૈન્યો દુર્યોધનસ્યાવરજૈરુપેતઃ ।
ચ્દિ।તં ભીમસેનો વિરથં નિરાયુધં વિધાય બાણૈર્ભુવિ ચ ન્યપાતયત્ ॥ ૨૭.૧૩૨॥

ન જઘ્નિવાં સ્તં સહદેવભાગં પ્રકલ્પિતં સ્વેન તદાઽક્ષગોષ્ઠ્યામ્ ।
તં મૂર્ચ્છિતં શ્વાસમાત્રાવશેષં દુર્યોધનઃ સ્વરથેનાપનિન્યે ॥ ૨૭.૧૩૩ ॥

દુર્યોધનસ્યાવરજા દશાત્ર પ્રદુદ્રુવુર્ભીમસેનં વિહાય ।
તદાઽર્જુનં વાસુદેવં ચ દૃષ્ટ્વા પ્રીતઃ શ્રુત્વા ધર્મરાજપ્રવૃત્તિમ્ ॥ ૨૭.૧૩૪ ॥

પુનશ્ચ નિઘ્નન્તમરિપ્રવીરાન્ વિદ્રાવયન્તં ચ નિજાં વરૂથિનીમ્ ।
સસાર દુઃ શાસન આત્તધન્વા ભીમોઽપિ તં સિં હ ઇવાભિપેતિવાન્ ॥ ૨૭.૧૩૫ ॥

તં રૂક્ષવાચો મુહુરર્પયન્તં વિધાય ભીમો વિરથં ક્ષણેન ।
પ્રગૃહ્ય ભૂમૌ વિનિપાત્ય વક્ષો વિદારયામાસ ગદાપ્રહારતઃ ॥ ૨૭.૧૩૬ ॥

આક્રમ્ય કણ્ઠં ચ પદોદરેઽસ્ય નિવિશ્ય પશ્યન્મુખમાત્તરોષઃ ।
વિકોશમાકાશનિભં વિધાય મહાસિમસ્યોરસિ સઞ્ચખાન ॥ ૨૭.૧૩૭ ॥

કૃત્વાઽસ્ય વક્ષસ્યુરુસત્તટાકં પપૌ નિકામં તૃષિતોઽમૃતોપમમ્ ।
તચ્છોણિતામ્ભો ભ્રમદક્ષમેનં સં સ્મારયામાસ પુરાકૃતાનિ ॥ ૨૭.૧૩૮ ॥

વાક્સાયકાંશ્ચાસ્ય પુરા સમર્પિતાન્ સં સ્મારયામાસ પુનઃ પુનર્ભૃશમ્ ।
દન્તાન્તરં ન પ્રવિવેશ તસ્ય રક્તં હ્યપેયં પુરુષસ્ય જાનતઃ ॥ ૨૭.૧૩૯ ॥

તથાઽપિ શત્રુપ્રતિભીષણાય પપાવિવાઽસ્વાદ્ય પુનઃ પુનર્ભૃશમ્ ।
સ્મરન્નૃસિં હં ભગવન્તમીશ્વરં સ મન્યુસૂક્તં ચ દદર્શ ભક્ત્યા ॥ ૨૭.૧૪૦ ॥

“યસ્તે મન્યો” (૮૧) ઇત્યતો નારસિં હં સોમં તસ્મૈ ચાઽર્પયચ્છોણિતાખ્યમ્ ।
યુદ્ધાખ્યયજ્ઞે સોમબુદ્ધ્યાઽરિવક્ષ ઇહેતિ સામ્ના ગદયા વિભિન્દન્ ॥ ૨૭.૧૪૧ ॥

ઉવાચ વાચં પુરુષપ્રવીરઃ સત્યાં પ્રતિજ્ઞાં લોકમધ્યે વિધાય ।
યાઃ સપતયસ્તા અપતયો હિ જાતા યાસાઽપતિઃ સા સપતિશ્ચ જાતા ॥ ૨૭.૧૪૨ ॥

પશ્યન્તુ ચિત્રાં પરમસ્ય શક્તિં યે વૈ તિલાઃ ષણ્ઢતિલા બભૂવુઃ ।
(૮૧) ઋગ્વેદ ૧૦.૮૩.૧
સ્ત્રી।એનં ગૃહીતં ચ મયા યદીહ કશ્ચિત્પુમાન્મોચયતુ સ્વવીર્યાત્ ॥ ૨૭.૧૪૩ ॥

ઇતિ બ્રુવાણઃ પુનરેવ રક્તં પપૌ સુધાં દેવવરો યથા દિવિ ।
પુનશ્ચ સપ્રાણમમું વિસૃજ્ય નદન્નનર્તારિબલે નિરાયુધઃ ॥ ૨૭.૧૪૪ ॥

પ્રત્યનૃત્યન્ યેઽસ્માન્ પુનર્ગૌરિતિ ગૌરિતિ ।
તાન્ વયં પ્રતિનૃત્યામઃ પુનર્ગૌરિતિ ગૌરિતિ ॥ ૨૭.૧૪૫ ॥

ઇતિ બ્રુવન્નૃત્યમાનોઽરિમધ્ય આસ્ફોટયચ્છત્રુગણાનજોહવીત્ ।

શશાક ચ દ્રષ્ટુમમું ન કશ્ચિદ્વૈકર્તનદ્રૌણિસુયોધનાદિષુ ॥ ૨૭.૧૪૬॥

ભયાચ્ચ કર્ણસ્ય પપાત કાર્મુકં નિમીલયામાસ તદાઽક્ષિણી ચ ।
સમ્બોધિતો મદ્રરાજેન યુદ્ધે સ્થિતઃ કથઞ્ચિત્સ તુ પાર્થભાગઃ ॥ ૨૭.૧૪૭॥

દ્રૌણિર્વિહાયૈનમપાજગામ દૂરં તદા ભીમસેનો જગાદ ।
પીતઃ સોમો યુદ્ધયજ્ઞે મયાઽદ્ય વધ્યઃ પશુર્મે હરયે સુયોધનઃ ॥ ૨૭.૧૪૮॥

ઇતિ બ્રુવન્મૃતમુત્સૃજ્ય શત્રું દુર્યોધનં ચાઽશુ રુષાઽભિદુદ્રુવે ।
આયાન્તમીક્ષ્યૈવ તમુગ્રપૌરુષં દુદ્રાવ ભીતઃ સ સુયોધનો ભૃશમ્ ॥ ૨૭.૧૪૯॥

બલદ્વયં ચાપયયૌ વિહાય ભયાદ્ભીમં કૃષ્ણપાર્થૌ વિનૈવ ।
આયોધનં શૂન્યમભૂન્મુહૂર્તં નનર્ત ભીમો વ્યાઘ્રપદેન હર્ષાત્ ॥ ૨૭.૧૫૦॥

સઙ્કુલ્ય શત્રૂન્ ગોવદેવાઽજિમધ્યે શાર્દૂલવત્તચ્ચરિતં નિશામ્ય ।
જહાસ કૃષ્ણશ્ચ ધનઞ્જયશ્ચ શશં સતુશ્ચૈનમતિપ્રહૃષ્ટૌ ॥ ૨૭.૧૫૧॥

યદા સરઙ્ગઃ પવમાનસૂનુના શૂન્યઃ કૃતસ્તત્ર મહૂર્તમાત્રાત્ ।
દુર્યોધનસ્યાવરજાઃ શરૌઘૈરવીવૃષન્ ભીમમુદારસત્ત્વમ્ ॥ ૨૭.૧૫૨॥

તાન્મારુતિર્બાણવરૈર્નિકૃત્તશીર્ષાન્ યમાયાનયદાશુ વીરઃ ।
તસ્મિન્ દિને વિં શતિધાર્તરાષ્ટ્ર હતાસ્તદન્યે સમરાત્પ્રદુદ્રુવુઃ ॥ ૨૭.૧૫૩॥

કર્માણ્યનન્યૌપયિકાનિ ભીમે કુર્વત્યેવં ભીતભીતેઽરિસઙ ન્ઘે ।
નિમીલિતાક્ષે ચ ભયેન કર્ણે કર્ણાત્મજો નકુલં પ્રત્યધાવત્ ॥ ૨૭.૧૫૪॥

ચ્દીઇંઆદ્રીસુતો વૃષસેનં શરૌઘૈરવારયત્તં વિરથં ચકાર ।
કર્ણાત્મજઃ સોઽપ્યસિચર્મપાણિસ્તસ્યાનુગાં સ્ત્રિસહસ્રં જઘાન ॥ ૨૭.૧૫૫॥

કર્ણાત્મજસ્તસ્ય સઞ્છિદ્ય ચર્મ ભીમાર્જુનાદીનપિ બાણસઙ્ઘૈઃ ।
અવીવૃષત્તસ્ય પાર્થઃ શરેણ ગ્રીવાબાહૂરૂન્ યુગપચ્ચકર્ત ॥ ૨૭.૧૫૬॥

એકેન બાણેન સુતે હતે સ્વે વૈકર્તનો વાસવિમભ્યધાવત્ ।
તયોરભૂદ્વૈરથયુદ્ધમદ્ભુતં સર્વાસ્ત્રવિદ્ધરયોરુગ્રરૂપમ્ ॥ ૨૭.૧૫૭॥

પક્ષગ્રહાસ્તત્ર સુરાસુરાસ્તયોરન્યે ચ જીવા ગગનં સમાસ્થિતાઃ ।
મહાન્ વિવાદોઽપ્યભવત્તયોઃ કૃતે તદા ગિરીશોઽવદદબ્જયોનિમ્ ॥ ૨૭.૧૫૮॥

સુરાસુરાણાં ભીમદુર્યોધનૌ દ્વૌ સમાશ્રયૌ તત્પ્રિયૌ કર્ણપાર્થૌ ।
પ્રાણોપમૌ તેન ચૈતત્કૃતે તે સુરાસુરાઃ કર્તુમિચ્છન્તિ યુદ્ધમ્ ।
તદા વિનાશો જગતાં મહાન્ સ્યાત્તેનાનયોઃ સમમેવાસ્તુ યુદ્ધમ્ ॥ ૨૭.૧૫૯॥

ઇતીરિતે વાસવઃ પદ્મયોનિં જગાદ કૃષ્ણો યત્ર જયશ્ચ તત્ર ।
કામો ન કૃષ્ણસ્ય મૃષા ભવેદ્ધિ કામોઽસ્ય પાર્થસ્ય જયં પ્રદાતુમ્ ॥ ૨૭.૧૬૦॥

ઇત્યૂચિવાન્ વાસવઃ ફલ્ગુનસ્ય જયોઽસ્તુ કર્ણસ્ય વધસ્તથેતિ ।
ઉક્ત્વાઽનમત્કઞ્જભવસ્તથેતિ પ્રાહાસુરાન્ દેવતાશ્ચાઽબભાષે ॥ ૨૭.૧૬૧॥

ન કર્ણાર્જુનયોરર્થે વિરોધં કુરુત ક્વચિત્ ।
ભીમદુર્યોધનાર્થે વા પશ્યન્ત્વેવ ચ સં યુગમ્ ।
ઇત્યુક્તે શાન્તિમાપન્ના દદૃશુઃ સં યુગં તયોઃ ॥ ૨૭.૧૬૨॥

વવર્ષતુસ્તૌ ચ મહાસ્ત્રશસ્ત્રૈર્ભીમો રથસ્થોઽવરજં જુગોપ ।
શૈનેયપાઞ્ચાલમુખાશ્ચ પાર્થમાવાર્ય તસ્થુઃ પ્રસભં નદન્તઃ ॥ ૨૭.૧૬૩॥

દુર્યોધનો દ્રૌણિમુખાશ્ચ કર્ણં ররક્ષુરાવાર્ય તદાઽસ યુદ્ધમ્ ।
તત્રાર્જુનં બાણવરૈઃ સ કર્ણઃ સમર્દયામાસ વિશેષયન્ રણે ॥ ૨૭.૧૬૪॥

તદા નદન્ ભીમસેનો જગાદ ગદાં સમાદાય સમાત્તરોષઃ ।
અહં વૈનં ગદયા પોથયામિ ત્વં વા જહીમં સમુપાત્તવીર્યઃ ।
કૃષ્ણોઽપિ તં બોધયામાસ સમ્યઙ્નરાવેશં વ્યઞ્જયન્ ભૂય એવ ॥ ૨૭.૧૬૫॥

સ્વિવ્।સમૃદ્ધવીર્યઃ સ તદા ધનઞ્જયઃ સુયોધનદ્રૌણિકૃપાન્ સભોજાન્ ।
સાકં ચ બાણૈર્વિરથાંશ્ચકાર વિવ્યાધ તાનપ્યરિહા સુપુઙ્ખૈઃ ॥ ૨૭.૧૬૬॥

તે કિઞ્ચિદૂરતસ્તસ્થુઃ પશ્યન્તો યુદ્ધમુત્તમમ્ ।
અમાનુષં તત્પાર્થસ્ય દૃષ્ટ્વા કર્મ ગુરોઃ સુતઃ ।
ગૃહીત્વા પાણિના પાણિં દુર્યોધનમભાષત ॥ ૨૭.૧૬૭॥

દૃષ્ટં હિ ભીમસ્ય બલં ત્વયાઽદ્ય તથૈવ પાર્થસ્ય યથા જિતા વયમ્ ।
અલં વિરોધેન સમેત્ય પાણ્ડવૈઃ પ્રશાધિ રાજ્યં ચ મયા સમેતઃ ॥ ૨૭.૧૬૮॥

ધનઞ્જયસ્તિષ્ઠતિ વારિતો મયા જનાર્દનો નૈવ વિરોધમિચ્છતિ ।
વૃકોદરસ્તદ્વચને સ્થિતઃ સદા યુધિષ્ઠિરઃ શાન્તમનાસ્તથા યમૌ ॥ ૨૭.૧૬૯॥

હિતાર્થમેતત્તવ વાક્યમીરિતં ગૃહાણ મે નૈવ ભયાદુદીરિતમ્ ।
અહં હ્યવધ્યો મમ ચૈવ માતુલો ન શઙ્કિતું મે વચનં ત્વમર્હસિ ॥ ૨૭.૧૭૦॥

ઇતીરિતઃ પ્રાહ સુયોધનસ્તં દુઃ શાસનસ્યાદ્ય પપૌ હિ શોણિતમ્ ।
શાર્દૂલચેષ્ટામકરોચ્ચ ભીમો ન મે કથઞ્ચિત્તદનેન સન્ધિઃ ॥ ૨૭.૧૭૧॥

ઇત્યુક્તો દ્રૌણિરાસીત્સ તૂષ્ણીં કર્ણધનઞ્જયૌ ।
મહાસ્ત્રશસ્ત્રવર્ષેણ ચક્રતુઃ ખમનન્તરમ્ ॥ ૨૭.૧૭૨॥

આગ્નેયવારુણૈન્દ્રાદીન્યેતાન્યન્યોન્યમૃત્યવે ।
બ્રહ્માસ્ત્રમપ્યુભૌ તત્ર પ્રયુજ્યાઽનદતાં રણે ।
અન્યોન્યાસ્ત્રપ્રતીઘાતં કૃત્વોભૌ ચ વિરેજતુઃ ॥ ૨૭.૧૭૩॥

ક્રમેણ વૃદ્ધોરુબલેન તત્ર સુરેન્દ્રપુત્રેણ વિરોચનાત્મજઃ ।
નિરાકૃતો નાગમયં શરોત્તમં બ્રહ્માસ્ત્રયુક્તં વિસસર્જ વાસવૌ ॥ ૨૭.૧૭૪॥

તં વાસુદેવો રથમાનમય્ય મોઘં ચકારાર્જુનતઃ કિરીટમ્ ।
ચૂર્ણીકૃતં તેન સુરેન્દ્રસૂનોર્દિવ્યં યયૌ બાણગતશ્ચ નાગઃ ॥ ૨૭.૧૭૫॥

નમિતે વાસુદેવેન રથે પઞ્ચાઙ્ગુલં ભુવિ ।
અપાઙ્ગદેશમુદ્દિશ્ય મુક્તે નાગે કિરીટિનઃ ॥ ૨૭.૧૭૬॥

સ્દ્ર।ભઙ્ક્ત્વા કિરીટં વિયતિ ગચ્છતિ પ્રભુણોદિતઃ ।
બાણૈસ્તક્ષકપુત્રં તં વાસવિઃ પૂર્વવૈરિણમ્ ॥ ૨૭.૧૭૭॥

હત્વા નિપાતયામાસ ભૂમૌ કર્ણસ્ય પશ્યતઃ ।
બ્રહ્માસ્ત્રસ્યાતિવેગિત્વં પ્રાપ્તં કર્ણેન ભાર્ગવાત્ ॥ ૨૭.૧૭૮॥

પુનશ્ચ પાર્થેન મહાસ્ત્રયુદ્ધં પ્રકુર્વતઃ સૂર્યસુતસ્ય ચક્રમ્ ।
રથસ્ય ભૂમિર્ગ્રસતિ સ્મ શાપાદસ્ત્રાણિ દિવ્યાનિ ચ વિસ્મૃતિં યયુઃ ॥ ૨૭.૧૭૯॥

ઉદ્ધર્તુકામો રથચક્રમેવ પાર્થં યયાચેઽવસરં પ્રદાતુમ્ ।
નેત્યાહ કૃષ્ણોઽઞ્જલિકં સુઘોરં ત્રિનેત્રદત્તં જગૃહે ચ પાર્થઃ ॥ ૨૭.૧૮૦॥

સત્યેન ધર્મેણ ચ સન્નિયોજ્ય મુમોચ કર્ણસ્ય વધાય બાણમ્ ।
ચિચ્છેદ તેનૈવ ચ તસ્ય શીર્ષં સન્ધિત્સતો બાણવરં સુઘોરમ્ ॥ ૨૭.૧૮૧॥

અપરાહ્ણેઽપરાહ્ણસ્ય સૂતજસ્યેન્દ્રસૂનુના ।
છિન્નમઞ્જલિકેનાઽજૌ સોત્સેધમપતચ્છિરઃ ॥ ૨૭.૧૮૨॥

તસ્મિન્ હતે દીનમુખઃ સુયોધનો યયૌ સમાહૃત્ય બલં સશલ્યઃ ।
યુધિષ્ઠિરઃ કર્ણવધં નિશમ્ય તદા સમાગત્ય દદર્શ તત્તનુમ્ ॥ ૨૭.૧૮૩॥

શશંસ સ કૃષ્ણં ચ ધનઞ્જયં ચ ભીમં ચ યેઽન્યેઽપિ યુધિ પ્રવીરાઃ ।
ગત્વા ચતેશિબિરં મોદમાના ઊષુઃ સકૃષ્ણાસ્તદનુવ્રતાઃ સદા ॥ ૨૭.૧૮૪॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે

કર્ણવધો નામ સપ્તવિંશોઽધ્યાયઃ ॥

## અથ અષ્ટાવિંશોઽધ્યાયઃ ।

(પાણ્ડવરાજ્યલાભઃ )

ૐ । પ્રભાતાયાં તુ શર્વર્યાં ગુરુપુત્રાનુમોદિતઃ ।
શલ્યં સેનાપતિં કૃત્વા યોદ્ધું દુર્યોધનોઽભ્યયાત્ ॥ ૨૮.૧॥

તમભ્યયુઃ પાણ્ડવાશ્ચ હૃષ્ટા યુદ્ધાય દંસિતાઃ ।
તત્રાઽસીત્સુમહદ્યુદ્ધં પાણ્ડવાનાં પરૈઃ સહ ॥ ૨૮.૨॥

અગ્રે ભીમઃ પાણ્ડવાનાં મધ્યે રાજા યુધિષ્ઠિરઃ ।
પૃષ્ઠે ગાણ્ડીવધન્વાઽસીદ્વાસુદેવાભિરક્ષિતઃ ॥ ૨૮.૩॥

ચક્રરક્ષૌ યમૌ રાજ્ઞો ધૃષ્ટદ્યુમ્નશ્ચ સાત્યકિઃ ।
નૃપસ્ય પાર્શ્વયોરાસ્તામગ્રેઽન્યેષાં ગુરોઃ સુતઃ ॥ ૨૮.૪॥

મધ્યે શલ્યઃ પૃષ્ઠતોઽભૂદ્ભ્રાતૃભિશ્ચ સુયોધનઃ ।
ચક્રરક્ષૌ તુ શલ્યસ્ય શકુનિસ્તત્સુતસ્તથા ।
કૃપશ્ચ કૃતવર્મા ચપાર્શ્વયોઃ સમવસ્થિતૌ ॥ ૨૮.૫॥

તત્રભવન્મહદ્યુદ્ધં ભીમસ્ય દ્રૌણિના સહ ।
રાજ્ઞઃ શલ્યેન ચ તથા ઘોરરૂપં ભયાનકમ્ ॥ ૨૮.૬॥

તત્ર નાતિપ્રયત્નેન દ્રૌણિર્ભીમેન સાયકૈઃ ।
વિરથીકૃતસ્તથા ધર્મસૂનુઃ શલ્યેન તત્ક્ષણાત્ ॥ ૨૮.૭॥

આસસાદ તદા શલ્યં કપિપ્રવરકેતનઃ ।
તયોરાસીન્મહદ્યુદ્ધમદ્ભુતં રોમહર્ષણમ્ ॥ ૨૮.૮॥

રથમન્યં સમાસ્થાય દ્રૌણિર્ભીમં સમભ્યયાત્ ।
દુર્યોધનશ્ચ ભીમસ્ય શરૈરાવારયદ્દિશઃ ॥ ૨૮.૯॥

તાવુભૌ શરવર્ષેણ વારયામાસ મારુતિઃ ।
તાભ્યાં તસ્યાભવદ્યુદ્ધં સુઘોરમતિમાનુષમ્ ॥ ૨૮.૧૦॥

દુર્યોધનસ્યાવરજાન્ દ્રૌપદેયા યુયુત્સુના ।
ચ્દ્રી। શિખણ્ડ્યાદ્યૈર્માતુલૈશ્ચ સહ સર્વાન્ન્યવારયન્ ॥ ૨૮.૧૧॥

સહદેવસ્તુ શકુનિમુલૂકં નકુલસ્તદા ।

ધૃષ્ટદ્યુમ્નશ્ચ હાર્દિક્યં સાત્યકિઃ કૃપમેવ ચ ।
તેષાં તદભવદ્યુદ્ધં ચિત્રં લઘુ ચ સુષ્ઠુ ચ ॥ ૨૮.૧૨॥

શલ્યસ્તુ શરસઙ્ઘાતૈઃ પાર્થસ્યાવારયદ્દિશઃ ।
સોઽપિ વિવ્યાધ વિશિખૈઃ શલ્યમાહવશોભિનમ્ ।
તયોઃ સુસમમેવાઽસીચ્ચિરં દેવાસુરોપમમ્ ॥ ૨૮.૧૩॥

તતઃ શરં વજ્રનિભં મદ્રરાજઃ સમાદદે ।
તેન વિવ્યાધ બીભત્સું હૃદયે સ મુમોહ ચ ॥ ૨૮.૧૪॥

ઉપલભ્ય પુનઃ સંજ્ઞાં વાસવિઃ શત્રુતાપનઃ ।
ચિચ્છેદ કાર્મુકં સઙ્ખે મદ્રરાજસ્ય ધીમતઃ ॥ ૨૮.૧૫॥

સોઽન્યત્કાર્મુકમાદાય મુમોચાસ્ત્રાણિ ફલ્ગુને ।
સૌરં યામ્યં ચ પાર્જન્યં તાન્યૈન્દ્રેણ જઘાન સઃ ॥ ૨૮.૧૬॥

પુનર્ન્યકૃન્તત્તચ્ચાપમિન્દ્રસૂનુરમર્ષિતઃ ।
શલ્યો ગદાં સમાવિધ્ય ચિક્ષેપાર્જુનવક્ષસિ ।
તદા મુમોહ બીભત્સુસ્તત ઉચ્ચુક્રુશુઃ પરે ॥ ૨૮.૧૭॥

પ્રાપ્ય સંજ્ઞાં પુનઃ પાર્થઃ શલ્યં વિવ્યાધ વક્ષસિ ।
સ વિહ્વલિતસર્વાઙ્ગઃ શિશ્રિયે ધ્વજમુત્તમમ્ ॥ ૨૮.૧૮॥

સમાશ્વસ્તઃ પુનર્બાણં યમદણ્ડનિભં રણે ।
મુમોચ પાર્થસ્ય સ ચ નિર્બિભેદ સ્તનાન્તરમ્ ॥ ૨૮.૧૯॥

તેન વિહ્વલિતઃ પાર્થો ધ્વજયષ્ટિં સમાશ્રિતઃ ।
સમાશ્વસ્તઃ પ્રચિચ્છેદ મદ્રરાજસ્ય કાર્મુકમ્ ।
છત્રં ધ્વજં ચ તરસા સારથિં ચ ન્યપાતયત્ ॥ ૨૮.૨૦॥

તદાઽન્યં રથમાસ્થાય ધર્મરાજઃ શરોત્તમૈઃ ।
ચતુર્ભિશ્ચતુરો વાહાઞ્છલ્યસ્ય નિજઘાન હ ॥ ૨૮.૨૧॥

ચ્દ્રીઇ। શલ્યોઽન્યં રથમાસ્થાય સર્વાં સ્તાઞ્છરવૃષ્ટિભિઃ ।
છાદયામાસ રાજાનં વિરથં ચ ચકાર હ ॥ ૨૮.૨૨॥

નિહત્યાશ્વાન્ સાત્યકેશ્ચ ધૃષ્ટદ્યુમ્નસ્ય ચાભિભૂઃ ।
ચાપે ચ્છિત્ત્વા ચ યમયોર્દધ્મૌ શઙ્ખં મહાસ્વનમ્ ॥ ૨૮.૨૩॥

તતસ્તુ શલ્યં સમુદીર્યમાણં દૃષ્ટ્વા રણે ભીમસેનસ્તરસ્વી ।

ન્યવારયદ્બાણવરૈરનેકૈશ્ચકાર ચૈનં વિરથં ક્ષણેન ॥ ૨૮.૨૪॥

આસ્થાય ચાન્યં રથમાપતન્તં પુનશ્ચ શલ્યં ભૃશમેવ મર્મસુ ।
નિર્ભિદ્ય બાણૈર્વિરથં ચકાર પુનસ્તૃતીયં ચ રથં રુરોજ ॥ ૨૮.૨૫॥

આત્તાન્યાત્તાન્યાયુધાન્યસ્ય ભીમઃ સર્વાણિ ચિચ્છેદ બિભેદ ચાસ્ય ।
મર્માણિ બાણૈર્નિતરાં પુનશ્ચ સ મુષ્ટિમુદ્યમ્ય જગામ ધર્મજમ્ ॥ ૨૮.૨૬॥

તં ભીમભિન્નમર્માણં વિવર્માણં નિરાયુધમ્ ।
શ્વાસમાત્રાવશિષ્ટં ચ મરણાયૈવ કેવલમ્ ॥ ૨૮.૨૭॥

આત્માનમભિગચ્છન્તં દૃષ્ટ્વાઽન્યં રથમાસ્થિતઃ ।
હન્તુકામો રણે વીરમમોઘાં શક્તિમાદદે ॥ ૨૮.૨૮॥

દિવ્યાસ્ત્રૈરપિ સં યોજ્ય તાં તદા ધર્મનન્દનઃ ।
સત્યધર્મફલૈશ્ચૈવ ચિક્ષેપાસ્ય હૃદિ ત્વરન્ ॥ ૨૮.૨૯॥

સ ભિન્નહૃદયો ભૂમૌ પપાતાભિમુખો નૃપમ્ ।
સત્યધર્મરતઃ શલ્ય ઇન્દ્રસ્યાતિથિતામગાત્ ॥ ૨૮.૩૦॥

મદ્રરાજે હતે વીરે સુશર્માઽર્જુનમભ્યયાત્ ।
સં શપ્તકાવશિષ્ટૈસ્તમનયન્મૃત્યવેઽર્જુનઃ ॥ ૨૮.૩૧॥

દુર્યોધનસ્યાવરજાનવશિષ્ટાન્ વૃકોદરઃ ।
સર્વાન્ જઘાન સેનાં ચ નિશ્શેષમકરોદ્રણે ॥ ૨૮.૩૨॥

ઉલૂકં સહદેવોઽથ શકુનિં ચાતિપાપિનમ્ ।
સ્ઘ્દિક્ષ્।જઘાન દ્રૌણિહાર્દિક્યકૃપાન્ ભીમાર્જુનૌ તતઃ ॥ ૨૮.૩૩॥

બહુશો વિરથીકૃત્ય પીડયિત્વા પુનઃ પુનઃ ।
દ્રાવયામાસતુસ્તે તુ ભીષિતા વિવિશુર્વનમ્ ॥ ૨૮.૩૪॥

શૈનેયેન ગૃહીતોઽથ સઞ્જયોઽનન્તશક્તિના ।
વ્યાસેન મોચિતોઽથૈકઃ પાર્થાન્ દુર્યોધનોઽભ્યયાત્ ॥ ૨૮.૩૫॥

તેષામભૂત્તસ્ય ચ ઘોરરૂપં યુદ્ધં સ બાણૈર્બહુશોઽર્જુનં ચ ।
ચકાર મૂર્ચ્છાભિગતં યુધિષ્ઠિરં યમાવયત્નાદ્વિરથાંશ્ચકાર ॥ ૨૮.૩૬॥

તં ભીમસેનો વિરથં ચકાર ગજં સમારુહ્ય પુનઃ સમભ્યયાત્ ।
પુનશ્ચ શૈનેયશિખણ્ડિપાર્ષતાન્ યમૌ નૃપં ચ વ્યદધાન્નિરાયુધાન્ ॥ ૨૮.૩૭॥

ગજે ચ ભીમેન શરૈર્નિપાતિતે સમારુહદ્વાજિવરં સુનિર્ભયઃ ।
સ તેન ચ પ્રાસકરો રણેઽરિહા ચચાર શૈનેયમતાડયચ્ચ ॥ ૨૮.૩૮॥

મુમોહ તેનાભિહતઃ સ સાત્યકિર્યમાવપિ પ્રાસનિપીડિતૌ રથે ।
નિષીદતુર્ધર્મસુતં પ્રયાન્તં સમીક્ષ્ય ભીમોઽસ્ય જઘાન વાજિનમ્ ॥ ૨૮.૩૯॥

પ્રાસે નિકૃત્તે ચ વૃકોદરેણ વિવાહનઃ સોઽપયયૌ સુયોધનઃ ।
આદાય ગુર્વીં ચ ગદાં પ્રયાતો દ્વૈપાયનસ્યોરુસરો વિવેશ ॥ ૨૮.૪૦॥

એવમક્ષોહિણીષટ્કં ભીમેન નિહતં રણે ।
પઞ્ચ પાર્થેન નિહતા અર્દ્ધં કાલિઙ્ગકાનૃતે ।
એકાદશાક્ષોહિણીભ્યઃ શિષ્ટમન્યૈર્નિસૂદિતમ્ ॥ ૨૮.૪૧॥

અક્ષોહિણીચતુષ્કં ચ પાર્થાનાં દ્રૌણિના હતમ્ ।
અન્યૈરન્યાઃ સમસ્તૈશ્ચ દ્રોણકર્ણમહાબ્રતાઃ ।
દુર્યોધનો ભૌમસૂનુઃ પ્રાયઃ સેનાહનઃ ક્રમાત્ ॥ ૨૮.૪૨॥

જયં લબ્ધ્વા તદત્સૂચ્ચૈઃ પાણ્ડવેષુ મહાત્મસુ ।
દુર્યોધનો જલસ્તમ્ભં કૃત્વા મન્ત્રાન્ જજાપ હ ॥ ૨૮.૪૩॥

મન્ત્રા દુર્વાસસા દત્તા મૃતસઞ્જીવનપ્રદાઃ ।
ૠક્ષ્।જલે સ્થિત્વા જપન્ સપ્તદિનૈઃ સર્વાન્મૃતાનપિ ।
ઉધ્દરેદ્ધાર્તરાષ્ટ્રોઽયં સ્યુરવધ્યાશ્ચ તે પુનઃ ॥ ૨૮.૪૪॥

ઇતિ વિદ્યાબલં તસ્ય જ્ઞાત્વા પાણ્ડુસુતાસ્તતઃ ।
અન્વેષન્તઃ શુશ્રુવુશ્ચ વ્યાધેભ્યસ્તં જલે સ્થિતમ્ ।
અગચ્છંશ્ચ તતસ્તત્ર પુરસ્કૃત્ય જનાર્દનમ્ ॥ ૨૮.૪૫॥

તદા જલાત્સમુન્મજ્જ્ય ત્રિભિર્દ્રૌણિપુરસ્સરૈઃ ।
મન્ત્રયન્તં સ્મ દદૃશુસ્તાન્ દૃષ્ટ્વા તે પ્રદુદ્રુવુઃ ॥ ૨૮.૪૬॥

દુર્યોધનોઽવિશત્તોયં દૃષ્ટ્વા તં કેશવાજ્ઞયા ।
યુધિષ્ઠિરઃ સુપુરુષૈર્વાક્યૈરેનમથાઽહ્વયત્ ॥ ૨૮.૪૭॥

અમર્ષિતોઽસૌ ધૃતરાષ્ટ્રપુત્રઃ શ્વસં સ્તદા દણ્ડહતો યથાઽહિઃ ।
ઉવાચ શાઠ્યાત્તપસે વનાય યાયાં ભવાઞ્છાસતુ સર્વપૃથ્વીમ્ ॥ ૨૮.૪૮॥

તમાહ ધર્મજો રાજા યસ્ત્વં કૃષ્ણે સમાગતે ।
સૂચ્યગ્રવેધ્યાં પૃથિવીં દાતું નૈચ્છઃ કથં પુનઃ ॥ ૨૮.૪૯॥

ઘાતયિત્વા સર્વપૃથ્વીં ભીષ્મદ્રોણમુખાનપિ ।
દાતુમિચ્છસિ સર્વાં ચ પૃથ્વીં નાદ્ય વયં પુનઃ ॥ ૨૮.૫૦॥

અહત્વા પ્રતિગૃહ્ણીમેહિ યુદ્ધે સ્થિરો ભવ ।
ન કુરૂણાં કુલે જાતસ્ત્વં યો ભીતો હ્યપોઽવિશઃ ॥ ૨૮.૫૧॥

ઇત્યાદિ રૂક્ષવચનં શ્રુત્વા દુર્યોધનો રુષા ।
જલસ્તમ્ભાત્સમુત્તસ્થૌ શ્વસન્નાશીવિષો યથા ॥ ૨૮.૫૨॥

ઉવાચ ચૈક એવાહમકિરીટો વિવર્મકઃ ।
ભવન્તો બહવો વર્મશિરસ્ત્રાણયુતા અપિ ॥ ૨૮.૫૩॥

યદ્યેવમપિ મે યુદ્ધં ભવદ્ભિર્મન્યસે સમમ્ ।
સર્વૈરેકેન વાયુદ્ધં કરિષ્યે નચ ભીર્મમ ॥ ૨૮.૫૪॥

ઇત્યુક્ત આહ ધર્માત્મા વર્માદ્યં ચ દદામિ તે ।
ત્દ્ક્ષિ।વૃણીષ્વ પ્રતિવીરં ચ પઞ્ચાનાં યં ત્વમિચ્છસિ ॥ ૨૮.૫૫॥

હત્વૈકં ત્વં ભુઙ્ક્ષ્વ રાજ્યમન્યે યામ વયં વનમ્ ।
હતે વા ત્વયિ તેનૈવ ભુઞ્જીમશ્ચાખિલાં ભુવમ્ ।
આદત્સ્વ ચાઽયુધં યેન જેતુમિચ્છસિ શાત્રવાન્ ॥ ૨૮.૫૬॥

ઇત્યુક્ત ઊચે નહિ દુર્બલૈરહં યોત્સ્યે ચતુર્ભિર્ભવદર્જુનાદિભિઃ ।
ભીમેન યોત્સ્યે ગદયા સદા હિ મે પ્રિયા ગદા નાન્યદથાઽયુધં સ્પૃશે ॥ ૨૮.૫૭॥

શ્રુત્વાઽસ્ય વાક્યં રભસો વૃકોદરો ગદાં તદાઽધ્યર્દ્ધભરાધિકાં મુદા ।
રાજ્ઞો ગદાયાઃ પરિગૃહ્ય વીરઃ સમુત્થિતો યુદ્ધમનાઃ સમુન્નદન્ ॥ ૨૮.૫૮॥

અથાઽહ નારાયણ આદિદેવો યુધિષ્ઠિરં કષ્ટમિદં કૃતં ત્વયા ।
નહ્યેષ રાજા ગદયા રણે ચરન્ શક્યો વિજેતું નિખિલૈઃ સુરાસુરૈઃ ॥ ૨૮.૫૯॥

સ નિશ્ચયાદ્ધશ્ચતુરો નિહન્યાત્સહાર્જુનાન્ ભીમસેનઃ કથઞ્ચિત્ ।
હન્તૈનમાજૌ નહિ ભીમતુલ્યો બલે ક્વચિદ્ધાર્તરાષ્ટ્રઃ કૃતી ચ ॥ ૨૮.૬૦॥

ઊરૂ ભીમેન ભેત્તવ્યૌ પ્રતિજ્ઞાં રક્ષતા રિપોઃ ।
નાભેરધસ્તાદ્ધનનં જના આહુર્ગદામૃધે ॥ ૨૮.૬૧॥

અધર્મ ઇતિ તત્કૃષ્ણો લોકનિન્દાનિવૃત્તયે ।
આપદ્ધર્મં દર્શયિતું કિઞ્ચિદ્વ્યાજેન સં યુતઃ ॥ ૨૮.૬૨॥

ભીમો હન્યાદ્ધાર્તરાષ્ટ્રમિત્યૂચે યદ્યપિ સ્ફુટમ્ ।

અવ્યાજેનાપિ શક્તોઽસૌ બલં નિસ્સીમમાહ ચ ॥ ૨૮.૬૩॥

આહ શિક્ષામપ્યનૂનાં યત્નં દુર્યોધનેઽધિકમ્ ।
નહિ ભીમોઽતિપ્રયત્નં કુર્યાદિતિ ગુણો હ્યયમ્ ॥ ૨૮.૬૪॥

પ્રતિજ્ઞાપાલનં ધર્મો દુષ્ટેષુ તુ વિશેષતઃ ।
ઇતિ ધર્મરહસ્યં તુ વિત્તઃ કૃષ્ણવૃકોદરૌ ॥ ૨૮.૬૫॥

નાન્યસ્તતો લોકનિન્દાં વ્યપનેતુમુભાવપિ ।
અનાપદ્યાપદિવ ચ દર્શયેતાં જનસ્ય તુ ॥ ૨૮.૬૬॥

ઋક્ષી।તતો ભીમઃ સર્વલોકસ્ય ધર્મં પ્રકાશયન્ વાક્યમિદં જગાદ ।
ઊરૂ તવાહં હિ યથાપ્રતિજ્ઞં ભેત્સ્યામિ નૈવાત્ર વિચારણીયમ્ ॥ ૨૮.૬૭॥

ઇત્યુક્તવન્તં પ્રસસાર ચાઽજૌ દુર્યોધનસ્તત્ર બભૂવ યુદ્ધમ્ ।
ભીમસ્તદાઽગ્ર્યપ્રકૃતિં વિધિત્સુર્મન્દઃ સ આજૌ વ્યચરજ્જનાર્થે ॥ ૨૮.૬૮॥

દર્શયન્તૌ ગદામાર્ગં ચિત્રં તૌ પ્રવિચેરતુઃ ।
બલભદ્રોઽપ્યાજગામ તદા તૌ પ્રતિવારિતુમ્ ॥ ૨૮.૬૯॥

વારિતાવપિ તેનોભૌ નૈવ યુદ્ધં પ્રમુઞ્ચતામ્ ।
તતો દદર્શ તદ્યુદ્ધં માનિતઃ કૃષ્ણપૂર્વકૈઃ ।
તૌ શિક્ષાબલસંયુક્તૌ મણ્ડલાનિ વિચેરતુઃ ॥ ૨૮.૭૦॥

તતો ભીમં વઞ્ચયિતું ધાર્તરાષ્ટ્રઃ શિરઃ ક્ષિતૌ ।
ન્યધાદુચ્છ્રિતસક્થીકસ્તદા કૃષ્ણાભ્યનુજ્ઞયા ।
પૃષ્ઠમૂલેઽહનદ્ભીમો ભિન્નસક્થિશ્ચ સોઽપતત્ ॥ ૨૮.૭૧॥

પ્રતિજ્ઞાપાલનાર્થાય નોભેર્નોપર્યધસ્તદા ।
ગદાયુદ્ધસ્ય મર્યાદાં યશશ્ચાપ્યભિરક્ષિતુમ્ ॥ ૨૮.૭૨॥

નાધસ્તાન્મધ્ય એવાસૌ નિજઘ્ને તં વૃકોદરઃ ।
એવં પ્રતિજ્ઞાયુગ્માર્થં ભગ્નં સક્થિયુગં રણે ॥ ૨૮.૭૩॥

કૃષ્ણં દ્યૂતે નિધેહીતિ યદવાદીત્સુયોધનઃ ।
તત્પ્રતિજ્ઞાનુસારેણ ભીમો મૂર્દ્ધાનમક્રમીત્ ।
“ઋષભાં મા સમાનાનાં” (૮૨)
(૮૨) ઋગ્વેદ ૧૦.૧૬૬.૧)ઇતિ સૂક્તં દદર્શ ચ ॥ ૨૮.૭૪॥

તેષાં પુણ્યાનિ વિદ્યાશ્ચ સમાદાયૈવ સર્વશઃ ।

તાંશ્ચકાર તમોગન્તૄન્સ્તસ્ય મૂર્ધ્નિ પદાऽઽક્રમન્ ॥ ૨૮.૭૫॥

સ્મારયામાસ કર્માણિ યાનિ તસ્ય કૃતાનિ ચ ।
કૃષ્ણબન્ધે કૃતો મન્ત્ર ઇતિ મૂર્ધ્નિ પદાऽહનત્ ॥ ૨૮.૭૬॥

પુનઃ પુનશ્ચ તદ્વીક્ષ્ય ચુક્રોધ મુસલાયુધઃ ।
ચુક્રોશ નૈવ ધર્મોऽયમિત્યસાવૂર્ધ્વબાહુકઃ ॥ ૨૮.૭૭॥

પુનઃ ક્રોધાભિતામ્રાક્ષ આદાય મુસલં હલમ્ ।
અભિદુદ્રાવ ભીમં તં ન ચચાલ વૃકોદરઃ ॥ ૨૮.૭૮॥

અભયે સં સ્થિતે ભીમે રામં જગ્રાહ કેશવઃ ।
આહ ધર્મેણ નિહતો ભીમેનાયં સુયોધનઃ ॥ ૨૮.૭૯॥

ન મણ્ડલેऽભિસારે વા નાપસારે ચ નાભિતઃ ।
અધો હન્યાદ્વઞ્ચયન્તમધો હત્વા ન દુષ્યતિ ॥ ૨૮.૮૦॥

કૃતા પ્રતિજ્ઞા ચ વૃકોદરેણ ભેત્સ્યે તવોરૂ ઇતિ યુક્તિપૂર્વમ્ ।
સં શ્રાવયાનેન તદેષ ધર્મતો જઘાન દુર્યોધનમગ્ર્યકર્મા ॥ ૨૮.૮૧॥

વાસુદેવવચઃ શ્રુત્વા ધર્મચ્છલમિતિ બ્રુવન્ ।
રૌહિણેયો જગામાऽશુ સ્વપુરીમેવ સાનુગઃ ॥ ૨૮.૮૨॥

તસ્મિન્ ગતે વાસુદેવં સમપૃચ્છદ્યુધિષ્ઠિરઃ ।
ધર્મોऽયમથવાऽધર્મ ઇતિ તં પ્રાહ કેશવઃ ॥ ૨૮.૮૩॥

ન સાક્ષાદ્ધર્મતો વધ્યા યે તુપાપતમા નરાઃ ।
દેવૈર્હિ વઞ્ચયિત્વૈવ હતાઃ પૂર્વં સુરારયઃ ।
અતોऽયમપ્યધર્મેણ હતો નાત્રાસ્તિ દૂષણમ્ ॥ ૨૮.૮૪॥

ભીષ્મદ્રોણૌ ચ કર્ણશ્ચ યદૈવોપધિના હતાઃ ।
કો નુ દુર્યોધને પાપે હતે દોષઃ કથઞ્ચન ॥ ૨૮.૮૫॥

પ્રતિજ્ઞાપાલનાયાપિ વિભેદોરૂ વૃકોદરઃ ।
ધર્મતશ્ચ પ્રતિજ્ઞેયં કૃતા તેનાનુરૂપતઃ ॥ ૨૮.૮૬॥

લોકતોऽપિ ન ધર્મસ્ય હાનિરત્ર કથઞ્ચન ।
યે ભીમસ્યાપ્રભાવજ્ઞાऽऽપદ્ધર્મં ચ મન્વતે ॥ ૨૮.૮૭॥

અવધ્યત્વે શિવવરાદ્ગદાશિક્ષાબલાદપિ ।
જરાસન્ધોપમો યસ્માદ્ધાર્તરાષ્ટ્રઃ સુવિશ્રુતઃ ॥ ૨૮.૮૮॥

તસ્માત્સદ્ધર્મ એવાયં ભીમચીર્ણ ઇતિ બ્રુવન્ ।
અપિ સં શયિનં ચક્રે ધર્મરાજં જગત્પતિઃ ॥ ૨૮.૮૯ ॥

ભૂભારક્ષતિજો ધર્મો મચ્છુશ્રૂષાત્મકસ્તુ યઃ ।
ભીમસ્યૈવ ભવેત્સમ્યગિતિ બુદ્ધ્યા પરઃ પ્રભુઃ ॥ ૨૮.૯૦ ॥

ચ્દ્ક્ષિવ્।સ્વેનૈવ બલભદ્રાય જનાય ચ પુનઃ પુનઃ ।
શ્રુત્વાઽપ્યુક્તં ન તત્યાજ સં શયં ધર્મજો યતઃ ।
તતોઽપ્યસં શયં કૃષ્ણો ન ચકાર યુધિષ્ઠિરમ્ ॥ ૨૮.૯૧ ॥

મુખ્યં ધર્મં હિ ભગવાન્ બલાયાઽહ જનાય ચ ।
ધર્મેણૈવ હતો રાજા ધાર્તરાષ્ટ્રઃ સુયોધનઃ ।
ઇતિ યદ્વક્ષ્યતિ પુનર્નિશ્ચયાર્થેઽર્જુનાય ચ ॥ ૨૮.૯૨ ॥

પુનઃ પુનર્ધર્મત એવ ભીમો જઘાન રાજાનમિતિ બ્રુવન્તમ્ ।
જગાદ કૃષ્ણં સ્ફુરિતાધરોષ્ઠઃ ક્રોધાત્સુપાપો ધૃતરાષ્ટ્રસૂનુઃ ।
ત્વયૈવ પાપે નિહિતા હિ પાર્થાઃ પાપાધિકસ્ત્વં હિ સદૈક એવ ॥ ૨૮.૯૩ ॥

ઇત્યૂચિવાં સં પ્રજગાદ કૃષ્ણો ન ત્વત્સમઃ પાપતમઃ કદાચિત્ ।
ભીષ્માદિહત્યાઽપિ તવૈવ પાપં યદન્વયુસ્ત્વામતિપાપનિશ્ચયમ્ ।
પાપં ચ પાપાનુગતં ચ હત્વા કથઞ્ચનાપ્યસ્તિ નચૈવ પાપમ્ ॥ ૨૮.૯૪ ॥

ન પાણ્ડવેષ્વસ્તિ તતો હિ કિઞ્ચિત્પાપં પ્રયત્નાચ્ચ નિસર્ગતોઽપિ ।
ગુણાધિકાસ્તે મદપાશ્રયાચ્ચ કો નામ તેષ્વણ્વપિ પાપમાહ ॥ ૨૮.૯૫ ॥

નિસર્ગતઃ પાપતમસ્ત્વમન્યાન્ ધર્મસ્થિતાન્ પાપપથે નિધાય ।
સ્વયં ચ પાપે નિરતઃ સદૈવ પાપાત્સુપાપાં ગતિમેવ યાસિ ॥ ૨૮.૯૬ ॥

ઇતિ બ્રુવન્તં પુનરાહ કૃષ્ણં દુર્યોધનઃ પાપકૃતાં પ્રધાનઃ ।
સ્વન્તોત્તમો નામ ક એવ મત્તઃ કો નામ દોષોઽસ્તિ મયા કૃતોઽત્ર ॥ ૨૮.૯૭ ॥

ઇષ્ટં ચ યજ્ઞૈશ્ચરિતં ચ પૂર્તૈઃ પદં રિપૂણાં નિહિતં હિ મૂર્ધ્નિ ।
મૃત્યુશ્ચ સઙ્ગ્રામશિરસ્યવાપ્તો રણોન્મુખેનૈવ મયા કિમન્યત્ ॥ ૨૮.૯૮ ॥

ઇષ્ટા ભોગા મયા ભુક્તાઃ પ્રાપ્તા ચ પરમા ગતિઃ ।
દુઃખિનો દુઃખમાપ્સ્યન્તિ પાર્થાસ્તે કૂટયોધિનઃ ॥ ૨૮.૯૯ ॥

ચન્દ્રસૂર્યનિભૈઃ શૂરૈર્ધાર્મિકૈઃ સદ્ભિરુજ્ઝિતા ।

કેવલા રત્નહીનેયં પાણ્ડવૈર્ભુજ્યતાં મહી ॥ ૨૮.૧૦૦॥

ઇત્યુક્તવત્યેવ નૃપે સુરેશૈઃ પ્રસૂનવૃષ્ટિર્વિહિતા પપાત ।
તામેવ બુદ્ધિં ધૃતરાષ્ટ્રસૂનોઃ કૃત્વા દૃઢાં પાતયિતું તમોઽન્ધે ॥ ૨૮.૧૦૧॥

સમ્ભાવયત આત્માનં વાસુદેવં વિનિન્દતઃ ।
તત્પરાંશ્ચ કથં ન સ્યાત્તમોઽન્તે ચ વિશેષતઃ ॥ ૨૮.૧૦૨॥

યદૈકૈકમલં તત્ર દુઃખાધિક્યં સમુચ્ચયાત્ ।
ઇતિ તત્કારયિત્વેશ આહ મોઘં તવાખિલમ્ ॥ ૨૮.૧૦૩॥

ઋક્ષ્વૃંઋશં સસ્ય કૃતઘ્નસ્ય ગુણવદ્દ્વેષિણઃ સદા ।
યદિ ધર્મફલં ધ્વાન્તં સૂર્યવત્સ્યાત્પ્રકાશકમ્ ॥ ૨૮.૧૦૪॥

વદન્ પુનઃ પુનરિદં ધર્મતો હત ઇત્યપિ ।
ખ્યાપયામાસ ભગવાન્ જને નિજજનેષ્ટદઃ ॥ ૨૮.૧૦૫॥

પ્રખ્યાપિતે વાસુદેવેન ધર્મે સતાં સર્વેષાં હૃદ્યમાસીત્સમસ્તમ્ ।
હતં ચ ધર્મેણ નૃપં વ્યજાનન્ પાપોઽયમિત્યેવ ચ નિશ્ચિતાર્થાઃ ॥ ૨૮.૧૦૬॥

યુધિષ્ઠિરોઽપાયદર્શી સદૈવ સસં શયોઽભૂત્સુમનોઽભિવૃષ્ટ્યા ।
સ્નેહાદ્દ્રૌણિઃ સઞ્જયો રૌહિણેયો દૌર્યોધનાત્પાપમિત્યેવ ચોચુઃ ॥ ૨૮.૧૦૭॥

તતઃ કૃષ્ણઃ પાણ્ડુપાઞ્ચાલકૈસ્તૈર્ભૃશં નદદ્ભિર્હૃષિતૈઃ સમેતઃ ।
યયૌ વિરિઞ્ચેશસુરેન્દ્રમુખ્યૈઃ સમ્પૂજિતસ્તૈશ્ચ રણાઙ્ગણાત્સ્મયન્ ॥ ૨૮.૧૦૮॥

તતઃ શ્રુત્વા સઞ્જયાદ્દુઃખતપ્તં સમ્બોધયિષ્યન્ પિતરં યુયુત્સુઃ ।
કૃષ્ણસ્ય રાજ્ઞશ્ચ મતેન યાતો જગામ ચાન્વેવ જનાર્દનશ્ચ ॥ ૨૮.૧૦૯॥

ધર્મયુક્તૈશ્ચ તત્ત્વાર્થૈર્લોકવૃત્તાનુદર્શકૈઃ ।
વાક્યૈ રાજાનમાશ્વાસ્ય પ્રાયાત્પાર્થાન્ પુનર્હરિઃ ॥ ૨૮.૧૧૦॥

કાલાનુસારતો દૈવાંશ્ચોપસં હર્તુમચ્યુતઃ ।
યયૌ સપાર્થશૈનેયઃ કુરૂણાં શિબિરં નિશિ ॥ ૨૮.૧૧૧॥

તદૈવ હાર્દિક્યકૃપાન્વિતોઽયાત્સુયોધનં દ્રૌણિરમું શયાનમ્ ।
પ્રભગ્નસક્થિં ચ સૃગાલભૂતૈઃ સમ્ભક્ષ્યમાણં દદૃશે શ્વસન્તમ્ ॥ ૨૮.૧૧૨॥

સ દુઃખશોકાભિહતો વિનિન્દ્ય પાર્થાન્મયા ભૂપ કિમત્ર કાર્યમ્ ।
ઇત્યાહ નિષ્પાણ્ડવતાં કુરુષ્વેત્યમું વ્યધાત્પાં સ્વભિષેકિણં નૃપઃ ॥ ૨૮.૧૧૩॥

ઉચ્છિદ્ય સન્તતિં પાણ્ડોઃ કૃત્વા સ્વક્ષેત્રસન્તતિમ્ ।
તયા ભૂરક્ષણહૃદા સોઽભિષિક્તસ્તથેત્યગાત્ ॥ ૨૮.૧૧૪॥

સ કૃષ્ણભીમપાર્થાનાં ભયાદેવ પુનર્વનમ્ ।
કૃપસાત્વતસં યુક્તો વિવેશ ગહનં રથી ॥ ૨૮.૧૧૫॥

તસ્ય ચિન્તયતો દ્રોણવધં દુર્યોધનસ્ય ચ ।
નાઽગાન્નિદ્રા નિશીથે ચ ધ્વાક્ષાન્યગ્રોધવાસિનઃ ॥ ૨૮.૧૧૬॥

હતાન્ સુબહુસાહસ્રાનેકેનાતિબલેન તુ ।
કૌશિકેન નિરીક્ષ્યૈવ પ્રાહ તૌ કૃપસાત્વતૌ ॥ ૨૮.૧૧૭॥

રુદ્ક્ષ્વિઇદર્શનેન હ્યેનેન પ્રેરિતઃ પરમાત્મના ।
યામિ પાણ્ડુસુતાન્ હન્તુમિત્યુક્ત્વાઽરુરુહે રથમ્ ॥ ૨૮.૧૧૮॥

નિવારિતોઽપિ તાભ્યાં સ પ્રાદ્રવચ્છિબિરં પ્રતિ ।
અનુજગ્મતુસ્તાવપિ તં શિબિરદ્વારિ ચૈક્ષત ॥ ૨૮.૧૧૯॥

ઉગ્રરૂપધરં રુદ્રં સ્વકીયાં તન્વમેવ સઃ ।
પરીતં વાસુદેવં ચ બહુકોટિસ્વરૂપિણા ॥ ૨૮.૧૨૦॥

દૃષ્ટ્વૈવ વાસુદેવં તમત્રસદ્ગૌતમીસુતઃ ।
વાસુદેવાજ્ઞયૈવાત્ર સ્વાત્મનાઽપિ સદાશિવઃ ॥ ૨૮.૧૨૧॥

અયુદ્ધ્યદગ્રસચ્ચાઽશુ દ્રૌણેઃ સર્વાયુધાન્યપિ ।
અચિન્ત્યા હરિશક્તિર્યદ્દૃશ્યન્તે ત્મહનોઽપિ હિ ॥ ૨૮.૧૨૨॥

અતસ્તયા પ્રેરિતેન સ્વાત્મનૈવાખિલેષ્વપિ ।
આયુધેષુ નિગીર્ણેષુ દ્રૌણિર્યજ્ઞં તુ માનસમ્ ।
ચક્રેઽત્માનં પશું કૃત્વા સ્વાત્મસ્થાયૈવ વિષ્ણવે ॥ ૨૮.૧૨૩॥

યજ્ઞાતુષ્ટેન હરિણા પ્રેરિતઃ શઙ્કરઃ સ્વયમ્ ।
આત્મને દ્રોણપુત્રાય દદૌ સર્વાયુધાનિ ચ ॥ ૨૮.૧૨૪॥

ઉવાચ ચાહમાદિષ્ટો વિષ્ણુના પ્રભવિષ્ણુના ।
અરક્ષં પાર્થશિબિરમિયન્તં કાલમેવ તુ ॥ ૨૮.૧૨૫॥

તદિચ્છયૈવ નિર્દિષ્ટો દાસ્યે માર્ગં તવાદ્ય ચ ।
આયુધાનિ ચ સર્વાણિ હન્તું સર્વાનિમાન્ જનાન્ ॥ ૨૮.૧૨૬॥

ઇત્યુદીર્ય પ્રદાયાઽશુ સર્વા હેતીર્વૃષધ્વજઃ ।

તત્રૈવાન્તર્દધે સોઽપિ પ્રોવાચ કૃપસાત્વતૌ ॥ ૨૮.૧૨૭॥

યે નિર્યાસ્યન્તિ શિબિરાજ્જહિતં તાં સ્તુ સર્વશઃ ।
ઇત્યુક્ત્વા પ્રવિવેશાન્તર્ધન્વી ખડ્ગી કૃતાન્તવત્ ॥ ૨૮.૧૨૮॥

પારાવતાશ્વં સ તદા શયાનમુપેત્ય પદ્ભ્યાં સમતાડયચ્ચ ।
વક્ષસ્યસાવવદદ્ભીતનિદ્રો જાને ભવન્તં હિ ગુરોસ્તનૂજમ્ ॥ ૨૮.૧૨૯॥

સમુત્થિતં માં જહિ શસ્ત્રપાણિં શસ્ત્રેણ વીરોઽસિ સ વીરધર્મઃ ।
લોકાશ્ચ મે સન્ત્વથ શસ્ત્રપૂતા ઇતિ બ્રુવાણં સ રુષા જગાદ ॥ ૨૮.૧૩૦॥

ન સન્તિ હિ બ્રહ્મહણાં સુલોકા વિશેષતશ્ચૈવ ગુરુદ્રુહાં પુનઃ ।
સ્દ્ક્ષ્વીંઅ ધર્મયુદ્ધેન વધાર્હકાશ્ચ યે ત્વદ્વિધાઃ પાપતમાઃ સુપાપ ॥ ૨૮.૧૩૧॥

અવશ્યભાવિનં મૃત્યું ધૃષ્ટદ્યુમ્નો વિચિન્ત્ય તમ્ ।
તૂષ્ણીં બભૂવ સ્વપ્નેઽપિ નિત્યં પશ્યતિ તાં મૃતિમ્ ॥ ૨૮.૧૩૨॥

દ્રૌણિં ચ કાલ્। અરાત્રિં ચ દ્રોણપાતાદનન્તરમ્ ।
વિશસન્તં કૃષન્તીં ચ સ્વપ્નેઽપશ્યદ્ધિ પાર્ષતઃ ॥ ૨૮.૧૩૩॥

સમાક્ષિપદ્દ્રોણસુતોઽસ્ય કણ્ઠે નિબદ્ધ્ય મૌર્વીં ધનુષોપ્યુરસ્થઃ ।
મમન્થ કૃચ્છ્રેણ વિહાય દેહં યયૌ નિજં સ્થાનમસૌ ચ વહ્નિઃ ॥ ૨૮.૧૩૪॥

તતઃ શિખણ્ડિનં હત્વા યુધામન્યૂત્તમોજસૌ ।
જનમેજયં ચ પાઞ્ચાલીસુતાનભિયયૌ જ્વલન્ ॥ ૨૮.૧૩૫॥

તૈરુત્થિતૈરસ્યમાનઃ શરૈઃ ખડ્ગેન જઘ્નિવાન્ ।
સર્વાન્ સવ્યાપસવ્યેન તથાઽન્યાન્ પાણ્ડવાત્મજાન્ ।
ઋત એકં ભૈમસેનિં કાશિરાજાત્મજાત્મજમ્ ॥ ૨૮.૧૩૬॥

તં તદાઽન્તર્હિતઃ શર્વઃ કૈલાસમનયત્ક્ષણાત્ ।
સ શર્વત્રાતનામાઽસીદતસ્તત્રૈવ સોઽવસત્ ॥ ૨૮.૧૩૭॥

પુરાઽર્થિતઃ સ્વદૌહિત્રસ્યામરત્વાય શઙ્કરઃ ।
કાશિરાજેન તેનાસૌ જુગોપૈનં કૃપાયુતઃ ॥ ૨૮.૧૩૮॥

વાસુદેવમતં જ્ઞાત્વા સામ્રાજ્યાય પરીક્ષિતઃ ।
વારયામાસ ભૂલોકં નૈવ યાહીત્યમું શિવઃ ॥ ૨૮.૧૩૯॥

સામાન્યતોઽપાણ્ડવાય દ્રૌણિનાઽપ્યભિસન્ધિતમ્ ।
તદ્રૂપેણૈવ રુદ્રેણ વિનૈનમિતિ ચિન્તિતમ્ ॥ ૨૮.૧૪૦॥

અસ્ત્રં બ્રહ્મશિરશ્ચૈનં ન જઘાનૈક્યતસ્તયોઃ ।
ચેકિતાનાદિકાંશ્ચૈવ જઘાનાન્યાન્ સ સર્વશઃ ॥ ૨૮.૧૪૧॥

સ ચેદિપાઞ્ચાલકરૂશકાશીનન્યાંશ્ચ સર્વાન્ વિનિહત્ય વીરઃ ।
શિશૂન્ સ્ત્રિયશ્ચૈવ નિહન્તુમુગ્રઃ પ્રાજ્વાલયત્તચ્છિબિરં સમન્તાત્ ॥ ૨૮.૧૪૨॥

જિજીવિષૂં સ્તત્ર પલાયમાનાન્ દ્વારિ સ્થિતૌ ગૌતમઃ સાત્વતશ્ચ ।
નિજઘ્નતુઃ સર્વતઃ પાર્ષતસ્ય સૂતસ્ત્વેકઃ શેષિતો દૈવયોગાત્ ॥ ૨૮.૧૪૩॥

ખડ્ગેન પ્રહૃતં દૃષ્ટ્વા હાર્દિક્યેન પપાત હ ।
ભૂમૌ પ્રાગેવ સં સ્પર્શાન્ન જ્ઞાતસ્તમસાઽમુના ।
અન્યાસક્તે સમુત્થાય પ્રાદ્રવદ્યત્ર પાર્ષતી ॥ ૨૮.૧૪૪॥

ચ્ક્ષ્વીઇ।તસ્યા અકથયત્સર્વં સા ભીમાયાઽહ દુઃખિતા ।
પ્રાદ્રવદ્રથમારુહ્ય સ ધન્વી ગૌતમીસુતમ્ ॥ ૨૮.૧૪૫॥

તદન્તરે દ્રૌણિરપિ પ્રયાતઃ કૃષ્ણાસુતાનાં મુદિતઃ શિરાં સિ ।
આદાય હાર્દિક્યકૃપાનુયાતો દુર્યોધનં સન્નિકૃષ્ટપ્રયાણમ્ ॥ ૨૮.૧૪૬॥

દૃષ્ટ્વા તદુક્તં ચ નિશમ્ય પાપસ્તુષ્ટોઽત્યજત્સાધ્વિતિ દેહમાશુ ।
ભીમાર્જુનાભ્યામથ કેશવાચ્ચ ભીતાઃ પૃથગ્દ્રૌણિમુખાઃ પ્રયાતાઃ ॥ ૨૮.૧૪૭॥

તત્રૈકલં દ્રોણસુતં રથેન યાન્તં રથી મારુતિરન્વધાવત્ ।
તમાદ્રવન્તં પ્રસમીક્ષ્ય ભીતઃ પરાદ્રવદ્દ્રૌણિરતિદ્રુતાશ્વૈઃ ॥ ૨૮.૧૪૮॥

આદ્રવન્તં પુનર્દૃષ્ટ્વા ભીમં દ્રોણાત્મજો રુષા ।
આવૃત્ય યુદ્ધ્યન્ વિજિતોઽસ્ત્રં બ્રહ્મશિર આદદે ॥ ૨૮.૧૪૯॥

એતસ્મિન્નન્તરે કૃષ્ણો ધર્મજેનાર્જુનેન ચ ।
તત્રાઽગમત્તદસ્ત્રં ચ ભીમં ચાવ્યર્થતાં નયન્ ।
અવધ્યો ભીમસેનસ્તદસ્ત્રં ચામોઘમેવ યત્ ॥ ૨૮.૧૫૦॥

વિષ્ણુનૈવોભયં યસ્માત્ક્લૃપ્તં ભીમોઽસ્ત્રમેવ તત્ ।
ગાયત્રી તત્ર મન્ત્રો યદ્બ્રહ્મા તદ્ધ્યાનદેવતા ।
ધ્યેયો નારાયણો દેવો જગત્પ્રસવિતા સ્વયમ્ ॥ ૨૮.૧૫૧॥

ઊચે ચ પાર્થયોઃ કૃષ્ણો યત્કૃતં દ્રૌણિના પુરા ।
સ્વાયુધાનાં યાચનં ચાપ્યશક્તેન તદુદ્ધૃતૌ ॥ ૨૮.૧૫૨॥

પૃષ્ટેનોક્તં ત્વયા હીનાં કૃત્વા દુર્યોધનાય ગામ્ ।
દાતું ત્વદાયુધં મેઽદ્યેત્યેવમુક્તે ત્મનોદિતમ્ ।
મૈવં કાર્ષીઃ પુનરિતિ દ્ધ્યાયતાઽબ્ધેસ્તટે સ્વમુ ॥ ૨૮.૧૫૩ ॥

તદસ્ત્રં પ્રજ્વલદૃષ્ટ્વાઽપાણ્ડવત્વવિધિત્સયા ।
ધરાયાં દ્રૌણિના મુક્તં કૃષ્ણેન પ્રેરિતોઽર્જુનઃ ॥ ૨૮.૧૫૪ ॥

સ્વસ્ત્યસ્તુ દ્રોણપુત્રાય ભૂતેભ્યો મહ્યમેવ ચ ।
ઇતિ બ્રુવં સ્તદેવાસ્ત્રમસ્ત્રશાન્ત્યૈ વ્યસર્જયત્ ॥ ૨૮.૧૫૫ ॥

અનસ્ત્રજ્ઞેષુ મુક્તં તદ્ધન્યાદસ્ત્રમુચં યતઃ ।
ગુરુભક્ત્યા તતો દ્રૌણેઃ સ્વસ્ત્યસ્ત્વિત્યાહ વાસવિઃ ॥ ૨૮.૧૫૬ ॥

તદાઽસ્ત્રયોસ્તુ સં યોગે ભૂતાનાં સં હૃતિર્ભવેત્ ।
ભૂતાનાં સ્વસ્તિરપ્યત્ર કાઙ્ક્ષિતા કરુણાત્મના ॥ ૨૮.૧૫૭ ॥

ય્દ્ક્ષિક્ષ્। શ્રીમહાભારતતાત્પર્યનિર્ણયે
તથાઽપ્યસ્ત્રદ્વયં યુક્તં ભૂતાનાં નાશકૃદ્ધ્રુવમ્ ।
તસ્માન્નિવારયન્ યોગં તયોર્મધ્યેઽભવત્ક્ષણાત્ ।
નિસ્સીમશક્તિઃ પરમઃ કૃષ્ણઃ સત્યવતીસુતઃ ॥ ૨૮.૧૫૮ ॥

સં સ્થાપ્યાસ્ત્રદ્વયં દૂરે તાવાહ પુરુષોત્તમઃ ।
સન્તિ હ્યસ્ત્રવિદઃ પૂર્વં પ્રાયશ્ચૈતન્ન તૈઃ કૃતમ્ ।
લોકોપદ્રવકૃત્કર્મ સન્તઃ કુર્યુઃ કથં ક્વચિત્ ॥ ૨૮.૧૫૯ ॥

ઇત્યુક્તે ફલ્ગુનઃ પ્રાહ મયા મુક્તં મહાપદિ ।
શાન્ત્યર્થમેવ ચ વિભો ક્ષન્તવ્યં ભવતા તતઃ ॥ ૨૮.૧૬૦ ॥

દ્રૌણિરપ્યેવમેવાઽહ તૌ વેદપતિરબ્રવીત્ ।
નિવર્ત્યતામસ્ત્રમિતિ શક્રસૂનુસ્તથાઽકરોત્ ।
નિવર્તનાપ્રભું દ્રૌણિં વાસુદેવોઽભ્યભાષત ॥ ૨૮.૧૬૧ ॥

ક્ષત્રતેજા બ્રહ્મચારી કૌમારાદપિ પાણ્ડવઃ ।
નિવર્તને તતઃ શક્તો નાયં દ્રોણાત્મજોઽપિ સન્ ।
અબ્રહ્મચર્યાદિત્યુક્તે વ્યાસો દ્રૌણિમભાષત ॥ ૨૮.૧૬૨ ॥

નિવર્તનાસમર્થસ્ત્વં દેહિ નૈસર્ગિકં મણિમ્ ।
જિતઃ પ્રાગેવ ભીમેન ભીમાયૈવ મહાપ્રભમ્ ।
અપિ કેવલયા વાચા પાર્થેભ્યોઽસ્ત્રં નિવર્તય ॥ ૨૮.૧૬૩ ॥

ઇત્યુક્તો મૂર્ધજં રત્નં જરામરણનાશનમ્ ।
ક્ષુત્તૃટ્શ્રમાપહં દિવ્યગન્ધં ધ્વાન્તહરં શુભમ્ ॥ ૨૮.૧૬૪॥

ઉત્કૃત્ય ભીમાય દદૌ મુક્તાઃ પઞ્ચૈવ પાણ્ડવાઃ ।
અસ્ત્રાદિતિ તતો વેદભર્તા વાસવિમબ્રવીત્ ॥ ૨૮.૧૬૫॥

તાત મુક્તં દ્રૌણિનાઽપિ ત્વમેવાસ્ત્રં નિવર્તય ।
ઇત્યુક્તસ્તં પ્રણમ્યાઽશુ સઞ્જહારાર્જુનોઽપિ તત્ ॥ ૨૮.૧૬૬॥

યાદવેશોઽથ ગૌતમ્યાઃ સુતમાહૈકસન્તતેઃ ।
વાચા નિવર્તયાસ્ત્રં તે ઇત્યુક્તો દ્રૌણિરબ્રવીત્ ॥ ૨૮.૧૬૭॥

પક્ષપાતાદિચ્છસિ ત્વં ભાગિનેયસ્ય સન્તતિમ્ ।
તત્રૈવ પાતયામ્યસ્ત્રમુત્તરાગર્ભકૃન્તને ॥ ૨૮.૧૬૮॥

વાસુદેવઃ પુનઃ પ્રાહ યદિ હન્તવ્ય એવ તે ।
ગર્ભસ્તથાઽપિ નૈવાસ્ત્રં પાતયાસ્મિન્ કથઞ્ચન ॥ ૨૮.૧૬૯॥

ચ્દ્ક્ષ્ક્ષ્ઽભિમન્યોર્મૃતસ્યૈવ દેહે પાતય માનદ ।
એવં ત્વદસ્ત્રનિહતં ગર્ભમુજ્જીવયામ્યહમ્ ॥ ૨૮.૧૭૦॥

પાતયે ગર્ભ એવાહમિત્યૂચે ગૌતમીસુતઃ ।
અથાઽહ વાસુદેવસ્તમીષત્ક્રુદ્ધ ઇવ પ્રભુઃ ॥ ૨૮.૧૭૧॥

દુર્મતે પશ્ય મે વીર્યં યત્તે શક્યં કુરુષ્વ તત્ ।
ઉજ્જીવયામ્યહં ગર્ભં યતતઃ શક્તિતોઽપિ તે ॥ ૨૮.૧૭૨॥

સન્તતિર્વર્ષસાહસ્રં પાણ્ડવાનાં ભવેદ્ભુવિ ।
મત્પાલિતાં ન કશ્ચિત્તાં તાવદ્ધન્તું ક્ષમઃ ક્વચિત્ ॥ ૨૮.૧૭૩॥

જાનામિ તે મતિં દુષ્ટાં જિઘાં સોઃ પાર્થસન્તતિમ્ ।
ચિકીર્ષોર્ધાર્તરાષ્ટ્રસ્ય તન્તું ભૂયઃ સુદુષ્કરમ્ ॥ ૨૮.૧૭૪॥

મદાજ્ઞયા સા વિફલા ભવિત્રી વાઞ્છા મુમુક્ષા વિમુખસ્ય વિષ્ણોઃ ।
યથૈવ તેનૈવ નરાધિરૂઢો ગમ્યસ્તવ સ્યાન્નચ ભૂમિભાગઃ ॥ ૨૮.૧૭૫॥

દુર્ગન્ધયુક્તો વ્રણસઞ્ચિતાઙ્ગઃ સદા ચરઃ સ્યા વિપિનેષુ મન્દ ।
યાવદ્ભુવિ સ્યાદિહ પાર્થતન્તુર્વ્યાસોઽપિ તં પ્રાહ તથેતિ દેવઃ ॥ ૨૮.૧૭૬॥

રૂપદ્ધયેનાપિ હરેસ્તથોક્તો જગાદ કાલ્। ઈતનયં સ કૃષ્ણમ્ ।

ત્વયા સહ સ્યાન્મમ સઙ્ગમો વિભો યથેષ્ટતઃ સ્યાન્નચ મેઽત્ર વિઘ્નઃ ॥ ૨૮.૧૭૭॥

ઇત્યુક્ત ઓમિતિ પ્રાહ ભગવાન્ બાદરાયણઃ ।
તં પ્રણમ્ય યયૌ સોઽપિ સ્વપ્નદૃષ્ટમનુસ્મરન્ ॥ ૨૮.૧૭૮॥

સ્વપ્ને હિ દ્રૌપદેયાનાં વધો દૃષ્ટો ત્મના નિશિ ।
અર્જુનેન પ્રતિજ્ઞાનં દ્રૌપદ્યૈ સ્વવધં પ્રતિ ॥ ૨૮.૧૭૯॥

નિબધ્યાઽનયનં ચૈવ તેનૈવ શિબિરં પ્રતિ ।
મુઞ્ચેતિ દ્રૌપદીવાક્યં નેતિ ભીમવચસ્તથા ।
કૃષ્ણવાક્યાન્મણિં હૃત્વા દેશાન્નિર્યાતનં તથા ॥ ૨૮.૧૮૦॥

ઇત્યાદિ સ્વપ્નદૃષ્ટં યત્પ્રાયઃ સત્યમભૂદિતિ ।
ચિન્તયન્ પ્રયયૌ દાવં દ્રૌણિઃ શસ્ત્રભૃતાં વરઃ ॥ ૨૮.૧૮૧॥

સ કૃષ્ણોક્તમપિ પ્રાપ્ય બાદરાયણશિષ્યતામ્ ।
પ્રાપ્યોત્તરદ્વાપરે ચ વેદાન્ સં વિભજિષ્યતિ ॥ ૨૮.૧૮૨॥

તતઃ સપ્તર્ષિર્ભૂત્વા પારાશર્યપ્રસાદતઃ ।
એકીભાવં સ્વરૂપેણ યાસ્યત્યચ્યુતનિશ્ચયા ॥ ૨૮.૧૮૩॥

પાણ્ડવરાજ્યલાભો નામ અષ્ટાવિંશોઽધ્યાયઃ ॥

કૃપોઽથ પાણ્ડવાન્ પ્રાપ્ય ગૌરવાત્પૂજિતશ્ચ તૈઃ ।
અભૂદાચાર્ય એવાસૌ રાજ્ઞાં તત્તન્તુભાવિનામ્ ॥ ૨૮.૧૮૪॥

બાદરાયણશિષ્યત્વં પુનઃ પ્રાપ્ય ભજન્નમુમ્ ।
સાકં સ્વભાગિનેયેન ભાવ્યેકો મુનિસપ્તકે ।
કૃતવર્મા દ્વારવતીં યયૌ કૃષ્ણાનુમોદિતઃ ॥ ૨૮.૧૮૫॥

કૃષ્ણાયૈ તં મણિં દત્વા ભીમસ્તાં પર્યસાન્ત્વયત્ ।
વિકોપા ભીમવાક્યેન રાજ્ઞે સા ચ મણિં દદૌ ॥ ૨૮.૧૮૬॥

રાજાર્હે હિ મણૌ દત્તે મહ્યં ભીમેન લૌકિકાઃ ।
સ્ત્રીપક્ષપાતં રાજા ચશઙ્કેયુર્મારુતેરિતિ ॥ ૨૮.૧૮૭॥

મણિં રાજ્ઞે દદૌ કૃષ્ણા ભર્તૃપ્રિયહિતે રતા ।
સોઽપ્યાબધ્ય મણિં મૂર્ધ્નિ રેજે રાજા ગવામિવ ॥ ૨૮.૧૮૮॥

વેદેશ્વરેણાપિ યદૂત્તમેન કૃષ્ણેન યુક્તાસ્તત આશુ પાર્થાઃ ।
યયુઃ સભાર્યા નિજરાજધાનીં હત્વૈવ સન્તોઽન્તરરીન્ સ્વરાજ્યમ્ ॥ ૨૮.૧૮૯॥

યુધિષ્ઠિરસ્યાનુ વિચિત્રવીર્યસુતસ્ય પાદાવભિવન્દમાનમ્ ।
આકૃષ્ય ભીમં પરમેશ્વરોऽયો મયાકૃતિં ધાત્પુરતો નૃપસ્ય ॥ ૨૮.૧૯૦॥

ભીમાકૃતિં તાં સ સુયોધનેન કારાપિતામભ્યસને ગદાયાઃ ।
આશ્લિષ્ય ચૂર્ણીકૃતવાનસૃગ્વમન્ હા તાત ભીમેતિ વદન્ પપાત ॥ ૨૮.૧૯૧॥

તમાહ કૃષ્ણો ન હતોऽદ્ય ભીમો નચ ત્વયાऽન્યૈરપિ શક્યતેऽસૌ ।
હન્તું સ્વબુદ્ધિઃ પ્રથિતા ત્વયાऽદ્ય પાપા હિ તે બુદ્ધિરદ્યાપિ રાજન્ ॥ ૨૮.૧૯૨॥

સ્વબુદ્ધિદોષાદતિપાપશીલપુત્રાખ્યપાપાનિ વિવર્દ્ધયિત્વા ।
નીતો વશં તૈઃ ફલમદ્ય ભુઞ્જન્ન ક્રોધિતું ચાર્હસિ ભીમસેને ॥ ૨૮.૧૯૩॥

ઇત્યુક્તે શાન્તબુદ્ધ્યૈવ રાજ્ઞાऽહૂતો વૃકોદરઃ ।
અભ્યવન્દત તત્પાદાવનુજાદ્યાશ્ચ તસ્ય યે ॥ ૨૮.૧૯૪॥

વજ્રાઙ્ગ દૃઢદેહત્વાદવિકારે વૃકોદરે ।
ન દોષો વિવૃતોऽસ્ય સ્યાદિતિ કૃષ્ણેન વઞ્ચિતઃ ।
સર્વાનાશ્લિષ્ય ચ પ્રેમ્ણા યુયોજ નૃપ આશિષઃ ॥ ૨૮.૧૯૫॥

કુલનાશકરઃ પાપઃ શાપયોગ્યસ્તવ હ્યહમ્ ।
ઇત્યુક્ત્વૈવ પ્રણમતો ગાન્ધારી સુપદાઙ્ગુલીઃ ॥ ૨૮.૧૯૬॥

ઋક્ષક્ષી। દદર્શ ધર્મરાજસ્ય પટ્ટાન્તેન પ્રકોપિતા ।
તસ્યાઃ ક્રોધાગ્નિનિર્દગ્ધનખઃ સ કુનખોऽભવત્ ॥ ૨૮.૧૯૭॥

વન્દમાનં પુનર્ભીમમાહ સા ક્રોધવિહ્વલા ।
અધર્મતઃ કથં ભીમ સુતં મે ત્વં નિજઘ્નિવાન્ ॥ ૨૮.૧૯૮॥

ઇત્યુક્તોऽસ્યાઃ શમયિતું ક્રોધમગ્રે વૃકોદરઃ ।
પ્રાહ ન પ્રાણસન્દેહે પાપં સ્યાત્પાપિનો વધે ॥ ૨૮.૧૯૯॥

ઇત્યુક્ત્વા તાં પુનઃ પ્રાહ પ્રતિજ્ઞાહાનિમન્તરા ।
ન મેऽસ્તિ પ્રાણસન્દેહ ઇતિ જાનન્ વૃકોદરઃ ॥ ૨૮.૨૦૦॥

યથાપ્રતિજ્ઞં ભ્રાતૃવ્યાન્ રણે મમ નિજઘ્નુષઃ ।
ક્વાધર્મઃ ક્ષત્રજાતેસ્તુ તદ્ધાનૌ જીવિતં નહિ ॥ ૨૮.૨૦૧॥

“પાપા નશુદ્ધધર્મેણ હન્તવ્યા” ઇતિ ચ શ્રુતિઃ ।
“અન્યવત્પાપહનનં પાપયેત્યાહ” ઇતિ શ્રુતિઃ ।

અતોઽસુરાન્નૈકૃતિકાન્નિકૃત્યા ઘ્નન્તિ દેવતાઃ ॥ ૨૮.૨૦૨॥

“નિકૃત્યા નિકૃતિં હન્યાન્નિકૃત્યા નૈવ ધાર્મિકમ્” ।
ઇતિ શ્રુતિર્હિ પરમા પઠ્યતે પૈઙ્ગિભિઃ સદા ॥ ૨૮.૨૦૩॥

ઇત્યુક્ત્વા તં પુનઃ પ્રાહ કથં તે નરશોણિતમ્ ।
પીતં નરેણૈવ સતા નપીતમિતિ સોઽબ્રવીત્ ॥ ૨૮.૨૦૪॥

દન્તાન્તરં ન મે પ્રાપ શોણિતં તત્સુતસ્ય તે ।
પ્રતિજ્ઞાપાલનાયાપિ પ્રતિકર્તું ચ તત્કૃતમ્ ॥ ૨૮.૨૦૫॥

ભીષણાય ચ શત્રૂણાં પીતવચ્ચ પ્રદર્શિતમ્ ।
વેદદૃષ્ટશ્ચ ધર્મોઽયમતિપાપજનં પ્રતિ ॥ ૨૮.૨૦૬॥

ઇત્યુક્તોવાચ નૈવાન્ધદ્વયસ્યાસ્ય વૃકોદર ।
ઘ્નતા પુત્રશતં યષ્ટિમાત્રં ચોર્વરિતં ત્વયા ॥ ૨૮.૨૦૭॥

તામાહ ભીમઃ પાપિષ્ઠા વધયોગ્યાપરાધિનઃ ।
સર્વે હતા ઇતિ પુનઃ સાઽહ યેનાકૃતસ્તવ ।
અપરાધઃ સ એકોઽપિ કિં નાસ્તીત્યવદત્સ તામ્ ॥ ૨૮.૨૦૮॥

સર્વૈઃ સમેતૈઃ કૃષ્ણસ્ય બન્ધનાય વિનિશ્ચિતમ્ ।
અન્યાનિ ચ સુપાપાનિ કૃતાન્યત્ર પુરાઽપિચ ॥ ૨૮.૨૦૯॥

વાસુદેવં સભાસં સ્થં બ્રુવાણં ધર્મસં હિતમ્ ।
ચ્દ્ક્ક્ષીઇ। (સમસ્તધર્મસઙ્ગ્રહઃ )
પુનઃ પુનરવજ્ઞાય યાન્તં દુર્યોધનં બહિઃ ।
સર્વેઽન્વગચ્છન્નિત્યાદીન્યભિપ્રેત્ય વૃકોદરઃ ॥ ૨૮.૨૧૦॥

નૈકોઽપ્યનપરાધી મે સ્વયં તાનનુશિક્ષિતુમ્ ।
અસમર્થા મયિ ક્રોધં કિં કરોષિ નિરર્થકમ્ ॥ ૨૮.૨૧૧॥

ઇત્યુક્તા સાઽભવત્તૂષ્ણીં ક્રમાત્સર્વૈશ્ચ પાણ્ડવૈઃ ।
વન્દિતા વ્યાસવાક્યાચ્ચ કિઞ્ચિચ્છાન્તાઽથ સાઽભવત્ ॥ ૨૮.૨૧૨॥

તસ્યા યાશ્ચ સ્નુષાઃ સર્વાસ્તાભિઃ સહ પુરસ્કૃતામ્ ।
કૃત્વા તં ધૃતરાષ્ટ્રં ચ વિદુરાદીંશ્ચ સર્વશઃ ॥ ૨૮.૨૧૩॥

પાણ્ડવાઃ પ્રધનસ્થાનં સભાર્યાઃ પૃથયા સહ ।
કૃષ્ણાભ્યાં ચ યયુસ્તત્ર ગાન્ધાર્યાસ્તપસો બલમ્ ॥ ૨૮.૨૧૪॥

જાનન્ પાણ્ડવરક્ષાર્થં ચિકીર્ષુસ્તત્તપોવ્યયમ્ ।
વેદેશ્વરો દદૌ દિવ્યં ચક્ષુઃ સત્યવતીસુતઃ ॥ ૨૮.૨૧૫॥

તેન દૃષ્ટ્વા પ્રેતદેહાન્ સર્વા સ્તત્ર સમાકુલા ।
શશાપ યાદવેશાનં ત્વયાઽસ્મત્કુલનાશનમ્ ।
યત્કૃતં તત્તવ કુલં ગચ્છત્વન્યોન્યતઃ ક્ષયમ્ ॥ ૨૮.૨૧૬॥

ઇત્યુક્તો ભગવાન્ કૃષ્ણઃ સ્વચિકીર્ષિતમેવ તત્ ।
અસ્ત્વેવમિત્યાહ વિભુરીશ્વરોઽપ્યન્યથા કૃતૌ ॥ ૨૮.૨૧૭॥

તેન તસ્યાસ્તપો નષ્ટં હીના સાઽતો હિ ભર્તૃતઃ ।
નાશયેદ્ધિ સદા વિષ્ણુઃ સ્વયોગ્યાદધિકાન્ ગુણાન્ ॥ ૨૮.૨૧૮॥

તત આશ્લિષ્ય ભર્તૃણાં દેહાન્ પ્રરુદતીઃ સ્ત્રિયઃ ।
સર્વા દુર્યોધનાદીનાં દર્શયામાસ કેશવઃ ।
કૃષ્ણાયૈ સા ચ તં દેવમસ્તુવત્પૂર્ણસદ્ગુણમ્ ॥ ૨૮.૨૧૯॥

તતો દેહાન્ પ્રસિદ્ધાનાં પાર્થાઃ સમદહન્ સતામ્ ।
અન્યેષાં ધૃતરાષ્ટ્રાદીન્ પુરસ્કૃત્યૈવ કાંશ્ચન ।
સૂતૈઃ પઞ્ચભિરેવ સ્વૈઃ સરસ્વત્યાં પ્રચિક્ષિપુઃ ॥ ૨૮.૨૨૦॥

સ્નેહાન્નૃપો યમૌ ચ સ્વાન્નાઽજૌ તસ્મિન્ હ્યયોજયન્ ।
શવાઃ પ્રાયો બહુત્વેન તત્રતત્રૈવ સં સ્થિતાઃ ॥ ૨૮.૨૨૧॥

તતો દદત્સુ પાનીયં ગઙ્ગાયાં સ્વજનસ્ય તુ ।
પૃથા કર્ણાય દત્તેતિ પાર્થાનાહાગ્રજં ચ તમ્ ॥ ૨૮.૨૨૨॥

## અથ એકોનત્રિંશોઽધ્યાયઃ ।

ૐ । યદૈવ કૃષ્ણૌ સકલાધિરાજ્યે યુધિષ્ઠિરં યૌવરાજ્યે ચ ભીમમ્ ।
વિપ્રૈર્યુતાવભિષિચ્યાઽશિષશ્ચ યુક્તા દત્વા હર્ષયામાસતુસ્તૌ ॥ ૨૯.૧॥

તદૈવ ચાર્વાક ઇતિ પ્રસિદ્ધં રક્ષસ્ત્રિદણ્ડી યતિરેવ ભૂત્વા ।
યુધિષ્ઠિરં ગર્હયામાસ વિપ્રાસ્ત્વાં ગર્હયન્તીતિ સુપાપશીલમ્ ॥ ૨૯.૨॥

શ્રુત્વૈવ તદ્દુઃખિતમાશુ ધર્મજં દૃષ્ટ્વા વિપ્રાઃ શેપુરમું ભૃશાર્તાઃ ।
અગર્હિતં નિત્યમસ્માભિરેનં યતોઽવોચો ગર્હિતમદ્ય પાપ ।
ભસ્મીભવાઽશ્વેવ તતસ્ત્વિતીરિતે ક્ષણાદભૂત્પાપતમઃ સ ભસ્મસાત્ ॥ ૨૯.૩॥

ભસ્મીકૃતેઽસ્મિન્ યતિવેષધારિણિ યુધિષ્ઠિરં દુઃખિતં વૃષ્ણિસિં હઃ ।
પ્રોવાચ નાયં યતિરુગ્રકર્મા સુયોધનસ્યૈવ સખા સુપાપઃ ॥ ૨૯.૪॥

રક્ષોઽધમોઽયં નિહતોઽદ્ય વિપ્રૈસ્તન્મા શુચઃ કૃતકાર્યોઽસિ રાજન્ ।
ઇતીરિતઃ શાન્તમનાઃ સ વિપ્રાન્ સન્તર્પયામાસ ધનૈશ્ચ ભક્ત્યા ॥ ૨૯.૫॥

અસાન્ત્વયચ્ચ બાન્ધવાન્ સ પૌરસં શ્રિતાદિકાન્ ।
દદૌ યથેષ્ટતો ધનં રરક્ષ ચાનુ પુત્રવત્ ॥ ૨૯.૬॥

સ ભીષ્મદ્રોણકર્ણાનાં વધાદ્દુર્યોધનસ્ય ચ ।
પાપાશઙ્કી તપ્યમાનો રાજ્યત્યાગે મનો દધે ॥ ૨૯.૭॥

સોઽનુજૈઃ કૃષ્ણયા વિપ્રૈરપ્યુક્તો ધર્મશાસનમ્ ।
તતો હાહેતિ વિલપન્ રાજા પરમદુઃખિતઃ ।
શશાપ સર્વનારીણાં ગુહ્યં હૃદિ ન તિષ્ઠતુ ॥ ૨૮.૨૨૩॥

હા માતસ્તવ ધૃત્યૈવ વયં સર્વે ભૃશં હતાઃ ।
જ્યેષ્ઠં પિતૃસમં હત્વા પ્રતિપત્સ્યામ કાં ગતિમ્ ॥ ૨૮.૨૨૪॥

એવં વદન્તં કૌન્તેયં વાસુદેવઃ સનારદઃ ।
શમયામાસ સદ્વાક્યૈર્ગુણાન્ કર્ણસ્ય ચાબ્રવીત્ ॥ ૨૮.૨૨૫॥

તતસ્તે પ્રેતકાર્યાણિ ચક્રુઃ સર્વેઽપિ સર્વશઃ ।
સર્વેષામાધિરાજ્યે ચ સ્થિતોઽભૂત્પાણ્ડવાગ્રજઃ ॥ ૨૮.૨૨૬॥

ય્દ્ક્ષ્ક્ષ્વ્।ભીમં સમ્પ્રાર્થયિત્વૈવ ન વેત્થ્સીત્યાહ ફલ્ગુનમ્ ॥ ૨૯.૮॥

તસ્મિન્ ક્રુદ્ધે નૃપં પ્રાહુર્વિપ્રાસ્ત્વત્તોઽપિ તત્ત્વવિત્ ।
શક્રોઽર્જુન ઇતિ શ્રુત્વાઽપ્યેતદ્ધર્મે સસં શયમ્ ॥ ૨૯.૯॥

મત્સ્નેહાદેવ સર્વેઽપિ ધર્મોઽયમિતિ વાદિનઃ ।
ઇત્યેવં શઙ્કમાનં તમૂચતુર્વિપ્રયાદવૌ ।
કૃષ્ણો ધર્મોઽયમિત્યેવ શાસ્ત્રયુક્ત્યા પુનઃ પુનઃ ॥ ૨૯.૧૦॥

નાતિનિશ્ચિતબુદ્ધિં તં તદાઽપિ પુરુષોત્તમૌ ।
હતપક્ષગતત્વેન તચ્છઙ્કાયા અગોચરઃ ।
યતો ભીષ્મસ્તતો યાહિ તમિત્યૂચતુરવ્યયૌ ॥ ૨૯.૧૧॥

સ તાભ્યાં ભ્રાતૃભિશ્ચૈવ મુનિભિશ્ચ સમન્વિતઃ ।
ભીષ્મં યયૌ લજ્જિતેઽસ્મિન્સ્તં ભીષ્માયાઽહ કેશવઃ ॥ ૨૯.૧૨॥

પૃચ્છેત્યુક્તઃ સ ભીષ્મેણ પપ્રચ્છાખિલમઞ્જસા ।
તત્રોવાચાખિલાન્ ધર્માન્ કૃષ્ણો ભીષ્મશરીરગઃ ॥ ૨૯.૧૩॥

ભીષ્મો હ્યાહ હરિં પાર્થા બોધનીયાસ્ત્વયૈવ હિ ।
કા શક્તિર્મમ દેવેશ પાર્થાન્ બોધયિતું પ્રભો ॥ ૨૯.૧૪॥

ઇત્યુક્તો ભગવાનાહ ત્વત્કીર્ત્યૈ ત્વયિ સં સ્થિતઃ ।
પ્રવક્ષ્યામ્યખિલાન્ ધર્માન્ સૂક્ષ્મં તત્ત્વમપીતિ હ ॥ ૨૯.૧૫॥

રાજ્ઞઃ પ્રથમતો ધર્મો ભગવદ્ધર્મપાલનમ્ ।
તદર્થં કણ્ટકોદ્ધારો ધર્મા ભાગવતા અપિ ।
મનોવાક્કર્મભિર્વિષ્ણોરચ્છિદ્રત્વેન ચાર્ચનમ્ ॥ ૨૯.૧૬॥

પૂર્ણાશેષગુણો વિષ્ણુઃ સ્વતન્ત્રશ્ચૈક એવ તુ ।
તદ્વશં સર્વમન્યચ્ચ સર્વદેતિ વિનિશ્ચયઃ ॥ ૨૯.૧૭॥

દેવતાક્રમવિજ્ઞાનમપૂજાઽન્યસ્ય વૈ હરેઃ ।
પૂજા ભાગવતત્વેન દેવાદીનાં ચ સર્વશઃ ॥ ૨૯.૧૮॥

ઽ્ક્ષિક્ષ્વ।વૃથા કર્માકૃતિઃ ક્વાપિ નિરાશીસ્ત્વં સદૈવ ચ ।
વિષ્ણોર્ભાગવતાનાં ચ પ્રતીપસ્યાકૃતિઃ સદા ।
પરસ્પરવિરોધે તુ વિશિષ્ટસ્યાનુકૂલતા ॥ ૨૯.૧૯॥

પ્રિયં વિષ્ણોસ્તદીયાનામપિ સર્વં સમાચરેત્ ।
ધર્મમપ્યપ્રિયં તેષાં નૈવ કિઞ્ચિત્સમાચરેત્ ॥ ૨૯.૨૦॥

સામ્યે વિરોધે ચ બહૂનનુવર્તેત વૈષ્ણવાન્ ।
એતે સાધારણા ધર્મા જ્ઞેયા ભાગવતા ઇતિ ॥ ૨૯.૨૧॥

તત્ત્વવિજ્ઞાપનં ધર્મો વિપ્રસ્ય તુ વિશેષતઃ ।
શારીરદણ્ડસન્ત્યાગઃ પુત્રભાર્યાદિકાનૃતે ।
તત્રાપિ નાઙ્ગહાનિઃ સ્યાદ્વેદના વા ચિરં નતુ ॥ ૨૯.૨૨॥

નચાર્થદણ્ડઃ કર્તવ્યો વિપ્રવૈશ્યાદિભિઃ ક્વચિત્ ।
શારીરદણ્ડવિષયે વૈશ્યાદીનાં ચ વિપ્રવત્ ॥ ૨૯.૨૩॥

યથાલબ્ધેન વર્તેત ભિક્ષયા વા દ્વિજોત્તમઃ ।
શિષ્યયાજ્યોપલબ્ધૈર્વા ક્ષત્રધર્મેણ વાઽપદિ ॥ ૨૯.૨૪॥

મહાપદિ વિશાં ધર્મૈઃ ક્ષત્રિયઃ સુરવિપ્રયોઃ ।

અન્યત્ર સર્વવિત્તેન વર્તેતૈતાંશ્ચ પાલયન્ ॥ ૨૯.૨૫॥

વિરોધિનઃ ક્ષત્રિયાચ્ચ પ્રસહ્યૈવ હરેદ્ધનમ્ ।
સામાદિક્રમતો ધર્માન્ વર્તયેદ્દણ્ડતોઽન્તતઃ ।
અપલાયી સદા યુદ્ધે સતાં કાર્યમૃતે ભવેત્ ॥ ૨૯.૨૬॥

કૃષિવાણિજ્ય ગોરક્ષા કુસીદં વૈશ્યજીવનમ્ ।
પરિચર્યૈવ શૂદ્રસ્ય વૃત્તિરન્યે સ્વપૂર્વવત્ ।
વર્તેયુર્બ્રાહ્મણાદ્યાશ્ચ ક્રમાત્પૂજ્યા હરિપ્રિયાઃ ॥ ૨૯.૨૭॥

હરિભક્તાવનુચ્ચસ્તુ વર્ણોચ્ચો નાતિપૂજ્યતે ।
વિના પ્રણામં પૂજ્યસ્તુ વર્ણહીનો હરિપ્રિયઃ ।
આદરસ્તત્ર કર્તવ્યો યત્ર ભક્તિર્હરેર્વરા ॥ ૨૯.૨૮॥

ઋ્ક્ષ્વી।જ્ઞાપનં ક્ષત્રિયાણાં ચ ધર્મો વિપ્રાભ્યનુજ્ઞયા ।
તદભાવે તુ વૈશ્યાનાં શૂદ્રસ્ય પરમાપદિ ॥ ૨૯.૨૯॥

"વર્ણેષ્વજ્ઞેષ્વવર્ણસ્તુ ન જ્ઞાની સ્યાત્કથઞ્ચન" ।
ઇતિ શ્રુતેરવર્ણસ્ય જ્ઞાપનપ્રાપ્તિરેવ ન ॥ ૨૯.૩૦॥

જ્ઞેયં સર્વત્રિવર્ણસ્થસ્ત્રીભિર્વેદાન્ વિનાઽખિલમ્ ।
સ્વીયપુન્નિયતિઃ સ્ત્રીણાં સ્વદારનિયતિર્નૃણામ્ ॥ ૨૯.૩૧॥

ધર્મો ગુણોત્તમાનાં તુ સ્મૃત્યૈવાન્ધં તમો વ્રજેત્ ।
ગુણસર્વસ્વહાનિઃ સ્યાદુત્તરોત્તરતોઽત્ર ચ ॥ ૨૯.૩૨॥

અધોઽધોઽધિકદોષઃ સ્યાત્સ્ત્રીણામન્યત્ર મધ્યતઃ ।
વેદા અપ્યુત્તમસ્ત્રીભિઃ કૃષ્ણાદ્યાભિરિવાખિલાઃ ॥ ૨૯.૩૩॥

દેવ્યો મુનિસ્ત્રિયશ્ચૈવ નરાદિકુલજા અપિ ।
ઉત્તમા ઇતિ વિજ્ઞેયાસ્તચ્છૂદ્રૈરપ્યવૈદિકમ્ ।
જ્ઞેયમન્યૈર્હરેર્નામ નિજકર્તવ્યમેવ ચ ॥ ૨૯.૩૪॥

સર્વથાઽન્ધં તમો યાતિ વરં સદૃશમેવ વા ।
યો વિષ્ણોર્મન્યતે કિઞ્ચિદ્ગુણૈઃ કૈશ્ચિદપિ ક્વચિત્ ॥ ૨૯.૩૫॥

બ્રહ્મેશાનાદિકમપિ ભેદં યો વા ન મન્યતે ।
ભેદદૃક્તદ્ગુણાદૌ ચ પ્રાદુર્ભાવગતેઽપિ યઃ ॥ ૨૯.૩૬॥

પ્રાકૃતં દેહમથવા દુઃખાજ્ઞાનશ્રમાદિકમ્ ।

મન્યતે તારતમ્યં વા તદ્ભક્તેષ્વન્યથૈવ યઃ ॥ ૨૯.૩૭॥

મનોવાક્તનુભિર્યો વા તસ્મિન્સ્તદ્ભક્ત એવ વા ।
વિરોધકૃદ્વિષ્ણ્વધીનાદન્યત્કિઞ્ચિદપિ સ્મરન્ ॥ ૨૯.૩૮॥

અન્યાધીનત્વવિચ્ચાસ્ય સર્વપૂર્ત્યવિદેવ ચ ।
ભક્તિહીનશ્ચ તે સર્વે તમોઽન્ધં યાન્ત્યસં શયમ્ ॥ ૨૯.૩૯॥

તત્ત્વે સં શયયુક્તા યે સર્વે તે નિરયોપગાઃ ।
સ્દ્ક્ષ્વીઇ। દોષેભ્યસ્તે ગુણાધિક્યે નૈવ યાન્ત્યધમાં ગતિમ્ ।
ગુણદોષસામ્યે માનુષ્યં સર્વદૈવ પુનઃ પુનઃ ॥ ૨૯.૪૦॥

યાવદ્દોષક્ષયશ્ચોર્ધ્વા ગતિઃ ક્રમશ એવ તુ ।
સર્વદોષક્ષયે મુક્તિરાત્મયોગ્યાનુસારતઃ ॥ ૨૯.૪૧॥

ભક્તિજ્ઞાનોન્નતાવેવ સ્વર્ગશ્ચ શુભકર્મણઃ ।
વિષ્ણુવૈષ્ણવવાક્યેન હાનિઃ પાપસ્ય કર્મણઃ ॥ ૨૯.૪૨॥

ઇત્યાદિ ધર્મસર્વસ્વં ભીષ્મસ્થેનૈવ વિષ્ણુના ।
પાર્થાનાં ગદિતં તચ્ચ શ્રુત્વા ધર્મસુતોઽનુજાન્ ।
પપ્રચ્છ વિદુરં ચૈવ સારં ધર્માદિષુ ત્રિષુ ॥ ૨૯.૪૩॥

આહ ક્ષત્તા ધર્મમેવ સારમર્થં ચ મધ્યમમ્ ।
નીચં કામં નિષ્ફલત્વાદર્થમેવાર્જુનોઽબ્રવીત્ ॥ ૨૯.૪૪॥

સારં સ દ્વિવિધો જ્ઞેયો દૈવો માનુષ એવ ચ ।
દૈવો વિદ્યા હિરણ્યાદિર્માનુષઃ પરિકીર્તિતઃ ॥ ૨૯.૪૫॥

મધ્યમો ધર્મ એવાત્ર સાધ્યં સાધનમેવ ચ ।
વિદ્યાહ્વયોઽર્થો ધર્મસ્ય વિદ્યયૈવ ચ મુચ્યતે ॥ ૨૯.૪૬॥

માનુષોઽર્થોઽપિ વિદ્યાયાઃ કારણં સુપ્રયોજિતઃ ।
તુષ્ટોઽર્થેન ગુરુર્યસ્માત્કૈવલ્યં દાતુમપ્યલમ્ ॥ ૨૯.૪૭॥

ધર્માર્થતાં વિનાઽપ્યર્થૈસ્તુષ્યેયુર્ગુરુદેવતાઃ ।
યદ્યનુદ્દેશિતો ધર્મોઽપ્યર્થમેવાનુસં વ્રજેત્ ॥ ૨૯.૪૮॥

ગુરુતાઽર્થગતૈવ સ્યાત્કામોઽવસ્તાદ્ધિ નિષ્ફલઃ ।
યમાવત્ર વિદાં શ્રેષ્ઠાવર્જુનોક્તમનૂચતુઃ ॥ ૨૯.૪૯॥

અથાહ ભીમઃ પ્રવરઃ સુતત્ત્વદૃશાં સમસ્તાનભિભાષ્ય હર્ષાત્ ।

સ્મયન્ન કામાદતિરિક્તમસ્તિ કિઞ્ચિચ્છુભં ક્કાવરતાં સ યાયાત્ ॥ ૨૯.૫૦॥

કામ્યં હિ કામાભિધમાહુરાર્યાઃ કામ્યાઃ પુમર્થાઃ સહ સાધનૈર્યત્ ।
ય્દ્ક્ષિક્ષક્ષ્ડકામ્યતાં યાત્યપુમર્થ એવ પુમર્થિતત્વાદ્ધિ પુમર્થ ઉક્તઃ ॥ ૨૯.૫૧॥

વિજ્ઞાનભક્ત્યાદિકમપ્યતીવ સત્સાધનં કામબહિષ્કૃતં ચેત્ ।
ન સાધનં સ્યાત્પરમોઽપિ મોક્ષો ન સાધ્યતાં યાતિ વિના હિકામાત્ ॥ ૨૯.૫૨॥

પરાત્પરોઽપ્યાદિપુમાન્ હરિશ્ચ સ્વસ્યેતરેષામપિ કામ્ય એવ ।
અકામિતોઽવાગ્ગતિમેવ દદ્યાત્કામઃ પુમર્થોઽખિલ એવ તેન ॥ ૨૯.૫૩॥

ઇચ્છૈવ કામોઽસ્તુ તથાઽપિ નૈતામૃતે હિ ચિત્ત્વં ઘટકુડ્યવત્સ્યાત્ ।
સારસ્તતઃ સૈવ ચિદાત્મકાઽપિ સા ચેતના ગૂઢતનુઃ સદૈવ ॥ ૨૯.૫૪॥

ન પ્રશ્નયોગ્યઃ પૃથગેવ કામસ્તેનૈષ રાજન્ યદિ તારતમ્યમ્ ।
ઇચ્છસ્યયં તે ત્રિવિધો હિ વેદ્યો ધર્માર્થયુક્તઃ પરમો મતોઽત્ર ।
એકાવિરોધી યદિ મધ્યમોઽસૌ દ્વયોર્વિરોધી તુ સ એવ નીચઃ ॥ ૨૯.૫૫॥

તસ્માત્સ્વબુદ્ધિપ્રમદાભિરેવ કામં રમેથા અનુરૂપકામઃ ।
રાજન્ન કામાદપરં શુભં હિ પરો હિ કામો હરિરેવ યેન ॥ ૨૯.૫૬॥

પ્રાજ્ઞઃ સુહૃચ્ચન્દનસારલિપ્તો વિચિત્રમાલ્યાભરણૈરુપેતઃ ।
ઇદં વચો વ્યાસસમાસયુક્તં સમ્પ્રોચ્ય ભીમો વરરામ વીરઃ ॥ ૨૯.૫૭॥

પ્રશસ્ય ભીમમન્યાંશ્ચ રાજા મોક્ષમથાસ્તુવત્ ।
સ્વયુક્તેરપ્રતીપત્વાન્નિરાચક્રે ન મારુતિઃ ॥ ૨૯.૫૮॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
(સમસ્તધર્મસઙ્ગ્રહો નમ)એકોનત્રિંશોઽધ્યાયઃ ॥

## અથ ત્રિંશોઽધ્યાયઃ ।

(યાગસમાપ્તિઃ )
ૐ ། અથ કૃષ્ણમનુસ્મૃત્ય ભીષ્મે સ્વાં વસુતાં ગતે ।
કૃત્વા કાર્યાણિ સર્વાણિ ગઙ્ગામાશ્વાસ્ય દુઃખિતામ્ ॥ ૩૦.૧॥

આશ્વાસિતશ્ચ કૃષ્ણાભ્યાં ધર્મજો દુઃખિતઃ પુનઃ ।
પરાશરસુતેનોક્તઃ કૃષ્ણેનાનન્તરાધસા ॥ ૩૦.૨॥

અપાપે પાપશઙ્કિત્વાદશ્વમેધૈર્યજાચ્યુતમ્ ।

કુરુ રાજ્યં ચ ધર્મેણ પાલયાપાલકાઃ પ્રજાઃ ॥ ૩૦.૩॥

ઇત્યુક્તઃ સ તથા ચક્રે ત્યક્ત્વા ભોગાંશ્ચ કૃત્સ્નશઃ ।
ગોવ્રતાદિવ્રતૈર્યુક્તઃ પાલયામાસ મેદિનીમ્ ॥ ૩૦.૪॥

દદૌ દેયાનિ મુખ્યાનિ યથાકામમખણ્ડિતમ્ ।
નૈવાર્થી વિમુખઃ કશ્ચિદભૂદ્યોગ્યઃ કદાચન ॥ ૩૦.૫॥

પ્રષ્ટા ચ દાતાઽખિલરાજનમ્યો યષ્ટા ચ ધર્માત્મજ એવ તત્ર ।
બભૂવ પાણ્ડોર્ગૃહમાવસંશ્ચ રાજાધિરાજો વનિતાનિવૃત્તઃ ॥ ૩૦.૬॥

ભીમસ્તુ દૌર્યોધનમેવ સદ્મ પ્રપેદિવાનૂર્જિતવીર્યલબ્ધમ્ ।
કૃષ્ણાસહાયઃ સુરરાજયોગ્યાનભુઙ્ક્ત ભોગાન્ યુવરાજ એવ ॥ ૩૦.૭॥

કૃષ્ણા ચ પાર્થાંશ્ચતુરો વિહાય સુવ્યક્તસારસ્વતશુદ્ધભાવા ।
રરાજ રાજાવરજેન નિત્યમનન્યયોગેન શિખેવ વહ્નેઃ ॥ ૩૦.૮॥

પ્રીત્યૈવ વિજ્ઞાનયુજાઽન્યપાર્થૈઃ સં વાદતઃ પરિહૃતા ગતભાવિકાલે ।
અપિ સ્વકીયં પતિમેવ ભીમમવાપ્ય સા પર્યચરન્મુદૈવ ॥ ૩૦.૯॥

રરાજ રાજાવરજસ્તયા સ દ્વિરૂપયા સોમકકાશિજાતયા ।
શ્રિયા ભુવા ચૈવ યથાઽબ્જનાભો નિહત્ય સર્વાન્ દિતિજાન્મહાબ્ધૌ ॥ ૩૦.૧૦॥

સર્વોત્તુઙ્ગો નામતઃ પ્રાણવાયોરં શો નિશાયાં ગુરુપુત્રસૂદિતઃ ।
માતાઽસ્ય દેવીતિ ચ રૌહિણેયી ભીમપ્રિયાઽસીદ્ધા પુરાઽસ્યૈવ રાકા ॥ ૩૦.૧૧॥

હ્રીશ્ચ્ક્ષ્ક્ષઽન્યાશ્ચાઽસુર્વાસુદેવ્યો દિશો યાઽઽપશ્ચ પૂર્વં વિં શતિરગ્ર્યરૂપાઃ ।
તાભિર્યુતો દૈવતૈરપ્યલભ્યાનભુઙ્ક્ત ભોગાન્ વિબુધાનુગાર્ચિતઃ ॥ ૩૦.૧૨॥

રરક્ષ ધર્માનખિલાન્ હરેઃ સ નિધાય વિપ્રાનનુશાસ્ય યુક્તાન્ ।
સદ્વૈષ્ણવાન્ વિદુષઃ પઞ્ચપઞ્ચ સવેતનાન્ ગ્રામમનુ સ્વકીયાન્ ॥ ૩૦.૧૩॥

દધાર દણ્ડં તદવર્તિષુ સ્વયં જગ્રાહ ચાન્વેવ મુદાઽથ તદ્વતાન્ ।
તદ્વૃત્તમન્યૈરપિ વિપ્રવર્યૈઃ સં શોધયન્ સર્વમસૌ યથા વ્યધાત્ ॥ ૩૦.૧૪॥

નાવૈષ્ણવઃ કશ્ચિદભૂત્કુતશ્ચિન્નૈવાન્યનિષ્ઠો નચ ધર્મહન્તા ।
ન વિધ્યવર્તી નચ દુઃખિતોઽભૂન્નાપૂર્ણવિત્તશ્ચ તદીયરાષ્ટ્રે ॥ ૩૦.૧૫॥

વાસિષ્ઠવૃષ્ણિપ્રવરૌ પ્રપશ્યતાં તાભ્યાં ચ ભીમેન મુનીશ્વરૈશ્ચ ।
સં શિક્ષિતાનાં પ્રથમાદ્યુગાચ્ચ ગુણાધિકઃ કલિરાસીત્પ્રજાનામ્ ॥ ૩૦.૧૬॥

શુભં મહત્સ્વલ્પફલં કૃતે હિ વિપર્યયેણાશુભમેષ દોષઃ ।
તદ્ધીનમપ્યુચ્ચશુભં કૃતાદ્યુગાચ્ચક્રે કલિં મારુતિરચ્યુતાશ્રયાત્ ॥ ૩૦.૧૭॥

ધનઞ્જયઃ પ્રોદ્યતદણ્ડ આસીત્સદાઽન્યચક્રેષુ નિજાગ્રજેરિતઃ ।
વિભીષયિત્વા નૃપતીન્ સરત્નાન્ પદોર્નૃપસ્યાગ્રભુવો ન્યપાતયત્ ॥ ૩૦.૧૮॥

સદૈવ કૃષ્ણસ્ય મુખારવિન્દાદ્વિનિસ્સૃતં તત્ત્વવિનિર્ણયામૃતમ્ ।
પિબન્ સુતાદ્યાધિમસૌ ક્રમેણ ત્યજંશ્ચ રેમેઽવિરતાતિભોગઃ ॥ ૩૦.૧૯॥

દુઃ શાસનસ્યાઽવસથં સુભદ્રાચિત્રાઙ્ગદાસહિતોઽધ્યાવસંશ્ચ ।
સચન્દ્રિકાકાન્તિરનૂનબિમ્બો નભસ્થિતશ્ચન્દ્ર ઇવાત્યરોચત ॥ ૩૦.૨૦॥

સમસ્તભૃત્યાશ્રિતવેતનાનાં માદ્રેય આસીત્પ્રથમઃ પ્રદાતા ।
સ દુર્મુખસ્યાઽવસથેઽવસચ્ચ સ મદ્રરાજાત્મજયાઽગ્ર્યવર્તી ॥ ૩૦.૨૧॥

સન્ધાનભેદાનુગતપ્રવૃત્તિસ્તિષ્ઠંશ્ચ દુર્મર્ષશુભ્રસદ્મનિ ।
નૃપઙ્ગરક્ષઃ પ્રગૃહીતખડ્ગસ્તસ્યાનુજો માગધકન્યયાઽસીત્ ॥ ૩૦.૨૨॥

સેનાપતિઃ કૃપ આસીદ્યુયુત્સુઃ સસઞ્જયો વિદુરશ્ચાઽમ્બિકેયમ્ ।
ચ્ક્ષ્ક્ષ્ક્ષી।પાર્થેરિતાઃ પર્યચરન્ સ્વયં ચ સર્વે યથા દૈવતમાદરેણ ॥ ૩૦.૨૩॥

દ્વિરૂપકૃષ્ણપ્રહિતેષુ પાણ્ડુષુ ક્ષિતિં પ્રશાસત્સુ ન કશ્ચનાઽતુરઃ ।
નચાક્રમાન્મૃત્યુરભૂન્ન નાર્યો વિભર્તૃકા નો વિધુરા નરાશ્ચ ॥ ૩૦.૨૪॥

શબ્દાદયશ્ચાઽસુરતીવ હૃદ્યા નિકામવર્ષી ચ સુરેશ્વરોઽભૂત્ ।
પ્રજા અનાસ્પૃષ્ટસમસ્તતાપા અનન્યભક્ત્યાઽચ્યુતમર્ચયન્તિ ॥ ૩૦.૨૫॥

પૃથ્વી ચ ગાવઃ સસરસ્વતીકા નિકામદોહા અભવન્ સદૈવ ।
અબ્દાબ્ધિનદ્યો ગિરિવૃક્ષજઙ્ગમાઃ સર્વેઽપિ રત્નપ્રસવા બભૂવુઃ ॥ ૩૦.૨૬॥

કૃષ્ણાશ્રયાત્સર્વમિદં વશે તે વિધાય સમ્યક્પરિપાલયન્તઃ ।
દિવીવ દેવા મુમુદુઃ સદૈવ મુનીન્દ્રગન્ધર્વનૃપાદિભિર્વૃતાઃ ॥ ૩૦.૨૭॥

સમુજ્જ્વલા પાણ્ડવકીર્તિનારી પદં વિધાયાસુરપક્ષમૂર્ધસુ ।
વરાભયે ચૈવ સતાં કરાભ્યાં કૃષ્ણપ્રસૂતા જગદણ્ડમાવૃણોત્ ॥ ૩૦.૨૮॥

પાતાલ્। અપાદાં પૃથિવીનિતમ્બામાકાશમધ્યાં કરસન્તતાશામ્ ।
ગ્રહર્ક્ષતારાભરણદ્યુવક્ષસં વિરિ ઞ્ચલોકસ્થલસન્મુખામ્બુજમ્ ॥ ૩૦.૨૯॥

વિકુણ્ઠનાથાભયહસ્તમાદરાન્મૂર્ધ્ના વહન્તીં વરભારતાખ્યામ્ ।
નિશમ્ય તામીક્ષ્ય સમસ્તલોકાઃ પવિત્રિતા વેદિભવામિવાન્યામ્ ॥ ૩૦.૩૦॥

પ્રપાલયત્સ્વેવ ધરાં સકૃષ્ણેષ્વદ્ધૈવ પાર્થેષુ કલિર્બલિશ્ચ ।
સુપાપદૈત્યૌ ક્વચ રાષ્ટ્રવિપ્લવં સઞ્ચક્રતુસ્તચ્છુતમાશુ પાર્થૈઃ ॥ ૩૦.૩૧॥

નૃપેણ કૃષ્ણેન ચ સાધુ ચોદિતો ભીમસ્તદા તૌ સગણૌ વિજિત્ય ।
બલિં પ્રવિદ્રાવ્ય કલિં નિબદ્ધ્ય સમાનયત્કૃષ્ણનૃપેન્દ્રયોઃ પુરઃ ॥ ૩૦.૩૨॥

પપ્રચ્છ તં કૃષ્ણપુરો યુધિષ્ઠિર ઉદારધીઃ ।
કલે કિમિતિ મે રાષ્ટ્રં વિપ્લાવયસિ દુર્મતે ॥ ૩૦.૩૩॥

ઇત્યુક્ત આહ કાલોઽયં દુર્યોધનનિપાતનમ્ ।
આરભ્ય મમ તત્ર ત્વં બલાદાક્રમ્ય તિષ્ઠસિ ।
તતો મયા કૃતો રાષ્ટ્રવિપ્લવસ્તે નરાધિપ ॥ ૩૦.૩૪॥

ર્દ્ક્ષ્ક્ષ્ક્ષીઇ।તમાહ રાજા રાજ્ઞાં હિ બલાદ્રાજ્યં પ્રવર્તતે ।
અપિ કાલભવં રાષ્ટ્રં ત્વદીયં માદૃશૈર્નૃપૈઃ ।
હ્રિયતે બલવદ્ભિર્હિ રાજ્યાશા તે કુતસ્તદા ॥ ૩૦.૩૫॥

“કાલો વા કારણં રાજ્ઞો રાજા વા કાલકારણમ્ ।
ઇતિ તે સં શયો મા ભૂદ્રાજા કાલસ્ય કારણમ્” (૮૩) ॥ ૩૦.૩૬॥

તમુવાચ કલિઃ કાલે મદીયે ત્વાદૃશઃ કુતઃ ।
રાજાનં પૂર્વમાવિશ્ય વિપ્રાંશ્ચ સ્યામહં નૃપ ॥ ૩૦.૩૭॥

વાસુદેવસહાયેષુ તેજો યુષ્માસુ મે નહિ ।
ક્વ રાજાઽસાવૃતે યુષ્માન્ યો મયા નાભિભૂયતે ॥ ૩૦.૩૮॥

મદીયકાલે ભૂપાલ વિપ્રવેદવિરોધિનિ ।
મદૃષ્ટિપાતે ક્વ ગુણાઃ ક્વ વેદાઃ ક્વ સુયુક્તયઃ ॥ ૩૦.૩૯॥

જગાદ નૃપતિઃ સત્યં કલે વક્ષ્યનૃતોઽપિ સન્ ।
મોચયે ત્વર્તવચનાદ્યદાઽસ્મત્સન્તતેઃ પરમ્ ।
વિલુમ્પસ્યખિલાન્ ધર્માન્ કરં તત્રાપિ નોઽર્પય ॥ ૩૦.૪૦॥

સીમાધિર્બહુવાક્યં ચ તુલામાને ચ મે કરઃ ।
નૈવાતિક્રમમેતેષાં કુરુ સર્વાત્મના ક્વચિત્ ॥ ૩૦.૪૧॥

તમાહ ભગવાન્ કૃષ્ણો યાવત્પાણ્ડવસન્તતિઃ ।
તાવન્ન તે ભવેચ્છક્તિઃ પ્રવૃત્તસ્યાપિ ભૂતલ્. એ ॥ ૩૦.૪૨॥

પાણ્ડવેભ્યઃ પરં યાવત્ક્ષેમકઃ ક્રમવર્દ્ધિતા ।
ક્ષેમકાત્પરતઃ પૂર્તિં શક્તિસ્તે યાસ્યતિ ધ્રુવમ્ ॥ ૩૦.૪૩॥

ન દ્રષ્ટવ્યં ભૂતલ્। અં તે કુત એવ સ્પૃશેર્ભુવમ્ ।
યાવત્પાર્થા અહં ચાત્ર તતો ભુવિ પદં કુરુ ॥ ૩૦.૪૪॥

(૮૩) મહા. ૧૨.૭૦.૬
ઽ્ક્ષિક્ષવ્। ઇત્યુક્તો વાસુદેવેન મોચિતો ધર્મજેન ચ ।
તાન્ પ્રણમ્ય યયૌ પારે સમુદ્રસ્યાઽશ્રયદ્ગુહામ્ ।
પાર્થાશ્ચ કૃષ્ણસહિતા રક્ષન્તઃ ક્ષ્માં મુદં યયુઃ ॥ ૩૦.૪૫॥

એવં પાર્થાન્ પ્રતિષ્ઠાપ્ય શક્રપ્રસ્થે તુ સાર્જુનઃ ।
ક્રીડન્ દિવ્યાઃ કથાઃ પ્રાહ પુત્રશોકાપનુત્તયે ।
ગીતોક્તં વિસ્મૃતં ચાસ્મૈ પુનર્વિસ્તરતોઽવદત્ ॥ ૩૦.૪૬॥

વાણી પ્રાણો વાસુદેવ ઇત્યેતૈરખિલં તતમ્ ।
સર્વોત્તમત્વમેતેષાં સર્વમેતદ્વશે જગત્ ।
ઉત્તરોત્તરમેતેઽપિ ગુણોચ્ચાસ્તદ્વશેઽપરે ॥ ૩૦.૪૭॥

ઇત્થં હરેર્વશે સર્વગુણપૂર્ણશ્ચ સ પ્રભુઃ ।
એક એવ નચાન્યોઽસ્તિ પ્રાણોચ્ચા તદધો રમા ॥ ૩૦.૪૮॥

સ હુતાશ ઇતિ પ્રોક્તો હુતમત્ત્યખિલં યતઃ ।
વાક્પ્રાણમધ્યગો નિત્યં ધારયત્યખિલં જગત્ ।
સ ઈશો બ્રહ્મરુદ્રાદ્યા જીવા એવ પ્રકીર્તિતાઃ ॥ ૩૦.૪૯॥

યે તસ્યાનાદિસદ્ભક્તા મુક્તિયોગ્યા હિ તે સ્મૃતાઃ ।
અનાદિદ્વેષિણો યેઽસ્મિન્સ્તમોયોગ્યાઃ સુપાપિનઃ ॥ ૩૦.૫૦॥

મિશ્રા મધ્યા ઇતિ જ્ઞેયાઃ સં સારપરિવર્તિનઃ ।
એવં જીવાસ્ત્રિધા પ્રોક્તા ભવન્ત્યેતે નચાન્યથા ॥ ૩૦.૫૧॥

તારતમ્યં ચ વિજ્ઞેયં લિ ઙ્ગૈર્દૈહિકમાનસૈઃ ।
વિષ્ણોર્લિ ઙ્ગાનુસારિત્વતારતમ્યાત્તદીક્ષણમ્ ॥ ૩૦.૫૨॥

વિષ્ણોસ્તદનુગાનાં ચ પ્રીતિકૃદ્ધર્મ ઈરિતઃ ।
અધર્મોઽન્ય ઇયં નિષ્ઠા પ્રલાપઃ કિં કરિષ્યતિ ॥ ૩૦.૫૩॥

એવમાદ્યનુશાસ્યાજઃ પાર્થં પાર્થૈઃ સુસત્કૃતઃ ।

કથઞ્ચિત્તાનવસ્થાપ્ય સુદૂરાનુગતાન્ પ્રભુઃ ।
સુભદ્રાસહિતઃ પ્રાયાદ્યાનેન દ્વારકાપુરીમ્ ॥ ૩૦.૫૪॥

ૠ્ક્ષક્ષ્વ્।સમાધિવિરતોદઙ્કપરિપૃષ્ટઃ પથિ પ્રભુઃ ।
હતં દુર્યોધનં પ્રાહ સભ્રાતૃસુતસૈનિકમ્ ॥ ૩૦.૫૫॥

તં શિષ્યવધકોપેન શપ્તુમાત્માનમુદ્યતમ્ ।
કેશવોઽશમયદ્વાક્યૈર્વિશ્વરૂપં પ્રદર્શ્ય ચ ॥ ૩૦.૫૬॥

મદ્ભક્તો નિતરામેષ મદારાધનતત્પરઃ ।
મામવજ્ઞાય નિરયં માઽનુત્થાનં વ્રજેદિતિ ॥ ૩૦.૫૭॥

કૃપયા વાસુદેવેન બોધિતઃ શાન્તમાનસઃ ।
પશ્ચાત્તાપાભિતપ્તાત્મા તમેવ શરણં યયૌ ॥ ૩૦.૫૮॥

તસ્મૈ દેવોઽભયં દત્ત્વા પ્રેષયિષ્યેઽમૃતં તવ ।
દાતું શક્રમિતિ પ્રોક્ત્વા યયૌ દ્વારવતીં પ્રભુઃ ॥ ૩૦.૫૯॥

અથાઽદિદેશ દેવેશં વાસુદેવોઽમૃતં મુનેઃ ।
દેહીતિ વઞ્ચયિષ્યામીત્યાહ સોઽપિ ક્ષમાપયન્ ॥ ૩૦.૬૦॥

ઓમિત્યુક્તો ભગવતા તત્સ્નેહાત્સ શચીપતિઃ ।
સુજુગુપ્સિતમાતઙ્ગવેષો ભૂત્વા મુનિં યયૌ ॥ ૩૦.૬૧॥

મૂત્રસ્રોતસિ સોઽધશ્ચ નિધાય કલશં વશી ।
મૂત્રયન્નિવ તં પ્રાહ વાસુદેવઃ સુધામિમામ્ ।
મહર્ષે પ્રેષયામાસ તવાર્થે તત્પિબેતિ ચ ॥ ૩૦.૬૨॥

સ મૂત્રમિતિ મત્વા તં યાહીત્યેવાઽહ ભર્ત્સયન્ ।
વઞ્ચયિત્વૈવ તં શક્રો યયૌ પ્રીતઃ સ્વમાલયમ્ ॥ ૩૦.૬૩॥

અસાધારણમન્નં હિ દેવાનામમૃતં સદા ।
અન્યપીતિસ્તતસ્તસ્ય દેવાનાં પરમાપ્રિયા ॥ ૩૦.૬૪॥

આત્મદત્તપ્રસાદાચ્ચ સ્વાપરાધાત્પ્રચાલિતે ।
ઉદઙ્કે વાસુદેવસ્તુ યુક્તમિત્યેવ મન્યતે ॥ ૩૦.૬૫॥

સ્વપુરીં પ્રાપ્ય યદુભિઃ પૂજિતઃ શૂરસૂનવે ।
ૠ્ક્ષિક્ષ્વ।વૃત્તાન્તં કથયામાસ કેશવો યદુસં સદિ ॥ ૩૦.૬૬॥

વધમન્તરિતં સૂનોઃ સાત્વતેશેન સાત્વતી ।

પ્રણમ્ય કથયેત્યૂચે તત આહ જનાર્દનઃ ॥ ૩૦.૬૭॥

તતઃ સુદુઃખિતાઃ શૂરપુત્રાદ્યા અભિમન્યવે ।
શ્રાદ્ધદાનાનિ બહુશશ્ચક્રુઃ કેશવસંયુતાઃ ॥ ૩૦.૬૮॥

નિવસત્યત્ર વિશ્વેશે ધર્મપુત્રઃ ક્રતૂત્તમમ્ ।
અશ્વમેધમનુષ્ઠાતું નાવિન્દદ્વિત્તમઞ્જસા ॥ ૩૦.૬૯॥

હતશેષાત્ક્ષત્રસઙ્ઘાત્કરં નૈચ્છદ્દયાપરઃ ।
નચ મધ્યમકલ્પેન યષ્ટું તસ્ય મનો ગતમ્ ॥ ૩૦.૭૦॥

વિજ્ઞાય નિત્યવિજ્ઞાતનિખિલો બાદરાયણઃ ।
આવિર્ભૂતો હિમવતઃ શ‍ૃઙ્ગં યત્રાભિસઙ્ગતમ્ ॥ ૩૦.૭૧॥

મેરુશ‍ૃઙ્ગેણ યત્રૈવ વિષ્ણુઃ સ્વાત્માનમવ્યયમ્ ।
લોકસ્ય સઙ્ગ્રહાયેજે કર્મબન્ધોજ્ઝિતોઽપિ સન્ ॥ ૩૦.૭૨॥

શઙ્કરાદ્યાઃ સુરા યત્ર મરુત્તશ્ચેજિરે હરિમ્ ।
દાનવો વૃષપર્વા ચ તત્રાસ્તિ ધનમક્ષયમ્ ॥ ૩૦.૭૩॥

તચ્છઙ્કરશરીરસ્થં જામદગ્ન્યં હરિં પરમ્ ।
ઇષ્ટ્વૈવાનુજ્ઞયા તસ્ય સ્વીકૃત્ય યજ તેન ચ ।
ઇત્યાહ વ્યાસવાક્યાનુ ભીમોઽપ્યાહ નૃપોત્તમમ્ ॥ ૩૦.૭૪॥

ધનસ્ય દેવતા વિષ્ણુર્જામદગ્ન્યોઽખિલેશ્વરઃ ।
સ શઙ્કરશરીરસ્થો યજ્ઞોચ્છિષ્ટધનાધિપઃ ॥ ૩૦.૭૫॥

તેનૈવ વિષ્ણુના દત્તમર્જુનાયાસ્ત્રમુત્તમમ્ ।
કાર્યાણ્યન્યાનિ ચાસ્માકં કૃતાન્યેતેન વિષ્ણુના ॥ ૩૦.૭૬॥

સ બ્રહ્મરુદ્રશક્રાદિપદદાતાઽખિલપ્રદઃ ।
સ્વતન્ત્રઃ પરતન્ત્રાં સ્તાનાવર્તયતિ ચેચ્છયા ॥ ૩૦.૭૭॥

ઃક્ષક્ષ્વી.પ્રિયોઽસ્માકં પ્રિયાસ્તસ્ય સર્વદૈવ વયં નૃપ ।
અતસ્તદભ્યનુજ્ઞાતધનેનૈવ યજામહે ॥ ૩૦.૭૮॥

સોઽયં પિતામહોઽસ્માકં વ્યાસસ્તન્નઃ પ્રદાસ્યતિ ।
ઇત્યુક્ત્વા તં પુરસ્કૃત્ય કૃષ્ણદ્વૈપાયનં યયુઃ ॥ ૩૦.૭૯॥

ધનં કૃષ્ણઃ સમાદાય સમન્તાચ્છતયોજનમ્ ।
દદૌ તેષાં તેઽપિ ચોહુર્હસ્ત્યુષ્ટ્રાશ્વનરાદિભિઃ ॥ ૩૦.૮૦॥

યુધિષ્ઠિરમૃતે સર્વે ભીમસેનપુરોગમાઃ ।
યજ્ઞાર્થમૂહિરે ભૂરિ સ્વર્ણમુધદ્રવિપ્રભમ્ ॥ ૩૦.૮૧॥

તદૈવ વાસુદેવોઽપિ સભાર્યઃ સહ ભદ્રયા ।
આગચ્છન્ હસ્તિનપુરં પથ્યુદઙ્કેન પૂજિતઃ ॥ ૩૦.૮૨॥

તત્કામવર્ષિણો મેઘાં સ્તસ્ય દત્વોદકાર્થિનઃ ।
સફલં સ્વવરં કૃત્વા જગામ ગજસાહ્વયમ્ ॥ ૩૦.૮૩॥

આસન્નેષ્વેવ પાર્થેષુ વ્યાસે ચ પુરુષોત્તમે ।
પ્રવિવેશ પુરં કૃષ્ણસ્તદાઽસૂતોત્તરા મૃતમ્ ॥ ૩૦.૮૪॥

દ્રૌણ્યસ્ત્રસૂદિતં બાલં દૃષ્ટ્વા કુન્ત્યાદિકાઃ સ્ત્રિયઃ ।
શરણ્યં શરણં જગ્મુર્વાસુદેવં જગત્પતિમ્ ॥ ૩૦.૮૫॥

પ્રત્યક્ષમાત્મના ગર્ભે રક્ષિતં પ્રસવે હતમ્ ।
પુનરુજ્જીવયામાસ કેશવઃ પાર્થતન્તવે ॥ ૩૦.૮૬॥

તદૈવ વિવિશુઃ પાર્થા સકૃષ્ણાઃ સધનોચ્ચયાઃ ।
સર્વે મુમુદિરે દૃષ્ટ્વા પૌત્રં કેશવરક્ષિતમ્ ॥ ૩૦.૮૭॥

દદૌ દાનાનિ બહુશો ધર્મપુત્રો યુધિષ્ઠિરઃ ।
પૌત્રજન્મનિ હૃષ્ટાત્મા વાસુદેવં નનામ ચ ॥ ૩૦.૮૮॥

કુન્તીકૃષ્ણાસુભદ્રાભિર્વૈરાટ્યાઽન્યાભિરેવ ચ ।
ય્ક્ક્ક્વીઇ।પાણ્ડવૈઃ પુરુષૈશ્ચાન્યૈઃ સં સ્તુતઃ પ્રણતો હરિઃ ॥ ૩૦.૮૯॥

તતઃ કૃષ્ણાભ્યનુજ્ઞાતાઃ પારાશર્યસદસ્યકાઃ ।
આરેભિરેઽશ્વમેધં તે મુનિભિર્બ્રહ્મવાદિભિઃ ॥ ૩૦.૯૦॥

સર્વયજ્ઞાત્મકં તેષામશ્વમેધં જગત્પતિઃ ।
કારયામાસ ભગવાન્ કૃષ્ણદ્વૈપાયનઃ સ્વયમ્ ॥ ૩૦.૯૧॥

સાધનાનિ તુ સર્વાણિ શાલાં ચૈવ હિરણ્મયીમ્ ।
પવમાનસુતશ્ચક્રે કૃષ્ણદ્વૈપાયનેરિતઃ ॥ ૩૦.૯૨॥

અથાનુમન્ત્રિતોત્સૃષ્ટં પુરોહિતપુરસ્કૃતમ્ ।
તુરગં કૃષ્ણસારઙ્ગમનુવવ્રાજ વાસવિઃ ॥ ૩૦.૯૩॥

સ જિત્વા રુન્ધતઃ સર્વાન્નૃપતીઞ્છસ્ત્રતેજસા ।

ચારયામાસ સર્વેષુ રાષ્ટ્રેષ્વવિજિતોઽરિભિઃ ॥ ૩૦.૯૪॥

યુધિષ્ઠિરાજ્ઞયા તેન ન કશ્ચિન્નિહતસ્તદા ।
આહૂતાશ્ચ નૃપાસ્તેન યજ્ઞાર્થં પ્રીયતાઽખિલાઃ ॥ ૩૦.૯૫॥

મણલૂરં ક્રમાત્પ્રાપ્તસ્તત્રૈનં બભ્રુવાહનઃ ।
અભ્યયાદર્ઘ્યપાદ્યાદ્યૈસ્તમાહ વિજયઃ સુતમ્ ॥ ૩૦.૯૬॥

યોદ્ધુકામોઽર્ઘ્યમાદાય ત્વયાઽદ્યાભિગતો હ્યહમ્ ।
ન પ્રીયે પૌરુષં ધિક્તે યન્મેધ્યાશ્વો ન વારિતઃ ॥ ૩૦.૯૭॥

તદાઽપિ પિતૃભક્ત્યૈનમયુદ્ધ્યન્તમુલૂપિકા ।
પ્રાહ યુદ્ધ્યસ્વ યત્પ્રીત્યૈ ગુરોઃ કાર્યમસં શયમ્ ।
પ્રીણનાયૈવ યુદ્ધ્યસ્વ પિત્રે સન્દર્શયન્ બલમ્ ॥ ૩૦.૯૮॥

ઇત્યુક્તો યુયુધે પિત્રા બલં સર્વં પ્રદર્શયન્ ।
અર્જુનસ્તુ સુતસ્નેહાન્મન્દં યોધયતિ સ્મયન્ ॥ ૩૦.૯૯॥

સ તુ સર્વાયુધક્ષેપેઽપ્યવિકારં ધનઞ્જયમ્ ।
દૃષ્ટ્વા બાલ્યાત્પરીક્ષાયૈ મન્ત્રપૂતં મહાશરમ્ ।
ર્દ્ક્ષિક્ષક્ષક્ષ્ેહિક્ષેપ પિત્રે દૈવેન તેનૈનં મોહ આવિશત્ ॥ ૩૦.૧૦૦॥

મૂર્ચ્છિતં તં ગુરું દૃષ્ટ્વા તદ્ભક્ત્યા ભૃશદુઃખિતઃ ।
પ્રાયોપવિષ્ટસ્તન્માતા વિલલાપાતિદુઃખિતા ॥ ૩૦.૧૦૧॥

વિજગર્હ તદોલૂપીં ધિગ્જગત્ત્રયપૂજિતમ્ ।
અજીઘનો મે ભર્તારં પુત્રેણૈવાવિજાનતા ॥ ૩૦.૧૦૨॥

લોકવીરં પતિં હિત્વા ન મેકાર્યં સુતેન ચ ।
પતિલોકમહં યાસ્યે તૃપ્તા ભવ કલિપ્રિયે ॥ ૩૦.૧૦૩॥

ઇત્યુક્ત્વા મરણાયૈવ તાં વિનિશ્ચિતમાનસામ્ ।
ધરાયાં વિલુઠન્તીં ચ દૃષ્ટ્વા ભુજગનન્દિની ॥ ૩૦.૧૦૪॥

નાગલોકાત્સમાદાય વિશલ્યકરણીં ક્ષણાત્ ।
ઉત્થાપયામાસ પતિં ત્રિલોકાતિરથં તયા ॥ ૩૦.૧૦૫॥

પ્રહસ્યોવાચ ચ તદા શ્રુતં વાક્યં પુરા મયા ।
સુરલોકે સુરૈઃ પ્રોક્તં ભીષ્માદ્યા નાતિધર્મતઃ ॥ ૩૦.૧૦૬॥

યદ્ધતાસ્તેન દોષેણ પાર્થસ્તેનાતિવેદનામ્ ।

રણે વ્રજેદિતિ ન તત્પરતઃ સ્યાદિતિ હ્યહમ્ ।
વચનાદેવ દેવાનાં યુદ્ધ્યેત્યાત્મજમબ્રુવમ્ ॥ ૩૦.૧૦૭॥

દેવાનામેવ સઙ્કલ્પાન્મૂર્ચ્છિતશ્ચાર્જુનોઽભવત્ ।
ભુક્તદોષફલશ્ચાયં પુનર્ભોક્ષ્યતિ નાન્યતઃ ॥ ૩૦.૧૦૮॥

અન્યેન પાતિતસ્યાસ્ય યશો નશ્યેત્રિલોકગમ્ ।
નાર્જુનસ્ય યશો નશ્યેદિતિ દૈવૈરિદં કૃતમ્ ॥ ૩૦.૧૦૯॥

ઇત્યુક્તઃ પ્રીતિમાપેદે પુત્રભાર્યાયુતોઽર્જુનઃ ।
યજ્ઞાર્થં તાવથાઽહૂય પૂજિતઃ પ્રયયૌ તતઃ ॥ ૩૦.૧૧૦॥

દ્વારકાયાઃ સમીપસ્થં પ્રદ્યુમ્નાદ્યાઃ સુતા હરેઃ ।
પ્રસહ્યાશ્વમપાજહ્રુરાહ્વયન્તોઽર્જુનં યુધે ॥ ૩૦.૧૧૧॥

ચ્ક્ષ્લ્।સુભદ્રાહરણં માર્ષ્ટું નીતેઽશ્વે તૈર્ધનઞ્જયઃ ।
ગૌરવાદ્વાસુદેવસ્ય માતુલસ્ય ચ કેવલમ્ ॥ ૩૦.૧૧૨॥

માતુલાયાબ્રવીદશ્વં હૃતં પૌત્રૈરબન્ધુવત્ ।
સ નિર્ભત્સ્ય કુમારાં સ્તાન્મેધ્યમશ્વમમોચયત્ ॥ ૩૦.૧૧૩॥

માતુલં સ પ્રણમ્યાથ યજ્ઞાર્થં તાન્નિમન્ત્ર્ય ચ ।
ગચ્છન્ ગજાહ્વયં દૂતમગ્રતોઽયાપયન્નૃપે ॥ ૩૦.૧૧૪॥

સકૃષ્ણઃ સહસોદર્યઃ શ્રુત્વાઽસૌ પ્રાપ્તમર્જુનમ્ ।
પ્રીતો બાષ્પાભિપૂર્ણાક્ષો ભ્રાતૃસ્નેહાદભાષત ॥ ૩૦.૧૧૫॥

વાસુદેવ ન પશ્યામિ દુર્લક્ષણમજાર્જુને ।
કેન દુર્લક્ષણેનાયં બહુદુઃખી પ્રવાસગઃ ॥ ૩૦.૧૧૬॥

પૃષ્ટસ્તં કેશવઃ પ્રાહ ભ્રાતા તે દીર્ઘપિણ્ડિકઃ ।
તેનાયં દુઃખબહુલ ઇત્યુક્ત્વા પુનરેવ ચ ।
વદન્તમેવ પાઞ્ચાલી કટાક્ષેણ ન્યવારયત્ ॥ ૩૦.૧૧૭॥

સમસ્તલક્ષણાભિજ્ઞાઃ કૃષ્ણઃ સત્યા વૃકોદરઃ ।
કૃષ્ણા ચ પઞ્ચમો નાસ્તિ વિદ્યા શુદ્ધેયમઞ્જસા ॥ ૩૦.૧૧૮॥

પ્રસઙ્ગાત્પ્રાપ્તુમિચ્છેત્તાં વિદ્યાશીલો યુધિષ્ઠિરઃ ।
ઇતિ લોભાત્તુ પાઞ્ચાલી વાસુદેવં ન્યવારયત્ ॥ ૩૦.૧૧૯॥

તદ્ગૌરવાદ્વાસુદેવો નોત્તરં પ્રત્યભાષત ।

વિસ્મારયામાસ ચ તં પ્રબ્રુવાણઃ કથાન્તરમ્ ॥ ૩૦.૧૨૦॥

ઉદરસ્ય કિઞ્ચિદાધિક્યં વૃષણાધિક્યમેવ ચ ।
સવ્યબાહોસ્તથાઽધિક્યં દુર્લક્ષણમતોઽર્જુને ॥ ૩૦.૧૨૧॥

નૈવોક્તં વાસુદેવેન દૃશ્યમાનમપિ સ્ફુટમ્ ।
જ્ઞાનાનન્દહ્રાસકરા હ્યેતે દોષાઃ સદાતનાઃ ॥ ૩૦.૧૨૨॥

ઋક્ષિલ। સમસ્તજીવરાશૌ તદુષ્ટલક્ષણવર્જિતૌ ।
પૂર્ણચિત્સુખશક્ત્યાદેર્યોગ્યૌ કૃષ્ણા ચમારુતિઃ ॥ ૩૦.૧૨૩॥

અનાદિદુઃખહીનત્વે સુખાધિક્યે ચ લક્ષણમ્ ।
રુગ્મિણીસત્યભામાદિરૂપાયાઃ શ્રિય એવ તુ ॥ ૩૦.૧૨૪॥

મુખ્યં તતોઽપિ મુખ્યં તુ સ્વાન્તન્ત્ર્યાદેરશેષતઃ ।
ગુણરાશેઃ પરં લિ ઙ્ગં નિત્યં વ્યાસાદિરૂપિણઃ ।
વિષ્ણોરેવ નચાન્યસ્ય સ હ્યેકઃ પૂર્ણસદ્ગુણઃ ॥ ૩૦.૧૨૫॥

સાશ્વેઽર્જુને યજ્ઞવાટં પ્રવિષ્ટેઽસ્ય સહોદરાઃ ।
પૂજિતાઃ પૂજયામાસુર્મુદિતાઃ સહકેશવાઃ ॥ ૩૦.૧૨૬॥

તતઃ સ યજ્ઞો યદુવીરરક્ષિતો વ્યાસોપદિષ્ટો મુનિભિઃ પ્રવર્તિતઃ ।
અશોભતાલં સકલૈર્નૃપૈશ્ચ સમાગતૈર્વિપ્રવરૈશ્ચ જુષ્ટઃ ॥ ૩૦.૧૨૭॥

સ કૃષ્ણયુગ્મેન ચ ભાર્ગવેણ ત્રિધા વિભક્તેન પરેણ પું સા ।
અધિષ્ઠિતોઽશોભત વિશ્વમેતદ્વિશ્વાદિરૂપેણ યથૈવ તેન ॥ ૩૦.૧૨૮॥

યથા વિરિ ઞ્ચસ્ય પુરાઽસ યજ્ઞો યથૈવ શક્રસ્ય શતક્રતુત્વે ।
તથૈવ સોઽભૂદ્વિધિશર્વશક્રપૂર્વૈઃ સુરૈરાવિરલઙ્કૃતોઽધિકમ્ ॥ ૩૦.૧૨૯॥

ન દેવગન્ધર્વમુનિસ્વધર્મમર્ત્યાદિકેષ્વાસ સ યોઽત્ર નાઽસ ।
સ્વલઙ્કૃતૈર્નાકિજનૈઃ સકાન્તૈરરુરુચન્નાકવદેતદોકઃ ॥ ૩૦.૧૩૦॥

તત્રૈવ તત્ત્વાનિ સસં શયાનિ નિસ્સં શયાન્યાસુરલં વિવાદે ।
પરસ્પરોત્થે હરિણા ત્રિરૂપિણા સં સ્થાપિતાન્યગ્ર્યવચોભિરુચ્ચૈઃ ॥ ૩૦.૧૩૧॥

પ્રગીતગન્ધર્વવરઃ પ્રનૃત્તસદપ્સરાઃ સન્તતવાદિવિપ્રઃ ।
વિવેચયદ્દેવનૃપૌઘ એકો રરાજ રાજાઽખિલસત્ક્રતૂનામ્ ॥ ૩૦.૧૩૨॥

સમસ્તદેવ્યઃ સહવાસુદેવ્યઃ સ્વલઙ્કૃતાઃ ફુલ્લમુખારવિન્દાઃ ।
વિચેરુરત્રૈવ સહાપ્સરોભિર્નિષેદુરપ્યચ્યુતસત્કથારમાઃ ॥ ૩૦.૧૩૩॥

ન વૈ મુમુક્ષુર્ન બભૂષુરત્ર ન વૈ પ્રપિત્સુશ્ચ કુતો બુભુક્ષુઃ ।
ઋક્ષ્લીઽસત્યકામા અભવન્ કુતશ્ચિત્પ્રદાતરિ પ્રાજ્ઞવરેઽનિલાત્મજે ॥ ૩૦.૧૩૪॥

દિનેદિને તત્ર મહાન્નપર્વતાઃ સભક્ષસારા રસવન્ત ઊર્જિતાઃ ।
નદ્યઃ પયઃ સર્પિરજસ્રપૂર્ણાઃ સમાક્ષિકાદ્યા અપિ પાયસહ્રદાઃ ॥ ૩૦.૧૩૫॥

હ્રદા મહાન્તસ્ત્રિદશાદિયોગ્યાઃ સુયોગયુક્તા હરિચન્દનાદેઃ ।
તથાઽઞ્જનાલક્તકમુખ્યમણ્ડનદ્રવ્યાગ્રવાપ્યો મણિકાઞ્ચનોદ્ભવાઃ ॥ ૩૦.૧૩૬॥

યથેષ્ટપાનાશનભોગશિષ્ટાઃ સહસ્રશો મારુતિના તુકારિતાઃ ।
ગન્ધા રસાદ્યાશ્ચ સમસ્તભોગા દિવીવ તત્રાઽસુરતીવ હૃદ્યાઃ ॥ ૩૦.૧૩૭॥

નૈતાદૃશઃ કશ્ચન ભૂતપૂર્વો મખો વિના રામવિરિ ઞ્ચવજ્જિણામ્ ।
મખાનિતિ પ્રોચુરશેષલોકા દૃષ્ટ્વા મખં તં પુરુષોત્તમેરિતમ્ ॥ ૩૦.૧૩૮॥

સ એવમદ્ધા હરિદૈવતઃ ક્રતુઃ પઞ્ચાશ્વમેધાત્મક ઉચ્ચકલ્પઃ ।
દિનેદિને સ્વૃદ્ધગુણો બભૂવ મુદાવહો વત્સરપઞ્ચકત્રયમ્ ॥ ૩૦.૧૩૯॥

યજ્ઞાવસાને નિખિલાશ્ચ પાણ્ડવાઃ કૃષ્ણા ચપૃથ્વીમખિલાં સવિત્તામ્ ।
મઙ્ગલ્યમાત્રં દયિતાશરીરે નિધાય સર્વાભરણાનિ ચૈવ ।
સમર્પયામાસુરજે વરેણ્યે વ્યાસે વિભાગાય યથોક્તમૃત્વિજામ્ ॥ ૩૦.૧૪૦॥

પ્રિયો વિભાગો યદમુષ્ય વિષ્ણોરતો વિભાગાર્થમિવાઽર્પયં સ્તે ।
હૃદા સમસ્તં હરયેઽર્પિતં તૈઃ સ હિ દ્વિજસ્થોઽપિ સમસ્તકર્તા ॥ ૩૦.૧૪૧॥

દેહેન્દ્રિયપ્રાણમનાં સિ ચેતનૈઃ સહૈવ તસ્મા અતિસૃજ્ય નેમુઃ ।
ત્વદીયમેતન્નિખિલં વયં ચ નાસ્ત્યસ્મદીયં ક્વચ કિઞ્ચનેશ ।
સ્વતન્ત્ર એકોઽસિ ન કશ્ચિદન્યઃ સર્વત્ર પૂર્ણોઽસિ સદેતિ હૃષ્ટાઃ ॥ ૩૦.૧૪૨॥

તતો વિભક્તે મુનયોઽવદં સ્તે પ્રત્યર્પયામો વયમેષુ રાજ્યમ્ ।
પૂર્ણા હિરણ્યેન વયં ધરાયાઃ પ્રપાલને યોગ્યતમા ઇમે હિ ॥ ૩૦.૧૪૩॥

પાર્થાઃ સભાર્યા દ્વિજવાક્યમેતન્નિશમ્ય કૃષ્ણાય પુનઃ પ્રણમ્ય ।
ઊચુસ્તપો નોઽસ્તુ વનેઽર્પયિત્વા રાજ્યં મખાન્તે ત્વયિ ધર્મલબ્ધમ્ ॥ ૩૦.૧૪૪॥

ઇતીરિતઃ પ્રાહ સ બાદરાયણો મુનીશ્વરૈરપ્યનુયાચિતઃ પ્રભુઃ ।
ઋક્ષ્લીઈરણ્યમેવ સ્વમિદં મુનીનાં મદાજ્ઞયા ભુઙ્ગ્ધ્વમશેષરાજ્યમ્ ॥ ૩૦.૧૪૫॥

સમર્પિતં મે ફલવચ્ચ તત્સ્યાત્પુનર્ગ્રહો નૈવ ચ દોષકારી ।

પિતામહોऽહં ભવતાં વિશેષતો ગુરુઃ પતિશ્ચૈવ તતો મદર્હથ ॥ ૩૦.૧૪૬॥

ઇતીરિતાસ્તે પ્રતિપદ્ય રાજ્યં દદુર્હિરણ્યં નિખિલં ચ તસ્મૈ ।
વિભજ્ય વિપ્રાન્ સ નિજં તુ ભાગમદાત્પૃથાયૈ નિખિલં પ્રસન્નઃ ॥ ૩૦.૧૪૭॥

સભાર્યકાણાં વરરત્નભૂષણાન્યશેષતઃ પુત્રભુવાં પ્રદાય ।
પૃથક્પૃથગ્યોગ્યવરાનથૈભ્યઃ પ્રાદાત્પ્રભુસ્તે મુદિતાઃ પ્રણેમુઃ ॥ ૩૦.૧૪૮॥

તદ્યજ્ઞપઞ્ચકમજસ્ત્રિગુણાં સ એભ્યઃ સદ્દક્ષિણાં ક્રતુપતિર્નિખિલામવાપ્ય ।
ચક્રેऽશ્વમેધત્રયમેકમેકં તેષાં હરિર્બહુસુવર્ણકનામધેયમ્ ॥ ૩૦.૧૪૯॥

સકૃષ્ણેષ્વથ પાર્થેષુ સુસ્નાતાવભૃથેષ્વલમ્ ।
પઞ્ચેન્દ્રવદ્વિરાજત્સુ સ્તૂયમાનેષ્વૃષીશ્વરૈઃ ॥ ૩૦.૧૫૦॥

સ્તૂયમાને ચ તદ્યજ્ઞે ક્રોધો નકુલતાં ગતઃ ।
કૃત્વોગ્રગર્જનં યજ્ઞં તાંશ્ચ યજ્ઞકૃતોऽખિલાન્ ॥ ૩૦.૧૫૧॥

ગર્હયન્નૂચિવાનિત્થં ભાર્યાપુત્રસ્નુષાયુતઃ ।
સક્તુપ્રસ્થમદાદ્વિપ્ર ઉઞ્છવૃત્તિઃ સુભક્તિતઃ ॥ ૩૦.૧૫૨॥

ધર્માયાતિથયે તસ્ય કલાં નાર્હતિ ષોડશીમ્ ।
યજ્ઞોऽયમિતિ હેતું ચ વિપ્રૈઃ પૃષ્ટોऽભ્યભાષત ॥ ૩૦.૧૫૩॥

અતિથેસ્તસ્ય પાદોદક્લિન્નઃ પાર્શ્વો હિરણ્મયઃ ।
એકો મમાભૂદપરઃ સર્વતીર્થાદિકેષ્વપિ ॥ ૩૦.૧૫૪॥

મજ્જતોऽવભૃથેષ્વદ્ધા યજ્ઞાનામત્ર ચાऽદરાત્ ।
નાભૂદિત્યથ તત્તત્ત્વવેદિભિર્મુનિપુઙ્ગવૈઃ ॥ ૩૦.૧૫૫॥

કૃષ્ણેન ચ તમોऽન્ધં તં પ્રાપયદ્ભિઃ સ્મિતે કૃતે ।
અદર્શનં જગામાऽશુ તમઃ પ્રાપ ચ કાલતઃ ।
તદર્થમેવ હૈરણ્યઃ પાર્શ્વસ્તસ્યાભવત્પુરા ॥ ૩૦.૧૫૬॥

ઋક્ષિલવ્। કૃષ્ણસ્ય પાણ્ડવાનાં ચ મખાદેશ્ચ ગુણાન્ બહૂન્ ।
વદન્તો ભત્સયાઞ્ચક્રુસ્તન્મતજ્ઞા મધુદ્વિષઃ ॥ ૩૦.૧૫૭॥

શ્રાદ્ધાર્થં હિ પયઃ પૂર્વં જમદગ્નેરદૂષયત્ ।
નાકુલેનૈવ રૂપેણ ક્રોધસ્તં પિતરોऽશપન્ ॥ ૩૦.૧૫૮॥

ભવ ત્વં નકુલસ્તાવદ્યાવદ્ધર્માદિકાન્ સુરાન્ ।
ક્ષેપ્સ્યસીતિ તમો ઘોરં ભૂયઃ પાપેન યાત્વયમ્ ।

ઇત્યભિપ્રેત્યઃ તૈઃ શમસ્તથા કૃત્વા તમોઽભ્યયાત્ ॥ ૩૦.૧૫૯॥

યદ્યપ્યલ્પધનત્યક્તં વિત્તં બહુફલં ભવેત્ ।
તથાઽપ્યનન્તફલદાઃ કર્તુરેવ મહાગુણાઃ ॥ ૩૦.૧૬૦॥

સતાં પ્રીતિશ્ચ તત્રાપિ સદ્વરો હરિરેવ હિ ।
પાર્થેભ્યોઽભ્યધિકઃ કર્તા સમો વા કો ગુણૈર્ભવેત્ ॥ ૩૦.૧૬૧॥

સતાં ચ પ્રવરો વિષ્ણુઃ સદ્ભિર્મુનિવરૈર્યુતઃ ।
પ્રત્યક્ષતઃ કારયતિ પાર્થૈઃ પ્રિયતમૈશ્ચ તૈઃ ।
યં મખપ્રવરં તસ્ય સમં કિં શુભસાધનમ્ ॥ ૩૦.૧૬૨॥

પઠન્તિ પૈઙ્ગિનશ્ચૈતાન્મન્ત્રાનન્વર્થકાનિહ ।
“અવૈષ્ણવકૃતં કર્મ સર્વમન્તવદુચ્યતે ।
અનન્તં વૈષ્ણવકૃતં તત્ર વર્ણક્રમાત્પરમ્ ॥ ૩૦.૧૬૩॥

વૈષ્ણવેષ્વપિ મર્ત્યૈર્યત્કૃતં શતગુણં તતઃ ।
ગાન્ધર્વં કર્મ તસ્માચ્ચ મુનિભિઃ પિતૃભિસ્તતઃ ॥ ૩૦.૧૬૪॥

દેવશક્રશિવબ્રહ્મકૃતં તસ્માત્ક્રમેણ ચ ।
શતોત્તરમિતિ જ્ઞેયં નાન્યદ્બ્રહ્મકૃતોપમમ્ ॥ ૩૦.૧૬૫॥

વૈષ્ણવત્વં ક્રમોદ્વૃદ્ધં બ્રહ્માન્તં જીવરાશિષુ ।
ફલાધિક્યં કર્મણાં હિ વિષ્ણોઃ પ્રીત્યૈવ નાન્યથા” ॥ ૩૦.૧૬૬॥

ઋક્ષ્લ્વ્। ઇતિ તેન ન પાર્થાનાં કર્મણાઽન્યત્સમં ક્વચિત્ ।
ગુણૈર્જ્ઞાનાદિભિર્વાઽપિ તસ્માત્ક્રોધઃ સ તામસઃ ।
વિનિન્દ્ય તાન્ સુસત્ત્વસ્થાં સ્તમોઽન્ધમુપજગ્મિવાન્ ॥ ૩૦.૧૬૭॥

અથ પૃષ્ટો વાસુદેવઃ સુરવિપ્રાદિસં સદિ ।
યુધિષ્ઠિરેણ સં હૃષ્ટો જગાદાશેષતઃ પ્રભુઃ ॥ ૩૦.૧૬૮॥

તે ચ શ્રુત્વાઽખિલાન્ ધર્માન્ ભક્ત્યા પરમયા યુતાઃ ।
પૂજયન્તો જગન્નાથમાપુશ્ચ પરમાં મુદમ્ ॥ ૩૦.૧૬૯॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
(યાગસમાપ્તિર્નામ)ત્રિંશોઽધ્યાયઃ ॥

## અથ એકત્રિંશોઽધ્યાયઃ ।

(ધૃતરાષ્ટ્રાદિસ્વર્ગપ્રાપ્તિઃ )

ૐ । યજ્ઞેશ્વરેણાભિયુતેષુ યુક્ત્યા મહીં પ્રશાસત્સુ પૃથાસુતેષુ ।
યિયક્ષુરાગાન્નિશિ વિપ્રવર્યો યુધિષ્ઠિરં વિત્તમભીપ્સમાનઃ ॥ ૩૧.૧॥

પ્રાતર્દદાનીતિ નૃપસ્ય વાક્યં નિશમ્ય વિપ્રસ્ત્વરિતો મખાર્થે ।
ભીમં યયાચે સ નૃપોક્તમાશુ નિશમ્ય ચાદાન્નિજહસ્તભૂષણમ્ ॥ ૩૧.૨॥

અનર્ઘમગ્નિપ્રતિમં વિચિત્રરત્નાઞ્ચિતં વિપ્રવરસ્તદાપ્ય ।
યયૌ કૃતાર્થોઽથ ચ નન્દિઘોષમકારયદ્વાયુસુતસ્તદૈવ ॥ ૩૧.૩॥

અકાલજં તં તુ નિશમ્ય રાજા પપ્રચ્છ દૂતૈસ્તમુવાચ ભીમઃ ।
યન્મર્ત્યદેહોઽપિ વિનિશ્ચિતાયુરભૂન્નૃપસ્તેન મમાઽસ હર્ષઃ ॥ ૩૧.૪॥

ઇતીરિતોઽસૌ નૃપતિસ્ત્વરેત ધર્માર્થમિત્યસ્ય મતં પ્રપૂજયન્ ।
જગાદ સાધ્વિત્યથ ભૂય એવ ધર્મે ત્વરાવાનપિ સમ્બભૂવ ॥ ૩૧.૫॥

અથામ્બિકેયં વિષયેષુ સક્તં દુસ્સઙ્ગદુષ્ટં કૃતભૂરિદોષમ્ ।
સમસ્તરાજાપ્યયહેતુભૂતં નિચાય્ય તં મારુતિરન્વકમ્પત ॥ ૩૧.૬॥

અકુર્વતસ્તીક્ષ્ણતપઃ કુતશ્ચિન્નૈવાસ્ય લોકાપ્તિરમુષ્ય ભૂયાત્ ।
રાગાધિકોઽયં ન તપશ્ચ કુર્યાદિત્યસ્ય વૈરાગ્યકરાણિ ચક્રે ॥ ૩૧.૭॥

આજ્ઞાં પરૈરસ્ય નિહન્તિ સોદરૈર્વધૂજનૈરપ્યતિપૂજિતેઽસ્મિન્ ।
સ નિષ્ટનત્યેવમપીતરૈઃ સ સુપૂજિતો નાઽસ તદા વિરાગઃ ॥ ૩૧.૮॥

સર્વે હિ પાર્થાસ્તમૃતે સભાર્યા વૈચિત્રવીર્યં પરમાદરેણ ।
પર્યેવ ચક્રુઃ સતતં સભાર્યં કૃષ્ણા ચ નસ્યાત્તનયાર્તિમાનિતિ ॥ ૩૧.૯॥

સ પ્રીયમાણો નિતરાં ચ તેષુ નૈવાધિકં પ્રીયતે ભીમસેને ।
સ્મરન્ સુતાં સ્તેન હતાન્ સમસ્તાનપિ પ્રભાવં પરમસ્ય જાનન્ ॥ ૩૧.૧૦॥

તસ્યાપનેતું વિષયેષુ સક્તિં દ્વેષં તથૈવાઽત્મનિ ભીમસેનઃ ।
જગાદ માદ્રીસુતયોઃ સમક્ષમાસ્ફોટ્ય સં શ◌ૃણ્વત એવ તસ્ય ॥ ૩૧.૧૧॥

ઋક્ષ્લ્વી। તાવિમૌ મે ભુજૌ વૃત્તૌ પીનૌ ચન્દનરૂષિતૌ ।
યયોરન્તરમાસાદ્ય જરઢસ્ય સુતા હતાઃ ॥ ૩૧.૧૨॥

યમૌ તદન્વમોદેતાં તત્સ્નેહાદ્ગૌરવાદપિ ।
નૈવ તત્કૃષ્ણયા જ્ઞાતં પૃથયા ચ સપુત્રયા ॥ ૩૧.૧૩॥

તચ્છ્રુત્વોત્પન્નનિર્વેદં ક્ષત્તા જ્યેષ્ઠસ્ય વર્દ્ધયન્ ।
ઉવાચ જીવિતાશા તે નનુ રાજન્મહીયસી ।
ભીમાપવર્જિતં પિણ્ડમાદત્સે ગૃહપાલવત્ ॥ ૩૧.૧૪॥

નચાપરાધો ભીમસ્ય બ્રુવતસ્ત્વામિદં વચઃ ।
અગ્નિર્નિસૃષ્ટો દત્તશ્ચ ગરો દારાશ્ચ દૂષિતાઃ ।
હૃતં ક્ષેત્રં ધનં યસ્ય કિં ભીમેન કૃતં ત્વયિ ॥ ૩૧.૧૫॥

અલમાસજ્જતસ્તેઽદ્ય નિર્વેદકરમીરિતમ્ ।
ઉપકારાય ભીમેન તવ દ્વેષં ત્યજાત્ર તત્ ॥ ૩૧.૧૬॥

વિમુચ્ય દ્વેષકામૌ ત્વં વને તીર્થનિષેવકઃ ।
તપસાઽરાધય હરિં તતઃ પૂતો ભવિષ્યસિ ॥ ૩૧.૧૭॥

ઇત્યુક્તો દ્વેષમુત્સૃજ્ય ભીમે નિર્વેદમાગતઃ ।
અનુજ્ઞાં તપસે પ્રાપ્તુમુપવાસપરોઽભવત્ ॥ ૩૧.૧૮॥

અનશ્નન્તં ચતુર્થેઽહ્નિ ધૃતરાષ્ટ્રં યુધિષ્ઠિરઃ ।
જ્ઞાત્વા સમ્પ્રાર્થયામાસ ભોજનાર્થં પુનઃ પુનઃ ॥ ૩૧.૧૯॥

અનુજ્ઞાં વનવાસાય ત્વત્તઃ પ્રાપ્યૈવ સર્વથા ।
ભોક્ષ્યેઽન્યથા નેતિ વદન્ ધૃતરાષ્ટ્રઃ શ્રમાન્વિતઃ ।
ઉપવાસકૃશો ભાર્યાં શિશ્રિયે મૂર્ચ્છિતઃ ક્ષણાત્ ॥ ૩૧.૨૦॥

શન્તમેન કરેણાથ ધર્મજસ્તં મૃદુ સ્પૃશન્ ।
શનૈઃ સંજ્ઞામગમયદબ્રવીચ્ચ સુદુઃખિતઃ ॥ ૩૧.૨૧॥

પુરસ્કૃત્ય યુયુત્સું ત્વં કુરુ રાજ્યમકણ્ટકમ્ ।
ઽદ્ક્ષ્લ્વીઇ।વયમેવ ત્વદર્થાય કુર્મઃ સર્વે તપો વને ॥ ૩૧.૨૨॥

નેત્યાહ ધૃતરાષ્ટ્રસ્તં કુલધર્મો હિ નો વને ।
અન્તે દેહપરિત્યાગસ્તન્માઽનુજ્ઞાતુમર્હસિ ॥ ૩૧.૨૩॥

તયોર્વિવદતોરેવં કૃષ્ણદ્વૈપાયનઃ પ્રભુઃ ।
સર્વજ્ઞઃ સર્વકર્તેશ આવિર્ભૂતોઽબ્રવીન્નૃપમ્ ॥ ૩૧.૨૪॥

તપસાઽશેષદોષાણાં ક્ષયકામમિમં નૃપમ્ ।
અનુજાનીહિ નૈવાસ્ય ધર્મવિઘ્નકરો ભવ ॥ ૩૧.૨૫॥

કાલે નિર્વેદમાપન્નસ્તપસા દગ્ધકિલ્બિષઃ ।
શુભ્રાં ગતિમયં યાયાદન્યથા ન કથઞ્ચન ॥ ૩૧.૨૬॥

ઇત્યુક્તો ધર્મરાજસ્તમનુજજ્ઞે સ ચાશિતઃ ।
શિક્ષયામાસ સદ્ધર્માન્નીતિં ચ વિદુષેઽપ્યલમ્ ।
કેવલસ્નેહતો રાજ્ઞો શુશ્રાવ વિનયાય સઃ ॥ ૩૧.૨૭॥

અનુજ્ઞાય ગૃહં પ્રાપ્તે ધર્મજે વિદુરં પુનઃ ।
શ્રાદ્ધાય વિત્તમાકાઙ્ક્ષન્ પ્રેષયામાસ તદ્વચઃ ॥ ૩૧.૨૮॥

શ્રુત્વા યુધિષ્ઠિરો ભીમમાહ દાતવ્યમદ્ય નઃ ।
પુત્રપૌત્રાપ્તબન્ધૂનાં શ્રાદ્ધેચ્છોર્વિત્તમઞ્જસા ॥ ૩૧.૨૯॥

તમાહ ભીમઃ પાપાનાં વિમુખાનાં મધુદ્વિષઃ ।
પારલૌકિકસાહાય્યં ન કાર્યમિતરાર્થતઃ ।
દત્તેનાપિ હિ વિત્તેન પુત્રશ્રાદ્ધં કરિષ્યતિ ॥ ૩૧.૩૦॥

તજ્જ્ઞાત્વા દદતાં દોષો ભવેદિતિ વિચિન્તયન્ ।
કષ્ટાત્કષ્ટતરં યાન્તુ સર્વે દુર્યોધનાદયઃ ॥ ૩૧.૩૧॥

ભીષ્માદીનાં વયં શ્રાદ્ધકર્તારસ્તેન કિં તતઃ ।
કાનીનત્વાત્તુ કર્ણસ્ય સહાસ્માભિઃ પૃથૈવ હિ ।
શ્રાદ્ધકર્મણ્યધિકૃતા કિં તસ્મૈ દીયતે ધનમ્ ॥ ૩૧.૩૨॥

ચ્દ્ક્ષ્લિલક્ષ્। ઇત્યુક્તવન્તં નૃપતિરર્જુનશ્ચોચતુઃ પુનઃ ।
યિયાસોર્યાચમાનાય નિજબાહુબલાર્જિતમ્ ।
દેહિ વિત્તં પરમતઃ કિં ત્વામેષોઽભિયાચતે ॥ ૩૧.૩૩॥

ઇત્યુક્તમપિ નેત્યેવ બ્રુવાણં શુદ્ધધાર્મિકમ્ ।
અપ્રીત્યા જોષમાસ્વેતિ પ્રોચ્યોવાચ યુધિષ્ઠિરઃ ॥ ૩૧.૩૪॥

કોશતો યદ્વહિર્વિત્તં દાનભોગાદિકારણમ્ ।
મમ સન્નિહિતં સર્વં તત્પિત્રેઽદ્યાર્પિતં મયા ॥ ૩૧.૩૫॥

એવમેવાર્જુનોઽપ્યાહ વિદુરં પુનરૂચતુઃ ।
મુખ્યધર્મરતે ભીમે ન પિતા ક્રોદ્ધુમર્હતિ ।
ઇત્યુક્તો વિત્તમાદાય ગત્વા ક્ષત્તાઽગ્રજેઽબ્રવીત્ ॥ ૩૧.૩૬॥

યુધિષ્ઠિરાર્જુનૌ ભક્તિં નિતરાં ત્વયિ ચક્રતુઃ ।

નાતિહૃષ્ટસ્ત્વદાજ્ઞાયાં ભીમસ્તન્મા ક્રુધોઽત્ર ચ ॥ ૩૧.૩૭॥

શુદ્ધે ક્ષત્રિયધર્મે હિ નિતરોઽયં વૃકોદરઃ ।
નૃપાર્જુનૌ ધર્મરતાવપિ લોકકૃપાપરૌ ॥ ૩૧.૩૮॥

અજાતકોપસ્તચ્છ્રુત્વા ધૃતરાષ્ટ્રઃ પ્રશાન્તધીઃ ।
કૃત્વા શ્રાદ્ધાનિ સર્વેષાં મહાદાનાન્યનારતમ્ ।
દશરાત્રં દદૌ શુદ્ધમનસા નિરૃણત્વધીઃ ॥ ૩૧.૩૯॥

સર્વં સમર્પ્ય ગોવિન્દે પાર્થેભ્યોઽન્યેભ્ય એવ ચ ।
સ્વજનેભ્યઃ સમાદાય સ્રવન્નેત્રેભ્ય ઉચ્ચધીઃ ।
અનુજ્ઞાં નિર્ગતઃ પ્રાહ પૌરજાનપદાન્નૃપઃ ॥ ૩૧.૪૦॥

ધર્મતો રક્ષિતા યૂયમસ્મત્પૂર્વૈર્મહાત્મભિઃ ।
નચાહં પરમસ્નેહાદ્યુષ્માભિઃ સુકૃપાલુભિઃ ।
અરક્ષિતેતિ કથિતઃ પ્રમાદાદપિ સજ્જનાઃ ॥ ૩૧.૪૧॥

ઇષ્ટં ચ યજ્ઞૈઃ પૂર્તૈશ્ચ ચરિતં યુષ્મદાશ્રયાત્ ।
પુત્રસ્તુ મમ પાપાત્મા સર્વક્ષત્રવિનાશકઃ ।
સર્વાતિશઙ્કી મૂઢશ્ચ વૃદ્ધાનાં શાસનાતિગઃ ॥ ૩૧.૪૨॥

ૠ્લ્।સૌભ્રાત્રં યેન સન્ત્યજ્ય પાણ્ડવેષુ મહાત્મસુ ।
કૃતં વિરૂપં સુમહત્કુર્યાદ્યન્નાપરઃ ક્વચિત્ ॥ ૩૧.૪૩॥

અપ્રિયાણિ ચ કૃષ્ણસ્ય સુબહૂન્યાચરત્કુધીઃ ।
પ્રાયસ્તેનાપિ મન્દેન ન યુષ્માસ્વશિવં કૃતમ્ ॥ ૩૧.૪૪॥

ભ્રાતરોઽસ્ય ચ સર્વેઽપિ તચ્છીલમનુવર્તિનઃ ।
હતાશ્ચ સ્વેન પાપેન સસુતામાત્યબાન્ધવાઃ ॥ ૩૧.૪૫॥

સોઽહં વયોગતશ્ચૈવ પુત્રાધિભિરભિપ્લુતઃ ।
તત્સમ્બન્ધકૃતં પાપં સ્વકૃતં ચાત્યપેશલમ્ ।
પાણ્ડવેષુ સકૃષ્ણેષુ તપસા માર્ષ્ટુમુદ્યતઃ ॥ ૩૧.૪૬॥

તત્ર મામનુજાનીધ્વં કૃપયા મિત્રવત્સલાઃ ।
મત્પ્રિયાર્થમપિ સ્નેહઃ પાણ્ડવેષુ મહાત્મસુ ॥ ૩૧.૪૭॥

ક્રિયમાણોઽપિ કર્તવ્યો ભૂય એવ સદાઽચલઃ ।
તે હિ મે પુત્રકાઃ સન્ત ઇહામુત્ર ચ સૌખ્યદાઃ ॥ ૩૧.૪૮॥

ઇત્યુક્તૈઃ સ્વગુણાનુચ્ચૈઃ કીર્તયદ્ભિઃ સુદુઃખિતૈઃ ।
પર્યશ્રુનયનૈઃ કૃચ્છ્રાત્પૌરજાનપદૈશ્ચિરાત્ ।
અનુજ્ઞાતો યયૌ પાર્થૈરનુયાતઃ સુદૂરતઃ ॥ ૩૧.૪૯ ॥

સઞ્જયો વિદુરશ્ચૈનં સભાર્યમનુજગ્મતુઃ ।
અનુવવ્રાજ તં કુન્તી વનાય કૃતનિશ્ચયા ॥ ૩૧.૫૦ ॥

વાર્યમાણાઽપિ તનયૈઃ સભાર્યૈર્ભૃશદુઃખિતૈઃ ।
સં સ્થાપ્ય તાન્ સુકૃચ્છ્રેણ યયૌ સાઽન્વેવ તં નૃપમ્ ॥ ૩૧.૫૧ ॥

સં ન્દર્શિતપથો રાજા કુન્તીવિદુરસઞ્જયૈઃ ।
ગાન્ધારીસહિતઃ પ્રાપ કુરુક્ષેત્રે જગદ્ગુરોઃ ।
ક્રમેણૈવાઽઽશ્રમં વ્યાસદેવસ્ય સુરપૂજિતમ્ ॥ ૩૧.૫૨ ॥

ત્રિવત્સરાદસ્ય નિજસ્ય લોકસ્યાઽપ્તિં સભાર્યસ્ય જગાદ તત્ર ।
ઽલિ। બ્રહ્માઙ્ગજસ્તેન ભૃશં પ્રતીતો વ્યાસોપદિષ્ટં વ્યચરત્તપોઽગ્ર્યમ્ ॥ ૩૧.૫૩ ॥

સક્ષત્તૃગાન્ધારિપૃથે સસઞ્જયે તપોભિરારાધયતિ પ્રભું હરિમ્ ।
વૈચિત્રવીર્યેઽત્ર સદારબન્ધુભૃત્યાસ્તુ પાર્થા દૃશયે સમાયયુઃ ॥ ૩૧.૫૪ ॥

ક્ષત્તૈકતામત્ર યુધિષ્ઠિરેણ પ્રાપ્તોઽથ ભાર્યાસહિતં સસઞ્જયમ્ ।
ઉપાસમાનેષુ વિચિત્રવીર્યપુત્રં પૃથાં ચૈવ પૃથાસુતેષુ ॥ ૩૧.૫૫ ॥

પ્રાદુર્બભૂવામિતશક્તિતેજોજ્ઞાનાદ્ભુતૈશ્વર્યસુખાદિરૂપઃ ।
વ્યાસો હરિસ્તત્ર સમીક્ષ્ય સર્વે સમ્પૂજયામાસુરુદગ્રભક્ત્યા ॥ ૩૧.૫૬ ॥

તૈઃ પૂજિતસ્તત્ર નિષણ્ણ આહ યદ્યદ્યદિષ્ટં પ્રવદન્તુ તત્તત્ ।
દાસ્યામિ તસ્યાદ્ય તદિત્યમુષ્મિન્ ભક્ત્યુચ્છ્રયઃ પાણ્ડુસુતૈઃ સદારૈઃ ।
વૃતોઽત્ર કુન્તી રવિસૂનુજન્મમૃત્યૂત્થદોષાપગમં યયાચે ॥ ૩૧.૫૭ ॥

તેષાં પ્રદત્તેષ્વભિવાઞ્છિતેષુ વૈચિત્રવીર્યઃ સહ ભાર્યયૈવ ।
સમ્મન્ત્ર્ય નિઃ શેષરણેહતાનાં સન્દર્શનં પ્રાર્થિતવાં સ્તમીશમ્ ॥ ૩૧.૫૮ ॥

તતસ્તુ તે સત્યવતીસુતસ્ય સર્વેશ્વરસ્યાઽઽજ્ઞયા સર્વ એવ ।
સમાગતાઃ સ્વર્ગલોકાત્ક્ષણેન દત્તા ચદિવ્યા દૃગમુષ્ય રાજ્ઞઃ ॥ ૩૧.૫૯ ॥

ઊષુશ્ચ રાત્રિં પરમાજ્ઞયૈવ સર્વે સ્વભાર્યાસહિતા યથા પુરા ।
તૃપ્તઃ સદારો નૃપતિશ્ચ તત્ર સર્વેઽપિ દૃષ્ટ્વા મહદદ્ભુતં તત્ ॥ ૩૧.૬૦ ॥

અથાઽઽજ્ઞયૈવાસ્ય પરસ્ય સર્વાઃ સ્ત્રિયો નિજેશૈઃ સહિતા યયુઃ સ્વમ્ ।

વિનોત્તરાં તાં તુ કથાં નિશમ્ય પારીક્ષિતોઽયાચત તાતદૃષ્ટિમ્ ॥ ૩૧.૬૧॥

તં ચાઽનયામાસ તદૈવ કૃષ્ણો હ્યચિન્ત્યશક્તિઃ સ વિકુણ્ઠલોકાત્ ।
દૃષ્ટ્વા સપારીક્ષિત આપ તુષ્ટિં સ્વતાતમીશેન સમાહૃતં પુનઃ ॥ ૩૧.૬૨॥

સમ્પૂજ્ય તં કૃષ્ણમપીશવન્દ્યં ક્ષમાપયામાસ પરીક્ષિદાત્મજઃ ।
ચક્રે ચ વિસ્રમ્ભમતીવ ભારતે પુનશ્ચ તત્રત્યજનૈઃ સમેતઃ ॥ ૩૧.૬૩॥

પાર્થાઃ પુનઃ પ્રાપ્ય પુરં સ્વકીયં ધર્મેણ પૃથ્વીં પરિપાલયન્તઃ ।
ભોગાનરાગા અજુષન્ત યોગ્યાન્ યુક્તા જગદ્ધાતરિ વાસુદેવે ॥ ૩૧.૬૪॥

ન્દ્લી।વર્ષત્રયાન્તે ત્મસમાહિતાગ્નિં ત્યક્તાગ્નિભિસ્તૈર્વનમાલિહદ્ભિઃ ।
તે શુશ્રુવુર્ધૃતરાષ્ટ્રં સભાર્યં સહૈવ કુન્ત્યા પરિદગ્ધદેહમ્ ॥ ૩૧.૬૫॥

વ્રીલ્। આમુખા ધ્યાનપરા નિશમ્ય સ્વર્યાતમાત્મીયપિતૃવ્યમાશુ ।
સમેત્ય ભર્ત્રા પ્રતિપૂજ્યમાનાં કુન્તીં ચ તસ્મા વિદધુઃ ક્રિયાશ્ચ ॥ ૩૧.૬૬॥

તે વિષ્ણુભક્ત્યા પરિપૂતકર્મભિર્જ્ઞાનેન ચાન્તે તમનુસ્મરન્તઃ ।
પાર્થૈઃ સુપુત્રૈઃ સુકૃતોર્ધ્વકર્મભિર્વૃદ્ધિં સુખસ્યાઽપુરનપ્યયાં શુભામ્ ॥ ૩૧.૬૭॥

ગાવદ્ગણિર્વ્યાસસકાશમેત્ય શુશ્રૂષયા તસ્ય પુનર્નિજાં ગતિમ્ ।
પ્રપેદિવાન્ પાણ્ડુસુતાશ્ચ કૃષ્ણં પ્રતીક્ષમાણાઃ પૃથિવીમશાસન્ ॥ ૩૧.૬૮॥

અષ્ટાદશાબ્દાઃ પૃથિવીં સમસ્તાં પ્રશાસતામેવમગુર્મહાત્મનામ્ ।
અરિક્તધર્માર્થસુખોત્તમાનામનુજ્ઝિતાનન્તપદસ્મૃતીનામ્ ॥ ૩૧.૬૯॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
(ધૃતરાષ્ટ્રાદિસ્વર્ગપ્રાપ્તિર્નામ)એકત્રિંશોઽધ્યાયઃ ॥

## અથ દ્વાત્રિંશોઽધ્યાયઃ ।

(પાણ્ડવસ્વર્ગારોહણમ્)
ૐ । તતઃ કુરુક્ષેત્રમવાપ્ય કૃષ્ણો દીક્ષાં પ્રપેદે દ્વિષડબ્દસત્રે ।
સ એવ ચ વ્યાસભૃગૂદ્વહાત્મા ચક્રેઽત્ર સાદસ્યમજોઽપ્રમેયઃ ॥ ૩૨.૧॥

તત્રર્ત્વિજો દક્ષભૃગુપ્રધાનાઃ પાર્થા યદૂનાં પ્રવરૈઃ સમેતાઃ ।
બ્રહ્મેશશક્રપ્રમુખાઃ સુરાશ્ચ ચક્રુઃ સુસાચિવ્યમનન્તદાસાઃ ॥ ૩૨.૨॥

સર્વે ચ જીવા વસુધાતલ્। અસ્થા યેઽન્યેઽન્તરિક્ષદ્યુમુખોત્તરેષુ ।
વસન્તિ નારાયણપાદસં શ્રયાસ્તે ચાત્ર સર્વે મુમુદુઃ સનાગાઃ ॥ ૩૨.૩॥

સુનિર્ણયસ્તત્ત્વવિનિર્ણયાર્થિનાં તત્ત્વસ્ય ચાભૂદિહ વાદશીલિનામ્ ।
મિથો વિવાદાત્સુરભૂસુરાણાં વાક્યાદ્ધરેર્વ્યાસભૃગૂદ્વહાત્મનઃ ॥ ૩૨.૪॥

ધર્માર્થકામાનખિલાનવાપુસ્તદર્થિનો મુક્તિમપીહ કૃષ્ણાત્ ।
યથેષ્ટપાનાશનવાસસો જના વિચેરુરત્રામરમાનવાદયઃ ॥ ૩૨.૫॥

ક્ષેત્રં તદાસીદ્ધરિલોકસમ્મિતં યદીયુરત્રાખિલસજ્જના યુતિમ્ ।
નાનાપ્તકામાશ્ચ તતો બભૂવુર્નિર્યત્નદૃશ્યશ્ચ યતોઽત્ર કેશવઃ ॥ ૩૨.૬॥

દ્વાદશાબ્દં મહાસત્રમેવમેતાદૃશં હરિઃ ।
સમાપ્યાવભૃથસ્નાતઃ પૂજયિત્વાઽખિલાન્ જનાન્ ॥ ૩૨.૭॥

અનુજજ્ઞે ક્રમેણૈવ વત્સરેણ સમાગતાન્ ।
સ્વકુલં સઞ્જિહીર્ષુઃ સ વિપ્રશાપમજીજનત્ ॥ ૩૨.૮॥

ઉપદિશ્ય પરં જ્ઞાનમુદ્ધવાયામુમાશ્રમમ્ ।
બદર્યાખ્યં પ્રાપયિત્વા સપ્તમાબ્દં શતોત્તરમ્ ।
પ્રતીક્ષન્ પાલયામાસ પાર્થૈઃ સહ ભુવં પ્રભુઃ ॥ ૩૨.૯॥

સમારબ્ધં કલિયુગં યદા દુર્યોધનોઽપતત્ ।
ષટ્ત્રિં શાબ્દં પુનઃ કૃષ્ણઃ કૃતમેવાન્વવર્તયત્ ॥ ૩૨.૧૦॥

કૃતાદપિ વિશેષોઽયં યત્પુણ્યસ્યાધિકં ફલમ્ ।
ઋદ્લિવ્ડલ્પમેવ ચ પાપસ્ય કાલાત્કૃષ્ણાજ્ઞયા તથા ॥ ૩૨.૧૧॥

એવં સુધાર્મિકે લોકે હરિભક્તિપરાયણે ।
નષ્ટેષુ કલિલિ ઙ્ગેષુ યુગવૃત્તિમભીપ્સવઃ ॥ ૩૨.૧૨॥

બ્રહ્મરુદ્રાદયો દેવાઃ સ્તુત્વા કેશવમવ્યયમ્ ।
વ્યજ્ઞાપયન્ સ્વલોકાપ્તિં ઓમિત્યાહ સ ચાચ્યુતઃ ॥ ૩૨.૧૩॥

પ્રાચુર્યે સજ્જનસ્ય સ્યાન્ન કલેર્વૃદ્ધિરઞ્જસા ।
ઇતિ સ્વકુલસં હૃત્યૈ પ્રભાસમનયત્પ્રભુઃ ॥ ૩૨.૧૪॥

પુણ્યક્ષેત્રેઽપિ ન મૃતિઃ સ્વગૃહે ત્વતિધર્મદા ।
ગત્યૈવાલ્પમપિ ક્ષેત્રં સ્યાન્મહત્ફલમિત્યજઃ ॥ ૩૨.૧૫॥

પ્રકાશયિતુમેવૈનાન્ પ્રભાસાય કુશસ્થલાત્ ।
નીત્વા દાનાદિસદ્ધર્માં સ્તૈરકારયદચ્યુતઃ ॥ ૩૨.૧૬॥

તે તતઃ શાપદોષેણ કૃષ્ણેનૈવ વિમોહિતાઃ ।
મૈરેયમત્તા અન્યોન્યં નિપાત્ય સ્વાં તનું ગતાઃ ।
તદ્દૃષ્ટ્વા બલદેવોઽપિ યોગેન સ્વતનું યયૌ ॥ ૩૨.૧૭॥

તતઃ પરેશોઽગણિતાનુભાવઃ સ્વસારથિં પાણ્ડવાનાં સકાશમ્ ।
સ્વલોકયાનપ્રતિવેદનાય સ્વસ્યાનુ ચૈષાં ત્વરયાઽભ્યયાતયત્ ॥ ૩૨.૧૮॥

અથાઽસતઃ પિપ્પલમૂલ ઈશિતુરૂરુસ્થિતં પાદતલ્। અં સુતામ્રમ્ ।
દૃષ્ટ્વા જરા નામ સસર્જ શલ્યં ભક્તોઽપ્યલં રોહિતં શઙ્કમાનઃ ॥ ૩૨.૧૯॥

અચ્છેદ્યાભેદ્યદેહસ્ય શલ્યે પાદમુપસ્થિતે ।
સમીપમાગતો વ્યાધો દૃષ્ટ્વા ભીતોઽપતદ્ભુવિ ॥ ૩૨.૨૦॥

વિપ્રવાક્યં માનયાનઃ કારયિત્વાઽમુના હરિઃ ।
પાપં માં જહિ દેવેતિ યાચન્તમનયદ્દિવમ્ ॥ ૩૨.૨૧॥

પાદપ્રહારદોષેણ તં ભૃગું વ્યાધતાં ગતમ્ ।
પશ્ચાત્તાપેન ભક્ત્યા ચ સુપ્રીતસ્તચ્છરીરિણમ્ ।
ચ્ત્લ્વ્।સ્વાજ્ઞાપ્રાપ્તવિમાનેન દિવં નિન્યે જનાર્દનઃ ॥ ૩૨.૨૨॥

નીચા યોનિર્નીચનીચ કર્માઽપ્તં નીચકર્મતઃ ।
અદુષ્ટત્વાત્તુ મનસો ભક્તિલોપો નચાપ્યભૂત્ ।
ભૃગોરત્રાબુદ્ધિપૂર્વં નાતિદોષકૃદપ્યભૂત્ ॥ ૩૨.૨૩॥

તતો વિરિ ઞ્ચેશપુરન્દરાદ્યાઃ પુનઃ સ્તુવન્તોઽભિયયુઃ પ્રણમ્ય ।
કૃષ્ણં સ ચાઽશ્વેવ યયૌ સ્વલોકં સ્વતેજસા સર્વમિદં પ્રકાશયન્ ॥ ૩૨.૨૪॥

ગોપાલમન્ત્રં ભજતાં ફલપ્રદ એકેન રૂપેણ સ ભુવ્યદૃશ્યઃ ।
તસ્થૌ દ્વિતીયેન ચ સૂર્યમણ્ડલે તૃતીયમાસીચ્છિવપૂજિતં વપુઃ ॥ ૩૨.૨૫॥

સમ્પૂજિતં બ્રહ્મલોકે ચતુર્થં કઞ્જોદ્ભવેનાથ પરં સ્વધામ ।
સમાપ્નુવાનં વપુરસ્ય પઞ્ચમં ભક્ત્યાઽન્વયુર્દેવવરાઃ સ્વશક્ત્યા ॥ ૩૨.૨૬॥

તત્તેજસા તે પ્રતિમુષ્ટદૃષ્ટયઃ પુરુષ્ટુતાદ્યા અમિતોરુદીધિતેઃ ।
યાવત્સ્વગમ્યં ત્વનુગમ્ય તસ્થુર્નિમીલિતાક્ષા વિહતોર્ધ્વચારાઃ ॥ ૩૨.૨૭॥

વીન્દ્રેશશેષાનુગતઃ સ્વયમ્ભૂર્ધામ પ્રવિષ્ટં તમજં પ્રણમ્ય ।
વીન્દ્રાદિકૈરપ્યયુતઃ સ્વપિત્રાઽશ્લિષ્ટો રહશ્ચાકથયત્તથાઽસ્તૌત્ ॥ ૩૨.૨૮॥

સ પૂર્વરૂપેણ સમાપ્ય ચૈક્યં વિભજ્ય ચેચ્છાનુસૃતોઽથ રેમે ।

હરિઃ શ્રિયા બ્રહ્મમુખૈશ્ચ મુક્તૈઃ સમ્પૂજ્યમાનોઽમિતસદ્ગુણાત્મા ॥ ૩૨.૨૯॥

બ્રહ્માઽપિ શર્વાદિયુતઃ સ્વલોકં પ્રાપ્તઃ પુનસ્તત્ર ગતં ચ કૃષ્ણમ્ ।
રેમેઽભિપશ્યન્ પ્રતિપૂજયં સ્તં સુરાશ્ચ સર્વે રવિબિમ્બસં સ્થમ્ ॥ ૩૨.૩૦॥

યતો ન દર્શિતા ભ્રાન્તિઃ પ્રાદુર્ભાવેષ્વપિ ક્વચિત્ ।
દેહત્યાગાનુકારેણ હરિણા તદિહાચ્યુતઃ ॥ ૩૨.૩૧॥

મોહયિત્વાઽસુરાનન્ધં તમઃ પ્રાપયિતું પ્રભુઃ ।
ચિદાનન્દૈકદેહોઽપિ ત્યક્ત્તં દેહમિવાપરમ્ ।
સૃષ્ટ્વા સ્વદેહોપમિતં શયાનં ભુવ્યગાદ્દિવમ્ ॥ ૩૨.૩૨॥

દારુકોક્ત્યા સમાયાતઃ પાર્થસ્તમદહત્તદા ।
ચ્દ્લ્વિ। રૌહિણેયાદિકાનાં ચ શરીરાણિ પ્રધાનતઃ ।
દારુકો વિષ્ણુલોકં તુ પુનરાપ યથાગતમ્ ॥ ૩૨.૩૩॥

તથૈવ જનમોહાય પ્રાપ્ય વહ્નાવદૃશ્યતામ્ ।
રુગ્મિણ્યગાદ્ધરેઃ પાર્શ્વં સત્યા કૃત્વા તપસ્તથા ॥ ૩૨.૩૪॥

ચિદાનન્દૈકદેહે હિ દ્વિરૂપે ઇવ તે યતઃ ।
એકૈવાતઃ કૃષ્ણવત્તે દુષ્ટાન્મોહયતસ્તથા ॥ ૩૨.૩૫॥

અન્યા મહામહિષ્યસ્તુ ત્યક્ત્વા દેહં હુતાશને ।
કાશ્ચિત્કાશ્ચિત્તુ તપસા ત્યક્તદેહા હરિં યયુઃ ॥ ૩૨.૩૬॥

રૌહિણેયાદિકાનાં ચ ભાર્યા વહ્નિમુખે તનુમ્ ।
ત્યક્ત્વા સ્વભર્તૃનેવાઽપુઃ સર્વા એવ પતિવ્રતાઃ ॥ ૩૨.૩૭॥

વસુદેવઃ પાર્થમુખાચ્છ્રુત્વૈતદ્યોગમાસ્થિતઃ ।
ત્યક્ત્વા દેહં કશ્યપત્વં પ્રાપ કૃષ્ણાનુરાગતઃ ॥ ૩૨.૩૮॥

તસ્યાર્જુનોઽશ્વમેધાગ્નાવન્ત્યકર્માકરોત્તદા ।
ત્યક્તદેહાસ્તસ્ય ભાર્યા વહ્નૌ પ્રાપુસ્તમેવ ચ ॥ ૩૨.૩૯॥

સ્ત્રિયો બાલાં સ્તથાઽદાય ધનં ચૈવ ધનઞ્જયઃ ।
વિનિર્યયૌ દ્વારવત્યાસ્તાં જગ્રાસ ચ સાગરઃ ॥ ૩૨.૪૦॥

સ્ત્રીબાલસહિતે પાર્થ એકસ્મિન્ પથિ ગચ્છતિ ।
શાપાત્સુપાપાઽઽભીરાઃ સ્ત્રીજનાન્ જહ્રુરુદ્ધતાઃ ॥ ૩૨.૪૧॥

યાસ્તાઃ ષોડશસાહસ્રવનિતાઃ શતસં યુતાઃ ।

કૃષ્ણશાપાન્મ્લેચ્છવશં યયુર્દર્પનિમિત્તતઃ ॥ ૩૨.૪૨॥

હ્રિયમાણે ધને ચૈવ વનિતાસુ ચ વાસવિઃ ।
યુયુત્સુર્ગાણ્ડિવં સજ્યં કૃચ્છ્રેણૈવ ચકાર હ ॥ ૩૨.૪૩॥

ક્ષીણાસ્તસ્ય શરા દૈવાન્નાસ્ત્રાણિ સ્મૃતિમાયયુઃ ।
સ તદ્દૈવકૃતં જ્ઞાત્વા સં સ્મરન્ પુરુષોત્તમમ્ ।
ઘ્નન્બહૂઞ્છત્રૂન્ ગાણ્ડિવેન શેષં રક્ષન્ કુરૂનગાત્ ॥ ૩૨.૪૪॥

તદા કુરુક્ષેત્રગતં જગદ્ગુરું સુપૂર્ણવિજ્ઞાનબલર્દ્ધિસત્સુખમ્ ।
તમેવ વાસિષ્ઠકુલોદ્વહં હરિં નિરીક્ષ્ય દુઃખેન પપાત પાદયોઃ ॥ ૩૨.૪૫॥

સ તેન પું સાં પ્રવરેણ હેતુભિઃ સમ્બોધિતોઽજ્ઞાનતમોંશુમાલિના ।
સં સ્થાપ્ય ચેતઃ પુનરેવ તસ્મિન્ જહૌ શુચઃ પ્રાયશ એવ ધૈર્યાત્ ॥ ૩૨.૪૬॥

સ્ત્રિયો મ્લેચ્છહૃતાઃ કૃષ્ણપ્રેષિતાદ્દાલ્ભ્યતઃ પુનઃ ।
ગોવિન્દૈકાદશીં શ્રુત્વા કૃત્વા સારસ્વતે જલે ।
નિમજ્જ્ય વાયોર્વચનાત્ત્યક્તદેહા દિવં યયુઃ ॥ ૩૨.૪૭॥

અર્જુનસ્તુ કુરુક્ષેત્રે હાર્દિક્યયુયુધાનયોઃ ।
સુતૌ સારસ્વતે ચૈવ દેશે રાજ્યેઽભ્યષેચયત્ ॥ ૩૨.૪૮॥

અનિરુદ્ધસુતં વજ્રં પ્રિયં કૃષ્ણસ્ય સદ્ગુણમ્ ।
સશૂરસેનેન્દ્રપ્રસ્થરાજાનમકરોદ્વશી ॥ ૩૨.૪૯॥

સ્ત્રીબાલાંશ્ચ ધનં ચૈવ તસ્મિન્ સં સ્થાપ્ય ફલ્ગુનઃ ।
યયૌ ભ્રાતૄનશેષં ચ વૃત્તં તેષામવર્ણયત્ ॥ ૩૨.૫૦॥

તે ચાવિયોગસમયં સ્મરન્તો મુરવૈરિણા ।
અભ્યષિઞ્ચન્ ભાગવતં માહારાજ્યે પરીક્ષિતમ્ ॥ ૩૨.૫૧॥

સ્ત્રીહારિણાં ચ મ્લેચ્છાનાં વધાયૈનમયોજયન્ ।
કૃતં ચ તેન તત્કર્મ વોઢ્વા પૈતામહં ધુરમ્ ।
સમયં પરિરક્ષદ્ભિર્ન પાર્થૈરેવ યત્કૃતમ્ ॥ ૩૨.૫૨॥

વાસુદેવપદા સ્પૃષ્ટભૂકણ્ટકસમુદ્ધૃતિઃ ।
સમયઃ પાણ્ડવાનાં હિ તસ્યૈવાનુગતિઃ પરમ્ ॥ ૩૨.૫૩॥

અનુવ્રજદ્ભિર્વિશ્વેશં નાસ્માભિર્ભૂસ્તદુજ્ઝિતા ।
ભોજ્યા રક્ષ્યાઽપિ વા તેષામિત્યેવ સમયઃ પુરા ॥ ૩૨.૫૪॥

તત્ર કાલ્। ઈ ભીમભાર્યા વૈષ્ણવં યોગમાસ્થિતા ।
ઋ્લ્વીઇ। કૃષ્ણયૈકત્વમાપન્ના ત્યક્ત્વા દેહં તુ માનુષમ્ ॥ ૩૨.૫૫॥

સુભદ્રાદ્યાસ્તુ યા ભાર્યાઃ પાર્થાનાં તુ તદાજ્ઞયા ।
યુયુત્સુશ્ચાત્ર શિક્ષાર્થં પૌત્રસ્યૈવાવસન્ પુરે ॥ ૩૨.૫૬॥

સન્ત્યજ્ય રાજ્યચિહ્નાનિ વૈષ્ણવં યોગમાસ્થિતાઃ ।
વીરાધ્વાનં યયુઃ સર્વે કૃષ્ણયા સહ પાણ્ડવાઃ ॥ ૩૨.૫૭॥

પ્રાગુદીચીં દિશં પૂર્વં યયુસ્તત્રાર્જુનો ધનુઃ ।
નાત્યજલ્લોભતસ્તં તુ સમુદ્રમુપ પાવકઃ ।
દૃષ્ટ્વા યયાચે રાજાનં તદુક્તઃ પ્રાસ્યદમ્બુધૌ ॥ ૩૨.૫૮॥

પ્રાતિભાવ્યં તુ વરુણે નિસ્તીર્યાગ્નિરદૃશ્યતામ્ ।
યયૌ તેઽપિ યયુઃ ક્ષિપ્રં પ્લવન્તઃ સપ્તવારિધીન્ ॥ ૩૨.૫૯॥

અહોભિઃ સપ્તભિર્યોગં સમારૂઢાઃ પ્રદક્ષિણમ્ ।
કૃત્વા ક્વચિદસજ્જન્ત આસેદુર્ગન્ધમાદનમ્ ।
અત્ર નારાયણક્ષેત્રે તેષાં તન્વોઽપતન્ ક્રમાત્ ॥ ૩૨.૬૦॥

દ્રૌપદીસહદેવાદિપઞ્ચાનાં તત્ર મારુતિઃ ।
સદેહનાકાનિચ્છુત્વાદ્દેહપ્રપતનં હિ તત્ ॥ ૩૨.૬૧॥

તેષામિહેતિ યાથાર્થ્યં જાનન્ પપ્રચ્છ ધર્મજમ્ ।
કેનકેનાપતદ્દેહો દોષેણ ન ઇતિ ક્રમાત્ ॥ ૩૨.૬૨॥

મૃતિકાલે હિ યો યસ્ય દોષં વક્ત્યૃણમોચનમ્ ।
તસ્માત્સ્યાદુક્તદોષસ્યેત્યાહ યચ્છ્રુતિરેવ તત્ ।
ઋણમોક્ષાય સર્વેષાં ભીમો દોષાનવાદયત્ ॥ ૩૨.૬૩॥

સોઽપીચ્છાપતિતાન્ દેહાનજાનઞ્છુદ્ધકર્મણામ્ ।
અપશ્યન્ કારણં પ્રાહ દોષાન્ સ્યાદેવમિત્યપિ ।
રાજા સમ્ભાવનામાત્રં નહિ કાર્યમકારણમ્ ॥ ૩૨.૬૪॥

“સ્વચ્છન્દમૃત્યવો યોગાદ્દેહાનુત્સૃજ્ય પાણ્ડવાઃ ।
કૃષ્ણા ચાઽપુઃ પરં સ્થાનં યત્ર યાન્ત્યપિ દેવતાઃ” ।
ઋ્લિક્ષ્। ઇતિ શ્રુતેર્ન તે પાપાદ્દેહાં સ્તત્યજુરૂર્જિતાઃ ॥ ૩૨.૬૫॥

“ઋણાન્યુન્મુચ્ય દોષોક્ત્યા સ્વાનાં ભીમઃ સ્વકાં તનુમ્ ।

તત્યાજ પરમં ધ્યાયન્નાપ ચ સ્થાનમુત્તમમ્” ।
ઇતિ સ્કાન્દપુરાણોક્તં વ્યાસવાક્યમૃષીન્ પ્રતિ ॥ ૩૨.૬૬॥

ભીમાદૃતે હિ ચતુર્ષુ પક્ષપાતસ્તુ વાસવૌ ।
યોગ્ય એવેતિ કૃષ્ણાયા ન દોષઃ સ્યાત્કથઞ્ચન ॥ ૩૨.૬૭॥

નીતિરૂપે વીર્યબલે મહાન્ત્યેષાં યતઃ ક્રમાત્ ।
પ્રાણત્વાદ્ભોગશક્તિશ્ચ નહિ દોષાય મારુતેઃ ॥ ૩૨.૬૮॥

“યથાસ્વરૂપવિજ્ઞાનમાત્મન્યપિ ન દોષકૃત્” ।
ઇતિ વ્યાસસ્મૃતેરેષામુક્તદોષોદ્ભવઃ કથમ્ ॥ ૩૨.૬૯॥

કદાચિદતિમાનોઽપિ ત્રયાણામેષુ જાયતે ।
તથાઽપિ તત્ફલં નૈતત્તારતમ્યં હિ મુક્તિગમ્ ।
ગુણદોષાધિકાલ્પત્વાદત્રસ્થમપિ હિ શ્રુતમ્ ॥ ૩૨.૭૦॥

આરબ્ધકર્મનાશે હિ પતેદ્દેહોઽપ્યપાપિનઃ ।
યુધિષ્ઠિરોઽપિ હિ સ્વર્ગં બુભુજે નૈવ તત્તનુઃ ॥ ૩૨.૭૧॥

અતિમાનાદયો દોષાઃ કુત એવ હિ મારુતેઃ ।
અનાદિકાલતઃ સર્વદોષહીના ગુણાધિકાઃ ॥ ૩૨.૭૨॥

સર્વજીવગણેભ્યો યે તે હિ વાયુત્વમાપ્નુયુઃ ।
ઋજવો નામ યે દેવા દેવાનામપિ દેવતાઃ ॥ ૩૨.૭૩॥

અભાવં હ્યતિમાનાદેર્ભીમસ્યાઽહ ચ કેશવઃ ।
“યત્કિઞ્ચાઽત્મનિ કલ્યાણં સમ્ભાવયસિ પાણ્ડવ ।
સહસ્રગુણમપ્યેતત્ત્વયિ સમ્ભાવયામ્યહમ્” ॥ ૩૨.૭૪॥

ઇતિ તસ્માદ્યથા યુદ્ધે ધર્મહાનિમમન્યત ।
એવમત્રાપ્યધર્મેણ દેહપાતં નૃપોઽબ્રવીત્ ॥ ૩૨.૭૫॥

ઞ્લ્ક્ષ્।પૂજ્યેભ્યઃ પૂર્વમેવૈષાં દેહપાતમભીપ્સતામ્ ।
તત્કામાદ્દેહપાતોઽભૂન્ન પાપાન્મુચ્યતાં યથા ॥ ૩૨.૭૬॥

નહિ પાપફલાન્મુક્તૌ દેહપાતઃ કથઞ્ચન ।
કિન્તુ કર્મક્ષયાદેવ તથા સર્વત્ર નિશ્ચિતઃ ॥ ૩૨.૭૭॥

તેષુ સ્વલોકાન્ પ્રાપ્તેષુ ધર્મજશ્ચાઽત્મના સહ ।
યયૌ પુરો દેવરથસ્તદાઽસ્યાવતતાર હ ॥ ૩૨.૭૮॥

રથમારુહેતિ કથિતો રથિના પુરતઃ શુનઃ ।
આરોહમબ્રવીન્નૈતદ્યુક્તમિત્યાહ સોઽપિ તુ ॥ ૩૨.૭૯॥

નાઽરુહેયં વિના શ્વાનમિતિ તેન સ્થિરોદિતે ।
સ્વરૂપં દર્શયામાસ ધર્મો હ્યાપ્તઃ શ્વરૂપતામ્ ॥ ૩૨.૮૦॥

આનૃશંસ્યપરત્વેન કીર્તિમેવાઽત્મનો વૃષઃ ।
ખ્યાપયામાસ કૌન્તેયરૂપિણો ધર્મસૂક્તિભિઃ ॥ ૩૨.૮૧॥

તતઃ સ રથમારુહ્ય લોકાનામુત્તરોત્તરમ્ ।
અતિક્રમ્યાખિલાન્ રાજ્ઞો જગામ શ્રીપતિપ્રિયઃ ॥ ૩૨.૮૨॥

સર્વેષામુત્તરં લોકમૈન્દ્રં પ્રાપ્યેદમેવ તે ।
સ્થાનમિત્યુદિતો દેવૈર્દુર્યોધનમવૈક્ષત ।
સભ્રાતૃકં જ્વલન્તં ચ સર્વેષામુપરિ સ્થિતમ્ ॥ ૩૨.૮૩॥

તં દૃષ્ટ્વા પરમક્રુદ્ધો નિમીલ્ય નયને શુભે ।
ભ્રાતરો મે ક્વ કૃષ્ણા ચ સકર્ણાઃ ક્વ ચ બાન્ધવાઃ ।
ધૃષ્ટદ્યુમ્નાદયઃ પુત્રા હૈડિમ્બાદ્યાશ્ચ સર્વશઃ ॥ ૩૨.૮૪॥

યાદવશ્ચેતિ પપ્રચ્છ દેવાં સ્તે ચ તમબ્રુવન્ ।
કિં તે તૈઃ સ્વકૃતં કર્મ ભુજ્યતેઽત્ર નચાપરૈઃ ॥ ૩૨.૮૫॥

ઇત્યુક્ત આહ પાપોઽયં પૃથિવીક્ષયકારકઃ ।
સર્વાતિશઙ્કી મિત્રધ્રુઙ્નારાયણપરાઙ્મુખઃ ॥ ૩૨.૮૬॥

ઋદ્લ્ક્ષિઆસ્તિકોઽતિશઠઃ ક્રૂરો દ્વેષ્ટા વિષ્ણોશ્ચ તદ્ભુવામ્ ।
કથં દુર્યોધનઃ સ્થાનં સર્વોત્તમમવાપ્તવાન્ ॥ ૩૨.૮૭॥

કથં ચ સર્વધર્મજ્ઞા નારાયણપરાયણાઃ ।
સં સ્થિતાઃ પરમે ધર્મે દૃશ્યન્તેઽત્ર ન મત્પ્રિયાઃ ॥ ૩૨.૮૮॥

યત્ર સન્તસ્તુ તે સન્તિ તત્ર સ્થાતવ્યમેવ મે ।
નિરયેઽપિ નચાત્રાપિ નાનેન સહ પાપિના ।
અસ્ય વીરતમસ્યેદં ધાર્તરાષ્ટ્રસ્ય યુજ્યતે ॥ ૩૨.૮૯॥

ઇત્યુક્તા દેવતા દૂતં સ્વાનાં સન્દર્શનાર્થિનઃ ।
રાજ્ઞઃ સમ્પ્રેષયામાસુસ્તત્સન્દર્શિતવર્ત્મના ॥ ૩૨.૯૦॥

દુર્ગન્ધેન સુકૃચ્છ્રેણ તમસા પ્રાવૃતેન ચ ।

ગત્વૈવ કિયતીં ભૂમિં તદ્દુર્ગન્ધાસહો નૃપઃ ।
ઇચ્છન્નિવર્તનં તત્ર સ્વાનાં વાચ ઇવાશ‍ૃણોત્ ॥ ૩૨.૯૧॥

ક્ષણં તિષ્ઠ મહારાજ સન્નિધાનબલાત્તવ ।
વેદના નો ન મહતીત્યેચ્છ્રુત્વા યુધિષ્ઠિરઃ ॥ ૩૨.૯૨॥

કે યૂયમિતિ પપ્રચ્છ દીનધ્વનિવિશઙ્કિતઃ ।
ભીમોઽહમર્જુનઃ કર્ણ ઇત્યાદ્યુક્તમિવાશ‍ૃણોત્ ॥ ૩૨.૯૩॥

શ્રુત્વા તત્કૃપયાઽવિષ્ટઃ શોકામર્ષસમન્વિતઃ ।
આહ દૂતં યથેષ્ટં ત્વં ગચ્છ નાહમિતો વ્રજે ॥ ૩૨.૯૪॥

નચ સ્વર્ગેણ મે કાર્યં ત્યક્ત્વા સ્વજનમીદૃશમ્ ।
ઇત્યુક્તઃ પ્રયયૌ દૂતસ્તસ્થાવેવ યુધિષ્ઠિરઃ ॥ ૩૨.૯૫॥

તતોઽત્ર દેવાઃ પુરુહૂતપૂર્વકાઃ સમાયયુઃ સ્નેહવશાદ્યુધિષ્ઠિરે ।
તેષ્વાગતેષ્વેવ ન તત્ર વાચો દીના ન દુર્ગન્ધતમોઽપ્યપશ્યત્ ।
સ્વર્ગોત્તમં દેશમપશ્યદેતમભ્રાન્તચેતાઃ સ યુધિષ્ઠિરસ્તદા ॥ ૩૨.૯૬॥

આહાત્ર ધર્મઃ પુનરાત્મસદ્યશઃ પ્રકાશયન્ પાણ્ડુસુતાભિધં સ્વમ્ ।
ધર્માદ્વિશિષ્ટા હિ સદાઽનૃશં સતા દૃષ્ટા ચસા ત્વય્યધિકા ત્રિશો મયા ॥ ૩૨.૯૭॥

ચ્દ્લક્ષ્ી। શક્રોઽપ્યુવાચૈનમિદં મૃષા તે પ્રદર્શિતં દ્રોણકૃતે મૃષાગિરઃ ।
કૃચ્છ્રાદિદં તે કથિતં નચાતિવિસ્રમ્ભ આસીત્તવ કૃષ્ણવાક્યે ॥ ૩૨.૯૮॥

નહ્યાજ્ઞયા વાસુદેવસ્ય કિઞ્ચિત્પાપં ભવેત્સર્વવિધર્મિણોઽપિ ।
બ્રહ્માપરાક્ષ્યેઽપિ વિકર્મ સૂચકં પ્રારબ્ધપાપસ્ય વિષાશનં યથા ॥ ૩૨.૯૯॥

પશ્યાત્ર ભીમપ્રમુખાન્ સુખસ્થાન્ સમ્પૂજ્યમાનાં સ્ત્રિદશૈઃ સુરૂપાન્ ।
કુતઃ પરબ્રહ્મદૃશાં સુશુદ્ધસત્કર્મણાં કૃષ્ણપરાયણાનામ્ ।
પરેણ યોગેન વિસૃષ્ટતન્વાં દુઃખં ભવેદ્દેવવરાધિપાનામ્ ॥ ૩૨.૧૦૦॥

એતે હિ દેવપ્રવરાઃ પૃથિવ્યાં જાતા ભુવો ભારજિહીર્ષુમીશમ્ ।
પ્રતોષ્ય તદ્ભાવિતબુદ્ધિકર્મભિઃ પુનશ્ચ તેનૈવ સહાઽપિરે દિવમ્ ॥ ૩૨.૧૦૧॥

ન તે નૃપાદ્યાપિ હિ માનુષો ગતો ભાવસ્તતો દ્વેષ્ટિ સુયોધનાદીન્ ।
નિમજ્જ્ય તદ્વિષ્ણુપદોદકેઽત્ર વિસૃજ્ય દેહં ભજ દેવભાવમ્ ॥ ૩૨.૧૦૨॥

સુયોધનાદ્યા યદિમે સુપાપાઽઽરબ્ધકર્મક્ષયમાપ્ય નિત્યે ।
નિઃ શેષસૌખ્યોજ્ઝિતનિત્યદુઃખેઽવશાઃ પતિષ્યન્ત્યપુનર્નિવૃત્તાઃ ॥ ૩૨.૧૦૩॥

દેવાં શજા યે તુ સમસ્તશસ્તે સ્વમૂલરૂપં સમવાપ્ય કાલે ।
સ્વતારતમ્યાનુસૃતાં વિમુક્તિં પ્રાપ્સ્યન્તિ નાત્રાપિ વિચાર્યમસ્તિ ॥ ૩૨.૧૦૪॥

ઇત્યુક્ત આશ્વેવ નિમજ્જ્ય ગઙ્ગાં ધર્માત્મજસ્તં પ્રવિસૃજ્ય દેહમ્ ।
સદ્યો બભૌ દૈવમવાપ્ય કાયં વિસૃષ્ટરોષાદિસમસ્તદોષઃ ॥ ૩૨.૧૦૫॥

સ તુ પ્રપશ્યન્ સ્વજનં સમસ્તં સ્વમૂલરૂપાતિસમીપસંસ્થમ્ ।
દદર્શ ભીમં ચ મરુત્સમીપે મધ્યે જ્વલન્તં મરુતાં ગણસ્ય ॥ ૩૨.૧૦૬॥

દદર્શ કૃષ્ણામપિ તત્સમીપે શ્રિયા જ્વલન્તીં સમતીત્ય ચાન્યાઃ ।
સ્પ્રષ્ટું ચ સંસ્કારવશાદિયેષ નિષિધ્ય તં પ્રાહ સુરાધિરાજઃ ॥ ૩૨.૧૦૭॥

એષા હિ સાક્ષાજ્જગતાં પ્રિયસ્ય પ્રાણાત્મનો જીવવરેશ્વરસ્ય ।
પ્રાણપ્રિયા શ્રીરિતિ નામ યસ્યાઃ શમાત્મકેઽસ્મિન્ રમતે યદેષા ॥ ૩૨.૧૦૮॥

ચ્દ્લ્ક્ષીઇ।યુષ્મચ્ચતુર્દેહગતસ્ય વાયોર્વાયુપ્રિયા ભીમતનોસ્તથૈવ ।
ભોગાય સૃષ્ટા પુરુષોત્તમેન યુષ્મત્પ્રિયાર્થં ભવતાં ચ દારૈઃ ॥ ૩૨.૧૦૯॥

પ્રીતિસ્તતો હ્યભ્યધિકા બભૂવ ભીમસ્ય ચાસ્યાસ્તદનુ સ્મ પાર્થે ।
તતો ભવત્સ્વેવ યથાક્રમેણ ગુણાનુસારેણ સમીરણસ્ય ॥ ૩૨.૧૧૦॥

ઇદા હિસા શુદ્ધતનુઃ પ્રજાતા શચ્યાદિયોગાપગતાગ્ર્યદેહા ।
યૂયં ચ સર્વે મરુતો વિશેષસંયોગહીનાઃ સ્વશરીરસંસ્થાઃ ॥ ૩૨.૧૧૧॥

સ્પર્શોઽપિ નાસ્યાઃ પવમાનપત્ન્યાઃ સુપૂતતાઽલં ભવતામિદાનીમ્ ।
નચોત્તરત્રાપિ ભવેત્કથઞ્ચિદ્દિવૌકસાં માનુષદેહિનો યથા ॥ ૩૨.૧૧૨॥

ઇતીરિતં તં પ્રતિસન્નિવૃત્તં વિનાશયન્માનુષવાસનાં સ્વયમ્ ।
સમાશ્લિષચ્છુદ્ધતનુઃ સ્તનોત્થો ધર્મો હરેઃ સોઽભવદાશુ તત્સમઃ ॥ ૩૨.૧૧૩॥

તતસ્તુ પાર્થા અખિલાઃ સ્વમૂલરૂપૈઃ સહૈવાઽવિવિશુર્મુદાઽન્વિતાઃ ।
સ્વીયાનિ ધામાનિ તતોઽપ્યનૂનભોગાઃ સદા સન્ત્યવસંશ્ચ તત્ર ॥ ૩૨.૧૧૪॥

તત્રાપિ કૃષ્ણેન સમાગમોઽભૂત્પુરેવ તેષામતિતત્પરાણામ્ ।
ચિક્રીડ એભિઃ સહિતસ્તથૈવ કૃષ્ણોઽપિ તદ્વત્સરથોઽર્જુનેન ॥ ૩૨.૧૧૫॥

અન્યે ચ દેવાં શભવાઃ સમસ્તાઃ સ્વમૂલરૂપૈક્યમવાપુરાશુ ।
કર્મક્ષયાદેવ સુરેતરાસ્તુ પુણ્યક્ષયં પ્રાપ્ય ભુવિ પ્રજાતાઃ ॥ ૩૨.૧૧૬॥

ચતુઃ સહસ્રં ત્રિશતોત્તરં તે સં વત્સરાણામનુભૂય દિવ્યાન્ ।
ભોગાન્નરત્વેઽપિ સદેશ્વરોઽહમસજ્જગચ્ચેતિ ધિયાઽપ્રુવં સ્તમઃ ॥ ૩૨.૧૧૭॥

દુઃખેઽપિ તેષામિહ તારતમ્યં કલેઃ પરં દુઃખમિહાખિલાચ્ચ ।
યથા વિરિ ઞ્ચસ્ય સુખં પરં સ્યાન્મુક્તૌ હરિદ્વેષકૃતો વિશેષઃ ॥ ૩૨.૧૧૮॥

કેચિત્પિશાચાસુરરાક્ષસત્વમવાપ્ય વિષ્ણોરપિ તત્પરાણામ્ ।
દ્વેષાત્તમોઽન્ધં ત્વરયા સમાપ્નુયુર્દેવાઃ સ્વકાલે નિજયોગ્યમુક્તિમ્ ॥ ૩૨.૧૧૯॥

ચતુઃ સહસ્રે ત્રિશતોત્તરે ગતે સં વત્સરાણાં તુ કલૌ પૃથિવ્યામ્ ।
જાતઃ પુનર્વિપ્રતનુઃ સ ભીમો દૈત્યૈર્નિગૂઢં હરિતત્ત્વમાહ ॥ ૩૨.૧૨૦॥

ઋ્લ્ક્ષિવ્। તદૈવ કૃષ્ણાઽપિ ભુવિ પ્રજાતા પ્રીત્યૈ હરેરન્ધતમસ્યપાતયત્ ।
મહાસુરાન્ વિષ્ણુપરાર્જુનાદ્યા કૃતે પ્રજાતા હરિતોષણાય ।
પુનશ્ચ તે સ્થાનમવાપ્ય સર્વે સ્વીયં પરાન્તે તુ વિમુક્તિમાપ્નુયુઃ ॥ ૩૨.૧૨૧॥

વાયુત્વમાપ્તઃ સ હનૂમદં શો બ્રાહ્મં પદં પ્રાપ્ય વૃકોદરશ્ચ ।
વાગીશ્વરત્વં ગતયૈવ કૃષ્ણયા સહૈવ મુક્તિં ગમિતાઽખિલોત્તમામ્ ॥ ૩૨.૧૨૨॥

ભુવિ દ્યુલોકે ચ વિરિ ઞ્ચતાયાં મુક્તૌ ચ તાભ્યામધિકં સમસ્તાત્ ।
સન્તોષ્યતે પૂર્ણગુણો રમેશઃ સદૈવ નિત્યોર્જિતતદ્રતિભ્યામ્ ॥ ૩૨.૧૨૩॥

“ભૂષન્ન યોઽધિ બભ્રૂષુ નમ્નતે” “બલ્। ઇત્થા તદ્વપુષે ધાયિ દર્શતમ્” ।
“તાં સુ તે કીર્તિં મઘવન્મહિત્વા” (૮૪) ઇત્યાદિસૂક્તાનિ ચ તત્પ્રમાણમ્ ॥ ૩૨.૧૨૪॥

અન્યાનિ વાક્યાનિ ચ વૈદિકાનિ સપઞ્ચરાત્રોક્તિપુરાણકાનિ ।
પૃષ્ટશ્ચ ભીષ્મોઽત્ર યુધિષ્ઠિરેણૈતન્મોક્ષધર્મેષ્વપિ કિઞ્ચિદાહ ॥ ૩૨.૧૨૫॥

એવં પ્રયાતેષુ સુકેશવેષુ સ્વાનેવ લોકાન્ યદુપાણ્ડવેષુ ।
પરીક્ષિદાદ્યાસ્તુ તદન્વયોત્થા વ્યાસાનુશિષ્ટાઃ પૃથિવીમરક્ષન્ ॥ ૩૨.૧૨૬॥

તૈ ક્ષેમકાન્તૈરિહ ભારતાદિશાસ્ત્રાણિ શ ૃણ્વદ્ભિરશેષવિદ્ભિઃ ।
વ્યાસપ્રભાવાચ્ચ કલૌ ચ ધર્મો જ્ઞાનં ચ સુત્રાતમગાન્ન નાશમ્ ॥ ૩૨.૧૨૭॥

સં વત્સરાણાં તુ સહસ્રકે ગતે પ્રાપ્તેષુ ચદ્યામખિલેષુ સત્સુ ।
દગ્ધા પુરા યે ત્રિપુરં ધ્રતૈવ રુદ્રેણ જાતાઃ પૃથિવીતલ્. એ તે ॥ ૩૨.૧૨૮॥

અદર્શનં સર્વમુનીન્દ્રવૃન્દૈઃ સહૈવ સજ્જ્ઞાનમહાનિદાને ।
વ્યાસે પ્રયાતેઽપિ સુતત્ત્વવિદ્યા તત્સમ્પ્રદાયાદપિ તૈરવાપ્તા ॥ ૩૨.૧૨૯॥

ઉત્સાદિતત્વાત્તુ દુરાગમાનાં તત્સમ્પ્રદાયસ્ય ચ નાશિતત્વાત્ ।
પ્રસારિતત્વાચ્ચ સદાગમાનાં પાપા અપિ જ્ઞાનમવાપુરેતત્ ॥ ૩૨.૧૩૦॥

શુના પુરોડાશમિવાવલીઢં વેદશ્રુતિં વાઽન્ત્યજનૈરવામામ્ ।
(૮૪) ઋગ્વેદ ૧.૧૪૦.૬, ૧.૧૪૧.૧, ૧૦.૫૪.૧
રૢ્લ્ક્ષ્વ્ઽનન્તદુઃખામિસુયોગ્યદૈત્યૈર્વિધામવામાં તુ ન સેહિરે સુરાઃ ॥ ૩૨.૧૩૧॥

નાવાગ્ગતિઃ ક્વાપિ સુવેદિનાં ભવેત્પ્રાપ્યં સુખં નિત્યમવશ્યમેભિઃ ।
પ્રાપ્યં તમોઽન્ધં ત્વસુરૈર્ન મુક્તિઃ કદાચિદાપ્યા તદચિન્તયન્ સુરાઃ ॥ ૩૨.૧૩૨॥

જ્ઞાનપ્રદાનાય સતાં તદન્યજ્ઞાનપ્રણાશાય ચ વિષ્ણુનૈતે ।
ક્લૃપ્તાસ્તતસ્તે સવિરિ ઞ્ચશર્વા વિજ્ઞાપયામાસુરુપેત્ય વિષ્ણુમ્ ॥ ૩૨.૧૩૩॥

ક્ષીરોદધેરુત્તરતીરવિષ્ઠિતૈરભિષ્ટુતઃ સુષ્ટુતિભિઃ પુરુષ્ટુતઃ ।
પ્રદાય તેષામભયં રમાપતિઃ ક્ષણાદભૂચ્ચારુતમાકૃતિઃ શિશુઃ ॥ ૩૨.૧૩૪॥

યસ્ત્રૈપુરાણાં પ્રથમોઽત્ર જાતઃ શુદ્ધોદનેત્યેવ જિનેતિ ચોક્તઃ ।
ક્ષેત્રે ગયાખ્યેઽસ્ય શિશું પ્રજાતં સમ્પ્રાસ્ય દૂરેઽત્ર બભૂવ વિષ્ણુઃ ।
અજાનમાનાઃ સ્વશિશું ગતં તં શિશું હરિં વીક્ષ્ય નિજં સ્મ મેનિરે ॥ ૩૨.૧૩૫॥

તેષાં તદા વૈદિકકર્મ વીક્ષ્ય સમ્પ્રાહસત્તદ્વપુષૈવ કેશવઃ ।
તં જાતમાત્રં પ્રહસન્તમીક્ષ્ય સુવિસ્મિતૈઃ પૃષ્ટ ઉવાચ વિષ્ણુઃ ।
બુદ્ધોઽહમિત્યેવ સુનિત્યબોધાજ્જગાદ ચૈષામથ બુદ્ધદર્શનમ્ ॥ ૩૨.૧૩૬॥

તથાઽપ્યવિશ્વાસમવેક્ષ્ય તેષાં સસ્માર દેવાનખિલાન્ જનાર્દનઃ ।
વિજ્ઞાય તે તસ્ય મનોગતં નિજાન્ પ્રચિક્ષિપુર્હેતિગણાનમુષ્મિન્ ॥ ૩૨.૧૩૭॥

સ જાતમાત્રઃ શિવપૂર્વકાણાં શૂલાદિહેતીરખિલા નિગીર્ય ।
દૈત્યાતિમોહાય નિજં ચ ચક્રં સ્વમુક્તમાશ્વેવ વશી સમગ્રહીત્ ॥ ૩૨.૧૩૮॥

તદાસનત્વેન વિધાય તસ્મિન્ સમાસ્થિતં દેવગણાઃ પ્રણમ્ય ।
જગ્મુઃ સ્વધામાનિ વચાં સિ ચાસ્ય સ્વીચક્રુરાશ્વેવ જિનાદિદૈત્યાઃ ॥ ૩૨.૧૩૯॥

તે જ્ઞાનધર્માવપહાય પાપા વિમોહિતા દેવવરેણ સર્વે ।
જગ્મુસ્તમોઽન્ધં ક્ષણિકં સમસ્તં જ્ઞાનં નસચ્ચેતિ દૃઢં સ્મરન્તઃ ॥ ૩૨.૧૪૦॥

નારાયણોઽપ્યાપ્ય સુરેન્દ્રવૃન્દં વૃત્તં ચ તેષામખિલં નિગદ્ય ।
પૃષ્ટશ્ચ તૈરાહ નિજં હૃદિસ્થં બૌદ્ધાગમાર્થં સૃતિબન્ધમોચનમ્ ॥ ૩૨.૧૪૧॥

ક્ષણાદયં ક્ષણિકાસ્તદ્વિશેષા યતઃ પ્રયાન્ત્યેવ નિસર્ગતોઽખિલાઃ ।
રૢ્લ્ક્ષ્વ।તતઃ સ્થિરત્વેઽપિ વિશેષસં શ્રયાદુક્તં ક્ષણસ્થાયિ મયા સમસ્તમ્ ॥ ૩૨.૧૪૨॥

તદ્વાન્ વિશેષશ્ચ યતો ન ભિન્નો સદા સ્વનિર્વાહકશક્તિયુક્તૌ ।

અતઃ ક્ષણસ્થાયિ સમસ્તમેતત્સ્થિરાત્મકં ચેતિ હિ નાસ્તિ ભેદઃ ॥ ૩૨.૧૪૩॥

જ્ઞોઽહં સદૈકઃ પરમો મયૈતત્સદાઽનનીયં હિ યતોઽસ્વતન્ત્રમ્ ।
જ્ઞાનાત્મકં વિશ્વમતો મયોક્તં જડસ્વરૂપં ચ કિમુ સ્મ ચેતનમ્ ॥ ૩૨.૧૪૪॥

શં શીલકોઽહં યત એવ ચોચ્ચઃ શૂનામકસ્તદ્ધિ મયા નિધેયમ્ ।
શૂન્યાભિધં દોષવિરુદ્ધરૂપો દોષોજ્ઝિતોઽન્યસ્ત્વખિલાદનામા ।
એનૈવ સાધ્યં ત્વસદેવ નામતસ્ત્વભાવ એનૈવ ભવેદ્યતસ્તત્ ॥ ૩૨.૧૪૫॥

ઇત્યાદિ બોદ્ધવ્યમિદં સમસ્તં મયોદિતં ક્વાપિ ન હેયમસ્તિ ।
ઇત્યાદિ દેવાન્ પ્રતિબોધયંશ્ચ દેવૈઃ સહોવાસ સ બુદ્ધદેવઃ ।
ગત્વા સ્વધામાપ્યપરેણ રૂપેણાઽસ્તે પૃથક્ચૈકતનુર્યથેષ્ટમ્ ॥ ૩૨.૧૪૬॥

તતસ્તુ બુદ્ધોદિતપક્ષસં સ્થો જિનોઽપિ ચક્રે મતમન્યદેવ ।
બૌદ્ધેન જૈનેન મતેન ચૈવ દૈત્યાં શકાઃ પ્રીતિમગુઃ સમસ્તાઃ ॥ ૩૨.૧૪૭॥

પ્રશાન્તવિદ્યેત્યભિધં તથાઽન્યદ્બુદ્ધોક્તશાસ્ત્રં ત્રિદશા અવાપ્ય ।
તોષં યયુર્વેદસમસ્તસારં યામાસ્થિતાનામચિરેણ મુક્તિઃ ॥ ૩૨.૧૪૮॥

અન્યે મનુષ્યા અપિ ભારતાદ્યં સત્સમ્પ્રદાયં પરિગૃહ્ય વિષ્ણુમ્ ।
યજન્ત આપુઃ પરમાં ગતિં તન્ન સેહિરે ક્રોધવશાદિદૈત્યાઃ ॥ ૩૨.૧૪૯॥

શૈવં તપસ્તે વિપુલં વિધાય જગદ્વિમોહોર્જિતશક્તિમસ્માત્ ।
પ્રાપ્ય પ્રજાતા ભુવિ મોહનં ચ ચક્રુઃ કુતર્કૈરભિદાં વદન્તઃ ॥ ૩૨.૧૫૦॥

તેષાં પ્રપાતાય સતાં ચ મુક્ત્યૈ જન્માઽસ ભીમસ્ય યદુક્તમત્ર ।
દુર્ગા પુનર્વિપ્રકુલેઽવતીર્ણા હનિષ્યતિ વ્રાતમથાસુરાણામ્ ॥ ૩૨.૧૫૧॥

તતઃ કલેરન્તમવાપ્ય ધર્મજ્ઞાનાદિકલ્યાણગુણપ્રહીને ।
લોકે વિરિ ઞ્ચત્રિપુરઘ્નશક્રપૂર્વાઃ પયોબ્ધિં ત્રિદશાઃ પ્રજગ્મુઃ ॥ ૩૨.૧૫૨॥

નારાયણસ્તૈઃ સ્તુતિપૂર્વમર્થિતો ભવાય લોકસ્ય સ શમ્ભલ્। આખ્યે ।
ઞ્લ્ક્ષ્વી।ગ્રામે મુનેર્વિષ્ણુયશોઽભિધસ્ય ગૃહે બભૂવાઽવિરચિન્ત્યશક્તિઃ ॥ ૩૨.૧૫૩॥

કલેસ્તુ કાત્કારત એષ કલ્કી જ્ઞાનં કલં કં સુખમેવ તદ્વાન્ ।
કલ્કીતિ વા તેન સમસ્તદસ્યુવિનાશનં તેન દિનાદ્વ્યધાયિ ॥ ૩૨.૧૫૪॥

અધર્મવૃત્તં વિમુખં હરેશ્ચ નિહત્ય નિઃ શેષજનં તુરઙ્ગી ।
સં સ્થાપયામાસ સ ધર્મસેતું જ્ઞાનં સ્વભક્તિં ચ નિજપ્રજાસુ ॥ ૩૨.૧૫૫॥

ઇત્યાદ્યનન્તાનિ હરેરુદારકર્માણિ રૂપાણિ ચ સદ્ગુણાશ્ચ ।

નિત્યવ્યપેતાખિલદોષકસ્ય બ્રહ્મેત્યનન્તેતિ ચ નામ યેન ॥ ૩૨.૧૫૬॥

આનન્દતીર્થાખ્યમુનિઃ સુપૂર્ણપ્રજ્ઞાભિધો ગ્રન્થમિમં ચકાર ।
નારાયણેનાભિહિતો બદર્યાં તસ્યૈવ શિષ્યો જગદેકભર્તુઃ ॥ ૩૨.૧૫૭॥

યસ્તત્પ્રસાદાદખિલાંશ્ચ વેદાન્ સપઞ્ચરાત્રાન્ સરહસ્યસઙ્ગ્રહાન્ ।
વેદેતિહાસાંશ્ચ પુરાણયુક્તાન્ યથાવદન્યા અપિ સર્વવિદ્યાઃ ॥ ૩૨.૧૫૮॥

સમસ્તશાસ્ત્રાર્થવિનિર્ણયોઽયં વિશેષતો ભારતવર્ત્મચારી ।
ગ્રન્થઃ કૃતોઽયં જગતાં જનિત્રં હરિં ગુરું પ્રીણયતાઽમુનૈવ ।
વિનિર્ણયો નાસ્ત્યમુના વિના યદ્વિપ્રસ્થિતાનામિવ સર્વવાચામ્ ॥ ૩૨.૧૫૯॥

તદ્બ્રહ્મસૂત્રાણિ ચકાર કૃષ્ણો વ્યાખ્યાઽથ તેષામયથા કૃતાઽન્યૈઃ ।
નિગૂહિતં યત્પુરુષોત્તમત્વં સૂત્રોક્તમપ્યત્ર મહાસુરેન્દ્રૈઃ ।
જીવેશ્વરૈક્યં પ્રવદદ્ભિરુગ્રૈર્વ્યાખ્યાય સૂત્રાણિ ચકાર ચાઽવિઃ ॥ ૩૨.૧૬૦॥

વ્યાસાજ્ઞયા ભાષ્યવરં વિધાય પૃથક્પૃથક્ચોપનિષત્સુભાષ્યમ્ ।
કૃત્વાઽખિલાન્યં પુરુષોત્તમં ચ હરિં વદન્તીતિ સમર્થયિત્વા ॥ ૩૨.૧૬૧॥

તનુસ્તૃતીયા પવનસ્ય સેયં સદ્ભારતાર્થપ્રતિદીપનાય ।
ગ્રન્થં ચકારેમમુદીર્ણવિદ્યા યસ્મિન્ રમન્તે હરિપાદભક્તાઃ ॥ ૩૨.૧૬૨॥

"તૃતીયમસ્ય વૃષભસ્ય દોહસે દશપ્રમતિં જનયન્ત યોષણઃ ।
નિર્યદીં બુધ્નાન્મહિષસ્ય વર્પસ ઈશાનાસઃ શવસા ક્રન્ત સૂરયઃ ।
ઋક્ષ્વીઇ।યદીમનુ પ્રદિવો મધ્વ આધવે ગુહાસન્તં માતરિશ્વા મથાયતિ" ॥ ૩૨.૧૬૩॥

ઇત્યાદિવાક્યોક્તમિદં સમસ્તં તથા પુરાણેષુ ચ પઞ્ચરાત્રે ।
અત્રોદિતા યાશ્ચ કથાઃ સમસ્તા વેદેતિહાસાદિવિનિર્ણયોક્તાઃ ॥ ૩૨.૧૬૪॥

તસ્માદયં ગ્રન્થવરોઽખિલોરુધર્માદિમોક્ષાન્તપુમર્થહેતુઃ ।
કિં વોદિતૈરસ્ય ગુણૈસ્તતોઽન્યૈર્નારાયણઃ પ્રીતિમુપૈત્યતોઽલમ્ ॥ ૩૨.૧૬૫॥

યસ્ય ત્રીણ્યુદિતાનિ વેદવચને રૂપાણિ દિવ્યાન્યલં
બટ્તદ્દર્શતમિત્થમેવ નિહિતં દેવસ્ય ભર્ગો મહત્ ।
વાયો રામવચોનયં પ્રથમકં પૃક્ષો દ્વિતીયં વપુઃ
મધ્વો યત્તુ તૃતીયમેતદમુના ગ્રન્થઃ કૃતઃ કેશવે ॥ ૩૨.૧૬૬॥

યઃ સર્વગુણસમ્પૂર્ણઃ સર્વદોષવિવર્જિતઃ ।
પ્રીયતાં પ્રીત એવાલં વિષ્ણુર્મે પરમઃ સુહૃત્ ॥ ૩૨.૧૬૭॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતે શ્રીમહાભારતતાત્પર્યનિર્ણયે
પાણ્ડવસ્વર્ગારોહણં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥

(મધ્વાચાર્યવિરચિતઃ)
સમાપ્તોઽયં ગ્રન્થઃ ।

*Shri Mahabharata Tatparyanirnayah*
pdf was typeset on October 7, 2025

Please send corrections to *sanskrit@cheerful.com*